N. A.

Shivarahasya Pt 7 (Purvardha) Sec 1

शिवरहस्य सप्तमांश (पूर्वार्ध) भाग 1

Sanskrit

Paper - Handwritten

1977 sambat (97 years old)

202 Folio

15"x9"

Complete

॥शिवरहस्यसप्तमांशप्रारंभः॥ ॥

श्रीगणेशायनमः॥ ॥श्रीसरस्वत्यैनमः॥श्रीगौरीशंकराभ्यान्नमः॥ ॥श्रीशिवायनमः॥हरायनमः॥ ॥ऋषय उवाच॥
सूतवेदार्थतत्वज्ञशिवध्यानपरायण॥मुमुक्षूपायंवदास्मभ्यंकृपालोमुनिसत्तम॥१॥कःसेव्यः सर्वदेवेषु कोवाजप्योमनुः
सदा॥ स्थानंयंकुत्रवानित्यंकिंवासर्वार्थसाधकं॥२॥ ॥सूतउवाच॥ ॥धन्यान्मन्यामहेनूनमनन्यशरणान्मुनीन्॥
वन्याशिनोवनेवासाननन्यस्तमन्यूनकल्मषान्॥३॥भवद्भिः सर्ववेदार्थतत्वंज्ञातमकल्मषैः॥परात्परतरः शर्वः सर्व
दापूज्यंतधिया॥४॥भवद्भिः सर्ववेदार्थो ज्ञानरम्यास्तियद्यपि॥तथापिकिंचिद्वक्ष्यामियथाज्ञातंमयातथा॥५॥पु
राकैलासशिखरेसुखासीनंजगत्प्रभुं॥वेदांतवेद्यमीशानंशंकरंलोकशंकरं॥६॥विश्वतश्चक्षुषंदेवंविश्वतोमु
खमव्ययं॥विश्वतोबाहुमाराध्यंविश्वतःपादमीश्वरं॥७॥निष्कलंनिर्गुणंशांतंनिरवद्यमनामयं॥निष्प्रपंचंनि
राकारंनिर्मलंनिरुपाधिकं॥८॥चारुप्रसन्नवदनंसर्वाभरणभूषितं॥गौरीभूषितवामांगंब्रह्मविष्ण्वादिसेवितं॥९॥अ
प्रमेयंजगज्जन्मस्थितिसंहारकारणं॥सोमसूर्याग्निनयनंसोमार्धकृतशेखरं॥१०॥दिव्यचंदनलिप्तांगंनवबिल्व
दलार्चितं॥व्याघ्रचर्मपरीधानंअनंतंदुरविभ्रमं॥११॥नानामणिगणाकीर्णकिरीटकटकावृतं॥दयासुधार्द्रनय
नंवरदाभयपाणिनं॥१२॥निर्यत्संतोषपूर्णांगमुमालिंगितविग्रहं॥विलोक्यातीवसंतुष्टः षण्मुखःसांबमीश्वरं॥
१३॥मत्वाकृतार्थमात्मानंप्रणिपत्यसदाशिवं॥पप्रच्छसर्वलोकानांमुमुक्षूपायंकृतांजलिः॥१४॥ ॥श्रीस्कंद उवाच॥ ॥
विश्वेश्वरमहादेवविष्णुब्रह्मादिवंदित॥देवानांमानवानांचकिंमोक्षस्यास्तिसाधनं॥१५॥तवनामान्यनंतानिसंति
यद्यपिशंकर॥तथापितानिदिव्यानिनज्ञायंतेमयाधुना॥१६॥प्रियाणिशिवनामानिसर्वाणिशिवयद्यपि॥तथापिका
निरम्याणितेषुप्रियतमानिते॥१७॥तानिसर्वार्थदान्यद्यकृपयावक्तुमर्हसि॥यन्नामस्मरणाद्देवसद्योमुच्येतपात
कैः॥१८॥रसनारससारज्ञात्वन्नामामृतपायिनी॥यस्यास्तिसपुमान्धन्योमान्योब्रह्मनुजैरपि॥१९॥जन्मांतरसहस्रे
षुनप्तंयदितपस्तदा॥त्वन्नामस्मरणासक्तंचित्तंजंतोःप्रजायते॥२०॥महेशनामामृतदिव्यधारापरिप्लुतांगोद्भवम-

धा गोपि॥ नशोकमाप्नोति नरो यतो हं संरक्षितो यद्दिगलः शिवेन ॥२१॥ यतो विभूतिकवचाः शिवनाम्नास्वपाणयः॥
चत्वार एव यामीये श्चकुपुर्धंपरा मुदा ॥२२॥ ब्रह्महत्यासहस्राणि पुरा कृत्वापि पुल्कसः॥ शिवेति नामविमलं श्रु
त्वामोक्षंगतः पुरा॥२३॥ एतेपि प्रमथाः श्रुधाः शिवनामामृतास्वादनाः॥ इंद्राद्यर्चितपादाब्जः वसंति शिवसंनिधौ॥२४॥
शिवनामैव संसारमहारोगैकशामकं॥ नान्यन्तत्संसाररोगस्य शामकं दृश्यते मया॥२५॥ शिवशंकर विश्वेश महादेवे
ति यन्मया॥ पूर्वमुच्चरितं युद्धे जयस्तेनाभवन्मम॥२५॥ शंकरेशमहेशेति नामदिव्यं महावने॥ पुराश्रुतं पिशाचेन
ततस्तस्मात्समोचितः॥२६॥ समस्तवेदवेदांतसारभूतं शिवप्रदं॥ शिवनामाम्रतं दिव्यं पेयं सर्वार्थसाधकं॥ २७॥ ये
संततं शंकर मादरेणमनः सरोजासन सन्निविष्टं॥ ध्यायंति शंभुं स्मरणानुरक्ताः त एव धन्याः शिवसंमताश्च॥२८॥
शिवनामामृतास्तुष्टरसनाशिवपूजकाः॥ शिवध्यानरतानित्यं संनिधन्याः क्वचित्क्वचित्॥२९॥ इत्युक्त्वा वेपमानां
गः प्रणिपत्य पुनः शिवं॥ कुमारः पार्श्वतस्तस्थौ नतमूर्धाकृतांजलिः॥३०॥ ॥सूत उवाच॥ ॥कुमारोदीरितां वाचं
सर्वलोकहितावहां॥ श्रुत्वा प्रसन्नवदनः तमुवाच सदाशिवः॥३१॥ ॥श्रीशिव उवाच॥ ॥साधु साधु कुमाराद्य स
म्यक्पृष्टं त्वयाधुना॥ यदिदानीं त्वया पृष्टं तद्वक्ष्ये शृणु सादरं॥३२॥ एवमेव पुरा गौर्या पृष्टः कारयामहं सदा॥ स
मारव्याते मया सम्यक्सर्वेषां मोक्षसाधकं॥३३॥ दिव्यान्यनंतनामानि संति तन्मध्यगं परं॥ अष्टोत्तरसहस्रं तु ना
म्नां प्रियतरं मम॥३४॥ एकैकमेव तन्मध्ये नाम सर्वार्थसाधकं॥ मयापि नाम्नां सर्वेषां फलं वक्तुं न शक्यते॥३५॥ तिला
क्षतैर्बिल्वपत्रैः कमलैः कोमलैर्नवैः॥ पूजयिष्यति मां भक्त्या यस्त्वेतन्नामसंख्यया॥३६॥ स पापेभ्यः संसृतेश्च मुच्य
ते नात्र संशयः॥ ततो मम मांतिकं याति पुनरावृत्ति दुर्लभं॥३७॥ एकैकेनैव नाम्ना मामर्चयित्वा दृढव्रताः॥ श्रेष्ठं फलं
प्राप्नुवंति सत्यमेवोच्यते मया॥३८॥ एतन्नामावलीं यस्तु पठन्मां प्रणमेत्सदा॥ स याति मम सायुज्यं पश्चाद्बंधुसमन्वि
तः॥३९॥ स्पृष्ट्वा महालिंगममलं मेतन्नामानि यः पठेत्॥ स पातकेभ्यः सर्वेभ्यः सद्य एव प्रमुच्यते॥४०॥ यस्त्वेतन्नामभि

स्सम्यक्त्रिकालं वत्सरावधि ।। मामर्चयन्ति निर्दंभः स इदं वै द्रोऽभविष्यति ।।५१।। तन्नामानुसंधाननिरतः सर्वदा मुदा ।।म
मप्रियतरस्तस्मिन्शिवसाम्यं ह्यमाद्दरात् ।।५२।। तन्नूजया पूजितो हं सर्वदाहं यतो मम ।। तस्मात्प्रियतरं रुच्छा नेमन्यन्ने वहि
द्वयपते ।।५३।। हिरण्यबाहुरित्यादि नाम्नां चांभ्यरहं ऋषिः ।। देवताप्यहमेवात्र शक्तिर्गौरी मम प्रिया ।। महेश एव संसे
व्यः सर्वैरिति हि कीलकं ।। धर्माद्यर्थाः फलं क्षेयं फलदायी सदाशिवः ।।५५।। ।।ॐ हिरण्यबाहुः सेनानीर्दिक्पतिः
तरुराट् हरः ।। हरिकेशः पशुपतिर्महान्सस्पिंजरो मृडः ।।१।। विव्याधिर्बभ्लुशः श्रेष्ठः परमात्मा सनातनः ।।स
र्वान्नराट् जगत्कर्ता पुष्टेशो नंदिकेश्वरः ।।२।। आततायी महारुद्रः संसारास्त्रः सुरेश्वरः ।। उपवीती रहं त्यात्मा
क्षेत्रेशो वननायकः ।।३।। रोहितः स्थपतिः सूतो वाणिजो मंत्रिरुन्नतः ।। वृक्षेशो हुतभुग्देवो भुवंतिर्वारिवस्कृ
तः ।।४।। उच्चैर्घोषो घोररूपः पत्तीशः पाशमोचकः ।। ओषधीशः पंचवक्त्रः कृत्स्नवीतो भयानकः ।।५।। सहमानः
स्वर्णरेताः निव्याधिर्निरुपप्लवः ।। आव्याधिनीशः ककुभो निषंगी स्तेनरक्षकः ।।६।। मन्त्रात्मा तस्कराध्यक्षो वं
चकः परिवंचकः ।। अरण्येशः परिचरो निचेरुः स्तायुरक्षकः ।।७।। प्रकृंतेशो गिरिचरो कुलुंचेशो गुहेष्टदः ।। भवः
शर्वो नीलकंठः कपर्दी त्रिपुरांतकः ।। ८।। व्युप्तकेशो गिरिशयः सहस्राक्षः सहस्रपात् ।। शिपिविष्टश्चंद्रमौलि
र्ह्रस्वो मीढुष्टमोऽनघः ।। वामनो व्यापकः शूली वर्षीयानजडोऽनणुः ।। ऊर्व्यः सूर्म्योऽग्रियः शीभ्यः प्रथमः पावकाकृ
तिः ।।१०।। कुचेरस्तारकस्तारो वस्वन्योऽनंतविग्रहः ।। द्वीप्यः स्रोतस्य ईशानो धुर्यो गव्ययनो यमः ।।११।। पूर्वजोऽपर
जो ज्येष्ठः कनिष्ठो विश्वलोचनः ।। अपगल्भो मध्यमोर्व्यो जघन्यो बुध्नियः प्रभुः ।।१२।। प्रतिसर्योऽनंतरूपः सोभ्यो या
म्यः सुराश्रयः ।। खल्यो वर्ण्योऽभयः क्षेम्यः श्लोक्यः पथ्यो नभोऽग्रणीः ।।१३।। वन्यो वसान्यः पूतात्मा श्रवः कक्ष्यः प्रतिश्र
वः ।। आशुषेणो महासेनो महावीरो महारथः ।। १४।। शूरो निघातुको वर्मी वरूथी बिल्मिरुद्यतः ।। श्रुतसेनः श्रुतः सा
क्षी कवची वशकृद्वशी ।।१५।। आहनन्यो नन्यनाथो दुंदुभ्योऽरिनाशकः ।। धृष्णुः प्रमृशाइत्यात्मा वदान्यो वेदसंभ

नः॥१६॥ तीक्ष्णेषुपाणिः प्रह्लिनः खायुधः शास्त्रवित्तमः॥ सुधन्वा सुप्रसन्नात्मा विश्वचक्षुः सदागतिः॥१७॥ स्तु
त्यः पथ्यो विश्वबाहुः काठ्यो नीप्यः शुचिस्मितः॥ सूद्यः सरस्यो वैशन्तो नाद्यः कूप्यो ऋषिर्मनुः॥१८॥ वर्ष्यो वर्ष्योऽव
र्षरूपः कुमारः कुशलोमलः॥ मेघ्यो वध्योऽमोघशक्तिः विद्युत्यो मोघविक्रमः॥१९॥ दुरासदो दुराराध्यः निर्द्वन्द्वो दुःस
हर्षभः॥ ईध्रियः क्रुश्रशयनो जानुकर्ण्यः पुरुष्टुतः॥२०॥ आतप्यो वायुरजरो वात्यः कात्यायनीप्रियः॥ वास्तव्यो
वास्तुपो रेष्यो विश्वमूर्धा वसुप्रदः॥२१॥ सोमस्ताम्रोऽरुणः शंभो रुद्रः सुरसकरः सुहृत्॥ उग्रोऽनुग्रोऽभीमकर्माभी
मोऽभीमपराक्रमः॥२२॥ अग्रेवधो हनीयात्मा हंता दूरेवधो वधः॥ शंभुर्मयोभुवो नित्यः शंकरः कीर्तिसा
गरः॥२३॥ मयः स्करः शिवतरः खंडपर्शुरजः शुचिः॥ तीर्थ्यः कुल्योऽमलाधीशः पार्यो वार्योऽमृताकरः॥२४॥
शुद्धः प्रतरणो मुख्यः शुद्धपाणिरलोलुपः॥ उच्चः उत्तरणस्तार्यः तार्यज्ञः तार्यहृद्गतः॥२५॥ आतार्यः सारभूता
त्मा सारग्राही दुरत्ययः॥ आलाद्यो मोक्षदः पथ्यो नर्थहा सत्यसंगरः॥२६॥ शष्प्यः फेन्यः प्रवाह्यो ह्यसिकत्यः
सैकताश्रयः॥ इरिण्यो ग्रामणिः पुण्यः शरण्यः शुद्धशासनः॥२७॥ वरेण्यो यज्ञरूपश्च यज्ञेशो यज्ञनायकः॥
यज्ञकर्त्ता यज्ञभोक्ता यज्ञविघ्नविनाशकः॥२८॥ यज्ञकर्मफलाध्यक्षो यज्ञमूर्त्तिरनातुरः॥ प्रपथ्यः किंशिलो गे
ह्यो गह्यस्तल्प्यो धनाकरः॥२९॥ पुलस्त्यः क्षयणो गोष्ठ्यो गोविंदो गीतसत्क्रियः॥ हृदय्यो हृद्रुद्रः हृद्यो गह्वरेष्ठः
प्रभाकरः॥३०॥ निवेष्प्यो नियतोऽयंता पांडुलव्यः सुमत्तापनः॥ शुष्क्यो हरित्यः पूतात्मा रजस्यः सात्विकप्रियः॥३१॥
लोप्यो लुप्यः पर्णपाद्यः पर्ण्यः पूर्णः पुरातनः॥ भूतो भूतपतिः भूपो भूधरो भूधरायुधः॥३२॥ भूतसंघो भूतमूर्तिः भू
तिहा भूतिभूषणः॥ मदनो मादको माद्यो मदहा मधुरप्रियः॥३३॥ मधुर्मधुकरः क्रूरो मधुरो मदनांतकः॥ निरंजनो निराधा
रो निर्लिप्तो निरुपाधिकः॥३४॥ निष्प्रपंचो निराकारो निरीहो निरुपद्रवः॥ सत्वः सत्वगुणोपेतः सत्ववित्सत्ववित्प्रियः॥
३५॥ सत्वनिष्ठः सत्वमूर्तिः सत्वेशः सत्ववित्तमः॥ समस्तजगदाधारः समस्तगुणसागरः॥३६॥ समस्तदुःखविध्वंसी सम

स्नानेरकारकः॥रुद्राक्षमालाभरणो रुद्राक्षप्रियवत्सलः॥३७॥ रुद्राक्षवक्षा रुद्राक्षरूपो रुद्राक्षभक्षकः॥विश्वेश्वरो
वीरभद्रः सम्राट् दक्षमखांतकः॥३८॥ विघ्नेश्वरो विघ्नकर्ता गुरुर्देवशिखामणिः॥भुजगेंद्रलसत्कंठो भुजंगाभरणप्रियः॥
३९॥ भुजंगविलसत्कर्णो भुजंगवलयावृतः॥मुनिवंद्यो मुनिश्रेष्ठो मुनिवृंदनिषेवितः॥४०॥ मुनिहृत्पुंडरीकस्थो मुनी
संघैकजीवनः॥ मुनीमृग्यो वेदमृग्यो मृगहस्तो मृगेश्वरः॥मृगेंद्रचर्मवसनो नरसिंहनिपातनः॥मृत्युंजयो मृत्यु
मृत्युरपमृत्युविनाशकः ४२ दुष्टमृत्युरदुष्टेष्टः मृत्युहा मृत्युपूजितः॥ऊर्ध्वो हिरण्यः परमो निधनेशो धनाधिपः॥
४३॥ यजुर्मूर्तिः साममूर्तिः ऋङ्मूर्तिर्मूर्तिवर्जितः॥व्यक्तो व्यक्ततमो व्यक्तो व्यक्ताव्यक्तमो जवी॥४४॥ लिंग
मूर्तिरलिंगात्मा लिंगालिंगात्मविग्रहः॥ग्रहो ग्रहो ग्रहाधारो ग्रहाकारो ग्रहेश्वरः॥४५॥ग्रहकृद्ग्रहभिद्ग्राही ग्र
हाग्रहविलक्षणः॥कल्पाकारः कल्पकर्ता कल्परक्षणतत्परः॥४६॥ कल्पो कल्पाकृतिः कल्पनाशकः कल्पकल्प
कः॥परमात्मा प्रधानात्मा प्रधानपुरुषः शिवः॥४७॥ वेद्यो वैद्यो वेदवेद्यो वेदवेदांतसंस्तुतः॥वेदवक्त्रो वेदजिह्वो वि
जिह्वो जिह्वनाशकः॥४८॥कल्याणरूपः कल्याणः कल्याणगुणसंश्रयः॥भक्तकल्याणदो भक्तकामधेनुः सुराधि
पः॥४९॥ पावनः पावको वामो महाकालो मदापहः॥घोरपातकदावाग्निः दवभस्मकणप्रियः॥५०॥अनंतसोमसूर्या
ग्निमंडलप्रतिमप्रभः॥जगदेकप्रभुः स्वामी जगद्वंद्यो जगन्मयः॥५१॥जगदानंददो जन्मजरामरणवर्जितः॥ख
ट्वांगी नीतिमान् सत्यो देवतात्मात्मसंभवः॥५२॥कपालमालाभरणो कपाली विष्णुवल्लभः॥कमलासनकालाग्निः क
मलासनपूजितः॥५३॥कालाधीशः त्रिकालज्ञो दुष्टविग्रहवारकः॥नाट्यकर्ता नटपरो महानाट्यविशारदः॥५४॥वि
राड्रूपधरो धीरो विराड्वृषभवाहनः॥वृषांको वृषभाधीशो वृषात्मा वृषभध्वजः॥५५॥ महोन्नतो महावक्षो महावीरो म
हाभुजः॥महास्कंधो महाग्रीवो महद्वक्त्रो महच्छिराः॥५६॥महाहनुर्महादंष्ट्रो महदोष्ठो महोदरः॥सुंदरभ्रूः सुनयनः सुलला
टः सुकंधरः॥५७॥सत्यवाक्यो धर्मवेत्ता सत्यज्ञः सत्यवित्तमः॥धर्मवान् धर्मनिपुणो धर्माधर्मप्रवर्तकः॥५८॥ कृतज्ञः

कृतकृत्यात्मा कृतकृत्यः कृतागमः ॥ कृतवित्कृत्यवित्कृत्यमुत्कृतज्ञः प्रियकृत्तमः ॥५९॥ व्रतकृद्व्रतविच्छ्रेष्ठो व्रतवि
द्वान्महाव्रती ॥ व्रतप्रियो व्रताकारो व्रताधारो व्रतेश्वरः ॥६०॥ अतिरागी वीतरागो रागहेतुर्विरागवित् ॥ रागघ्नो रागि
शमनो रागदो रागिरागवित् ॥६१॥ विद्वान्विद्वत्तमो विद्वज्जनमानससंश्रयः ॥ विद्वज्जनाश्रयो विद्वज्जनस्तव्यपरा
क्रमः ॥६२॥ नीतिकृन्नीतिविन्नीतिप्रदाता नीतिवित्प्रियः ॥ विनीतवत्सलो नीतिस्वरूपो नीतिसंश्रयः ॥६३॥ क्रोधजि
त्क्रोधितः क्रोधीजनवित्क्रोधरूपधृक् ॥ क्रोधदः क्रोधहा क्रोधिजनहा क्रोधकारकः ॥६४॥ गुणवान्गुणविच्छ्रेष्ठो नि
र्गुणो गुणवित्प्रियः ॥ गुणाधारो गुणाकारो गुणकृद्गुणनाशकः ॥६५॥ वीर्यवान्वीर्यविच्छ्रेष्ठो वीर्यवित् वीर्यसंश्रयः ॥
वीर्याकारो वीर्यकरो वीर्यहा वीर्यवर्धकः ॥६६॥ कालवित्कालकृत्कालो बलकृद्बलविद्बली ॥ मनोन्मनो मनोरूपो
बलप्रमथनो बलः ॥६७॥ विद्याप्रदाता विद्येशो विद्यामात्रैकसंश्रयः ॥ विद्याकारो महाविद्यो विद्यावेद्यो विशारदः ॥
वसन्तकृद्वसन्तात्मा वसन्तेशो वसन्तदः ॥ ग्रीष्मात्मा ग्रीष्मकृद्ग्रीष्मवर्धको ग्रीष्मनाशकः ॥६९॥ प्रावृट्कृत्प्रावृडाकारः
प्रावृट्कालप्रवर्तकः ॥ प्रावृट्प्रवर्धकः प्रावृण्णाथः प्रावृड्विनाशकः ॥७०॥ शरदात्मा शरद्धेतुः शरत्कालप्रवर्तकः ॥ श
रन्नाथः शरत्कालनाशकः शरदाश्रयः ॥७१॥ हिमस्वरूपो हिमदो हिमहा हिमनायकः ॥ शैशिरात्मा शैशिरेशः शैशिरर्तुप्र
वर्तकः ॥ प्राच्यात्मा दक्षिणाकारः प्रतीच्यात्मोत्तराकृतिः ॥ ऊर्ध्वाद्यदिगाकारो नानादेशैकनायकः ॥७३॥ सर्वपक्षिमृगाकारः
सर्वपक्षिमृगाधिपः ॥ सर्वपक्षिमृगाधारो मृगाद्युत्पत्तिकारणः ॥७४॥ जीवाध्यक्षो जीववन्द्यो जीवविज्जीवरक्षकः ॥
जीवकृज्जीवहा जीवजीवनो जीवसंश्रयः ॥७५॥ ज्योतिःस्वरूपो विश्वात्मा विश्वनाथो वियत्पतिः ॥ वज्रात्मा वज्रहस्तात्मा
वज्रेशो वज्रभूषितः ॥ कुमारगुरुरीशानो गणाध्यक्षो गणाधिपः ॥ पिनाकपाणिः सूर्यात्मा सोमसूर्याग्निलोचनः ॥७७॥
अपायरहितः शान्तो दान्तो दमयिता दमः ॥ ऋषिः पुराणपुरुषः पुरुषेशः पुरंदरः ॥७८॥ कालाग्निरुद्रः सर्वेशः शमरूपः शमे
श्वरः ॥ प्रलयानलकृद्दिव्यः प्रलयानलनाशकः ॥७९॥ त्र्यंबकोऽरिषड्वर्गनाशको धनदप्रियः ॥ अक्षोभ्यः क्षोभरहितः क्षोभदः

सोमनायकः॥ ८० सदंभो दंभरहितो दंभदो दंभनाशकः॥ कुंदेंदुशंखधवलो भस्मोद्धूलितविग्रहः॥ ८१॥ भस्मधारणहृष्टात्मा
तुष्टः पुष्टोरिसूदनः॥ स्थाणुर्दिगंबरो भर्गो भगनेत्रभिदुज्ज्वलः॥ ८२॥ त्रिकाग्निः कालकालाग्निरद्वितीयो महायशाः॥ साम
प्रियः सामवेत्ता सामगः सामगप्रियः॥ ८३॥ धीरोदात्तो महाधीरो धैर्यदो धैर्यवर्धकः॥ लावण्यराशिः सर्वज्ञः सुबुद्धिर्बुद्धिमद्व
रः॥ ८४॥ तुंबवीणः कंबुकंठः शंबरारिनिकृंतनः॥ शार्दूलचर्मवसनः पूर्णानंदो जगत्प्रियः॥ ८५॥ जयप्रदो जयाध्यक्षो
जयात्मा जयकारणः॥ जंगमाजंगमाकारो जगदुत्पत्तिकारणः॥ ८६॥ जगद्रक्षाकरो वश्यो जगत्प्रलयकारणः॥ पूषदंत
भित्युत्कृष्टः पंचयज्ञप्रभंजकः॥ ८७॥ अष्टमूर्तिर्विश्वमूर्तिरतिमूर्तिरमूर्तिमान्॥ कैलासशिखरावासः कैलासशिख
रप्रियः॥ ८८॥ भक्तकैलासदः सूक्ष्मो मर्मज्ञः सर्वशिक्षकः॥ सोमः सोमकलाकारो महातेजा महातपाः॥ ८९॥ हिर
ण्यश्मश्रुरानंदः स्वर्णकेशः सुवर्णदृक्॥ ब्रह्मा विश्वसृडुर्वीशो मोचको बंधवर्जितः॥ ९०॥ स्वतंत्रः सर्वतंत्रात्मा द्युति
मानमितप्रभः॥ पुष्कराक्षः पुण्यकीर्तिः पुण्यश्रवणकीर्तनः॥ ९१॥ पुण्यमूर्तिः पुण्यदाता पुण्यापुण्यफलप्रदः॥ सा
रभूतः स्वरमयो रसभूतो रसाश्रयः॥ ९२॥ ओंकारः प्रणवो नादः प्रणतार्तिप्रभंजनः॥ निकटस्थोतिदूरस्थो वशी ब्र
ह्मांडनायकः॥ ९३॥ मंदारमूलनिलयो मंदारकुसुमावृतः॥ वृंदारकप्रियतमो वृंदारकवरार्चितः॥ ९४॥ श्रीमाननंत
कल्याणपरिपूर्णो महोदयः॥ महोत्साहो विश्वभोक्ता विश्वाशापरिपूरकः॥ ९५॥ सुलभो सुलभो लभ्यो लभ्यो लाभप्रवर्धकः॥
लाभात्मा लाभदो वक्ता द्युतिमाननसूयकः॥ ९६॥ ब्रह्मचारी दृढाचारी देवसिंहो धनप्रियः॥ वेदेड्यो देवदेशो देवदेवोत्तमो
नमः॥ ९७॥ बीजराजो बीजहेतुर्बीजदो बीजवृद्धिदः॥ बीजाधारो बीजरूपो निर्बीजो बीजनाशकः॥ ९८॥ परापरेशः प
रदः पिंगलोऽयुग्मलोचनः॥ पिंगलाक्षः सुरगुरुर्गुरुः सुरगुरुप्रियः॥ ९९॥ युगावहो युगाधीशो युगकृद्युगनाशकः॥ कर्पूर
गौरो गौरीशो गौरीगुरुगुहाश्रयः॥ १००॥ धूर्जटिः पिंगलजटो जटामंडलमंडितः॥ मनोजवो जीवहेतुरंधकासुरसूदनः॥
लोकबंधुः कलाधारः पांडुरः प्रमथाधिपः॥ अव्यक्तलक्षणो योगी योगीशो योगिपुंगवः॥ २॥ भूतावासो जनावासः सुरावासः

सुमंगलः ॥ भव वैद्यो योगी वैद्यो योगिसिंहहृदासनः ॥३॥ उत्तमोनुत्तमः शक्तः कालकूटविषादनः ॥ आशास्यः कमनी
यात्माशुभः सुंदरविग्रहः ॥४॥ भक्तकल्पतरुः स्तोता सस्तवस्तोत्रवरप्रियः ॥ अप्रमेयगुणाधारो वेदकृत वेदविग्रहः ॥५॥
कीर्त्याधारः कीर्तिकरः कीर्तिहेतुरहेतुकः ॥ अप्रधृष्यः शांतभद्रः कीर्तिस्तंभो मनोमयः ॥६॥ भूशयोन्नमयो भोक्ता महे
श्वासो महीतनुः ॥ विज्ञानमयआनंदमयः प्राणमयोन्नदः ॥७॥ सर्वलोकमयो यष्टा धर्माधर्मप्रवर्तकः ॥ अनिर्विण्णो गु
णग्राही सर्वधर्मफलप्रदः ॥८॥ दयासुधार्द्रनयनो निराशीरपरिग्रहः ॥ परार्थवृत्तिर्मधुरो मधुरप्रियदर्शनः ॥९॥
मुक्तादामपरीतांगो निःसंगो मंगलाकरः ॥ सुखप्रदः सुखाकारः सुखदुःखविवर्जितः ॥१०॥ विशृंखलो जगत्क
र्ता जितसर्वपितामहः ॥ अनपायोक्षयो मुंडी सुरूपो रूपवर्जितः ॥११॥ अतींद्रियो महामायो मायावी विगतज्वरः ॥
अमृतः शाश्वतः शांतो मृत्युहा मूकनाशकः ॥१२॥ महाप्रेतासनासीनः पिशाचानुचरावृतः ॥ गौरीविलाससद
नो नानागानविशारदः ॥१३॥ विचित्रमाल्यावसनो दिव्यचंदनचर्चितः ॥ विष्णुब्रह्मादिवंद्यांघ्रिः सुरासुरनमस्कृतः
॥१४॥ किरीटकोटिबालेंदुमणिकंकणभूषितः ॥ रत्नांगदांगो रत्नेशो रत्नरंजितपादुकः ॥१५॥ नवरत्नगणोपेत
किरीटो रत्नकंचुकः ॥ नानाविधानेकरत्नलसत्कुंडलमंडितः ॥१६॥ दिव्यरत्नगणाकीर्णकंठाभरणभूषितः ॥ नवव्या
लमणिर्नासापुटभ्राजितमौक्तिकः ॥१७॥ रत्नांगुलीयविलसत्करशाखानखप्रभः ॥ रत्नभ्राजद्धेमसूत्रलसत्क
टितटः पटः ॥१८॥ वामांगभागविलसत्पार्वतीवीक्षणप्रियः ॥ लीलावलंबितवपुर्भक्तमानसमंदिरः ॥१९॥ मंदमं
दारपुष्पौघलसद्वायुनिषेवितः ॥ कस्तूरीविलसत्फालो दिव्यवेषविराजितः ॥२०॥ दिव्यदेहप्रभाकूटसंदीपितदि
गंतरः ॥ देवासुरगुरुः स्तव्यो देवासुरनमस्कृतः ॥२१॥ हस्तराजत्पुंडरीकः पुंडरीकनिभेक्षणः ॥ सर्वाशास्यगुणोमेयः
सर्वलोकेष्टभूषणः ॥२२॥ सर्वेष्टदाता सर्वेष्टः स्फुरन्मंगलविग्रहः ॥ अविद्यालेशरहितो नानाविद्यैकसंश्रयः ॥२३॥ मू
र्तिभवः कृपापूरो भक्तेष्टफलपूरकः ॥ संपूर्णकामः सौभाग्यनिधिः सौभाग्यदायकः ॥२४॥ हितैषी हितकृत्सौम्यः परा

र्ये कमयोजनः॥शरणागतदीनार्तिपरित्राणपरायणः॥२५॥जिष्णुर्नेता वषट्कारो भ्राजिष्णुर्भोजनं हविः॥भोक्ता भो
जयिता जेता जितारिर्जितमानसः॥२६॥अक्षरः कारणं क्रुद्धसमरः शारदप्लवः॥आज्ञापकेच्छो गंभीरः कविर्दुस्व
प्ननाशकः॥२७॥पंचब्रह्मसमुत्पत्तिः क्षेत्रज्ञः क्षेत्रपालकः॥व्योमकेशो भीमवेषो गौरीपतिरनामयः॥२८॥भवाब्धित
रणोपायो भगवान्भक्तवत्सलः॥वरो वरिष्ठो नेदिष्ठः प्रियः प्रियदवः सुधीः॥२९॥यंता यविष्ठः क्षोदिष्ठो यविष्ठो यमशा
सकः॥हिरण्यगर्भो हेमांगो हेमरूपो हिरण्यदः॥३०॥ब्रह्मज्योतिरनावेक्ष्यश्चामुंडाजनको रविः॥मोक्षार्थिजनसं
सेव्यो मोक्षदो मोक्षनायकः॥३१॥महाश्मशाननिलयो वेदाश्वो भूरथः स्थिरः॥मृगव्याधो धर्मधामा प्रच्छन्नः स्फटिकः
प्रभः॥३२॥सर्वज्ञः परमार्थात्मा ब्रह्मानंदाश्रयो विभुः॥महेश्वरो महादेवः परब्रह्म सदाशिवः॥३३॥एवमेतानि ना
मानि मुख्यानि मम षण्मुख॥शुभदानि विचित्राणि गौर्यै प्रोक्तानि सादरं॥१३४॥एतन्नाम जपेद्यो वा यः श्रावयेद्वा मु
नीश्वराः॥शुचिर्भूत्वा शिवपराः नान्ये रागादिमोहिताः॥३५॥विभूतिभूषितवपुः शुद्धो रुद्राक्षभूषणः॥शिव
लिंगसमीपस्थो निःसंगो निर्जितासनः॥३६॥एकाग्रचित्तो नितिमतो वशी भूतहिते रतः॥शिवलिंगार्चको नित्यं
शिवैकशरणः सदा॥३७॥मम नामानि दिव्यानि यो जपेद्भक्तिपूर्वकं॥एवमुक्तगुणोपेतः स देवैः पूजितो भवेत्॥
॥३८॥संसारपाशसंबंधजनमोक्षैकसाधनं॥मन्नामस्मरणं नूनं तद्देवसकलार्थदं॥३९॥मन्नामैव परं ज
प्यमहमेवाश्रयार्थदः॥अहमेव सदा सेव्यो ध्येयो मुक्त्यर्थमादरात्॥४०॥विभूतिर्वज्रकवचैः मन्नामशरपाणिभिः॥
विजयः सर्वतो लभ्यो नतेषां दृश्यते भयं॥४१॥हे मुक्तिदायक महेश पिनाकपाणे शंभो गिरीश हर शंकर चंद्रमौले॥वि
श्वेश्वरांधकरिपो पुरसूदनेति मामर्चयंत्यनुवदंति त एव धन्याः॥४२॥ये देवदेव जगदीश्वर पंचवक्त्र सोमाग्निभा
नुनयनानघ शूलपाणे॥गौरीमनोरमण मारनिषूदनेति मामर्चयंत्यनुवदंति त एव धन्याः॥४३॥ये शर्व फाललनयना
मलविश्वमूर्ते श्रीनीलकंठ वरदोत्तम विश्ववाहो॥भर्ग त्रिलोचन भगाक्षिहराजरेति मामर्चयंत्यनुवदंति त एव धन्याः॥

४४॥ येविष्णुवल्लभसरोजिशिवकालकालकालाग्निरुद्रकरुणाकरदीनबंधो॥ कर्पूरगौरपरमेश्वरमहेश्वरेति मामर्च०॥
४५॥ येवामदेववृषभध्वजकृत्तिभूषभूतेशशर्व उपरशोषभयाधिनाथ॥ विश्वाधिकत्रिदशवंद्यसुरेश्वरेति मामर्चयं०॥४६॥ येपं
कवक्त्रसजटापटलाबलेखिबालेंदुखंडरुचिमंडलमंडितांग॥ रत्नस्फुरद्भुजगराजविभूषणेति मामर्च०॥४७॥ येभीम
षण्मुखगुरोमगनाथहस्तिशार्दूलचर्मवसनाथ्यपसत्यसंध॥ शैलाधिराजनिलयत्रिपुरांतकेति मामर्च०॥४८॥ ये
भीमरुद्रवृषभध्वजवीरभद्रभद्रावतारभगवन्नभवभावरूप॥ निःसंगनिर्मलनिरंजननिर्गुणेति मामर्च०॥४९॥ ये
कालकूटविषभक्षिभयानदेवसंरक्षकाद्यविबमाक्षसमस्तसाक्षिन्॥ सर्वस्थानिसर्वस्थशिवदसमरवांतकेति मामर्च०
५०॥ येसोमसोमकलिपिंगिविष्ट जगन्निवासकैलासवासमुनिहृत्कमलाधिवास॥ सोमावनंमशिनिकंठशिवाप्रियेति
मामर्चयंति नित्यनुबंदं नितरां वधन्याः॥५१॥ येयज्ञशम्भनरसामनधर्मरूपयज्ञादिकर्मफलदायकयज्ञमूर्ते॥ सर
ष्टिस्थितिप्रलयकारणसात्विकेति मामर्च०॥५२॥ येनीललोहितनुदिगंबरकृत्तिवासश्रीकंठशांतनिरुपाधिकनि
र्विकार॥ मृत्युंजयाव्ययनिधीशगणेश्वरेति मामर्च०॥५३॥ मन्नाममात्रपथिनः खजनमीत्यन्यंपुनः खर्वधाना
कांसंतिनचाभुवंनिसतनंमत्पादपद्मार्चकाः॥ मल्लिंगार्चनतत्परा मम हिता मद्भो करण्यानिशं मंत्रि दंनिनिरस्त
दुःखनिकरा मद्भक्तवर्या मुदा॥५४॥ मल्लिंगसंपूजनसक्तचित्ता मद्भक्तपूजार्थमुपात्तवित्ताः॥ मन्नामसंकीर्तननमा
चचित्ताः वसंति मन्नामसुधैकचित्ताः॥५५॥ संतः क्वचित्संतिनितांतमीशस्थानस्थितसंतनमर्चयंतः॥ मामेव
विश्वेशमनाद्यनंतमभेद्यमेकं निगमांतवेद्यं॥५६॥ ॥श्रीसूतउवाच॥ ॥इत्युदीरितमाकर्ण्य महादेवेन तद्वचः॥
संतुष्टः षण्मुखः शंभुं तुष्टाव गिरिजासुतः॥२०१॥ ॥श्रीस्कंद उवाच॥ ॥देवदेव जगन्नाथ देवदेवो नम प्रभो॥
वेदवेदांतवेद्याजगज्जन्मेककारण॥२॥ निरामयनिराधारनिर्द्वंद्वनिरुपाधिकं॥ निष्कलंकनिराकारविकार
रहितानघ॥३॥ महादेवामराधीशरक्षाकरवृषवाहन॥ वृषभध्वजविश्वेशत्रिपुरांतकशंकर॥४॥ कालकालस्वरूपा

सिंधो शशिनिकंद शिवप्रिय॥ त्रिकाग्निकालकालात्मन्कालाधार प्रवर्तक॥५॥ मनोन्मनामनानंतव्योमकेश जगत्पते॥
भूतेश भूतसंघात्मन् भूतैकनिलयामल॥६॥ विभूतिभूषणश्रीमन्भस्मोद्धूलितविग्रह॥ कैलासशिखरावास कृ
त्तिवासमहेश्वर॥७॥ कपालमालाभरण जरामरणवर्जित॥ योगींद्रैकमंदार वंदारुकगणार्चित॥८॥ योगिहृत्पंक
जारूढ निगूढनिजविग्रहः॥ गंडमंडलसंभ्राजन्मणिकुंडलमंडित॥९॥ अनंतचंद्रमार्तांडमंडलाधिकसुप्रभ॥ हि
रण्यबाहो विश्वात्मन् संसारार्णवतारक॥१०॥ विश्वतोमुखसामात्मन्विश्वतश्चरणाजर॥ विश्वतोलोचनानंतव्योमके
श सदाशिव॥११॥ ज्येष्ठश्रेष्ठ समस्तात्मन् व्यापकानंतविग्रह॥ चिदग्निपाणे खट्वांगिन् निःसंगनिगमाश्रय॥१२॥
निराश्रयाखिलाधार परब्रह्मन्नखिलाव्यय॥ ब्रह्मानंदैकनिलय मयस्कर गिरीश्वर॥१३॥ सत्वप्रधानसत्यात्मना
नंदमय सर्वग॥ महाश्मशाननिलय महाप्रेतासनस्थिर॥१४॥ पिनाकपाणे दुष्टारिनिग्रहलोकैकजीवन॥ शार्दूलच
र्मवसन भूधरेशाशासन॥१५॥ स्वेच्छारूढनावनीयानजितत्रिपुरकानन॥ वासीकृतानंदवन सोमसूर्याग्निलोचन॥१६॥
मुनिचिंतामनासीन कालकूटविषादन॥ कंदर्पदर्पकदन रथाधीशैकवाहन॥१७॥ दुष्टारिसंघग्रामनदुल्लंघ्यदृ
ढ्यासन॥ अप्रधृष्यनिरीक्षाक्ष तेजःपुंज निरंजन॥१८॥ महोदर महावीर महाशूर सुरेश्वर॥ महाधीराद्भुताकार
सर्वलोकप्रभाकर॥१९॥ नमस्ते नमस्ते महादेव शंभो नमस्ते नमस्ते प्रपन्नैकबंधो॥ नमस्ते नमस्ते दयासारसिंधो नमस्ते
नमस्ते नमस्ते महेश॥२०॥ नमस्ते नमस्ते महामृत्युहारिन्नमस्ते नमस्ते महादुःखहारिन्॥ नमस्ते नमस्ते महापापहा
रिन्नमस्ते नमस्ते नमस्ते महेश॥२१॥ नमस्ते नमस्ते जगज्जन्महेतो नमस्ते नमस्ते व्याधीशकेतो॥ नमस्ते नमस्ते महा
पुण्यकेतो नमस्ते नमस्ते नमः॥२२॥ नमस्ते नमस्ते सदाचंद्रमौले नमस्ते नमस्ते सदाशूलपाणे॥ नमस्ते नमस्ते सदा
मेकजाने नमस्ते नमस्ते नमः॥२३॥ यस्य स्वरूपं न विदुः सुरासुराः यस्य स्वरूपं न विदुर्मुनीश्वराः॥ यस्य स्वरूपं न विदु
र्महेश्वराः तस्येयमित्यं शिवरूपमीडे॥२४॥ यस्य स्वरूपं निगमैरगम्यं यस्य स्वरूपं नियमैरगम्यं॥ यस्य स्वरूपं परमे

रागम्यं नस्यैव नित्यं शिवरूपमीडे ॥२५॥ संसारदावानलशामकाय सत्यं जपायामितविक्रमाय ॥ सुरासुरौघार्चित
पादुकाय शिवा समेताय नमः शिवाय ॥२६॥ घोराघिकायौघनिवारकाय स्वर्गापवर्गादिफलप्रदाय ॥ निरामयायांधक
सूदनाय शिवा०॥२७॥ कुंदेंदुगौरस्फटिकोपमाय महेश्वरायाश्रितवत्सलाय ॥ श्रीनीलकंठाय यमांतकाय शिवा०॥२८॥
भुजंगचक्राधिपभूषणाय नानामणिभ्राजितकुंडलाय ॥ कर्पूरगौराय सुरोत्तमाय शिवा०॥२९॥ त्रिकालिकालाय
मनोन्मनाय त्रियंबकाय त्रिपुरांतकाय ॥ कालाग्निरुद्राय जगन्मयाय शिवा समेताय नम०॥३०॥ दयासमुद्राय निधी
श्वराय धनेशमित्राय सुधामयाय ॥ कारुण्यरूपाय भयंकराय शिवा०॥३१॥ ब्रह्मेंद्रविष्ण्वादिसुरार्चिताय देवाधिदेवा
य दिगंबराय ॥ अनंतकल्याणगुणार्णवाय शिवा स०॥३२॥ वेदांतवेद्याय महोदयाय कैलासवासाय शिवाधवाय ॥ शि
वस्वरूपाय सदाशिवाय शिवा स०॥३३॥ इति स्तुत्वा महादेवं सर्वव्यापिनमीश्वरं ॥ पुनः पुनः प्रणम्याथ स्कंदस्तस्थौ
कृतांजलिः ॥३४॥ महेश्वरः प्रसन्नात्मा कुमारानतकंधरं ॥ प्रीत्या प्रोवाच वचनं सर्वानंदकरं तदा ॥३५॥ श्रीशिव
उवाच ॥ ॥ प्रहृष्टोस्मि प्रसन्नोस्मि स्तोत्रेणानेन षण्मुख ॥ वरदोहं वरान्निशान् वृणुदास्ये वरानहं ॥ श्रीस्कंद
उवाच ॥ ॥ सांब शंभो महादेव दयासागर शंकर ॥ मच्चित्तभ्रमरो नित्यं तवास्तु पदपंकजे ॥३७॥ सर्वथा शर्वसर्वे
शसर्वात्मक महेश्वर ॥ तव नामामृते दिव्ये जिह्वाग्रे समतिष्ठतु ॥३८॥ शिवास्तु तव पादाब्जमन्मनो मकरंदपः ॥ चतु
र्वर्गफलाकारमकरंदविजृंभिते ॥३९॥ किं वरेण ममान्येन मयेतद्याचितं वरं ॥ सर्वसौभाग्यदं नूनमिति वेदैर्विनि
श्चितं ॥४०॥ इति तद्वचनं श्रुत्वा सांबः संतुष्टमानसः ॥ पस्पर्श तच्छिरः सम्यक् आनंदपरिपूरितः ॥४१॥ कुमार तव भागस्य
जातो नूनं न संशयः ॥ तत्त्वतो मां विदित्वैव विश्वेशं स्तोतुमिच्छसि ॥४२॥ त्वया तु याचितं दत्तं मया तुभ्यं वरोत्तमं ॥ वरांत
रं च दास्यामि सर्वलोकोपकारकं ॥ त्वयेदं यत्कृतं स्तोत्रं मम प्रियकरं परं ॥ तद्यः पठेच्छुचिर्नित्यं स समाप्नोत्यभीप्सितं ॥
अघोरपातकेभ्यश्च संसाराच्च विमुच्यते ॥ भक्तिमानस्तु सततं मयि सांबे महेश्वरे ॥४५॥ ॥सूत उवाच॥ ॥ इति दत्त्वा

वशानिधानसांबः संसारमोचकः ॥ नस्त्वावनीयसंतुष्टो ब्रह्मविष्णवीशसेवितः ॥४६॥ भवंतोपि मुनिश्रेष्ठाः सांबध्यानपराय
णाः ॥ शिवनामजपं कृत्वा नित्यं तु सुखिनः सदा ॥४७॥ शिव एव सदा ध्येयः सर्वदेवोत्तमः प्रभुः ॥ शिव एव सदा पूज्यो मुक्तिका
मैर्न संशयः ॥४८॥ महेशान्नाधिको देवः स एव सुरसत्तमः ॥ स एव सर्ववेदांतवेद्यो नात्रास्ति संशयः ॥४९॥ अनन्यश
रणो नित्यं शंकरार्चनतत्परः ॥ स एव धन्यः पुण्यात्मा सत्यमेवोच्यते मया ॥५०॥ जन्मांतरसहस्रेषु यदि तप्तं तपस्तदा ॥
तस्य प्रसादो महादेवे भक्तिश्च भवति ध्रुवं ॥५१॥ मुक्तिदाता महादेवः तदन्यो नास्ति सर्वथा ॥ सत्यमेव तु नः सत्यं सत्य
मेव न संशयः ॥ सुभगा जननी तस्य तस्यैव कुलमुन्नतं ॥ तस्यैव जन्म सफलं यस्य भक्तिः सदाशिवे ॥५३॥ येषां भूसुर
सत्तमं सुरगणैराराध्यमीशं शिवं शैलाधीशसुतासमेतममलं संपूजयंत्यादरात् ॥ ते धन्याः शिवपादपूजनपरा द
न्यो न धन्यो जनः सत्यं सत्यमिहोच्यते मुनिवराः सत्यं पुनः सर्वथा ॥ ५४॥ ॥ इति श्री शिवरहस्ये उग्राख्ये सप्तमांशे
महेतिहासे शतसहस्रिकायां महासंहितायां श्रीस्कंद श्रीसदाशिवसंवादे मुख्यशिवसहस्रनामकथनं नाम प्रथ
मोध्यायः ॥ १ ॥ ॥ श्रीउग्रायनमः ॥ ॥ ऋषय ऊचुः ॥ ॥ त्वत्प्रसादाद्वयं सूत नित्यपापस्मोन संशयः ॥ धन्या
कृतास्त्वया नूनं सत्कथाश्रवणाद्वयं ॥ १ ॥ त्वद्वागमृतधाराभिः पापदावानलो महान् ॥ शांतः प्रशांतं चित्तं च दुःखा
न्यपगतानि च ॥ २ ॥ पुनः पुण्यकथामन्यां वद पापौघनाशिनीं ॥ यत्कथाश्रवणं सद्यः प्रसादयति चेतसं ॥ ३ ॥ कस्मि
न्क्षेत्रवरे रम्ये जप्यो मंत्रः शिवात्मकः ॥ कुत्र वा शंकरस्यास्ति देवदेवस्य संनिधिं ॥ ४ ॥ ॥ सूत उवाच ॥ ॥ एवमेव पुरा पृष्टः
पार्वत्या परमेश्वरः ॥ ततः प्रहृष्टवदनो सत जगाद सतीं प्रति ॥ ५ ॥ ॥ श्रीशिव उवाच ॥ ॥ अस्ति क्षेत्रं वरं देवि सर्वक्षेत्रोत्त
मोत्तमं ॥ वेदोपगीतमनिशं काशीक्षेत्रमनामयं ॥ ६ ॥ कल्पांते सकलान् लोकान् संहृत्य निजमायया ॥ कारूपामेव तत्र यासा
र्धं संवसामि शुभानने ॥ ७ ॥ काशी त्रिशूलनिलया निर्मला लयवर्जिता ॥ पुरातना न सा जन्या प्रलयेपि न नश्यति ॥ ८ ॥ म
मांऽपरा तनुः काशी मत्तो भिन्ना न सा परा ॥ सेवाहं नावयोर्भेदः सत्यमेवावयोरिव ॥ ९ ॥ नाहं वसामि कैलासे न च मंदरपर्व

ने॥ नवाहिमाचलेभद्रे वा न्यथा मे वव सामहं॥ १०॥ वसन्नप्यत्र कैलासे विलासार्थं कदाचन॥ विहाय काशीमनिशं निव
सामि मनोरमे॥ ११॥ ज्योतिःपुंजमयी काशी ज्ञानरूपा मनोरमा॥ नयानुसदृशी वस्तु नास्ति ब्रह्माण्डगोलके॥ १२॥ भूग
तापि न भूः काशी निम्नस्थाप्यखिलोन्नता॥ वेदवेद्यापि सा नूनं वेदवेद्या न तत्त्वतः॥ १३॥ मत्स्वरूपा यतः काशी ततो हमिव
तत्त्वतः॥ वेदान्तैरपि सा काशी न ज्ञातुं शक्यते ध्रुवं॥ १४॥ यथा त्वयि मम प्रीतिः तथा काश्यां शुभानने॥ सर्वथा प्रीतिरस्त्येव
नात्राप्रीतिः कदाचन॥ १५॥ मदंशं त्वमिव सा काशी सर्वदा सर्वसौख्यदा॥ काशी काशीति सततमुच्चरन्निवसाम्यहं॥ धर्मै
कराशिः सा काशी पापराशिविनाशिनी॥ अविनाशि सुधाराशिराशास्या वशिभिः सदा॥ १७॥ बहुभिर्जन्मभिर्नित्यं य
द्धि घोरं नरैस्तपः॥ तन्नैव दामतस्सादात्काश्यां यो याति भविष्यति॥ १८॥ काशीवासरतामर्त्याः स्वर्गलोकनिवासजं॥ सु
खं सर्वं तिरस्कृत्य निवसन्त्यनिशं मुदा॥ १९॥ नोग्रैस्तपोभिर्दानैर्यज्ञैर्धर्मैरध्ययनैरपि॥ काशीप्राप्तिर्नृलोकानां मत्प्रसा
दं विना शुभे॥ २०॥ काशीप्रकाशकं वस्तु लोके नैव हि दृश्यते॥ चन्द्रसूर्याग्निर्वा तत्प्रकाशकरो न हि॥ २१॥ यानवेद्या
वेदसंघैः स्तदन्यैरपि साधनैः॥ अवेद्या सा कथं वेद्या काशी लोके शिवात्मिका॥ २२॥ स्वर्गभोगमपि त्यक्त्वा देवेन्द्राद्या अमराः
सदा॥ काशीवासमपेक्षन्ते मुक्त्यर्थं सर्वसाधनैः॥ २३॥ सर्वयज्ञतपोदानधर्माणां फलमुत्तमं॥ काशीवासात्मकं सत्यं नतत्समा
द्धिकं फलं॥ २४॥ ब्रह्महत्यादिपापानि घोराणि विविधान्यपि॥ काशीति स्मरणादेव क्षणान्नश्यन्त्यसंशयः॥ २५॥ काशी
निवासनिवासनिरतान् नरान पद्मरामुदा॥ नमस्कुर्वन्ति सततं पूजयन्ति स्तुवन्ति च॥ २६॥ काशीवाससमुत्पन्नसुखेन
सदृशं सुखं॥ नानुभूतं मया क्वापि कदाचिदप्यमलानने॥ २७॥ मन्मनो रमते काश्यां यथा तद्वद्वरानने॥ नान्यत्र रमते चे
तः तद्वत्त्वयि हि तादृशं॥ २८॥ सर्वे धर्मास्तुलारूढाः परस्परजिगीषया॥ पुरा श्रीशैलशिखरे श्रीशैलेश्वरसंनिधौ॥ २९॥
काशीनिवासजाधर्मादन्ये धर्मास्तुलां गताः॥ परस्परं जयं प्राप्ताः प्रथमं ते ततः परं॥ ३०॥ काशीनिवाससंभूतधर्मश्रेष्ठजिगी
षया॥ पुनः सर्वे तुलां प्राप्य मुमुक्षुकाः संभ्रमान्विताः॥ ३१॥ श्रीशैलेशस्तदा धर्मान् संवीक्ष्य जयकांक्षिणः॥ उवाच वच

नं प्रीत्या स्वामरूपं जगत्प्रियं ॥ ३२ ॥ काशीवासजधर्मेण स्पर्धा कार्या न सर्वथा ॥ स सर्वधर्मयुक्तेशः शनिर्वै देवैर्विनिश्चितः ॥ ३३ ॥
समेन राज्ञे ते स्पर्धा स्याद्धीनेन न राजभृत् ॥ सर्वोत्तमे न तु स्पर्धा स्वनाशायोपपद्यते ॥ ३४ ॥ लोके नीतिविरुद्धानि कर्माणि विफला
नि हि ॥ न कुर्वन्त्येव निपुणाः नीतिशास्त्रविशारदाः ॥ ३५ ॥ स्वशक्तिं परशक्तिं च विचार्य समयादिकं ॥ ततः स्पर्धां प्रकुर्वाणाः नि
पुणाः संति संमताः ॥ ३६ ॥ क्व भवंतो न्यूनवीर्याः क्व सः सर्वोत्तमः परः ॥ क्वानंतेऽद्य क्वानुतेजाः क्वात्याल्पाणुकप्रभा ॥ ३७ ॥
ततस्तेन समं [illegible] स्पर्धा न कर्तव्या कदाचन ॥ अल्पस्य महता सार्धं विरोधो नोपजायते ॥ ३८ ॥ इति श्रीगिरिनाथस्य श्रुत्वा वच
नमादरात् ॥ विश्वस्य तद्वचः सम्यक् स्पर्धां त्यक्त्वा ययुः ततः ॥ ३९ ॥ तस्माच्छुभानने देवि काशीवाससमुद्भवः ॥ धर्मो धर्मव
रो ज्ञेयो धर्मस्तादृक् न सर्वथा ॥ ४० ॥ यावंति संति तीर्थानि पाताले पृथिवीतले ॥ सत्यलोकादिलोकेषु तावंति सुरवंदे सदा ॥
४१ ॥ काशीं प्रयांति श्रीकाशीमर्चयंति स्तुवंति च ॥ काश्यां विघ्नेषु तीर्थेषु स्नानं कुर्वंति यत्नतः ॥ ४२ ॥ पुण्यक्षेत्राणि सर्वाणि दू
रदेशस्थितान्यपि ॥ गत्वा काशीं मुदा सम्यक् पूजयंति हि तां सदा ॥ ४३ ॥ देवाः स्वस्वगणैः साकं विहाय स्वर्गजं सुखं ॥ गच्छं
त्यतीव संतुष्टाः काशीं प्रति सदाशिवे ॥ ४४ ॥ सरस्वत्या सह स्रष्टा काशीवासरतः सदा ॥ सत्यलोकं विहायैव काश्यामा
याति हृष्टधीः ॥ ४५ ॥ विष्णुरप्यनघं स्वीयं स्थानं त्यक्त्वा सदा मुदा ॥ काश्यां तिष्ठति मामेव लिंगरूपिणमर्चयन् ॥ ४६ ॥ गं
धर्वाः किंनरा यक्षाः सर्वे स्वस्वगणान्विताः ॥ प्रयांति सततं काशीं काशीपूजनतत्पराः ॥ ४७ ॥ पांडुपर्णाशिवो धन्याः मुन
योऽत्र सवादिनः ॥ वानाशनाश्च सततं संति काश्यां मुनीश्वराः ॥ ४८ ॥ क्षीराब्धिप्रमुखाः सर्वे समुद्राः सततं मुदा ॥ काशीपूजा
र्थमायांति रत्नैरभ्यर्चयंति तां ॥ ४९ ॥ कामधेनुश्च स्वयं गत्वा क्षीरेणैवाभिषिंचति ॥ काश्यां तिष्ठति संतुष्टा देवलोकं विहा
य सा ॥ ५० ॥ पुष्पिताः कल्पवृक्षाश्च गत्वा काशीमहर्निशं ॥ पुष्पवृष्टिं वितन्वंति स्ते काशीपूजापरायणाः ॥ ५१ ॥ आदित्या वस
वः साध्याः सिद्धाश्च सगणान्विताः ॥ काश्यां शुचिव्रता नित्यं निवसंत्यादरेण ते ॥ ५२ ॥ कश्यपात्रिवसिष्ठाद्याः ऋषयः
श्रेष्ठपुंगवाः ॥ विश्वेदेवाश्च सततं काश्यां तिष्ठंत्यनाकुलाः ॥ ५३ ॥ अन्येऽपि सत्यलोकादिसप्तलोकनिवासिनः ॥ सर्वेऽपि काश्य

मनिशं वसंति शिवपूजकाः॥५४॥ काशीं ते दुर्लभां प्राप्य निक्षेपमिव निर्धनः॥ त्यक्तुं मनः कदाचिद्वा न कुर्वंत्येव सर्वथा
५५॥ क्षुधिता इव मिष्टान्नं पिपासव इवोदकं॥ कदाचिदपि ते काशीं न त्यजंति दृढव्रताः॥५६॥ चकोरा इव पूर्णेंदुं कामु
का इव कामिनीं॥ न विहास्यंति ते काशीमन्याशारहिताः सदा॥५७॥ भ्रमरा इव पुष्पाणि गावो वत्सतरानिव॥ काशीं प्र
काशमानां तां न त्यजंति दृढाशयाः॥५८॥ पतिव्रतेव भर्तारं विधेयं विमलाशयं॥ काशीत्यागे मुक्तिकामो न करोत्येव पाव
नः॥५९॥ कः काशीं पतनेत्यक्त्वा मोक्षार्थि विगतस्पृहः॥ मूर्खोपि ग्रासममलं न जहाति क्षुधातुरः॥६०॥ सिंहासनं यथा
राजा न जहाति बलान्वितः॥ न जहाति तथा काशीं मर्त्यः संसारदुःखितः॥६१॥ अनंतोग्रतपोधर्मैर्लब्धा काशीं शिवेप्सि
तां॥ कः संजहाति सुभगो सौभाग्यनिलयां शुभां॥६२॥ अनंतजन्मभिर्घोरं तपः कृत्वाति दुर्लभं॥ तेनैव तपसा काशीं ल
ब्ध्वा कः संजहाति तां॥६३॥ दुर्लभा सर्वथा देवि लोके काश्यभिधा सुधा॥ कः संजहाति निपुणो वक्त्रगां शर्करामिव॥६४॥
अनिक्लेशार्जितं वित्तं न मुंचंति यथा नराः॥ तथा घोरतपोलब्धं काशीं कस्त्यक्तुमिच्छति॥६५॥ सर्वथा दुर्लभा काशी दुर्ल
भा दुर्लभा ध्रुवं॥ दुर्लभा दुर्लभा सत्यं दुर्लभा दुर्लभा शुभे॥६६॥ महानिधिरियं काशी पापदारिद्र्यनाशिनी॥ मोक्षरूपे
ष्टफलदा ब्रह्मानंदप्रवर्धिनी॥ इयं काशी कामधेनुर्मोक्षरूपेष्टकामदा॥ विनाशा कामदा नेयं काशी नित्येष्टकामदा
६८॥ काशी काशीति सततं यः काशीं स्मरते नरः॥ स सद्यः सर्वपापेभ्यो मुच्यते देवि सर्वदा॥६९॥ देशांतरेपि यः
स्थित्वा काशी काशीति संवदेत्॥ स पापिष्ठोपि सुभगे पातकेभ्यो विमुच्यते॥७०॥ विनात्युग्रेण तपसा काशीप्राप्तिः शुभान
ने॥ न भवत्येव तत्सत्यं सत्यं सत्यं न संशयः॥७१॥ दुर्लभं मानुषं जन्म संप्राप्यापि नरो यदि॥ काशीं प्राप्तुं न यतते स एव पुरुषा
धमः॥७२॥ अन्यत्र दुःसहं मर्त्यैः तपः कृत्वापि सर्वदा॥ न पारलौकिकं सौख्यं प्राप्नोति विमलानने॥७३॥ प्रज्वलज्ज्वलनं
त्यक्त्वा भस्मं न्याज्यादिकं हविः॥ हुतमप्यखिलं व्यर्थं तथान्यत्र कृतं तपः॥७४॥ धिक् तस्य जीवनं जंतोः धिक् धिक् च वपुर्नवं॥
येन काशी नावलोकि येन काशी न पूजिता॥७५॥ धिक् कुलं तस्य धिक् सौख्यं धिक् बुद्धिर्धिग्वरं यशः॥ येन काशी शिवपुरी ना

नर्विसकलार्थदा॥७६॥ धिगैश्वर्यं धिगैश्वर्यं धिक् तस्य नवयौवनं॥ येन काशी पुण्यराशिः नाभ्यर्चि शुभसाधनैः॥ धिक्
धिक् वाणी तस्य जंतोः येन काशी न संस्तुता॥ धिग्धिग्धिग्धिग्धिङ् मनस्तस्य येन काशी न चिंतिता॥७८॥ धिग्धिग्धिक् धिक् शिरस्तस्य
येन काशी न वंदिता॥ धिग्धिग्धिग्धिग्नयने तस्य येन काशी न वीक्षिता॥७९॥ धिग्धिग्धिग्धिक् श्रवणे तस्य येन काशी न श्रुता॥
धिग्धिग्धिग्धिग्धिङ्क् तौ पादौ काशी प्रक्रमवर्जितौ॥८०॥ धिग्पाणिस्तस्य विमलो येन काशी न मार्जिता॥ कीटः पतंगो
मंडूको मर्त्यो वा शिव संमतः॥८१॥ काश्यां त्यक्त्वा तनुं भूयो नैवान्यां निततनुं भुवं॥ यस्य कस्यापि वा जंतोर्मरणे समु
स्थिते॥८२॥ काश्यां शिवशिवेत्येतन्नाम मे वोपदिशाम्यहं॥ मद्भक्तान् विमलान् दृष्ट्वा मरणासन्नजीवनान्॥
८३॥ ममैवांके सन्निवेश्य शिवेत्युपदिशाम्यहं॥ शिवनामानुसंधानात् पुराभूत तनुर्नरः॥८४॥ पुनर्मन्नाम त
त्काश्यां मंत्रे प्राप्नोति मानवः॥ शिवेति नाम दावाग्निः पापतूलादिनाशकः॥८५॥ तस्माच्छिवशिवेत्येवनामजप्यं
सदाजनैः॥ सदाशिवशिवेत्येवमन्नामोच्चारणापरैः॥८६॥ काश्यामंते शिवेत्येतन्नाम संप्राप्यते ध्रुवं॥ ततः शिव
शिवेत्येतन्नामोच्चार तन्नाममुक्तिप्रदायकं॥८७॥ तन्मयाप्युपदिष्टं चेत्काश्यां किं पुनरंबिके॥ कान्यत्पुण्यशेते
षु मद्भक्तः स्ववपुर्यदि॥८८॥ त्यजत्यंते नरो भूयोपि मद्भक्तो भुवि जायते॥ ततः काशीमवाप्याथ मद्भक्तो मत्प्रसादतः॥
८९॥ अंते शिवशिवेत्येतन्मंत्रं प्राप्नोति मुक्तये॥ स्वर्गभोगकरे पुण्ये मत्क्षेत्रे देवाः पुनर्नराः॥९०॥ भवंति तेपि मद्भक्ताः
काश्यां निवसंत्यहर्निशं॥ ततः काश्यां मंतकाले ममैवानुग्रहे सति॥९१॥ तदा शिवशिवेत्येतन्नामसंप्राप्नुवंति ते॥
काश्यां मुक्ततनुर्मर्त्यो न पुनस्तनुभाक् शुभे॥९२॥ किं तु मद्रूपतां याति मद्भक्तो मत्परायणः॥ यथाभ्रं तो न यात्येव प्रज्वल
द्वह्निगं हविः॥९३॥ तथा त्यक्त्वा तनुः काश्यां शैवे नैवाप्यते पुनः॥ काशी शैवशरीराणि गृहीत्वा यादि नापि सा॥९४॥
न ददाति हवींषीव पावकः पुनरुज्वलः॥ अन्यत्र मुक्तिकामेस्तु नस्थानव्यं कदाचन॥९५॥ त्यक्त्वा काशीं शुभां सत्य
मुक्षत्यभुज्य मुच्यते॥ मद्भक्त एवाधिकारी मोक्षे काशेयव मुक्तिदा॥९६॥ मन्नामस्मृतिरेवस्यान्मोक्षसाधनमुत्तमं॥

तच्छृंगमुन्नतं ॥ सर्वलोकाननीत्यैव यातिपश्चपथानने ॥१४॥ रत्नत्पुरोवर्तिशृंगामूलेभानुविधुप्रहा: ॥ तिष्ठंतिनिष्प्रभानित्यंशृंगच्छविहतप्रभाः ॥१५॥ कथमुन्नतरोभातिपुण्यसंभद्भवामलः ॥ ई दृशान्येवशृंगाणिसंतिकाश्यामनेकधा ॥१६॥ काशीगोपुरशृंगाणामग्रभागादिदृक्षया ॥ पुरापूर्वंमयादेविकदाचिद्गतमादरात् ॥१७॥ रथेशाप्रमुखास्सर्वे प्रमथाधीश्वरा अपि ॥ ततः सर्वेनिवेद्यैवपरारतः शुभानने ॥१८॥ रथेश्वराधिरूढेनमयैवगतमम्बरः ॥ गमनेकतिवामासाः याताः संख्यानसारुताः ॥१९॥ ततः परंवाममेकंशृंगाग्रंरत्नरंजितं ॥ गच्छन्नूर्ध्वंमयादृष्टं तत्करेणधृतंततः ॥२०॥ धृतमप्यतिवेगेनगतमूर्ध्वंतदंबिके ॥ ममाश्चर्यमभूत्तत्रोग्रंगमनंतत्स्यपश्यतः ॥२१॥ वायोरपितथावेगोनदृष्टोपिकदाचन ॥ तच्छृंगाग्रंदृश्यमानमदृश्यमभवत्क्षणात् ॥२२॥ तदानीमेवतद्गुरथेशोविस्मयोत: ॥ महदाश्चर्यसंपन्नः ततःपरमहेशुभे ॥२३॥ सभाशतोस्मिकैलासमारुह्यरथधाधिपं ॥ हर्म्यगोपुरशृंगाणि परस्यरजितीयथा ॥२४॥ गच्छंत्यत्यंतवेगेनसदारत्नमयानिहि ॥ अष्टदिक्षुगणाधीशाः शूलमुद्गरपाणयः ॥२५॥ असंख्याताः सदादिविगसंत्यमितविक्रमाः ॥ सहस्रार्बुदभूतेशाः शितश्शूलकराः सदा ॥ निवसंतिप्रतिद्वारितीक्ष्णाक्षाविरताननाः ॥ शक्तिसंघाश्चबहवः प्रतिद्वारिवराननेः ॥२७॥ ज्वलद्वह्निनिभाः संतिभैरवाः स्वबलोन्नताः ॥ रुधिराक्षाह्वयोधर्यः कश्चिदद्भुतविक्रमः ॥२८॥ काशीदक्षिणदिग्भागेदुर्धर्षस्तिष्ठतिप्रिये ॥ धृतोर्ध्वमुष्टिरुन्मत्तः शूलदंतकरायुधः ॥२९॥ प्रज्वलद्वह्निसंकाशः सूर्यमंडलसन्निभः ॥ तद्भृत्यास्तादृशावीराः बलमानविजृंभिताः ॥३०॥ रक्तवस्त्रारक्तकायाः शत्रुरक्तैकजीवनाः ॥ उन्मत्तभैरवोनामकश्चिदस्तिमहाबलः ॥३१॥ तस्यामेवदिशिश्रेष्ठः कोटियोजनमुन्नतः ॥ मंदराचलसंकाशोमहाकायोभयानकः ॥३२॥ कोटिकोटिगजाधीशसंकाशांगुलिविक्रमः ॥ श्वेतोर्ध्वदीर्घरदनः पिंगलाक्षिशिरोरुहः ॥३३॥ सितवज्रनिभानंतक्रूररोमोमदोद्धतः ॥ क्रूराक्षिपातमात्रेणनिहंत्यरिकुलान्बहून् ॥३४॥ पातालभुविनाकेवा तत्तुल्योनैवदृश्यते ॥ तत्क्रूरदृष्टिपातेनभस्मसंजायतेगिरिः ॥ ॥३५॥ तत्क्रूरदृष्ट्यापृथिवीकंपमानेवतिष्ठति ॥ क्षीराब्धिरेकदापूर्वंपीतस्तेनततः परं ॥३६॥ महाभुजोमहाकायोक्रूर

रदृष्टिरलोलुपः॥ सर्वे समुद्राः सरितः पीतास्तेनैव लीलया॥३७॥ शैलेंद्राः पूर्वमेतेन भक्षिता बहवो मुदा॥ कदाचिदूर्ध्वं
नीतेयं पृथिवी पृथुबाहुना॥३८॥ छत्रीकृता नदास्तेयतेन शैलवनान्विता॥ बहुकालं प्रयत्नेन सुरगंधर्वसेवितः॥३९॥
चक्रवद्भ्रामयामास नरवाग्नेः सन्निवेशयन्॥ अनेनैवानिमतेन लोकाव्यस्तासिताः पुराः॥४०॥ ततः सरूपया लोकान्यथापूर्वं च
कारच॥४०॥ इंद्रादिलोकपालाश्च कृतांजलिपुटाः सदा॥ संसेवं भयग्रस्ताकंपमानाः स्तमादरात्॥४१॥ तपसा संस्पृगारा
ध्य तमेव तस्यानुगृह्णात्॥ काशीप्रवेशमिच्छंति स्वर्गलोकनिवासिनः॥ अनिवेशगतः पूर्वं तमेव चतुराननः॥ काश्यां ततः क्रू
रदृष्टिर्लीलया चतुराननं॥४३॥ शीघ्रं निष्क्रामयामास मतयंतं सभैरवः॥ काशीप्रवेशोनैवास्य तदा प्रभृति सर्वथा॥४४॥
दुःखितः सविधिस्तेन चिरं तो वनमाययौ॥ प्रलपन्वनमाश्रित्य सरस्वत्या सतिष्ठति॥४५॥ इदानीं विधिरत्यंतं काशीद
र्शनलालसः॥ तमेव तपसा सम्यगाराधयति सादरं॥४६॥ अल्पुतपसा तुष्टो भैरवो भक्तवत्सलः॥ तस्य काशीप्रवेशार्थं
आज्ञां दास्यत्यसंशयः॥४७॥ अयमेव महेशो देवी काशीपालनतत्परः॥ इतोपि प्रबलाः संति काशीसंरक्षणक्षमाः॥४८॥
तेषां तेजो बलं वीर्यं शौर्यमौदार्यमुत्कटं॥ वक्तुं न शक्यते देवि सहस्रवदनैरपि॥४९॥ काशीसंरक्षकाः वीरा यावंतः संति
तावतां॥ प्रसादेन विना काशीप्रवेशं नैव शक्यते॥५०॥ भिन्नप्रकृतिकाः क्रूराः काशीसंरक्षकाः सदा॥ अनंता दुर्मदाः स
र्वे परस्परजिगीषवः॥५१॥ अनल्पाराधनप्रीता बहुसेवाभिलाषिणः॥ छिद्रान्वेषणलोलाक्षाः पक्षपातविवर्जिताः॥
५२॥ तत्प्रसादाय यत्नोपि कर्तुं नैव हि शक्यते॥ तत्प्रसादस्वरूपं तु फलं केनोपलभ्यते॥५३॥ अनंतजन्मभिः क्लेशाः
केन कार्याः प्रयत्नतः॥ केन वा तत्प्रसादेपि प्राप्तव्यः क्लेशसाधितः॥५४॥ केन सख्यग्रभारूढतपः कर्तव्यमादरात्॥ के
नोपवासाः कर्तव्याः काशीप्राप्त्यै निरंतरं॥५५॥ केन संदीप्तपंचाग्निज्वालासहातिदुःसहा॥ केन पर्णाशनं कार्यं काशीप्रा-
प्त्यै निरंतरं॥५६॥ केन मिष्टान्नपानादित्यक्त्वा निस्पृहमादरात्॥ स्वतंत्रं वा नाशनं कार्यं काशीप्राप्त्यै निरंतरं॥५७॥ के
ना गले जलेस्थित्वा हिमकाले दुरासदे॥ पंचाक्षजपः कार्यः काशीप्राप्त्यै निरंतरं॥५८॥ केनाधोमुखमासाद्य धूम्रपेयो

निदुःसहः॥ केनेंद्रियजयः कार्यः काशीप्राप्त्यैनिरंतरं॥५९॥ केनचक्रवंदनश्चैव वनिताकनकादयः॥ अविद्यादिकयंत्याज्याः
काशीप्राप्त्यैनिरंतरं॥६०॥ केनमुक्तावलीःत्याज्या नानारत्नविराजिताः॥ रुद्राक्षधारणं कार्यं काशीप्राप्त्यैनिरंतरं॥६१॥
केननानाविधाःसौधाःत्यक्ताश्चंगाविराजिताः॥ अरण्येवसतिः कार्या काशीप्राप्त्यैनिरंतरं॥६२॥ केनत्यक्तापटुस्पर्शी
दृढनारीकुचासनं॥ कुशासनंपरिग्राह्यं का॰॥६३॥ केनकांतासमाक्रांता तांशय्यांत्यक्त्वामनोरमां॥ अस्मशय्यापरिग्रा
ह्यका॰॥६४॥ कस्यचिद्भूरिपुण्येन बहुजन्मार्जितेनहि॥ महेशानुग्रहेजाते काशीप्राप्तिर्भविष्यति॥६५॥ निरंतरंकृता
भक्तिः येनमय्यनपायिनी॥ तेनकाशीपुरंप्राप्तुं नान्येनशुभदर्शने॥६६॥ यस्यभक्तिर्दृढानित्यं मय्येवाव्यभिचारिणी॥
तस्यैवकाशीसुलभा नान्यस्यवरवर्णिनि॥६७॥ यस्यलिंगार्चनेप्रीतिः यस्यरुद्रजपेमतिः॥ तस्यैवकाशीसुलभा सएव
ममसंमतः॥६८॥ शिवक्षेत्राटनं येन बहुधाकृतमादरात्॥ तेनैवकाशीसंप्राप्या नान्येनकमलानने॥६९॥ शिवपूजैव
सततंकृता येनभविष्यति॥ तेनैवकाशीसंप्राप्या नान्ये॰॥७०॥ त्रिपुंड्रधारणंयेन कृतंस्याद्विधिपूर्वकं॥ तेनैव काशीसं॰॥
७१॥ कृतंयेनसदाभक्त्या शिवक्षेत्रस्यमार्जनं॥ तेनकाशी॰॥७२॥ शिवपूजार्थमनिशं येनबिल्वार्जनंकृतं॥ तेनैवकाशी॰॥
७३॥ शिवस्थानानियेनैव कारितानिकृतानिच॥ तेनकाशी॰॥७४॥ शिवभक्तैः सदाप्रीतिः कृतायेनभविष्यति॥ तेनैव
का॰॥७५॥ येनबिल्वचनंरम्यं सम्यक्कृतमनामयं॥ तेनैवका॰॥७६॥ येनमूर्ध्निगलेकर्णे रुद्राक्षाः सततंधृताः॥ तेनैवका॰॥
७७॥ रुद्राभिषेकपानीयं येनपीतंसदामुदा॥ तेनैवका॰॥७८॥ येनसांगंलिंगदानं कृतंस्याद्भक्तिपूर्वकं॥ तेनका॰॥७९॥
येनशैवाःशिवप्रीत्यै भोजिताः साधुसाधनैः॥ तेनैवका॰॥८०॥ येनपार्थिवलिंगानि पूजितान्यनिशंमुदा॥ तेनैवका॰॥
॥८१॥ शैलाश्चूर्णयितुंशक्याः मंदरप्रमुखादृढाः॥ कदाचित्केनसंम्यक्काशीप्राप्तुंनशक्यते॥८२॥ सद्यःशोषयितुंशक्याः
निःशेषमतिवेलगाः॥ कदाचित्केनचित्संम्यक्का॰॥८३॥ क्षीराब्धिप्रमुखादीनां पारंकर्तुंहिशक्यते॥ कदाचित्केनचि-
त्संम्यक्॰॥८४॥ यत्यासः सर्वलोकानांशक्येनकर्तुमेकदा॥ कदाचित्केनचित्संम्यक्॰॥८५॥ इंदुकंदुकवत्कर्तुंशक्येनभा

नुमानपि॥कदाचित्केनचित्तंसम्यक्कृतं॥८६॥ प्रज्वलद्वह्निमध्येतुशाकाने स्थातुमन्वहं॥कदाचित्केनचित्तत्सम्यक्कृतं॥
८७॥ बहुधाविविधंद्रव्यंबहुदातुंचशक्यते॥कदाचित्केनचित्तत्सम्यक्कृतं॥ ८८॥ पुराकश्चिद्द्विजाधीशः शिवमूर्तिरिति
श्रुतः॥सर्ववेदार्थतत्वज्ञः सर्वशास्त्रविशारदः॥८९॥ नीतिमान्नीपुणोमेधावीसर्वदाशिवपूजकः॥ असंख्यातधनाध्य
क्षः तुरंगगजपालकः॥९०॥ पुराणश्रवणासक्तः काशीमाहात्म्यमुत्तमं॥श्रोत्रानंदकरंरम्यंशुश्रावाघौघनाशकं॥९१॥
ततः समंतमथाकारोनवमन्मथनिंदकः॥ स्वोपार्जितगजाश्वादिधनधान्यादिकंस्वकं॥ रूपलावण्यसौंदर्यनवयौवनदर्पि
तां॥स्वभार्यांचविलोक्याथप्रोवाचवचनंमुदा॥ ९३॥ ॥ श्रीशिवमूर्तिरुवाच॥ ॥अयिभार्येवचोमत्तः श्रुणुकर्णैकभू
षणं॥ ९४॥ काशीक्षेत्रस्यमाहात्म्यंश्रुतमद्यमयाधुना॥९४॥ दिविवान्यत्रवालोकेकाशीस्थलसमंस्थलं॥९५॥ नदृष्टं
नश्रुतंक्वापिनास्तिचेतिकथाश्रुता॥ बहुजन्मतपःसाध्याकाशीप्राप्तिःकिलामला॥९६॥अलभ्याकिलसाकाशीचिरिं
चिप्रमुखैरपि॥ दुर्धर्षाःप्रबलावीरानानाशास्त्रास्त्रपारगाः॥९७॥ विरलास्यामदोन्मत्ताः श्रीकाशीपालकाःकिल॥
तादृशानांप्रसादेनविनाकाशीशिवात्मका॥९८॥ नदृश्यतेकिलामर्त्यैर्मनुजैर्दृश्यतेकथं॥ विश्वेश्वराभिधंलिंगंज्यो
तिरूपंसनातनं॥९९॥ वेदवेदांतसंवेद्यमेकमस्तीतिसंश्रुतं॥ तल्लिंगदर्शनात्सद्योमुच्यतेकिलपातकैः॥१००॥ नदेवा
राध्यममलंमर्त्यैर्देवासुरैरपि॥ तद्विश्वेश्वरमुत्कृष्टमनाद्यंनमतामयं॥१॥ लिंगंद्रष्टव्यमनघंयत्नैर्नानाविधैरपि॥विना
तद्दर्शनंलोकेमुक्तिरत्यंतदुर्लभा॥२॥ लिंगमूर्तिर्महादेवस्तदाकारेणतिष्ठति॥ ब्रह्मणापिनसाकाशीलभ्यतेकिलसर्व
था॥३॥ किमन्यैर्मादृशैर्मर्त्यैः किंकर्तव्यंमतःपरं॥ तपोभिर्विविधैर्दानैर्यथाविधिकृतैरपि॥ ४॥ काशीनलभ्यतेनूनंकिंकुर्मः॥
नानाविधशिवक्षेत्रभ्रमणेनापिसर्वथा॥ नलभ्याकिलसाकाशीकिं॥६॥ काशीप्राप्त्यर्थमुद्युक्तंपुमांसंविघ्नराशयः॥ तिष्ठंति
किलसंश्रित्यकिं॥७॥ कश्चित्किलाग्निप्राकारःकाशीपार्श्वेतितिदुःसहः॥ तत्तापतप्तानिकठिनपंक्तिकिलदेवनाः॥ ८॥ धिक्
जन्ममधिग्भाग्यंधिक्कांतंनवयौवनं॥ साकाशीनमयाप्राप्तायामुक्तिफलदायिनी॥९॥ धिग्भोग्यंधिग्धनंधिग्गोत्रंधिक्ममैतत्

द्रुपूर्णवं॥ साकाशीनमयाप्राप्तायाः॥ १०॥ धिक्प्रभावंधिगौन्नत्यंधिगेनत् सुंदरंमुखं॥ साकाशीनमयाप्राप्तायाः॥ ११॥
धिगेतच्चरणद्वंद्वंकोमलंकमलामलं॥ साका·॥ १२॥ धिंनेत्रयुगलंधिक्धिक्ममैतत्करपल्लवं॥ साकाशी·॥ १३॥ धिग्ना
नाविधरत्नाढ्यकोशागारंमनोरमं॥ साकाशी·॥ १४॥ धिक्पातुर्यवाञ्जनस्तंधिक्ममेलत्कुलेबलं॥ साका·॥ १५॥ स्वोदरं
सारमेयोपिसंपूरयतिसर्वदा॥ तच्छरीरात्मच्छरीरंनवरंनारमीदृशं॥ १६॥ दुर्लभंमानुषंप्राप्तंजन्मप्राप्यापिनामिदं॥
हाहाहाहामयाकाशीनलब्धाकिंकरोम्यहं॥ १७॥ किंदुष्कृतंमयापूर्वंकृतंबहुविधंमुदा॥ हाहाहाहामयाकाशीनलब्धाकिं
करोम्यहं॥ १८॥ किंभस्मधारणंसम्यक्नपुराकृतभादरात्॥ हाहा·॥ १९॥ किंपूर्वजन्मन्यनिशंरुद्राक्षानधृताःशुभाः॥
हाहा·॥ २०॥ किंलिंगस्फोटनंपूर्वंकृतंदुःखैकसाधनं॥ हाहा·॥ २१॥ किंवाशिवाचाररताःशैवानाराधिताःपुरा॥ हा-
हा·॥ २२॥ किंवाशिवक्षेत्रमध्येपुरीषादिकृतंमया॥ हाहा·॥ २३॥ किंवारुद्रजपनेशोनाराधिगिरिजापतिः॥ हाहा·॥
॥२४॥ किंवाबिल्वीदलैरीशोनाराधिबहुधाशिवः॥ हाहा·॥ २७॥ किंवाशैवःपुराविप्रःशिवलिंगननुईहनः॥ हाहा·॥ २८॥
किंवाबिल्ववनंरम्यंपुराच्छिन्नंशिवप्रियं॥ हाहा·॥ २९॥ किंवाबिल्वदलैरीशमनभ्यार्च्याशितंपुरा॥ हाहा·॥ ३०॥ एवं
विलप्यबहुधासविप्रोगिरिजेनतः॥ स्वसंचितंधनंसर्वंशैवेभ्यःप्रददौमुदा॥ ३१॥ ततःसर्वंपरित्यज्यसभार्यःस्वार्जितंध
नं॥ जगामगहनंरम्यंसबिल्वनरुसंवृतं॥ ३२॥ तस्मिन्वनेजिताहारःसभार्योपिजितेंद्रियः॥ तपस्तेपेमहद्घोरंसर्वभूत
भयावहं॥ ३३॥ तेनैवकंपितादेवाःसर्वेब्रह्मादयःसदा॥ चेलुश्चगिरयःसर्वेनरवश्चातिकंपिताः॥ ३४॥ क्षीराब्धिप्रमुखा
श्चापिसमुद्राःकंपितास्तदा॥ वसुधापिचचालेयंसरित्कानसंवृता॥ ३५॥ एवंघोरतरंविप्रस्तपःकर्तुंसमारभे॥ पूर्वं
पूर्वभवेप्येवंतपस्तप्तमनेनहि॥ ३६॥ कोटिजन्मावधिप्रीत्याकाशीसंप्राप्तयेमुदा॥ तपोघोरतरंतीव्रंअयंकृत्वेवतिष्ठति॥
३७॥ ईदृशाःबहवोदेविकाशीप्राप्त्यर्थमेवहि॥ तपोघोरतरंकृत्वातिष्ठंतिनियतेंद्रियाः॥ ३८॥ येकाशीवासस्सिध्येद
ढतरनियमासक्तचित्ताविविक्तंदेशंसंश्रित्यरम्यंशिवजनसहितंबिल्ववृक्षौघवीतं॥ तिष्ठंत्यत्यंतहृष्टाःधृतभसितकणा

विष्ठदेहामनोज्ञास्तेधन्याः सत्यमेतन्नगिरिवरतनये सर्वथा सत्यमेव॥१३९॥ ॥इतिश्रीशिवरहस्ये उग्राख्ये सप्तमांशे शिवगौरीसंवादे काशीमाहात्म्ये तृतीयोध्यायः॥३॥ ॥श्रीउग्राय नमः॥ ॥श्रीशिव उवाच॥ ॥कथामन्यां प्रवक्ष्येहं शृणु सादरमंबिके॥ यत्कथाश्रवणादेव सद्यो मुच्येत पातकैः॥१॥ शिवस्थानान्यनेकानि संति काश्यां वरानने॥ तेषां संख्या मया सम्यक् कर्तुमेव न शक्यते॥२॥ कदाचिच्छक्यते कर्तुं भूपांसुगणना भुवि॥ काश्यां शिवस्थानसंख्या केन कार्या विशेषलः॥३॥ लिंगोपर्यपि लिंगानि संति काश्यामनेकधा॥ नानिरम्याणि लिंगानि विचित्रफलदानि च॥४॥ तिलस्यापि यमूलस्य सावकाशस्तपस्विभिः॥ न दृश्यते मया काश्यां लिंगासंमर्दतः शुभे॥५॥ ममदिव्यतनुः काशी सर्वाघघ्न्यपि सर्वथा॥ तथाप्यंतर्गृहाकारमस्यां तत्तनुरुत्तमा॥६॥ अंतर्गृहस्य प्राकारं काश्मीरं मणिरंजितं॥ स चेदानीमपि स्पष्टं जवैर्नोर्ध्वं प्रयाति हि॥७॥ तन्मूलमंतर्भागो वा न केनापि च दृश्यते॥ तत्प्राकारप्रभापूरैर्दिशः सर्वापि भूषिताः॥८॥ नानाविधानेकदिव्यरत्नराजिविराजितं॥ तदेवांतर्गृहं रम्यं मम प्रियतरं वरं॥९॥ तस्मिन्नंतर्गृहे रम्ये निवसाम्यनिशं शुभे॥ न तत्र वसतिर्नित्यं ब्रह्मादीनामपि स्फुटं॥१०॥ गंधर्वाणां मनुष्याणां मुनीनामपि किं पुनः॥ रागद्वेषादिनिलयापापतस्तेदुष्टविग्रहाः॥११॥ सर्वथांतर्गृहे वासो न कर्तव्यः शरीरिभिः॥ यतो मूत्रपुरीषादिनिरोद्धुं तेन शक्यते॥१२॥ प्रमादाद्यदि वा मोहान्मूत्रोत्सर्गं करोति यः॥ अंतर्गृहे स पापिष्ठो घोरां प्राप्नोति यातनां॥१३॥ किंच तत्कुलजाः स्वस्वधर्मणोत्तमलोकगाः॥ नीयंते नरकं घोरं सर्वेपि यमकिंकरैः॥१४॥ नरकेष्वपि घोरेषु पच्यमाना दिवानिशं॥ तिष्ठंति पुनरावृत्तिदुर्लभा नरकालये॥१५॥ दुःसहं केश्चिदनिशं त्रास्यंते कैश्चिदुद्भटैः॥ खाद्यंते तप्तशूलाग्रे निपात्यंते मुहुर्मुहुः॥१६॥ संतप्तवालुकामध्ये भर्ज्यंते निर्भयं भटैः॥ ततस्तप्तायसैः पिंडैः निपीड्यंते दुरासदैः॥१७॥ ततस्तप्तशिलाग्रेषु निपीड्यंते भटैर्मुदा॥ संतप्ततैलमध्येपि निक्षिप्यंते पुनः पुनः॥१८॥ पुनः संतप्तरुधिरं पाययंत्यतिसाहसाः॥ तप्तमूत्रं पाययंति बहुधानीग्रमुक्षनाः॥१९॥ तप्तशूले प्रोथयित्वा भ्रामयंति पुनः पुनः॥

दृष्ट्वान्पतिघोराणिभुंजंतेनरकाणिते॥२०॥पुराकश्चिद्द्विजवरोवेदवेदांगपारगः॥पूर्वार्जितैःभूरिपुण्यैःकाशींसंप्राप्य
संस्थितः॥२१॥अंतर्गृहाद्बहिर्देशेसंस्थित्वानियममाश्रितः॥कृत्वादानान्यनेकानितपःकृत्वातिदुःसहं॥२२॥जलमा
त्राशनोनित्यंनियतोनियतेंद्रियः॥प्रदक्षिणमन्वयंकृत्वानित्यमंतर्गृहस्यसः॥२३॥प्रत्यहंबिल्वपत्रैर्मासिलिंगरूपिणमर्चय
न॥वर्षाणामयुतंतत्रस्थोज्वलद्वह्निरिवानिशं॥ततःकदाचिन्मोहेननियतेपिद्विजोत्तमः॥चकारांतर्गृहेह्येवमूत्रोत्स
र्गंशुभावहे॥२५॥ततःस्वनिलयंप्राप्यस्वकीयंद्विजपुंगवः॥अंतर्गृहेकृतंस्वेनमूत्रोत्सर्गंस्मरन्मुहुः॥२६॥रुरोदोच्चैः
स्वकंदेहंस्वयमेवहिताडयन्॥भूमौपतित्वाविलुठन्शिरःसंताडयन्मुहुः॥२७॥तत्पर्णशालानिकटवासिनोन्येमु
नीश्वराः॥श्रुत्वातद्रोदनंसर्वेकिमासीदितिचोचिरे॥२८॥पृष्टस्तैःसरुदंस्तुच्चैःनरकावाससाधनं॥स्वकृतंपापजंक
र्मतेभ्यःसम्यङ्निवेदयत्॥२९॥ततस्तेमुनितत्वज्ञाःश्रुत्वावाचमरुंतुदं॥हाहाहाहेतिरुरुदुःनिर्भत्संताडिताश्च॥
३०॥ततःश्चचिंतयाक्रांतास्तानेयत्रखिद्यमानमान्॥प्रायश्चित्तंययाचेहंस्वकृताघौघनाशनं॥३१॥तेवेदानखिलासम्य
क्आलोड्यापिपुनःपुनः॥तत्पापनाशकंसम्यक्प्रायश्चित्तंनसंजगुः॥३२॥रेविप्रदुर्मतेदुष्टमहत्पापंत्वयाकृतं॥
नचास्यनिष्कृतिर्दृष्टासर्वेवेदेषुसर्वथा॥३३॥बहुकालंतपःकृत्वाधर्मोयःसाधितस्त्वया॥सोपिनष्टःक्षणेनैवतत्पापे
नबलेनहि॥३४॥येपेधर्मास्त्वयासम्यक्साधितापूर्वमादरात्॥तेपिदुःखार्जिताधर्मानष्टारचनसंसयः॥३५॥ना
स्त्येवशरणंविप्रत्तवेदृक्पापकारिणः॥यामीयाःकिंकराःसर्वेत्वंकुर्वंतिसाहसाः॥३६॥पुरायेनर्जिताःसम्यक्तत्व
यानियमकिंकराः॥तत्वंत्यतीवसंतुष्टाःशूलमुद्गरपाणयः॥३७॥बहुक्लेशार्जिताधर्माःक्षणेनैवक्षयंगताः॥दुरद
ष्टस्यमाहात्म्यमिदमेवहिदृश्यते॥३८॥अत्यंतदुर्लभोविप्रकाशीवासोनसंशयः॥मनुष्यदेहमासाद्यकाश्यांसंस्था
तुंनशक्यते॥३९॥अतिधर्मेणवैनित्यंकाशीवासोभविष्यति॥ततःकदाचिन्निश्रेयोभविष्यहमुदावहः॥कथंशिवेप्रयास्या
मोनिर्विघ्नेनाक्षरंपरं॥शांतंप्रसन्नमनघंकदावासयधर्मतः॥४१॥कथमस्माभिरत्यत्रकाश्यांस्थातुंहिशक्यते॥पातकानि

त्रकालेननभविष्यति॥६३॥ एकैकोयः कशाघातःससोढुंकेनशक्यते॥ तादृशोहिकशाघातः केनकर्तुंचशक्यते॥६४॥
विविधायातनाकाश्यांदुःसहाजायतेसदा॥ सर्वथानेवगंतव्यंभवद्भिर्भयविह्वलैः॥६५॥ क्वभवंतः क्वकाशीक्वकाका-
श्यांस्नेजनः॥ समार्गः सर्वथात्याज्योभवद्भिर्दुर्बलैर्भटैः॥६७॥ काशीभिन्नप्रदेशेषुयेमलाः पापिनोजनाः॥ भवद्भि
स्तेसमानेयास्ताडनीयाःप्रयत्नतः॥६८॥ इत्थंयमवचःश्रुत्वातेसर्वेयमकिंकराः॥ तद्देशजान्महापापांतोनरकेषु
सदास्थितान्॥६९॥ सोपिद्विजःसदाकाश्यांकालभैरवकिंकरैः॥ ताड्यमानः स्वकंपापंभुक्तातिष्ठत्यहर्निशं॥७०॥
पापंकृत्वामरणायस्तुकाश्यांजंतुर्भविष्यति॥ सकालभैरवेणैवशिक्षितोभवतिध्रुवं॥७१॥ अल्पंचापिकृतं
काश्यांपापानंतंबहुजायते॥ पुण्यमप्येवमेवात्रजायतेवरवर्णिनि॥७२॥ काश्यांकृतानिपापानिननश्यं
तिकदाचन॥ अणुमात्रंचतत्पापंमेरुतुल्यंभविष्यति॥७३॥ पुण्यंपुराकृतंकाश्यांपापेनैकेननश्यति॥ नचेत्पा
पंतदापुण्यंवर्धतेबहुधाशुभे॥ दुर्लभासर्वथाकाशीकाशीवासोतिदुर्लभः॥ दुर्लभंमरणंकाश्यांकाश्यांधर्मोति
दुर्लभः॥७५॥ काश्यांधर्मार्थमुद्युक्तंपुरुषंविघ्नराशयः॥ समाश्रित्याखिलंधर्मनाशयंतिमुहुर्मुहुः॥७६॥ प्रति
क्षणंप्रतिपदंविघ्नसंघादुरासदाः॥ धर्मोद्योगमतिंमर्त्यनाशयंत्येवसर्वथा॥७७॥ ॥श्रीपार्वत्युवाच॥ ॥महादे
वैवमनिशंविघ्नोपद्रुतमादरात्॥ कथंकाशीनिवासार्थमुद्योगंकर्तुमिच्छति॥७८॥ एवमुक्तप्रकारेणभुविकस्यापि
सर्वथा॥ नभविष्यतिविघ्नेशाकाशीवासोतिदुर्लभः॥७९॥ कीदृशः पुरुषोयोग्यः काश्यांस्थातुंपुरांतक॥ कथंस्थातव्य
मनिशंवदसर्वविशेषतः॥८०॥ ॥श्रीशिवउवाच॥ ॥ शृणुगौरिवरारोहेयथाशास्त्रंवदाम्यहं॥ काशीवासा
ययोग्योहिपुरुषोविजितेंद्रियः॥८१॥ निष्कल्मषोनीतियुक्तोनियतोनिर्गतस्पृहः॥ जीर्णवल्कलवीतांगः पांडुपर्णा
शनप्रियः॥८२॥ दयायुक्तः शांतियुक्तोनिरीहोनिर्गतस्पृहः॥ अष्टांगयोगनिरतोमौनव्रतपरायणः॥८३॥ विभूति
भूषणोनित्यंत्रिपुंड्रांकितमस्तकः॥ रुद्राक्षमालावीतांगोलिंगपूजापरायणः॥ तुल्यनिंदास्तुतिर्धीरस्तुल्योमानाव

श्रीशिव

मानयोः॥ रागद्वेषादिरहितोनिर्विरक्तोविगतस्पृहः॥८५॥ पंचाग्निसेवानिरतोनित्यंयात्रारतोनिशं॥ नित्यांत
र्गृहयात्रायांनियतोदृढविग्रहः॥८६॥ पंचाक्षरजपासक्तः पक्षेपक्षेयथाविधि॥ पंचक्रोशस्ययात्रायांनियतःसत्य
मानसः॥८७॥ सत्यव्रतःसत्यपरोनित्यंमत्पूजनेरतः॥ मद्भक्तजनसंसेवीमल्लिंगैकार्चनप्रियः॥८८॥ शैवशास्त्र
रतोनित्यंशैवव्रतरतःसदा॥ काशीवासाययुक्तोयंसधर्मोप्युच्यतेजनः॥८९॥ असंचितारूढपवानीवारकण
भोजनः॥ यथोक्तयात्रानिरतःसर्वसंगविवर्जितः॥९०॥ निर्ममोनिरहंकारःत्यक्तबंधुर्निराकुलः॥ सर्वदाधूप
दीपाद्यैःमल्लिंगार्चनतत्परः॥ वीतरागोगतस्नेहःपुत्रस्नेहादिवर्जितः॥ ॥वेदांतश्रवणासक्तोवेदाध्ययनत
त्परः॥९२॥ यदृच्छालाभसंतुष्टःप्रतिग्रहपराङ्मुखः॥ ॥मित्रेपुत्रेचशत्रौचसमदृष्टिरलोलुपः॥ विभूति
धारणपरोरुद्राक्षाभरणःसदा॥९३॥ रुद्राध्यायजपासक्तःपंचाक्षरपरायणः॥ चांद्रायणाद्यनेकेच्छशिवव्र
तपरायणः॥९४॥ शिवभक्तार्चनरतःसर्वदाशिवचिंतकः॥ अनन्यशरणोनित्यंमदाराधनतत्परः॥९५॥ कालभै
रवपूजायांनियतःप्रतिवासरः॥ इतोन्येमनुजाःकाश्यांनिरंतोपिनराधमाः॥९६॥ काशीवाससमुत्पन्नधर्मभाजो
नसर्वथा॥ प्रत्युतास्यांस्थिताःकाश्यांपापमेवार्जयंतिते॥९७॥ तदन्यैर्मनुजैःकाश्यांनस्थातव्यंकदाचन॥ तदन्ये
रात्महत्यैवक्रियतेस्थीयतेयदि॥९८॥ मदुक्तकर्महीनैस्तुकाश्यांनस्थेयमेवहि॥ काश्यांप्रतिग्रहोनैवकर्तव्यःसर्वथाज
नैः॥९९॥ यदिमोहात्प्रमादाद्वाकरोतिसपतत्यधः॥ नीरंवापांडुपर्णानिभक्षयित्वायथोचितं॥१००॥ स्थातव्यमनिशं
काश्यांमुक्तिकामेनशैलजे॥ नतत्रहिनार्जितैःस्वल्पैर्नीवारैर्वासकंवपुः॥१०१॥ पोषणीयंनित्यपात्राशिवध्यानपरायणैः॥
दिनांतराशनार्थायसंग्रहःसर्वथाजनैः॥२॥ नकर्तव्योनकर्तव्यःकाश्यांप्रयतमानसैः॥ काश्यांप्रतिग्रहासक्तैःधनसंग्र
हतत्परैः॥३॥ स्थितंतैर्यातनाघोराभोक्तव्यानात्रसंशयः॥ दुष्प्रतिग्रहसंसक्तैःदुरन्नाशनलोलुपैः॥४॥ अन्यायार्जि
तवित्तैश्चकाश्यांनस्थेयमंबिके॥ असत्यवादिभिर्दुष्टैःविषयासक्तमानसैः॥५॥ शिवाचारविहीनैश्चकाश्यांनस्थेयमंबि

के॥ मदन्यपूजनासक्तैः मद्भक्त्यालोकनोत्सुकैः॥ मदन्याश्रयचिंतैश्च कार्यं न॰॥६॥ पुत्रस्नेहरतैः लुब्धैः धीवरैः पिशुनैर्जडैः॥ स्वदेहपोषणासक्तैः कार्यं न॰॥७॥ शिवद्वेषरतैर्मूढैः कृपणैः शैवनिंदकैः॥ पंचाक्षरविहीनैश्च कार्यं न॰॥८॥ भस्मोद्धूलनरुद्राक्षजटाहीनैर्नराधमैः॥ लिंगपूजाविहीनैश्च कार्यं न॰॥ परस्त्रीनिरतैर्नष्टैः शैवशास्त्रविनिंदकैः॥ शैवदुःखकरैः क्रूरैः कार्यं न॰॥१०॥ रागद्वेषाक्रांतचित्तैः मदनाक्रांतविग्रहैः॥ राजसैः तामसैः मूर्खैः कार्यं न॰॥११॥ ईदृशैः पापनिरतैः स्थित्वा कार्यं यथेच्छया॥ देहांते पालनाक्रूराः प्राप्नुयात्सत्यमुच्यते॥१२॥ पापभीरुभिरत्युत्कृष्टैः शैवशास्त्रविशारदैः॥ लिंगपूजारतैः शैवैः कार्यं स्थानत्र्यमंबिके॥१३॥ भस्मत्रिपुंड्रनिटिलैः भस्मोद्धूलनतत्परैः॥ शिवैकदैवतैः शैवैः का॰॥१४॥ शिवदीक्षापरैः श्रेष्ठैः पंचाक्षरपरायणैः॥ मन्नामजीवनैः शैवैः का॰॥१५॥ रुद्राध्यायजपासक्तैः शिववीक्षणतत्परैः॥ निष्कल्मषपरैः शैवैः कार्यं स्थानत्र्यमंबिके॥१६॥ रुद्राक्षमालाभरणैः जटामंडलमंडितैः॥ शिवध्यानरतैः शैवैः कार्यं स्थानत्र्यमंबिके॥१७॥ महापाशुपतैः धीरैः योगशास्त्रविशारदैः॥ शिवाद्वैतपरैः शैवैः कार्यं स्थानत्र्यमंबिके॥१८॥ जितेंद्रियैर्जिताहारैर्जीर्णपर्णांबुभक्षणैः॥ शिवैककारणैः शैवैः कार्यं स्थां॰॥१९॥ रागद्वेषादिरहितैः छिन्नसंसारबंधनैः॥ सात्विकैरनघैः शैवैः का॰॥२०॥ कलत्रपुत्रमित्रेषु स्नेहहीनैरनाकुलैः॥ शिवभक्तरतैः शैवैः कार्यं॥२१॥ यदृच्छालाभसंतुष्टैः सुखदुःखविवर्जितैः॥ नित्ययात्रापरैः शैवैः कार्यं स्थानत्र्यमंबिके॥२२॥ नित्यं मत्पूजनासक्तैः मद्भक्तजनसेवकैः॥ दर्शनः करणैः शैवैः कार्यं स्थानत्र्यमंबिके॥२३॥ अंतर्गृहादियात्रायां नित्यमुद्युक्तमानसैः॥ मत्तत्वचिंतकैः शैवैः कार्यं न॰॥२४॥ अत्युत्सुकैरनिर्विण्णैः प्रतिग्रहपराङ्मुखैः॥ वशीकृतेंद्रियैः शैवैः कार्यं स्थानत्र्यमंबिके॥२५॥ हर हर परमेशानंदकंदेश शंभो शिव शिव करुणाब्धे शंकराशेषहेतो॥ भव भव भयहारिन्देवदेवेति नित्यं शिवनगरनिवासासक्तचित्ता वदंति॥२६॥ ॥ इति श्रीशिवरहस्ये उग्राख्ये सप्तमांशे शिवगौरीसंवादे अंतर्गृह

यात्रानंकथनंनामचतुर्थोध्यायः॥४॥ ॥श्रीउमायनमः॥ ॥श्रीपार्वत्युवाच॥ ॥महेशाखिलदेवेशकाशीवा
सरनेनरः॥प्रत्यहंनियतंकार्यंकिंकर्तव्यंवदप्रभो॥१॥ ॥श्रीशिवउवाच॥ कमलनामकमलपत्राक्षिशृणुशैलसुते
मले॥वक्ष्येप्रत्यहिकंकर्मकाशीवासेषुचेतसां॥२॥ अरुणोदयवेलायांउत्थायप्रत्यहंशिवे॥पंचक्रोशाद्बहिर्दूरान्
गंतव्यंनियतेंद्रियैः॥३॥विलोक्यभिजेलंदेशमुषरंतृणवर्जितं॥तृणेराच्छाद्यनंदेशंमृदमादायनूतनां॥४॥तीर्था
न्यजलमाहृत्यवहन्पात्रेप्रपूरयेत्॥कर्णस्थब्रह्मसूत्रस्तन्दक्षिणामुखमास्थितः॥५॥कुर्यान्मूत्रपुरीषेचत
तोन्यत्रोपसंविशेत्॥मृदंत्रेधाविभज्याथभागमेकंविभज्यच॥६॥स्थूलामलकमानेनगृहीत्वामृदमादरात्
शौचंकार्यंप्रयत्नेनगंधलेपक्षयावधि॥७॥करशौचंततःकृत्वापादशौचंनिवर्तयेत्॥अप्रमादेनमौनेनत्यक्त्वा
न्यालापनंतदा॥८॥पूर्वस्थापितमृद्भागद्वयेनैवयथाविधि॥अन्यांवामृदमानीयमरुदेशस्थितांशुचिः॥
अपानेपंचधाहस्तेदशधांनेकरद्वये॥सप्तैकापादयोरेकाशौकेतिस्त्रःकरेत्रिधा॥१०॥एवंगृहस्थैकर्तव्यंद्वि
गुणंब्रह्मचारिणा॥त्रिगुणंवनवासेस्तुयतिभिस्तुचतुर्गुणं॥११॥एतद्दशगुणंकार्यंमहापाशुपतैर्वरैः॥त
तश्चतुर्गुणंकार्यंमहाशैवैःशिवार्चकैः॥१२॥ततोद्वादशगंडूषैःकुर्याद्वक्त्रस्यशोधनं॥एकैकगुणार्धेवमात्रो
वमिदमादरात्॥१३॥कर्तव्यंनियतैर्नित्यंशौचंपापापनोदकं॥नोचेदस्नातनेकर्मण्यधिकारोनविद्यते॥१४॥त
तःखदिरकाष्ठाद्यैःदंतधावनमाचरेत्॥पुनःप्रक्षाल्यवदनंप्रविशेत्स्वारुयंततः॥१५॥तत्रशुद्धासनासीनःशि
वमद्वयमव्ययं॥चिंतयित्वाततोगच्छेत्स्नानायहितमानसः॥१६॥शिवलिंगप्रांतदेशाविलसद्विमलेजले॥सर्वपा
पहरेशुभेस्नानंकार्यंविधानतः॥१७॥तीर्थेद्वादशधाकार्यंमज्जनंपापनाशकं॥रुद्रसूक्तैर्मार्जनंचततःकार्यंप्रयत्नतः
१८॥ततस्तीर्थजलेसम्यक्निमज्यनियतेंद्रियैः॥स्मर्तव्यशंकरःसाक्षादहमेवजगत्प्रभुः॥१९॥तर्पणीयास्ततस्सम्य
क्देवर्षिपितृदेवताः॥परिधानंचकर्तव्यंततश्चाहतवाससा॥२०॥ततःसम्यक्कुशासीनःकुर्यादुच्चूलनंक्रमात्॥आपा

दमस्तकं शुक्लसिनार्द्रेनैव भस्मना॥२१॥ वामहस्ते विनिक्षिप्य भस्म संप्रोक्ष्य चोदकैः॥ सद्योजातादिमंत्रैस्तु ततः सम
भिमंत्रयेत्॥२२॥ ततो मूर्ध्नि ललाटे च कंठे कर्णे च वक्षसि॥ नाभावंसे बाहुमूले प्रकोष्ठे मणिबंधके॥२३॥ बाहुपार्श्वेप
ष्ठदेशे नेत्रयोर्गंडमंडले॥ कुर्यात्प्रयत्नतः सम्यक् त्रिपुंड्रं भस्मना शुचिः॥२४॥ रुद्राक्षधारणं कार्यं यथाविधि ततः क्र
मात्॥ ततश्च स्वस्वशाखोक्तां संध्यां कार्यां प्रयत्नतः॥२५॥ ततो हुत्वा वह्निरूपमयेवाज्यादिसाधनैः॥ ततो मल्लिंगमम
लं पूजनीयं यथाविधिः॥२६॥ ततो विश्वेश्वरं नत्वा मामेव सुरपुंगवं॥ पूजां कृत्वा विधानेन प्रणम्य च पुनः पुनः॥२७॥
ततश्च नित्ययात्रार्थं कुर्याद्दुद्योगमादरात्॥ नियतेन स्वार्जितेन गंधपुष्पाक्षतादिना॥२८॥ आदौ नियममास्था
य दंडपाणिं यथाविधि॥ धूपदीपादिभिः सम्यक् अर्चयित्वा प्रणम्य च॥२९॥ ध्यात्वा सम्यग्यथाशास्त्रं दंडपाणिं ग
णेश्वरं॥ कृतांजलिपुटो भूत्वा ततो मंत्रमिमं पठेत्॥३०॥ नित्ययात्रां करिष्यामि दंडपाणे प्रसीद मे॥ करुणा
कर सर्वज्ञ सुरासुरनमस्कृत॥३१॥ ज्ञानवाप्यामहं स्नातुं मुमुक्षोस्म्यघशांतये॥ आज्ञां देहि कृपासिंधो त्रि
वभक्तैकजीवन॥३२॥ इति संप्रार्थ्य नत्वा च दंडपाणिं तदाज्ञया॥ यथाविधि ततः स्नानं ज्ञानवाप्यां समाचरेत्॥३३॥
ततश्चोद्धूलनं कृत्वा त्रिपुंड्रं च ततः परं॥ रुद्राक्षधारणं कृत्वा शिवध्यानपरायणः॥ ज्ञानेश्वराभिधं लिंगं सर्वेष्टफल
दायकं॥ प्रणम्य प्रार्थये देवं प्रसीदेति पुनः पुनः॥ ततश्च बिल्वपत्राद्यैः समभ्यर्च्य यथाविधि॥ तदाज्ञया ततः संप्र
कृ नत्वा पंचविनायकान्॥३६॥ दधिदूर्वादिभिः सम्यगर्च्य ईलाय यथाविधि॥ तथाज्ञपादुंढिराजं मर्चयेन्नित्यमा
दरात्॥३७॥ गंधपुष्पाक्षतैः शुद्धैर्बिल्वपत्रैर्मनोरमैः॥ दूर्वांकुरैर्यथायोग्यं नैवेद्यं च प्रकल्पयेत्॥३८॥ प्र
दक्षिणादिकं कृत्वा ढुंढीशं तं प्रणम्य च॥ तदाज्ञां समवाप्याथ पुनर्नत्वा गणेश्वरं॥ ततो मत्पूजनार्थाय पूजाद्रव्यं
नवं शुभं॥ गृहीत्वा नियमेनैवं मुक्तिमंटपमाश्रयेत्॥४०॥ कृतांजलिपुटः तत्र पठेन्मंत्रममुं ततः॥ पुनः पुनः प्र
णम्याथ शंभुमेशानं तमव्ययं॥४१॥ शिवानंत महादेव सोमार्धकृतशेखर॥ यथाशक्ति मया पूजा क्रियते भक्तवत्सल॥

॥४२॥ इति संप्रार्थ्य मामेवं ततो नंदीश्वरमर्चयेत्॥ ततोऽभ्यर्च्य यथायोग्यं द्वारपालानतिक्रमात्॥४३॥ ततो ममजरं नित्यं
सर्वज्ञं सर्वतोमुखं॥ लिंगरूपिणमीशानं ध्यात्वा सर्वोत्तमं शिवं॥४४॥ शुद्धैस्तीर्थोदकैः सम्यक् अभिषिच्य यथावि
धि॥ नमकं चमकं चैव पठन्नन्यान्मनूनपि॥४५॥ ततश्च गंधपुष्पाद्यैर्बिल्वपत्रैर्मनोहरैः॥ धूपदीपैरनेकैश्च नैवे
द्यैरर्चयेच्छिवं॥४६॥ प्रदक्षिणनमस्कारन्स्तैश्च करताडनैः॥ नानाविधैः स्तोत्रपाठैर्मामाराधय यथाविधि॥४७॥
उपविश्य ततः शुद्धे निर्मले मुक्तिमंडपे॥ स्वहृत्कमलमध्यस्थं चिंतयित्वा सदाशिवं॥४८॥ पंचाक्षरजपं कुर्यात्
यथायोग्यं यथाक्रमं॥ ततः परं पुनर्नत्वा पुनः संपूज्य मां विभुं॥४९॥ अंतर्गृहस्य यात्रार्थं कुर्यात्संकल्पमाद
रात्॥ ततः षष्टिसहस्रेश्च गणनाथान्प्रपूजयेत्॥५०॥ अष्टाशीतिसहस्रेश्च भैरवांश्च ततः परं॥ शतकोटि
महादुर्गाः पूजनीयाः प्रयत्नतः॥५१॥ ततः पुनर्ज्ञानवाप्यां स्नानं कृत्वा विधानतः॥ ततोंऽतर्गृहयात्रापि कर्त
व्या विधिपूर्वकं॥५२॥ स्वशान्त्या संप्रसाद्यैव तानंतर्गृहसंस्थकान्॥ अंतर्गृहस्थलिंगानि संपूज्याथ स्वश
क्तितः॥५३॥ अंतर्गृहस्थतीर्थेषु स्नानं कार्यं यथाविधि॥ तर्पणीयाश्च पितरो नित्यं यात्रापरैः शुभैः॥५४॥
पुनः स्नानं यथायोग्यं ज्ञानवाप्यां समाचरेत्॥ ततो ममांतिकं गत्वा मामाराध्य यथाविधि॥५५॥ यात्रां निवेद्य
स्वकृतां मह्यमेव प्रणम्य च॥ पुराणवचनैर्मंत्रैः स्तोत्रैराराध्य मामजं॥५६॥ विश्रम्याथ यथायोग्यं विमले मुक्ति
मंडपे॥ वीरेश्वराभ्यर्चनाय गंतव्यं च ततः परं॥५७॥ वीरेश्वरसमीपस्थे वीरतीर्थे पुनः शुभे॥ स्नानं कृत्वा प्रयत्ने
न भक्तिपूर्वकमादरात्॥५८॥ ततो वीरेश्वरं सम्यक् पूजयित्वा यथाविधि॥ तदाज्ञां समवाप्याथ गच्छेत्पशुपती
श्वरं॥५९॥ तत्र पाशुपते कुंडे पुनः स्नात्वा यथाविधि॥ भस्मना बिल्वपत्रैश्च यजेत्पशुपतीश्वरं॥६०॥ उ
पहारैरनेकैश्च नृत्यगीतैरपि प्रिये॥ समभ्यर्च्य ततो गच्छेत् संप्रार्थ्याशु तदाज्ञया॥६१॥ ईशमभ्यर्च्य तदनु गच्छे
च्छ्रीकालभैरवं॥ स्नात्वा च भैरवे तीर्थे यातनादुःखनाशके॥६२॥ श्रीकालभैरवं सम्यगर्चयेद्विधिपूर्वकं॥

धूपदीपोपहारैश्च पुष्पैर्नानाविधैरपि ॥ प्रदक्षिणनमस्कारैः नृत्यगीतकथा ॥ नानाविधोपचारैश्च पूज
येत्कालभैरवं ॥६४॥ ततस्तदाज्ञया गच्छेद्वक्रतुंडं विनायकं ॥ वक्रतुंडतीर्थेपि स्नात्वा विघ्नविनाशके ॥
॥६५॥ दूर्वांकुरादिभिः सम्यक् अर्चयित्वा विनायकं ॥ वक्रतुंडप्रसादेन तदाज्ञां समवाप्य च ॥६६॥ आ
ग्नीध्रेश्वरपूजार्थं गच्छेन्नियमपूर्वकं ॥ तत्रापि शिवगंगायां स्नानं कृत्वा विधानतः ॥६७॥ शिवगंगोदकैः
शुद्धैः संतर्प्य स्वपितॄंस्ततः ॥ आग्नीध्रेशं ततः सम्यक् पूजयेदिष्टदायकं ॥६८॥ पुनर्मां सम्यगाराध्य तत्तश्च
मदनुज्ञया ॥ अन्नपूर्णापूजनार्थं गच्छेद्धर्मप्रदं हि च ॥६९॥ अन्नपूर्णां मन्नदात्रीं मम वामार्धभागिनीं ॥
सर्वसौभाग्यदां नित्यं स्वाभीष्टफलदायिनीं ॥७०॥ गंधैः पुष्पैः स्तथा धूपैः दीपैश्च विविधैः फलैः ॥ नैवे
द्यैरर्चयेद्देवीं नानापूजोपहारकैः ॥७१॥ प्रदक्षिणनमस्कारैः अर्च्ययित्वा प्रसाद्य च ॥ ततो निजालयं गत्वा
पुनरभ्यर्चयेच्छंकरं ॥७२॥ पंचयज्ञादिकं कृत्वा ततः संपूज्य चातिथीन् ॥ प्रणम्य च गुरूंस्तत्र क्षान्त्यान्नं श्रेयो
तमा नपि ॥७३॥ पत्रं फलं नीरमन्नमन्यद्वायाचितार्जितं ॥ महांनिवेद्य तदनुभोक्तव्यं स्वस्थमानसैः ॥७४॥ य
द्यदा यदा प्राप्तं पत्रं वा फलमेव च ॥ तत्तन्महांनिवेद्यैव भोक्तव्यं स्वस्थमानसैः ॥७५॥ क्वचित्फलादिकं
भक्ष्यं बहु चेत्प्राप्यते तदा ॥ तद्दिनाशनमात्रार्हं गृहीत्वान्यद्विसर्जयेत् ॥७६॥ कदाचिद्यदि न प्राप्तं कंद
मूलफलादिकं ॥ तदा तु जलमन्यद्वा गृहीत्वा संवसेद्दृढं ॥७७॥ स्वस्वादृष्टानुरोधेन प्राप्यते यद्यदा यदा ॥
तदल्पमस्तु बहु वा तुष्टस्तेन भवेत्सदा ॥७८॥ तदाल्पं प्राप्यते भक्ष्यं तदा दुःखी न संवसेत् ॥ दुःखेन त
पसो नाशो भविष्यति न संशयः ॥७९॥ सुखार्थं कामभोगार्थं काशयां नस्थीयते जनैः ॥ किंतु मोक्षार्थमेवात्र स्थी
यते मोक्षकांक्षिभिः ॥८०॥ पूर्वं मुमुक्षार्थिनस्सर्वे निराहाराजितेंद्रियाः ॥ शैवास्तज्ज्ञाः स्थितास्तेस्तु मत्स्वरू
पमुपागताः ॥८१॥ इदं प्रात्यह्निकं कर्म काशीवासरतैः सदा ॥ कर्तव्यमनियन्त्रेन यातनाभीरुभिः शुभे ॥८२॥

अनिक्रूरंरूपाहीनं मत्वा श्रीकालभैरवं ॥ इदं प्राप्य हि कं कर्म काश्यां कर्त्तव्यमादरात् ॥ ८३ ॥ उक्तं प्राप्य हि कं क
र्मत्यल्काय यदिवसेन्नरः ॥ स सर्वयातनाभोक्ता भवत्येव न संशयः ॥ ८४ ॥ आचद्रार्कं महाघोरनरके यमनिर्विगा
॥ सा सोढुं शक्यते नेयं क्षणं भैरवयातना ॥ ८५ ॥ कोपदावाग्निनादग्धान् क्षणादेव हि भैरवः ॥ करोति काश्यां
पापिष्ठान् दयामात्रविवर्जितः ॥ ८६ ॥ कालभैरवपर्यंतं कुसमायांति पापिनः ॥ तद्भक्त्यैरेव नीयंते पापि
ष्ठाः यातनाश्रयाः ॥ ८७ ॥ कालभैरवभक्तानां संख्या कर्तुं न शक्यते ॥ महावीरा मदोन्मत्ताः दुर्धर्षास्त्रिदशैरपि ॥
८८ ॥ कदाचिद्घूर्णिताः संति पांसुरैकतनारकाः ॥ कालभैरवदूतास्तु न संख्येया हि सर्वथा ॥ ८९ ॥ काश्यां पापरतं
मर्त्यं कालभैरवकिंकराः ॥ ग्रहीत्वा यांति दुर्धर्षास्तमभिज्ञाप्य भैरवं ॥ ९० ॥ नीत्वा हसंतो गायंतः पापिष्ठं प्रदहं
ति ते ॥ न त्वं ते लेपानयित्वा पाचयंति पुनः पुनः ॥ ९१ ॥ ताडयंति कशाघातैः शूलाग्रैः प्रोथयंति ते ॥ संतप्तायसपिंडैश्च
ताडयंति यथेच्छया ॥ ९२ ॥ कथं वा न कृता दुष्ट नित्ययात्रा तदा पुरा ॥ तत्पापफलमेवाद्य भुंक्ष्वेत्युक्त्वा निहन्यते ॥
॥ ९३ ॥ कथं मंतर्गृहयात्रा दुर्बुद्धे न कृता त्वया ॥ तत्पापफलमेवाद्य भुंक्ष्वेत्युक्त्वा निहन्यते ॥ ९४ ॥ अनभ्यर्च्यैव
विश्वेशं कथं भुक्तं त्वया तदा ॥ तत्पापफलमेवाद्य भुंक्ष्वेत्युक्त्वा० ॥ ९५ ॥ अस्नात्वैव तदा भुक्तं ज्ञानवाप्यां त्वया
पुरा ॥ तत्पापफलमेवाद्य भुंक्ष्व० ॥ ९६ ॥ श्रीकालभैरवः शास्ता कथं वा नार्चितस्त्वया ॥ तत्पापफलमेवाद्य भु०
॥ ९७ ॥ त्वया नाभ्यर्चितः पूर्वं तदा पशुपतीश्वरः ॥ तत्पापफलमेवाद्य भुंक्ष्व० ॥ ९८ ॥ त्वया वीरेश्वरः पूर्वं स
म्यक् नाभ्यर्चितः पुरा ॥ तत्पापफलमेवाद्य भु० ॥ ९९ ॥ अंतर्गृहे तदा दुष्ट मूत्रोत्सर्गस्त्वया कृतः ॥ तत्पाप० ॥ १०० ॥
तदा शैवजनद्रोहस्त्वया दुष्ट पुरा कृतः ॥ तत्पाप० ॥ १०१ ॥ विभूतिधारणं त्यक्त्वा तदा भुक्तं त्वया पुरा ॥ तत्पाप० ॥
२ ॥ लिंगपूजामकृत्वैव त्वया भुक्तं तदा पुरा ॥ तत्पाप० ॥ ३ ॥ शिवनिंदा कृता पूर्वं त्वया पापपरेण हि ॥ तत्पाप० ॥ ४ ॥
तदा जलं त्वया पीतमनिवेद्यैव शंकरे ॥ तत्पाप० ॥ ५ ॥ कथं वा न कृतं पूर्वं पंचाक्षरजपस्त्वया ॥ तत्पाप० ॥ ६ ॥

कथं त्वया कृतं दुष्ट शिवक्षेत्रस्य दूषणं॥ तत्पापफ०॥७॥ पुरा त्वया दुष्टचित्त शिवनिंदा श्रुता कथं॥ तत्पापफ०॥
८॥ त्वया दुर्भग दुर्बुद्धे काशीनिंदा कथं कृता॥ तत्पाप०॥९॥ पुरा बिल्वदलैः शंभुः त्वया नाभ्यर्चितस्तदा॥ तत्पा
पफ०॥१०॥ शिवेत्येव परं नाम न कथं जपितं त्वया॥ तत्पाप०॥११॥ अस्नात्वा शिवगंगायां कथं भुक्तं त्वया तदा॥
तत्पाप०॥१२॥ कथं त्वया कृतं मूर्ख शैवे निष्ठुरभाषणं॥ तत्पाप०॥१३॥ कथं त्वया कृतं मूर्ख बिल्वस्य स्कंदनं पु
रा॥ तत्पाप०॥१४॥ सेविता न कथं मूर्ख शैवाः शिवपरायणाः॥ तत्पा०॥१५॥ न पंचक्रोशयात्रापि प्रतिपक्षे
त्वया कृता॥ तत्पापफलमेवाद्य भुंक्ष्वेत्युक्त्वाऽनिहन्यते॥ काश्यां स्थित्वापि सततं न कृतं सत्यभाषणं॥ तत्पा०॥
ज्ञानवाप्यां त्वया पूर्वं कथं निष्ठीवनं कृतं॥ तत्पाप०॥१८॥ शिवतीर्थमपीत्वैव कथं भुक्तं त्वया पुरा॥ तत्पा०॥
॥१९॥ प्रदोषे शंकरः पूर्वं कथं नाभ्यर्चितस्त्वया॥ तत्पाप०॥२०॥ एवमन्यानि पापानि स्मृत्वा स्मृत्वा
पुनः पुनः॥ तप्तमुसलादिभिः सम्यक् ताडयंत्यतिदारुणं॥२१॥ पुरा द्विजाधिपः कश्चिच्छिवभक्ति
परायणः॥ शारदामप्युतं चक्रे काशीवासं स्वधर्मतः॥२२॥ नित्यं नगर्हूयाशाद्धि कुर्वन्विजितमान
सः॥ निराहारेण सततं नेत्यवसत्तु दुःखवर्जितः॥२३॥ कदाचित्तु रुरुर्दक्षः शिष्यं वीक्ष्य कृशाकृ
तिं॥ तमुवाच ततः प्रीत्या प्रणतानतकंधरं॥२४॥ शिष्य जीर्णं शरीरं ते शक्तिस्तव विनश्यते॥
न कर्तव्यो निराहारः त्वया शाशावधि सत्तम॥२५॥ जलानि जीर्णपर्णानि फलं वा मूलमेव वा॥ अयाचितं यदि मां

स्नं तदा तद्भुंक्ष्व सादरं॥२६॥ क्षुधेरूपाशयोगेदृक् नशरीरं जायते तव॥ यद्येकं नोपभोक्तव्यमल्पं भुंक्ष्व यथोचितं॥
॥२७॥ मलादीन्यपि जायंते जंतूनामन्नभक्षणात्॥ तद्भयं तु महत्काश्यां मा प्रमादेन संवस॥२८॥ शर्वर्याः प
श्चिमे यामे पंचक्रोशाद्बहिर्व्रज॥ कुरु तत्रैव नियतं मलमूत्रविसर्जनं॥२९॥ शौचादिकं यथाशास्त्रं कुरु सतत
मादरात्॥ ततः काश्यां समागत्य कर्म प्रात्यह्निकं कुरु॥३०॥ इत्युक्तो गुरुणा सोऽपि तदा चक्रे ततः परं॥ एवं नि

निवसतस्तस्य भूपान्कालोगतस्तदा॥३१॥ अंतर्गृहस्य यात्राख्यिकृत्वासर्वे कदाचन॥ पपातांतर्गृहे भ्रांतो मूर्छितश्छिन्नविग्रहः॥ ततस्तत्रैव तद्देहान्मलमूत्रादिनिस्सृतं॥ ततः सचेतनां प्राप्य स्वाश्रमं पतितं पपौ॥३३॥
सचाय स्वकृतं कर्मस्मृत्वा स्मृत्वा पुनः पुनः॥ करोदबहु दुःखेन पापभीतद्विजोत्तमः॥३४॥ तदाप्रभृति विप्रो मायाहारं संत्यजन्ततः॥ निराहारं तपश्चक्रे तत्स्मृत्वा पापमन्वहं॥३५॥ प्रबुध्यमानस्तत्पापं ध्यांत्ये संवत्सरायुतं॥ वह्निमध्ये स्थितो नित्यं स्वकपादेन सादरं॥३६॥ तेनापि घोरतपसा नायत्कालं कृतेन च॥ नग्गोलंतादृशंपापं प्रवक्षं चक्षणेक्षणे॥३७॥ ततः सचापुष्टिः क्षीणे काश्यामेव मतो द्विजः॥ असह्यदुःखभोगार्थं बहुकालेषु सर्वदा॥३८॥ म तं विलोक्य तं क्रूराः कालभैरवकिंकराः॥ गृहीत्वा संयपुः शीघ्रं हृष्टचित्ता दुरासदाः॥३९॥
नीत्वा तमग्रेनो निक्षिप्य दग्ध्वा सम्यक् पुनः पुनः॥ तीव्रैः ततः कृत्वाघातैः ददुर्दुःखं मुहुर्मुहुः॥४०॥ मलमूत्रादिकं दुष्टकपमंतर्गृहे कृतं॥ तत्पापनाशकोधर्मः कोपि वेदेन दृश्यते॥४१॥ तादृशं हि महत्पापं केन नाशं प्रयास्यति॥ कथं यायातनादुःखं निरतं ते भविष्यति॥४२॥ अंतर्गृहे तु लिंगानि दिव्यान्यत्यद्भुतानि च॥ नियसंत्यनिशं मर्हेसंख्यातेषां न विद्यते॥४३॥ अंतर्गृहे कृतं यत्तु मलमूत्रादिकं नरैः॥ लिंगोपरि पतति नतद्घोरं यातनाकारणं सदा॥४४॥ त्वयाकृतं महत्पुण्यं संर्वे यद्यपि सर्वदा॥ सधर्मः तेन पापेन सर्वो नष्टो न संशयः॥४५॥ एवं संतर्ज्य संतर्ज्य भैरवस्यैव किंनराः॥ अशीति युगपर्यंतं दग्ध्वातमयतेभराः॥४६॥ बध्वा पाशैः स्ताडयंतः संतप्तायसश्रृंखलैः॥ गृहीत्वा भैरवस्याग्रे निक्षेपुः कुपिता भृशं॥४७॥ भैरवोपि सतं दृष्ट्वा भ्रुकुटी कृतलोचनः॥ अपृच्छत्कोयमित्येतान् कुपितः स्वभटान्प्रति॥४८॥ ॥भत्याऊचुः॥ ॥श्रीकालभैरव श्रीमन्महेशप्रियरुद्र॥ पापिमन्ते भयं चास्यपं चास्य पुररक्षक॥४९॥ अयं महापातकिनामग्रगण्यो दुरासदः॥ अनेनांतर्गृहे पूर्वं मलमूत्रादिकं कृतं॥५०॥ इतितद्वचनं श्रुत्वा भैरवो भीमविक्रमः॥ चुकोपारुणदीर्घाक्षः प्रज्वलन्प

वैतोपमः॥५१॥ ततस्तत्कोपजो वह्निः समुत्थितः प्रज्वलो महान्॥ तमग्निमुत्थितं दृष्ट्वा चुक्रोशोच्चैर्भयाद्द्विजः॥
॥५२॥ सरवध्वनिरत्युच्चैः ब्रह्मलोकादिलोकगः॥ सर्वेषां च भयं चक्रे तत्तल्लोकनिवासिनां॥५३॥ तमेवार्तस्व
रं श्रुत्वा तूष्णीमासमहं तदा॥ विधिं श्रुत्वा तु तं शब्दं ससभ्यः कंपमागतः॥५४॥ कोयमार्तस्वरः क्रूरः संप्रवि
ष्टोदरं मम॥ ततोतिदुःखमत्यंतं दृति ब्रह्मा रुरोद च॥५५॥ मया दुःखकरः शब्दो न श्रुतः पूर्वमीदृशः॥ सोयं कु
तः समुत्पन्नः किमेतस्यास्ति कारणं॥५६॥ इत्याश्चर्यसमायुक्तो नदशां करोत्किंकरं॥ अपश्यदूर्ध्वलोकेषु सं
चरंतं शिवप्रियं॥५७॥ तमालोक्यातिविनयान्नमनम्य च पुनः पुनः॥ उपविश्यासने रम्ये संपूज्य च कृतांजलिः
॥५८॥ वाचस्पतिरिवश्लाघ्यं मधुराक्षरसंयुतं॥ उवाच वचनं वारुविनयानतकंधरः॥५९॥ ॥ब्रह्मोवाच॥ ॥
श्रीमच्छिवप्रियश्रेष्ठ त्वं वो लसमजितेंद्रियः॥ कुतः समागतं कुत्र संचारः क्रियते सदा॥६०॥ अयमार्तस्वरः
कुत्र सर्वलोकभयावहः॥ किमस्ति कारणं लोके तत्सर्वं वक्तुमर्हसि॥६१॥ ॥शिवकिंकर उ०॥ ॥पुरा कश्चि
द्द्विजः काश्यपां तरी हे शिवात्मके॥ मूत्रमूत्रादिकं कृत्वा तत्रैव सततो म्नतः॥६२॥ कालभैरवभृत्यैस्तु पुरा सं
दृतस्ततः॥ भैरवाग्रे स्थापितोस्ति तस्य वा घोषसंश्रयः॥ इदानीमपि पापिष्ठो भैरवेण न ताडितः॥ किंतु तत्को
पसंभूतप्रलयानललाडितः॥६४॥ चुक्रोशात्यपमत्युच्चैः दुःसहानलताडितः॥ दुःखशामकरो धर्मो नेदृशास्य
हविद्यते॥६५॥ अमुं दग्ध्वाति कोपेन भैरवः तदनु ध्रुवं॥ पृदुदीर्घकशाघातैः ताडयिष्यति दारुणं॥६६॥ ततप्र
तैलपात्रेषु पातयिष्यत्यसंशयं॥ तप्तक्रकचशूलाग्रैर्दारयिष्यति तत्तनुं॥६७॥ ततप्रभिंडिपालाग्रैर्पातयित्वा
तुदारुणे॥ ततः पुनः पुनर्दग्ध्वा पुनस्तं ताडयिष्यति॥६८॥ यातनाबहुधानेन भोक्तव्या बहुकालिकाः॥ ततः
शैवविवमेयमलाद्यं नरो हे कृतं॥६९॥ इत्युक्त्वा मतितोत्थाय ब्रह्मणा पूजितस्ततः॥ चचार विविधान् लोकान् प
येष्वंश्री तमानसः॥७०॥ ब्रह्मा तद्वचनं श्रुत्वा काशीदर्शनलालसः॥ सभासद्भिः सहप्रीत्या काशीं प्रतिसमाय

यौ॥७१॥ दुर्गाश्च गणान्भैरवांश्च गणेशान्प्रमथाधिपान्॥ काशीसंरक्षकांन्यान्ह्यसाधय पुनः पुनः॥७२॥
काशीं मंदारपुष्पाद्यैः अभिपूज्य यथाविधि॥ विवेश काशीममलां सर्वाभीष्टफलप्रदां॥७३॥ ततः सशि
वगंगायां स्नानं चक्रे यथाविधि॥ तत्रागस्तीश्वरं सम्यक् पूजयित्वा लदा तथा॥७४॥ स्वसभासद्भिरन्यैः स हे
याग्नेसमाययौ॥ विश्वेश्वराभिदं लिंगं दिव्यं द्रष्टुं समुद्यतः॥७५॥ ॥ मध्येमार्गे वक्रतुंडमभ्यर्च्य तदनुज्ञ
या॥ श्रीकालभैरवं द्रष्टुमाययौ भयविह्वलः॥७६॥ तदा ददर्श वीरं तं उग्रशासनमव्ययं॥ प्रज्वद्गिरिसं
काशं विरतास्यं भयानकं॥७७॥ दीर्घदंष्ट्रं महाबाहुं दहंतं तेजसा युतं॥ धृतदीर्घकशं धीरं मत्पुरंत्रशूल
धारिणं॥७८॥ अनंतकिंकराधीशासंवृतं नीललोहितं॥ स्वर्गादिलोकानखिलान दहंतमिव संस्थितं॥
७९॥ स कालभैरवं दूराद्दृष्ट्वानत्कोपवह्निना॥ संताडितः क्षणार्धेन न्यपतद्भुवि मूर्छितः॥८०॥ सभ्यास्तदो
पिन्यपतन् ब्रह्मणोमितविक्रमः॥ तत्कोपवह्निज्वालाभिर्दग्धाः क्षणमात्रतः॥८१॥ ते संज्ञां समवाप्यैवं
बहुकालेन पीडिताः॥ ततो विश्वेश्वरं द्रष्टुमन्यमार्गेण ते ययुः॥८२॥ ययुराश्चर्यसंपन्नाः कंपमानाः पुनः पु
नः॥ नानाविधोपचारैस्तं दंडपाणिं प्रसादयन्॥८३॥ ततस्तदाज्ञया सम्यक् ज्ञानवापीं प्रणम्य ते॥ तत्र स्ना
त्वाविधानेन ज्ञानेशं प्रणिपत्य च॥८४॥ विनायकान्समभ्यर्च्य ढुंढिराजं प्रपूज्य च॥ मुक्तिमंडपमासाद्य मा
मजं विश्वतोमुखं॥८५॥ विश्वतश्चक्षुषं देवं विश्वतोबाहुमव्ययं॥ नानाविधानं नरत्नैः नानापुष्पैः सुगंधिभिः॥
८६॥ नानाविधोपचारैश्च संपूज्य तदनंतरं॥ प्रदक्षिणनमस्कारैः नृत्यैर्गीतैर्मनोहरैः॥८७॥ स्तोत्रपाठैर्मंत्रपा
ठैः सम्यगाराध्य मां ततः॥ अंतर्गृहादियात्रां च कृत्वा सम्यग्यथाविधि॥८८॥ दिनाष्टकमुषित्वात्र ब्रह्मलोकमुपा
गताः॥ ब्रह्माद्याश्च ततः सर्वे भैरवानलतापिताः॥८९॥ विक्रमं भैरवस्यैव ज्ञात्वा संतोन्यवसन्मुदा॥ धर्मेणैव सदा वसं
ति मुनयः काश्यां प्रकाश्यां मुदा॥ भीमं भैरवमुग्रशासनमजं मत्वा प्रमादैर्विना॥ मामाराध्यमनंतमव्ययमजं मोक्ष

प्रदेशाश्वतं संपूज्यान्वहमंबिके बहुविधैः रश्चोपचारैर्मुदा ॥१०॥ ॥ इति श्रीशिवरहस्ये उग्राख्ये सप्तमांशे श्री
शिवगौरीसंवादे काशीमाहात्म्ये काशीवासनियमविधिकथनं नाम पंचमोध्यायः ॥५॥ ॥ श्रीपार्वत्युवाच ॥ ॥
शिवकल्याण श्रीमन्सर्वज्ञामितविक्रम ॥ ज्ञानवापीति संज्ञेयमस्याः कथमभूद्वद ॥१॥ ॥ श्रीशिव उवाच ॥ ॥
त्रिशूलाग्रेण सुभगे सा वापी खनिता पुरा ॥ आपातालं जलं तत्र निर्गत्याति मनोहरं ॥२॥ काश्मीरमणिभिः शुभ्रैः
पुष्परागैर्मनोहरैः ॥ रत्नैरन्यैश्च विविधैः बद्धा सा नंदनं नरैः ॥३॥ तत्राद्भुतं समभवक्षेमं पद्मं वरानने ॥ वि
चित्रगंधसंबद्धं शतयोजनमायतं ॥४॥ सहस्रदलसंसक्तकेसरागररंजितं ॥ तत्सुगंधेन निर्गंधं सुगंधमभव
ज्जलं ॥५॥ तत्पानकल्पमरवस्तत्सुगंधसमन्विताः ॥ स्वतः सुगंधा इव ते भांति नित्यं वरानने ॥ तत्पद्ममकरंदे
न संपृक्तं राजते जलं ॥ तन्निरस्कृतपीयूषं सुराणामपि दुर्लभं ॥७॥ सदा विकासमापन्नं सदा प्रेक्ष्यमनुत्तमं ॥
कदाचिदपि तन्म्लानं न भवत्येव सर्वदा ॥८॥ कनत्कनकनालाढ्यं तत्क्षेमकमलं शुभं ॥ हेमछत्रमिवाभाति कात्रपा
कमललोचने ॥९॥ तत्कर्णिकामध्यदेशे सुंदरे मृदुले सदा ॥ कदाचिल्लीलया सम्यगुपविश्य वसाम्यहं ॥१०॥
संविष्टं तत्र मामेकाकदाचिद्वरवर्णिनि ॥ स्तुत्वा तु बहुधा स्तोत्रैः संपूज्य विधिपूर्वकं ॥११॥ कृतांजलिपुटाल
स्थो पीनवक्षोजभासुरा ॥ विद्युल्लतेव विमला कमलामललोचना ॥१२॥ ततो मयैव सा पृष्टा कासि त्वमिति सा
ततः ॥ उवाच वचनं चारु सर्वलोकहितावहं ॥१३॥ गंगाहमिह स्वामिन्नेतत्तीर्थाधिदेवता ॥ मत्प्रार्थितं व
रं देहि वरदानविचक्षण ॥१४॥ इदं जलं महादेवत्रैवो यः पातुमिच्छति ॥ तस्यास्त्वं च चलाभक्तिस्त्वयि तत्त्व
मतिस्तथा ॥१५॥ ज्ञानवापीति मन्नाम प्रसिद्धं भवतु प्रभो ॥ सर्वपापक्षयकरं जलं भवतु सर्वथा ॥१६॥
इति संप्रार्थितः सम्यक् तया लोके प्रसिद्धये ॥ तथापि चेतवरं दत्वा तामाश्वास्य पुनः पुनः ॥१७॥ मया तत्रैव सत
तं स्थीयते वरवर्णिनि ॥ रोचते वसतिस्तत्र कमले गंधसंयते ॥१८॥ तादृशं तीर्थममलं सर्वलोकेषु दुर्लभं ॥

स्नानं कृत्वा प्रयत्नेन द्वादशी सोमवासरे ॥ १९ ॥ तत्र देवानृषीन् सम्यक् तर्पयित्वा पितॄनपि ॥ तज्जलैः स्वादुभिः
सम्यक् ज्ञानेशमभिषिच्य च ॥ २० ॥ गंधपुष्पाक्षताद्यैश्च पूजयित्वा यथाविधिः ॥ प्रदक्षिणनमस्कारैराराध्य तद
नुज्ञया ॥ २१ ॥ मुक्तार्थिभिः पिबेत्सम्यक् ज्ञानेशस्नापनोदकं ॥ ततो यत्पानमात्रेण शुद्धो भवति मानवः ॥ २२ ॥ ततस्त
द्धृदये शुद्धे जायते लिंगमुत्तमं ॥ अतस्त्विह तत्तीर्थं तीर्थोत्तममिति स्मृतं ॥ २३ ॥ तत्तीर्थराजरक्षार्थं दंडपाणिर्बलो
न्नतः ॥ मया संस्थापितः शक्तः तत्तीरे विमले शुभे ॥ २४ ॥ विनात द्राक्षया लोके ये न शक्ते नापि वाम्बुभे ॥ स्प्रष्टुं तत्र क्वचने
नूनं तत्तीर्थं मुक्तिसाधनं ॥ २५ ॥ पुरा ब्रह्मादिभिः साकं विष्णुः काशीदिदृक्षया ॥ समाययौ ततो दृष्ट्वा दूरात्काशीं
मनोहरां ॥ २६ ॥ प्रणम्य दंडवद्भूमौ भूयो भूयः कृतांजलिः ॥ अवाप परमानंदं दृष्ट्वा काशीमिति सादरं ॥ २७ ॥ इद
मक्षियुगं धन्यं पुंडरीकनिभं मम ॥ यतः शिवः स्वरूपेयं काशी दृष्टा मयाधुना ॥ २८ ॥ रत्नपंकजसंकाशावियौ ध
न्यौ करौ मम ॥ येन काशी मया पूजा महेशस्यापरा तनूः ॥ इदं धन्यं शरीरं मे येन काशी शिवात्मिका ॥ आलिंगनी
या यत्नेन सर्वपापप्रणोदिनी ॥ धन्योस्म्यहं पुनीतोस्मि भाग्यवानस्मि सर्वदा ॥ यतः शिवस्वरूपेयं काशी संप्रापि
ता मया ॥ ३१ ॥ मदन्यो भाग्यवांल्लोके नास्ति नास्त्येव सर्वथा ॥ यतो मोक्षप्रदा दिव्या काशी० ॥ ३२ ॥ कृतार्थोस्मि कृता
र्थोस्मि कृतार्थोस्मि न संशयः ॥ यतः सांबमयी काशी प्राप्यते पुण्यसंश्रयात् ॥ ३३ ॥ महद्भाग्यं महद्भाग्यं महद्भाग्यं
ममाधुना ॥ यतो मया शिवाकारा काशी संप्राप्यते शिवा ॥ ३४ ॥ सकृत्काशीति नामैव स्मृत्वा पातकिनः पुरा ॥ शिव
सारूप्यमापन्ना सा काशी दृश्यते मया ॥ ३५ ॥ यस्यां सर्वेश्वरः शंभुः सांबसंसारमोचकः ॥ वसंति सर्वदा च केसा
काशी दृश्यते मया ॥ ३६ ॥ यस्यां वै विश्वेश्वरं लिंगं ज्योतिरूपं सनातनं ॥ निवसत्यनिशं श्रेष्ठं सा काशी दृश्यते मया ॥
३७ ॥ यस्यामेवासमेतः सनदिव्यरूपधरः शिवः ॥ करोति लीलामनिशं सा० ॥ ३८ ॥ यस्यां ज्ञानप्रदा नित्यं ज्ञा
नवापी मनोहरा ॥ तिष्ठत्यमलकल्लोला सा० ॥ ३९ ॥ यस्यां पूर्णेंदुवदना परमान्नप्रदायिनी ॥ अन्नपूर्णा स्थिता च

क्षेसा०॥४०॥ यस्यां तिष्ठति दुंढीशः सर्वेष्टफलदायकः॥ सर्वविघ्नहरो नित्यं सा०॥४१॥ यस्यां शिवरतो नित्यं दं
डपाणिः शिवप्रियः॥ तिष्ठत्यतीव संतुष्टः सा०॥४२॥ यस्यां वीरेश्वरः श्रीमान् करुणानिधिरव्ययः॥ वकारवस
तिं नित्यं सा०॥४३॥ यस्यां तिष्ठति देवेशः सदा पशुपतीश्वरः॥ पशुपाशविमोक्षाय सा०॥४४॥ यस्यां तिष्ठति
सर्वेषां शास्ता श्रीकालभैरवः॥ भक्तकल्पतरुः श्रीमान् सा०॥४५॥ यस्यां मंतरर्द्देहे नामश्लेषं शिवमर्मणि शिवं॥ तिष्ठ
ति श्रीकरावासं सा०॥४६॥ यस्यामस्ति विशालाक्षी शिवस्यार्धांगभागिनी॥ भक्ताभीष्टप्रदा नित्यं सा का०॥४७॥
यस्यां त्यक्ततनुर्मर्त्यः शैवः शिवपरायणः॥ शिवाकारमवाप्नोति सा काशी दृश्यते मया॥४८॥ यस्यां मोक्षार्थिनः
योगा निराहाराः शिवार्चकाः॥ निवसंत्यनिशं शंभुस्ता सा काशी दृश्यते मया॥४९॥ यस्यां प्राप्य हि कं कर्म कृत्वाति
ष्ठंति सादरं॥ पापलेशविहीनाश्च सा काशी दृश्यते मया॥५०॥ यस्याः प्रभावं वेदाश्च न जानंत्येव सर्वथा॥
किमन्यानि पुराणानि सा काशी दृ०॥५१॥ यया तुलयितुं वस्तु नास्ति ब्रह्मांडगोलके॥ सर्वार्त्तिनाशिनी धन्या
सा काशी०॥५२॥ एवं वदन् तदा विष्णुः काशीं निकटमादरात्॥ ततश्चक्रे प्रणामानि दंडवत्स पुनः पुनः॥
॥५३॥ ततो नानाविधैः पुष्पैर्दिव्यरत्नैर्मनोहरैः॥ ततो नानाविधैः पुष्पैर्दिव्यरत्नैर्मनोहरैः॥ नानाविधोपचारैश्च
काशीपूजां चकार सः॥५४॥ ततो नानाविधान् कृत्वा काशीसंरक्षकान् गणान्॥ संपूज्य तदनुज्ञातः काशीमावि
शदंबिके॥५५॥ ततः स शिवगंगायां यथाशास्त्रं यथाक्रमं॥ स्नानं कृत्वा प्रयत्नेन चकार स्थूलनं ततः॥५६॥ त्रिपुंड्र
धारणं कृत्वा मंत्रपूतेन भस्मना॥ रुद्राक्षधारणं चक्रे सर्वपातकनाशनं॥५७॥ आगतो विश्वेश्वरमाराध्य पूजाद्रव्ये
सादरं॥ संपूज्य नत्वा विविधैः स्तोत्रैः स्तुत्वा सदाशिवं॥५८॥ ततस्तदाज्ञया विष्णुर्वक्रतुंडमुपागतः॥ तत्र स्नात्वा
विधानेन वक्रतुंडविनायकं॥५९॥ सम्यगाराध्य विधिवत् पुनः सादरपूर्वकं॥ समभ्यर्च्य ततो यत्नेन कालभैरवमा
गतः॥६०॥ कालकुंडे यथाशास्त्रं स्नात्वा विष्णुस्ततः परं॥ क्षीराज्यमधुभिः सम्यक् अभिषिच्य च भैरवं॥६१॥

दिव्यमंदारपुष्पौघैरुपहारैश्च शोभनैः ॥ प्रसाद्य भैरवं देवं प्रणम्य च तदाज्ञया ॥ ६२ ॥ तत्रस्थं तद्दिव्यलिंगानि पू
जयामास सादरं ॥ पापभक्षेश्वरं चैव संपूज्य नद्दनं नरं ॥ ६३ ॥ ततः संतोषमाश्रित्य वीरेशं समुपागतः ॥ तत्र वीरेश
कुंडेपि पुनः स्नात्वा विशेषतः ॥ ६४ ॥ ततो ददर्श वीरेशो भक्तवत्सलमव्ययं ॥ दृष्ट्वा प्रणम्य बहुधा पूजां चक्रे ससा
दरं ॥ ६५ ॥ ततस्तदाज्ञां संप्राप्य ययौ पशुपतीश्वरं ॥ तत्र पाशुपतं कुंडं विलोक्यातिमनोहरं ॥ ६६ ॥ स्नानं चक्रे वि
धानेन नत्वा पशुपतीश्वरं ॥ चक्रे पूजां विधानेन पूजाद्रव्येण सादरं ॥ ६७ ॥ ततस्तदाज्ञया तुष्टो दंडपाणिमुपा
गतः ॥ दंडपाणिं समभ्यर्च्य प्रसाद्य तदनुज्ञया ॥ ६८ ॥ ज्ञानवापीं प्रणम्याथ संपूज्य च यथोचितं ॥ स्नानं चक्रे ततः
सम्यक् विधिपूर्वकमादरात् ॥ ततो ज्ञानेशमभ्यर्च्य नत्वा पंचविनायकान् ॥ ढुंढिराजार्चनं चक्रे स विष्णुर्विधिपू
र्वकं ॥ ७० ॥ ततः स तदनुज्ञातो मुक्तिमंडपमाययौ ॥ ततो नंदीशमभ्यर्च्य द्वारपालानपि क्रमात् ॥ ७१ ॥ चकार
मदनुज्ञातो ममाराधनमादरात् ॥ आदौ पंचामृतैः सम्यगभिषिच्य यथाविधि ॥ ७२ ॥ कामधेनुप्रसादेन संप्राप्तैर
मलैर्नवैः ॥ तीर्थोदकं समाहृत्य स्वयमेव जनार्दनः ॥ ७३ ॥ अभिषेकं ततश्चक्रे रुद्रसूक्तेन सादरं ॥ ततः परिमल
द्रव्यैः अभिपूज्य यथाविधि ॥ ७४ ॥ अनर्घ्यै रत्नैरकरोत्पूजां तदनुसादरं ॥ नवैः स्वोपहृतैः शुभ्रैः बिल्वपत्रैर्मनो
हरैः ॥ ७५ ॥ मंदारपुष्पैरमलैरन्यैश्च कुसुमैर्नवैः ॥ विचित्ररत्नमालाभिः सुवर्णाभरणैरपि ॥ ७६ ॥ भक्त्या संपू
जयामास विष्णुः श्रद्धासमन्वितः ॥ ततो मनोहरैर्दिव्यैः नैवेद्यैरतिशोभनैः ॥ ७७ ॥ धूपदीपादिभिश्चापि तोषया
मास मां शुभे ॥ ततः प्रदक्षिणादीनि कृत्वा नत्वा यथाविधिः ॥ ७८ ॥ स्तोत्रैश्च विविधैस्तुत्वा चकारानर्गं हार्दिकं ॥
एवं वर्षायुतं विष्णुः नित्यं यात्रापरायणः ॥ ७९ ॥ उपास्य काश्यां संतुष्टः पश्यन्शिवकथाः शुभाः ॥ शिवैकशरणो
नित्यं स्थिरे लिंगार्चने रतः ॥ ८० ॥ गंतुकामस्ततो विष्णुः कदाचिदिदमब्रवीत् ॥ ज्ञानवापीतटे रम्ये तपः कृत्वा यथा
विधिः ॥ ८१ ॥ गमिष्ये यत्र कुत्रापि शिवेन प्रेरितस्ततः ॥ त्यक्त्वेदानीमियं काशी दुःखदा स्यात्संशयं ॥ अनंतजन्मत

पमासं प्रापशिवरूपिणी॥ इत्युक्त्वानदत्तु मीत्याहातानयापीनते मुभे॥ ८३॥ सार्धं युगायुतं चक्रे विष्णुर्घोरतरं तपः॥
तं दृष्ट्वा मुनयः सर्वे तपोनिष्ठं जितेन्द्रिये॥ ८४॥ तपोनिधिरिति प्रीत्या नाम चक्रुरकल्मषाः॥ एवं निवसतस्तस्य
कालो भूयानतिक्रमात्॥ ८५॥ ततस्य त्वा तपोविष्णुरतिकल्पस्य कं वपुः॥ प्रज्वाल्य पावकान् सम्यक् एकपादेन
संस्थितः॥ ८६॥ पुनर्धीरे शानिके हे तपस्तप्तुं समारभत्॥ तपोनिष्ठं ततो भानुः प्रणिपत्य जनार्दनं॥ ८७॥ उवा
च वचनं चारु संनतांसः कृतांजलिः॥ ॥ सूर्य उवाच॥ ॥ जनार्दन तपोनिष्ठ सर्वदा सर्वदेहिभिः॥ कः पूजनी
यो यत्नेन को वा देवो न मः परः॥ देवानां ब्राह्मणानां च कोवा पूज्यो विशेषतः॥ ८९॥ सर्ववेदपुविख्यातः सर्व
वेदेश्च कस्तुतः॥ कः स्मर्तव्यो मुक्तिकामैः को वा जप्यो मनुः सदा॥ ९०॥ एतत्सर्वं विशेषेण वक्तुमर्हसि सादरं॥
विष्णुरुवाच॥ ॥ देवोत्तमो महादेवः पूजनीयः प्रयत्नतः॥ ९१॥ स एव सर्वदेवेशः स एव जगदीश्वरः॥ नत
स्मादधिको देवः स एवाखिलपुंगवः॥ ९२॥ वेदैर्वेदान्तसंवेद्यः स एव श्रुतिसंस्तुतः॥ स एव सर्वलोकानां मोक्षदो
मुक्तिनायकः॥ ९३॥ स एव सर्वभावेन पूजनीयो द्विजामरैः॥ जगदुत्पद्यते यस्मात्तस्मिन्नेव प्रलीयते॥ ९४॥
तस्यैश्वर्याण्यनंतानि स एव परमेश्वरः॥ शंकरादधिको देवो नास्ति न भूयते पिच॥ ९५॥ शंकरः सर्वदेवानाम
धिकः शंकरो ध्रुवं॥ पुनः पुनर्विचार्यैव वेदशास्त्राणि तत्वतः॥ ९६॥ शिव एव सदा पूज्य इति पूर्वं विनिश्चितं॥ सत्यं
सत्यं पुनः सत्यं सत्यमेवोच्यते मया॥ ९७॥ शिव एव सदा सेव्यः सेव्यः सेव्यो न संशयः॥ शिव एव सदा पूज्यः स्मर्त
व्यः शिव एव हि॥ ९८॥ शिव एव सदा ध्येयो मुक्तिरूपफले प्सुभिः॥ शिवान्यो मुक्तिदो नास्ति शिव एव ततो जनैः
९९॥ संप्राप्यः सर्वभावेन यत्नैश्च विविधैर्वरैः॥ वेदैरपि शिवो ध्येयो नुज्ञानस्तत्वतो नघैः॥ १००॥ स एव सर्वदा पूज्यो
ध्येयः स्मर्तव्य एव च॥ शिवो धनं शिवो बंधुः शिवस्त्राता शिवः पिता॥ शिवः प्रभुः शिवो दाता शिवान्नास्त्यधिकः परः॥
शिवलिंगं मया पूर्वमर्चितं बहुसाधनैः॥ २॥ इदानीमपि पश्यैतल्लिंगं संपूज्यते मया॥ लिंगार्चनज पुण्येन काशीसं

म्राप्यते मया॥ ३॥ नो चेच्छिवस्वरूपेयं काशी संप्राप्यते कथं॥ शिवलिंगं बिल्वपत्रैः कोमलैरमलैः शुभैः॥ ४॥ निय
तं पूजयेद्यस्तु स धन्यः पुरुषर्षभः॥ अभिषिच्य महादेवं विधाय तत्त्वपनोदकं॥ ५॥ पिबेत्सर्वार्थसिद्ध्यर्थं सर्वपापौघ
शांतये॥ लिंगपूजैव कर्तव्या मुमुक्षुभिरहर्निशं॥ ६॥ बहवो मोक्षमापन्नाः शिवलिंगस्य पूजया॥ देवैर्नरैश्च गंधर्वैः
मुनिभिश्च मुमुक्षुभिः॥ ७॥ अजमोदनकर्तव्याक्षितं पूजैव सर्वदा॥ ऊर्ध्वापनमद्रूत्यादिमं चैव लिंगस्य पूजनं॥
८॥ कर्तव्यमनिशं विप्रैर्देवैश्च शिववत्परैः॥ शिवस्य संनिधिर्लिंगे सर्वलोकेषु सर्वदा॥ ९॥ तिष्ठत्यतो लिंगपू
जा कर्तव्या सततं बुधैः॥ वेदोक्तलिंगपूजैव कर्तव्या सततं द्विजैः॥ १०॥ वेदमार्गरतैः शुद्धैः मोक्षरूपफलार्थि
भिः॥ शिवलिंगमनभ्यर्च्य यो भुंक्ते मोहसंगतः॥ ११॥ स याति नरकं घोरं यावच्चंद्रदिवाकरं॥ आर्यावर्ते पुरा कश्चि
द्ब्राह्मणो वेदवित्तमः॥ १२॥ सर्वसौभाग्यसंपन्नः सर्वशास्त्रविशारदः॥ कलत्रपुत्रपौत्रादिसौख्यवृद्धिकरः स
दा॥ नित्यं शिवार्चनरतः कृतज्ञः सर्वसंमतः॥ कदाचित्क्षुधितः श्रांतो विस्मृत्य शिवपूजनं॥ चकार भोजनं मत्तः
प्रदोषे बालवद्बली॥ तत्कस्मादेव योगेन पंचत्वमगमद्द्विजः॥ १५॥ ततो यमभटैर्नीतः शूलैः संताडितो भृशं॥
यमाग्रे संनिवेश्यैनं पुनः संताडयन्मुदा॥ १६॥ तानुवाच यमः प्रीत्या तदा कोयमिति स्फुटं॥ ॥ यमदूता ऊचुः॥ ॥
यमायं ब्राह्मणः पूर्वं विहाय शिवपूजनं॥ १७॥ उपासेकदिनं मत्तः शंकरस्मरणं विना॥ अनेन भुक्तं मत्तेन श्रांतेन
क्षुधितेन च॥ १८॥ शिवायानर्पितं दिव्यमन्नं सर्वप्रियमादरात्॥ किं पतत्पर्यंतमेवास्य नरके वसतिर्मिता॥ १९॥ की
दृङ्नरके योज्योवद सर्वे विशेषतः॥ ॥ यम उवाच॥ ॥ शिवलिंगार्चनं नित्यं नित्यं त्यक्तमनेन किं॥ कदाचिदुत वा
त्यक्तं मह्यं तज्ज्ञापयंतु वः॥ ॥ यमदूता ऊचुः॥ ॥ शिवलिंगार्चनं नित्यं कृत्वा तेन स्थितं पुरा॥ कदाचिदेककदा त्यक्तं
क्षुधितेन भृशं यम॥ इति तद्वचनं श्रुत्वा विचार्यैव बहुधा यमः॥ २२॥ धर्मशास्त्रविरोधेन वचः प्राह विचक्षणः॥ पंच
संवत्सरपर्यंतं तप्ततैले निरंतरं॥ २३॥ तिष्ठत्वयं ततो भूमौ स्वयमेव पतिष्यसि॥ इति पूर्वं यमेनोक्तं तदा तद्भयतद॥

॥२५॥ ततो यत्नेन कर्तव्यं लिंगपूजा निरंतरं ॥ स्नानं संध्या लिंगपूजा होमं च पितृतर्पणं ॥ स्वाध्यायश्चेति षड्विप्रैः
कर्तव्यानि यमेन हि ॥ नित्यत्वेनैव विधिना प्राप्तं तल्लिंगपूजनं ॥ २६ ॥ तदाप्यपि न त्याज्यं न त्याज्यं सर्वथा द्विजैः ॥
लिंगार्चनविहीनस्य समस्तानि च फलाः क्रियाः ॥ २७ ॥ ततः सर्वार्थसिध्यर्थं लिंगपूजा विधीयते ॥ नित्यकर्मसमध्य
र्थं नित्यत्वेन श्रुतं श्रुतौ ॥ २८ ॥ शिवलिंगार्चनं कार्यं यत्नेन प्रत्यहं द्विजैः ॥ विभूतिधारणं नित्यं नित्यं रुद्राक्षधारणं ॥
शिवलिंगार्चनं नित्यं नित्यमध्ययनं तथा ॥ शिवलिंगार्चनं नित्यं कुर्वन्नपि कदाचन ॥ ३० ॥ यदि त्यक्ष्यति मोहेन
प्रत्यवैति न संशयः ॥ सर्वेप्सितार्थदं नित्यं सुलभं लिंगपूजनं ॥ ३१ ॥ त्यक्त्वा वृथाज्ञनाः सर्वे नरके निपतंत्यहो ॥ लिं
गपूजनमात्रेण बहवो मुनयः पुरा ॥ ३२ ॥ ययुः कैलासनिलयमयत्नेनैव दुर्लभं ॥ लिंगपूजापरं शैवं नेरीक्ष्य यम
किंकराः ॥ ३३ ॥ दूरादेव पलायंते स्मरं लोपमशासनं ॥ न लिंगपूजनादन्यं निश्रेयसकरं परं ॥ ३४ ॥ सत्यमेतत्सत्य
मेतत्सत्यमेतन्न संशयः ॥ इति तद्वचनं श्रुत्वा भानुः संतुष्टमानसः ॥ ३५ ॥ लिंगार्चनपरो भूत्वा काश्यां न्यवसदाद
रात् ॥ वीरेशानिकटे विष्णुरेकपादेन सादरं ॥ ३६ ॥ चकारोग्रं तपस्तीव्रं ज्वलत्त्वं चाग्निमध्यगः ॥ अशीतियुगपर्यं
तं तपः कृत्वा पुनर्मुदा ॥ ३७ ॥ इदानीं शिवगंगायां करोत्युग्रं तपोंबिके ॥ ब्रह्मादयोपि ते देवास्तत्रैव सह सादरं ॥
३८ ॥ तथैवोग्रं तपः कृत्वा निष्कल्यविकलं सदा ॥ तज्ज्ञानवापीजलमादरेण देवाः समस्तास्सततं वरेण्यं ॥ ज्ञानैव
रूपं विमलं पिबंति हृल्लिंगरथे शिवलिंगनिष्ठाः ॥ ३९ ॥ ॥ इति श्रीशिवरहस्ये उग्राख्ये सप्तमांशे शिवगौरी
संवादे काशीमाहात्म्ये ज्ञानवापीप्रसंसायां विष्णुभानुसंवादो नाम षष्ठोध्यायः ॥ ६ ॥ ॥ श्रीउग्राय नमः ॥ ॥
श्रीपार्वत्युवाच ॥ ॥ विश्वेश्वराखिलाराध्य सर्वेश करुणानिधे ॥ क्व मुक्तिमंडपस्थानं तत्प्रमाणं किमन्मतं ॥ १ ॥
मुक्तिमंडपसंज्ञापि कथमस्याभवच्छुभा ॥ एतत्सर्वं विशेषेण श्रोतुमिच्छामि शंकर ॥ २ ॥ ॥ श्रीसदाशिव उवाच ॥ ॥
अतिमिष्टमिदं पृष्टं इदानीं वरवर्णिनी ॥ मुक्तिमंडपमाहात्म्यं श्रृणु वक्ष्ये मनोहरं ॥ ३ ॥ यत्र ज्योतिर्मयं लिंगं मम वि

श्वेश्वराभिधं॥ न चास्ति रत्नप्रासादः सर्वलोकमनोहरः॥४॥ तत्प्रासादप्रभासंघैः दिशः प्रतिदिशस्तथा॥
अत्यूर्ध्वलोकाः सर्वेपि दीपिताः समलंकृताः॥५॥ प्रासादेपि सरत्नाख्ये लिंगाकारो विराजते॥ तन्मूलमग्र
भागो वा न केनापि च दृश्यते॥५॥ अनर्घ्यरत्नमालाभिः सर्वदालंकृतः शुभः॥ मुक्तामालापरिवृतो मूलभागो
ऽस्य सर्वदा॥६॥ प्रासादद्विस्वरत्नानि रात्रौ दीपाः शांबिके॥ निर्धूम्यत्यंतरम्याणि नेत्रोत्सवकराणि च॥७॥
कदाचिदप्यंधकारसंबंधस्तत्र सर्वथा॥ नास्त्येव रत्नदीपौघसंबंधेन वरानने॥८॥ सहस्रं रत्नश्रृंगाणां राज
ते तत्र सर्वदा॥ लिंगाकाराणि शृंगाणि शुक्लान्यप्रतिमानि च॥९॥ तेजःपुंजमिवाभाति प्रासादः सर्वदा शुभे॥
रत्नपुंजमयः प्रीतिं संतनोति निरंतरं॥१०॥ शानोत्कृतमहारत्नप्रभेयमिति धीः सदा॥ सर्वेषां भवति स्पष्टं त
त्प्रसादावलोकनात्॥११॥ विलाससदने रम्यं मम तादृशमंबिके॥ नान्यत्र दृश्यते भव्यं नित्योत्साहकरं
परं॥१२॥ सहस्रकोटिगणपैरस्त्रैः शस्त्रैर्धृतायुधैः॥ वीरैः संरक्ष्यते नित्यं प्रासादो विमलो मम॥१३॥ श्राव्यो
दुंदुभिनिर्ह्रादो जायते तत्र सर्वदा॥ गायंति गायका नित्यं शिवनामानि सादरं॥१४॥ नृत्यंति नर्तकाश्चात्र
चित्रनृत्यविशारदाः॥ मंदारपुष्पसंछन्नो रत्नतोरणसंवृतः॥१५॥ नित्यानंदकरो भव्यः सर्वमंगलसंश्रयः॥
देवैराराधितो नित्यं ध्यानश्च सकलैः सुरैः॥१६॥ तत्प्रसादसमो लोके प्रासादो नैव दृश्यते॥ सर्वेषां भुक्तिदो
नित्यं दर्शनादेव सर्वथा॥१७॥ तत्र लिंगं मास्त्येकं रम्यं विश्वेश्वराभिधं॥ तत्प्रभावो न देवैश्च ज्ञायते ज्ञातुमं
बिके॥१८॥ तल्लिंगतत्वममलैः वेदैरपि न निश्चितं॥ तत्स्वरूपं कथं ज्ञेयं तदन्यैरल्पबुद्धिभिः॥१९॥ वेदै
रपि यथाशक्तिः तदेव प्रतिपाद्यते॥ तदेवोपास्यमखिलैः तदेवाभीष्टदायकं॥२०॥ तदनिर्देश्यममलमप्रमे
यमनामयं॥ निष्कलंकं निराकारं तदेव हि निरंजनं॥२१॥ तदेव निधनेत्यादिमंत्रवेद्यं महात्मकं॥ दर्शनादेव सर्वे
षां मोक्षदं तत्सनातनं॥२२॥ अनेककालमत्युग्रं तपः कुर्वंति सादरं॥ विश्वेश्वराभिधं लिंगं द्रष्टुमेव मनीषिणः॥

अनेककल्पपर्यंतमुपविश्यममापि च॥ प्रभावस्तस्य लिंगस्य यथाकथ्यः कथमंबिके॥२४॥ कदाचिदपि तल्लिंगं न दृष्टं येन सर्वदा॥ न तस्य मुक्तिस्तत्सत्यं सत्यं सत्यं न संशयः॥२५॥ यद्दर्शनार्थं मुनयः कुर्वंति बहुधा तपः॥ तद्धि विश्वेश्वरं लिंगं द्रष्टव्यं बहुयत्नतः॥२६॥ यन्न पश्यंति मुनयो यन्न पश्यंति देवताः॥ यन्न जानंति वेदाश्च तल्लिंगं प्रेक्ष्यमन्वहं॥२७॥ ह्रिग्राण्यतीवरस्यापि बिल्वपत्राणि सादरं॥ येनार्पितानि तल्लिंगे तेन मुक्तिरवाप्यते॥२८॥ अभिषिच्य विधानेन यो मां बिल्वदलैर्मुदा॥ पूजयिष्यति पुण्यात्मा स मोक्षमधिगच्छति॥२९॥ मद्भक्तेन मयि प्रेम्णा पत्रं वा फलमेव वा॥ दत्तं स्तोपहृतं यत्तु तद्गृह्णामि सादरं॥३०॥ एकं बिल्वदलं रम्यं मद्भक्तेनार्पितं मयि॥ अनंतादधिकं नूनं सत्यमेवोच्यते मया॥३१॥ मद्भक्तोऽपि मविज्ञेयः सर्वभावेन सर्वथा॥ सर्वं विहाय मामेव भजते यः सदा मुदा॥३२॥ विभूतिरुद्राक्षपरो लिंगमेवार्चयन्मुदा॥ मामेव शरणं प्राप्तो यः स एव मम प्रियः॥३३॥ महापाशुपताः शुद्धा महाशैवाश्च सर्वदा॥ मामर्चयंति मामेव शरणं प्राप्नुवंति च॥३४॥ मद्भक्तवर्यैः सततं मदर्चनपरायणैः॥ अविमुक्तमिदं क्षेत्रमाश्रित्य स्थीयते मुदा॥३५॥ शैवैः पाशुपतैः शुद्धैः मल्लिंगं पूज्यते सदा॥ तैरेव कृतपूजापि गृह्यते सादरं मया॥३६॥ पत्रं फलं वा पुष्पं वा जलं वा स्वार्जितं शुभं॥ मद्भक्तेनार्पितं मह्यमनंतायोपकल्पते॥३७॥ पत्रेणाप्यर्चितं लिंगं मोक्षदं सर्वदेहिनां॥ विश्वेश्वराभिधं तत्तु तत्प्रसादेऽधितिष्ठति॥३८॥ तत्प्रसादवरस्यैव दक्षिणादिशि भासुरं॥ रम्यं मणिमयं स्थानमेकं तिष्ठति पावनं॥३९॥ तत्सहस्रमणिस्तंभै रत्नमैरुन्नैः शुभैः॥ रंजितं राजते शृंगैः हेमशृंगैश्च राजितं॥४०॥ क्वचित्स्फटिकशृंगौघैः लिंगाकारैर्मनोहरैः॥ स्थानं तद्राजते देवि नेत्रोत्सवकरं सदा॥४१॥ तत्पालकाः चतुःषष्टिकोटिप्रमथनायकाः॥ उद्यदायुधा महावीरा मम प्रियकराः सदा॥४२॥ तस्मिन्नेव महास्थाने शैवास्तत्पालकाज्ञया॥ उपविश्यातिसंतुष्टास्तिष्ठंति शिवपूजकाः॥४३॥ सादरं भस्मदिग्धांगा रुद्राक्षाभरणप्रियाः॥

रुद्रसूक्तजपासक्ताः तिष्ठंति विमलाशयाः ॥४४॥ शैवं महामनुं नित्यं सर्वपापौघनाशकं ॥ जपंतः सततं संतोवसे
त्यत्यंतमादरात् ॥४५॥ शुध्यंतःकरणैरत्र जप्तः शैवे महामनुः ॥ शैवो मोक्षप्रदो नूनं भवत्येव न संशयः ॥४६॥
एकदा पत्रशैवेन जप्तः शैवो मनुर्मुदा ॥ अनेन मुक्तिनैनूनं पापदावाग्निनाशकः ॥४७॥ शैवो मनुः स्वनः शुभः
पापतूलाद्रिनाशकः ॥ सोपपत्रजप्तः शैवैर्द्वैः सार्वभौमपदे ध्रुवं ॥४८॥ शैवस्य महामंत्रो जप्तः पंचाक्षरः परः ॥
शैवैर्मोक्षार्थिभिर्नित्यमत्र मल्लिंगपूजकैः ॥४९॥ तन्मध्ये कर्णिकाकाररत्नराजिविराजिता ॥ अत्युन्नता वेदि
केकातिष्ठति प्रियदर्शना ॥५०॥ तन्मध्य रत्नकाश्मीरमणिराजितमासनं ॥ स्थितं तदुपरि स्पष्टमुपविष्टं मयापु
रा ॥५१॥ तदागता काचिदिंदुबिंबनिभानना ॥ विशालपद्मपत्राभनयनानयनप्रिया ॥५२॥ मंदारमालाम
मलामम्लानां मधुपावृतां ॥ धृत्वा पद्माभहस्तेन क्षौमांबरविराजिता ॥५३॥ सा मां दृष्ट्वानतग्रीवा प्रणम्य मुहुरा
दरात् ॥ बिल्वैर्मंदारपुष्पैश्च चक्रे पूजां यथाविधि ॥५४॥ पूजयित्वा ततः सा मां स्थितांजलिपुटा तदा ॥ इदमेव व
चः प्राह स्तुत्वा स्तोत्रैरनेकधा ॥५५॥ महेशाद्दिव्यस्थानानि संति काश्यामनेकधा ॥ किमत्र रोचते नित्यं वससि
त्वं शंकर ॥५६॥ विशेषः कोत्र देवेश सर्वस्थानविलक्षणः ॥ किमस्ति तत्त्वमेतस्य वद सर्वं विशेषतः ॥५७॥
पृष्टोहमेवं सुभगे तया तदनुसादरं ॥ उत्तरं दत्तवानस्मि तमेवं शृणु सादरं ॥५८॥ काशीयं सर्वलोकेभ्यो मम प्रिय
करानघे ॥ तत्राप्यंतर्गृहं त्वामक्षेत्रं रतिकरं मम ॥५९॥ तन्मध्यगमिदं रम्यं स्थानं प्रियतरं मम ॥ तत्तु लिंगमयं य
स्मात् तत्र प्रीतिर्मयानघे ॥ यथात्र वसतिर्नित्यं तथा नान्यत्र शोभने ॥ अनिशं प्रीतिरत्रैव मम तिष्ठत्यनामये ॥६१॥
किंच काश्यां मत्याक्षेत्रवान् शिवदेवान् शिवार्चकान् ॥ शिवैकशरणानत्र समानीय ततः परं ॥६२॥ रत्नसिंहासने
सम्यगुपविश्य यथासुखं ॥ ममांके विमले शुभ्रे शैवं संवेश्य सादरं ॥६३॥ शैवाख्यात्यंतशुधाय मुक्त्यर्थे तदनंतरं ॥
शैवः पंचाक्षरो मंत्रो मया ह्यत्रोपदिश्यते ॥६४॥ मुक्तिमंडपसंज्ञास्य स्थानस्य श्रुतिसंमता ॥ यतो मया मत्तुं शैवो मोक्षा

रुद्रसूक्तजपासक्ताः तिष्ठंति विमलाशयाः ॥ ४४ ॥ शैवं महामनुं नित्यं सर्वपापौघनाशकं ॥ जपंतः सततं संतो वसं त्यत्यंतमादरात् ॥ ४५ ॥ शुद्धांतःकरणैरत्र जप्तः शैवैर्महामनुः ॥ शैवो मोक्षप्रदो नूनं भवत्येव न संशयः ॥ ४६ ॥ एकदाप्यत्र शैवेन जप्तः शैवो मनुर्मुदा ॥ अनेन शुद्धिर्नो नूनं पापदावाग्निनामकः ॥ ४७ ॥ शैवो मनुः स्वतः शुद्धः पापतूलाद्रिनाशकः ॥ सोप्यत्र जप्तः शैवैर्द्विः सार्वभौमपदो ध्रुवं ॥ ४८ ॥ शैवरूपमहामंत्रो जप्तः पंचाक्षरः परः ॥ शैवैर्मोक्षार्थिभिर्नित्यमत्र मल्लिंगपूजकैः ॥ ४९ ॥ तन्मध्ये कर्णिकाकारा रत्नराजिविराजिता ॥ अत्युन्नता वेदिके कांतिस्फूर्तिप्रियदर्शना ॥ ५० ॥ तन्मध्य एव काश्मीरमणिराजितमासनं ॥ स्थितं तदुपरि स्पष्टमुपविष्टं मया पुरा ॥ ५१ ॥ तदानीमागता काचिदिंदुबिंबनिभानना ॥ विशालपद्मपत्राक्षनयनानयनप्रिया ॥ ५२ ॥ मंदारमालाममलामम्लानां मधुपावृतां ॥ धृत्वापघ्राभहस्तेन क्षौमांबरविराजिता ॥ ५३ ॥ सा मां दृष्ट्वा नतग्रीवा प्रणम्य मुहुरादरात् ॥ बिल्वैर्मंदारपुष्पैश्च चक्रे पूजां यथाविधि ॥ ५४ ॥ पूजयित्वा ततः सा मां कृतांजलिपुटा तदा ॥ इदमेव वचः प्राह स्तुत्वा स्तोत्रैरनेकधा ॥ ५५ ॥ महेशादिव्यस्थानानि संति काश्यामनेकधा ॥ किमत्र रोचते नित्यं वससि त्वं शंकर ॥ ५६ ॥ विशेषः कोत्र देवेश सर्वस्थानविलक्षणः ॥ किमस्ति तत्त्वमेतस्य वद सर्वविशेषतः ॥ ५७ ॥ पृष्टोहमेवं सुभगे तया तदनुसादरं ॥ उत्तरं दत्तवानस्मि तमेवं शृणु सादरं ॥ ५८ ॥ काशीयं सर्वलोकेभ्यो मम प्रियकरानघे ॥ तत्रापि यं नर्दहं त्वा मक्षेत्रं रुचिकरं मम ॥ ५९ ॥ तन्मध्यगमिदं रम्यं स्थानं प्रियतरं मम ॥ तत्तु लिंगमयं यस्मात्तत्र प्रीतिर्महानघे ॥ यथात्र वसतिर्नित्यं तथा नान्यत्र शोभने ॥ अनिशं प्रीतिरत्रैव मम मतिष्ठत्यनामये ॥ ६१ ॥ किं च काश्यां मता च्छ्रेयान् शिवदेयान् शिवार्चकान् ॥ शिवैकशरणानत्र समानीय ततः परं ॥ ६२ ॥ एतत्सिंहासने सम्यगुपविश्य यथासुखं ॥ मम्मांके विमले शुद्धे शैवं संवेत्त्युपसादरं ॥ ६३ ॥ शैवायात्यंतशुद्धाय मुत्तमार्थं तदनंतरं ॥ शैवः पंचाक्षरो मंत्रो मया ह्यत्रोपदिश्यते ॥ ६४ ॥ मुक्तिमंडपसंज्ञास्य स्थानस्य श्रुतिसंमता ॥ यतो मया मनुं शैवो मोक्षा

यात्रैव दीयते ॥६५॥ अतः शैवो महामंत्रो मुनयः शिवतत्परैः ॥ जपनीयः प्रयत्नेन शैवैर्मुक्त्यर्थिभिः सदा ॥६६॥ अ
तिघोरं तपः साध्यं काश्यां मरणमंबिके ॥ यतोत्र मरणादेव शैवैर्मोक्षो ह्यवाप्यते ॥६७॥ पुरा कश्चिद्द्विजाधीशः शिव
लिंगार्चनप्रियः ॥ जन्मकोटिसहस्रेषु तपः कृत्वा हिमालये ॥६८॥ अतिश्रांतः स्सुधाक्रांतो जंगमं लिंगमर्चयन् ॥
जगाम हिमवद्देहं सर्वसौभाग्यसंयुतं ॥६९॥ तदा तमागतं दृष्ट्वा हिमवान् शैवपुंगवः ॥ अभ्युत्थाय यथाशास्त्रं पूजया
मास सादरं ॥७०॥ प्रीतस्तदनु पूजांते हिमवंतं तयान्वितं ॥ संवीक्ष्य वचनं चारु जगाद द्विजपुंगवः ॥७१॥ हिमव
न् सर्वशास्त्रज्ञ सर्ववेदाश्रयानघ ॥ सर्वलक्षणसंपन्न शिवभक्तपरामल ॥७२॥ बहुकालं तपस्तप्तं मयैव गिरि
गह्वरे ॥ लिंगपूजैव सततं कृता विधिवदादरात् ॥७३॥ लिंगपूजाप्रभावेन जन्माद्यं यन्ममाभवत् ॥ तदाप्रभृति
जन्मानि स्मर्यते नात्र संशयः ॥७४॥ ततस्तु बहुयानि त्येक्रियते लिंगपूजनं ॥ पातकानि विचित्राणि विनष्टानि
बहूनि मे ॥७५॥ काशीमाप्रार्थमुद्योगः क्रियते सर्वदा मया ॥ जायंते बहवो विघ्नाः किं कर्तव्यमतः परं ॥७६॥ कुत्र
वा यातपश्चर्या कर्तव्यं कीदृशं तपः ॥ को वा विघ्नहरो मंत्रो वद सर्वं विशेषतः ॥७७॥ ॥हिमवानुवाच॥ ॥गौरीशृं
गमिति ख्यातं एकं शृंगं गवरं शुभे ॥ तत्रास्त्येकं सरो रम्यं दिव्योदकविराजितं ॥७८॥ तत्तीरे विमलं लिंगमेकं गौर्या
विनिर्मितं ॥ तत्र काश्मीर गणपः कश्चिद्गौर्या विनिर्मितः ॥७९॥ तत्र गौर्या सरस्तीरे स्नात्वा कृत्वा विधानतः ॥ लिं
गं संपूज्य यत्नेन यथाशास्त्रं ततः परं ॥८०॥ यथाशास्त्रविधानेन काश्मीर गणनायकं ॥ पूजयस्वातियत्नेन गणा
नां त्वेति मंत्रतः ॥८१॥ तत्प्रीत्यर्थे तपश्चर्या तत्र कार्या निरंतरं ॥ पंचाग्निमध्ये पंचास्यपुत्रध्यानपुरःसरं ॥८२॥
गणानां त्वेति मंत्रोयं सर्वविघ्नविनाशकः ॥ जपनीयः प्रयत्नेन सर्वविघ्नोपशांतये ॥८३॥ इत्युक्तस्तदनुज्ञातः सं
तुष्टः शैवपुंगवः ॥ मत्वा कृतार्थमात्मानं गौरीशृंगं जगाम च ॥८४॥ तस्मिन्सरोवरे रम्ये स्नात्वा च विधिपूर्वकं ॥
गौरीलिंगमिति ख्यातं तल्लिंगमतिशोभनं ॥८५॥ ततो बिल्वदलैः शुद्धैः तत्सरोविमलैर्जलैः ॥ पूजयामास पू

नाम्नागौरीतिलिंगमघापहं॥ ८६॥ ततोगणाधिपंसम्यगाभिषिच्ययथाविधि॥ चकारपूजांविमलैः बिल्वदूर्वांकुरैरपि॥ ८७॥ प्रणम्यबहुधास्तुत्वामनुंविघ्नहरंजपन्॥ पंचाग्निमध्येसंविश्यतपश्चक्रेदृढव्रतः॥ ८८॥ शैवमुग्रंतपोनिष्ठंविलोक्यद्वादशपःसुराः॥ कंपमानास्तिष्ठंतिकृतांजलिपुटाःसदा॥ ८९॥ एवमेवसशैवेंद्रस्त्रिंपचाशद्युगावधि॥ चकारोग्रंतपस्सम्यक्कृत्वाहाराम्बुशांमुदा॥ ९०॥ ततःप्रसादितस्तेनगणेशोविघ्ननाशकः॥ विघ्नांधकारमार्तंडःशुंडादंडविराजितः॥ ९१॥ प्रसन्नेसतिविघ्नेशेस्तुत्वानत्वामुहुर्मुहुः॥ ययाचेसवरंशैवःसर्वविघ्नौघनाशकं॥ ९३॥ गौरीसुतगणाधीशगजवक्त्रशिवप्रिय॥ विष्णुपूजितपादाब्जप्रसीदवरदोभव॥ ९३॥ गणेशसर्वविघ्नेशविघ्नान्संहरसंहर॥ काशीप्राप्तिर्यथाभूयात्तथाकुरुममानघ॥ ९४॥ काशीमाप्यर्थमुद्युक्तंयथामांविघ्नराशयः॥ नबाधंतेसदासम्यक्तथाकुरुगणेश्वर॥ ९५॥ इतिसंप्रार्थितस्तेनविघ्नेशोविघ्ननाशकः॥ संप्रीतोवरदस्तस्मैददौवरमनुत्तमं॥ ९६॥ ततस्तदाज्ञयाशैवःसंतुष्टःसंप्रणम्यच॥ काशीशिवपुरींरम्यांजगाममहामतिः॥ ९७॥ ततःकाशीरक्षकाख्यंसंप्रसाद्यद्विजोत्तमः॥ स्नात्वाचशिवगंगायामाग्नीध्रेशंप्रणम्यच॥ ९८॥ वक्रतुंडेशमभ्यर्च्यनत्वाश्रीकालभैरवं॥ वीरेशमभिवाद्यैवनत्वापशुपतीश्वरं॥ ९९॥ दंडपाणिप्रसादेनज्ञानवापीजलेमले॥ स्नात्वाज्ञानेशमभ्यर्च्यनत्वापंचविनायकान्॥ १००॥ ढुंढिराजंसमभ्यर्च्यसर्वविघ्नौघनाशकं॥ ततोविवेशधर्मात्मामहाशैवाश्रयंसदा॥ १०१॥ इदमेवमहस्थानंमुक्तिमंडपसंज्ञकं॥ यत्रोपदिश्यतेमंत्रंशैवानांमुक्तिकांक्षिणां॥ २॥ अनन्यशरणानांतुमहत्कानामघापहं॥ ततःप्रविश्यधर्मात्मामहाशैवाश्रयंसदा॥ ३॥ मुक्तिमंटपमत्यंतंसुखंप्राप्यद्विजोत्तमः॥ ततोममांतिकंप्राप्यचकाराभ्यर्चनंमुदा॥ ४॥ मत्सेवलिंगेविमलेमुक्तिदेवेदसंस्तुते॥ ततःप्रणम्यबहुधास्तुत्वास्तोत्रैरनेकधा॥ चकारनत्यंबहुधासादरंभक्तिपूर्वकं॥ उपविश्यततोत्रैवजप्त्वामंत्रंशिवात्मकं॥ ६॥ ततोनरंहयात्रादिकृत्वाभक्तिपुरःसरं॥ ज्ञानवापीतटेरम्येनिराहा

घ

 राजितेंद्रिपः॥७॥ चकारोग्रंतपः सम्यक् मुक्त्यर्थी शैवपुंगवः॥ शिवैकनिरतो नित्यं षट्सहस्रयुगावधि॥ ८॥

मंत्राधिराजमममं त्वं जप्त्वा पापौघनाशनं॥ ततः शरीरं विजहौ ज्ञानवापीतटे शुभे॥ ९॥ लिंगपूजां प्रकुर्वाणो वदन् शिवशिवेति च॥ ततो ममांके संविश्य स मे वानुग्रहाद्द्विजः॥१०॥ मंत्राधिराजमममं त्वं जपन् पापौघनाशकं॥ शैवं प्राप्य महामंत्रमोक्षसंप्राप्य शोभने॥११॥ इत्युक्ता सा मनोरम्या मुक्तिमंडपदेवता॥ यथोक्तसदनं रम्यं मंबिके वरवर्णिनि॥१२॥ यमुक्तिमंटपमनर्घ्यमनन्यलभ्यं संप्राप्य शैवमनुमप्यतिपुण्यलभ्यं॥ संपूज्य यंति शिवमेकमुपाश्रयमीशं ते सर्वथा मुनिवराः शिवमाप्नुवंति॥ ११३॥ ॥ इति श्रीशिवरहस्ये उग्राख्ये सप्तमांशे काशीमाहात्म्ये मुक्तिमंटपाख्यानकथनं नाम सप्तमोध्यायः॥७॥ ॥ श्रीउग्राय नमः॥ ॥ श्रीपार्वत्युवाच॥ ॥ शिवानंदमयानंदज्ञानवापीतटे शुभे॥ केन पुण्यप्रभावेन दंडपाणिः स्थिरं स्थितः॥१॥ पुरा चीर्णं किमेतेन तपश्चर्यां कथं कृता॥ कुत्र स्थितं पुरानेन तत्सर्वं वद शंकर॥२॥ श्रीशिव उवाच॥ ॥ हरिकेशवनं नाम काश्यामेव वरानने॥ शीघ्रं सिद्धिकरं रम्यं विलामाश्रयमस्ति मे॥ ३॥ बिल्वमंदारपुंनागपूगलोध्रद्रुमावृतं॥ द्राक्षारसालरुद्राक्षकोविदारवनाश्रयं॥४॥ खर्जूरनारीकेलाम्रकरवीरैर्विराजितं॥ जंबीरहेमकदलीतालसालसमावृतं॥५॥ आम्रातकार्जुनाश्वत्थकेतकीतरुसंवृतं॥ नानाविधलताकीर्णं नानाद्रुमविराजितं॥६॥ नानाविधलताकुंजमंजुलं नयनप्रियं॥ वसंतप्रमुखानेकऋतुभिस्संश्रितं सदा॥७॥ नानाविधानेकपुष्पसंकुलं सर्वदा शुभं॥ नानाविधलताकीर्णं नानाद्रुमविराजितं॥ ८॥ नानाविधफलाकीर्णं घनच्छायमघापहं॥ एतादृशे वने रम्ये हेमराजिविराजितं॥ ९॥ रत्नसोपानसंबद्धं सरः समभवच्छुभे॥ चलद्विमलकल्लोलकुलसंकुलितं सदा॥१०॥ परागपूर्णं परितः सरः सुरवरार्चितं॥ तस्मिंस्तद्देशे सततं शैवाः शिवपरायणाः॥११॥ भस्मोद्धूलितसर्वांगाः त्रिपुंड्रांकितमस्तकाः॥ रुद्राक्षमालाभरणाः शिवनामामृतोत्सुकाः॥१२॥ शैवैकदेवाविम-

लाः शिवाचाररताः सदा ॥ शिवैकशरणाः शुद्धाः पंचाक्षरपरायणाः ॥१३॥ निष्कल्मषा निरातंकाः निवसंति शि
वार्चकाः ॥ शिवाराधनसंसक्ताः शैवशास्त्रविशारदाः ॥१४॥ पंचाग्निमध्ये सततं काशीमरणकांक्षया ॥ तपः कुर्वं
ति सततं मनसा विजितेंद्रियाः ॥१५॥ जीर्णपर्णाशनाः केचित् केचिदंबुकणाशनाः ॥ केचिद्वाताशनाः केचि
न्निराहाराः शिवप्रियाः ॥१६॥ शुद्धांतःकरणाः शुद्धाः शिवतत्त्वैकचिंतकाः ॥ तत्रैव विमले स्थाने दंडपाणिरयं
शुभे ॥१७॥ पंचवात्सरिको बालः तपश्चक्रे दृढव्रतः ॥ पुरा हिमालये रम्ये नानाधातुविराजिते ॥ तपस्तप्तमनेनैने
व महद्घोरतरं मुदा ॥ सकोटियुगपर्यंतं पंचाग्न्यंतरगः सदा ॥१९॥ रुद्राध्यायजपासक्तः शिवलिंगैकपूजकः ॥
निमीलिताक्षोनियतो निःश्वासः शिवचिंतकः ॥२०॥ एकेनैवांघ्रिणा स्थित्वा चक्रे घोरतरं तपः ॥ सर्वोत्तमं वेदवेद्यं
सर्वाधारं जगत्प्रभुं ॥२१॥ ध्यायन्नेव महादेवं गौरीरमणमव्ययं ॥ तद्घोरतपसा भीता भूतास्सर्वे दिवानिशं ॥२२॥
नत्वा कृतांजलिपुटाः त्रिसंध्यं निनतकंधराः ॥ लिंगपूजारते दृष्ट्वा तरवः पुष्पसंकुलाः ॥२३॥ कंपितास्तरवः स
र्वे स्वत एव नमंति ते ॥ प्रज्वलेत्पवनो नित्यं स्वतः कमललोचने ॥२४॥ तपःप्रभावभीतास्ते ज्वलिता इव सर्व
दा ॥ एवं बहुविधं घोरं तपः कृत्वा स्थितं मुदा ॥२५॥ लिंगार्चनरतेनेत्थं बालकेनैव तेन हि ॥ ततः कदाचिन्नंदी
ग्रामारूढः वरवर्णिनि ॥२६॥ सयातेतेन तत्रैन महत्पूजा कृता शुभा ॥ बहुधा च कृतं स्तोत्रं कृताञ्चनतपो मुदा ॥
२७॥ वरोपि याचितस्तेन शिवभक्तिर्दृढास्त्विति ॥ दत्तो वरो मया तस्मै स ततं सादरं पुनः ॥२८॥ तपश्चकार विम
लो मौनव्रतपरायणः ॥ बहुकालेन तपस्तप्तं ततः परमपि प्रिये ॥२९॥ ततः पुनर्मया तत्र गतेनतेनार्चितं प्रिये ॥ तदाम
यामपरोभूत्तपस्वी विजितेंद्रियः ॥३०॥ शिवैकशरणः शुद्धः पंचाक्षरपरायणः ॥ तपो घोरतरं नित्यं किमर्थं क्रि
यते त्वया ॥३१॥ किं त्वयाभीप्सितं तत्त्वं दास्ये वृणु वरं परं ॥ इति पृष्टस्ततः सोपि वव्रे वरमनुत्तमं ॥३२॥ काशीप्राप्तिर्म
मश्रीमनस्त्विति प्रीतमानसः ॥ श्रुत्वा तदुक्तं वचनं विचार्य च पुनः पुनः ॥३३॥ वरो दत्तो मया देवि तत्संतोषार्थमु

तमं॥इतोजन्मसहस्रांते काशींसंप्राप्यसे त्वया॥३४॥एवमेव महद्घोरं करिष्यसि तपो यदि॥ ततः काश्यांस्वध
र्मेणस्थित्वानियतमानसः॥३५॥तत्र घोरं तरं भूयः करिष्यसि तपोऽनघ॥ इति दत्तोवरस्तस्मै तदनुप्रतिजन्मनि॥
जातिःस्मरः तपोघोरंभूयोभूयश्चकारसः॥ततः काशीमिमांप्राप्यतपश्चक्रेसबालकः॥३७॥विघ्नैःसंविघ्नितोप्यत्र
भक्त्याभ्रमामनुत्तमं॥ तेनैवलज्जिताःसर्वे मुनयोब्रह्मवादिनः॥३८॥ आश्चर्यं मुनयश्चक्रुः दृष्ट्वा बालकमुत्तमं॥ दृ
ढव्रतंशिवरतं निमीलितविलोचनं॥३९॥ तं दृष्ट्वा मुनयः सर्वे प्रणमंतिपुनःपुनः॥ अस्तिमात्रावशिष्टांगं लिंगा
भ्यर्चनतत्परं॥४०॥ दृष्ट्वैवमद्भुताः सर्वेपितमंत्यनुदिनंमुहुः॥ कृतांजलिपुटादेवाःनिवसंतिप्रणम्यतं॥४१॥सिद्ध
गंधर्वयक्षाद्याः पूजयंतिमुहुर्मुहुः॥ विप्रानतेकान्सं दृष्ट्वालिंगपूजनतत्परः॥४२॥ तपस्तीव्रतरं चक्रे हरिकेश
वनेशुभे॥एवंनियमतस्तस्य पुनःप्रीत्यागतंमया॥४३॥ ततः समागतंदृष्ट्वाप्रमस्तोषोत्सबालकः॥ ॥दंडपा-
णिरुवाच॥ ॥ विश्वेशमप्रमयाधिशाश्वयभाधीशाहन॥ वेदवेद्यजगन्नाथनमस्ते रुद्रमन्यवे॥४४॥कालकूटद
रःश्रीमन्कालकालकृपानिधे॥ श्रीनीलकंठकामारेउतोतद्र्यवेनमः॥ त्रिशूलपाणेसर्वात्मन्दीनबंधोदिगंबर॥
सर्वासुराधीशनमस्तेअस्तुधन्वने॥४६॥ पिनाकपाणेदेवेशसर्वदेवोत्तमप्रभो॥ अनादिनिधनानंतबाहुभ्यामु
ततेनमः॥४७॥ निरंजननिराधारनिरवद्यनिरामय॥ निष्कलंकनिरातंकंनमस्सोमायतेसदा॥४८॥ वेदांत
वेद्यत्रिदशैकवंद्यत्रियाग्निकालत्रिपुरांतकेश॥ अनंतकल्याणगुणार्णवायरुद्रायदेवायनमोस्तुतुभ्यं॥४९॥अणो
रणीयानमहतोमहीयान्त्वमेवनान्यो जगदेकहेतो॥ विश्वाधिकाशास्यपरापरेशनाथायदेवायनमोनमस्ते॥५०॥ त्व
त्तोजगज्जन्मभवत्यनंतत्वत्तोजगद्रक्षणमिंदुमौले॥ त्वय्येवनाशंसमुपैतिलोकः शंगायदेवायनमोनमस्ते॥५१॥
त्वमेवयोनींद्रमनःसरोजमध्यप्रविष्टःशिपिविष्टशंभो॥ त्वमेवपूर्णःपुरुषःपुराणोमयोभवायप्रणतोस्मिनित्यं॥
॥५२॥त्वमेवयज्ञादिफलप्रदातात्वमेवशेवोत्तमधर्मगोप्ता॥ त्वमेवनानाविधिसृष्टिकर्तास्युग्रायदेवायनमोनमस्ते॥

॥५३॥ त्वत्तो नकिंचित्परमस्ति लोके त्वामेव देवो तममानेति॥ त्वामेव शांतं शरणं प्रपद्ये श्रीमायदेवाय नमो नम
स्ते॥५४॥ त्वामनंतमनाद्यंतमाममनंतिमहर्ष्ययः॥ त्वमेव कर्मफलदः शंकराय नमोस्तु ते॥५५॥ त्वमेव भक्तमंदारो
वृंदारकवरप्रदः॥ त्वमेवाभीष्टदो नित्यं महादेवाय ते नमः॥५६॥ त्वामेवानंतमीशानं त्वामेव जगदीश्वरं॥ वदंति
निगमाः सर्वे महेशान तोऽनतोस्म्यहं॥५७॥ याहशस्त्वं महादेव न जाने तत्वतः शिव॥ वेदैरपि न ते रूपं ज्ञातमीशान
तोस्मि ते॥५८॥ त्वदन्यं न भजामीश त्वदन्यं न श्रृणोम्यहं॥ त्वदन्यं न स्मरामीश त्वदन्यं न वदाम्यहं॥५९॥ नशि
वान्यं पूजयामि शिवान्यः पूज्य एव न॥ न शिवान्यं चिंतयामि शिवान्यश्चिंत्य एव न॥६०॥ कर्मणा मनसा वाचा त्वामे
व शरणं गतः॥ भक्त्यत्वे न महादेव मामंगीकुरु शंकर॥६१॥ पूतोस्मि पुण्यदेहोस्मि धन्योस्मि परमेश्वर॥ यतः त्व
त्पादकमलं दृष्टमद्य मया शिव॥ तपः फलितमद्यैव पुराकृतमहर्निशं॥ यतस्त्वत्पादकमलं दृष्टमद्य मया शिव॥
६३॥ सा लिंगपूजा फलिता या कृता पूर्वमादरात्॥ यतस्त्वत्पा०॥६४॥ धन्या मम माभवन्माता पिता धन्यो भवन्मम॥
यतस्त्वत्पादकमलं०॥६५॥ धन्या मद्दाराजाः सर्वे धन्यमत्कुलमुत्तमं॥ यतस्त्वत्पा०॥६६॥ जप्ताः पंचाक्षराः शुद्धाः
फलिताः श्रुतिसंमताः॥ यतस्त्वत्पा०॥६७॥ पूर्वार्जितानि पुण्यानि फलितानि सदाशिव॥ यतस्त्वत्पा०॥६८॥
तत्तत्कालकृताः सर्वे धर्माश्च फलिताः शुभाः॥ यतस्त्वत्पा०॥६९॥ आपश्चाग्निर्वह्नयः प्रीताः यथाकालेहुता मया॥ य
तस्त्वत्पा०॥७०॥ ऋषयः पितरः साध्याः प्रीताः मायेमरवा अपि॥ यतस्त्वत्पा०॥७१॥ नांतोस्ति मम भाग्यस्य भाग्य
मीदृक्कनकस्य चित्॥ यतस्त्व०॥७२॥ भाग्यस्य परिपाको यं जात एव हि तादृशः॥ यतस्त्वत्पादकमलं दृष्टमेव म
या शिव॥७३॥ स्तुत्वेवं बहुधा बालः प्रणम्य च मुहुर्मुहुः॥ कृतांजलिपुटो भूत्वा तस्थौ संतुष्टमानसः॥७४॥ तस्या
स्तिष्ठ मात्रा वशिष्ठमंगस्पृष्टं मया ततः॥ गाणापत्यमपि प्रीत्या दत्तं तस्मै मनोरमे॥७५॥ ज्ञानवापीरक्षणार्थं तत्तटे
स्थापितो मया॥ वरोन्योपि मया दत्तः संतुष्टेन ततः परं॥७६॥ ॥ त्वत्कृतं स्तोत्रममलं यः पठेत्सततं शुचिः॥ काशी

वासोनिशं तस्य भवत्विति वरानने॥७७॥ तदाप्रभृति तत्तीरे दंडं कांचनमुद्वहन्॥ तिष्ठत्यत्यंतसंतुष्टः पूर्णभद्रसुतं शिशु॥ तेनैव ताडयते लोकः शिवद्वेषकरः सदा॥ब्रह्मादयोपि तं पूर्वमर्चयंत्यधुनाप्युभे॥७९॥ काशीवियोगं तनुते मरु(?) वकुपितः सदा॥मुनीनां मानवानां च देवानामपि शिक्षकः॥८०॥ दंडपाणिकृतायस्मिन् नभविष्यति सर्वथा॥ सन्निहाय तदा काशीं यान्ति देशांतरं भ्रमन्ति॥८१॥ पूजनीयः प्रयत्नेन दंडपाणिर्ममप्रियः॥ काशीवासरतैर्नित्यमप्रमत्तैर्यथोचितं॥८२॥ दंडपाणिप्रसादेन स्नानं भवति धीमतां॥ज्ञानवापीजले रम्ये सर्वपापापनोदने॥८३॥ शिवप्रियो दंडपाणिः पूर्णभद्रसुतोनघः॥ यक्षेशः करुणासिंधुः धूतपापो गणेश्वरः॥८४॥ एतन्नामाष्टकेनैव प्रत्यहं शिवतत्परैः॥ पूजनीयः प्रयत्नेन काशीवासिभिरादरात्॥८५॥ दंडपाणिप्रसादार्थं काशीवासरतैर्नरैः॥ भोजनीयः स्वयोदय्यां शैवः क्षीरादिसाधनैः॥८६॥ नमंति ऋषयः सर्वे पूजयंति च ते द्विजाः॥ तस्यैवानुग्रहाः सर्वे काश्यां तिष्ठंत्यनाकुलाः॥८७॥ अयं यक्षकुलोत्पन्नो बालोपि मदनुग्रहात्॥सामर्थ्यमीदृशं प्राप्य तिष्ठत्यतिबलान्वितः॥८८॥ पूर्वे पूर्वभवे ह्येव मनेनोग्रं तपः कृतं॥ मामुद्दिश्यानिशं सम्यक् तत्फलं जातमीदृशं॥८९॥ यः कश्चिदस्ति सुभगे मद्भक्तो मत्परायणः॥स सर्वं वंद्यः श्रेष्ठश्च भविष्यति न संशयः॥९०॥ इदं मत्वैव मुनयो देवाश्च मानवोत्तमाः॥लिंगरूपिणमेकं मामर्चयंति दृढव्रताः॥९१॥ धृतत्रिपुंड्रां जितमानगर्वाः मनुष्यदेवर्षिवरा निरीहाः॥ मामेकमीशं शरणं प्रपन्नाः तिष्ठंति लिंगार्चनसक्तचित्ताः॥९२॥ ॥इति श्रीशिवरहस्ये उग्राख्ये सप्तमांशे काशीमाहात्म्ये दंडपाणि इतिहासकथनं नामाष्टमोध्यायः॥८॥ ॥श्रीउग्राय नमः॥ ॥श्रीशिव उवाच॥ ॥कथामन्यां प्रवक्ष्येहं श्रोत्रानंदकरां परां॥ शृणु यत्नेन विमलामंबिके पापहारिणीं॥१॥ पुरा कश्चिद्द्विजाधीशः पूर्वजन्मतपोबलात्॥ काशीं संप्राप्य मामर्च्य मभ्यर्च्य विधिपूर्वकं॥२॥ उषित्वैकदिनं दीनः क्षुधार्तो स्नगानेरवो॥ वीरेश्वरालये रम्ये निद्रां कर्तुं समाययौ॥३॥ तत्र गत्वा मनोरम्ये रत्नस्तंबवि-

राजिते॥ नानामणिगणाकीर्णं ददर्श शिवमंदिरं॥ ४॥ तत्र शैववरो दृष्टः कश्चिल्लिंगार्चनप्रियः॥ भस्मरुद्राक्षबद्धां

गस्तेनैव वरवर्णिनि॥ ५॥ तं प्रणम्य महाशैवं कृतांजलिपुटो द्विजः॥ उवाच वचनं चारु हृद्यं शैवजनप्रियं॥ ६॥ ॥

ब्राह्मण उवाच॥ ॥ विप्र शैववर श्रीमन्काशीवासरतानघ॥ काशीप्रभावः कः काश्यां देवः पूज्योस्ति कः प्रभुः॥ ७॥

किमेतल्लिंगमाहात्म्यं किन्नामास्येश्वरस्य च॥ इत्येतन्मया पृष्टं विचार्य वद सादरं॥ ८॥ शैवद्विज उवाच॥ ॥ इदं

वीरेश्वरं नाम लिंगं मंगलदायकं॥ विश्वेश्वरात्प्रभूतं च सर्वपापभयापहं॥ पुरा श्रीविष्णुना घोरं तपस्तप्तमनेकधा॥ ९॥

आब्रह्मकल्पमेकांघ्रिस्थितः पंचाग्निमध्यगः॥ कुंडमस्त्येव कमलमत्र रम्यजलावृतं॥ १०॥ तज्जलस्नानमा

त्रेण नरो यानि परां गतिं॥ पुरा द्विजाधमः कश्चिद्दस्मिन्कुंडे मनोहरे॥ ११॥ स्नानं कृत्वा महालिंगं दृष्ट्वा प्रणम्य

च॥ काशीं त्यक्त्वा स्वदेशाय ययौ स तद्दिनांतरे॥ १२॥ स्वदेशे ब्रह्महत्यादि पातकानि चकार च॥ ततः कदाचित्तत्पापेन

दष्टोभूमौ पतन्द्विजः॥ १३॥ काशीविश्वेश्वरेत्येवं वदन्प्राणान्मुमोच सः॥ ततो यमभटाः क्रूराः बध्वानिन्युर्यमां

तिकं॥ तं दृष्ट्वा शमनः क्रूरः चित्रगुप्तमुवाच ह॥ ॥ यम उवाच॥ ॥ अनेन किं कृतं पुण्यं दुष्कृतं वा विचारय॥

कृतपापानुरोधेन दंडनीयः प्रयत्नतः॥ इति तद्वचनं श्रुत्वा चित्रगुप्तो विचक्षणः॥ १६॥ पूर्वं तत्कृतपापानि जगा

द शमनं प्रति॥ ततो वीरेशकुंडस्य स्नानं वीरेशदर्शनं॥ १७॥ वीरेशकाशीस्मरणं जगाद मृतिकालिकं॥ वीरेश

दर्शनाद्दीनि रम्यत्वाकालस्ततः परं॥ १८॥ प्रदक्षिणीकृत्य विप्रं दंडवत्प्रणिपत्य च॥ अमूल्यरत्नखचितस्वास

ने विमले शुभे॥ १९॥ उपवेश्यार्घ्यपाद्याद्यैरर्चयामास सादरं॥ ततो यमसभासद्भिरर्चितः सकलैरपि॥ २०॥ पू

जितो यमभक्त्येश्वचित्रगुप्तेन चार्चितः॥ इंद्रलोकं ययौ तत्र देवेंद्रेणापि पूजितः॥ २१॥ ततो विमानमारुह्य ब्रह्मलो

कं जगाम सः॥ तमागतं समालोक्य ब्रह्मा तत्त्वविदां वरः॥ २२॥ स सभायां समुत्थाय दंडवत्प्रणिपत्य तं॥ स्फुरद्र

त्नासने रम्ये भक्तिश्रद्धासमन्वितः॥ २३॥ उपवेश्य द्विजं सम्यक् अर्चयामास सादरं॥ ततो ब्रह्मसभासद्भिः विनी

तेर्नतकंधरेः॥२४॥ यक्षः कोयमिति प्रीत्या बभाषे स वचस्तदा॥ ॥ब्रह्मोवाच॥ ॥ अनेन काशीं दृष्ट्वा स्त्रिवि
श्वेशः पूजितः पुरा॥२५॥ स्नात्वा वीरेशकुंडेपि वीरेशो वीक्षितो मुदा॥ उर्वंतकाले स्मृता काशी वीरेशोपि स्मृतः पुरा॥
२६॥ यमेन पूजितः संप्राप्तिं द्वेण च मया प्यहं॥ अशीति युगपर्यंतं देवमानेन सर्वदा॥२७॥ पूजितो त्र मया सम्यक्
प्रत्यहं निवसिष्यति॥ ततः परमयं विप्रो भस्मावधूलितो भविष्यति॥२८॥ वेदशास्त्राण्यधीत्यैव महदैश्वर्यसंयुतः॥ तत्व
ज्ञानं परं प्राप्य ततः काशीं गमिष्यति॥२९॥ काश्यां न्यायार्जितैर्वित्तैस्तर्पयित्वा सुरान्द्विजान्॥ ततः सर्वं परित्यज्य
निराहारो जितेंद्रियः॥३०॥ पंचाग्निमध्ये नियतः शिवपूजापरायणः॥ एकैनैवांघ्रिणा स्थित्वा मौनेन नियमी
व्रती॥३१॥ षट्कोटियुगपर्यंतं तपश्चर्यां करिष्यति॥ ततः शिवप्रसादेन शिवलोकमधिष्ठाय च॥३२॥ शैवं पदं परं ल
ब्ध्वा मुक्तिं गमिष्यति॥ इति तद्वचनं श्रुत्वा सर्वे ब्रह्मसभासदः॥३३॥ तस्मै प्रणम्य विधिवत् पूजां च कुर्युरेव हि
तं॥ तदन्यापि कथा तेन तदैवोक्ता मुदावहा॥३४॥ अत्याश्चर्यकरा श्राव्या यक्षस्तैरेव तान्प्रति॥ ब्रह्मोवाच॥ ॥
वीरेश्वरे पुरा कश्चिद्वेष्टवः शिवजनप्रियः॥ लिंगार्चनरतो नित्यं शांतो विजितमानसः॥ पंचाग्निमध्यसंविष्टः
पंचाक्षरपरायणः॥३६॥ पंचीकृतात्मा पंचात्मा बभूवा विजितेंद्रियः॥ तस्यैव निकटे कश्चित्तमयूरश्चित्रचं
द्रकः॥३७॥ वीरेशकुंडपानीयं पीत्वा पीयूषसंन्निभं॥ दीर्घेपि छाग्रभागेन देवालयरजः कणान्॥३८॥ दूरी
कुर्वन्वीक्ष्यमाणेन्यवसत्तत्र नित्यवासरं॥ ततः कदाचित्तत्रैव भिल्लः कश्चित्समागतः॥३९॥ तं दृष्ट्वा समयूरोपि भीतो
दूरं गतो रुदन्॥ किं कर्तव्यमयं दुष्टः प्राणग्राही समागतः॥४०॥ किं कर्तव्यं क्व गंतव्यं हा काशी त्यजते मया॥ प्रा
णात्ययेपि काशी येन त्याज्या सर्वथा जनैः॥४१॥ तादृशी यं मया काशी त्यज्यते किं करोम्यहं॥ अनेकजन्मतपसा
लब्ध्वा काशी शिवात्मिका॥४२॥ या सेयं दुरदृष्टेन त्यज्यते किं करोम्यहं॥ काशी मुक्तिप्रदा रम्या सर्वपापप्रणाशि
नी॥४३॥ त्यज्यते दुरदृष्टेनाकं करोमि क्व याम्यहं॥ काशी पुण्यैकनिलया सर्वार्त्तिभयनाशिनी॥४४॥ पापौघपरि

चा

पापेन त्यज्यते किं करोम्यहं ॥ महापापापिकाशी ये न त्याज्या मुक्तिकांक्षिभिः ॥४५॥ त्यज्यते सेयमेवाद्य महापातकि
नामया ॥ कानि पापानि दुष्टानि कृतानि बहुधा मया ॥४६॥ विश्वेशनगरी काशी त्यज्यते किं करोम्यहं ॥ अपरा
धकृतः को वा मया काशीवियोगजः ॥४७॥ आनंदवनदेशेन वियोगो जायते मम ॥ कदाचिन्न कृतं प्रायो दंड
पाण्यर्चनं मया ॥४८॥ नो चेत्काशीवियोगो द्य कथं वा जायते मम ॥ श्रीकालभैरवस्याद्य कोपो जातो भविष्यति ॥४९॥
नो चेत्कथं वियोगास्या द्विश्वेशेन मयाधुना ॥ हा काशीश महादेव कृपां कुरु कृपानिधे ॥५०॥ रुद्रावासवियोगो
द्य मया सोढुं न शक्यते ॥ भक्तवत्सल विघ्नेश गाणिश्वद्वेद्य जगत्प्रभो ॥५१॥ काशीवियोगजं दुःखं निवारय निवा
रय ॥ हा वीरेश कृपासिंधो भक्तजनवत्सल ॥५२॥ ममापराधाः क्षंतव्याः देहि काश्यां सदा स्थितिः ॥ अपरा
धिषु भक्तेषु क्षमायुक्ता महात्मनां ॥५३॥ इदं विचार्य वीरेश काशीवासं प्रयच्छ मे ॥ मनोवाक्कायजन्मानि पातका
नि क्षमस्व मे ॥५४॥ प्रयच्छ वासं गौरीश नित्यमानंदकानने ॥ शिवेति नामदावाग्निः करोत्यघवनं क्षयं ॥५५॥
धृ पातकं मम मास्तीश काशीवासं प्रयच्छ मे ॥ अन्नपूर्णे कृपापूर्णे नूर्णपूर्णेंदुसुप्रभे ॥५६॥ काशीनिवासभिक्षान्नं
देहि देहि शिवप्रिये ॥ इति विमलपमानं तं मयूरं शुष्कतालुकं ॥५७॥ विलोक्य करुणासिंधुः वीरेशो भक्तवत्स
लः ॥ शैववर्यं भुजशयन्तु शूलपाणि रुदन्नुरवः ॥५८॥ श्राव्य मानिहरं वाक्यमुवाचाहूय तं द्विजं ॥ ॥श्रीविश्वेश्व
र उवाच ॥ ॥ रे रे मयूर मा रोदीः मा रोदीर्भीतिमुत्सृज ॥ अभयं न वदास्यामि दुःखं मा कुरु सर्वथा ॥ स्वजातिधर्म
माश्रित्य चापमारोपितं करे ॥६०॥ धत्वा तिष्ठति भिद्व्रो यहिंसो नैव करिष्यति ॥ काश्यां धर्मार्थमायाति पुरु
षाः पुण्यतत्पराः ॥६१॥ नाधर्मार्थं च हिंसार्थं शोकदानार्थमेव च ॥ अतो दुःखं न कर्तव्यं मयूराधिप माशुच ॥
६२॥ सुखेन संवसात्रैव काश्यां धर्मेण सर्वदा ॥ काश्यां दुःखप्रदो मर्त्यो यस्य कस्यापि देहिनः ॥ यात्येव नरकं घो
रं यावच्चंद्र[illegible]तारकं ॥ चराचराणि लिंगानि काश्यां तिष्ठंत्यनेकधा ॥६४॥ ते खु सर्वे खुपूजेव कर्तव्या विधिवज्ज

दा१

नेः॥ ततश्चैवशरीराणि रम्याणि विमलानि च॥६५॥ चरलिंगानि दिव्यानि विविधानि महात्मना॥ किंन्नरो
मनुजो यक्षो गंधर्वो वा मरोपि वा॥ ६६॥ तत्रैव शरीरे पु दुःखदो याति पातनं॥ शैवदुःखप्रदो मर्त्यो विष्टायां
जायते क्रिमिः॥६७॥ तेनोक्तं पुनर्जन्म नारं प्राप्य वो न ध्रुवं॥ अरण्ये निर्जने देशे जलधान्यविवर्जिते॥६८॥
सूकरो जायते नूनं शैवदुःखकरः सुरः॥ अमेध्यभक्षणासक्तो नानाव्रणविदूषितः॥ ६९॥ रासभो जायते नूनं कि
न्नरः शैवदुःखदः॥ शैवदुःखकरो यक्षः शृगालो जायते वने॥७०॥ गंधर्वो जायते गृध्रः शैवदुःखकरो ध्रुवं॥
शैवदुःखकरो दुष्टः कारयेद्देवान्नमेनान रः॥७१॥ अघोरयानना प्राप्य निवसत्या चंद्रतारकं॥ शैवं शरीरं मम
तं शिवालयमुदाहृतं॥७२॥ तस्य दुःखप्रदानेन दुःखितो हं न संशयः॥ सर्वदेवोत्तमे नित्यं मयि दुःखप्र
दो जनः॥७३॥ अघोरनरके नित्यं दुःखितो निवसिष्यति॥ स एव धन्यः पुण्यात्मा स एव जगतां गुरुः॥७४॥
स एव देवपूज्यश्च यस्मिन्तुष्टो भवाम्यहं॥ करुणयाननाभोक्ता स एव नरकालयः॥७५॥ स एव दुर्भगो भाग्येय
स्मिन्रुष्टो भवाम्यहं॥ मामन्यदेवसदृशं मनुते यदि मानवः॥७६॥ सोपि घोरतरे तीक्ष्णे नरके निवसिष्यति
॥ देवोत्तमोहमजरो निष्कलं त्वं को निरंजनः॥७७॥ न मत्तोभ्यधिको देवो न मया सदृशोपि वा॥ मद्भक्तसदृशो
लोके नास्ति नास्त्येव सर्वथा॥७८॥ मद्भक्त एव पुण्यात्मा धन्यो मद्भक्त एव हि॥ मद्भक्ते पूजिते सम्यक् अह
मेवास्मि पूजितः॥७९॥ मद्भक्तपूजनेनैव संतुष्टोस्म्यहमादरात्॥ त्वया पूर्वभवे सम्यक् मन्त्रीत्यर्थे तपः कृतं॥
॥८०॥ न चैव जन्मविगमे मुक्तिरत्र भविष्यति॥ तवाप्यव्याहता भक्तिः मयि तिष्ठति सर्वदा॥ ८१॥ सुरेवन सं
वसात्रैव भिल्ला ङ्कीतिर्नेनेध्रुवं॥ इति दत्वाभयं शंभुः प्रीणयित्वा शिवार्चकान्॥ ८२॥ तत्रैवांतर्दधे लिंगे श्री
मद्दीरेश्वराभिधे॥ ईदृशः करुणासिंधुः वीरेशो भक्तवत्सलः॥ ८३॥ तद्दर्शनं कृतं पूर्वमनेन द्विजजन्मना॥ इदं
शरीरमेतस्य चरलिंगं न संशयः॥ ८४॥ शिवलिंगार्चको नित्यं पूर्वपूर्वभवेष्वयं॥ भवद्भिरस्य शैवस्य पूजा

कार्याविशेषतः॥ ८५॥ शिवः शैवार्चनादेव तुष्टो भवति सर्वथा॥ इत्युक्त्वा मुपुनस्तस्थौ तत्र भासद्यथाविधि॥
८६॥ शिवलिंगाधियां तस्मै पूजां चक्रे मनोरमां॥ इदं वीरेश्वरक्षेत्रमीदृशं सर्वकामदं॥ ८७॥ शैवैर्दृष्टैः सर्वदा सेव्यं
भुक्तिरूपफलार्थिभिः॥ त्वया प्यत्रैव सततं स्थातव्यं शिवमंदिरे॥ ८८॥ काशी त्यागो न कर्तव्यो मोक्षेच्छा यदि
सर्वथा॥ कल्याणनिलया नित्यमन्नपूर्णा वरानना॥ ८९॥ मच्छ मन्नेयथे च्छंसा दास्यत्येव न संशयः॥ इति
तद्वचनं श्रुत्वा ततः संतुष्यमानसः॥ ९०॥ उवास काश्यामनिशं सतपश्चरणेरतः॥ कालेन समतीतो त्रैव ज्ञानवा
पीतटे शुभे॥ ९१॥ तस्मै मुक्तिर्मया दत्ता शैवमंत्रोपदेशतः॥ वीरेश्वरस्थानमिदं मनोज्ञं ज्ञानप्रदं शैवजना
भिसेव्यं॥ यतोमयूरोपि विहाय दुःखमुवास वीरेशरूपाकृदाशात्॥ ९२॥ ॥ इति श्री शिवरहस्ये उग्राख्ये
सप्तमांशे काशीमहात्म्ये वीरेश्वरइतिहासकथनं नाम नवमोध्यायः॥ ९॥ ॥ श्रीउग्राय नमः॥ ॥ अन्या
मपूर्वां मनघां कथां वक्ष्ये शुभप्रदां॥ यत्कथाश्रवणात्सद्यो मुच्यते कर्मबंधनात्॥ १॥ काश्यां पशुपतीशस्य
स्थानमस्त्युत्तमं शुभे॥ नित्यं सन्निहितस्तत्र निवसाम्यहमादरात्॥ २॥ महापाशुपतेस्तत्र वसंति निःक्रिय
ते सदा॥ शैवशास्त्रप्रणेतारः संति तत्रैव कोटिशः॥ ३॥ भस्मदिग्धकराद्यंगाः त्रिपुंड्रांकितमस्तकाः॥
रुद्राक्षमालाभरणाः दीर्घपिंगजटाधराः॥ ४॥ अघोरमूर्तिमनिशं ध्यायंतो मामजं शिवं॥ अघोरमंत्रविन्यासज
पनिष्ठाः निराकुलाः॥ ५॥ निष्कलं निर्गुणं शांतं शिवमक्षरमव्ययं॥ तुरीयं मनघं मत्वा भजंति शिवमेव मां॥ ६॥ त्यक्त्वा
पशुपतीशस्य स्थानमन्यत्र सर्वदा॥ न गच्छंत्येव नियताः शैवदीक्षापरायणाः॥ ७॥ नित्यं शिवकथासेवया सक्तांतः
करणा मुदा॥ शिवनाम विहायान्यं न वदंत्येव सर्वदा॥ ८॥ तत्र पशुपतं नाम कुंडमस्ति वरानने॥ तत्काश्मीरमणि
श्रेष्ठरचिते निर्मलोदकं॥ ९॥ तत्र कुर्वंति ये स्नानं भूयस्ते सर्वदा शुभे॥ नारकीं यातनां प्राप्य न शोचंति कदाचन॥ १०॥
तत्र स्नात्वा च पीत्वा च तज्जलं पापनाशकं॥ सुधानिभमणिच्छायासमाक्रांतमहर्निशं॥ ११॥ स्पृष्ट्वापि यांति मल्लोकं

निर्धूताघानिसंशयः॥पुनरावृत्तिरहितं सर्वाशास्यमनामयं॥१२॥तस्मिन्नेवाभवत्कुंडे मंडूकः कश्चिदुत्तमः॥स
शिवान्नान्यदस्तीति वदन्निति ध्वनिसर्वदा॥१३॥ समंडूकस्तु काकेन कदाचिद्दैवयोगतः॥ पंचक्रोशाद्बहिः
र्नीतः पतितश्च क्वचिद्ध्रदे॥१४॥ ततस्तु कोष्णवह्रुधा मंडूकः शोककर्शितः॥हाहा पशुपतीशेति वदन्नेवं मु
हुर्मुहुः॥१५॥ धिक्शरीरमिदं काशी विप्रयुक्तं तन्मुधि तस्य॥धिग्जीवनमिदं धिक्धिक्धिगित्येवं वदन्मृतः॥
१६॥ तं तथा मृतमालोक्य सुराः संस्तुवमानताः॥मंदारकुसुमैः शुभ्रैः चक्रुर्वृष्टिं मनोहरां॥१७॥ समभासत्त
दैवेंद्रो दुंदुभिर्ध्वनिपूर्वकं॥ ब्रह्मासमाययौ तत्र यमेनाधिसमन्वितः॥१८॥ तदा महाज्ञां संप्राप्य शिवदूताश्च को
टिशः॥ ययुस्त्वं तत्र तं तुष्टाः मंडूकान्नयतोन्तुकाः॥ ततः शिवशिवेत्येवं निमहादेवेति वादिनः॥ तद्देशं प्रापुरमलाः
कंपयं तो महीतलं॥२०॥ ब्रह्मादर्शितानश्च स्थान् त्रिपुंड्रांकितमस्तकान्॥ रुद्राक्षमालाभरणान् शिवनामज
पोत्सुकान्॥२१॥ त्रिशूलतोमराद्यस्त्रसंयुतान् अग्निलोचनान्॥ व्याघ्रचर्मपरीधानान्नीलकंठान्नकल्मषान्
॥२२॥ दृष्ट्वा भीतः कंपमानः प्रणिपत्य पुनः पुनः॥ प्रत्येकं शिवभक्तानां चक्रे पूजां चतुर्मुखः॥२३॥ ततः कृतां
जलिपुटो मधुरं मधुराक्षरं॥ जगाद वचनं प्रीत्या विनीतो नतकंधरः॥२४॥ कोमलानि शरीराणि भवतां शि
वपूजकाः॥ श्रांतानि त्वाद्य वेगेन गम्यते गमतोन्तुकाः॥२५॥ किमीदृशं महत्कार्यमन्यासाध्यमुपस्थितं॥
मत्साध्यं चेदहं तत्र प्रेषणीयोस्मि सादरं॥२६॥ विनाभाग्येन भवतामाज्ञाकारित्वमस्य तु॥ कथं भाविमहत्तभाग्यफ
लमेतन्न संशयः॥२७॥ भवतां श्रांतिनाशार्थे यत्नतः कार्यो मयाधुना॥ भवतां चेत्सुखं जातं तदा धन्योस्म्यसंशयं॥
२८॥ शिवभक्तशरीरं तु वरलिंगमतो मया॥ शिवतुष्ट्यर्थमत्रैव पूजा कार्या विशेषतः॥२९॥ शिवभक्तशरीराख्य
चरलिंगे सदाशिवः॥ नित्यं संनिहितः सांबो मोदते भक्तवत्सलः॥३०॥ ततः शैवशरीराख्यलिंगे दत्तं धनं प्रियं॥ त्र
ह्णाति सादरं शंभुः भक्तदेहाश्रयः सदा॥३१॥ धन्याः शैवजनाः सर्वे शिवनामैकजीवनाः॥ यत्पूजया महादेवः

तुशैभवतिसानुगः॥३२॥ शैवमुत्सृज्ययोऽन्यस्मिन्पूजनंचेत्करिष्यति॥ सापूजातत्कृतान्यत्रभस्मसाद्भवति
ध्रुवं॥३३॥ प्रज्वलद्वह्निमुत्सृज्ययथान्यत्रहुतंहविः॥ व्यर्थाभवतिसापूजानथान्यत्रकृतावृथा॥३४॥पुरा
कश्चिद्द्विजाधीशोहिमदेशेचसंस्थितः॥ संपाद्यबहुधाद्रव्यंनानाविधमनुत्तमं॥पप्रच्छब्राह्मणान्शिष्टान्
निर्लोभान्रागवर्जितान्॥ दानपात्रंस्थलंकीदृग्वदंत्वितिधनार्जकः॥३६॥ ॥ब्राह्मणाऊचुः॥ ॥शैवद्वि
जवरेदत्तंधनमल्पमपिप्रभो॥ प्रवर्धतेनसंदेहोमेरुवत्तद्दिनेदिने॥३७॥ शैवपात्रवरंत्यक्त्वादत्तमन्यत्रत
त्क्षतं॥प्रत्यहंरोदनंकृत्वातत्रदुःखेनतिष्ठति॥३८॥ शैवंकथंविहायात्रदत्तंपातकिनोधनं॥ इतिदुःखंविहा
येवततोनश्यतितत्क्षणं॥३९॥ इत्युदीरितमाकर्ण्यसंपूज्यद्विजपुंगवान्॥ बहुकालंततस्तस्थौशैवागम
नकांक्षया॥४०॥ ततःशैवनराणांतुभवतोपूजनंमया॥ क्रियतेपूजनंतत्तुस्वीकार्यंकृपयामयि॥४१॥ इ
त्युक्त्वासपुनःश्रद्धानुष्ठांतःकरणस्तदा॥ मंदारपुष्पमालाद्यैःचक्रेपूजांयथाविधिः॥४२॥विधायपूजा
ममलांनतांगंविनयान्वितं॥ विधानारंविलोक्यैतंप्राहुर्वचनमादरात्॥४३॥ ॥शैवउवाच॥ ॥मह
देवसदाभक्तिस्तवास्तुचतुरानन॥ श्रद्धयायाकृतापूजात्वयासास्वीकृतामुदा॥४४॥ कार्यांतरंनचास्मा
कमत्रेवागतमादरात्॥ मंडूकोयंमहानेषःशैवःशंकरसंमतः॥४५॥ काश्यांपशुपतीशस्यकुंडेतत्रस्थि
तस्सदा॥ कदाचिद्दैवयोगेनकाकेनात्रनिपातितः॥४६॥ एतदानयनार्थंतुशिवेनप्रेषितावयं॥ अस्मि
न्विमानेसंस्थाप्यनेयोयंशिवसंमतः॥४७॥ इतितद्वचनंश्रुत्वातुतोषचतुराननः॥ शिवएवसदापूज्यःकृ
पानिधिरितिप्रभुः॥४८॥ ततोविमानेविमलेस्थापनीयइतिप्रिये॥ चक्रुर्मंडूकदेहस्यस्पर्शाद्दूतामदर्चकाः॥
४९॥ तदन्वेवसमंडूकःत्यक्त्वानिजतनुंमुदा॥ दिव्यंशरीरंसंप्राप्यशैवस्पर्शेनसादरं॥५०॥ तमादित्यप्रभंदृष्ट्वा
सर्वेब्रह्मादयस्सुराः॥ संतोषंपरमंजग्मुःपुष्पवर्षिरभूत्तदा॥ दुंदुभिध्वनिभिःपूर्णंसर्वंचपृथिवीतलं॥

रंभाद्या ननृतुस्तत्र गंधर्वाश्च जगुर्मुदा॥५२॥ सुगंधाः शीतलाः शांताः वायवश्च ववुस्तदा॥ दिशा प्रसन्नाः संभूताः भूताः स्तस्थुः सुखं तदा॥५३॥ ततस्ते कामगे भव्ये विमाने पुष्पसंकुले॥ समारोप्य मुदा सर्वे नभे व चालिताः शुभे॥
॥५४॥ यमः प्रचलितं दृष्ट्वा स्वे लोकोपरि संभ्रमात्॥ चक्रे नानाविधां पूजां तस्मै सम्यग्यथाविधि॥५५॥ शिवदूतानपि प्रीत्या यथायोग्यं यथाक्रमं॥ पूजयामास शमनो विधिं सेंद्रं च सादरं॥५६॥ पुष्पवृष्टिरभूत्तत्र पुनर्दृष्ट्या मनोहरा॥ ततः सर्वे स्वर्गलोकं जग्मुरिंद्रेशसादरं॥५७॥ पूजयित्वा विमानस्थमासनाद्यैर्यथाविधिः॥ शिवभक्तान्यथायोग्यं पूजयामास सादरं॥५८॥ चतुर्मुखं च विमलं पूजयामास सादरं॥ पुनस्तत्राप्यभूद्रम्या पुष्पवृष्टिर्वरानने॥५९॥ ततो जग्मुर्ब्रह्मलोकं ब्रह्मा नत्र पुनर्मुदा॥ चकार पूजां ममलां शैवेभ्यः सर्वथा विधिः॥६०॥ तत्र विश्राम्य संप्रीताः ब्रह्मणा सह ते ततः॥ विष्णुलोकं ययुः सर्वे दिव्यं नेत्रमनोहरं॥६१॥ विष्णुरालोक्य तान्सर्वान्दूतानुत्थाय सादरं॥ कृतांजलिपुरो भूत्वा प्रणम्य च मुहुर्मुहुः॥६२॥ रत्नासने सुशैवेंद्रानुपवेश्य यथाविधि चकार विविधां पूजां धन्योस्मीति वदन्मुहुः॥६३॥ विष्णुनापि कृतां पूजां स्वीकृत्य तदनंतरं॥ सर्वलोकतरं रम्यं कैलासमगमन्मुदा॥६४॥ त्रिषष्टिकोटिप्राकाररत्नच्छायाविभूषितं॥ शतकोटिमनोरम्यरत्नद्वारसमन्वितं॥६५॥ नानानर्घ्यमणिश्रेष्ठगणरंजितमुत्तमं॥ षष्ट्यर्बुदगणाधीशरक्षितं चित्रमुन्नतं॥६६॥ रत्नप्रासादनिकरैः गोपुराग्रैर्विराजितं॥ विलासमदनं रम्यं मामापुस्तदनंतरं॥६७॥ विमानादवरुह्यैते तीर्थाय सवेः सादरं मुदा॥ प्रणम्य बहुधा सम्यक् मामनंतमजं विभुं॥६८॥ कृतांजलिपुटस्तस्थौकं पमानो नताननः॥ ततो दत्तं मया तस्मै गाणापत्यमनामयं॥६९॥ दुःखमात्रं विहायात्र संतिष्ठति यथासुखं॥ इदं काशीनिवासस्य फलमीदृशमुत्तमं॥७०॥ इतोप्यन्ये शिवरताः कीटास्तत्कुंडवासिनः॥ कालेन काश्यां मनिशं वसंतः शिवसंमतः॥७१॥ शैवं पदमवाप्यां ते स्यास्यंति सुखिनः सदा॥ धर्मे संपादिते नैव काशीवासेन सर्वदा॥७२॥ काशीपाशुप

नंसेत्रंमहापाशुपताश्रयं॥ सापाशुपतवर्याणांमोक्षदानात्रसंशयः ॥७३॥ शैवाःपाशुपताशुद्धाः यत्रतिष्ठं
तिसर्वदा॥ लिंगार्चनव्रताधीशास्तत्रैवनिवसाम्यहं॥७४॥ मन्नामजपसंसक्ताः मल्लिंगार्चनतत्पराः॥ यत्रक्वच
ननिवसंतिततः सन्निहितोस्म्यहं॥७५॥ शंभोशंकरविश्वेशेत्यनिशंयत्रनन्दन्ति॥ शैवाःशिवरतास्तत्रनिव
सामिवरानने॥७६॥ यत्रपाशुपताधर्माः शिवधर्माश्चसंततं॥ वर्तंतेतत्रसततंनिवसाम्यहमादरात्॥७७॥
महापाशुपतंशैवंमहाशैवंशिवप्रियं॥ इत्येवापूजायथाशक्तिः कर्तव्यासर्वथाजनैः॥७८॥ शैवानपूजयित्वै
वयोगच्छत्यभिमानतः॥ सयातिनरकंघोरंसत्यमेवोच्यतेमया॥७९॥ शिवदीक्षापरैः शैवैः अशैवेभ्यः कदाच
न॥ नमस्कारेणकर्तव्योयतः शैवजनोत्तमाः॥८०॥ शैवैरन्योन्यपूज्यानुकर्तव्याविधिवत्सदा॥ अन्योन्यंपूज
काःपूज्यास्तेभवंत्यनघाःशुभे॥८१॥ नकाशीसदृशंक्षेत्रंनशंकरसमःसुरः॥ नशैवसदृशोविप्रोनमत्तोन्यो
पिमोक्षदः॥ श्रीमत्पशुपतीशस्यसन्निधौपवित्रिणोपिमां॥ ध्यात्वाशिवशिवेत्येवंवदंत्यनिशमादरात्॥८३॥
धन्यंपाशुपतंस्थानंधन्याः पाशुपताजनाः॥ धन्याःपशुपतीशस्यपूजकाः सर्वदामुदा॥८४॥ यस्मिन्पाशुपत
स्यानेवसतांपवित्रिणामपि॥ शिवतत्वमतिः शुभावर्ततेबुधिदुर्लभा॥८५॥ कार्यांपशुपतीशस्यसन्निधा
नेस्थितिःसदा॥ पूर्वोक्तधर्मनिरतैः कर्तव्यायत्नतःशुभे॥८६॥ निराहारव्रतैः शुद्धैःमहाशैवैःशिवार्चकैः॥
स्त्रेयंपशुपतीशस्यक्षेत्रेयत्नेनसर्वदा॥८७॥ तत्रजप्तोमहामंत्रः शैवैःशीघ्रफलप्रदः॥ भवत्येवनसं
देहोजपनीयःप्रयत्नतः॥८८॥ शैवदीक्षांशुभांतत्रशैवेभ्योदीयतेमया॥ ततःपंचाक्षरोमंत्रः तत्रजप्योनि
रंतरं॥८९॥ पुराकश्चिन्नृपःश्रेष्ठःसर्वभूचक्रपालकः॥ सामंतनृपवंद्यांघ्रिः बलवान्हिमवानिव॥९०॥
अमितानेकवसुमान्कुबेरइवसर्वदा॥ धीरोमेरुरिवश्रीमान्श्रीबलेशइवानिशं॥९१॥ पितेवशास्ता लोका
नांमातेवात्यंतरक्षकः॥ कांतेवहितकृन्नित्यंनबंधुरिवनोषकः॥९२॥ सकदाचिद्धयारूढःसूर्यमंडलसंनिभः॥

क्रीडारतो यथो भूपो यमलोकाय वीर्यवान्॥९३॥ तमायांतं नृपं दृष्ट्वा तेजिष्ठमनलप्रभं॥ भीतोभ्युत्थाय शाम
नो नृपमभ्युज्जगाम च॥९४॥ ततः सिंहासने रम्ये संवेश्य नृपमुत्तमं॥ चकार पूजाविधिवत् अर्घ्यपाद्यादिभिः
क्रमात्॥ ततो यमकृतां पूजां गृहीत्वा नृपतिर्मुदा॥ रथमारुह्य वेगेन स्वर्गलोकं जगाम सः॥९६॥ तमागतं नृपं
दृष्ट्वा देवेंद्रः सहसा मुदा॥ प्रणम्य विधिवत्पूजां चकार विनयान्वितः॥९७॥ ततः स राजा पवलो देवेंद्रादिभि
रन्वितः॥ विमानवरमारुह्य ब्रह्मलोकं जगाम च॥ ततः शतधृतिः दृष्ट्वा तमेवं नृपतिं मुदा॥ प्रणम्य पूजयामास
पूजाविधिविशारदः॥९९॥ ततः सभासदः सर्वे कृतांजलिपुटा विधिं॥ कोयमित्यूचिरे मंदं कंपमाना नतान
नाः॥१००॥ ब्रह्मोवाच॥ ॥ श्रृण्वंतु सावधानेन प्रभावोस्य मयोच्यते॥ यत्प्रभावस्य कथनात् रोमांचो जायते
मम॥१॥ काश्यां मंतर्गृहे रम्ये शैवे पशुपतीश्वरः॥ शैवपाशुपताराध्यस्तिष्ठत्यघविनाशकः॥२॥ तत्र
कुंडमभूद्दिव्यं तत्तीरे सुरसेविते॥ बिल्ववृक्षो महानासीन्नवपल्लवसंयुतः॥३॥ तन्मूले सर्वदा शैवाः शिव
मंत्रजपोत्सुकाः॥ शिवपूजापराः शुद्धाः तिष्ठंति विगतस्पृहाः॥४॥ शिवप्रियकरे रम्ये तस्मिन्नादित्यसो
दरे॥ अयं तु शकुनिर्भूत्वा न्यवसन्नीडसंश्रयः॥५॥ तत्रायं निवसन्नित्यं स्वचंचुपुटसंचितैः॥ कोमलाम
लशाखाग्रबिल्वपत्रैः शिवप्रियैः॥६॥ तत्कुंडोदकसंसृष्टैरम्लानैरघनाशनैः॥ पूजयत्यति यत्नेन सम्य
क्पशुपतीश्वरं॥७॥ देवालयरजःपुंजान् दूरीकुर्वन्निरंतरं॥ आसायमति यत्नेन तिष्ठति प्रीतमानसः॥
८॥ स्वपक्षधूननोद्भूतवायुभिश्चानिशं मुदा॥ तत्रांतशैवस्वेदानि निवारयति सादरं॥९॥ एवमेव स्थित
स्तत्र कदाचिदयमुद्धतः॥ चकार युद्धमन्येन विहगेन बलान्वितः॥१०॥ युध्यमानेन तेनैव पंचक्रोशाद्बहिर्गतः॥
ततस्तत्र किरातेन केनचिन्निहतो मृतः॥११॥ ततो यमभटैर्नीतः स एव शकुनिस्तदा॥ यमः कोयमिति प्रीत्या
पप्रच्छ च स्वकिंकरान्॥१२॥ ॥यमदूता ऊचुः॥ ॥यमायं शकुनिर्भव्यः सदा बिल्ववनाश्रयः॥ काश्यां पशु

पतीशस्यपूजकश्चविशेषतः ॥१३॥ देवादनेन काशी सात्यक्तामोक्षप्रदायिनी ॥ किरातेन हतोन्यत्रदु
ष्टेनशरपाणिना ॥१४॥ अयमस्माभिरानीतः काशीवासरतस्सदा ॥ पूजनीयोनियत्नेन शैवोयंशिवसंम
तः ॥ १५॥ इतितद्वचनंश्रुत्वासादरंप्रणिपत्यच ॥ पूजयामासशमनः सिंहासनवरेस्थितं ॥१६॥ ततः स्वर्गं
समासाद्यदेवेंद्रेणापिपूजितः ॥ महर्लोकमगामत्पूर्वंमयायंपूजितः शुचिः ॥ १७॥ ततोन्यवसदत्रैवयुगाना
मयुतंमुदा ॥ स्वतएवततोगत्वाविचचारावनीतले ॥१८॥ ततः कश्चिन्नराधीशः परंतप इतिश्रुतः ॥
ददर्शनमतिप्रेम्णाचंद्रमाब्धिरिवप्रियं ॥१९॥ इत्येववचनपतिः सम्यक्पूजांकृत्वायथाविधिः ॥ उवाचे
नमतिप्रीत्याकृतांजलिपुटस्तदा ॥२०॥ इष्टदेवोभवानेवशंकरस्त्वंनसंशयः ॥ प्रसीदकरुणासिंधो
भक्तार्त्तिभयनाशक ॥ २१॥ शरीरंजीर्णमभवत्केशाश्चपलितामम ॥ पुत्रोनजातोराज्यस्यरक्षको
नास्तिसर्वथा ॥ २२॥ पितॄणांऋणमस्त्येकमनिवार्यमनामयं ॥ तदृणापहकर्माणिनदृश्यंते सुतंविना ॥
२३ विवेकीधर्मनिपुणोवेदशास्त्रार्थपारगः ॥ यस्यनास्तिसुतः तस्यव्यर्थंजन्मनसंशयः ॥२५॥ पुन्नाम
नरकंघोरमस्त्येकमतिदुःखदं ॥ पतितंतत्रमामन्यस्त्वंविनानोद्धरिष्यति ॥ २६॥ वंशवृद्धिकरः पुत्रो
यस्मिन्नवंशेनजायते ॥ तद्वंशनाशस्तीव्रेणभविष्यत्येवसर्वथा ॥ २७॥ पुत्रहीनमिदंजन्मधिक्म
मापिजरारतं ॥ धिक्पुत्राननुभूतंवराज्यमेतदकंटकं ॥ २८॥ सर्वदुःखापहाकाशीतिष्ठत्येकाशिवा
त्मिका ॥ तत्प्राप्तिसाधनंपूर्वेनमेचनमयातपः ॥२९॥ दुःखपीडितचित्तस्यममदुःखनिवारकः ॥ ना
स्त्येवसर्वथालोकेपुत्रान्यस्तोषकारणः ॥ ३०॥ पुत्रदानंकुरुष्वाद्ययदन्यः पुत्रदः सुरः ॥ नास्त्येवसर्वदा
यस्मात्भवानसिमहेश्वरः ॥ शिवएवहिधर्मार्थकाममोक्षप्रदः श्रुतः ॥ तदन्यस्तत्प्रदोनेतिश्रुतिर्वदति
शंकर ॥ ३२॥ इतितद्वचनंश्रुत्वानमुवाचायमादरात् ॥ एवंदंमाकुरुराजेंद्रपुत्रस्तेभवितेतिसः ॥ ३३॥ तदोक्त

मांगादुत्तुंगा दहमेवनृपोत्तम॥ इतः षष्ठितमे मासि संभवामि न संशयः॥३४॥ इत्येतद्वचनं श्रुत्वा प्रणिप
त्येन मादरात्॥ दुःखं विहाय संतुष्टो जगाम सदनं नृपः॥३५॥ ततः षष्ठितमे मासि संप्राप्ते स्वप्रभावतः॥
तस्योत्तमांगात् दमलान् आविर्भूतोयमादरात्॥३६॥ तदा दुंदुभयो नेदुः पुष्पवृष्टिरभूच्छुभे॥ राजा बभूव
संतुष्टश्चंद्रोदय इवांबुधिः॥३७॥ ब्राह्मणेभ्यस्तदा राजा पुत्रोत्सव समन्वितः॥ हिरण्य गो गजाश्वानां ददा
वर्बुदमादरात्॥३८॥ उत्तमांगात्समुद्भूतमेनं वीक्ष्य सुतं नृपः॥ उत्तमांगज इत्येतन्नाम दिव्यं चकार सः॥
३९॥ जातिस्मरोयं बाल्येपि नवबिल्वदलैः सदा॥ लिंगपूजां प्रयत्नेन करोति नियमान्वितः॥४०॥ रुद्राक्षमा
लाभरणो भस्मोद्धूलन तत्परः॥ श्रीमत्पशुपती शेति नाम दिव्यं जपत्ययं॥४१॥ अत्याश्चर्यकरं कर्म क्रिय
ते बालक त्वया॥ किमेतदिति तेनैव पृष्टो राज्ञा यमर्भकः॥४२॥ ततो जगाद वृत्तांतं स्व पूर्वभवसंचितं॥ त
च्छ्रुत्वा विस्मितो राजा तमुवाच सुतं प्रति॥४३॥ शिवपूजाप्रभावेन सर्वज्ञानं त्वयाशिशो॥ कोहं पूर्वभवे स
म्यक् विचार्य वद सादरं॥४४॥ इति पृष्टः क्षणं ध्यात्वा बालकः स्मितपूर्वकं॥ जगाद सर्ववृत्तांतं तस्यैव तन
पतेस्तदा॥४५॥ तव जन्मान्यतीतानि संख्यानेषां न शक्यते॥ तवैव पापसंघेन बहुकुत्सितयोनिषु॥४६॥
उत्पत्तिरभवत्पूर्वमतिदुःखभयावहं॥ तव मूत्रपुरीषाढ्य गर्भेषु बहुधा स्थितिः॥४७॥ सारमेयोदरे पूर्वं तव
जन्म सहस्रधा॥ बभुव जन्मना तेन दुःखं भुक्तं त्वया सदा॥४८॥ तदनंतरमेवाभूत्तव रासभजन्मनां॥ अतिदुः
खप्रदं नित्यं सार्धकोटिं च तुष्टयं॥४९॥ ततः कोट्यष्टकं जातं तव कुक्कुटजन्मनां॥ ततः कोटिशतं जातं अर
ण्येवक जन्मनां॥५०॥ सार्धकोट्यष्टकं जातं ततो माहिषजन्मनां॥ ततः कोट्यष्टकं जातं सपादं सर्पजन्मनां॥५१॥
ततः शताष्टकं जातं सपादं काकजन्मनां॥ ततो दशायुतं जातं सपादं गृध्रजन्मनां॥ ततः शतायुतं जातं उलूकाधम
जन्मनां॥ ततः कोट्यष्टकं जातं सार्धं तेश्शुकजन्मनां॥५३॥ ततः सार्धार्बुदं जातं मार्खुपेचक जन्मनां॥ ततोल

स्त

श्रीशिव

ततो लक्षायुतं जातं सार्धं सरट जन्मनां ।। ततो लक्षायुतं जातं मत्स्यमंडूक जन्मनां ।। ५४ ।। पंचाशल्लक्षमभवन्मा
यमाजन्मनां तव ।। ततो लक्षाष्टकमभूत्पूकबंभर जन्मनां ।। ५५ ।। सार्धकोटिद्वयं जातं ततस्तेंदंशज न्मनां ।।
सार्धलक्षत्रयं जातं ततस्तेमेष जन्मनां ।। ५६ ।। ततः कोटिशतं जातं लवराजल जन्मनां ।। सार्धकोटित्रयं जातं
ततस्तेदंति जन्मनां ।। ५७ ।। सार्धकोटित्रयं जातं ततस्ते बर्हि जन्मनां ।। जन्मस्वेतेष्वपि सदा दुःखं भुक्तमनेकधा ।।
५८ ।। एतज्जन्मान्यवहितं जन्म पूर्वं यदस्ति ते ।। तन्मायूरमभूज्जन्म बहुबर्हविराजितं ।। ५९ ।। त्वया मयूर देहे
न श्रीशैले संस्थितं पुरा ।। हिमलिंगसमाक्रांते शिवभक्तिविराजिते ।। ६० ।। पूर्वं मयूरदेहेन त्वया लिंगस्य सं
निधौ ।। नर्तनं रुतं त्वया सम्यक्शिवसंतोषकारणं ।। ६१ ।। तेन पुण्यप्रभावेन श्रीशैले वसतिस्तव ।। बभूव भा
ग्यदा भूमौ जन्मांते भोगकारणं ।। ६२ ।। मयूरजन्मनान्येन मम सेवां करोत्वयं ।। ततो राज्याधिपत्यं च भवत्वस्य
सुखप्रदं ।। ६३ ।। भुक्त्वा मनुष्यदेहेन भोगान्मं ते ततः परं ।। मां प्रयात्विति देवेशो ददौ पूर्वं वरं शिवः ।। ६४ ।। ततो ज
न्माभवत्पूर्वं कस्मिंश्चित् द्विपिनांतरे ।। मयूरस्य ततो देवात् श्रीशैले स्थितं त्वया ।। ६५ ।। तस्मिन्छैल वरे रम्ये
त्रिपुरांतकसंज्ञिकं ।। लिंगमेकमभूद्दिव्यं भानुनप्रभमनावृतं ।। ६६ ।। तत्र नित्यं त्वयापि छेतरुतमुख्यानि वार
णं ।। सायं तत्रैव नियतं नर्तनं क्रियते त्वया ।। ६७ ।। एवं मासशतं सार्धं संश्रित्य नियतं त्वया ।। स्वछयेवनरा
धीशसंस्थितं पूर्वजन्मनि ।। ६८ ।। ततः कालांतरे राजन् श्रीशैलात्त्यभुवि त्वया ।। शरीरं त्यक्तमसमलं पवित्रं शि
वसेवया ।। ६९ ।। तदा देववरो नद्यपात्पुष्पवृष्टिरभून्नृप ।। विमानवरमारुह्य देवेंद्रोपि समागतः ।। ६९ ।। देवें
द्रेण तदा दत्तं विमानं तुभ्यमुत्तमं ।। तदारुह्य स्वर्गलोकं गतं तेन सह त्वया ।। ७० ।। तत्र मंदारसंवीतं क्रीडास्था
नमभूत्तदा ।। तत्रैव तव तत्रोबार्थे रंभा नृत्यं चकार च ।। ७१ ।। देवेंद्रः प्रत्यहं तुभ्यं चकाराभ्यर्चनं मुदा ।। तदन्येपि
सुरा नित्यं पूजां कुर्वंति सादरं ।। ७२ ।। कल्पवृक्षेभ्य पुष्पाणि सुगंधीन्यमलानि च ।। स्वत एव समानीय दत्ता

ततो लक्षायुतं जातं सार्धं सरट जन्मनां ॥ ततो लक्षायुतं जातं मत्स्यमंडूक जन्मनां ॥ ५४ ॥ पंचाशल्लक्षमभवन्मा
यमाजन्मनां तव ॥ ततो लक्षावकमभून्मूकबंभर जन्मनां ॥ ५५ ॥ सार्धकोटिद्वयं जातं ततस्तेदंशाज न्मनां ॥
सार्धलक्षत्रयं जातं ततस्तेमेष जन्मनां ॥ ५६ ॥ ततः कोटिशतं जातं लवराजल जन्मनां ॥ सार्धकोटित्रयं जातं
ततस्तेदंति जन्मनां ॥ ५७ ॥ सार्धकोटित्रयं जातं ततस्ते बर्हि जन्मनां ॥ जन्मस्वेतेष्वपि सदा दुःखं भुक्तमनेकधा ॥
५८ ॥ एतज्जन्मान्यवहितं जन्म पूर्वं यदस्तिते ॥ तन्मायूरमभूज्जन्म बहुवर्हविराजितं ॥ ५९ ॥ त्वया मयूर देहे
न श्रीशैले संस्थितं पुरा ॥ दिव्यलिंग समाक्रांते शिवभक्तिविराजिते ॥ ६० ॥ पूर्वं मयूरदेहेन त्वया लिंगस्य सं
निधौ ॥ नृत्यं कृतं त्वया सम्यक् शिवसंतोषकारणं ॥ ६१ ॥ तेन पुण्यप्रभावेन श्रीशैले वसतिस्तव ॥ बभूव भा
ग्यदाभूमौ जन्मांते भोगकारणं ॥ ६२ ॥ मयूरजन्मनान्येन मम सेवां करोत्वयं ॥ ततो राज्याधिपत्यं च भव त्वस्य
सुखप्रद ॥ ६३ ॥ भुक्त्वा मनुष्यदेहेन भोगासंते ततः परं ॥ मां प्रयात्विति देवेशो ददौ पूर्वं वरं शिवः ॥ ६४ ॥ ततोज
न्माभवत्पूर्वं कस्मिंश्चित्तु द्विपिनांतरे ॥ मयूरस्य ततो देवात् श्रीशैले स्थितं त्वया ॥ ६५ ॥ तस्मिन्क्षेत्रवरे रम्ये
त्रिपुरांतकसंज्ञिकं ॥ लिंगमेकमभूद्दिव्यं भानुतप्रभया वृतं ॥ ६६ ॥ तत्र नित्यं त्वयापि छेत्तकृतमुख्यानि चार
णां ॥ सायं तत्रैव नियतं नर्तनं क्रियते त्वया ॥ ६७ ॥ एवं मासत्रयातं सार्धं संश्रित्य नियतं त्वया ॥ स्वच्छये वनरा
धीशा संस्थितं पूर्वजन्मनि ॥ ६८ ॥ ततः कालांतरे राजन् श्रीशैलान्यभुवि त्वया ॥ शरीरं त्यक्तमम लं पवित्रं शि
वसेवया ॥ ६९ ॥ तदा देववरोत्सृष्टा पुष्पवृष्टिरभून्नृप ॥ विमानवरमारूढ सदेवेंद्रोपि समागतः ॥ ६९ ॥ देवें
द्रेण तदादत्तं विमानं तुभ्यमुत्तमं ॥ तदारुह्य स्वर्गलोकेगतं तेन सह त्वया ॥ ७० ॥ तत्र मंदारसंवीतं क्रीडास्था
नमभूत्तदा ॥ तत्रैव तव तेनापार्यै रंभानृत्यं चकार च ॥ ७१ ॥ देवेंद्रः प्रत्यहं तुभ्यं चकाराभ्यर्चनं मुदा ॥ तदन्येपि
सुरानित्यं पूजां कुर्वंति सादरं ॥ ७२ ॥ कल्पवृक्षेभ्य पुष्पाणि सुगंधीन्यमलानि च ॥ स्वतरवः समानीय दत्ता

निप्रत्यहंमुदा॥७३॥ एवमेवानिशंलिंगमोदमाने नहित्वया॥ वत्सरात्पुनपर्यंतंसंतोषेणास्थितंपुरा॥७४॥
ततोभूच्चक्रनाथस्यप्रोद्भूतमुदरेत्वया॥ महदैश्वर्यमनिशंभुक्तंभीशप्रसादतः॥७५॥ शिवस्यैवप्रसादेनत
च्छोकापहारकः॥ उत्तमांगाद्हंजातोवंशाबृद्धिकरोनृपा॥७६॥ इदंशिवप्रसादेनमयाज्ञातंनृपाधिप॥
यथाज्ञातंतथैवोक्तंविपरीतंनकिंचन॥७७॥ नचास्त्यपरतोणितंद्रव्यंसंतिरत्नानिभूपते॥ शिवालयस्यनि
र्माणंकुरुरत्नविजृंभितं॥७८॥ कुरुबिल्ववनंरम्यंशैवान्पोषयसर्वदा॥ शृणुशैवपुराणानिसर्वदानृप
सत्तम॥७९॥ कुरुयत्नेनसंप्रीतोलिंगपूजामहर्निशं॥ पंचाक्षरजपंनित्यंकुरुपापौघनाशनं॥८०॥ बिल्व
पत्रैर्महादेवमर्चयस्वानिशंमुदा॥ कुरुयत्नेनसततंलिंगस्यैवनिरीक्षणं॥८१॥ भस्मधारणसंयुक्तःकुरु
रुद्राक्षधारणं॥ गृहाणमोक्षदांनित्यांशैवदीक्षामघापहां॥८२॥ शिवप्रीत्यर्थमनिशंवनेपंचाग्निमध्य
गः॥ शिवप्रसादपर्यंतंतपःकुरुनृपोत्तम॥८३॥ प्रसन्नेसतिगौरीशेकाशीप्राप्तिर्भविष्यति॥ काशीमा
सानराधीशमोक्षःप्राप्तिर्भविष्यति॥८४॥ कर्तव्यमनियत्नेनमयाराज्यस्यपालनं॥ नराज्यविषयेदुःखं
त्वयाकार्यंनराधिप॥८५॥ तववृक्षशरीरस्यनाहीनृष्णीमयास्थितिः॥ सर्वभावेनसततंकुरुशंकरपू
जनं॥८६॥ शंकरंशंकरंनित्यंनिःशंकंसमुपाश्रय॥ शंकरस्तारकोनूनंभविष्यतिनसंशयः॥८७॥ ब्रह्मो
वाच॥ ॥ इत्येतद्वचनंश्रुत्वासभूपस्तदनंतरं॥ शिवलिंगालयंचक्रेरत्नस्तंभविराजितं॥८८॥ हेमप्राका
रममलंशिवलिंगार्चकोनृपः॥ शिवलिंगालयप्रांतेचकारोन्नतमादरात्॥८९॥ ततोरत्नमयंलिंगं
तस्मिन्नेवशिवालये॥ तेनसंस्थापितंदिव्यंभूपेनसकलार्थदं॥९०॥ तस्मिन्मणिमयेलिंगेविश्वव्या
पीसदाशिवः॥ नित्यंसंन्निहितःसांबःपूजांगृह्णातिसादरं॥९१॥ प्रत्यहंस्वर्णपुष्पाणांसार्धकोटि
त्रयंनृपः॥ ददातिशंभवेप्रीत्यालिंगरूपायसादरं॥९२॥ त्रिकालमप्रमादेननृपस्तल्लिंगपूजने॥

करोत्यद्यापि शैवांश्च बहवस्तेन तोषिताः॥ ९३॥ बिल्ववृक्षाश्च बहवः स्थापितास्तेन भूभुजा॥ तद्बि
ल्वतरुमूलेषु लिंगानि स्थापितानि च॥ ९४॥ बिल्वकंटकतीक्ष्णाग्रैर्विद्धहस्तोपि भूपतिः॥ स्वयमेवा
नयत्यच्छो बिल्वपत्राणि शंभवे॥ ९५॥ चंदनागरुकस्तूरीविलेपनरतोपि सः॥ त्यक्त्वा तद्भस्मना नित्य
मंगलेपं करोति च॥ ९६ ॥१००॥ प्रियोपि रत्नमालोपि भूपालस्तानि सर्वथा॥ त्यक्त्वा रुद्राक्षमालाभि
श्चकारांगविभूषणं॥ १॥ नारीजघनभित्तेष्वभ्याप्योपि नृपतिः सदा॥ तत्त्यक्त्वा भस्मशय्यायां तिष्ठत्य
निशमादरात्॥ २॥ गानप्रियोपि नृपतिः त्यक्त्वा गानरतिं सदा॥ शैवीमेव कथां भूयः श्रृणोति प्रीतिमानसः
॥ ३॥ शैवदीक्षापि यत्नेन गृहीत्वा शैवसत्तमात्॥ शैवव्रतानि सततं क्रियते तेन सादरं॥ ४॥ पूजयत्यति
यत्नेन शैवानेवानिशं मुदा॥ शैवमेवोत्तमं मंत्रं जपत्यनुदिनं नृपः॥ ५॥ अयं शिवप्रसादेन ज्ञात्वा सर्वोत्त
मं शिवं॥ आबाल्यमतियत्नेन शिवपूजापरोभवत्॥ ६॥ नित्यं मृण्मयलिंगानां सहस्रं पूजयत्ययं॥ शै
वद्विजार्बुदस्यायं ददात्यन्नं सदा नृपः॥ ७॥ काश्यां प्रत्यहमागत्य विश्वेश्वरमयं नृपः॥ पूजयत्यतियत्ने
न रत्नाद्यैः शुद्धसाधनैः॥ ८॥ ततः सादरमागत्य श्रीमत्पशुपतीश्वरं॥ बिल्वादिभिः समभ्यर्च्य नत्वा वीरे
श्वरं ततः॥ ९॥ नित्यं यात्रादिकं कृत्वा शैवानभ्यर्च्य सादरं॥ ततः स्वनगरं याति प्रजापालनतत्परः॥ १०॥
रत्नलिंगान्यनेनैव काश्याम्माणितानि हि॥ स्थापितान्यतियत्नेन कालभैरवसंनिधौ॥ ११॥ शिवपूजा
प्रभावेन सर्वलोकेषु सर्वदा॥ अविघ्नितगतिर्याति सोयं कामगयानतः॥ १२॥ न शिवाराधनादन्यन्न लोके स
र्वार्थसाधकं॥ न शिवात्परमो देवः सर्वाभीष्टप्रदायकः॥ १३॥ ॥ सभासद ऊचुः॥ ॥ कोयं पूर्वभवे ब्रह्मन् कि
मनेन कृतं पुरा॥ प्राप्तानेन कथं काशी देवानामपि दुर्लभा॥ १४॥ संप्राप्तापि कथं काशी त्यक्ता मोक्षप्रदायिनी॥
इदं विचार्य सकलं वद संतोषकारणं॥ १५॥ ॥ ब्रह्मोवाच॥ ॥ अयमासीत्पुरा विप्रः शिवव्रतपरायणः॥ शि

वैकदेवः सततं हिमवद्गिरिगराश्रयः॥१६॥ तत्र श्वासानिलान्सर्वान्निरुध्य दृढमानसः॥ पंचाग्निमध्य
गोनित्यं चकारोग्रतमं तपः॥१७॥ सहस्रयुगपर्यंतं तथा कृत्वा ततस्तपः॥ चकार युगपर्यंतं धूमपान
मधोमुखः॥१८॥ ततः समुद्रपर्यंतं तपश्चिव्याश्च प्रदक्षिणं॥ सहस्रवारं यत्नेन कृतमासीदनेन हि॥१९॥
ततः कृतमनेनैव श्रीशैलस्य पयकमुद॥ प्रदक्षिणं शिवप्रीत्यै शतवारं प्रयत्नतः॥२०॥ ततः श्रीशैलशि
खरे निराहारेण संततं॥ तपश्चकार यत्नेन सार्धकोटियुगावधि॥२१॥ ततः स तपसोऽभीमान्निवृत्तः शोक
कर्शितः॥ चकार दुःखं बहुधा प्रलपन् पतितो भुवि॥२२॥ न श्रीशैलात्परं क्षेत्रं तपःसिद्धिकरं परं॥ अत्रा
पि तपसः सिद्धिः न जाता किं करोम्यहं॥२३॥ काशीप्राप्त्यर्थमेवात्र तपो घोरतरं कृतं॥ तथापि काशी न
प्राप्ता नेशाः मत्यसतो गतः॥२४॥ यद्यन्यजन्मयत्नेन नूनं मोक्षो मम भविष्यति॥ तथापि काशी दृष्ट्या सुराणा
मपि दुर्लभा॥२५॥ काशीप्रयाणकालेषु बहुधर्मा नरैः सदा॥ कर्तव्यास्ते न केनापि शक्यते कर्तुमन्वहं॥
२६॥ येन केनापि रूपेण काशीप्राप्तापेक्षिता॥ तादृशं भाग्यमेतस्य कजीवस्य भविष्यति॥२७॥
ृतेनान्येन तपसा विहंगस्यापि वा तनुं॥ यदि दास्यसि विश्वेश तस्तदा काशीं प्रयाम्यहं॥२८॥ शिवमुद्दिश्य
बहुधा पूर्वे पूर्वभवे च्युपि॥ तपस्तप्तं शिवो मह्यं न प्रसीदति सत्वरं॥२९॥ कथं वा दुरदृष्टानि मध्यमे या
नि संति मे॥ काशीप्राप्तिर्यतो नित्यं विघ्निनैवाधितिष्ठति॥३०॥ किं कर्म कार्यं यत्नेन दुरदृष्टनिवारकं॥
किं करोमीति निपतत् भुवि निर्विण्णमानसः॥३१॥ एतस्मिन्नंतरे जाता तदा तत्राशरीरवाक्॥ आनंदामृत
दा रम्या सर्वदुःखविनाशिनी॥३२॥ इतः सहस्रजन्मांते काशीसंप्राप्स्यते त्वया॥ विहंगस्यैव रूपेण खेदं मा
कुरु सर्वथा॥३३॥ प्रतिजन्मनि सर्वेशं शंकरं तपसा सदा॥ समाराधयतीव्रेण काशीप्राप्त्यर्थमादरात्॥३४॥
इति संतोषदं रम्यमशरीरवचस्तदा॥ श्रुत्वा संतोषमगमत् जहौ दुःखं ततः परं॥३५॥ सहस्रजन्मनामंतेका-

शी प्राप्तिर्मे मास्त्विति ॥ तपो घोरतरं भूयश्चकार द्विजसत्तमः ॥ ३५ ॥ तत्र कृत्वा तपो घोरं किंचित्कालं ततः परं ॥
श्रीशैले त्वन्यभुवं प्राप्य तनुं तां विजहौ द्विजः ॥ ३६ ॥ ततो ऋषिकुले रम्ये जन्म संप्राप्य पावने ॥ भूयो घोरतरं च
क्रे तपः शिवपरायणः ॥ ३७ ॥ एवं सप्तजन्मपर्यंतं रम्यमेव पुनः पुनः ॥ ऋषिजन्मैव संप्राप्य तपः कृतमनेन हि ॥
३८ ॥ ततः काश्यां विरूपाक्षे विहंगस्यैव कस्यचित् ॥ गर्भे त्वं प्राप्य जन्मायं पूर्वाभिलषितं मुदा ॥ ३९ ॥ नि
र्गतस्तीव्रमनघोयदायं विहगोदरात् ॥ तदा पपात रुधिरं किंचिच्छैवस्य मूर्धनि ॥ ४० ॥ तदा शशाप तद्दृष्ट्वा
रुधिरं शैवपुंगवः ॥ यस्मात्त्वया रुधिरं तस्य काश्यां मास्त्विति संततिः ॥ ४१ ॥ उत्पन्नो विहगस्यैव रूपे पापिस
दाशिवे ॥ जातिस्मरो बिल्वपत्रैरभ्यर्च्य पतितं शंकरं ॥ ४२ ॥ ततः काश्यां त्वभूपत्येम ततो देवात्ततः परं ॥ स्थित्वा
त्रै ब्रह्मलोके भूपतिश्चाभवत्ततः ॥ ४३ ॥ अयं कदाचिद्यातिमामिंद्रादिसुरानपि ॥ संभावयितुमेवात्र शिव
वलिंगार्चनप्रियः ॥ ४४ ॥ एतादृशानां शैवानां विश्वेशः करुणानिधिः ॥ काश्यां मरणमात्रेण निर्वाणं हि प्रय
च्छति ॥ ४५ ॥ अतः परमयं पुत्रे राज्यं विन्यस्य सादरं ॥ काश्यां शिवप्रसादार्थं करिष्यति तपो मुदा ॥ ४६ ॥ एत
स्य तनुरं त्स्येयं तनुनाम्या भविष्यति ॥ एतच्छरीरविगमे मुक्तिरस्य भविष्यति ॥ ४७ ॥ धन्योयं सर्वथा धन्या व
यमप्यस्य दर्शनात् ॥ ईदृशस्य हि शैवस्य दर्शनं दुर्लभं ध्रुवं ॥ ४८ ॥ ॥ श्रीसदाशिव उवाच ॥ ॥ इति ब्रह्मवचः
श्रुत्वा ते तमेव तपोत्तमं ॥ प्रणम्य पूजयामासुः परमं विस्मयं गताः ॥ ४९ ॥ तत्पूजितो नराधीशो ब्रह्मणा पूजितः
पुनः ॥ ययौ स्वनगरं रम्यं इलावत्यभिधं मुदा ॥ ५० ॥ पुरा पशुपतीशस्य सन्निधाने शिवात्मके ॥ कश्चिदासीद्द्वि
जश्रेष्ठः सर्वदा शिवपूजकः ॥ ५१ ॥ तस्यैव निकटे कश्चिच्छकुंतः कणभक्षकः ॥ न्यवसद्दूरि तपसा काशीं प्राप्य
शिवात्मिकां ॥ ५२ ॥ स कदाचिद्द्विजस्यांके निविष्टो दोहदांकितः ॥ तं विलोक्य कुशाग्रेण राजघान द्विजसत्तमः ॥
॥ ५३ ॥ तदानीमेव समतः शकुंतः प्रलपन्ततः ॥ तद्गर्भान्निर्ययौ सूक्ष्मं शाकुंतो दुःखकर्शितः ॥ ५४ ॥ स शाकुंतो

जातमात्रः प्रलपन्नतिदारुणं॥ गलदश्रुकणः शीघ्रं तमुवाच द्विजं तदा॥५५॥ द्विजाधम कथं माता निहता मम
सा त्वया॥ बालपुत्रा निरक्षा च पतिदेवा पतिव्रता॥५६॥ बालानां पोषणं मात्रा कर्तव्यमतियत्नतः॥ तेनैव जीव
नं सम्यक् बालानां भवति ध्रुवं॥५७॥ अद्यैव मत्तु रे नस्यमतिर्नूनं भविष्यति॥ पोषणे नहि नानास्ति रक्षा नाम
पि जीवनं॥५८॥ मदन्येपि मरिष्यंति चास्य एव हि बालकाः॥ तेषां मातृविहीनानां कथं स्यात्प्राणधारणं॥५९॥
वयं धन्या भविष्यामः काश्यां मरणमात्रतः॥ नवैवयाः तनाघोरा भविष्यति न संशयः॥६०॥ अस्माभिः पूर्वपू
वेण जन्मसु प्रबलं तनपः॥ काश्यां तनुवियोगार्थं कृतमुद्दिश्य शंकरं॥६१॥ काश्यां मं तनर्गृहे शैवे जीवहत्या कृता
त्वया॥ तेन पापेन दुष्टात्मन् यातना ते भविष्यति॥६२॥ अनेकयुगपर्यंतं घोरदुःखौघसंश्रया॥ पैशाचीं तनु
माश्रित्य वस दुर्भग दुर्मुख॥६३॥ क्षुत्तृट्परीतः सततं निर्जने वनमाश्रितः॥ निवसस्व दुराचारः पिशाचतनुसं
श्रया॥६४॥ एवं प्रलपमाने तं दृष्ट्वाश्रु सार्वि हंगमं॥ विलोक्य तं द्विजं चाथ बभाषे वचनं तदा॥६५॥ एतस्य माता
निहता किमर्थं साद्विजत्त्वया॥ कृत्वा काद्यं यथा पापं किमर्थं स्थीयते त्वया॥६६॥ एतन्मरणमात्रेण पतिर
स्यास्तु नादृशाः॥ मरिष्यत्यद्य वाश्वो वा संदेहो नात्र वर्तते॥६७॥ पिशाचतनवः प्राप्य मतः तज्जीवसंरक्षया॥
त्वयावनेन संदेहो निर्जलेनिर्जने सदा॥६८॥ किंच काश्यां त्वया पूर्वं परार्थमपि यत्नतः॥ द्रव्यलोभेन दुष्टा
त्मन रुद्राध्यायजपः कृतः॥६९॥ तेन रुद्रपिशाचत्वं त्वया दुःखदमन्वहं॥ प्राप्तव्यं नात्र संदेहो भेरवस्यापि त
र्जनं॥ रुद्राध्यायजपं काश्यां यः परार्थं करिष्यति॥ सवेदराशिपूर्णोपि पिशाचो भवति ध्रुवं॥७१॥ अल्प
स्याप्यत्र धर्मस्य विक्रेता सर्वथा द्विज॥ भविष्यति न संदेहः पिशाचः पर्वताकृतिः॥७२॥ अनंतफलदं धर्मं
रुद्राध्यायजपार्जितं॥ कः प्रयच्छति मूढात्मा परस्मै धनलोभतः॥७३॥ शरीरमपि देयं स्यात्कदाचिद्धनलोभ
तः॥ फलं न देयमन्यस्मै रुद्राध्यायजपार्जितं॥७४॥ श्रीरुद्रजपमन्यार्थं करोति च धनेच्छया॥ स पतत्येव न

रके यावदाचंद्रतारकं॥ ७५॥ पुरा धननिधिर्नाम कश्चिद्दूतवपालकः॥ वेदशास्त्रपुराणज्ञो ब्राह्मणोभ
यदुत्तमः॥ तेन घोरं तपस्तप्तं तपः पूर्वभवे सदा॥ हिमवद्गिरिशृंगाग्रे काशीप्राप्त्यर्थमादरात्॥ ७७॥ कोटि
जन्मार्यधिष्ठीत्या हिमवंतमुपाश्रितः॥ सचकार तपो घोरं काशीप्राप्त्यर्थमेव हि॥ ७८॥ ततः शिवप्रसादेन धन
मार्जित्य धर्मतः॥ काशीं प्राप समागत्य तुरंगाधनसंवृतः॥ ७९॥ संप्राप्य काशीं विश्वेशं संपूज्य विधिवद्द्विज॥
मेने कृतार्थमात्मानं शिवैकशरणः सदा॥ ८०॥ ततः स्वकं धनं सर्वं द्विजेभ्यो दातुमुद्यतः॥ प्रणम्य विप्रानमला
न् उवाच शिवतत्परान्॥ ८१॥ ॥धननिधिरुवाच॥ ॥धनमार्जितमेतस्य व्ययः कार्यो मतो मम॥ रुद्राध्या
यजपं कृत्वा गृह्णंतु धनमुत्तमं॥ ८२॥ ब्राह्मणा ऊचुः॥ ॥कार्यं परार्थमनघो रुद्राध्यायजपो द्विज॥ कथं
कार्यं प्रयत्नेन वदास्माभिर्धनेच्छया॥ ८३॥ परार्थं धनलोभेन रुद्राध्यायजपः कृतः॥ द्विजैस्तैस्तु तनु प्रा
प्यापेशारीदुःखदा सदा॥ ८४॥ किं धनेनात्र बहुना किं कार्यं तेन सादरं॥ क्रिमेव धनपुष्टेन शरीरेणापि
न द्दद॥ ८५॥ अस्माभिः पूर्वपूर्वेषु जन्मसु सुमहत्तपः॥ कृतं तेनैव काशीयं प्राप्ता नाम माहेश्वरी पुरी॥ ८६॥ अ
तः परं द्विजास्माभिः कर्तव्यं नास्ति सर्वथा॥ न धनेच्छा शरीरेच्छा न चान्नेच्छा न संशयः॥ ८७॥ अतः परं द्विजात्य
ल्पकालेनैवात्र सर्वथा॥ विश्वेशस्य रूपया सम्यक् तनुत्यागो भविष्यति॥ ८८॥ ततो विश्वेश्वरः स्वां केनिवेश्या
स्मभ्यमादरात्॥ शैवं पंचाक्षरं दिव्यं तारकं दास्यति ध्रुवं॥ ८९॥ ततो नकम हादुःखसंगत्यागो भविष्यति॥
ततः प्राप्तव्यमस्माभिः स्वरूपं शांकरस्य हि॥ ९०॥ धर्मेणैव सदा स्थेयं त्वया कार्यं प्रयत्नतः॥ मोक्षं दास्यति
विश्वेशो देहांते सर्वथा द्विज॥ ९१॥ इत्युक्तास्ते द्विजाधीराः निवलाधनलोभतः॥ शिवलिंगार्चकास्तस्थुः पांडु
पर्णजलाशनाः॥ ९२॥ ततस्स विप्रस्तद्धनं विलोक्यात्यंतदुःखितः॥ रुरोदोच्चैर्धनत्यागः पात्रे नासीदिति द्वि
जः॥ ९३॥ तदानीमागतः कश्चिद्ब्राह्मणो वेदपारगः॥ मा रोदीः किमभीष्टं ते तत्करोमीति सोऽब्रवीत्॥ ९४॥ इ

त्युक्तं तद्द्विजश्रेष्ठं प्रणम्य द्विजसत्तमः॥ कृतांजलिपुटो नम्रो बभाषे वचनं द्विजः॥९५॥ द्विजवर्यो तमाध्वानां अ
स्ति कोट्ययुतं मम॥ मत्तमातंगकोटीनाम रत्निनक्षचतुष्टयं॥९६॥ सुवर्णरत्नरचितताम्राणां तु द्विजोत्तम॥ सं
ख्या नास्ति न संदेहो गवामपि ममैव हि॥९७॥ इदं धनं मया देयं मदर्थे यः करिष्यति॥ रुद्राध्यायजपं सम्य
कृतस्मै नास्त्यत्र संशयः॥९८॥ एकं वारं कृते नापि रुद्राध्यायजपेन हि॥ एकेनैव द्विजेनेदं प्राप्तव्यं धनमुत्त
मं॥९९॥ इदं धर्मार्जितं वित्तं श्रीरुद्राध्यायजापके॥ निधाय तद्धनुमीनो वसाम्यत्र न संशयः॥२००॥ इत्यु
दीरितमाकर्ण्य सर्वद्विजपुंगवः॥ उवाच वचनं चारु नराधननिधिं प्रति॥१॥ एकवारं द्विजश्रेष्ठ त्वदर्थे सा
वधानतः॥ रुद्राध्यायजपं सम्यक् करिष्ये मुक्तिमंटपे॥२॥ इत्युक्त्वा नदतुज्ञानो मुक्तिमंडपमाश्रितः॥ एक
वारं चकाराय रुद्राध्यायजपं द्विजः॥३॥ समाप्ते तु जपे तस्मै धनं धननिधिर्मुदा॥ ददौ बहुविधं सर्वं गजा
श्वादिकमादरात्॥४॥ ततो धननिधिः काश्यां अत्यैरेव दिनैर्मृतः॥ अवाप शिवसायुज्यं शिवस्यैव प्रसा
दतः॥५॥ द्विजोपि स धनं ग्राहीत तः संतप्तमानसः॥ वसिष्ठं प्रणिपत्याह कृतांजलिपुटो द्विजः॥६॥ परार्थे ध
नलोभेन रुद्राध्यायजपः कृतः॥ मयि पूर्वे प्रयत्नेन धर्मशास्त्रविचक्षण॥७॥ परार्थे कृतरुद्रजपसंचितपा
तकं॥ केन नश्यति किं वात्र साधनं वद सादरं॥८॥ ॥वसिष्ठ उवाच॥ ॥ रुद्राध्यायजपं पुण्यं परार्थे यः करि
ष्यति॥ स पिशाचो भवत्येव नास्ति तस्यापनिष्कृतिः॥ वेदपारायणैर्धर्मैरनेनैरपि सर्वदा॥ उग्रानंततपोभि
श्च तत्पापं न विनश्यति॥१०॥ काश्यां रुद्रजपं कृत्वा परार्थे यस्तु जीवति॥ धिक् धिग्धिक् तस्य धिग्जन्म धि
ग्धिग्धिक् तस्य जीवनं॥११॥ परार्थे रुद्रविक्रेता भवान् यतिदारुणं॥ द्विज रुद्रपिशाचत्वं प्राप्नोष्यत्र न संशयः॥
१२॥ महापर्वतसंकाशं शरीरं ते भविष्यति॥ सूच्यग्रसदृशं वक्त्रं भविष्यति तव स्फुटं॥१३॥ सहस्रयुगपर्यंत
क्षुत्पिपासातुरो निशं॥ वसिष्यसि न संदेहो निर्जने निर्जले वने॥१४॥ काश्यामेव शरीरं ते देवाल्पकं यदि

त्वया॥ न दारुद्रपिशाचत्वं प्राप्य दुःखमवाप्स्यसि॥ १५॥ कोटिशास्तव पार्श्वस्थाः कालभैरवकिंकराः॥
दीर्घतप्तोरुखड्गाग्रैस्ताडयिष्यंति दुर्मदाः॥ १६॥ सहस्रयुगपर्यंतमेवं स्थित्वा ततः परं॥ प्राप्तोषि दुः
खदां नित्यं कालभैरवयातनां॥ १७॥ एकवारं कृतोन्यार्थं रुद्राध्यायजपो द्विज॥ एवं दुःखप्रदः सोयं किं
पुनः बहुधा कृतः॥ १८॥ रुद्राध्यायो न जप्तव्यः काम्यमुद्दिश्य सर्वथा॥ स्वैरपि स्वार्थमनघैः कदाचिद
पि यत्नतः॥ १९॥ शिवार्थमेव कर्तव्यो रुद्राध्यायजपः सदा॥ निष्कामैरनघैः शुद्धैर्मोक्षदः शिवचिंत
कैः॥ २०॥ रुद्राध्यायस्य माहात्म्यं ब्रह्मणापि न बुध्यते॥ किंतु न स्वं करणेव ज्ञायते नत्वतो ध्रुवं॥ २१॥ रुद्राध्या
यजपः सम्यक्कर्तुमेव न शक्यते॥ ब्रह्मणापि न संदेहः सत्यमेवोच्यते मया॥ २२॥ रुद्राध्यायजपे प्रोक्तानि
यमा बहवो मताः॥ ते कथं नियमाः कर्तुं शक्यंते मादृशैर्द्विजैः॥ २३॥ यथाविधि कृतः सम्यक् रुद्राध्यायज
पो द्विजैः॥ मोक्षप्रदो भवत्येव पापारण्यदवानलः॥ २४॥ रुद्राध्यायजपं कर्तुं न जानासि ततस्त्वया॥ कथम
न्यार्थमनघो रुद्राध्यायजपः कृतः॥ २५॥ रुद्राध्यायजपं कर्तुं यथाविधि यथाक्रमं॥ मयापि यत्नतः क्रिय
ते न भवत्येव सर्वथा॥ २६॥ षष्टिकोटिमहान्यासाः संति शंकरचोदिताः॥ रुद्राध्यायस्य विमलः तज्ज्ञानं च
कथं भवेत्॥ २७॥ इति तद्वचनं श्रुत्वा द्विजो दुःखाभिकर्शितः॥ जगाम निलयं स्वीयं नानाधनविराजितं॥
२८॥ तं दृष्ट्वा मुनयः सर्वे भानुं पश्यंति सादरं॥ प्रज्ञापंति च पापिष्ठेत्यनिशं प्रवदंति च॥ २९॥ सर्वे सन्निहितं
क्रूरं नायं पश्यति भैरवः॥ अनेन कथमन्यार्थं कृतो रुद्रजपो मुदा॥ ३०॥ अत्र याचितमप्यन्नं बहुग्रासं न
सर्वथा॥ कथं बहुविधं द्रव्यं गृहीतं बहुसादरं॥ ३१॥ अनेनान्यार्थमनघः कथं रुद्रः जपः कृतः॥ स्वल्पगृह
जपोप्यत्र कर्तुमेव न शक्यते॥ ३२॥ कथं काश्यामपि स्थित्वा क्रियते पातकं जनैः॥ नश्रुता प्राप यज्ञोन् नं घोरां भैर
वयातनां॥ ३३॥ अयं विलोक्यते काश्यामेकः पातकसंश्रयः॥ कदागच्छत्ययं नाशं शीघ्रमन्यत्र वात्र वा॥ ३४॥

पापिष्ठालोकनात्पुण्यं नश्यत्येव प्रतीक्षणं॥ कदा काशीमयं त्यक्त्वा गच्छत्यत्र सत्वरं॥ ३५॥ एवमुक्तास्थिताः
सर्वेः काश्यामेवलतोद्दिजाः॥ मत्तोस्त्वद्वपि शाचत्वं प्राप घोरं क्षणेन सः॥ ३६॥ हिमवत्पर्वताकारा तनुः तस्याभ
वत्तदा॥ तृष्यग्रमात्रमभवद्दर्दनं चभयानकं॥ ३७॥ तदेव कोटिशो वीराः कालभैरवकिंकराः॥ शस्त्रागैस्ता
डयंतस्तं पीडयंतः स्थिताः सदा॥ ३८॥ क्षुत्पिपासातुरो नित्यमिदानीमपि तिष्ठति॥ अग्रेभविष्यत्यनिशं
भैरवस्यापियातना॥ ३९॥ काशीमन्यपुरीतुल्यां मत्वा कुर्वंति पातकं॥ असह्यां ते ब्रजानंति भाविभैरवया
तनां॥ ४०॥ यः काश्यां पातकं कृत्वा मत्तो न्यत्र भविष्यति॥ ते नु घोरतराणि स्यं प्राप्या यामीय यातना॥ ४१॥
पुनर्जन्मानि रे प्राप्य काशीं प्राप्य मलः ततः॥ प्राप्नोत्य घोरमनिशं भैरवस्यापि यातनां॥ ४२॥ काश्यां तु रु
न पापानां दुःखस्यांतो न विद्यते॥ हा दुराचारसंपन्नाः काश्यां तिष्ठंति निर्भयाः॥ ४३॥ तादृशानां तु दु
ष्टानां काशीवासो न विद्यते॥ गच्छ दुष्ट विहायेनां काशीमन्यत्र दुर्भग॥ ४४॥ येन केनापि रूपेण जीवः
शिवमतः शिवः॥ पूजनीयः प्रयत्नेन देवगंधर्वमानवैः॥ ४५॥ अयं शिवमयः पत्री पूर्वं पूर्वभवे प्यपि॥ र
नदुःखप्रदानेन प्राप्या भैरवयातना॥ ४६॥ अनेन पूर्वं बहुधा काशीमाप्रार्थमादरात्॥ तपः कृतं महादेव
मुद्दिश्य हिमवद्गिरौ॥ ४७॥ तपो निष्ठमुं दृष्ट्वा हिमवान्कंपमागतः॥ देवाश्चर्वकंपितास्तेन तपोनिष्ठेन
सर्वदा॥ ४८॥ चचालावनिरेवैतं दृष्ट्वैव तपसां निधिं॥ समुद्राः क्षुभिताः सर्वे क्षुभितो हमपि स्फुटं॥ ४९॥
सहस्रकोटिजन्मानि कृशानि तपसा भृशं॥ गतानि काशीसंप्राप्त्यै कृतेनास्य बलेन हि॥ ५०॥ अयं भूचक्र
नाथो भूत्पूर्वं शंकरपूजया॥ अनेन मत्तमातंगाः स्थिता श्वेतहस्तिगणे॥ ५१॥ उच्चैःश्रवसनामाश्वाः कनका
भरणान्विताः॥ अनेनापालिता नित्यमनेनैव हि लीलया॥ ५२॥ मत्यहं शिवभक्तानां सार्धार्बुदयतु ष्टयं॥
दिव्यांनैर्दिव्यवस्त्राद्यैरनेनैव हि पोषिताः॥ ५३॥ सार्धार्बुदानि लिंगानि स्थापितानि हिमालये॥ अनेनैव

हिरण्याणि मोक्षदानि शुभानि च॥ ५४॥ अनेनैव शिवस्थानं श्रीशैले कृतमुत्तमं॥ हेमरत्नमयं दिव्यं र
त्नशृंगविराजितं॥ ५५॥ तत्रैव हेमप्राकारं चकारैकं मनोहरं॥ स्वर्गलेढिवहच्छृंगरत्नपंक्तिविराजि
तं॥ ५६॥ तस्मिन्नेव शिवस्थाने लिंगं रत्नमयं शुभं॥ स्थापयामास विधिवन्मोक्षदं रत्ननामकं॥ ५७॥ तत्र
रत्नमयं दिव्यं चकार वृषभेश्वरं॥ अयमेव शिवप्रीत्यै शिवपूजनतत्परः॥ गोदानानि चकारायं तत्रैव वि
धिपूर्वकं॥ कोटिशः शिवतुष्ट्यर्थं रत्नदानानि चानघः॥ ५९॥ नित्यं पार्थिवलिंगानां सहस्रं सार्धमुत्तमं॥
कृत्वा संपूज्य विधिवत् अयमश्नात्यतस्ततः॥ ६०॥ अनेन स्वर्गलोकेऽपि संचारो बहुधा कृतः॥ बहुधास
म्यगेवास्मे देवेंद्रेणार्चनं कृतं॥ ६१॥ तृणीकरोति देवेंद्रमयमेव शिवार्चकः॥ करोति सेवामेतस्मै देवेंद्रो
पि कृतांजलिः॥ ६२॥ इंद्राद्याश्च सुराः सर्वे कृतांजलिपुटाः सदा॥ कुर्वंति सेवामेतस्मै कंपमानाननाना
नाः॥ ६३॥ सर्वभोग्यसमृद्धोऽपि नित्यमुद्धूलनेरतः॥ चकारायमतिप्रीत्याभयोरुद्राक्षधारणं॥ ६४॥ भ-
स्मन्येवानिशं शय्यामयं प्रत्यहमादरात्॥ करोति सुखशय्यापि सर्वदा शिवचिंतनकः॥ ६५॥ शिवेति
नाममममलं जपत्ययमहर्निशं॥ नृत्यत्ययं शिवस्याग्रे चित्रनृत्यविशारदः॥ ६६॥ नित्यं राजतलिंगानां
सार्धकोटित्रयं मुदा॥ ददाति शिवभक्तेभ्यः सदक्षिणमयं द्विजः॥ ६७॥ दिव्यं मणिमयं लिंगमेकमस्या
भवत्पुरा॥ तस्मिन्नत्यतिदेवेशः शिवगौरीमनोहरः॥ ६८॥ अयं शिवैकशरणो विष्णुमामपि सर्वथा॥
कदाचिदपि गीर्वाणगण्यायत्यैव न ध्रुवं॥ ६९॥ अनेनैतादृशी पूजा शंकरस्य कृता यथा॥ शिवान्यदेवाः श
क्तं तेन कर्तुं यो वेत्ति सर्वदा॥ ७०॥ ॥ द्विज उवाच॥ ॥ ईदृशेन शाकुनस्य रूपं प्राप्तं कथयेव द॥ सर्वज्ञोऽपि य
तो ब्रह्मन् भवाञ्शंकरपूजकः॥ ७१॥ ॥ ब्रह्मोवाच॥ ॥ अनेन काशीयात्रार्थमुद्युक्तं पूर्वमादरात्॥ श्रुता
श्च काशीयात्रायां नियमाः श्रुतिचोदिताः॥ ७२॥ श्रुत्वा तान् नियमान्कर्तुमदक्षः शोककर्शितः॥ दृष्टेदविधि

वन्काशी प्राप्यानेतिमुहुर्मुहुः॥७३॥ नियमेन विनानेयं काशीयात्राफलप्रदा॥ नियमाचरणे कर्तुमनुस्थैर्ने
वशक्यते॥७४॥ धर्मो हि नियमभ्रंशात् पूर्वो नष्टो भविष्यति॥ धर्मनाशे नरो रिक्तो भविष्यत्येव सर्वथा॥७५॥
ततः क्लेशार्जितं पूर्वमयाप्यद्य हुधा मुदा॥ तत्तन्नियमभ्रंशात्क्षणेनैव विनश्यति॥७६॥ नमालुपेण देहेन
काशीयात्रा मया नतः॥ कर्तव्यानि यमाचारात्क्षणे नात्र न संशयः॥७७॥ काशीप्राप्तिर्मयोद्दिष्टा काश्यां च मरणं
ततः॥ तच्च सर्वविहितं नैव धर्मे जीव स्थितस्य मे॥७८॥ धर्मास्तु विहिता शास्त्रे मनुष्याणां न पक्षिणां॥ ततः पक्षि
तनुं लब्ध्वा काश्यां त्यक्ष्ये तनुं ततः॥७९॥ काश्यां मरणमात्रेण मह्यं भुक्षाय शंकरः॥ शैवं पंचाक्षरं दत्वा मो
क्षं दास्यत्यसंशयः॥८०॥ इति संस्मृत्य विचार्य एवं त्यक्त्वा पूर्वं मनुं ततः॥ अत्रैव शकुनिर्जातो योगमार्गावि
चक्षणः॥८१॥ इदानीं मरणासन्नः प्राणान्मुंचत्ययं खगः॥ सा पूज्य रूपामोदश्रीः भविष्यति शिवेच्छया॥
फलितानि तपांस्यद्य दानान्यत्यद्भुतानि च॥ काश्यां मरणमापन्नः शंकरोयं यतो मुदा॥८३॥ धर्माः फलो
न्मुखाः सर्वे पूर्वपूर्वभवार्जिताः॥ काश्यां मरणमापन्ने यतोनेन विमुक्तिदं॥८४॥ सर्वे मनोरथाः पूर्णाः काश्यां
मरणमात्रतः॥ पापलेशापि हीनो ये धन्याः शंकरसंमतः॥८५॥ ईदृशं मरणं काश्यां दुर्लभं मुक्तिसाधनं॥
अनंतधर्मसंघानां परिपाकोयमद्भुतः॥८६॥ धन्यानां मरणं काश्यामेवमेव हि जायते॥ शिवार्थं कृतधर्माणां शै
वानां मोक्षदायकं॥८६॥ एवमुक्त्वा द्विजेशानान्नत्वा पशुपतीश्वरं॥ कालभैरवपूजार्थं ययौ नत्वा ततः परं॥८७
ततो मरणप्राप्तस्य तस्मै पंचाक्षरो मया॥ दत्तस्तस्य मे मोक्षं संप्राप्तं देवर्षिदुर्लभं॥८८॥ पुरा पशुपतीशस्य कुं
डे स्नानार्थमुत्तमं॥ पुरा शैववरः कश्चिदागतः सूर्यसंनिभः॥८९॥ जलमध्ये निविष्टं तं स्नानार्थं शैवपुंग
वं॥ सुंदरं मन्मथाकारं ददृशुर्नागकन्यकाः॥९०॥ ततस्तमुत्तिवेगेन निन्युः शैवालयं च ताः॥ नेदृक्षु सहसोत्था
य शैवा नत्वा कृतांजलिः॥९१॥ नानामणिगणाकीर्णे मदुसिंहासने शुभे॥ उपवेश्य ततश्चक्रे पूजां तस्य यथो

विधि ॥९२॥ ततः प्रसन्नवदनं शैवं वीक्ष्य स्थिरासनं ॥ उमा च वचनं चारु शैवो नत्वा पुनः पुनः ॥९३॥ कुतः स
मागतं श्रीमन्देवः कः पूज्यते त्वया ॥ तव देवो मम कोवा तत्सर्वं वद सादरं ॥९४॥ ॥शैव उवाच॥ काशीति न
गरी काचित् सर्वदेवेषु विश्रुता ॥ नागलोकोपरि स्वच्छा तिष्ठत्येव काशियात्मिका ॥९५॥ सा काशी सर्वदेवैश्च
पूजिता सादरं सदा ॥ सा चानंतनंतनंतो धर्मफलप्राप्त्या हि दुर्लभा ॥९६॥ ततः समागतं नित्यं मया संपूज्यते
शिवः ॥ यं न वेदा विजानंति स शिवः स्मर्यते सदा ॥९७॥ यस्यांतं न विदुर्वेदाः ब्रह्मविष्ण्वादयः सुराः ॥
तस्यैव शंकरस्याद्य लिंगं संपूज्यते मया ॥९८॥ यल्लिंगपूजनं नित्यं सर्वदेवेषु निश्चितं ॥ यस्मोस्मदन्
नायासात्तदेव क्रियते सदा ॥ शिवोऽस्मत्कुलजैः सर्वैः सबालैः पूज्यते सदा ॥ शिवपूजां विहायांबु पीय
ते न कदाचन ॥१००॥ नित्यमस्मत्कुले स्त्रीणां च नंहि शिवपूजनं ॥ शिवनामानि गायंति फलकट्यः स्त्रि
यः सदा ॥१॥ बालाः क्रीडनकालेपि लिंगं मन्मयमुत्तमं ॥ कृत्वा बिल्वदलैः शुद्धैः पूजां कुर्वंति सादरं ॥
॥२॥ लिंगं मनोहरं दृष्ट्वा प्रणमंति स्तुवंति च ॥ नृत्यंति बहुधा बालाः शंभोः शिव शिवेति च ॥३॥ नाहं भोक्ता
शिवो भोक्ता शिवायान्नमिति बालकाः ॥ कुर्वंति भोजनं शुद्धं प्रतिग्रासेपि सर्वथा ॥४॥ शिवायानर्पितं भोज्यं भु
ज्यते न कदाचन ॥ शिवायानर्पितं नव्यं वस्त्रं न परिधीयते ॥५॥ शिवायानर्पितं दिव्यं दिव्यं चंदनपुष्पमेव वा ॥
नैवास्मदुपभोगार्थं क्रियतेऽस्मत्कुलोद्भवैः ॥६॥ उद्धूलनं त्रिपुंड्रं च तथा रुद्राक्षधारणं ॥ सर्वपापहरं नित्यं
क्रियतेऽस्मत्कुलोद्भवैः ॥७॥ शैवमंत्रं विहायान्यो मंत्रो [illegible] नैव हि जप्यते ॥ सर्वैरस्मत्कुलोत्पन्नैः शिवशा
स्त्रपरायणैः ॥८॥ शंकरध्याननिरताः सर्वेप्यस्मत्कुलोद्भवाः ॥ शिवादन्यस्य न कुर्वंति ध्यानं स्वप्नेपि सर्वथा ॥
आबालवृद्धमप्यस्मत्कुलजैः शिवदैवतैः ॥ शिवनामान्यनामापि गृह्यते न कदाचन ॥१०॥ सर्वेप्यस्मत्कुलोत्प
न्नाः शिवनामैकजीवनाः ॥ शिवनामांकिता धन्या शिवैकशरणाः सदा ॥११॥ शिवोऽस्माकं धनं बंधुः शिवोऽस्मा

कंप्रभुः पिता॥ शिवोस्माकं हि नो मतो शिवोस्माकं हि जीवनं॥ १२॥ पुरा हिमालये पीठे विष्णुं तपोनिष्ठं चतुर्मुखः॥
प्रणम्योवाच चतुरो वाक्यं वाक्यविशारदः॥ १३॥ सर्वेषु देवेषु विख्यातं शिवलिंगार्चनं हरे॥ तल्लिंगमनघे भ
व्यं निर्विकारं निरंजनं॥ १४॥ लिंगार्चनस्य माहात्म्यमेयं नितमैरपि॥ न ज्ञातं सर्वथा सम्यगिति ज्ञातं
मया ध्रुवं॥ १५॥ शिवः केन स्वरूपेण पूजितो मुक्तिदायकः॥ शिवमूर्तिः कथं ध्येया शिवस्य क्वास्ति संनि
धिः॥ १६॥ त्वयापि लिंगमाहात्म्यं कथं ज्ञातं जनार्दन॥ तत्वमाचक्ष्व विज्ञाय सम्यगादरपूर्वकं॥ १७॥ ॥
विष्णुरुवाच॥ ॥ न मया शिवलिंगस्य माहात्म्यं ज्ञायते विधे॥ परं तु वेदविहितं क्रियते लिंगपूजनं॥ १८॥
यत्न वेदैरपि ज्ञातं लिंगमाहात्म्यमद्भुतं॥ तन्मया मादृशैर्वान्यैः कथं ज्ञेयं भविष्यति॥ अथो यं लिंगमाहात्म्यं
ज्ञातुमेव सदा मया॥ क्रियते त्र तपो घोरं शिवमुद्दिश्य सादरं॥ २०॥ पंचाग्निमध्यवसतः तपोनिष्ठस्य सं
ततं॥ षष्टिकोटियुगा जाता मम शैवव्रतस्य हि॥ २१॥ इदानीमपि देवेशः शंभुर्मे न प्रसीदति॥ जीर्णमे
तदभूद्देहं गोर्किं कर्तव्यमतः परं॥ २२॥ शिवप्रसादपर्यंतं तपोनिष्ठो जितेंद्रियः॥ निराहारेण सततं अत्रैव नि
वसाम्यहं॥ २३॥ त्वयाप्यनंतपश्चर्या कर्तव्या सादरं सदा॥ शिवमुद्दिश्य विध्येशमामाभूसादं समेहेशितुः॥ अ
ज्ञातलिंगतत्वस्य मोक्षो न भवति ध्रुवं॥ ततः कुरु स्वयत्नेन तपो घोरतरं मुदा॥ २५॥ इत्युक्तो विष्णुना ब्रह्मा
ततः पंचाग्निमध्यगः॥ त्रिकोटियुगपर्यंतं चकार उग्रं तपो मुदा॥ २६॥ तदा तत्तपसा क्षुब्धा सर्वे भूताः सुरा
स्तदा॥ चकंपे भूमिरखिला सशैलवनकानना॥ २७॥ ततो भूतेषु बहुषु देवकल्पेषु शंकरः॥ आविरासी
ल्लिंगरूपी तयोर्मध्ये सदाशिवः॥ २८॥ तल्लिंगमनलप्रख्यमनाद्यंतं विधिर्हरिः॥ दृष्ट्वा बभूवतुः शीघ्रं तत्तेजोभिर्ह
तप्रभौ॥ २९॥ ज्वलद्वह्निगणाकारं तल्लिंगप्रभया दिशः॥ प्रदीपिताः प्रभाश्चैव जगद्व्याप्य स्थिताः सदा॥ ३०॥
तदा विधिरुवाचेदं विष्णुं प्रहितप्रभं॥ कंपमानः स्वयं धैर्यान्माभैषीरिति सादरं॥ ३१॥ ज्योतिःस्वरूपममलं शि

वलिंगमिदंशुभं।।प्रलयानलसंकाशं दृष्टमद्य शुभावहं।।३२।।आसिरासीत्कपंलिंगमेतन्मूलं क्व वर्तते।।त्व
ग्रभागोस्यविमलः संपूज्यः सर्वसाधनैः।।३३।।मत्वाग्रभागोलिंगस्य द्रष्टव्यश्चातियत्नतः।।यद्दर्शनेन
मोक्षोपिकरस्थोद्यभविष्यति।।३४।।लिंगमूलं विदित्वैव शीघ्रमायाहिमाधव।।मयालिंगाग्रभागोपिद्र
ष्टव्यागम्यते ध्रुवं।।३५।।इत्युक्त्वा हंसरूपेण ययावूर्ध्वं विधिस्तदा।।विष्णुर्वाराहवपुषा पातालमगमत्तलः।।
।।३६।।विदार्य सप्तपातालान् वाराहवपुषा हरिः।।ययौ तीक्ष्णाग्रदंष्ट्राभ्यां वायुवेगमुपाश्रितः।।३७।।ततो
ददर्शविपुलं लोकाधारमुपस्थितं।।कूर्मं जलमये लोके दृढपृष्ठमनामयं।।३८।।तमप्यतीत्य सहसाप्रवि
वेशच महाबलं।।सहस्रयुगपर्यन्तं चचार जलमंडले।।३९।।न तस्यांतः क्वचिद्विष्णुः किंचित्कालं जलेरिछ
नः।।पुनर्बभ्राम बहुधा बहुकालं जले बली।।४०।।तल्लिंगमूलमदृष्ट्वैव नतो हरिः।।चिरकालेन संप्राप भुवं
भग्नमनोरथः।।४१।।तदा विधिरपि भ्रांत्वा बहुकालमनाकुलः।।तदा सर्वोर्ध्वलोकेषु तल्लिंगाग्रदिदृक्षया
।।४२।।लिंगाग्रभागममलं दृष्ट्वाशांतविग्रहः।।खिन्नचित्तोभुवंप्रापछिन्नवीर्यइवोरगः।।४३।।ततो ब्रह्मास्व
कंरूपं समास्थाय शिवं मुहुः।।प्रणम्य बहुधा चक्रे स्तोत्रमेतदघापहं।।४४।।ब्रह्मोवाच।। ।।नमस्तेदेवदेवा
यनमस्तेऽनंतमूर्तये।।नमो लोकैकनाथाय नमस्ते सर्वसाक्षिणे।।४५।।नमस्ते निर्विकाराय नमस्तेऽनंतच
क्षुषे।।नमस्तेऽनंतहस्ताय नमस्तेऽनंतरूपिणे।।४६।।नमस्ते निर्गुणानंत नमस्ते सगुण प्रभो।।नमस्ते जग
दाधार नमस्ते विश्वभावन।।४७।।नमस्ते सत्वरूपाय नमस्ते लोकरूपिणे।।नमस्ते सर्वरूपाय रूपातीताय
ते नमः।।४८।।नमस्ते शुद्धबुधाय नमस्ते परमात्मने।।नमस्ते लिंगरूपाय नमस्ते विज्वरानघ।।४९।।नमो
वेदांतवेद्याय नमस्ते वेदरूपिणे।।नमस्ते ज्ञानरूपाय नमस्ते ज्ञानदायक।।५०।।नमस्ते निष्प्रपंचाय निरीहाय
नमोस्तु ते।।निर्द्वंद्वाय नमस्तेस्तु निर्मलायास्तु ते नमः।।५१।।निरवद्य नमस्तेस्तु निरामय नमोस्तु ते।।निष्क

लंकनमस्तेस्तुव्यापकायनमोस्तुते॥५२॥ नमस्तेयज्ञरूपाययज्ञकर्त्रेनमोस्तुते॥ नमस्तेभूरिरूपायनमस्तेश
मेदायिने॥५३॥ नमोहिरण्यहस्ताय सेनान्येतेनमोनमः॥ नमोदिक्पतयेतुभ्यं कक्षाणांपतयेनमः॥५४॥
नमःसस्पिंजरायाद्यनमस्तेस्तुत्विषीमते॥ नमःपथीनांपतयेकुलुंचायनमोस्तुते॥५५॥ विव्याधिनेनमोन्ना
नांपतयेतेनमोनमः॥ नमस्तेहरिकेशायनमोभव्योपवीतिने॥५६॥ पुष्टानांपतयेतुभ्यंनमस्तेपुष्टिदायिने
॥ जगतांपतयेनित्यंनमोरुद्रायतेनमः॥५७॥ परान्नताथिनेनित्यंनमस्तेशरढरूपिणे॥ क्षेत्राणांपतयेनि
त्यंनमः सूतायतेनमः॥५८॥ नमोहंत्यायदार्वायविश्वशुभायतेनमः॥ वनानांपतयेनित्यंरोहितायन
मोस्तुते॥५९॥ नमोस्थपतयेनित्यंवृक्षाणांपतयेनमः॥ नमस्तेमंत्रिणेनित्यंवाणिजायनमोस्तुते॥ ६०॥
कक्षाणांपतयेनित्यंनमस्तेस्तुभुवंतये॥ नेवारिवरूनायेशनमस्तेवारिरूपिणे॥ ६१॥ उच्चैर्घोषायधीरा
यनित्याक्रंदायतेनमः॥ पत्तीनांपतयेनित्यंकृत्स्नवीनायतेनमः॥६२॥ नमस्तेधावतेनित्यंपश्वनांपतये
नमः॥ नमस्तेसहमानायमानातीतायतेनमः॥६३॥ नमोहराव्याधिनीनांपतयेशानचस्तुभे॥ नमस्तेक
कुभायेशाकामरूपायतेनमः॥ ६४॥ निषंगिणेनमस्तेस्तुदिव्येषुधिनमोस्तुते॥ नमस्तेतस्कराणांचपतयेपनी
तिदायिने॥६५॥ नमस्तेवंचतेनित्यंनमस्तेपरिवंचते॥ स्तायूनांपतयेनित्यंनमस्तेस्तुनिचेरवे॥६६॥ नमःप
रिचरायेशापरात्परनमोस्तुते॥ अरण्यानांचपतयेनमोविश्वात्मकायते॥ ६७॥ मुष्णानांपतयेनित्यंनमस्ते
पापनाशक॥ प्रकृंतानांचपतयेनीलोष्णीषायतेनमः॥६८॥ नमोगिरिचरायेशगिरिवर्यप्रियायते॥ कुलुं
चानांपतयेनमस्तेस्तुश्वरूपिणे॥ ६९॥ नमोविचित्रवेषायवेदवेषटकेतेनमः॥ वेदमार्गायदुर्गायनमस्तेपा
शधारिणे॥७०॥ नमःपरशुहस्तायनमस्तेशूलधारिणे॥ नमस्तेमृगहस्तायनमस्तेमृगरूपिणे॥७१॥ न
मोभवायरुद्रायनमःशर्वायसर्वदा॥ पशुपाशहरायेशनमःपशुपतीशते॥७२॥ नमोग्रायनमोनित्यंभी

वलिंगमिदं शुभं ॥ प्रलयानलसंकाशं दृष्टमद्य शुभावहं ॥ ३२ ॥ आविरासीत्कथं लिंगमेतन्मूलं क्व वर्तते ॥ त्व
ग्रभागोस्य विमलः संपूज्यः सर्वसाधनैः ॥ ३३ ॥ मूलाग्रभागौ लिंगस्य द्रष्टव्यौ श्रांतियत्नतः ॥ यद्दर्शनेन
मोक्षोपि करस्थो यं भविष्यति ॥ ३४ ॥ लिंगमूलं विदित्वेवं शीघ्रमायाहि माधव ॥ मया लिंगाग्रभागोपि दृ
ष्ट्वेवागम्यते ध्रुवं ॥ ३५ ॥ इत्युक्त्वा हंसरूपेण ययावूर्ध्वं विधिस्तदा ॥ विष्णुर्वराहवपुषा पातालमगमत्तलः ॥
॥ ३६ ॥ विदार्य सप्तपातालान् वाराहवपुषा हरिः ॥ ययौ तीक्ष्णोग्रदंष्ट्राभ्यां वायुवेगमुपाश्रितः ॥ ३७ ॥ ततो
ददर्श विपुलं लोकाधारमुपस्थितं ॥ कूर्मं जलमये लोके दृढपृष्ठमनामयं ॥ ३८ ॥ लमप्यतीत्य सहसा प्रवि
श्यच महाबलं ॥ सहस्रयुगपर्यंतं चचार जलमंडले ॥ ३९ ॥ न तत्र्श्रांतः क्वचिद्विष्णुः किंचित्कालं जलेस्थि
तः ॥ पुनर्बभ्राम बहुधा बहुकालं जले बली ॥ ४० ॥ तल्लिंगमूलमदृष्ट्वा वनतो हरिः ॥ चिरकालेन संप्राप भुवं
भग्नमनोरथः ॥ ४१ ॥ तदा विधिरपि श्रांत्वा बहुकालमनाकुलः ॥ तदा सर्वोर्ध्वलोकेषु तल्लिंगाग्रदिदृक्षया
॥ ४२ ॥ लिंगाग्रभागममलं दृष्ट्वा शांतविग्रहः ॥ खिन्नचित्तो भुवं प्राप छिन्नवीर्यो रयोरगः ॥ ४३ ॥ ततो ब्रह्मा च
करूपं समास्थाय शिवं सुहुः ॥ प्रणम्य बहुधा चक्रे स्तोत्रमेतदघापहं ॥ ४४ ॥ ब्रह्मोवाच ॥ ॥ नमस्ते देवदेवा
य नमस्तेऽनंतमूर्तये ॥ नमो लोकैकनाथाय नमस्ते सर्वसाक्षिणे ॥ ४५ ॥ नमस्ते निर्विकाराय नमस्तेऽनंतच
क्षुषे ॥ नमस्तेऽनंतहस्ताय नमस्तेऽनंतरूपिणे ॥ ४६ ॥ नमस्ते निर्गुणानंत नमस्ते सगुण प्रभो ॥ नमस्ते जग
दाधार नमस्ते विश्वभावन ॥ ४७ ॥ नमस्ते सत्वरूपाय नमस्ते लोकरूपिणे ॥ नमस्ते सर्वरूपाय रूपातीताय
ते नमः ॥ ४८ ॥ नमस्ते शुद्धबुधाय नमस्ते परमात्मने ॥ नमस्ते लिंगरूपाय नमस्ते विज्वरानघ ॥ ४९ ॥ नमो
वेदांतवेद्याय नमस्ते वेदरूपिणे ॥ नमस्ते ज्ञानरूपाय नमस्ते ज्ञानदायक ॥ ५० ॥ नमस्ते निष्प्रपंचाय निरीहाय
नमोस्तु ते ॥ निर्द्वंद्वाय नमस्तेस्तु निर्मलायास्तु ते नमः ॥ ५१ ॥ निरवंद्य नमस्तेस्तु निरामय नमोस्तु ते ॥ निष्क

मायाभयदायते ॥ अग्रेवधाय भूताय नमो दूरेवधाय ते ॥७३॥ हन्त्रे हनीयसे नित्यं नमस्ताराय ते नमः ॥ नमस्ते शं
भवे नित्यं नमस्तेस्तु मयोभवे ॥७४॥ शंकराय नमस्तेस्तु सर्वज्ञाय नमोस्तु ते ॥ नमो मयस्करायेशान नमो मेशाय ते
सदा ॥७५॥ नमः शिवाय देवाय नमः शिवतराय ते ॥ नमस्तीर्थ्याय कूल्याय नमः पार्याय ते नमः ॥७६॥ नमो
वार्याय देवाय नमः प्रतरणाय ते ॥ नम उत्तरणायेशा आतार्याय च ते नमः ॥७७॥ आलाद्याय नमस्तेस्तु नमः
शष्प्याय तेमृड ॥ नमः फेन्याय देवाय सिकत्याय च ते नमः ॥७८॥ प्रवाह्याय नमस्तेस्तु इरिण्याय नमोस्तु
ते ॥ प्रपथ्याय नमस्तेस्तु किंशिलाय नमो नमः ॥७९॥ नमस्तेस्तु सदा देव क्षयणाय कपर्दिने ॥ पुलस्त्याय
नमस्तेस्तु नमो गोष्ठ्याय ते सदा ॥८०॥ नमो गृह्याय तल्प्याय गेह्याय च नमोस्तु ते ॥ काट्याय गह्वरेष्ठाय
ह्रदय्याय नमोस्तु ते ॥८१॥ निवेष्प्याय नमो नित्यं पांसव्याय नमो नमः ॥ रजस्याय नमो नित्यं शुष्क्याय च
नमोस्तु ते ॥८२॥ हरित्याय नमो देव नमो लोप्याय ते सदा ॥ उलप्याय नमस्तेस्तु नम ऊर्व्याय तेनघ ॥८३॥
नमः सूर्म्याय पर्ण्याय पर्णशद्याय ते नमः ॥ नमोपगुरमाणाय नमस्तेभिघ्नते सदा ॥८४॥ नम आखि
दते नित्यं नमः प्रखिदते सदा ॥ नमो विश्वस्वरूपाय गुणातीताय ते नमः ॥८५॥ नीलग्रीवाय नित्याय शि
तिकंठाय ते नमः ॥ धूम्रकेशाय ते नित्यं सहस्राक्षाय ते नमः ॥८६॥ नमस्ते घोररूपाय नमस्ते शतधन्विने
॥ गिरिशाय नमस्तेस्तु शिपिविष्टाय ते नमः ॥८७॥ मीढुष्टमाय देवाय भव्याय शुभते नमः ॥ नमो ह्रस्वाय
देवाय वामदेवाय ते नमो नमः ॥८८॥ नमोस्तु बृहते नित्यं नमो वर्षीयसे सदा ॥ नमो वृक्षाय देवाय नमः सं
वृध्वनाय ते ॥८९॥ नमोग्रियाय शूराय प्रमथाय नमो नमः ॥ आशवे ते नमो नित्यं अजिराय च ते नमः ॥९०॥
नमः शीघ्राय ते नित्यं शीभ्याय महते नमः ॥ नम ऊर्म्याय नव्याय अवस्वन्याय नमो नमः ॥९१॥ स्रोतस्याय नमो
नित्यं द्वीप्याय च नमो नमः ॥ नमो ज्येष्ठाय सूर्पाय कनिष्ठाय च ते नमः ॥९२॥ पूर्वजाय नमस्तेस्तु नमस्तेपरजा

यच॥ मध्यमायनमस्तेस्तुकुष्मांडायचतेनमः॥ १३॥ नमः परंतपायेशांतारायसकलात्मने॥ जघन्यायनम
स्तेस्तुबुध्नियायनमोनमः॥१९४॥ सोभ्यायप्रतिसूर्याय नमोयाम्यायतेनमः॥ नमःक्षेम्यायवर्याय उर्वर्यायन
मोनमः॥१९५॥ श्लोक्यायचावसान्यायनमोमंगलरूपिणे॥ नमोवन्यायकक्ष्यायश्राव्यायचनमोनमः॥१९६॥
प्रतिश्राव्यायशांतायशरण्यायनमोनमः॥ नमःसदाशुषेणायनमश्चाशुरथायच॥१९७॥ नमःशूरःस्वरूपाय
भेत्रेचभयदायिने॥ नमोस्तुवर्मिणेतुभ्यंनमोनित्यंवरूथिने॥ बिल्मिनेतेनमोनित्यंनमःकवचिनेसदा॥
श्रुतायश्रुतसेनायदुंदुभ्यायचतेनमः॥१९९॥ नमस्तेआहनन्यायधृष्णवेप्रमृशायच॥ नीक्ष्णेषवेनमस्तुभ्यं
नमआयुधिनेसदा॥ २००॥ नमोगोअश्वहंत्रेभ्योआयुधायसुधन्विने॥ नमस्तुत्यायपथ्यायनमःसृद्याय
तेनमः॥१॥ सरस्यायनमोनित्यंनमोनाद्यायतेसदा॥ वैशांतायनमोनित्यंअगम्यागण्यायतेनमः॥२॥ नमोस्त्व
मेघरूपायनमःकूप्यायतेसदा॥ नमोवंद्यायवर्ष्यायवर्ष्यायाम्रनरूपिणे॥३॥ नमोमेध्यायभोमायविद्युत्या
यनमोनमः॥ ईध्रायचनमस्तेस्तुआतप्यायनमोनमः॥४॥ नमोवात्यायरेष्म्यायवास्तव्यायनमोनमः॥
वास्तुपायनमस्तेस्तुनमःसांबायसर्वदा॥५॥ नमश्चंद्रकिरीटायनिषंगायनमोस्तुते॥ नमोब्रह्मण्यदेवाय
देवेशायनमोनमः॥६॥ नमोविश्वैकवंद्यायसर्वाधारायतेनमः॥ नमोनंतगुणोपेतस्तोमसर्वोत्तमप्रभो॥
॥७॥ नमस्तेत्र्यंबकश्रीमननमस्तांध्यायतेनमः॥ नमोविश्वैकनिलयनमोविश्वैकसंस्तुत॥८॥ नमोविधू
तपापायमहादेवायतेनमः॥ नमस्तेपार्वतीनाथनमस्तेत्रिपुरांतक॥९॥ नमस्तेकरुणासिंधोनमस्तेभक्तव
त्सल॥ नमस्त्रिकाग्निकालायकालकालायतेसदा॥१०॥ नमस्तेकालरूपायनमस्तेवरदायच॥ नमःसर्वोत्त
मःश्रीमनसदाशिवनमोस्तुते॥ ११॥ हिरण्यरूपचिद्रूपहिरण्यनिलयामल॥ नमस्तेस्तुहिरण्यात्मन्हि
रण्यपतयेनमः॥ १२॥ नत्वदन्योमहादेवलोकनाथोजगन्मय॥ नत्वदन्यःसुराराध्यःनत्वदन्योजगत्प्रभुः॥१३॥

नमोभवायभीमायभर्गायाभयदायते॥ देवतासार्वभौमायशंभवेप्रभवेनमः॥१४॥ त्वदन्योवैदेवेषुनान
त्वदन्यःसुरेश्वरः॥ नत्वदन्यःसदासेव्योनत्वदन्योजगत्पिता॥१५॥ त्वमेवभूषणंरम्यंत्वमेवममजीवनं॥
त्वमेवममत्रातासित्वमेवह्यसिपितामम॥१६॥ त्वमाराध्यतमःशंभोममदेवोत्तमप्रभो॥ नत्वदन्यपरंदेवंप्र
चेयामिकृपानिधे॥१७॥ नमन्येऽमिकयामन्यांशिवनामविवर्जितां॥ शिवनामान्यनामानिनवदामिमहे
श्वर॥१८॥ शिवलिंगंविहायान्यंनपश्यामिचसादरं॥ शिवलिंगंविहायान्यध्यानंचनकदाचन॥१९॥
अपराधान्क्षमस्वेशममधांकरसर्वदा॥ स्वरूपंनचविज्ञातुंशक्यमेवनसर्वथा॥२०॥ वेदैःसर्वैरपिश्रीमन्
नवरूपंसदाशिव॥ नज्ञातंतादृशंरूपंमयाज्ञेयंकथंप्रभो॥२१॥ त्विंतस्मात्वंमयाज्ञातुं अज्ञात्वागतमी
श्वर॥ अपराधंक्षमस्वाद्यत्वंममावाबिकापते॥२२॥ अन्येपिमत्कृताःसर्वेशंतव्याःपरमेश्वर॥ अपरा
धंक्षमस्वाद्यदीनवत्सलशंकर॥२३॥ प्रणतंपाहिमांशंभोकरुणारसवारिधे॥ मांनमुंचमहादेवपाहि
पाहिसदाशिव॥२४॥ इतिस्तुत्वामहादेवंप्रणम्यबहुधाविधिः॥ कृतांजलिपुटोभूत्वानिवसन्नतकं
धरः॥२५॥ ॥विष्णुरुवाच॥ ॥ महेशाननाद्यत्रिगुणरहितामेयविमल॥ स्वराकारापाराभितगुणगणा
कारनिरते॥ निराधाराधारामरवरनिराकारपरमप्रभापूराकारावरपरनमोवेद्यशिवते॥ नमोवेदावे
द्याखिलजगदुपादाननियतस्वतंत्रासामंतानवधननिजाकारविरते॥२७॥ निवर्तंतेवाचःशिवमज
रमप्राप्यमनसायतोशक्तास्तोतुंसकृदपिगुणातीतशिवते॥ त्वदन्यंवस्त्वेकंनहिभुविसमस्तन्नभवितावि
भिन्नविश्वात्मन्नचपरममस्तीशभवतः॥२८॥ ध्रुवंमायातीतस्त्वमसिसततंनात्रविषयोनतेकृत्यंकिंचि
त्क्वचिदपिनमोवायेशिवते॥ त्वयैवेमंलोकंनिखिलममलंव्याप्यसततंतथैवान्यंलोकंस्थितमनघदेवो
त्तमविभो॥२९॥ त्वयैवैतत्सृष्टंजगदखिलमीशानभगवन्विलासोयंकश्चित्तवप्रियनमोमेध्यशिवते।

मायाभयदायते॥ अन्नेवधाय भूताय नमो दूरेवधायते॥७३॥ हन्त्रे हनीयसे नित्यं नमस्ताराय ते नमः॥ नमस्तेत्रां
भवे नित्यं नमस्तेस्तु मयोभवे॥७४॥ शंकराय नमस्तेस्तु सर्वज्ञाय नमोस्तु ते॥ नमो मयस्करायेशान नमो मेशाय ते
सदा॥७५॥ नमः शिवाय देवाय नमः शिवतराय ते॥ नमस्तीर्थ्याय कूल्याय नमः पार्याय ते नमः॥७६॥ नमो
वार्याय देवाय नमः प्रतरणाय ते॥ नम उत्तरणायेशा आतार्याय च ते नमः॥७७॥ आलाद्याय नमस्तेस्तु नमः
शष्प्याय ते नमः॥ नमः फेन्याय देवाय सिकत्याय च ते नमः॥७८॥ प्रवहाय नमस्तेस्तु इरिण्याय नमोस्तु
ते॥ प्रपथ्याय नमस्तेस्तु किंशिलाय नमो नमः॥७९॥ नमस्तेस्तु सदा देव क्षयणाय कपर्दिने॥ पुलस्त्याय
नमस्तेस्तु नमो गोष्ठ्याय ते सदा॥८०॥ नमो गृह्याय तल्प्याय गेह्याय च नमोस्तु ते॥ काट्याय गह्वरेष्ठाय
ह्रदय्याय नमोस्तु ते॥८१॥ निवेष्प्याय नमो नित्यं पांसव्याय नमो नमः॥ रजस्याय नमो नित्यं शुष्क्याय च
नमोस्तु ते॥८२॥ हरित्याय नमो देव नमो लोप्याय ते सदा॥ उलप्याय नमस्तेस्तु नम ऊर्व्याय तेनघ॥८३॥
नमः सूर्म्याय पर्ण्याय पर्णशद्याय ते नमः॥ नमोपगुरमाणाय नमस्तेभिघ्नते सदा॥८४॥ नम आखिद
दते नित्यं नमः प्रखिदते सदा॥ नमो विश्वस्वरूपाय गुणातीताय ते नमः॥८५॥ नीलग्रीवाय नित्याय शि
तिकंठाय ते नमः॥ व्युप्तकेशाय ते नित्यं सहस्राक्षाय ते नमः॥८६॥ नमस्ते घोररूपाय नमस्ते शतधन्विने
॥ गिरिशाय नमस्तेस्तु शिपिविष्टाय ते नमः॥८७॥ मीढुष्टमाय देवाय भव्यायेषुमते नमः॥ नमो ह्रस्वाय
देवाय वामदेवाय ते नमो नमः॥८८॥ नमोस्तु बृहते नित्यं नमो वर्षीयसे सदा॥ नमो वृद्धाय देवाय नमः सं
वृध्वनाय ते॥८९॥ नमोग्रियाय शूराय प्रमथाय नमो नमः॥ आशवे ते नमो नित्यं अजिराय च ते नमः॥९०॥
नमः शीघ्राय ते नित्यं शिभ्याय महते नमः॥ नम ऊर्म्याय न्यायायवस्वन्याय नमो नमः॥९१॥ स्रोतस्याय नमो
नित्यं द्वीप्याय च नमो नमः॥ नमो ज्येष्ठाय सर्पाय कनिष्ठाय च ते नमः॥९२॥ पूर्वजाय नमस्तेस्तु नमस्तेपरजा

दितं॥ नजाने सर्वात्मन् क्वचिदपि नमो नंत शिवते॥ महद्भूतं भूतं यदपि च न भूतं तव विभो सदा भूतं भूतं किमु
न भवतो भूतविषयैः॥५१॥ यदा भूतं भूतं भवति च न भूतं च भवतः प्रभाभूतं भूतं भवति नमो यस्य शिवते॥ य
तो भूता भूताः स्ततमपि भूतात्मकतया न ते भूताभूता स्तव यदपि भूताविभुतया॥५२॥ यतो भूताभूतास्त
व तु न हि भूतात्मकतया न वा भूताभूताः क्वचिदपि नमो भूतशिवते॥ न ते माया माया सततमपि माया मयतया
ध्रुवं मायामायात्वयि च रनमा या मयमपि॥ ५३॥ न वा माया माया त्वयि न च तु सा मायय नयानमायामायावा
परमिय मनंतेस्ते शिव नमः॥ यदंतः संवेद्यं विदितमपि वेदे नेविदितं न वेद्यं चेन्नि यतमपि वेद्यं नविदितं॥
५४॥ तदेवेदं वेद्यं विदितमपि वेदांत निकरैः कथा वेद्यं वेद्यं जितमिति नमो नर्तवि शिवते॥ शिवं नो वं भावं शि
वमपि शिवाकारमशिवं नमत्यं नो वं न छिवमिति शिवं नो वमनिशं॥५५॥ शिवं शांतं मत्वा शिव परमनंतं नो शि
वमयं न जाने न तत्वं शिवमिति नमो भेद शिवते॥ यदज्ञात्वा तत्वं सकलमपि संसार पतितं जरा जन्मा वर्तिं व
हति सततं दुःखनिलयं तदेतज्ज्ञात्वैवाव हति च निवृत्तिं परतरां॥५६॥ न जाने तत्वं परमिति नमोरेष्य
शिवते॥ तदेवं यद्रूपं निगमविषयं मंगलकरं न दृष्टं केनापि ध्रुवमिति विजाने शिवशिवविभो॥ ततश्चित्ते
शंभो न हि ममविषतो ह्यावि कृतिः॥ ग यत्नाल भ्योस्मिन्न किमपि नमः पूर्णशिवते॥५७॥ तवाकर्ण्य गूढं यद
परमचक्षुः श्रुतिपरं तदेवापादं सन्नयनपदवीं त्वात्र न नुते॥ कदाचित्किंचिद्वा स्फुरतु कृपया चेत्तसि तव
स्फुरद्रूपं भव्यं भवहरनमो नाद्यशिवते॥ त्वमिंदुर्भानुस्त्वं हुतभुगसि वायुश्च सलिलं त्वमेवाकाशोसि क्षिति
रसि तथात्मासि भगवन्॥५८॥ ततः सर्वाकारस्त्वमसि भवतो भिन्नमणु च न तत्सत्यं त्रिनयन नमो नंत शि
वते॥ विधुं धत्से नित्यं शिरसि मृदुकंठेपि गरलं न चं नागाहारं भसितममलं भासुरतनो॥५०॥ करे शूलं फा
ले ज्वलनमलिशं तत्किमिति ते न तत्वं जाने हं भवहर नमः कृष्ण शिवते॥ तथापांगस्पंदो यदि भवति भव्यः शु

भकरः कदाचित्कस्मिंश्चित्लघुतरनरेऽपि प्रभवति॥५१॥ तरणे तज्ज्ञो कान्विरचयितुमल्पोऽपि समहान्॥
कृपाधारायन्तोसुरवरनमोनंतशिवते॥ भवंतंदेवेशंशिवमितरगीर्वाणसदृशंममाहाद्युःकश्चिद्यदिवदति
चित्तेऽपिमनुते॥५२॥ तदुःखंलब्ध्वांतेनरकमपियातिध्रुवमिदंध्रुवंदेवाराध्यामितगुणनमोनंतशिवते॥
मदोषेरत्नाढ्येमृदुलतरसिंहासनवरेभवानीमारूढामसकृदपिसंवीक्ष्यभवता॥५३॥ कृतंसम्यक्नाट्यंप्र
थितमितिवेदेऽपिवदतिप्रभावःकोवायंनुवहरनमोह्यद्यशिवते॥ श्मशानेसंचारस्तवकिलननेकापिगमनं
यतोविश्वव्याप्याखिलमपितदातिष्ठतिनवान्॥५४॥ विभुर्नित्यंशुद्धंशिवमयमतोव्यापकमितिश्रुतिःसा
क्षाद्वक्तिस्वयमपिनमस्तद्यशिवते॥ धनुर्मेरुःशेषोधनुवरगुणोयानमवनिस्तवेनेहाचक्रेनिगमनिकरावाजि
निकराः॥५५॥ पुरोलक्ष्यंयंतापिधिरिषुरहंचेतिनिगमःकिमेवंत्वय्योघोनिगदतिनमःपूर्णशिवते॥ मृडं
सत्वोपेतंभवमनतिरिक्तंचरजसायमोयुक्तंशुद्धंहरमपिशिवंनिष्कलमिति॥५६॥ वदत्येषोवेदस्त्वमसितदु
पास्यंध्रुवमिदंत्वमोंकाराकारोध्रुवमितिनमोनंतशिवते॥ जगत्सुप्तिंबोधंव्रजतिभवतोनिर्गतमपिप्रव
त्तिव्यापारंपुनरपिसुषुप्तिंचसकलं॥५७॥ त्वदन्यंत्वत्प्राप्यंव्रजतिशरणंनेतिनिगमोवदत्यक्षासर्वेशिवमि
तिनमस्तुल्यशिवते॥ त्वमेकालोकानामधिपतिरुमानाथजगतांशरण्यःप्राप्यस्त्वंजलनिधिरिवानंत
पयसां॥५८॥ त्वदन्योनिर्वाणंनवितरतिनिर्वाणपतिरप्यतःसर्वोत्कृष्टःस्त्वमसिहिनमोनीर्घ्यशिवते॥ तवै
वाज्ञोभानुस्तपतिविधुरप्येतिपवनःपवत्येषोवह्निर्ज्वलतिसलिलंचापिवहति॥५९॥ त्वदाज्ञाकारित्वंस
कलसुरवर्गस्यसततंत्वमेकःस्वातंत्र्यंवहसिहिनमोनंतशिवते॥ स्वतंत्रोयंसोमःसकलभुवनेकप्रभुरयंनि
यंतादेवानामयमिहनियंतास्यनपरः॥६०॥ शिवःशुद्धोमायारहिततइतिवेदोऽपिवदतिस्वयंनामाशास्यंभय
हरनमोरम्यशिवते॥ नमोरुद्रायनेनामघहरनमःश्रीकरविभोनमोगौरीनाथत्रिनयनशरण्यांघ्रिकलना॥

नमः शर्वश्रीमन्ननघ महदैश्वर्यनिलय स्मरारे पापारे जय जय नमः शोच्यशिवने ॥ महादेवामेयानघ
गुणग्रामसततं नमो भूयो भूयः पुनरपि नमस्ते पुनरपि ॥ ६२ ॥ पुरारातिनिन्छंभो पुनरपि नमस्ते शिवशिव वि
भो नमो भूयो भूयः शिवशिव नमो नंतशिवने ॥ कदाचिद्दृश्यं ते निबिडनिपतद्दृष्टिकणिका ॥ कदाचिन्न
स्त्राण्यपि शाकिनलेशाः कुशलिनः ॥ ६३ ॥ अनेनैराकल्पो शिवगुणगणाद्यारूरसनैर्नैधाव्यं तेनेनूनं गणयितु
मुषित्वापि सततं ॥ मयापि ज्ञेयशानि शाम्यपि कृतापेतु मनसा सकामे योमेयाः सततमपराधा बहुविधाः ॥
६४ ॥ तरण वस्त्रं तथा कचिदपि शरीरेण वचसा कृतानेते नूनं शिव शिवरूपासागर विभो ॥ प्रमाधाद्दाधे के
चिद्दिततमपराधा विधिहताः कृताः सर्वे तेपि प्रशममुपयान्तु स्फुटतरं ॥ ६५ ॥ शिवश्रीमन्छंभो शिवशिव
महेशेति च जपन् क्वचिल्लिंगा[illegible]गारे शिवहर वसामि स्थिरतरं ॥ ॥ इति स्तुत्वा शिवं विष्णुः प्रणम्य च
मुहुर्मुहुः ॥ निर्विण्णो न वसन्तत्र कृतांजलिपुटश्चिरं ॥ ६६ ॥ सदाशिवः शिवं भूयः आदायोवाच सर्वगः ॥
भीषयन्नखिलां भूतान् घनगंभीरया गिरा ॥ ६७ ॥ मदीयं रूपममलं कथं ज्ञेयं भवादृशैः ॥ यन्नवेदैरपि
ज्ञातमित्युक्त्वा तदधे शिवः ॥ ६८ ॥ ततः पुनर्विधिस्तत्र तपस्तप्तुं समारभे ॥ विष्णुश्च शिवतत्त्वस्य ज्ञाना
र्थमितिपत्ततः ॥ ६९ ॥ तादृशं शिवमेवार्च्य पूजयित्वाव साम्यहं ॥ नान्यो ममार्च्यो देवेषु विनाशंभुं सनात
नं ॥ ७० ॥ त्वयापि शंकरं लिंगं पूजनीयं प्रयत्नतः ॥ विहायेवान्यदेवानां पूजनं चैव सर्वदा ॥ ७१ ॥ इत्यु
क्तः शैववर्यं तं स पूज्य भुजगाधिपः ॥ काशीं प्राप स तेनैव सह पूजापुरःसरं ॥ ७२ ॥ शैवः पाशुपताचारः
पुनः पशुपतीश्वरं ॥ दृष्ट्वा संतोषमापन्नस्तत्रैवोवास सादरं ॥ ७३ ॥ एतन्मया पशुपतीश्वरसंनिधान
वासस्य सम्यममलं फलमुक्तमद्य ॥ सेयं कथा सकलपापवनाग्निभूला श्राव्या सुधारसमयी शिवभक्तिव
र्यैः ॥ ७४ ॥ ॥ इति श्रीशिवरहस्ये उग्राख्ये सप्तमांशे श्रीशिवगौरीसंवादे काशीमाहात्म्ये पशुपतीश्व

रेतिहासकथनंनामदशमोध्यायः॥ १०॥ ॥ श्रीउग्रायनमः॥ ॥ श्रीशिव उवाच॥ ॥ओंकारनामविम
लंक्षेत्रंकावेर्यांवरानने॥ सर्वपापक्षयकरं निष्कलंकंशुभप्रदं ॥१॥ तत्र बिल्ववनंरम्यंनित्यं नवदलान्वितं॥
नक्षत्रकोटिशाखाभिर्घनच्छायमभूच्छिवे॥२॥ तस्मिन्बिल्ववनेरम्ये क्रीडार्थंगम्यते मया॥ किंचित्कालंवि
हृत्याहंवसामि सत्यहं शुभे॥३॥ विघमाने मयिप्रीत्याकदाचित्पवनोमहान्॥ समागतस्ततस्तेनकंपितास्तरु
वोभृशं॥ कंपितेन्यपतद्भूमौबिल्वशाखाग्रमुत्तमं॥ तवारुणदलाक्रांतेविचिनत्तिमिलमेंबिके॥५॥तद्गृहीतं
मयारम्यंतदाप्रभृतिसर्वदा॥ तद्बिल्ववनरक्षार्थंयशास्वंस्थापितामया॥६॥ वेदामूर्तिधरास्तत्र नवबिल्व
दलैःशुभैः॥ओंकाररूपिणंनित्यंमामेवाभ्यर्चयंतिहि॥७॥ शिवतत्वमविज्ञायतज्ज्ञानार्थंमुनीश्वराः॥ वेदा
श्रमस्तलेनत्युत्पःकुर्वंतिसादरं॥ ८॥ तत्रपंचाग्निमध्यस्थाः निराहाराजितेंद्रियाः॥ तपोघोरतरंरुत्वातिष्ठंति
विमलाशयाः॥ एकपादेनसंस्थायप्रज्वलद्वह्निमध्यगाः॥ चक्रारधिष्णुरत्रैवतपोघोरतरंपुरा॥१०॥ ब्रह्मणा
पितपस्तप्तंमहद्घोरतरंमुदा॥ इंद्रादिभिर्लोकपालैः तपस्तप्तमिहैवहि॥११॥ अन्येश्च ऋषिभिःसिद्धैः
मुनिभिर्ब्रह्मवादिभिः॥तपस्तप्तंपुरानित्यंअत्रैवोंकारसंन्निधौ॥१२॥ सायमोंकारनाथस्यदर्शनंपापना
शनं॥कर्तव्यंनियतैर्यत्नात्पूजाकार्यानिरंतरं॥१३॥ प्रतिशुक्लचतुर्दश्यांपूजाकार्याविशेषतः॥तत्प्रीत्य
र्थंमहाशैवाभोजनीयाःप्रयत्नतः॥१४॥ ओंकारकुंडममलंतत्रतिष्ठतिनिर्मलं॥तत्रप्रतिदिनेस्नानंकर्तव्यं
ज्ञानवृद्धये॥१५॥ तत्रश्राद्धंचकर्तव्यंपितॄनुद्दिश्यसादरं॥ कर्तव्यंतत्रयत्नेनमत्यहंतिलतर्पणं॥१६॥
तत्रश्राद्धेरुतेसर्वेपितरोनरकस्थिताः॥ प्रयांतिब्रह्मसदनंमोदमानावसंतिच॥१७॥ पुराकेनचिदत्रैवरू
तंश्राद्धंयथाविधिः॥तेनतत्पितरःसर्वेनरकाद्वैनुमुक्तनाः॥१८॥तदायमभटाःसर्वेयमशासनकारिणः॥प्र
गृह्येवपितॄन्सर्वान्यमपुर्येमलिकेततं॥१९॥ ॥ यमभटाऊचुः॥ ॥ प्रयांतिनरकादेतेयमभीमपराक्रम॥

विचारयेनानितिते यमम्ब्रुः यमस्ततः॥२०॥ उवाच चित्रगुप्तास्त्यं धर्माधर्मविचारकं॥ किमेतैः कृतम
स्तीति ब्रभाषे वचनं मुदा॥२१॥ ॥चित्रगुप्त उवाच॥ ॥काश्यामोंकारनाथस्य कुंडे पापौघनाशके॥ श्रौ
येन तद्द्वराजेन कृतं श्राद्धं यथाविधिः॥२२॥ कृतं पिंडप्रदानं च तर्पणं च तिलैः कृतं॥ तेनैव घोरनिरया
दुध्धृताः पितरोखिलाः॥२३॥ आब्रह्मकल्पमुनिशंब्रह्मणा पूजितामुदा॥ ब्रह्मलोके निवासं च करिष्यं
ति न संशयः॥२४॥ इति तद्वचनं श्रुत्वा यमः शीघ्रं समुत्थितः॥ प्रत्येकमासनं दत्वा पूजां चक्रे यथाविधि
॥२५॥ ततो विमानमारुह्य ब्रह्मलोकं ययुर्मुदा॥ इंद्रेण पूजितास्सम्यक् यथा दिक्पालपूजिताः॥२६॥ अभ्या
गतान् पितॄन् दृष्ट्वा संपूज्य विधिवद्विधिः॥ स्वलोके विमलान् सर्वान् स्थापयामास सादरं॥२७॥ अतोत्र
विधिवत् श्राद्धं कर्तव्यं पितृमुक्तये॥ ओंकारेशार्चनं चात्र कर्तव्यं प्रतिवासरं॥२८॥ त्रिलोचनाख्यममलं
क्षेत्रे काश्यां वरानने॥ तिष्ठत्येकं ममात्यंतविलासास्पदमुत्तमं॥२९॥ हेमप्राकारशृंगाग्रेराजमानमह
र्निशं॥ किंनरामरगंधर्वसेवितं प्रतिवासरं॥३०॥ पिलिपिलाख्यं तत्रास्ति कुंडमेकं वरानने॥ तत्र स्नात्वा
यथाशास्त्रं श्राद्धं कृत्वा यथाविधि॥३१॥ त्रिलोचनाख्यलिंगस्य पूजा कार्या यथाविधि॥ पुष्पैर्नानाविधैः
दूर्वैः बिल्वपत्रैस्तिलाक्षतैः॥३२॥ शनित्रयोदशीदेवि भविष्यति यदा तदा॥ तस्मिन्पिलिपिलेकुंडे स्ना
नं कार्यं प्रयत्नतः॥३३॥ तर्पयित्वा पितॄन् सर्वान् प्रदोषे समुपस्थिते॥ त्रिलोचनेश्वरं सम्यगभिषिच्य
शुभोदकैः॥३४॥ गंधैस्तिलाक्षतैः पुष्पैः बिल्वपत्रैश्च कोमलैः॥ पूजयित्वा विधानेन धूपदीपादिभिः क्र
मात्॥३५॥ सव्यासव्यविधानेन ततः कार्यं प्रदक्षिणं॥ प्रणम्य बहुधा सम्यक् स्तुत्वा स्तोत्रैरनेकधा॥३६॥
सरा होमप्रकारेण प्रतिष्ठाप्य हुताशनं॥ परमान्नं गोघृतं च संपाद्य नवमादरात्॥३७॥ तथा बिल्वस
मिद्भिर्बिल्वदलान्यानीय सादरं॥ होमः कार्यः प्रयत्नेन ऋत्विग्भिः सह वैदिकैः॥३८॥ मोसर्पिर्भिः सार्धकोटि

होमः कार्यो यथाविधि ॥ पुत्रार्थिभिः सार्धलक्षं होमः कार्यो यथाविधिः ॥ ३९ ॥ विद्यार्थिभिस्त्रिलक्षं तु होमः कार्यो यथाविधि ॥ स्वर्गार्थिभिस्तु कार्यः स्यात् होमो लक्षचतुष्टयं ॥ ४० ॥ एवं हुत्वा हविः सम्यक् दत्वा चैव यदक्षिणं ॥ कृतं होमादिकं सर्वं शिवायैव निवेदयेत् ॥ ४१ ॥ भोजनीयास्ततो विप्राः पयश्छं स्वादुभोजनैः ॥ सुवासिन्यो भोजनीयाः देवीप्रीत्यर्थमादरात् ॥ ४२ ॥ विध्युक्तेन प्रकारेण कृतहोमादिना शिवः ॥ प्रीतो भीष्टं यथायोगं प्रयच्छति न संशयः ॥ ४३ ॥ शनित्रयोदशीं प्राप्य काश्यां स्थित्वा त्रिलोचनं ॥ यो नार्चयेत्तिमूढात्मा स भवत्यघसंश्रयः ॥ ४४ ॥ उपोष्य सायमन्वेधैः स्नात्वा तत्र त्रिलोचनः ॥ शनियुक्तत्रयोदश्यां पूजनीयः प्रयत्नतः ॥ ४५ ॥ पुरा कश्चिद्द्विजशिशुः दरिद्रो व्याधिपीडितः ॥ शनित्रयोदशीं प्राप्य चकारोपोषणं मुदा ॥ ॥ ४६ ॥ ततः पिलिप्पिलाकुंडे स्नात्वा बिल्वदलैर्जलैः ॥ पूजां कृत्वा प्रणम्याथ मनते च पुनः पुनः ॥ ४७ ॥ ततः पर्णकुटीं प्राप्य निद्रां चक्रे स बालकः ॥ त्रिलोचनोपि संतुष्टः तद्बालकृतपूजनात् ॥ सर्वाभरणसंपन्नो दिव्यमंगलविग्रहः ॥ प्रत्यक्षो भूत्कृपासिंधुः स्तमुवाच द्विजार्भकं ॥ ४९ ॥ प्रीतोस्मि पूजनाद्वत्स वरं वृणु तवेप्सितं ॥ वरदोहं वरं दास्ये मा भैषीर्धैर्यमावह ॥ ५० ॥ इत्युक्तो बालकः शीघ्रं ययाचे वरमुत्तमं ॥ देव देहि मानंदं अविच्छिन्नमनामयं ॥ ५१ ॥ जन्मादिदुःखशामयगर्भवासविनाशाय ॥ देहि मुक्तिं कृपासिंधो त्रिलोचन जगत्प्रभो ॥ ५२ ॥ इत्युक्त्वा प्रणिपत्येशं देवदेवं मुहुर्मुहुः ॥ कृतांजलिपुटो भूत्वा निवसन्नतकंधरः ॥ ॥ ५३ ॥ ततस्तस्मै महादेवः कृपाब्धिर्भक्तवत्सलः ॥ गाणपत्यं ददौ प्रीत्या सर्वार्हं त्रिलोचनः ॥ ५४ ॥ कृतनिवासेश्वरं नाम क्षेत्रमस्त्येकमुत्तमं ॥ तत्रापि बिल्वतरवः तिष्ठंति नवपल्लवाः ॥ ५५ ॥ तत्रापि मुनयः शांता निराहारा जितेंद्रियाः ॥ तिष्ठंत्यत्यंत संतुष्टाः शिवध्यानपरायणाः ॥ ५६ ॥ अधोमुखा धूमपानं केचित्कुर्वंति सादरं ॥ केचिदेकांघ्रिणास्थित्वा तपः कुर्वंत्यनाकुलाः ॥ केचिदभ्यर्चमामीशं नित्यं कुर्वंति यत्नतः ॥ केचित्तल्लिंगार्चनं कृ

त्वा प्रणमंति पुनः पुनः ॥५८॥ केचिन्मां हृदि संस्थाप्य ध्यानं कुर्वंति सादरं ॥ केचिज्जपंति सततं शिव
नामानि पावनाः ॥५९॥ तत्रापि कुंडमस्त्येकं कृत्तिवासेशसंनिधौ ॥ स्नानं प्रयत्नतः कार्यं तस्मिन्कुंडे प्रभु
भावहे ॥६०॥ तत्र स्नात्वा विधानेन कृत्तिवासं समर्चयेत् ॥ तत्तु मोक्षप्रदं लिंगं दर्शनादघनाशनं ॥६१॥
मुक्तिकामैर्मुनींद्रैस्तु सर्वदा सेवितं मुदा ॥ मुनिभिस्संस्तुतं नित्यं स्तुतं देवैश्च सर्वदा ॥६२॥ माघकृष्णच
तुर्दश्यां उपोष्य नियतेंद्रियः ॥ तत्र जागरणं कार्यं कृत्तिवासेशसंन्निधौ ॥६३॥ प्रतियामे यथायोगं
पूजा कार्या प्रयत्नतः ॥ दीपप्रदानं कर्तव्यं गोघृतेन मनोहरं ॥६४॥ नवबिल्वदलैः शुभ्रैः पूजा कार्या वि
शेषतः ॥ उपोष्यात्र प्रमादेन लिंगपूजापरायणैः ॥६५॥ सर्वघोराघशांत्यर्थं कोटिजन्मतपोधिकं ॥
सम्यग्जागरणं कार्यं तद्दिने समुपस्थिते ॥६६॥ शिवरात्रिव्रतं यस्तु मोहेन न करिष्यति ॥ स धर्मप्रच्यु
तो नित्यं नरके निवसिष्यति ॥६७॥ पुरा हिमालयप्रांते कश्चिदासीन्नराधिपः ॥ तेन रम्याः शिवकथाः
श्रुताः सर्वा मुदावहाः ॥६८॥ शिवरात्रिव्रतस्यास्य माहात्म्यं श्रुतमेकदा ॥ तत्रैव कृत्तिवासेशमाहात्म्य
मपि संश्रुतं ॥६९॥ ततः काशीप्रयाणार्थं उद्युक्तोभून्नराधिपः ॥ ततो विघ्नो महानासीत् तद्यात्राप्रतिबं
धकः ॥७०॥ ततो विघ्नविनाशार्थं स राजा दृढनिश्चयः ॥ तपः कर्तुं समारेभे तत्रैव गिरिशालये ॥७१॥ ज्व
लत्स्वेचाग्निमध्यस्थो निराहारो जितेंद्रियः ॥ शिवलिंगार्चनं कुर्वन् चकारोग्रं तपोन्तपः ॥७२॥ स लक्षयु
गपर्यंतं कृत्वा घोरतरं तपः ॥ ततो दुःखेन संतप्तः त्यक्त्वा निर्विण्णमानसः ॥७३॥ स्फोटो घोरैरतिक्लिन्नः शिरः
संताडयत्पाणिना ॥ पाषाणमपि संगृह्य ताडयन्नुरसः स्थलं ॥७४॥ कथं काशीमयात्राप्याद्दृष्ट्वा विश्वेश्वरं
कथं ॥ कृत्तिवासेशलिंगं च कथं द्रक्ष्ये मतः परं ॥७५॥ प्रायः पर्वतसंकाशान्यतिघोराणि संति मे ॥ पातकानि
कानि बहून्येव किं कर्तव्यमतः परं ॥७६॥ इति कृत्वा महद्दुःखं तपश्चक्रे पुनर्नृपः ॥ सहस्रयुगपर्यंतं जलमध्यगत

स्तदा॥७७॥ ततः कदाचित्तद्धैर्यं द्रष्टुकामस्त्वनुर्मुरुः॥ रक्षब्राह्मणरूपेण गतस्तान्निकटे शुभे॥ तमागतं द्विजं दृष्ट्वा प्रणम्याह्निनसत्तमं॥७८॥ चकार विधिवत्पूजां उवाच च वचस्तदा॥ वेदशास्त्राश्रयः श्रीमन्नीदृजवर्योघनाशकः॥७९॥ काशीप्राप्तिकरं पुण्यं किमस्ति वद तत्वतः॥ ॥ब्राह्मण उवाच॥ ॥ तपोलभ्य शिवाकाराकाशीप्राप्तुं न शक्यते॥८०॥ मनुजैः साकयं प्राप्याद्देवानामपि दुर्लभा॥ नात्येन तपसा प्राप्याकाशी विश्वेश्वराश्रया॥८१॥ बहुकालं तपः केन कर्तव्यं घोरमुत्कटं॥ किं च राज्ञामयं धर्मो न भविष्यति सर्वथा॥ किंतु कर्त्तव्यमनिशं प्रजानां परिपालनं॥ निष्कंटकमिदं राज्यं त्यक्त्वा किं न प्यंतनपः॥८३॥ इदानीमखिलं राज्यं नष्टमेव भविष्यति॥ शरीरं चाभवत्क्षीणं न पवर्ग्यमनोहरं॥८४॥ काशीप्राप्तिकरं घोरं तपः कर्तुं न शक्यते॥ अनेकजन्मनामंते कृत्वा कृत्वा तपो मुहुः॥८५॥ अंते शिवप्रसादेन सा काशी दृश्यते जनैः॥ कथावानकलपो घोरं तादृशं शिवतुष्टिदं॥८६॥ क्रमानुषमिदं रूपेक काशीप्राप्तिसाधनं॥ मो त्वं मां कुरु राजेंद्र त्यज भ्रन्तमतःपरं॥८७॥ पालयस्व प्रजाः सर्वाः धर्मेणैव परंतप॥ इति तद्वचनं श्रुत्वा धैर्यवानमितप्रभुः॥८८॥ विप्रवित्सज्यभूयोपि तपस्तेपे दुरासदं॥ सत्तसयुगपर्यंतं स्वकपादेन संस्थितः॥८९॥ चकार दुःसहं घोरं तपो मनःप्रीतिसाधनं॥ ततश्च मत्प्रसादेन निरंताविघ्नराशयः॥९०॥ ततः काशीं ययौ राजा हृष्टांतःकरणे शुभे॥ तेन घोरं तपस्तप्तं पूर्वे पूर्वभवेष्वपि॥९१॥ बहुकालं प्रयत्नेन काशीप्राप्त्यर्थमादरात्॥ काश्यां विशेषतीर्थेषु स्नात्वा प्रत्यहमादरात्॥९२॥ नित्ययात्रादिकं कृत्वा न्ययसंन्निर्जितेंद्रियः॥ ततः स्वत्रैव निवसन् माघकृष्णचतुर्दशीं॥९३॥ संप्राप्य परमं लेभे संतोषं नृपतिस्तदा॥ ततः स नृपतिस्तस्मिन् शिवरात्रिदिने शुचिः॥९४॥ कृत्वा यात्रादिकं सर्वं उपोष्य नियतो व्रती॥ पूजोपकरणं सर्वं संपाद्य दृढमानसः॥९५॥ कृत्तिवासेश्वरं सम्यक् संपूज्य विधिपूर्वकं॥ कृष्णागोघ तदीपांश्च चकार समनोहरान्॥ तद्दीपप्रभया लोका दीपिनाः सर्व एव हि॥

स्तोत्रपाठैश्च नत्यैश्च पुराणश्रवणादिभिः ॥ ९७ ॥ चक्रे जागरणं राजा कृत्तिवासे शमर्चयन् ॥ ततस्तत्रै
व पूतात्मा शिवलिंगार्चने रतः ॥ ९८ ॥ पंचाग्निमध्यदेशस्थः चकारोग्रं तपो नृपः ॥ कालेन समतः सोपि ममां
के संनिवेशितः ॥ ९९ ॥ मयापि चाक्षशेदन्तो मुक्तिमापन्नृपो समः ॥ ईदृशं कृत्तिवासस्य क्षेत्रं सर्वार्थसाधकं ॥
१०० ॥ तत्रान्यदहं पूजनीयः कृत्तिवासेश्वरो जनैः ॥ तत्र संति लिंगानि कोटिशः कमलानने ॥ १ ॥ तान्यप्ये
तानीदृशानि सर्वमुक्तिकराणि च ॥ तीर्थमस्त्येकममलं ऋणमोचननामकं ॥ २ ॥ तत्तीर्थस्नानमात्रेण ऋ
णभ्यो मुच्यते जनः ॥ तत्र श्राद्धं विधानेन कर्तव्यं यत्नतः शुभे ॥ ३ ॥ तेन मुक्ता भवंत्येव पितृणां ऋणबंधना
त् ॥ पिशाचमोचनं नाम तीर्थमस्त्येकमुत्तमं ॥ ४ ॥ तत्र स्नात्वा पिशाचोपि मुच्यते सर्वपातकैः ॥ श्राद्धं च विधि
वत्तत्र कर्तव्यमतियत्नतः ॥ ५ ॥ पिशाचभूताः सर्वेपि मुच्यंते पितरस्ततः ॥ तत्रापि संति लिंगानि भक्ताभीष्ट
प्रदानि च ॥ ६ ॥ पूजनीयानि यत्नेन काशीक्षेत्रनिवासिभिः ॥ तदग्रे यातनास्तंभो योजनार्बुदमुन्नतः ॥ ७ ॥
जाज्वल्यमानः सततं तिष्ठत्यनलसंनिभः ॥ काश्यां तिष्ठंति ये मर्त्याः पातकादपराङ्मुखाः ॥ ८ ॥ तानग्नि
ष्यं खलैर्वधा पाचयत्यत्र भैरवः ॥ नित्यां तर्गृहयात्रादि विमुखान् छिवनिंदकान् ॥ ९ ॥ दंदह्यमानास्तंभेस्मि
न् पाचयत्यत्र भैरवः ॥ अंतर्गृहे मलादीनि विसृजन्यो वसेन्नरः ॥ १० ॥ तमानीयात्र बध्वैव पाचयत्यत्र भैरवः ॥
जाज्वल्यमानान्यनिशं वन्हिकुंडानि संति च ॥ ११ ॥ तेषु पातयति क्रूरास्तानेवानीय भैरवः ॥ तप्ततीक्ष्णासिकुं
डानि घोराणि विविधानि च ॥ १२ ॥ तिष्ठंति तेषु तानेव पाचयिष्यति भैरवः ॥ मामनभ्यर्च्य यो भुंक्ते काश्यां स्थि
त्वापि मानवः ॥ १३ ॥ तमानीयात्र तीव्रेण पातयिष्यति भैरवः ॥ काश्यां कृतानि पापानि वर्धिष्यंति क्षणे क्षणे ॥
१४ ॥ तन्नाशो न भवत्येव विनैतादृशी यातनां ॥ विविधा यातनाः सर्वाः भैरवेण यदृच्छया ॥ १५ ॥ तासु तान् क्रो
धसंविष्टः पातयत्येव भैरवः ॥ द्वात्रिंशद्युगपर्यंतं एकैकाघफलं जनैः ॥ १६ ॥ काश्यामवश्यं भोक्तव्यं काश्यां तु

रूनपातकैः॥ भ्रमेणाप्येकदा त्यक्ता मूत्रमंत्र दिहे नरः॥१७॥ त्रिकोटियुगपर्यंतं अग्निकुंडे पतिष्यति॥ पुरीषोत्सर्जकस्यैतत्त्रिगुणं विधिचोदितं॥१८॥ इतोप्यधिकमेवात्र भैरवस्तु करिष्यति॥ प्रमादेन कदाचिच्चेद्देवं स्याद्यातनाऽशुभे॥ नोचेन्नित्यं विसर्जनतः मलादीनि न निष्कृतिः॥ घोराणि यातनास्थानान्यनेकानि वरानने ॥२०॥ तद्यातनास्तेभपार्श्वे तिष्ठंति कठिनानि हि॥ द्रष्टुं न शक्यते घोरं यातनास्थलमीदृशं॥२१॥ सा यातना कथं सह्या बहुदुःखप्रदायिनी॥ प्रज्वलद्यातनास्तंभं दूरे दृष्ट्वैव केचन॥२२॥ बाह्याः पलायनाशक्ताः हाहा हेति रुदंति ते॥ सहस्रबाहवः केचित्केचित्करशतान्विताः॥२३॥ केचित्लक्षकराः क्रूराः कालभैरवकिंकराः॥ हस्तायुतान्विताः केचित्केचित्प्रयुतबाहवः॥२४॥ केचित्कोटिकराः क्रूराः केचित्तन्नियुतबाहवाः॥ केचित्खर्वायुतकराः केचिद्दर्बुदबाहवः॥२५॥ केचिन्महाखर्वहस्ताः केचिच्चामितबाहवः॥ सर्वेपि पर्वताकाराः वीर्यमानमदोन्नताः॥२६॥ घनोन्नतोरुविपमतीक्ष्णदंष्ट्राश्च बाहवः॥ सन्नद्धाः सर्वदा भीमाः भ्रूरा भैरवकिंकराः॥ ईदृशोद्भुतदूतानां संख्या कर्तुं न शक्यते॥ यावंतो बाहवो यस्य नानाशस्त्रान्विताः स्तदा॥२८॥ तावद्भिर्बहवो दूता निघ्नंत्येकैकमुधनाः॥ तद्यातनास्थलं दृष्ट्वा ब्रह्मविष्णवादयः सुराः॥२९॥ रुदंतः कंपमानाश्च तिष्ठंति स्वस्वधर्मतः॥ कायं यायेन कृतं पापं तेनेयं घोरयातना॥३०॥ भो कृष्णानात्र संदेहो सत्यमेवोच्यते मया॥ अंतर्गृहे मलादीनि ये कुर्वंति नराधमाः॥ ३१॥ ते यातना मिमां क्रूरां प्राप्नुवंति न संशयः॥ ब्रह्महत्यादिकं कार्यं ये कुर्वंति नराधमाः॥ ते यातनामिमां क्रूरां प्राप्नुवंति न संशयः॥३३॥ शैवं शिवव्रतं कार्यं ये द्विषंति नराधमाः॥ ते यातना०॥ ३४॥ ये चैव विप्रस्याधिकारं कार्यं कुर्वंति दुर्जनाः॥ ते यातना०॥ ३५॥ ये शैवं मान्यमनघं नार्चयंति नराधमाः॥ ते यातना०॥ ३६॥ काशंयां वसंति ये दुष्टाः शैववित्तापहारकाः॥ ते यातना०॥ ३७॥ ये मामन्यसमं मत्वा कारयंति निष्ठीतिशंकरं॥ ते या०॥ ३८॥ शिवरात्रवसदा पूज्यो शैलिमां नार्चयंति ये॥ ते यातन

ना०॥ ३९॥ नशिवादधिकोदेवइतिमांनार्चयंतिये॥ तेयातना०॥४०॥ शिवएवसुराराध्यइतिमांनवदं
तिये॥ तेयातना०॥४१॥ शिवात्परतरंवस्तुनेतिमांनर्चयंतिये॥ तेयातना०॥४२॥ येमामजमनभ्यर्च्य
काश्यांतिष्ठंतिमानवाः॥ तेयातना०॥४३॥ त्यक्त्वातिष्ठंतियेकाश्यांभस्मरुद्राक्षधारणं॥ तेयात०॥४४॥
येविहायवसंत्यत्रशिवलिंगस्यपूजनं॥ तेयात०॥४५॥ येनित्यांतर्गृहयात्रांत्यक्त्वातिष्ठंतिमानवाः॥ तेया
तना०॥४६॥ येकाशीक्षेत्रमनघमन्यक्षेत्रसमंविदुः॥ तेयातना०॥४७॥ येरुद्रजपमन्यार्थंकुर्वंतिधनलोभ
तः॥ तेयातना०॥४८॥ शैवदीक्षांविहायास्यांकाश्यांतिष्ठंतियेजनाः॥ तेया०॥४९॥ रुद्राध्यायजपंत्य-
क्त्वाकाश्यांतिष्ठंतियेजनाः॥ तेया०॥५०॥ शैवपंचाक्षरजपंत्यक्त्वातिष्ठंतियेजनाः॥ तेयात०॥५१॥ येम
ल्लिंगार्चनंत्यक्त्वातिष्ठंतिशिवनिंदकाः॥ तेयातना०॥५२॥ कालभैरवमाराध्यमनाराध्यवसंतिये॥ तेया
त०॥५३॥ येपंचक्रोशयात्रांचत्यक्त्वातिष्ठंतिमानवाः॥ तेयात०॥५४॥ येकाश्यांशिवशास्त्रस्यनिंदांकुर्वं
तिदुर्जनाः॥ ते०॥५५॥ अन्यतुल्यतयायेतुशैवंज्ञानंतिदुर्जनाः॥ तेयातना०॥५६॥ शिवरात्रिव्रतंकाश्यां
येनकुर्वंतिदुर्जनाः॥ तेयात०॥५७॥ दुष्टप्रतिग्रहासक्तानित्यंकाश्यांवसंतिये॥ तेया०॥५८॥ येशूद्रप
तितव्रात्यवित्तयोषितविग्रहाः॥ तेयात०॥५९॥ यद्यत्पापकरंकर्मकुर्वंत्यत्रहियेजनाः॥ तेयातना०॥६०॥
इदंमत्वासदाकाश्यांस्वस्वधर्मेणसर्वदा॥ स्थातव्यंयत्नतःसर्वैर्यातनाभीरुभिर्जनैः॥६१॥ अंतर्गृहेहठंपा
पंयन्मलोत्सर्जनार्जितं॥ मूत्रोत्सर्गार्जितंचात्रननश्यतिचदुःखदं॥६२॥ द्वित्रैरंतर्गृहेपूर्वंमूत्राद्युत्सर्ज
नंकृतं॥ तेरिदानीमपिक्रूरायातनाभुज्यतेशुभे॥६३॥ शैवोप्यंतर्गृहेकुर्यान्मूत्राद्युत्सर्जनंयदि॥ भैर
वस्तमपिक्रूरःपालयत्यत्रमंडले॥६४॥ यस्त्वंतर्गृहमाराध्यंमूत्राद्यैर्दूषयिष्यति॥ सयातनामवाप्नोति
पुनरावृत्तिवर्जितां॥६५॥ इदंमत्वैवमुनयःनिष्ठंत्यंतर्गृहाद्बहिः॥ पंचक्रोशाद्बहिर्यांतिमूत्राद्युत्सर्जनाय

ने॥६६॥ प्राणिदुःखकरं कर्म न कार्यं सर्वथा जनैः॥ काश्यां स्थित्वा विशेषेण न कार्यं सत्यमुच्यते॥६७॥ अंतर्गेहाद्बहिः काश्यामंतर्गेहेपि वा जनैः॥ न कार्यं सर्वथा यत्नान्मूत्राद्युत्सर्जनं शुभे॥६८॥ अंतर्गेहाद्बहिः कुर्याद्यदि मूत्रविसर्जनं॥ पुरीषोत्सर्जनं वापि तत्प्रायश्चित्तमुच्यते॥६९॥ पंचगव्यं यथाशास्त्रं ग्राह्यं मुंडनपूर्वकं तेनांतर्गृहयात्रैका कर्तव्या विधिपूर्वकं॥७०॥ ततः पंचक्रोशयात्रा निराहारेण सादरं॥ कर्तव्या विधिवद्विप्राः भोजनीयाश्च यत्नतः॥७१॥ इदं मूत्रोत्सर्जनस्य प्रायश्चित्तमुदाहृतं॥ पुरीषोत्सर्जने कार्यमेतद्दशगुणं क्रमात्॥७२॥ एकमेव हि विज्ञेयमुभयत्रापि मुंडनं॥ ब्राह्मणाश्च यथाशक्ति भोजनीयाः प्रयत्नतः॥ त्यक्ते करामलं मर्त्यैः एकदा मूत्रमेव वा॥ एवं कार्यं प्रयत्नेन प्रायश्चित्तं वरानने॥७४॥ मलमूत्रादिकं काश्यां त्यक्तापि बहुधा जनैः॥ बहुधैव तथा कार्यं प्रायश्चित्तं यथाविधि॥७५॥ तादृशैर्यत्नतः कार्यं प्रायश्चित्तं यथोदितं॥ अन्यथा यातनां घोरां प्राप्नुवंति न संशयः॥७६॥ श्रीकालभैरवे प्रांते कुंडमस्त्येकमुत्तमं॥ कालाष्टमीदिने तत्र स्नानं कार्यं विधानतः॥७७॥ तत्कुंडनिकटे रम्यं लिंगं कालेश्वराभिधं॥ भैरवस्थापितं नित्यं सत्यं कं पापौघनाशनं॥७८॥ तत्पूजनं यथाशास्त्रं कार्यं बिल्वदलादिभिः॥ ततः पूजा यथाशास्त्रं कर्तव्या भैरवस्य च॥७९॥ प्रदक्षिणनमस्काराः कार्याश्चाष्टोत्तरं शतं॥ जागरेणोपवासेन प्रीणनीयो हि भैरवः॥८०॥ शुचिभिस्तैलपक्वान्नैः शैवा ब्राह्मणपुंगवाः॥ भोजनीयाः प्रयत्नेन भैरवप्रीतिकामुकैः॥८१॥ ॥ पार्वत्युवाच॥ ॥ का वा कालाष्टमी शंभो सा कालस्य प्रिया कथं॥ जागरेणोपवासेन कथं तुष्यति भैरवः॥८२॥ ॥श्रीशिव उवाच॥ ॥ कालाष्टमीति विख्याता कार्तिकस्यासिताष्टमी॥ तस्यामुपोषणं कार्यं तथा जागरणं निशि॥८३॥ पुरा रायंतरे कल्पे वशिष्ठाद्याः मुनीश्वराः॥ देवाश्चेंद्रादयः सर्वे काश्यां संपूज्य मां विभुं॥८४॥ नित्ययात्रादिकं कुर्वाना मध्याह्ने संस्थिते रवौ॥ कृत्तिवासेश्वरं प्रापुर्बिल्वपत्रादिसाधनाः॥

॥८५॥ कृत्तिवासेश्वरं सम्यक् पूजयित्वा ततः परं॥ ध्यायंतः शंकरं नित्यमुपविष्टाः स्थिरासनाः॥ ८६॥
तदानीमागतो ब्रह्मा कृत्तिवासेश्वरालयं॥ रिक्तपाणिरनभ्यर्च्य शिवं मां समुपस्थितः॥ ८७॥ तदानीं
विस्मिताः सर्वे वसिष्ठाद्या मुनीश्वराः॥ तमूचुः श्रांतमनसः स्मयाविष्टमुदङ्मुखं॥ ८८॥ ऋषय ऊ-
चुः॥ ॥ किं ब्रह्मन् देवदेवेशं शंकरं सांबमव्ययं॥ अभ्यर्च्यैतमनभ्यर्च्य रिक्तपाणिरुपस्थितः॥ बिल्ववृक्षाः
करप्राप्याः संति काश्यां तु भूरिशः॥ तथापि बिल्वपत्राणि नानीतानि कथं त्वया॥ ९०॥ बिल्वकंटकभीत्या
किं पत्रं तन्नार्जितं त्वया॥ किमेवं रक्षितेनाद्य शरीरेण तवाधुना॥ ९१॥ बिल्वकंटकसंविक्षकरा बिल्वार्जन
प्रियाः॥ भुक्त्वा भोगांश्च विपुलान् शिवलोकं प्रयांति हि॥ ९२॥ धर्मसिद्धिर्यतो नाक्लेशाद्धर्मस्तत्क्लेशसाधि
तः॥ क्लेशाधिक्यात्फलाधिक्यं इति न ज्ञायते त्वया॥ ९३॥ हंसतीर्थमिदं पुण्यं कृत्तिवासेशसंनिधौ॥ ततो ज
लं वा नानीतं किमिदं वार्थं त्वयाधुना॥ ९४॥ अपामार्गस्य पत्राणि सुलभानि बहूनि च॥ संत्यत्र तानि वा ब्रह्म
न् नानीतानि कथं त्वया॥ ९५॥ रिक्तहस्तो महादेवं यो याति सुमहानपि॥ विनश्यति तनुं संदेहः नरकं चाधिग
च्छति॥ ९६॥ पूज्यस्य देवदेवस्य शंकरस्य महात्मनः॥ न करोति च यः पूजां स याति नरकं ध्रुवं॥ ९७॥ प्रमा
देनाभिमानेन तथा गर्वेण वा क्षमात्॥ प्राप्य शंभुं रिक्तहस्तो नष्टधर्मो भविष्यति॥ ९८॥ नष्टधर्मस्ततो याति
यावदाचंद्रतारकं॥ नरकं तस्य नरकान्निर्गमो नास्ति सर्वथा॥ ९९॥ प्रणामाच्च त्वया ब्रह्मन् न कृताः पापनाश
काः॥ महादेवस्य तैरीशः प्रीणाति भगवान् शिवः॥ १००॥ शुभं न दृश्यते ब्रह्मन् तवाद्यात्र न संशयः॥ अनर्च
नान्महेशस्य त्वशुभं भवति ध्रुवं॥ १॥ इत्युक्त्वा संस्थितान् देवि ब्रह्मा तान् ऋषिसत्तमान्॥ उवाचातीव संक्रु
द्धः पापाश्रय इवानिशं॥ २॥ ॥ ब्रह्मोवाच॥ ॥ अहमेवाखिलैः पूज्यः पूज्यो मम न सर्वथा॥ किं शूलीम
म संपूज्यः पूज्योऽहं शूलिनो ध्रुवं॥ ३॥ वेदाः सृष्टा मया सर्वे सृष्टा लोका मया पुरा॥ मदन्यः सर्जको लोके नास्ति पूज्यो

पिसर्वथा ॥४॥ भ्रांतापूर्वं नरं देहः शूलीपूजापरायणाः ॥ पूजा मम वै विहिताः वेदास्तत्र तु साक्षिणः ॥५॥
प्रजपन्नेवमेवान्यद्दपि भ्रांतस्तथाविधिः ॥ तस्मै ततो महाविष्णुरर्घ्यं पाणिरूपागतः ॥६॥ ततोभिषिच्य मां
विष्णुः क्षीरधाराद्दिभिरादरात् ॥ चकार पूजां विविधां बिल्वपत्रादिभिर्मुदा ॥७॥ धूपदीपांश्च नैवेद्यं क्षी
राज्यदधिमिश्रितं ॥ दत्वा पुनर्ददौ दीपान् पुनः पुष्पांजलिं ददौ ॥८॥ प्रदक्षिणनमस्कारं चकार तदनंत
रं ॥ ततः पंचाक्षरं शैवं जजाप स जनार्दनः ॥९॥ ततस्तं ध्याननिरतं विधिर्दृष्ट्वा हरिं तदा ॥ उवाच वचनं
भ्रांतः क्रोधमुत्पादयन् हरेः ॥१०॥ असंपूज्यैव पूजार्हं मामयं विष्णुरक्षतः ॥ शूलीं पूजां करोत्यत्र भ्रां
तोयं नात्र संशयः ॥११॥ इत्युक्तैरितमाकर्ण्य वचनं तद्विधेर्हरिः ॥ पूजां समाप्य तदनु जगाद वचनं तदा
॥१२॥ ॥ विष्णुरुवाच ॥ ॥ हाहा दुर्भगदुर्बुद्धे किमेवं वक्तुमर्हसि ॥ कथं भ्रांतोद्य जातोसि शुभं नाद्यतु दृ
श्यते ॥१३॥ सर्ववेदेषु नमः सांबः शंकरो भक्तवत्सलः ॥ सर्वेषामपि संपूज्यः तस्य पूज्यो न दृश्यते ॥१४॥
तस्यैव पूजा विहिता सर्ववेदेषु सर्वथा ॥ तत्पूजयैव संप्राप्यो मोक्षो मोक्षप्रदः शिवः ॥ शिवपूजा मया पूर्वं
बहुधैव कृता मुहुः ॥ अहं शिवप्रसादेन पालयाम्यखिलं जगत् ॥१६॥ इत्युक्तवंतं तं विष्णुं भ्रांतोसी
त्तिजगाद सः ॥ मत्तोन्यो न हि संपूज्यः पूज्योहं नात्र संशयः ॥१७॥ भ्रांताः सर्वे कथं जाताः पूज्यं मां सर्व
साधनैः ॥ न पूजयंति दुर्वृत्ताः मामित्येवं वदन् स्थितः ॥१८॥ तदा क्लेशान्वितो विष्णुः शंकरं लोकशंक
रं ॥ तुष्टाव विविधैः स्तोत्रैरुवाचेदं वचस्तदा ॥ १९॥ शंभो प्रसीद देवेश क्लेशान्दूरीकुरुष्व मे ॥ अथैवं संह
रस्वैनं अधर्मस्य प्रवर्तकं ॥२०॥ अधर्मवर्धनात् सर्वेपि यास्यंति नरकं ध्रुवं ॥ कृपालुरसि देवेश विधिमेनं प्रणा
शय ॥२१॥ अथैवायं दुराचारः स्थापनीयो न सर्वथा ॥ अथैव शिक्षा कर्तव्या देवेश धात्रिपुरांतक ॥२२॥ नो
चेदधर्मवृद्धिस्तु भविष्यति न संशयः ॥ अधर्मवृध्या देवानां दुःखवृद्धिर्भविष्यति ॥२३॥ इत्युक्त्वा प्रण

नोविष्णुः सऋषिः ससुतः सदा॥ प्रसीदेश प्रसीदेश प्रसीदेति वदन्मुहुः॥२४॥ तदोग्ररूपादनघात्म
नः श्रीकालभैरवः॥ आविरासीत्तदा लोकान्भीषयन्नखिलानपि॥२५॥ आप्यायंस्त्र पातालाननंतचरणैः
स्वर्यं॥ भूर्भुवः सुवरादींश्च शिरोभिर्व्याप्य संस्थितः॥२६॥ दिशो दश व्याप्य हस्तैरनेकैर्विरताननः॥ अनं
तसूर्यप्रतिमः कालानलसमप्रभः॥२७॥ नानावास्त्रावृतकरो नानागंधानुलेपनः॥ नानामाल्यधरलो
नानारत्नाभरणसंवृतः॥२८॥ अनंतरोमकूपेषु बहून्त्रग्निकणान्वमन्॥ विश्वासपवनैरग्निं विस्रजन्रक्त
लोचनः॥२९॥ आखंडमलयाग्नीनां समूह इव संस्थितः॥ दृष्ट्वा तं विस्मिताः सर्वे देवाः सऋषिपुंगवाः॥
३०॥ चचालावनिरुद्विग्ना चेलुश्च कुलपर्वताः॥ शेषश्चकंपे सकलैः फणिभिश्च समावृतः॥३१॥ तन्नि
श्वासमहावायुरुत्पातपवनोभवत्॥ तत्कराघातमात्रेण पेतुरुर्व्यां च तारकाः॥ पपात मूर्छितो विष्णुः
तं दृष्ट्वा भीमविक्रमं॥ पेतुर्मुनिवराः सर्वे देवाश्चेंद्रपुरोगमाः॥३३॥ क्षुब्धाः समुद्राः सर्वेपि क्षीराब्धिप्रमुखा
स्तदा॥ उद्वेलाश्च बभूवुस्ते महाकल्लोलसंहताः॥३४॥ ततः स भैरवो लोकान्भीषयन्नखिलानपि॥ प्र
णम्य मामुवाचेदं वचनं विनयान्वितः॥३५॥ ॥भैरव उवाच॥ ॥शंभो किं करवाण्यद्य कार्ये ते किमुपा
स्थितं॥ शोषणीयाः समुद्राः किं क्षणेनैवाद्यलीलया॥३६॥ किं वा कुलाचलाः सर्वे पेषणीयास्तदाज्ञया॥
भस्मीभूताश्च कर्तव्या देवाः सर्वे किमीश्वर॥३७॥ किं भस्मतामुपैत्वीश ससशैलवनकाननाः॥ पृथिवी स
नदी सर्वा मामाज्ञापय शंकर॥३८॥ माविलंबं कुरुष्वेश किंविलंबेन शंकर॥ त्वत्प्रसादेन सर्वेषां नाशक
श्च भवाम्यहं॥३९॥ मयोग्रतररूपेण तूष्णीं स्थातुं न शक्यते॥ देवोत्तम महादेव ह्याज्ञापय मां विभो॥४०॥
एवमुक्तो भैरवेण प्रणतश्च मुहुर्मुहुः॥ तदा ब्रह्मशिरश्छेदं कुरुष्वेत्युक्तवानहं॥ ततो विधिं भैरवस्तं दृष्ट्वा
प्रस्फुरिताधरः॥ नखाग्रेणैव चिच्छेद शिरांसि सपपात च॥४२॥ ततस्तस्य विधेः छिन्नं प्रथमं तु शिरस्तदा॥

जगामनागनिलयंप्रलंपंसत्वरंशिवे॥४३॥ तदातस्यशिरोदृष्ट्वाब्रह्मणःफणिराट्तदा॥ विस्मितोभक्तिमे
नस्यशिरश्छेदस्यकारणं॥४४॥ इदंब्रह्मशिरोनूनंमयानुपरिचीयते॥ ब्रह्मणोनशिवादन्यःशास्तादेवेषु
विद्यते॥४५॥ प्रायशोदेवदेवस्यमहादेवस्यपूजनं॥ नकृतंब्रह्मणातस्माच्छिवेननिहतोविधिः॥४६॥ प्राय
शोब्रह्मणाशंभोःधिक्कारोवाकृतोध्रुवं॥ नंदिकेशस्यशान्यस्यशिवभक्तस्यवाध्रुवं॥४७॥ शिवंवाशिवभक्तंवा
नंदिकेशंशिवप्रियं॥ योधिक्करोतितस्यैवंगतिर्भवतिसर्वथा॥४८॥ अन्यथाब्रह्मणोकांडेशिरश्छेदःकथंभ
वेत्॥ नायंप्रलयकालस्थब्रह्मविष्णवेशनाशकः॥४९॥ समयःप्रलयस्यास्तुमास्तुवायंतथाप्यहं॥ काशींप्रति
गमिष्यामियत्रप्रलयभीर्नमे॥५०॥ महाप्रलयकालेपिकाशीस्थोनैवनश्यति॥ ततःकाशीमहंयास्येयत्रन
प्रलयोद्भवः॥५१॥ इधाभवंतुब्रह्माद्याःलोकाद्द्धाभवंतुच॥ यास्येहंसर्वथानित्यंकाशींमाहेश्वरींपुरीं॥
५२॥ इत्युक्त्वाफणिराट्शीघ्रंकाशींप्रतिसमाययौ॥ पाहिपाहिमहादेवप्रलयादितिसंवदन्॥ संप्राप्यका
शींपूतात्माप्रहृष्टहृदयःफणिः॥ अमंन्यततदात्मानंकृतार्थंभाग्यसंश्रयः॥५४॥ दृष्ट्वाकाशींपुरींशैवीं
शैवमोक्षप्रदायिनीं॥ साक्षाच्छिवस्वरूपेयंदेवानामपिदुर्लभा॥५५॥ कृपामपिमहेशस्यसंपूर्णातिष्ठ
तिध्रुवं॥ यतोतिदुर्लभाकाशीसुलभाद्यममाभवत्॥५६॥ अतःपरंभयंनास्तिमृत्योरपिममध्रुवं॥ यतः
प्राप्तामयाकाशीयांमृत्युःनावपश्यति॥५७॥ ततःसरत्नपुष्पाद्यैर्विश्वेशंमासनातने॥ संपूज्यनित्ययात्रा
दिसर्वकर्मचकारसः॥५८॥ आदिभैरवमभ्यर्च्यधूपदीपादिभिस्ततः॥ कृत्तिवासेश्वरंद्रष्टुंपुष्पपाणिरु
पाययौ॥५९॥ श्रीकेलभैरवंदृष्ट्वाभीमरूपंभयानकं॥ चकंपेमूर्छितःशेषःपपातपृथिवीतले॥६०॥ मया
चोत्थापितोविष्णुःततःपूर्वंसमुत्थितः॥ इंद्रादयःसप्तऋषयोमयैवोत्थापिताःशिवे॥६१॥ विष्णुरिंद्रःफणि
पतिःदेवाश्चान्येमुनीश्वराः॥ ददृशुःछिन्नशिरसंविधिंतंपतितंभुवि॥६२॥ ततोविष्णुस्तदेवेंद्रःसप्तऋषिः

नासीन्मम श्रीकालभैरव॥ दुरात्मायं शिवद्रोही हि निहतो द्य यतस्त्वया॥ ८३॥ यदा मम महेशेन विष्णुस्त्वं
दत्तमादरात्॥ तदापि भैरवः श्रीमान् संतोषो नेदृशोभवत्॥ ८४॥ अशेषेर्निहते दुष्टे धर्मोपि स्थिरतां ग
तः॥ अन्यथा धर्मलेशस्याप्यवस्थानं तु दुर्लभं॥ ८५॥ परंतु भैरवे श्रीमन्निच्छास्यपहितकारिणी॥ जाता भर
णमात्रेण मुक्तिरत्र भविष्यति॥ ८६॥ ततोस्य मरणं येन न भविष्यति भैरव॥ तथा शिरांसि सर्वाणि सुयोज
यामि त्वदाज्ञया॥ ८७॥ एकं गगनं शिरोस्यैव पातालं प्रति सत्वरं॥ दुःखमेव मशेषाणां भाविन्या स्याप
नायतत्॥ ८८॥ तेनेतानधिरसाग्रं स्याद्दुःखितस्त्विच्छतु प्रभो॥ मरणे त्वस्य दुःखानि नेदृशानीति मन्महे॥
८९॥ स्मरन्स्वकृतकर्माणि दुःखहेतून्ययं विधिः॥ तिष्ठत्वाकल्पमत्यंतं दुःखितः प्रलपन्सदा॥ ९०॥ अ
पराधिनमालोक्य त्वपाश्वक्रूरशासनाः॥ कुर्वंति पादहस्तान्यनरलूनं दुरासदा॥ ९१॥ एनमालोक्य शि
रसाहीनमन्ये नराः सुराः॥ शिवद्रोहं दुःखहेतुं न करिष्यंति सर्वथा॥ ९२॥ ब्रह्मणोपीदृशं दुःखं शिवद्रोह
रतात्मनः॥ किमुतास्माकमित्यन्ये भीताः स्थास्यंति भैरव॥ ९३॥ शिक्षेयं महती नूनं ब्रह्मणेमितविक्रम॥
शिक्षैव मेयकर्तव्या शिवद्रोहरतात्मनां॥ ९४॥ अशेषा नरके घोरे पातनीयाः प्रयत्नतः॥ तथा तेषां दुःख
वृद्धिः स्तोयवधिस्तथा मम॥ ९५॥ प्राणैः संयोजयाद्यैनं सत्वरं दुःखितो स्त्वयं॥ दुःखं प्राणवियोगस्य क
थं भवति भैरव॥ ९६॥ किंचास्य लक्षण रूपस्य वधार्हैं रूपमीदृशं॥ किमर्थं धृतमीशानकल्पस्य पक
रंपरं॥ ९७॥ महाकल्पस्य नाशेपि न धृतं रूपमीदृशं॥ प्रायशो भैरव श्रीमन प्रलयांतकरं प्रभो॥ ९८॥
कुटिलेनाक्षिपातेन सर्वान् लोकानपि क्षणात्॥ भस्मीकर्तुं समर्थोसि भैरवानात्र संशयः॥ ९९॥ प्रसंगो
नापि देवेश लवरूपस नालनं॥ द्रष्टमद्य कृतार्थोस्मि केतद्रूपस्य दर्शनं॥ १००॥ आद्यंतदृष्टमेतन्नो रूपं
भैरव सर्वथा॥ इदं किंचिदपि द्रष्टुं न शक्यं सत्यमुच्यते॥ १॥ इत्युक्त्वा सत्कृषिर्विष्णुः भैरवं भीमशासनं॥

सफणिस्तया॥ स्तोत्रैरनेकैः स्तुष्टाव भीमं श्रीकालभैरवं॥६३॥ ॥देव्यऊचुः॥ ॥नमस्तेका
लनाथाय नमस्ते कालरूपिणे॥ नमो भीमाय चोग्राय नमस्ते शूलपाणिने॥६४॥ नमस्ते कालकंठाय
नमस्ते कालभक्षक॥ नमो दिगंबरानंत नम परमपूरुष॥६५॥ नमो विश्वात्मक श्रीमन नमो विश्वैकजी
वनः॥ नमस्तेस्तु सहस्राक्ष सहस्रकरलेनमः॥६६॥ सहस्रचरणध्येय नमस्ते भैरवप्रभो॥ नमस्ते रुद्र रुद्रा
त्मन नमस्ते रुद्रसंभवः॥६७॥ नमस्ते शांभवानंद नमस्ते भूतभावनः॥ नमस्ते सर्वलोकेश सर्वधारामरा
र्चित॥६८॥ नमस्तेदिवस्वरूपाय नमस्ते भूस्वरूपिणे॥ नमस्ते सूर्यरूपाय चंद्ररूपाय ते नमः॥६९॥ न
मस्ते ग्रहरूपाय रूपातीताय ते नमः॥ नमः सकलकल्याणभाजनाया मतात्मने॥७०॥ नमः परमवीराय
नमः परशुधारिणे॥ नमो डमरुहस्ताय नमः खट्वांगधारिणे॥७१॥ नमोनंतगुणाधार नमोनंतस्वरूपिणे॥ न
मो विभूतिकवच व्योमकेशान्नमो नमः॥७२॥ नमः त्रिशूलहस्ताय नमस्ते मुंडमालिने॥ नमः प्रेतासनासी
नजपायर्णनमोस्तुते॥ नमो ब्रह्मण्यरूपाय विधिनाशारूने नमः॥ अशेषशैलवज्रेश शिवद्रोहिविनाश
क॥७४॥ शिवभक्तप्रिय श्रीमान नमः श्रीकालभैरव॥ शरण्य मूर्ते सर्वात्मन नमस्ते भक्तवत्सल॥७५॥ त्रि
वनेत्रानल श्रीमन नमस्ते शिवपूजक॥ नमो रक्तांबर श्रीमन नमस्ते रक्तचंदन॥७६॥ नमस्ते रक्तकेशाय न
मस्ते रक्तबाहवे॥ नमस्ते रक्तफालाय नमो रक्तनखायने॥७७॥ निर्विकार निरीहेश निरंजन निराश्रय॥
निरुपद्रव निर्द्वंद्व निराम यनिरंजन॥७८॥ व्यालोपवीतिनित्युग्रात्मन महाप्रलयकरण॥ अनेकमोमस
र्पाग्नि गणाकार नमोस्तुते॥७९॥ दृष्ट्वातवेदमत्युग्रं रूपं भीतादिवौकसः॥ भीतो स्म्यहं रूपासिंधो भीला
श्चऋषिपुंगवाः॥८०॥ द्रष्टुं न शक्यते घोरं तवेदं रूपमीदृशं॥ सौम्यरूपं वह स्वेश प्रसीद करुणाकर॥८१॥
दुष्टस्यकंमता शिक्षा शिवद्रोहरतस्य तु॥ शिक्षयमेव सर्वेषां अशेषानां दुरात्मनां॥८२॥ उत्साहोद्यमहा

मुहुर्मुहुः प्रणम्यास्य पादमूले पपात सः ॥ २ ॥ सौम्यरूपधरः श्रीमान् ततः श्रीकालभैरव ॥ उत्था
प्य विष्णुं वचनैर्जगादेनं यथास्त्विति ॥ ३ ॥ ततः परं भैरवस्य भीमरूपस्य केशवः ॥ अङ्गं मूर्ध्नि समादाय
हृष्टचित्तोऽभवच्छिवे ॥ ४ ॥ ततो विधिकबन्धेन तच्छिरोऽस्य वनीतलात् ॥ गृहीत्वायोजयामास यथास्थानं
यथाक्रमं ॥ ५ ॥ ततः स भैरवस्यैव प्रसादात्प्राणवानभूत् ॥ न तस्य दुःखं संप्राप गतोऽन्यत्र सलज्जया ॥
ततो ववुः सुखा वाताः पुष्पवृष्टिर्बभूव च ॥ प्रसन्नाश्च दिशः सर्वाः बभूवुर्धूसरा पुरा ॥ ७ ॥ सिन्धवोऽपि
यथास्थानं तस्थुः शैलाश्च पार्वति ॥ पृथिवी च जहौ कंपं शेषः स्थानं समाययौ ॥ ८ ॥ तस्मिन्नंतरे दे
वाः सर्वे ह्यस्तंगते शिवे ॥ ततः संध्यादिकं कृत्वा शिवपूजापरा बभुः ॥ ९ ॥ ततः काशीपालनार्थं भैरवः
स्थापितो मया ॥ कृत्तिवासेश्वरस्यैव दक्षिणां दिशि सादरं ॥ १० ॥ ततः सायं विष्णुमुख्याः कृत्वा पूजां म
मप्रिये ॥ भैरवाभ्यर्चनार्थाय जग्मुर्भैरवसंनिधौ ॥ ११ ॥ ततस्ते भैरवं देवमुपचारैश्च षोडशैः ॥ संपूज्या
र्घ्यप्रदानानि चक्रुर्भक्तिसमन्विताः ॥ १२ ॥ उपोषणस्यांगभूतमर्घ्यदानं द्रुहस्मृतं ॥ तथा जागरणं रा
त्रौ पूजयामचतुष्टये ॥ १३ ॥ भैरवो योगरूपाय यस्त्वर्घ्यं न प्रयच्छति ॥ तस्योपवासजनितं न फलं जा
गरार्जितं ॥ १४ ॥ पात्रे पुष्पाणि सजलान्यादायार्घ्यमनुत्तमं ॥ अर्पतो ददुरर्घ्यानि भैरवायामितात्मने ॥ १५ ॥
अर्घ्यमंत्रः ॥ भैरवार्घ्यं गृहाणेश भीमरूपा[illegible]व्ययानघ ॥ अनेनार्घ्यप्रदानेन तुष्टो भव शिवप्रिय ॥ १६ ॥ स
हस्राक्षिशिरोबाहो सहस्रचरणाजर ॥ गृहाणार्घ्यं भैरवे[illegible]दं सपुष्पं परमेश्वर ॥ १७ ॥ पुष्पांजलिं गृहाणे
श वरदो भव भैरव ॥ पुनरर्घ्यं गृहाणेदं सपुष्पं यातनापह ॥ १८ ॥ इति कृत्वार्घ्यदानानि निशि विष्णुपु
रोगमाः ॥ चक्रुर्जागरणं रूपं शंसंतो भैरवस्य ते ॥ १९ ॥ भैरवस्यानुकर्तव्या पूजायामचतुष्टये ॥ कार्यं शिव
कथालापैः निशि जागरणं सदा ॥ २० ॥ जागरं चोपवासं च कृत्वा कालाष्टमीदिने ॥ प्रयतः पापनिर्मुक्तः शैवो भ

वतिशोभने॥२१॥ योदेविभेरवाष्टम्यां मुपवासंप्रयत्नतः॥ नकरिष्यतिमोहेनसयात्येवहियातनां॥२२॥ तस्मात्पूजाभेरवस्यकर्तव्यासततंबुधैः॥ यातनाभीरुभिर्मर्त्यैर्मुनिभिश्चामरैरपि॥२३॥ यथाहमन्वहं पूज्यास्तथाप्रत्यहमादरात्॥ पूजनीयः प्रयत्नेनभैरवोभीमशासनः॥२४॥ पुराविष्णुरनेनेवभैरवेणहिभक्षितः॥ निष्कासितश्चतेनैवपुनस्संस्थापितोहरिः॥ पुराक्षीराब्धिमध्यस्थोविष्णुर्लक्ष्मीसमन्वितः॥सायंकालेपिसंश्लिष्यलक्ष्मींनस्थोभहर्षितः॥२६॥ तदाविलोक्यतंलक्ष्मीःविष्णुंप्रोवाचसादरं॥ ॥लक्ष्म्युवाच॥ ॥रविरस्तंगतोमुंचशय्यांमांचरतिंमयि॥ सायंकालेशयानस्यलक्ष्मीर्नैवाभविष्यति॥विशेषतस्त्रीरतस्यत्यक्तसंध्यादिकर्मणः॥२८॥ सायंकालेमहादेवः पूजनीयोखिलैरपि॥ कुरुभस्माभ्युक्षणादिसर्वपापविनाशकं॥२९॥ बिल्वपत्रादिसंपाद्ययजदेवोत्तमंशिवं॥ प्रणामानिकुरुप्रीत्याशरणंव्रजशंकरं॥३०॥ सर्वेष्वपिप्रदोषेषुपूजनीयःसदाशिवः॥ इदानींसप्तमीयोगोविशेषणात्रवर्तते॥३१॥ यःसप्तमीप्रदोषेषुशंकरंपूजयिष्यति॥ नतस्यनरकोवासोदारिद्र्यंचनसर्वथा॥ ॥३२॥ प्रदोषकालेभगवान्महादेवःसुराधिपः॥ करोतितांडवंदेविमुपवेशपशुभासने॥३३॥ तांडवाभिरतंदेवंगटहनक्षत्रमौलिने॥ हृदिध्यात्वामहादेवंपूजयस्वसुरोत्तमं॥३४॥ अभिषिच्यमहादेवंलिंगरूपिणमव्ययं॥क्षीरेणानेनशुभ्रेश्चजलैर्नीहारसन्निभैः॥३५॥ गृहीत्वाचंदनंरम्यंशिवलिंगंसमर्चय॥ गन्धैर्नैवेद्यैर्बिल्वपत्रैरभ्यर्चयमहेश्वरं॥ धूपदीपादिकंदत्वानैवेद्यंचसमर्पय॥प्रणामानिकुरुप्रीत्याशोचंपंचाक्षरंजप॥३७॥ कुरुनित्यंमहादेवप्रीत्यर्थंकरताडवैः॥प्रीणयस्वमहादेवंशरणंयाहिशंकरं॥३८॥ शिवपूजायेमालस्यंयःकरिष्यतिमूढधीः॥ सविहायक्षीरमुष्णंमूत्रंपिबतिसर्वथा॥३९॥ यदित्वस्यसिसायान्हेमहादेवस्यपूजनं॥ तदात्वयामपाप्यघदुःखंप्राप्यंनसंशयः॥४०॥ पत्रैर्जलैर्वामैर्वैर्वापूजि

परमेश्वरः ॥ तुष्टो भवति गौरीशस्तमेवार्चय शंकरं ॥ ४१ ॥ धत्तूरकुसुमेनापि पूजितः शंकरः स्वयं ॥ ददाति
परमं स्थानं योगिनामपि दुर्लभं ॥ ४२ ॥ तस्मादुत्थाय यत्नेन पूजयस्व सदाशिवं ॥ संपूज्य सायं विश्वेशं नि
ष्पापो भव सत्वरं ॥ ४३ ॥ सायंकाले महादेवं यो नार्चयति शंकरं ॥ स एव सर्वपापानां आश्रयो भवति ध्रुवं ॥ ४४ ॥
सायं त्यक्त्वा शंकरस्य देवदेवस्य पूजनं ॥ यस्तिष्ठत्यापदां प्राप्तो स तिष्ठति न संशयः ॥ ४५ ॥ ऐश्वर्यं तु मया
प्राप्तं शंकरस्यैव पूजया ॥ तादृशो न कथं त्याज्यं त्वया शंकरपूजनं ॥ ४६ ॥ यस्मादैश्वर्यकामेन मोक्षकामेन
चानघ ॥ कर्तव्यमतियत्नेन शंकरस्यैव पूजनं ॥ ४७ ॥ महापातकयुक्तो वा युक्तो वा सर्वपातकैः ॥ मुच्यते पातकैः
सर्वैः प्रदोषे शिवपूजया ॥ ४८ ॥ दिनमेवमयोनक्तं नेना दिनं वञ्चिमसर्वथा ॥ अविलंबेन यत्नेन पूजयस्व महे
श्वरः ॥ ४९ ॥ इत्युक्तां संस्थितां लक्ष्मीं भ्रांतचित्तो हरिस्तदा ॥ उवाच वचनं लक्ष्मीं कंपयन् कुपिताननः
॥ ५० ॥ को वा ममास्ति संपूज्यः पूज्योऽहं सर्वदेहिभिः ॥ क शंकरः क्व वा तस्य पूजने मुक्तिहेतुता ॥ ५१ ॥ इ
त्युक्तं तद्वचः श्रुत्वा लक्ष्मी विष्णुमुवाच सा ॥ ॥ लक्ष्मीरुवाच ॥ ॥ हा हा विष्णो भ्रांतचित्तः कथं जा
सि तद्वद ॥ तवाशुभस्य कालोऽयं सत्वरं समुपस्थितः ॥ नो चेन्महादेवनिंदा कथं कार्या त्वया हरे ॥ ५३ ॥ दृश्यं
ते दुष्टचिन्हानि शुभचिन्हं न किंचन ॥ भ्रष्टं च मम धम्मिल्लमुत्तरीयमधोगतं ॥ ५४ ॥ त्रुटिता कंठमाला च भूय
या पि समुत्थिता ॥ क्षणार्धेनैव संप्राप्यमशुभं नात्र संशयः ॥ ५५ ॥ महादेवस्य यो निंदां करिष्यति सुरो
पि वा ॥ स चांडाल इति ज्ञेयो भवत्यग्रेऽपि सोंत्यजः ॥ ५६ ॥ एवमुक्त्वा स्थिता लक्ष्मीस्तदानीमेव भैरवः ॥ क्षीरा
ब्धिप्रमुखानब्धीन् पपौ तत्रापि लीलया ॥ पंचाशद्युगपर्यंतं समुद्रास्तस्य तूदरे ॥ स्थिता विष्णुस्थितो
लक्ष्मीसहितः संकटं वहन् ॥ ५८ ॥ ततश्चिक्षेप सकलानब्धीन् अमितविक्रमः ॥ तदा दुःखमभूद्विष्णोर्नकाणामपि
शोभने ॥ ५९ ॥ ततः पपात गहने विष्णुर्जलविवर्जिते ॥ पपात तान्यत्र लक्ष्मीस्सा दुःखिता भयविह्वला ॥ ६० ॥

पतिना शोकसंविग्नास्मरंती शंकरं तदा ॥ त्राहि शंभो महादेव पाहि पाहीति चावदत् ॥ ६१ ॥ एतस्मिन्नंतरे
काले विष्णुर्लक्ष्मीमुपाययौ ॥ विष्णुं दुःखितमालोक्य लक्ष्मीर्दुःखपराप्यभूत् ॥ ६२ ॥ लक्ष्मीमुवाच विष्णु
स्तां मया तव वचः पुरा ॥ न श्रुतं तत्फलं जातं आशु दुःखमुपागतं ॥ ६३ ॥ शंकरस्यार्चनं त्यक्त्वा नायां स्थितमतो
मया ॥ प्राप्तं तु दुःसहं दुःखं मत्संबंधात्त्वयापि तत् ॥ ६४ ॥ आपदामाश्रयो भ्रांत्या श्रांतोहमपि दुःखभाक् ॥ म
याश्रांतेन न कृतं सायं शंकरपूजनं ॥ ६५ ॥ विध्युक्तकर्मनिरतैर्दुःखं न प्राप्यते बुधैः ॥ तदन्यैः सर्वथा प्राप्यं
दुःखं नूनं क्षणे क्षणे ॥ ६६ ॥ सायं शिवार्चनं कार्यं अप्रमादेन पार्वती ॥ तस्मात्त्वप्रमदो भूयादिति येदपि
वर्तते ॥ ६७ ॥ अतः परं पूजयामि शंकरं लोकशंकरं ॥ अतिपत्नेन कमले गतो मोहो ममाधुना ॥ ६८ ॥ आ
याहि यामो निलयं वैष्णवं दुःखनाशकं ॥ यच्छंकरार्चनात्सख्यं परं सर्वार्थदायकं ॥ ६९ ॥ ॥ सदाशिव उवा
च ॥ ॥ इत्युक्तं तद्वचः श्रुत्वा विष्णुर्लक्ष्मीमुवाच तं ॥ कं वैष्णवपदं विष्णोः किमद्याप्यस्ति तत्पदं ॥ ७० ॥ त
त्पदं विरिंचिना प्राप्तं दत्तं तन्नंदिना पुरा ॥ तस्मै तेन कथं देयं तत्पदं सर्वसौख्यदं ॥ ७१ ॥ अतः परं कथं नंदी म
सन्नस्ते भविष्यति ॥ तुष्टिस्तु नंदिकेशस्य भूयसा तपसापि न ॥ ७२ ॥ यद्यत्पदं तु देवानां धिकारेण महे
शितुः ॥ च्युतं तत्पदं सर्वं नंदिकेशेन गृह्यते ॥ ७३ ॥ शिवः कदाचित्तपसा प्रीतोल्पेन भवत्ययं ॥ नंदिस्तु न भवत्ये
व सहसा प्रीतमानसः ॥ ७४ ॥ शिवधिकारनिरतं नंदिकेशो बलान्वितः ॥ शास्त्रैः संताडयत्याशु दुःखाब्धौ
पातयत्यपि ॥ ७५ ॥ अनेकेषु विचित्रेषु बहुदुःखप्रदेष्वयं ॥ अशेषान्पातयत्येव तेषां दुःखप्रदो मुहुः
॥ ७६ ॥ येन केनापि वा विष्णो महादेवस्य शासनं ॥ न लंघनीयं सर्वेषां शास्ता यस्मान्महेश्वरः ॥ ७७ ॥ स
र्वेषामपि देवानां यतः शास्ता महेश्वरः ॥ ततस्तदाज्ञाकारित्वं देवानामुचितं हरे ॥ ७८ ॥ इंद्रः पुरा स्वर्ग
लोके स्थितः शच्या समन्वितः ॥ प्रदोषे नार्चयामास भ्रांतो देवोत्तमं शिवं ॥ ७९ ॥ तमुवाच शची देवि पूजय त्वं

पतिताशोकसंविग्नास्मरंती शंकरं तदा ॥ त्राहि शंभो महादेव पाहि पाहीति चावदत् ॥ ६१ ॥ एतस्मिन्नंतरे
काले विष्णुर्लक्ष्मीमुपाययौ ॥ विष्णुं दुःखितमालोक्य लक्ष्मीर्दुःखपरायभूत् ॥ ६२ ॥ लक्ष्मीमुवाच विष्णु
स्त्वां मया तव वचः पुरा ॥ न श्रुतं तत्फलं जातं आशु दुःखमुपागतं ॥ ६३ ॥ शंकरोप्यर्चनं त्यक्त्वा नायास्थितमतो
मया ॥ प्राप्तं तु दुःसहं दुःखं मत्संबंधात्त्वयापि तत् ॥ ६४ ॥ आपदामाश्रयो श्रांता श्रांतोहमपि दुःखभाक् ॥ म
याश्रांतेन न कृतं सायं शंकरपूजनं ॥ ६५ ॥ विधियुक्तकर्मनिरतैर्दुःखं न प्राप्यते बुधैः ॥ तदन्यैः सर्वथा प्राप्यं
दुःखं नूनं क्षणे क्षणे ॥ ६६ ॥ सायं शिवार्चनं कार्यं अप्रमादेन पावनैः ॥ तस्मान्न प्रमदो भूयादिति वेदेपि
वर्त्तते ॥ ६७ ॥ अतः परं पूजयामि शंकरं लोकशंकरं ॥ अतिपत्नेन कमलेगतो मोहो ममाधुना ॥ ६८ ॥ आ
याहि यामो निलयं वैष्णवं दुःखनाशकं ॥ यच्छंकरार्चनाल्लब्धं पदं सर्वार्थदायकं ॥ ६९ ॥ ॥ सदाशिव उवा
च ॥ ॥ इत्युक्तं तद्वचः श्रुत्वा विष्णुं लक्ष्मीमुवाच तं ॥ किं वैष्णवपदं विष्णोः किमद्याप्यस्ति तत्पदं ॥ ७० ॥ त
त्पदं रिटिनाम्ना प्राप्तं दत्तं लन्नंदिना पुरा ॥ तस्मै तेन कथं देयं तत्पदं सर्वसौख्यदं ॥ ७१ ॥ अतः परं कथं नंदीप्र
सन्नस्ते भविष्यति ॥ तुष्टिस्तु नंदिकेशस्य भूयसा तपसापि न ॥ ७२ ॥ यद्यत्पदं तु देवानां धिकारेण महे
शितुः ॥ च्युतं तंत्पदं सर्वं नंदिकेशेन गृह्यते ॥ ७३ ॥ शिवः कदाचित्तपसा प्रीतोल्पेन भवत्ययं ॥ नंदिस्तु न भवत्ये
व सहसा प्रीतमानसः ॥ ७४ ॥ शिवाधिकारनिरतं नंदिकेशो बलान्वितः ॥ शस्त्रैः संताडयत्याशु दुःखाब्धौ
पातयत्यपि ॥ ७५ ॥ अनेकेषु विचित्रेषु बहुदुःखप्रदेष्वयं ॥ अशैवान्पातयत्येव तेषां दुःखप्रदो मुहुः
॥ ७६ ॥ येन केनापि वा विष्णो महादेवस्य शासनं ॥ न लंघनीयं सर्वेषां शास्ता यस्मान्महेश्वरः ॥ ७७ ॥ स
र्वेषामपि देवानां यतः शास्ता महेश्वरः ॥ ततस्तदाज्ञाकारित्वं देवानामुचितं हरे ॥ ७८ ॥ इंद्रः पुरा स्वर्ग
लोके स्थितः शच्या समन्वितः ॥ प्रदोषे नार्चयामास भ्रांतो देवोत्तमं शिवं ॥ ७९ ॥ तमुवाच शची देवि पूजय स्व

त्तिशंकरं॥ तदावगणनातेनकृतातद्वचनस्यनु॥ ८०॥ स्वर्गलोकस्यनाथोहं पूज्योहमखिलैः सुरैः॥मम
पूज्यतमोलोकेकस्तिष्ठतिवदप्रिये॥ ८१॥ इत्युक्त्वाभोगनिरतः शचीमालिंग्यसादरं॥ तस्थाविंद्रः कल्पपुष्प
शय्यायांमदनातुरः॥ ८२॥ तदानींनंदिकेशस्यभृत्यः कश्चित्समागतः॥शिवावगणनावाक्यंश्रुत्वाचेंद्रमुखो
द्गतं॥ ८३॥ ततःसोप्यनिरुद्धः सन्शूलंजग्राहपाणिना॥ इंद्रंततः सशूलाग्रेप्रोथयामाससत्वरं॥ ८४॥
ततश्चभ्रामयामाससशूलाग्रेसंनिवेश्यतं॥ द्वात्रिंशद्युगपर्यंतंचक्रवद्गगनांतरे॥ ८५॥ ततः संपातयामा
ससतुद्रुद्धरपर्वते॥ पतित्वातत्रदेवेंद्रोतिष्ठत्तथापिदुःखितः॥ ८६॥ नंदिकेशस्यभृत्येनस्वर्गलोकसमावृतः॥
इंद्रोपिसतपश्चर्यापरोभूत्वाधितिष्ठति॥ ८७॥ शंकरस्यावगणनातत्स्वप्नेपिसर्वथा॥देवदेवाधिदेवस्य
नकर्तव्याजनार्दन॥ शिवंत्वनन्यसदृशंयेन्यदेवसमंविदुः॥नतेपतिव्रताजाताःजारजास्तेनसंशयः॥८९॥
अन्यदेवसमंमत्वाशिवंदेवोत्तमंप्रभुं॥ आचंद्रार्कमघोरेषुनरकेषुपतिष्यति॥ ९०॥ मद्यपः सचांडा
लः समहापातकाश्रयः॥मनुतेयोन्यसदृशंदेवेदेवोत्तमंशिवं॥ ९१॥ प्राप्तंशिवप्रसादेनविष्णुत्वंचत्वया
पुरा॥ ततस्त्वंसर्वभावेनशंकरंशरणंव्रज॥ ९२॥ नान्यदेवसमंशंभुंशिवोदेवोत्तमः प्रभुः॥तस्यावग
णनाविष्णोसर्वनाशायजायते॥ ९३॥ ततःशंभुंप्रीणयस्वतपसोग्रेणसादरं॥ प्रसन्नःपार्वतीनाथःतुभ्यमि
ष्टंप्रदास्यति॥ ९४॥ ॥श्रीशिवउवाच॥ इत्युक्तःसतयाविष्णुःतत्रैवोग्रंतपस्तदा॥तत्तुसमारभेदेवीपंच
प्रज्वाल्यपावकान्॥ ९५॥ त्रिकोटियुगपर्यंततपस्तप्तंचविष्णुना॥ जिताहारेणतेनैवश्वासान्संयम्यकर्नि
रुध्यच॥ ९६॥ प्रसन्नोस्मिततोविष्णोस्तदुग्रतपसाशिवे॥प्रसंन्नेसतिमांविष्णुः स्तुष्टावबहुधास्तवैः॥ ९७॥
ततःपदंदापितंचविष्णावेरितितोमया॥तत्रैवसमहाविष्णुःस्मृत्वादुःखानिसर्वथा॥ ९८॥ तदाप्रभृतिवि
ष्णुर्मामप्रमादेनसादरं॥ पूजयत्यनिशंयत्नेनसर्वकालेष्वतंद्रितः॥ ९९॥ इतस्त्रिंशत्सहस्रांतेकल्पेविष्णुः

मतापवान्॥ नारसिंहं परं रूपं उग्रं संधारयिष्यति॥१००॥ योजनानां शतं व्याप्य भानुमंडलसन्निभः॥ कृत्वा स देवकार्याणि देवैः संपूजितस्तदा॥१॥ न मत्तोऽप्यधिको लोके न मया सदृशोऽपि वा॥ नास्तीति सुरवर्गैर्युक्तः स्वपि वदिष्यति॥२॥ तदा तु शारभं रूपं धृत्वा तं संहराम्यहं॥ नखाग्रैः प्रोथयित्वा तं भ्रामयामि नभस्तले॥ आयाः॥३॥ हरिहरं नमीशानं विश्वस्य सकलस्य च॥ अनुयास्यंति मां देवा मती नांकृषभं प्रभुं॥४॥ ततो विदार्य तं देहं घोररूपं वदाम्यहं॥ भीतास्तदानीं मां देवास्तोष्यंति बहुधा स्तवैः॥५॥ हनं वि लोकयन्तेन भैरवः काशिपालकः॥ पेषयिष्यति पापानां पुनर्जीवनशंकया॥६॥ तदा प्रभृति देवानां नारसिंहनिपातनं॥ पूजयिष्यंति तन्नाम्ना सर्वपापभयापहं॥७॥ अत्रैवं भैरवो वीक्ष्य दावानलसमप्रभः॥ दहिष्यति न संदेहः तमत्रैव दुरासदं॥८॥ अत्रैव नाम्ना नाथो यः काश्यां श्रीकालभैरवः॥ स्थापितोऽस्ति मया देवि सुरगंधर्वपूजितः॥९॥ दृश्यते भैरवः काश्यामत्रैव प्रलयानलः॥ चतुर्दशेषु भुवनेष्वेतत्तुल्यो न शासकः॥ हंत्ययं ब्रह्मविष्ण्वादीन् क्रोधसंकुलितेक्षणः॥ महाकालानलप्रख्यो दुराधर्षो ममाप्ययं॥११॥ यातनास्तंभनिकटे यदा शूलधरः स्थितः॥ तदा ममापि सुभगे दुर्निरीक्ष्यो हि भैरवः॥१२॥ एकोऽप्यनेकधा भूत्वा विश्वरूपो निभीषणः॥ संचरत्यत्र हस्तोऽयं यातनास्तंभवीथिषु॥१३॥ विभ्रहो कालनाथस्य प्रज्वलद्भूधरा इव॥ यातनास्तंभपार्श्वेषु दृश्यंते भैरवाः शिवे॥ अवापुर्भैरवं क्रुद्धं पुरा विष्णुपुरोगमाः॥ तेन क्रोधानलहताः निपेतुर्भुवि मूर्छिताः॥१५॥ न नस्ते युगपर्यंतं पतिताः पुनरुत्थिताः॥ शांते क्रोधानले नो चेद्यास्यंते तेऽपि भस्मतां॥१६॥ प्रत्याश्रमं प्रतिगृहं प्रविश्याऽयं तु भैरवः॥ अत्रैवान्यपशुपतिप्राज्ञः शिवार्चनपराङ्मुखान्॥१७॥ भस्मोद्धूलनरुद्राक्षधारणादिपराङ्मुखान्॥ लिंगपूजाविहीनांश्च दृष्ट्वा क्रुद्धो भवत्ययं॥१८॥ क्रोधोऽस्य विफलो नैव भविष्यति कदाचन॥ यस्मिन् क्रोधो स्यतं घोरं पातयत्यश्मभंडले॥१९॥ देवानामपि सर्वेषां शास्ता श्रीकालभैरवः॥ तदन्ये तृणभूतास्तु ग्

धर्वामुनयोनराः॥२०॥ भैरवोभीमवेषोयं दुर्निरीक्ष्यः सुरैरपि॥ यदा क्रोधसमाक्रांतस्तदा द्रष्टुं न शक्यते॥२१॥
अशैवत्रासकं क्रूरं प्राप्य श्रीकालभैरवं॥ सुखेन संवसाम्यत्र काश्यां नित्यं वरानने॥२२॥ यदा तु शैवधर्माणां
संक्षयः संभविष्यति॥ तदायं शाश्वतं धर्मं स्थापयिष्यति भैरवः॥ शैवधर्मक्षयं यस्तु कर्तुमिच्छति पार्वति॥ समि
त्रं तं भैरवोयं नरके पातयिष्यति॥२४॥ अशैवानां तु दुष्टानां दुःखदो भैरवः परः॥ अशैवानां तदन्यत्तु त्रासको
न भविष्यति॥२५॥ माहात्म्यं भैरवस्येदं समाख्यातं मया शिवे॥ सर्वपापक्षयकरं पठतां शृण्वतामपि॥२६॥
येनेदं पठ्यते प्रातर्माहात्म्यं भैरवस्य तु॥ न तस्य सर्वथा दुःखं स्वप्नेपि कमलानने॥२७॥ इदं माहात्म्यममरु
मादित्याभिमुखो यदि॥ पठति प्रीतहृदयो न स प्राप्नोति यातनां॥२८॥ बालग्रहादिरोगेषु रक्षाकर
मनुत्तमं॥ कुष्ठापस्माररोगादिविनाशकमपि प्रिये॥२९॥ भूर्जपत्रे लिखित्वेदं माहात्म्यं प्रत्यहं शिवे॥ यः पू
जयिष्यति प्राज्ञः स दुःखानि न पश्यति॥३०॥ एतन्माहात्म्यमंत्रैस्तु प्रत्यहं भैरवार्चकैः॥ प्रीणनीयो भी
मरूपो भैरवो भीमविक्रमः॥ काशायस्यां शिवेशो येण कालभैरवसंनिधौ॥ तस्माद्दुर्भाग्य माहात्म्यं पठनी
यं प्रयत्नतः॥३२॥ शृण्वन्श्रीभैरवस्येमां प्रादुर्भावकथां नरः॥ भैरवार्चारतः शैवो यातनां नैव पश्यति
॥३३॥ नित्यं भैरवमाहात्म्यमंत्रावर्तनपूर्वकं॥ प्रदक्षिणादिकं कार्यं भैरवो यातनापहः॥३४॥ श्रीकालभैरवेभ
क्तिः सदा कार्या प्रयत्नतः॥ पूजनीयोन्वहं पूज्यो देवानामपि शासकः॥३५॥ देवाश्च सर्वदा भीताः शासकं कारु
भैरवं॥ पूजयंत्यपि तिपत्नेन प्रत्यहं भीमविक्रमं॥३६॥ भैरवानर्चकं दृष्ट्वा भैरवोप्यखिलानपि॥ तन्नाशकानिश
स्त्राणि स्वतरक्षमप्यंति हि॥३७॥ भैरवोत्र स्वविष्ण्वादीनपि संतर्जयन्पुरा॥ तदन्यगणनातेन कथं कार्या
वद प्रिये॥३८॥ भैरवादुग्ररूपाद्यदन्यः काश्यां भयत्रासकः॥ अशैवादपरः कार्या शासेपि न वरानने॥
३९॥ अशैवं मत्तमालोक्य काश्यां भैरवकिंकराः॥ दीर्घतप्तायसास्त्राग्रैः ताडयंत्युग्रविक्रमाः॥ प्रलयानल

संकाशोज्वालामालासमावृतः॥ कालभैरवकोपाग्निरशेषेंधनदाहकः॥४१॥ ततः कात्यपाद्वि
शेषेण शिवेकपरदेवतेः॥ शैवैः स्थानत्रयमनिशमशेषैर्नेकदाचन॥४२॥ कपालीकुंडलीभीमोभैरवोभीमवि
क्रमः॥ व्यालोपवीतिकवचीशूलीशूरःशिवप्रियः॥४३॥ एतानिदशनामानिपठन्यःप्रणमेत्सदा॥ शैवःशि
वार्चकस्तस्यनास्तिभैरवयातनाः॥४४॥ कर्कोटकश्चकाराऽत्रतपोघोरतरंमुदा॥ सहस्रयुगपर्यंतकात्ययापं
चाग्निमध्यगः॥४५॥ तत्रकार्कोटकाख्यंचालिंगंसंस्थाप्ययन्मुदा॥ तल्लिंगस्यपुरोभागेकुंडमेकंससर्जच॥४६
यदाघोरंतपस्तप्तंतेनतल्लिंगसन्निधौ॥ तदातल्लिंगगतःशंभुराविरासमहेश्वरः॥४७॥ ततःसंवीक्ष्य
मानागः प्रणिपत्यपुनःपुनः॥ कृत्वापूजांयथाशास्त्रंचकारस्तोत्रमादरात्॥४८॥ ततस्तेनैवनागेनयाचितो
वरोत्तमौ॥ एकोमहेश्वरेभक्तिःदृढास्त्विनिवरःपरः॥४९॥ अन्योनभःशुक्लपक्षपंचम्यांयेजनामुदा॥
स्नानंकुर्वंत्यत्रकुंडेतेषांरोगादिमास्त्विति॥५०॥ ततोदत्तंमयातस्मैवरद्वयमनुत्तमं॥ ततःपरमपिप्रीत्यात
प्तंघोरतरंतपः॥५१॥ विषदोषादिशांत्यर्थंतद्दिनेसर्वथाजनैः॥ स्नानेकार्यंप्रयत्नेनश्राद्धंचविधिपूर्वकं॥
कार्कोटकुंडनिकटेसंतिशैवाःसहस्रशः॥ तेरपिस्वस्वनाम्नैवलिंगानिस्थापितानिच॥५३॥ कार्कोटकस्तप
स्यत्काशैवैःसहकदाचन॥ स्नानार्थंशिवगंगायांगतःशिवपरायणः॥ तत्रस्नात्वायथाशास्त्रंआग्नीध्रेश्व
रमव्ययं॥ सादरंपूजयामासशेषःशिवतत्परः॥५५॥ ततःपंचाग्निमध्यस्थंउर्ध्वबाहुंजितेंद्रियं॥ जटा
भसितवीतांगंददर्शसजनार्दनं॥५६॥ दृष्ट्वाप्रणम्यबहुधाकृतांजलिपुटस्ततः॥ उवाचवचनंचारुशिव
भक्तहितावहं॥५७॥ किंनामसर्वदासर्वैर्जपनीयंप्रयत्नतः॥ कुत्रस्थानत्रयमनिशंकथंध्येयोमहेश्व
रः॥५८॥ काश्मीरादीनिलिंगानिसंतिनानाविधानिच॥ तेषुश्रेष्ठतरंलिंगंकिमिष्टफलदायकं॥
५९॥ कुत्रवादेवदेवस्यमहादेवस्यसंनिधिः॥ केनरूपेणकर्तव्यंशिवलिंगस्यपूजनं॥६०॥ इदंसर्वंविशेषे

णानिश्चित्यवदसादरं॥ कृपया शिवभक्तानां हितायशिवपूजक॥६१॥ ॥विष्णुरुवाच॥ ॥कर्कोट
कत्वयापृष्टं सम्यगेतद्यथोचितं॥ यथाशास्त्रं यथाज्ञानं तथावक्ष्ये शृणुप्रिये॥६२॥ वेदोपगीतो बहुधायश्च
शैवःषडक्षरः॥ सएवसर्वथाजप्यः शिवमंत्रोमुमुक्षुभिः॥६३॥ शिवमंत्रजपासक्ताः मुक्ताः पूर्वेमुनीश्वराः
॥ नशैवमंत्रादपरोमंत्रोमुक्तिप्रदायकः॥६४॥ शैवमंत्रंविहायान्यंमंत्रं यःसमुपासते॥ समणिंकरगंत्यक्त्वा
काचार्थीयतते ध्रुवं॥६५॥ प्रभावः शैवमंत्राणां ज्ञायते नेनमयाध्रुवं॥ न त्वं नु शिवमंत्राणां जानासि शि
वएवहि॥६६॥ पुराहिमालयप्रांतेकश्चिद्विप्रोद्विजाधमः॥ ब्रह्महत्यादिपापानिचकारक्रूरमानसः॥६७॥
हतामृगवराः भुक्ताः मृगमांसमनेकदा॥ भक्षितं गोसहस्राणि निहितान्यशितानिच॥६८॥ सएवक्रूर
सर्पेणदंशितोनाभूत्कदाचन॥ ततःशिवशिवेत्येतदुक्ता नामामृतं द्विजः॥६९॥ तदानींकोटिशःक्रूराःयमदू
ताःसमागताः॥ ततस्तेगंतुमुद्युक्ताः बध्वापाशैर्द्विजाधमं॥७०॥ तदाकश्चिद्धिमगिरौसंचरन्शिवकिं
करः॥ तदुक्तंमृतकालीनंनामशुश्रावशांकरं॥ श्रुत्वातन्नामविमलंधन्यंमत्वाचतंद्विजं॥ सामीप्यकिंकरा
न्दृष्ट्वाजगादवचनंमुदा॥(१)७२॥ (२)अयंशैववरोधन्योनास्य सामीप्ययातना॥ देयमस्मैमहेशेनगाणप
त्यंनसंशयः॥(२)७४॥ (१)शिवकिंकरउवाच॥ ॥रेरेयमभटाः क्रूराः शृणुध्वंतुवचनंमम॥ अनेनोच्चारि
तंदिव्यंशिवनामश्रुतंमया॥(१)७३॥ ॥शिवेतिनामविमलंपदादावुक्तमादरात्॥ तेनैवाखिलपापा
निनष्टान्यस्यनसंशयः॥७५॥ तदनंतरमुक्तंयत्शिवनामाघनाशनं॥ मुक्तिदंतद्भवत्येवमाकुर्वेत्व
त्रसंशयः॥७६॥ ततेनैषोयंभवद्भिस्तुगंतव्यंभवनोयदि॥ जीवनेच्छातदानोचेध्दनिष्यामिनसंश
यः॥७७॥ इतितद्वचनंश्रुत्वामत्वास्तेयमकिंकराः॥ अनादृत्यैवतद्वाक्यंतंबध्वागंतुमुद्यताः॥७८॥
तदाभवन्महद्युध्दंदेवदानवदुःसहं॥ देवगंधर्वयक्षाणांदुर्निरीक्ष्यंभयप्रदं॥७९॥ सार्धकोटिसहस्राणि

दुर्जेयाः यमकिंकराः॥ तैः सर्वैः कथ्यकारोयं जन्यं समशिवकिंकरः॥८०॥ युद्धभूमिगताः क्रूराः यावंतो यमकिं
कराः॥ तावंत्य एवसंत्यत्र शैवाः इतीविदुः सुराः॥८१॥ शैवेन प्रेषितं शूलं एकमेवैकदा तदा॥ सार्धकोटि
सहस्राणि शूलानि समजायत॥८२॥ शैवे विभूतिकवचः शूलमात्रकरः शुचिः॥ चित्रंयुद्धं चकारैकः
सह तैर्यमकिंकरैः॥८३॥ एकमेवागतं वीर्यं तं दृष्ट्वैवं शिवकिंकरं॥ देवदानवगंधर्वाः ययुः प्रतिदिशं प्रति॥८४॥
तदाभवच्छोणितस्य प्रवाहो मांसकर्दमः॥ वपाफेनगणाकीर्णः संकीर्णो यमकिंकरैः॥८५॥ ततश्चोले घो
र युद्धे श्रुत्वा वार्तां यमस्तथा॥ सर्वसंन्नाहयुक्तः सन् ययौ युद्धभुवं प्रति॥८६॥ तमागतं समालोक्य यमं सशि
वकिंकरः॥ एहि एहीय मेत्युक्त्वा शूलं जग्राह पाणिना॥८७॥ ततो यमः शूलहस्तं रुद्राक्षवलयावृतं॥ वि
भूतिकवचं शैवं ददर्श शिवकिंकरं॥८८॥ हस्ताकृतांजलिपुटः कंपमानो भयाकुलः॥ प्रणम्य दंडवद्भूमौ
पूजां चक्रे यथाविधिः॥८९॥ पुनः प्रणम्य बहुधा प्रसाद्य शिवकिंकरं॥ जगाद वचनं चारु विनयान्नय
कोविदः॥९०॥ शिवभक्तवरश्रीमन्को यं तत्त्वविदांवर॥ एतस्मिन्नीदृशी शक्तिस्तव जानाकथं वद॥९१॥
अनेन ब्रह्महत्यादि पापानि विविधानि च॥ कृतानीति वदत्येव चित्रगुप्तो विशारदः॥९२॥ अनालोचि
नवक्तायं नभवत्येव सर्वथा॥ विश्वासो बहुधास्त्यस्मिन् नत्वं नवदस्त्ययं॥९३॥ ईदृशं पापनिरतं कथं
वा रक्षितस्त्वया॥ कथं मम हतं सैन्यं अविचार्यैत्वयाधुना॥९४॥ प्रायशः पुण्यवानेव भविष्यत्ययमीदृ
शः॥ यतः शैवोत्तमेनात्र संनिधानं कृतं त्वया॥९५॥ शिवलिंगार्चकाः शैवाः रुद्राक्षभसितावृताः॥ बहुपु
ण्यफले पूर्णे दृश्यंते शिवसंमताः॥९६॥ यस्मिन्देशे महाशैवास्तिष्ठंति शिवपूजकाः॥ तद्देशवासिनः
सर्वे कृतार्था नात्र संशयः॥९७॥ शैवांगसंगमात्रेण पिशाचः पूर्वमुत्तमः॥ स पिशाचतनुं त्यक्त्वा गंधर्वो
भवदुत्तमः॥९८॥ यस्मिन्तुष्यति शैवेंद्रः तस्मिन्तुष्यति शंकरः॥ शिवभक्तप्रसादो यं प्रसादः शांकरो ध्रुवः॥

॥९९॥ यत्र शैवोत्तमस्यास्ति संनिधानमघापहं॥ तत्रास्ति शंकरस्यैव संनिधानं न संशयः॥१००॥ शैवः
शिवनरः शांतः शिवस्यापरविग्रहः॥ तस्मिन्दृष्टे महादेवो दृष्टः एव न संशयः॥१॥ अयं तु भाग्यवानन्धः
पुण्यवानिति सर्वथा॥ त्वत्संनिधानलेशेन संप्राप्तो वानुमीयते॥२॥ क्षमां कुरु जगद्वंद्य शैवोत्तम शिवा
र्चक॥ नतोस्मि त्वत्पदद्वंद्वे कोपं संहर संहर॥३॥ इति तद्वचनं श्रुत्वा स शैवो वीतमत्सरः॥ निजगाद त
तो वाक्यं यममुद्दिश्य कोविदः॥४॥ अनेन ब्रह्महत्यादिकृतं नन्वसत्यमुच्यते॥ तत्पातकमभून्नष्टं अंत
काले शिवस्मृतः॥५॥ अयं शिव शिवेत्युक्त्वा जहौ प्राणानिहाधुना॥ अघोघ्नशिवशब्देन दग्धं पात
ककाननं॥६॥ तदनंतरमुक्तेन शिवशब्देन सर्वथा॥ अयं शिवप्रसादेन भविष्यति गणाधिपः॥७॥ इ
ति तद्वचनं श्रुत्वा कंपमानो यमस्ततः॥ पूजयामास विधिवत् शैवं मत्वा तमपि द्विजं॥ तदानीमेव विश्वेशप्रेषि
ताः शिवकिंकराः॥ दिव्यरत्नविमानानि समारुह्य ययुर्मुदा॥९॥ तदानीं पुष्पवर्षश्च बभूव शिवनि
र्मिता॥ नेदुर्दुंदुभयो दिव्याः प्रसन्नाश्च दिशो दश॥१०॥ ततः स्तानागतान्दृष्ट्वा शमनः शिवकिंक
रान्॥ पूजयामास विधिवत् भक्तिश्रद्धासमन्वितः॥११॥ ततो मलं द्विजं शैवं पस्पर्शुः शिवकिंकराः॥ ततः
समभवद्विप्रो दिव्यरूपधरस्तदा॥१२॥ ततो विमाने तं विप्रं स्थापयित्वा शिवार्चकाः॥ ययुश्च वायु
वेगेन कैलासं प्रति शंकरं॥१३॥ ततस्तस्मै महेशेन गाणापत्यमनामयं॥ दत्तं तदैव नारींद्र तत्र तिष्ठ
ति सोधुना॥१४॥ ईदृशा बहवः पूर्वं महापातकिनो जनाः॥ मतिकाले न विश्वेशस्मरणान्मोक्षमाययुः
१५॥ नृणां मरणकाले तु शिव इत्यक्षरद्वयं॥ न याति सहसा नूनं शंकरानुग्रहं विना॥१६॥ शिवना
मस्मृतिफलं वक्तुमेव न शक्यते॥ नाहं शौरस्थिरस्वांतैः शंकरेण विना ध्रुवं॥१७॥ अतः पंचाक्षरः शैवो
जपनीयस्त्वया सदा॥ शैवः पंचाक्षरो भव्यो मुक्तिदो जप्यते मया॥१८॥ शैवः पंचाक्षरो मंत्रः शिवरूपः

शिवप्रदः॥ कान्यया मंतर्गेहे स्थित्वा जपनीयः प्रयत्नतः॥१९॥ नकाशीमरणं सेवं तत्रापं तर्गेहं वरं॥
तत्राप्युत्तमं ज्ञेयं ज्ञानवापीतटं शुभं॥२०॥ तत्र जप्यो महामंत्रः शैवो यं मोक्षदायकः॥ तस्मान्मंत्रवरं शै
वः तत्र जप्यो मनुस्सदा॥२१॥ पंचवक्त्रो दशभुजः सर्वदेवोत्तमः प्रभुः॥ वेदोपगीतः सर्वज्ञः सोमसूर्याग्नि
लोचनः॥२२॥ गौरीभूषितवामांगः कल्याणगुणसागरः॥ सर्वलोकपतिः श्रीमान्सर्वदेवार्चितो विभुः॥
२३॥ निष्कलो निर्गुणो नित्यो निर्लिप्तो निरुपाधिकः॥ निरंजनो निराकारो निरवद्यो निरामयः॥२४॥
ज्योतिस्वरूपो विमलश्चिन्मयः सकलात्मकः॥ एकः पूर्णो शिवः शांतो मायातीतोऽक्षरः परः॥२५॥ इति-
ध्येयः सदा शंभुः अप्रमत्तैरहर्निशं॥ पूजनीयः प्रयत्नेन प्रत्यहं विधिवज्जनैः॥२६॥ गंडकी नाम विमला
नदी यत्र मनोहरा॥ तत्र सोमेश्वरं नाम क्षेत्रमस्त्येकमुत्तमं॥२७॥ तत्रैव शिवनामाख्याः शिलाः संति शि
वात्मिकाः॥ शिलाश्च ता दृशाः संति विविधाः शिवसंमताः॥२८॥ ताः सर्वा अपि संपूज्या लिंगाकाराः
शिवात्मकाः॥ तत्पूजया महादेवः साक्षात्पूजितो भवेत्॥२९॥ उन्मत्तमहिषाख्याः शिलाः संति शिवा
त्मकाः॥ तास्तु यत्नेन लब्धव्याः साक्षान्मोक्षप्रदायकाः॥३०॥ तत्रैव शिवकुंडाख्यमेकमस्ति शिवालयं॥
तत्रैव शिवरूपास्ताः शिलाः संत्यमिताः शुभाः॥३१॥ कपिलं तत्र शिलामूलं पार्श्वे वयामैव सा शिला॥ उप
र्युन्मत्तमहिषनेत्रसंनिभमुत्कटं॥३२॥ सैवेयं दक्षिणा भव्या लिंगदेशे मनोहरे॥ तत्र शंकरसांनिध्यं भवा
न्याश्च सदा ध्रुवं॥३३॥ तादृशीयत्नतः साध्या शिला शंकरसंश्रया॥ तत्रार्चितो महादेवः प्रीतो भवति स
र्वेषा॥३४॥ तत्राल्पापि कृता पूजा श्रद्धया तु शिवार्चकैः॥ सर्वपापहरा भव्या सेवानंताय कल्पते॥३५॥
शुद्धेन भस्मना नित्यं नवबिल्वदलैरपि॥ पूजा कार्या प्रयत्नेन तत्र शैवैः शिवार्चकैः॥३६॥ तत्सदा शिवना
भाख्यं इति वेदैश्च गीयते॥ तद्देवविमलं लिंगं मया संपूज्यते सदा॥३७॥ यस्त्वेतल्लिंगपूजायां प्रयतोऽत्र वसे

वकान्॥५७॥ षड्कोटियुगपर्यंतंतपश्चक्रे बलान्वितः॥ ततोधोमुखमासाद्यतपस्तप्तुंदुरासदं॥५८॥ षष्टि
वत्सरपर्यंतंब्रह्मसमानेनविष्णुना॥ ततस्तत्तछापितंलिंगंप्रादुर्भूतोस्म्यहंशिवे॥५९॥ ततोमांपूजयित्वैवस्तो
त्रमेतच्चकारसः॥ ॥विष्णुरुवाच॥ ॥ नमामिविश्वेश्वरमादिदेवंनमामिविश्वोत्तममीशमेकं॥ नमामिसर्वा
धिकमप्रमेयंनमामिशंभुंगिरिजासहायं॥६०॥ नमामिकालांतकमुग्रमीशंनमामिखट्वांगधरंमहेशं॥ नमा
मिसोमानलभास्कराक्षंनमामिवाहीकृतसन्महोक्षं॥ नमामिसर्पाधिपकंठभूषंनमामिनानाविधदिव्य
वेषं॥ नमामिभूधोत्तमभूतिभूषंनमामिसंरक्षितभक्तघोषं॥६२॥ नमामिसर्वागमवेद्यमाद्यंनमामिमाया
रहितंविशुद्धं॥ नमामिलोकैकनिदानभूतंनमामिनानाविधसृष्टिहेतुं॥६३॥ नमामिनागेशवरार्चितांघ्रिं
नमामिशुभ्रेंदुकलावतंसं॥ नमाम्यनेकेंदुरविप्रभासंनमामिनित्यंकरुणार्द्रभावं॥६४॥ नमामिरंभ्योतमव
क्रचंद्रंनमामिदीर्घोरुहिरण्यबाहुं॥ नमामिशांताक्षहिरण्यरूपंनमामिदिव्योरुहिरण्यवर्णं॥६५॥ नमा
मिसोमंवृषराजकेतुंनमामिशर्वंवरधर्मसेतुं॥ नमामिभीमंजगदेकनाथंनमामिरुद्रंजनमोक्षहेतुं॥६६॥
नमामिवीरेश्वरमुग्रवीर्यंनमामिदेवंपटुनीलकंठं॥ नमामिसर्वार्तिहरंसुरेशंनमामिदीर्घोरुजटाकलापं॥
॥६७॥ शिवएवशरण्यपुण्यमूर्त्तिः शिवएवाखिलदेवचक्रवर्ती॥ शिवएवविदूरितामरार्त्तिः शिवएवामित
वेदगीतकीर्त्तिः॥६८॥ त्वदन्यंशरण्यंवरेण्यंनजानेनजानेशिवामेयकुधेट्जजाने त्वदन्योनदेवः त्वदन्योन
देवः॥ त्वदन्योनदेवस्त्वदन्योनदेवः त्वमेवप्रभुः सर्वलोकैकनाथस्त्वमीशस्त्वमाराध्यभूतस्त्वदन्योनपू
ज्यस्त्वदन्योनपूज्यः त्वमेवासिपूज्यस्त्वमेवासिसेव्यः॥ त्वदन्यत्परंवस्तुनास्त्येवलोकेत्वदन्योनवेद्यंतवेद्यः
परेशः॥ त्वमेवासिसर्वंत्वदन्यंनकिंचिन्ध्रुवंसत्यमेतद्ध्रुवंसत्यमेतत्॥ शिवात्परंनेतिवदंतिवेदाः शिवात्परं
नेतिवदंतिदेवाः॥ शिवात्परंनेतिवदंतिसिद्धाः शिवात्परंनेतिवदंतिमुक्ताः॥ शिवएवाखिलाराध्यः शिवएव

जगत्प्रभुः॥७३॥ न शिवात्परमस्त्येकं सत्यं सत्यं मयोच्यते॥ शिवाज्ञयैव चंद्रोयं दीपयत्यखिला दिशः॥ शिवा
ज्ञयैव शैलेंद्राः फणिदिक्करिणः सदा॥७५॥ धृत्वा तिष्ठंति पृथिवीं कंपमानादिशं बत॥ शिवाज्ञयैव सकलं प्र
ज्वलत्यनलः सदा॥७६॥ शिवाज्ञयैव वात्येते वायवः सुखहेतवः॥ शिवस्यैव प्रसादेन देवेंद्रः स्वर्गपालकः॥७७॥ शि
वस्यैव प्रसादेन तर्जको भूत्प्रजापतिः॥ शिवस्यैव प्रसादेन मया प्राप्तं परमं पदं॥७८॥ शिवस्यैव प्रसादेन शंभुः शंभु
त्वमागतः॥ एवं स्तुत्वा हरिः शंभुं मामेव शिवमव्ययं॥७९॥ भूयः प्रणम्य बहुधा तस्थौ सनतकंधरः॥ ततश्च ब
हुकालीन घोरोग्रतपसा कृतं॥८०॥ विष्णुं प्रत्युक्तमम लंग्न देव वचो मया॥ त्वत्कृतेनोग्रतपसा संतुष्टोस्मि
जनार्दन॥८१॥ वृणु दास्येव वरं श्रेयं स्तोत्रेणानेन चाधुना॥ इति पृष्टस्ततो विष्णुः प्रणम्येशं कृतांजलिः॥
॥८२॥ ययाचे वरमुत्कृष्टं शिवे भक्तिं दृढां स्थितानि॥ वरोत्तमं वरं देहि वरदोत्तम शंकर॥८३॥ अचंचला
शिवे भक्तिर्ममास्त्विति पुनः पुनः॥ अक्षमेण मया देव स्वल्पमेव तपः कृतं॥८४॥ प्रसन्नोसि कथं शंभो क
रुणाकर शंकर॥ दीनबंधो दयासिंधो प्रसन्नोसि कथं मम॥८५॥ मया पूजाविधिः सम्यक्कृतश्च न ज्ञायते शिव॥
न च स्वरूपं न ज्ञातं नत्वतो मे यविक्रम॥८६॥ तादृशस्य ममाद्यैव प्रसन्नः कथमीश्वर॥ वेदैरपि न नेतनं त्वं ज्ञात
मस्ति महेश्वर॥८७॥ तादृशं शिव तत्त्वं ते कथं ज्ञेयं मयाधुना॥ त्वदन्यः करुणासिंधुः लोके नास्त्येव सर्वथा॥८८॥
यदल्पेनापि तपसा प्रीतोसि भगवञ्छिव॥ त्वदन्यं शरणं नास्ति त्वमेव शरणं मम॥८९॥ रक्ष रक्ष महादेव रक्ष रक्ष
शिवापते॥ त्वदीयं पादकमलं निधेहि मम मूर्धनि॥९०॥ येन धन्यो भवाम्यद्य धन्यं कुरु सदाशिव॥ त्वदीयपा
दकमलं दृष्टमद्य मया शिव॥९१॥ धन्योस्मि कृतकृत्योस्मि मत्तो धन्यो न विद्यते॥ यन्न वेदपुराणाद्यैर्दृष्टं यत्पा
दपंकजं॥९२॥ न देवाद्यमया दृष्टं भाग्यस्यांतो न मे शिव॥ यन्न सिद्धैर्मुनिवरैः कपिलाद्यैर्निरीक्षितं॥९३॥ तादृ
शं शंकरस्येत दृष्टं पादांबुजं मया॥ इत्युक्त्वा पतितं सम्यक्पादमूले जनार्दनं॥९४॥ उत्थाप्यांगं विमृज्याप दत्ता

स्वबहवोवराः॥ वैकुंठाख्यमहत्स्थानंसर्वपूर्वंमयाशुभं॥९५॥ तदाधिपत्यंसुखदंतदादत्तंमयाशुभे॥ लोकान्धर्मेणसततंपालयेत्रिवरः परः॥९६॥ इतस्तद्देवसंतोषादद्देवोदुर्लभोमया॥ तदातींपूजयामासकमलैरमलैःसमं॥९७॥ सहस्रनाममंत्रैस्तैःप्रतिनंनामसंख्यया॥ तद्भक्तिदर्शनार्थायतदेकंकमलंमया॥९८॥ दूरीकृतंतदेकोनंनामसंख्याबभूवच॥ तदाविचार्यैकमलममलंध्येवमुदादरात्॥९९॥ सुनेत्रकमलेनैवनामसंख्यापूरयत्॥ तदात्यंतमभूत्प्रीतिःममतस्मिंवरानने॥१००॥ ततोनेत्रंमयादत्तंपुंडरीकनिभंशुभं॥ पुंडरीकाक्षइत्येकंनामलब्धंचविष्णुना॥१॥ तेनघोरतरंतप्तंनपश्चात्फलमीदृशं॥ तेनैवविष्णुनातत्रचक्रंलब्धंवरानने॥२॥ सुदर्शनाख्यममलंकोटिसूर्यसमप्रभं॥ तेनैवसर्वशत्रूणांविनाशंसकरिष्यति॥३॥ पुरामदंघ्रिलेखाभिःखचितचक्रमुत्तमं॥ वरोन्योयाचितस्तेनसर्वलोकहितावहः॥४॥ इदंपापहरंभूयःकुंडमस्त्वितिसादरं॥ इदंमणिगणाकीर्णंमणिकर्णीसमन्वितं॥५॥ मणिकर्णीतिविख्यातिंकुंडयातुजगत्प्रभो॥ अत्रैकमज्जनादेवमुक्तायांतुजनाःसदा॥६॥ स्मरणेनापिपापानांविनाशोभवतुप्रभो॥ यःकरोतिपितृश्राद्धंएतत्तीरेमनोहरे॥७॥ यांतुतत्पितरःसर्वेब्रह्मलोकंप्रतिप्रभो॥ यस्तत्रःशैवःपुण्यात्मानत्यागंकरिष्यति॥८॥ शैवःपंचाक्षरस्तत्रससमान्योनुशंकर॥ ततस्त्वत्प्रसादेनसमोस्मभिगच्छतु॥९॥ अक्लेशेनैवदेवेशापुनरावृत्तिदुर्लभं॥ इतिपद्मोवरस्तेनसर्वेदत्तामयावराः॥ १०॥ तदामंदारकुसुमैरभूद्वृष्टिर्मनोहरा॥ वैकुंठलोकंसंप्राप्यतदनुप्रीतमानसः॥ ॥११॥ पूजयित्वैवमांसम्यक् अभिवाद्यपुनः पुनः॥ अंतरंदेवासमनन्यलब्धंलब्ध्वातपस्यायदिसावधानं॥ ॥१२॥ करोतियःकश्चनशैववर्यःतस्मैवरोदीयतेएवमीश॥ ॥ इतिश्रीशिवरहस्येउग्राख्येसप्तमांशेशिवगौरीसंवादेकाशीमहात्म्येविष्णुवरप्राप्तिर्नामएकादशोध्यायः॥११॥ ॥श्रीउग्रायनमः॥ ॥ काश्यामन्यन्महत्स्थानंकेदाराभिधमुत्तमं॥ तत्रापिलिंगमस्त्येकंकेदारेश्वरनामकं॥१॥ कुंडमस्त्येकममम

लं तत्रैव विमलोदकं॥ तत्र स्नात्वा विधानेन केदारेशं समर्चयेत्॥ २॥ तत्रापि मुनयो भक्त्या कृत्वा मल्लिंगपूजनं॥
तिष्ठंति कोटिशो हृष्टाः तपोध्यानपरायणाः॥ ३॥ तत्कुंडस्नानमनिशं कर्त्तव्यं प्रीतिपूर्वकं॥ तिलैस्तु पितरो नि
त्यं तर्पणीयाः प्रयत्नतः॥ ४॥ तत्कुंडकुहरान्नित्यं सोत्साहं नागकन्यकाः॥ मत्पूजार्थं समायांति नानाभरणभू
षिताः॥ ५॥ सहस्रजिह्वः शेषोपि प्रत्यहं भक्तिपूर्वकं॥ सर्वधुस्तेन मार्गेण समायाति मदर्चकः॥ ६॥ कर्कोटको
पि तेनैव मार्गेण याति सादरं॥ अन्येपि बहवो नागाः समायांत्यनिशं मुदा॥ ७॥ तत्कुंडद्वारि सततं तीक्ष्ण
शूलासिपाणयः॥ सार्धाष्टकोटिगणपाः तिष्ठंति क्रूरविक्रमाः॥ ८॥ सार्धाष्टकोटिगणपाः तिष्ठंति क्रूरविक्रमाः॥
तानग्रे पूजयित्वैव प्रसाद्य तदनंतरं॥ नागलोकात्समायांति सर्वे शेषादयः सदा॥ ९॥ ममाभ्यर्चयितुं यात्रा
स्त्रैः कृत्वाचांतर्गृहादिकं॥ कुर्वंति कालनाथस्य पूजनं भक्तिपूर्वकं॥ १०॥ नृत्यंति नाट्यनिपुणाः सर्वास्ता ना
गकन्यकाः॥ कुर्वंति गानममलं गानशास्त्रानुरोधतः॥ ११॥ नागचंपकपुन्नागरत्नबिल्वादिसाधनैः॥ माम
भ्यर्च्य पुनर्यांति पुनरायांति यांति च॥ १२॥ तस्य केदारनाथस्य श्रावणे सोमवासरे॥ पूजा कार्या विशेषेण
साधनैर्विविधैः शुभैः॥ १३॥ सोमवारव्रतं कार्यं प्रयत्नेन यथाविधि॥ नाक्तेनोपोषणं कार्यं अन्यथा निशि भो
जनं॥ १४॥ तस्य दक्षिणदिग्भागे तिष्ठत्यर्कविनायकः॥ तस्मिन्नेव दिने सोपि पूजनीयः प्रयत्नतः॥ १५॥ सर्व
विघ्ननिवृत्त्यर्थं पूर्वमर्केण सादरं॥ तपस्तप्तं महद्घोरं एकपादेन सादरं॥ १६॥ अर्केणैव कृतं कुंडं एकं ति
ष्ठति निर्मलं॥ तत्तु रत्नौघरचितं पुरा तेनैव धीमता॥ १७॥ लोलार्केशाभिधं लिंगं तत्रास्ति सकलार्थ
दं॥ तत्पूजाविधिवत्कार्या भानुषष्ठी दिने शुभे॥ १८॥ तत्प्रांते संति लिंगानि सर्वाभीष्टप्रदानि च॥ तेषा
मपि यथायोग्यं पूजा कार्या प्रयत्नतः॥ १९॥ सिद्धेश्वराभिधं लिंगं कारयांतिष्ठति कामदं॥ तत्र पूजाविधानेन क
र्तव्या प्रत्यहं जलैः॥ २०॥ तत्रैव दुर्गा विमला तिष्ठत्यमललोचना॥ सर्वदुर्गहरा नित्यं स्वभक्ताभयदायिनी॥

॥२१॥ तत्राश्विनीशुक्लपक्षप्रतिपद्यवधि प्रिये॥ नवमीदिनपर्यंतं पूजा कार्या प्रयत्नतः॥ २२॥ सा सर्वार्तिहरा देवी नित्यं काशीनिवासिनां॥ पूजिता भक्तवरदा भवत्येव न संशयः॥ २३॥ तत्रैवामृतकुंडाख्यं तीर्थमस्त्येकमुत्तमं॥ तत्र स्नानेन दुःखानि न भविष्यंति सर्वथा॥ २४॥ कामाक्षीसंज्ञा तत्रनघं एकमस्ती वरानने॥ तत्र कुंडमभूद्दिव्यं ज्जलं चामृतोपमं॥ २५॥ तत्रापि श्रावणे मासि प्रत्यहं विधिवज्जनैः॥ पूजा कार्या विधानेन सर्वथा भौमवासरे॥ २६॥ तत्रापि शिवलिंगानि संति कोट्यवधि प्रिये॥ कुंडान्यपि मनोज्ञानि निर्मलानि च संति हि॥ २७॥ तान्यपि श्रद्धया नित्यं पूजनीयानि यत्नतः॥ निर्मलेषु च कुंडेषु स्नानं कार्यं यथाविधि॥ २८॥ आदिढुंढीश्वरो नामगणेशोऽस्ति प्रिये॥ सर्वविघ्नहरो नित्यं सर्वाभीष्टप्रदायकः॥ २९॥ प्रतिशुक्लचतुर्थ्यां तु सदूर्वालड्डुकादिभिः॥ पूजनीयः प्रयत्नेन काशीवासेप्सुभिर्नरैः॥ ३०॥ कालेश्वराभिधं लिंगं एकमस्ति वरानने॥ तत्पूजा सर्वथा कार्या प्रत्यहं विधिवज्जनैः॥ गोकर्णाभिधमस्त्येकं लिंगं पापौघनाशकं॥ तत्रापि कुंडमस्त्येकं तत्र स्नानमघापहं॥ ३२॥ शिवरात्रिदिने तत्र स्नानं कार्यं प्रयत्नतः॥ तल्लिंगपूजनं चापि कर्तव्यं तद्दिने शुभे॥ ३३॥ दिव्यलिंगान्यनंतानि काश्यां तिष्ठंति सर्वथा॥ तेषां प्रभावः केनापि वक्तुमेवं न शक्यते॥ ३४॥ अत्रैव पितृऋषिभिर्दिव्यैर्भौमैश्च कमलानने॥ स्थापनीयानि लिंगानि काश्यामन्यैरपि ध्रुवं॥ कुंडान्यपि च कार्याणि तैरेव ऋषिसत्तमैः॥ तपश्चर्यां करिष्यंति त एवात्र सदा शुभे॥ ३६॥ इतः शतोत्तरे कल्पे कन्या हिमवतः शुभे॥ भविष्यत्यमला साध्वी रूपलावण्यशोभिता॥ ३७॥ शिवपत्नी भवामीति मामुद्दिश्यैव सा शुभा॥ पंचाग्निमध्यसंविष्टा तपश्चर्यां करिष्यति॥ ३८॥ द्वात्रिंशत्कल्पपर्यंतं तपः कृत्वाति दारुणं॥ वन्हिमध्यगता साध्वी जले कृत्वा तपः पुनः॥ ३९॥ ततः कदाचिद्यत्नेन ब्रह्मलोकं गमिष्यति॥ ब्रह्मादयोपि तां दृष्ट्वा भविष्यंत्येव मोहिताः॥ ततस्तेभ्योतिविमलाः शापं दास्यति दारुणं॥ शिवसायुज्यरूपो वो मोक्षो मास्त्विति सा प्रिये॥ ४०॥ मदीयं रूपममलं सर्वेषां मोहकारणं॥ त्वत्साम्ये

नदितिप्रीत्या जलरूपा भविष्यति ॥ ४१ ॥ ततस्तज्जलमालोक्य ब्रह्मा विस्मयसंयुतः ॥ वारुणैर्बहुभिः पाशैर्नि
रोधं च करिष्यति ॥ ४२ ॥ ततः पूर्वकृतानल्पतपसा मदनुग्रहात् ॥ जलरूपेव सा भव्या काशीमायास्यति प्रिये ॥
४३ ॥ स्वतः प्रचलितां दृष्ट्वा तदा ब्रह्मादयः सुराः ॥ गंगा गंगेति निखिलैर्वैपि प्रचरिष्यंति तां शुभां ॥ ४४ ॥ तदा प्रभृति गं
गेति नाम तस्या भविष्यति ॥ पावयिष्यति सा लोकान् समस्ताघविनाशिनी ॥ सापि काश्यां स्वनाम्नैव लिंगं सं
स्थाप्य सादरं ॥ ज्ञानवापीतटे रम्ये तपश्चर्यां करिष्यति ॥ ४५ ॥ काशीं संप्राप्य विमलां अनर्घ्यां शिवरूपिणीं
॥ तपश्चर्यां विना लोके कस्थास्यति वरानने ॥ ४६ ॥ तत्काशीक्षेत्रमालोक्य बारुकस्यापि सर्वथा ॥ तपश्चर्यां र
तिः शुद्धा भवत्येव न संशयः ॥ ४७ ॥ काश्यां तु बहवो विघ्नाः काशीवासवियोजकाः ॥ तच्छांत्यर्थं ढुंढिराजः
पूजनीयः प्रयत्नतः ॥ ४८ ॥ अष्टोत्तरशतैर्दिव्यैर्गणेशस्यैव नामभिः ॥ कर्तव्यमिति यत्नेन नवदूर्वांकुरार्पणं
॥ ४९ ॥ हिरण्मयतनुं शुभ्रं सर्वार्तिहरमव्ययं ॥ वरदं गणपं ध्यात्वा पूजा कार्या प्रयत्नतः ॥ ५० ॥ ऋषिर्विघ्नेशाद्
यादिनाम्नां सर्वेश्वरः शिवः ॥ देवता विघ्नराजोत्र छंदोनुष्टुप् शुभप्रदः ॥ ५१ ॥ सर्वप्रत्यूहनाशमनं फलं शक्तिः
सुधात्मिका ॥ कीलकं गणनाथस्य पूजाकार्येति कामदा ॥ ५२ ॥ ॐ विघ्नेशो विश्ववदनो विश्वचक्षुर्जगत्पतिः ॥
हिरण्यरूपः सर्वात्मा ज्ञानरूपो जगन्मयः ॥ ५३ ॥ ऊर्ध्वरेता महाबाहुरमेयोमितविक्रमः ॥ वेदवेद्यो महाका
यो विद्यानिधिरनामयः ॥ ५४ ॥ सर्वज्ञः सर्वगः शांतो गजास्यो विगतज्वरः ॥ विश्वमूर्तिरमेयात्मा विश्वाधारः स
नातनः ॥ ५५ ॥ सामगानप्रियो मंत्री सत्वाधारः सुराधिपः ॥ समस्तसाक्षी निर्द्वंद्वो निर्लिप्तोमोघविक्रमः ॥ ५४ ॥
॥ ५६ ॥ नियतो निर्मलः पुण्यः कामदः कांतिदः कविः ॥ कामरूपी कामवेषः कमलाक्षः कलाधरः ॥ ५७ ॥ सुमुखः
सर्वदः शुद्धो मूषकाधिपवाहनः ॥ दीर्घतुंडधरः श्रीमाननंतो मोहवर्जितः ॥ ५८ ॥ वक्रतुंडः शूर्पकर्णः पवनः
पावनो वरः ॥ योगीशो योगिवंद्यांघ्रिरुमासुतनुरघापहः ॥ ५९ ॥ एकदंतो महाग्रीवः शिवः शरण्यः सिद्धसे

वितः॥ सिद्धिदः करुणासिंधुर्भगवान्भव्यविग्रहः॥६०॥ विकटः कपिलो ढुंढि रुग्रोभीमोदरः शुभः॥ गणा
ध्यक्षो गणाराध्यो गणेशो गणनायकः॥६१॥ ज्योतिस्वरूपो भूतात्मा धूमकेतुरनाकुलः॥ कुमारगुरुरानंदो हे
रंबो वेदसंस्तुतः॥६२॥ नागोपवीती दुर्धर्षो बालदूर्वांकुरप्रियः॥ फालचंद्रो विश्वधामा शिवपुत्रो विनायकः॥
॥६३॥ लीलावलंबितवपुः पूर्णः परमसुंदरः॥ विघ्नांधकारमार्तंडो विघ्नारण्यदवानलः॥६४॥ सिंधूरवदनो नित्यो
विभुः प्रथमपूजितः॥ शरण्यदिव्यपादाब्जो भक्तमंदारभूरुहः॥६५॥ रत्नसिंहासनासीनो मणिकुंडलमंडितः॥
भक्तकल्याणदोमेयः कल्याणगुणसंश्रयः॥६६॥ एतानि दिव्यनामानि गणेशस्य महात्मनः॥ पठनीयानि यत्ने
न सर्वदा सर्वदेहिभिः॥६७॥ नाम्नामेकैकमेतेषां सर्वसिद्धिप्रदायकं॥ सर्वविघ्नेशनाम्नां तु फलं वक्तुं न शक्यते॥
॥६८॥ एकैकमेवतन्नाम दिव्यं जप्त्वा मुनीश्वराः॥ प्रत्यूहमात्ररहिताः सिद्धिं निशि वपूजकाः॥६९॥ दूर्वायुग्मानि सं
गृह्य नूतनान्यतियत्नतः॥ पूजनीयो गणाध्यक्षो नाम्नामेकैकसंख्यया॥७०॥ नभस्य शुक्लपक्षस्य चतुर्थ्यां विधि
पूर्वकं॥ वक्रतुंडेशकुंडे तु स्नानं कृत्वा प्रयत्नतः॥७१॥ वक्रतुंडेशमाराध्यं सर्वाभीष्टप्रदायकं॥ ध्यायेदघहरं शु
भ्रं कांचनाभमनामयं॥७२॥ ततः पूजां यथाशास्त्रं कृत्वा दूर्वांकुरैर्नवैः॥ पूजा कार्या विशेषेण नामोच्चार
णपूर्वकं॥७३॥ ततश्च मोदकैर्दिव्यैः सुगंधघृतपाचितैः॥ नैवेद्यं कल्पयेद्दिव्यं गणेशाय शुभावहं॥७४॥ अन्नैश्च
परमान्नाद्यैर्भक्ष्यैर्भोज्यैर्मनोहरैः॥ तोषणीयः प्रयत्नेन वक्रतुंडविनायकः॥७५॥ प्रदक्षिणनमस्कारैः दिव्यतन्ना
मसंख्यया॥ कर्तव्यानि पनं शुद्धैः मौनव्रतपरायणैः॥७६॥ ततः संतर्प्य विधिवच्छैवानान्ब्राह्मणान्सतमान्॥
॥पुनरभ्यर्च्य विघ्नेशं इमं मंत्रमुदीरयेत्॥७७॥ ॥अथ मंत्रः॥ ॥वक्रतुंड सुराराध्य सूर्यकोटिसमप्रभ॥ नि
र्विघ्नेनैव सततं काशीवासं प्रयच्छ मे॥७८॥ इति संप्रार्थ्य विधिवत्पूजां कृत्वा पुनर्मुदा॥ नमस्कृत्वा प्रसादेनं
गच्छेत्तत्ढुंढिविनायकं॥७९॥ ढुंढिराजार्चनं सम्यक्कर्तव्यं विधिपूर्वकं॥ तत्रैवार्चा विशेषेण पूजां कृत्वा ततः

परं ॥ पूजनीयाः प्रयत्नेन सर्वदा मोदकप्रियाः ॥ शिवप्रीतिकरा नित्यं शुद्धाः पंचविनायकाः ॥ ८१ ॥ क्षिप्रसिद्धि
करं क्षिप्रं गणेशं सुरवंदितं ॥ संपूज्य पूर्ववत्सम्यक् गच्छेदाशाविनायकं ॥ ८२ ॥ आशाविनायकं सम्यक् पूजयित्वा
ततः परं ॥ अर्कविघ्नेश्वरः सम्यक् पूजनीयः प्रयत्नतः ॥ ८३ ॥ पूर्ववत्पूजयित्वा तं तत्र सिद्धिविनायकं ॥ पूजनीयः
स्ततः सम्यक् चिंतामणिविनायकः ॥ ८४ ॥ सेनाविनायको प्येवं संपूज्यस्तदनंतरं ॥ दुर्गाविनायकस्यापि
पूजा कार्या ततः परं ॥ ८५ ॥ एवं संपूज्य विधिवद्भक्तिश्रद्धासमन्वितैः ॥ शैवाः शंकरतत्त्वज्ञाः भोजनीयाः प्र
यत्नतः ॥ ८६ ॥ एवं संपूजिताः सम्यक् प्रीतास्ते गणनायकाः ॥ काशीवासं प्रयच्छंति निर्विघ्नेनैव सादरं ॥ ८७ ॥
आज्येन कापिलेनैव सार्धलक्षत्रयाहुतीः ॥ हुत्वैतन्नामभिः सम्यक् सर्वविद्याधिपो भवेत् ॥ ८८ ॥ एतानि दिव्य
नामानि प्रतिवासरमादरात् ॥ पठित्वा गणनाथस्य पूजा कार्या प्रयत्नतः ॥ ८९ ॥ यस्य कस्यापि संतुष्टो गण
पः सर्वसिद्धिदः ॥ अत एव सदा पूज्यो गणनाथो विचक्षणैः ॥ ९० ॥ गणेशादपरो लोके विघ्नहर्ता न विद्यते
॥ तस्मादन्वहमाराध्यो गणेशः सर्वसिद्धिदः ॥ ९१ ॥ काशीनिवाससिद्ध्यर्थं विष्णुना पूजितः पुरा ॥ पुरा वि
घ्नेश्वरः सम्यक् पूजितो दंडपाणिना ॥ ९२ ॥ कर्कोटकेन नागेन गणेशः पूजितः पुरा ॥ शेषेण पूजितः पूर्वं
गणेशः सिद्धिदायकः ॥ ९३ ॥ काशीयात्रार्थमुद्युक्तो विधिर्विघ्नकुलाकुलः ॥ पूजयामास विघ्नेशं विधिवद्भक्तिपू
र्वकं ॥ ९४ ॥ सूर्येणाभ्यर्चितं पूर्वं चंद्रेणेंद्रेण च प्रिये ॥ देवैरन्यैश्च विधिवत् पूजितो गणनायकः ॥ ९५ ॥ मर्त्या
नाममराणां च मुनीनां च वरानने ॥ न सिध्यंते च कार्याणि गणेशाभ्यर्चनं विना ॥ ९६ ॥ काशीयात्राविधिं वक्ष्ये शृणु
सादरमंबिके ॥ नियमा बहवः संति काशीयात्रारतात्मनां ॥ ९७ ॥ ब्रह्मक्षत्रियविट्शूद्रैः स्वस्ववृत्त्या यथोचितं ॥
न्यायेनैव धनं सम्यगर्जनीयं प्रयत्नतः ॥ ९८ ॥ ब्राह्मणैः शुक्लवृत्त्यैव कर्तव्यो धनसंग्रहः ॥ शूद्रद्रव्यं न गृह्णीया
त् राजद्रव्यं च विद्धनं ॥ ९९ ॥ अयाचयेव विप्रैश्च याचया जीविभिर्द्विजैः ॥ दत्तमल्पमनल्पं च ग्राह्यं वित्तं हि

जोत्तमैः॥१००॥ गृहीत्वानत्रिधाकृत्वाभागेनैकेनमादरं॥ श्राद्धंकार्यंप्रयत्नेनततोमुंडनपूर्वकं॥१०१॥ कालभैरवमुद्दिश्यपदन्येषुर्द्विजोत्तमाः॥भोजनीयाः प्रयत्नेनशैवाश्चशिवप्रियाः॥१०२॥भोजनीयाः प्रयत्नेनमदर्थमपिशंकराः॥ ततोगणेशमुद्दिश्यभोजनीयाः शिवद्विजाः॥१०३॥ ततश्चदुर्गांसंपूज्यसर्वदुर्गविनाशिनी॥ पुनर्मल्लिंगममलंपूजनीयंप्रयत्नतः॥१०४॥ द्विजेभ्योबंधुवर्गेभ्योप्रतिगृह्याशिषस्ततः॥शेषंधनंगृहीत्वैवद्विजःसंतुष्टमानसः॥१०५॥पूर्णकुंभद्वयंलिंगंपूजितंकन्यकाद्वयं॥ दधिक्षीरफलान्नादिकृत्वाग्रेयत्नपूर्वकं॥१०६॥ततस्त्वयंसमुच्चार्योमंत्रःसर्वार्थसाधकः॥पूजयित्वाविशेषेणलिंगरूपिणमीश्वरं॥१०७॥ शिवगौरीपतेश्रीमन्भक्तवत्सलशंकर॥काशीयात्राकरिष्येहंनिर्विघ्नंकुरुसर्वदा॥१०८॥ ॥ अथगणेशमंत्रः॥ ॥ विघ्नेशभक्तवरदविघ्नराजगणाधिप॥ काशीयात्रांकरिष्येहंनिर्विघ्नंकुरुसर्वदा॥१॥ अथभैरवमंत्रः॥ ॥कालभैरवसर्वात्मन्कालनाथजगत्प्रभो॥काशीयात्रांकरिष्येहंनिर्विघ्नंकुरुसर्वदा॥२॥ अथदुर्गामंत्रः॥ ॥जयदुर्गेजगद्वंद्येजयदुर्गेशिवप्रिये॥काशीया०॥३॥ततोमांवृषभारूढंदिव्यमंगलविग्रहं॥मुक्तादामपरीतांगंमंगरूंप्रदमुत्तमं॥४॥गौरीभूषितवामांगमभयप्रदसत्तमं॥ ध्यात्वासम्यक्ततोगच्छेदन्यग्रामंशुभेदिने॥५॥निराहारेणनिर्गच्छेतमौनव्रतपरायणः॥ अगृहीत्वोपानहादीन्कीटानस्पृश्यभूगतान्॥६॥शिवगौरिपतेश्रीमन्विश्वनाथसदाशिव॥कल्याणदेतिसततंस्मरन्मंत्रमिमंजपन्॥७॥अदूरग्राममाश्रित्यप्रथमेदिवसेशुचिः॥पुनःशैववरान्सम्यक्भोजयित्वायथाविधिः॥८॥ भोक्तव्यंनियमेनैवस्वेनशिष्टंततःपरं॥ सायमभ्यर्च्यविधिनाशिवंसंध्यादिपूर्वकं॥९॥ याममात्रेशिवध्यानेकर्तव्यंविधिपूर्वकं॥ ततोनिद्रायथायोग्यंकर्तव्यविधिपूर्वकं॥१०॥ मंप्रोक्ष्यभुवमत्यल्पान्कुशानास्तीर्यसादरं॥ एकाकिनैवनियमान्निद्राकार्याप्रयत्नतः॥११॥ ततश्चपश्चिमेयामेनिद्रांत्यक्त्वाततःपरं॥

कृत्वाशौचादिकं सम्यक् ध्यात्वा मां परमेश्वरं ॥१२॥ स्नानादिकं ततः कार्यं लिंगं पूज्यं विशेषतः ॥ विघ्ने
शं भैरवं दुर्गां संपूज्य तदनंतरं ॥१३॥ शैवान्संपूज्य विधिवत् ततो गच्छेद्यथाविधि ॥ ध्यात्वा हृदि शिवं स
म्यक् जपन् पंचाक्षरं शुभं ॥१४॥ काशीमार्गगतैर्मर्त्यैः नग्नांघ्रियानपादुके ॥ यात्राफलं चतुर्थांशो नष्टं स्या
त्पादुकैर्यतः ॥१५॥ अर्धं नश्यत्यश्वयानात् यात्राफलमनुत्तमं ॥ काष्ठखट्वादियानैस्तु सर्वं नश्यति तत्फलं ॥
॥१६॥ मार्गे विलोक्य कीटादीन् गंतव्यं पथि यत्नतः ॥ नो चेद्यात्राफलं न्यूनं भविष्यति न संशयः ॥१७॥ या
त्राकाले विशेषेण यस्य कस्यापि देहिनः ॥ न देयान्येव दुःखानि विचार्य विधिमादरात् ॥१८॥ मौनमेव
सदा कार्यं कर्तव्यं शिवचिंतनं ॥ अनृतं नैव वक्तव्यं कदाचिदपि सर्वथा ॥१९॥ निंदान्यस्य न कर्तव्या न श्रो
तव्या च सर्वथा ॥ नग्नां स्त्रियं न वीक्ष्येत स्त्रीयामपि कदाचन ॥२०॥ ऋतुकालेऽपि संप्राप्ते स्वस्त्रिया सह सर्वथा ॥
नैकत्र शयनं कार्यं ब्रह्मचर्यव्रतेन चरेत ॥२१॥ प्रतिग्रहो न कर्तव्यो यात्राकाले तु सर्वथा ॥ नाशौचैरभिभा
षेत प्रमादेनापि सर्वथा ॥२२॥ अशौचपतितव्रात्यचंडालम्लेच्छपुल्कसैः ॥ कदाचिदपि यात्रायां नाभि
भाषेत सर्वथा ॥२३॥ कदाचिच्चेत्प्रमादेन यदि दृष्टा नराधमाः ॥ तदा शिव शिवेत्युक्त्वा भानुं पश्येद्यथा
विधिः ॥२४॥ प्रमादेन कदाचित्तैः स्पृष्टश्चेद्वसनान्वितं ॥ स्नानं कार्यं विधानेन मृत्तिकास्नानपूर्वकं ॥२५॥
रुद्राध्यायस्य चावृत्तिः कर्तव्या विधिपूर्वकं ॥ ततो रुद्राक्षभस्मादि धृत्वा गच्छेद्यथासुखं ॥२६॥ एवं प्र
यत्नतो नित्यं गंतव्यं विधिपूर्वकं ॥ यात्राकाले शुभैर्मर्त्यैः शैवैः शिवपरायणैः ॥२७॥ कालत्रयेऽपि
कर्तव्यं शिवलिंगस्य पूजनं ॥ मध्यान्हे शिवतुष्ट्यर्थं भोजनीयाः शिवार्चकाः ॥२८॥ ततः शिवकथाः श्रा
व्याः श्रोतव्याः पापनाशकाः ॥ आसायमति यत्नेन ततः संध्या शिवार्चनं ॥२९॥ एवं यात्रारतैः शैवैः मद्भक्तै
स्तु पदे पदे ॥ अश्वमेधफलं पूर्णं प्राप्यते नात्र संशयः ॥३०॥ तथा यात्रापरं शैवं दृष्ट्वा तृप्तिं नरः शिवे ॥ अ

त्यंतंमोदमानास्तेनत्यंकुर्वंतियत्नतः॥३१॥ नरकेपतितानस्मानुद्धरिष्यत्ययंसुतः॥ काश्यांश्राद्धंविशेषेणक
रिष्यतिनसंशयः॥३२॥ ज्ञानवापीजलंरम्यंधिक्कुलामृतमुत्तमं॥ दास्यत्यस्मभ्यममलंअयंनास्त्यत्रसंशयः॥
३३॥ ज्ञानवापीतटेरम्येसोयमस्मभ्यमादरात्॥ श्राद्धंकृत्वाविधानेनपिंडदानंकरिष्यति॥ ३४॥ मणिकर्णी
जलेस्नात्वाश्राद्धंकृत्वाविधानतः॥ पिंडदानमयंसम्यक्करिष्यतिनसंशयः॥३५॥ वीरेशकुंडेविमलेयातनाभ
यनाशके॥ श्राद्धंकरिष्यतिश्रीत्यातर्पणंचकरिष्यति॥ ३६॥ श्रीमत्पशुपतीशस्यकुंडेस्नात्वायथाविधि॥
श्राद्धंकृत्वाविधानेनपिंडदानंकरिष्यति॥ ३७॥ स्नात्वायंशिवगंगायांवंशोद्धारःकरःसुतः॥ श्राद्धंकृत्वा
विधानेनपिंडदानंकरिष्यति॥ ३८॥ अयंकर्कोटकेकुंडेपिदुःखविनाशके॥ स्नात्वाश्राद्धंपिंडदानंक
रिष्यतिनसंशयः॥ ३९॥ श्रीमदोंकारकुंडेपिस्नात्वाश्राद्धंकरिष्यति॥ पिंडदानमयंकृष्णातिलैःसार्धंकरि
ष्यति॥ ४०॥ केदारकुंडेविमलेपिंडदानंकरिष्यति॥ जलंकृष्णतिलैःसार्धंवहुदास्यत्यसंशयः॥ ४१॥ प
ञ्चगंगायज्जलंस्पष्टाकाशीस्थमघनाशकं॥ दास्यत्यस्मभ्यममलंदुःखत्याज्यंततःपरं॥ ४२॥ काश्यांतुलील
यायंमत्पिंडंचकदाचन॥ दास्यत्येवनसंदेहःपितृतुष्टिक्षयदुःखहं॥ ४३॥ अस्मत्गोत्रसमुत्पन्नःका
शीयास्यत्ययंमुदा॥ अस्माभिःसावधानेनरक्षणीयःप्रयत्नतः॥ ४४॥ एतस्यकंटकादिभ्योयथादुःखं
नजायते॥ तथाप्रयत्नतःसम्यक्रक्षणीयोयमादरात्॥ ४५॥ अल्पल्पैरेवदिवसैरघोरनरकादयं॥ उद्ध
रिष्यतिदत्वास्मानकाशीस्थंजलमेववा॥ ४६॥ घोरयातनाभीतिरयमस्मत्कुलोद्भवः॥ काशींगच्छतितत्रा
यंसम्यक्श्राद्धंकरिष्यति॥ ४७॥ नास्मन्मार्गेसमायांतुयमदूताभयानकाः॥ अयंगच्छतिमद्वंशःकाशींप्रति
शिवार्चकः॥ मायांतुसर्वथास्माकंनिकटेयमकिंकराः॥ अयमस्मत्कुलोद्भूतःकाशींप्रतिगमिष्यति॥ क
स्यचित्पितरःपूर्वंनरकेपतितास्थिताः॥ घोराण्यनंतपापानितैःकृतानिपुराबलात्॥ ५०॥ केनचिद्वंशसंभूत्वा

श्रीशिव

णि निहि तानि दिने दिने॥ गोमांसमेव बहुधा भक्षितं तेन सादरं॥५१॥ ब्रह्महत्यासहस्राणि गोहत्याशतकानि
च॥ अश्वहत्यासहस्राणि पुरा तेन कृतानि हि॥५२॥ यावज्जीवं कदाचिद्वा तेनैव हि दुरात्मना॥ विप्रजन्मा
पि संप्राप्य न स्नानं तीर्थवारिणा॥५३॥ संध्या न वंदितानेन सर्वपापापनोदिनी॥ न जप्तैव हि गायत्री निर्मला
साशिवात्मिका॥५४॥ सर्वपापहरं शुद्धं भसितं सितमुत्तमं॥ न धृतं विधिवत्तेन शिवमंत्राभिमंत्रितं॥५५॥ क्षणे
क्षणेपि रुद्राक्षाः धृताः पापविनाशकाः॥ तेन पापात्मना शुद्धाः लीलयापि न धृताः॥५६॥ सर्वार्थदायकं
नित्यं विहितं लिंगपूजनं॥ सर्वाघनाशकं तेन न कृतं च कदाचन॥५७॥ बिल्वैर्मनोहरैः शुद्धैः कोमलैः शि
वसंमतैः॥ न कृतं पूजनं शंभोस्तेनैव हि कदाचन॥५८॥ धूपदीपादिभिः सम्यक् तेन नाभ्यर्चितः शिवः॥
अर्चितं शिवलिंगं च तेनैव न निरीक्षितं॥५९॥ प्रणामो दंडवद्भूमौ एको वा पापनाशकः॥ शिवार्थे न कृतं
तेन कदाचिदपि सादरं॥६०॥ नृत्यप्रदक्षिणाद्यैश्च सर्वपापविनाशकैः॥ नाराधितो महादेवः तेनैव
हि दुरात्मना॥६१॥ वेदोपगीतममलं मोक्षप्रदमनुत्तमं॥ शिवनाम शिवाकारं न जप्तं तेन सर्वथा॥६२॥
स्वहृत्सिंहासनारूढं कृत्वा देवोत्तमं शिवं॥ ध्यानं च कृतं तेन न कदाचिदपि सर्वथा॥६३॥ दिव्याः शिवकथाः
श्राव्याः सर्वपापापनोदकाः॥ तेनैव पापरूपेण कदाचिदपि न श्रुताः॥६४॥ शिवलिंगार्चकैः शुद्धैः शैवैः
शिवपरायणैः॥ प्रीतिश्च न कृता तेन शैवानभ्यर्चिताः पुरा॥६५॥ शिवतीर्थाटनं शुद्धमघघ्नं च क्षणे
क्षणे॥ कदाचिदपि तेनैव न कृतं पापकारिणा॥६६॥ शिवालयस्य निर्माणं स्वर्गादिफलसाधनं॥ न कृ
तं तेन न दुष्टेन धनिनापि कदाचन॥६७॥ ईदृशा बहवो नष्टाः तस्यैव पितरः स्थिताः॥ तेषामघोरनरके वा
सः क्षणमभूत्पुरा॥६८॥ आचंद्रार्कमघोरेषु नरकेषु सदा स्थितिः॥ एतदेकेन पापेन युक्ता भवंति सर्वथा
॥६९॥ तत्कृतानेकपापानां निष्कृतिः शास्त्रमार्गतः॥ अनेकब्रह्मकल्पैर्वा न भविष्यति सर्वथा॥७०॥ बहुका

लमनेकेषुनरकेष्वेवसर्वदा॥ वसतिःसंभ्रमतालेयामशैवानांदुरात्मनां॥७१॥ ततस्तद्धंसराजः श्रुधः शैवःशि
वपरायणः॥ अयाचितव्रतेनैववयसन्नियमपूर्वकं॥७२॥ न्यायेनात्यंधनंश्रुध्वंसंपाद्यतदनंतरं॥ काशीं
तुंममुक्षुर्द्धंसोब्रवीन्नियममास्थितः॥७३॥ काशीमुद्दिश्यनियमाच्छ्रोशार्धंसमुपागतः॥ तदातत्पितरःस
र्वेनरकेभ्योविनिर्गताः॥७४॥ तिनकाश्यांझानवाप्यांपिंडदानंकर्तनतः॥ तेनतत्पितरःसर्वेब्रह्मलोकंययु
र्मुदा॥७५॥ अस्माभिस्मर्थनेनतुभवतांकिंनसंस्मृतिः॥ चिंनयंतुनसंस्कारोनुग्रःसभवतांधुवं॥७६॥मा
यातुनिकटेयूयमस्माकंयमकिंकराः॥ तद्विचार्यैवबद्धुधादूरंयांत्वतिशीघ्रतः॥७७॥यद्यस्मिन्निकटे
यूयमायास्यंतितदायम॥ भवतांरक्षणंशास्त्रानकरिष्यतिसर्वथा॥७८॥ यांतुदूरंयमभटाःसशास्त्रा
क्रूरविग्रहाः॥ काशींगच्छतितीव्रेणमहंसयःपुरुषर्षभः॥७९॥ मादृशोयंतुशास्त्राणितूष्णींतिष्ठंतुदूर
ताः॥ अयमहंसराजोधन्योकाशींप्रतिगमिष्यति॥ ८०॥ वक्तव्योद्ययमोस्माभिर्महंसयःशैवपुंगवः॥ काशींगच्छति
तीव्रेणेत्यतोयांतुयमप्रियाः॥८१॥ यमोप्यस्मद्वचःश्रुत्वाभीतिंयास्यत्यसंशयं॥ भवंतोदूरतोयांतुप्राणेच्छा
यदिवस्तदा॥ ८२॥ इदानीमेवधामनःसमायास्यतिसादरं॥ पूजामस्मभ्यममलःकरिष्यतिनसंशयः॥८३॥
शैवोमहंसराजःसम्यक्काशींगच्छतिसादरं॥ पूर्वमस्मत्कृताःसर्वादग्धाःपातककोटयः॥ ८४॥ इतितत्पित
रःसर्वेवदंतःसादरंमुहुः॥ नृत्यंकुर्वंतिसततंप्रस्तुवंतिचतादृशं॥ ८५॥ एवंनियममासाद्यकाशींसंप्राप्यसा
दरं॥ काशींसंप्राप्यविधिवत्कुर्यात्तदनुमुंडनं॥ ८६॥ दंडपाणिप्रसादेनतस्मिन्नेवदिनेशुभे॥ स्नानंका
र्यंप्रयत्नेनज्ञानवापीजलेशुभे॥ ८७॥ आमद्रव्येणविधिवच्छ्राद्धंकर्तव्यमादरात्॥ हिरण्येनाथवाश्रा
द्धंकुर्यात्तद्दिनएवहि॥८८॥ हव्यश्यामाकनीवारयवचूर्णादिभिःक्रमात्॥ पिंडदानंयथाशास्त्रंक
र्तव्यंनियमेनहि॥ ८९॥ पितुःपिंडत्रयंदेयंमातुरप्यादरात्तथा॥ अन्येषांतुयथायोग्यंएकैकंस्याद्

थाक्रमं॥९०॥ततः कृष्णतिलैः शुद्धैः कुर्यात्तु पितृतर्पणं॥ ज्ञानवापीसमभ्यर्च्य ज्ञानेशं तु समर्चयेत्॥
विनायकान् ढुंढिराजं समभ्यर्च्य ततः परं॥ मुक्तिमंडपमासाद्य ध्यात्वा मामजमव्ययं॥९२॥ नंदिकेशं स
मभ्यर्च्य द्वारपालानपि क्रमात्॥ ततो मत्पूजनं कार्यं स्वशक्त्या च यथाविधि॥९३॥ ततो वीरेश्वरकुंडा दौ
स्नानं कृत्वा यथाक्रमं॥ श्राद्धं पिंडप्रदानादि कर्तव्यं विधिपूर्वकं॥९४॥ श्राद्धावशिष्टान्नं द्विजान्वा भक्षयि
त्वा तिलान्ततः॥ कुर्याज्जागरणं सम्यक् रात्रिं तु हरिवासरे॥९५॥ ततस्तु पश्चिमे यामे पंचक्रोशाद्बहिः व्र
जेत्॥ कृत्वा शौचादिकं तत्र यथाशास्त्रमनुक्रमात्॥९६॥ ततः काशीं समागम्य स्नात्वा तीर्थोदके शुभे॥
संध्यादिनित्ययात्रां तं कर्म कृत्वा यथाक्रमं॥९७॥ शैवान्द्विजवरान्श्रेष्ठान्नाहूय शिवविग्रहान्॥ ते
षामामंत्रणं देयं यथाशास्त्रं यथाक्रमं॥९८॥ ततः स्नात्वा विधानेन श्राद्धं कार्यं प्रयत्नतः॥ स्वाद्वन्नैः शिव
भक्तास्ते भोजनीया यथाविधि॥९९॥ शैवं भोक्तारमुत्कृष्टं निकटस्थमनुत्तमं॥ त्यक्त्वा यः कुरुते श्राद्धं त
द्व्यर्थं नात्र संशयः॥१००॥ अष्टदिक्ष्वष्टतीर्थानि ज्ञानवाप्यां वसंति च॥ तेषु स्नानं यथाशास्त्रं कर्तव्यमीति
पूर्वकं॥१॥ अष्टदिक्ष्वपि कर्तव्यमेकैकत्र यथाक्रमं॥ पंचधा शास्त्रमनघैः स्नेश्चापि यथाविधि॥२॥ पूर्वदिग्भाग
मारभ्य सव्येनैव यथाक्रमं॥ स्नानं श्राद्धादि कर्तव्यं अप्रमादेन सर्वथा॥३॥ वेदगौरी ज्ञानधर्ममोक्षपुण्यकरा
णि च॥ पितृवारुणतीर्थानि ज्ञेयान्यष्टौ शुभानने॥४॥ चत्वारिंशद्यथाशास्त्रं ज्ञानवापीतटे शुभे॥ श्राद्धानि नि
यमेनैव कर्तव्यानि न संशयः॥५॥ एतेषु च समाप्तेषु तदनंतरमादरात्॥ पंचश्राद्धानि कार्याणि विधिवन्मुक्ति
मंडपे॥६॥ एकैकश्राद्धमेकैकदिने कार्यं यथाक्रमं॥ नैकस्मिन्दिवसे नैकं श्राद्धकर्म विधीयते॥७॥ श्राद्धा
न्येवं विधायैव ज्ञानवापीतटे शुभे॥ मणिकर्णितटे कुर्यात्ततः श्राद्धं यथाविधि॥८॥ वीरेश्वरकुंडनिकटे ततः
कार्यं प्रयत्नतः॥ ततः पशुपतीशस्य कुंडं प्राप्ते मनोहरे॥९॥ कालकुंडतटे कार्यं तदनंतरमादरात्॥ शिवसं

गातटे कार्यं ततः सम्यक् यथाविधि ॥१०॥ ततः कर्कोटकस्यापि कुंडमाने मनोहरे ॥ ततः पिशाचतीर्थेपि कर्तव्यं वि
धिपूर्वकं ॥११॥ ओंकारकुंडमाने धि कर्तव्यं तदनंतरं ॥ ततः पिलिपिलाकुंडे कर्तव्यं विधिपूर्वकं ॥१२॥ हंसती
र्थतटे कार्यं तदनंतरमादरात् ॥ वक्रतुंडेश्वरकुंडेपि तत्र कार्यं प्रयत्नतः ॥१३॥ ततः केदारकुंडेपि कर्तव्यं विधिपू
र्वकं ॥ अर्ककुंडे ततः कार्यं चंद्रकूपे ततः परं ॥ १४॥ ततः सिद्धेश्वरकुंडेपि दुर्गाकुंडे ततः परं ॥ कामाक्षीकुंडनिक
टे ततः कर्तव्यमादरात् ॥१५॥ सार्धाष्टकोटिलिंगानि कुंडान्यपि वरानने ॥ श्रीमदंतर्गृहे रम्ये संति दिव्यानि
भूरिशः ॥१६॥ अंतर्गृहे बहिर्देवि लिंगसंख्या न विद्यते ॥ कुंडानामपि दिव्यानां संख्या नास्त्येव सर्वथा ॥१७॥
तेषु सर्वत्र कर्तव्यं श्राद्धं यद्यपि सर्वथा ॥ तथापि शक्तिहीनेस्तु श्राद्धं कार्यं कचित्कचित् ॥१८॥ उक्तस्थलेषु कर्तव्यं
अवश्यंपि तत्परैः ॥ श्राद्धमन्नेन विमलैर्यथाशास्त्रं यथाक्रमं ॥१९॥ उक्तस्थलेषु सर्वत्र पंचवारं यथाक्रमं
॥ श्राद्धं कर्तव्यमन्नेन सर्वथैव प्रमादतः ॥२०॥ अशक्तैस्तु त्रिवारं वा श्राद्धं कर्तव्यमादरात् ॥ द्विवारमधमे नापि
कर्तव्यं नात्र संशयः ॥२१॥ श्राद्धान्येवं यथाशास्त्रं कृत्वा तदनु सादरं ॥ स्वशक्त्या शैववर्याणां पूजा कार्या प्रयत्न
तः ॥२२॥ शैवक्षेत्रमिति ज्ञात्वा काशीं शैवजनाश्रयं ॥ शैवानुरागः कर्तव्यो धनधान्यादिभिः शुभैः ॥२३॥
तुष्टो भवाम्यहं नित्यं शैवानामेव पूजया ॥ तस्मान्मदर्थे शैवानां पूजा कार्या प्रयत्नतः ॥२४॥ काश्यां शैवोत्तमे
दत्तमेकं वाग्रासमुत्तमं ॥ अनंतफलदं नूनं भवत्येव न संशयः ॥२५॥ दुर्लभेयं यथा काशी तथा शैवो
पि दुर्लभः ॥ अनेकजन्मतपसा शैवो भवति मानवः ॥२६॥ यथा सदाशिवादन्यो नास्ति देवोत्तमः शिवे ॥
तथा शैवद्विजादन्यो नास्ति विप्रोत्तमो भुवि ॥२७॥ यथा काशीसमं क्षेत्रं नास्ति ब्रह्मांडगोलके ॥ तथा शैवसमो वि
प्रो नास्ति ब्रह्मांडगोलके ॥ २८॥ चरलिंगाय शैवाय यः पूजां न करिष्यति ॥ स एव यातना भोक्ता स एव शाधकुलाश्रयः ॥
॥ तस्मात्काश्यां विशेषेण शैवाः शिवपरायणाः ॥ पूजनीयाः प्रयत्नेन शिवप्रीत्यर्थमादरात् ॥३०॥ पुराकश्चिद्द्वि

जवरोविमुक्षः शैवपुंगवः॥ शिवैकशरणोनित्यंलिंगपूजापरायणः॥३१॥ दीर्घपिंगजटाधारीसदारु
द्राक्षभूषणः॥ भस्मितोधूलितवपुस्त्रिपुंड्रांकितमस्तकः॥३२॥ शैवशास्त्रार्थतत्वज्ञः शिवतत्वैक
चिंतकः॥ निर्ममोनिर्मलः शांतोवीतरागोविचक्षणः॥३३॥ मलयाचलदेशेषुनिवसन्सकदाचन॥
कस्थानमुत्तमंयानिस्यंइतिचिंतापरोभवत्॥३४॥ कवामुक्तिप्रदंक्षेत्रं कवासर्वार्थसाधकं॥ कसर्ववेदवेदां
तवेद्यमाद्यंतवर्जितं॥३५॥ कवाबहूनिलिंगानिसंतिदिव्यानिसर्वदा॥ कवातीर्थोदकंरम्यंस्नानयोग्य
मघापहं॥३६॥ कवाशिवपराः शैवाः शिवलिंगार्चनप्रियाः॥ कवाशिवकथालापाः श्राव्याःपापविनाशकाः॥
३७॥ कवाशिवशिवेत्येवंध्वनिः संश्रूयतेसदा॥ कवाबिल्ववनंरम्यंशिवप्रियकरंशुभं॥३८॥ कवारम्यंशि
वस्थानंनेत्रोत्सवकरंपरं॥ कवाशिवेशशास्त्रार्थेतिवदंतः संतिसाधवः॥३९॥ कवापाशुपताः शुद्धाः शैवे
कपरदेवताः॥ कवाकर्णगलभ्राजद्रुद्राक्षभरणाः शुभाः॥४०॥ कवाभस्मलसद्भ्राजत्फाललोचनपू
र्वकाः॥ कवाब्रह्मादयोदेवापूजयंतिसदाशिवं॥४१॥ कवागंधर्वयक्षाद्याः पूजयंतिमहेश्वरं॥ कवा
वसंतिसर्वेपियामदेवादयोद्विजाः॥ कवातिष्ठतिशैवेंद्रः कपिलः सिद्धसेवितः॥ कवाघोरंतपस्त
प्तंविष्णुनासर्वसिद्धिदं॥४३॥ कवापूर्वंतपस्तप्तंसर्वैरपिमुमुक्षुभिः॥ कवापंचाक्षरोमंत्रोमहेशेनो
पदिश्यते॥४४॥ कवामरणमात्रेणमुक्तिः शैवैरवाप्यते॥ कवालीलांमहादेवः करोतिशिवयासह॥४५॥
कवाश्रीनंदिकेशादिगणनाथाःशिवप्रियाः॥ कवाधर्मरताः शुद्धाः शिवलिंगार्चनप्रियाः॥४६॥ उक्तसर्वगु
णोपेतमन्यत्क्षेत्रंनसर्वथा॥ उक्तसर्वगुणोपेताकाशीतिष्ठतिसाध्रुवं॥४७॥ शीर्णशरीरमेतन्मेपादेना
स्तिबलंमम॥ मयादूरस्थिताकाशीप्राप्तव्याकथमुत्तमा॥४८॥ अदूरस्थमपिस्पष्टंवस्तुनैवहिदृश्यते॥ नि
कटोच्चारितोपीष्टः शब्दोनंश्रूयतेतथा॥४९॥ भुज्यतेस्वल्पमप्यन्नंतन्नजीर्यतिसर्वथा॥ मयादूरस्थिता

काशीप्राप्तव्या कथमुत्तमा ॥५०॥ वक्तुं वाक्यानि नो यान्ति मार्गप्रश्नार्थमाशुभे ॥ वित्तं नास्त्येव भक्ष्यार्थं न
पूर्वं धनमार्जितं ॥५१॥ मयादूरस्थितेनाकाशी प्राप्तव्या कथमुत्तमा ॥ काशीयात्रार्थमुद्योगो यौवनेन कृतो
मया ॥५२॥ अतः परं कथं प्राप्या काशी मोक्षप्रदा शुभा ॥ काशीप्रभावो न मया पूर्वं ज्ञातः कथंचन ॥५३॥
इदानीं जीर्णदेहेन काशीप्राप्या कथं मया ॥ यावदंघ्रिबलं यावच्छ्रोत्रनेत्रबलं परं ॥५४॥ यावद्बाहुबलं ता
वत्काशी प्राप्या नरोत्तमैः ॥ यावन्नाशो न देहस्य यावन्न्यायार्जितं धनं ॥५५॥ तावदेव नरैः काशी प्राप्तव्या मु
क्तिदायिनी ॥ यावत्पुष्टिः शरीरस्य यावन्न व्याधिपीडनं ॥५६॥ यावदस्त्येन संतोषः तावत्काशीं समाश्रये
त् ॥ येन नालोकिता काशी स नरो नश्वरः स्मृतः ॥५७॥ किं नु विट्भक्षणप्रीतः सारमेयो न संशयः ॥ येन ना
भ्यर्चितं लिंगं श्रीमद्विश्वेश्वराभिधं ॥५८॥ स कुलीनोपि तज्जन्म व्यर्थं नास्त्यत्र संशयः ॥ एको वा यदि
यद्वंशे काशीं प्रीतो न गच्छति ॥ तत्कुलं पुल्कसकुलं भवत्येव न संशयः ॥ येन नालोकिता काशी येन नाभ्य
र्चितः शिवः ॥ सोपि किं मनुजः किं नु क्रिमिर्विष्ठागतो यथा ॥६१॥ सर्वराष्ट्राधिपो राजा जितशक्रोपि सर्वथा
॥ न काशीदेशकीटेन सदृशः सत्यमुच्यते ॥६२॥ आधीतवेदशास्त्रोपि काशीदर्शनवर्जितः ॥ न काशीदे
शकीटेन सदृशः सत्यमुच्यते ॥६३॥ अनेकधनदो नित्यं महादानप्रदोपि वा ॥ न काशीदे॰ ॥६४॥ वरं
भिक्षाटनं काश्यां नान्यत्र राष्ट्रशासनं ॥ न काशीदे॰ ॥६५॥ वरं शाकाशनं काश्यां नान्यत्र शाल्यशनं वरं ॥ जल
पानं वरं काश्यां सर्वौषधविनाशकं ॥६६॥ वरं नान्यत्रामृतस्यापि पानं सत्यं न संशयः ॥ अत्र पुष्टिकरं भैक्ष्यं
न वरं घृतपाचितं ॥६७॥ देहशुद्धिकरं काश्यां जीर्णपर्णाशनं वरं ॥ मां नयाखिलदेवेश काशीं विश्वेश्वर प्रभो ॥
॥६८॥ दीनानाथैकशरणकरुणाकरशंकर ॥ हरधीरामराधारमामनाधारमुद्धर ॥६९॥ अपारघोरसंसा
रपारावारादतितरं ॥ नोपेक्षा मयि कर्तव्या सर्वथा सदयाप्रभो ॥७०॥ काशीं प्रापय मामीश शरणागतवत्सल ॥

कदाकाशींगमिष्यामि द्रक्ष्येविश्वेश्वरंप्रभुं ॥ ७१ ॥ कदाधन्योभविष्यामिकदाशंभुःप्रसीदति ॥ कदावाशेष
पापौघविनाशकरमुत्तमं ॥ ७२ ॥ श्रीविश्वेश्वरलिंगस्यपार्श्वेनिर्णेजनोदकं ॥ दंडपाणिप्रसादेनज्ञानवाप्यां
कदामुदा ॥ ७३ ॥ एकंवामज्जनंसम्यक्करिष्याम्यघशांतये ॥ कदावधीरितसुधैः ज्ञानवापीजलैरहं ॥ ७४ ॥
पितृमुक्तिप्रदैः शुद्धैः करिष्येतर्पणंमुदा ॥ प्रदक्षिणंत्रयंवापिकृत्वासम्यग्यथाविधिः ॥ ७५ ॥ कदावाविश्वना
थस्यप्रणामंकरवाण्यहं ॥ कदाशिवप्रसादेनमणिमंडलमंडितं ॥ ७६ ॥ मुक्तिमंटपमासाद्यवसामिक्षणमादरा
त ॥ कदाढुंढीशमममलंउमापुत्रमघापहं ॥ ७७ ॥ नवदूर्वांकुरैः शुद्धैः पूजयामिमनोहरैः ॥ श्रीमद्विश्वेश्वरेलिंगे
ब्रह्मविष्ण्वादिपूजिते ॥ ७८ ॥ कदापूजांकरिष्यामिबहुबिल्वदलैः शुभैः ॥ वीरेश्वराभिधंलिंगंकदाद्रक्ष्येम
नोहरं ॥ ७९ ॥ कदापशुपतीशंचपश्यामिसकलार्थदं ॥ श्रीकालभैरवंदेवंदेवानामपिशासकं ॥ ८० ॥ कदा
पापौघनाशार्थं द्रक्ष्येयक्षादिसेवितं ॥ विघ्नांधकारमार्तंडमंडलोपममुत्तमं ॥ ८१ ॥ वक्रतुंडेशमनघंकदा
द्रक्ष्येशिवप्रियं ॥ शिवगंगाजलेरम्येसन्मंगलकरेशुभे ॥ ८२ ॥ कदास्नानंकरिष्यामितर्पणंचयथाविधि ॥
अशेषविषशाल्यर्थंजन्मरोगौघधेपरे ॥ ८३ ॥ कदाकर्कोटकेतीर्थेकरिष्येस्नानमादरात ॥ श्रीमदोंकारनाथं
चकदापश्यामिसादरं ॥ ८४ ॥ ओंकारतीर्थेचकदाकरिष्येस्नानमादरात् ॥ कदापिलपिलातीर्थेस्नात्वासंत
र्प्यपूर्वजान ॥ ८५ ॥ त्रिलोचनेशमाराध्यंकदाद्रक्ष्येमनोहरं ॥ कदास्नात्वाहंसतीर्थेकृत्तिवासेश्वरंप्रभुं ॥ ८६ ॥
पूजयित्वाविधानेनध्वस्तपापोभवाम्यहं ॥ कदाकेदारकुंडेपिस्नात्वाभ्यर्च्यपितॄन्मुदा ॥ केदारेश्वरमभ्य
र्च्यतुष्टचित्तोभवाम्यहं ॥ स्नात्वालोलार्ककुंडेपिलोलार्कंशंप्रणम्यच ॥ ८८ ॥ कदापुण्यप्रभावेनद्रक्ष्याम्य
र्कविनायकं ॥ नत्वासिद्धेश्वरंसम्यक् दुर्गाकुंडेमनोहरे ॥ ८९ ॥ स्नात्वादुर्गांजगद्वंद्यांकदाद्रक्ष्येशिवप्रियां ॥
सर्वसिद्धिप्रदैःसिद्धैः कामाक्षीतीर्थवारिभिः ॥ ९० ॥ स्नात्वातत्रकरिष्यामिकदातर्पणमादरात ॥ नवबिल्वदलैः

मुदेः कामाक्षींसादरंमुदा॥९१॥कदासमर्चयिष्यामिसर्वाभीष्टप्रदायिनीं॥अन्नपूर्णामनन्तानामन्नदात्रींभया
पहां॥कदाद्रक्ष्यामिसुभगांवरदानविचक्षणां॥कदातपःकरिष्यामिज्ञानवापीतटेशुभे॥९३॥शिवभावंप्रपद्यामिशं
करानुग्रहात्कदा॥कदाशिवमहेशानपार्वतीरमणप्रभो॥९४॥महादेवेतिविलपनकथयांत्यक्ष्येतनुंमुदा॥एव
मुक्त्वासरक्षोपिकृत्वाशांकरपूजनं॥९५॥शनैःशनैराजगामकाशींप्रतिशिवार्चकः॥काशीमागत्यसततोदंड
पाणिप्रसादतः॥९६॥ज्ञानवापीजलेशुद्धेचकारस्नानमादरात्॥ततश्चकारविमलःश्राद्धमन्नेनसादरं॥पिं
डदानंचपिंडेनचकारविधिपूर्वकं॥तदातत्पितरःपूर्वंअघोरेनरकेस्थिताः॥९८॥नरकादुत्थिताःसर्वेसा
र्धार्बुदमितास्तदा॥ततोयमभटाःसर्वेयममूचुर्भयानकाः॥९९॥ ॥यमभटाऊचुः॥ ॥विनेवकारणंकिंचि
न्नरकादुत्थिताइति॥ततोविलोक्यतान्सर्वान्नरकादुत्थितान्पितॄन्॥१००॥यमःप्रोवाचवचनंकृतांज
लिपुटास्तथा॥किंभवद्वंशजेःशैवेःपुण्यंकृतमघापहं॥१॥कथमुद्धरणंजातंभवतामितिसादरं॥ ॥ ॥
पितरऊचुः॥शैवेनास्मद्वंशजेनकाशींप्रतिसमागतं॥ज्ञानवाप्यांकृतंश्राद्धंयथाशास्त्रंयथाक्रमं॥शैवोत्तमे
नशैवेनवयंपापकुलाश्रयाः॥उद्धृतायमसर्वज्ञयास्यामोब्रह्मणःपदं॥३॥इतितद्वचनंश्रुत्वायमःसंतुष्टमान
सः॥पूजांचकारसर्वज्ञोयथाक्रममतंद्रितः॥४॥ततोरत्नविमानानिदत्वातेभ्योयमःस्वयं॥देवेंद्रलोकपर्यंत
तैःसहैवजगामसः॥५॥तदाकोलाहलोभूयान्नभूदत्यद्भुतस्ततः॥पुष्पवृष्टिरभूद्दिव्यादिव्यगंधसमन्विताः॥
॥६॥ततस्तानमलान्दृष्ट्वादेवेंद्रःप्रीतमानसः॥रत्नासनेषूपविश्यचक्रेपूजांयथाक्रमं॥७॥ततस्तेपूजिता
स्तेनदेवेंद्रेणापिसादरं॥ब्रह्मलोकंययुःप्रीताःदेवेंद्रेणापिसंयुताः॥८॥पितॄन्दृष्ट्वाविमानस्थान्ब्रह्माप्रत्यु
ज्जगामतान्॥ततोनिश्चयधियायुक्तोनतामविधिवत्क्रमात्॥९॥रत्नासनेषूपवेश्यपूजाद्रव्येणसादरं॥चकार
विधिवत्पूजांविधिज्ञोविधिवत्क्रमात्॥१०॥ततोब्रह्मसभासद्भिःअतिविस्मयपूर्वकं॥एतेकेइतिसंपृष्टे।

जगादवचनंमुदा ॥११॥ अतिघोरतपोलभ्योब्रह्मलोकइतिप्रथा ॥ पूर्वमासीन्नसेदानींकिंवक्तव्यमतः
परं ॥१२॥ वनपर्णकुटीवायंब्रह्मलोकोमदाश्रयः ॥ सुलभोभून्मनुष्याणांअतिपातकिनामपि ॥१३॥
एतत्पातकसंघानाम्भियनानास्तिसर्वथा ॥ तादृशान्यपिघोराणिकृतानिबहुलानिहि ॥१४॥ सिकतावर्षधा
राणांतारकाणांकदाचन ॥ घ्राकातेगणनाकर्त्तुमेतेषांपातकस्यतु ॥१५॥ आब्रह्मकल्पपर्यंतंनरकेयदिसं
स्थितिः ॥ तथापिनैतत्पापानांनाशोभवतिसर्वथा ॥१६॥ ईदृशानांतुनरकेक्षणमात्रमपिस्थितिः ॥ अतिदुः
खकराघोरानजानेवकदाचन ॥१७॥ एतेषांभूरिभाग्येनकश्चिच्छुबोभवत्कुले ॥ तेनविध्युक्तमार्गेणकाशी
यात्राकृताशुभा ॥१८॥ ज्ञानवाप्यांविशेषेणपितृनुद्दिश्यशांकरः ॥ चकारविधिवत्श्राद्धंपिंडदानंचसादरं ॥
॥१९॥ तिरस्कृतामतैर्दिव्येज्ञानवापीजलेशुभे ॥ चकारतर्पणंशैवः शुभ्रकृष्णतिलान्वितैः ॥२०॥ तेनैवपुण्य
लेशेनतस्यैतेपितरस्ततः ॥ अघोरनरकंस्थित्वामत्लोकंसमुपागताः ॥२१॥ काश्यांशैवकृतंश्राद्धंज्ञानवाप्यांवि
शेषतः ॥ पितृमुक्तिप्रदंनूनंसत्यमेवोच्यतेमया ॥२२॥ काश्यांतत्कुरुजानेनकृतंश्राद्धमघापहं ॥ पि
तृणांमुक्तिदंश्रेष्ठंमहापातकिनामपि ॥२३॥ देवगंधर्वमनुजांयक्षाणामपिसर्वथा ॥ काश्येवमु
क्तिदानान्यंमुक्तिदंजगतीतले ॥२४॥ काश्यांमदावापः कुर्यात्पिंडदानंपितृन्प्रति ॥ सोपिधन्यः
पितृन्स्वीयानुध्दरिष्यत्यसंशयं ॥२५॥ काश्यांपादेनवाधस्नानंजलेदाश्यतिमानवः ॥ पित्रर्थंतेन
नसपितृनुध्दरिष्यत्यसंशयः ॥२६॥ काश्यांपिंडप्रदानेनपितृणांऋणबंधनात् ॥ मुक्तोभवतिपुण्या
त्मानसतद्दणभाक्भवेत् ॥२७॥ यः काश्यामतियत्नेनस्वपितृभ्योयथाविधि ॥ श्राद्धदोभवतिप्रीत्यासवंधोस
वेदासुरैः ॥२८॥ पुत्रः पितृविमुक्त्यर्थंकाश्यांश्राध्दंकरिष्यति ॥ यथाविधिप्रयत्नेनसपुत्रः पुत्रउच्यते ॥२९॥ पुत्रः
श्राध्दंविधानेनयः काश्यांनकरिष्यति ॥ सपुत्रोनभवत्येवपुत्रलक्षणवर्जितः ॥३०॥ अस्मद्गोत्रसमुद्भूतः

काश्यांयः कश्चनादरात्॥ न करिष्यति किं श्राद्धं स्वाद्वन्नैर्भक्तिपूर्वकं॥३१॥ काश्यां मत्कुलजो मर्त्यः पितॄणां
मुक्तिकारणं॥ सतिलं विमलं भक्त्या जलं किं वा न दास्यति॥३२॥ काश्यां भोजनकाले वाप्यस्य पितृभ्यः स्वधास्त्विति
॥ मुष्टिमात्रमपि प्रीत्या किमन्नं नैव दास्यति॥३३॥ काश्यां क्रीडारतो वापि मद्वंश्यः कश्चिदुत्तमः॥ मन्त्रेणाल्पकेनापि
सजलं किं न दास्यति सादरं॥३४॥ अस्माभिर्दुरदृष्टेन नरके स्थीयते न दा॥ काश्यां पिंडप्रदानेन कोवास्मानुद्धरि
ष्यति॥३५॥ अघोरयातना भेत्य स्थीयते स्माभिरन्वहं॥ कश्चित्काश्यां जलं दत्वा किमस्मान्नोद्धरिष्यति॥३६॥
इति घोरतरे क्रूरे नरके पतिता सदा॥ वदंति पितरः सर्वे विलुठंतो रुदंति च॥३७॥ एतद्दृष्टोपि सुभगः शैवः शिव
वरार्चकः॥ एकरवाभवत्तेन काशीं प्रति समागतः॥३८॥ काश्यां विधियुक्तमार्गेण पूर्वेन्यायार्जितैर्धनैः॥ स चक्रे विधि
वच्छ्राद्धं ज्ञानवापीतटे शुभे॥३९॥ तेनैव घोरनरकात्स्ते सर्वे समुद्धृताः॥ पुनरावृत्तिरहितं स्थानं संप्राप्य तत्रैव स
र्वदा॥४०॥ न प्राप्नुवंति पितरः काशीसलिलतर्पणात्॥ विना तेन न हि प्रीतिः सुधापानेपि सर्वथा॥४१॥ एते पू
ज्यतमा नित्यं भवतामपि सादरं॥ मया नु नित्यमेतेषां पूजा कार्या यथाक्रमं॥४२॥ इत्युक्त्वास्ते पितृन्द्दृक्वापि तृ
णां तु यथाक्रमं॥ पूजां चक्रुर्यथा शास्त्रं तत्र तत्रैव ते स्थिताः॥४३॥ अतो नियमतः कार्या काशीयात्रा वरानने॥
काशीतपः प्रभावेन यतो लभ्यानरोत्तमैः॥४४॥ शृणु वक्ष्ये विधिं सम्यक् पंचक्रोशप्रदक्षणे॥ मत्प्रदक्षिणमात्रे
ण नश्यत्यघकुलं क्षणात्॥४५॥ उपवासः प्रयत्नेन कार्यो मुंडनपूर्वकं॥ पंचगव्यं ततो ग्राह्यं स्नात्वा ज्ञानेशसंनिधौ
॥४६॥ ततोंतर्गृहयात्रापि कर्तव्या विधिपूर्वकं॥ मुक्तिमंडपमासाद्य ततः संकल्पमाचरेत्॥४७॥ करिष्ये विश्वना
थाहं पंचक्रोशप्रदक्षिणं॥ आज्ञां देहि कृपासिंधो सर्वपापापनुत्तये॥४८॥ निष्ठीवनं कृतं काश्यां दत्तश्च चरणं म
या॥ लिंगेष्वेव सदाशंभो तत्पापं शांतिमेष्यतु॥४९॥ काश्यां जलचराः केचित्पादघातेन संहताः॥ करेण निहताः के
चित्तत्पापं शां०॥५०॥ काश्यामन्नार्थिनामन्नं शाकेनापि मया शिव॥ न दत्तं लोभमासाद्य त०॥५१॥ अशक्तेनैक

दासंम्पगंतगेंहम्प्रदक्षिणं॥मयान कृतमीशानत०॥५२॥ कदाचिदन्नतावाणीनिःसृतामन्मुखाच्छिव॥सर्वपु
ण्यहरंशंभोतत्पाप०॥५३॥ कदाचिन्नकृतं देवाच्छैवंवर्यस्य वंदनं॥ सर्वपापहरं शंभो तत्पा०॥५४॥ कदाचिदु
दकंपीनमकृत्वाभस्मधारणं॥प्रमादेनमहादेवतत्पापं०॥५५॥ कदाचिच्छिवलिंगस्यनिर्णेजनजलंशुभं॥
नपीतंपार्वतीनाथतत्पापं०॥५६॥ कदाचिद्बिल्वपत्रेणभ्रमादेवहिसर्वथा॥लिंगंनाभ्यर्चितंशंभोतत्पापं०॥५७॥
ज्ञानवापीजलेरम्येभ्रमेणैवकदाचन॥नस्नानंकृतमीशानतत्पापं०॥५८॥ कदाचिन्नकृतंशंभोदंडपाण्य
र्चनंमया॥नार्चितोढुंढिराजोपितत०॥५९॥ वीरेश्वरोभ्रमेणैवकदाचिन्नार्चितोमया॥सर्वार्थदःकृपासिंधो
तत्पापं०॥६०॥ श्रीमान्पशुपतीशोपिपशुपाशविमोचकः॥कदाचिन्नार्चितःशंभोतत०॥६१॥ श्रीकालभैरवः
शास्ताभ्रमेणैवकदाचन॥नाराधितोमहादेवतत्पापं०॥६२॥ प्रचंडविघ्नसंहर्तावक्रतुंडेश्वरोमया॥कदा
चिन्नार्चितःशंभोतत्पा०॥६३॥ शिवगंगाजलेस्नानंकदाचिन्नकृतंमया॥अलसेनविरूपाक्षतत्पा०॥६४॥ ओं
काराख्यमहालिंगंभ्रांतेनैवकदाचनः॥ मयानाभ्यर्चितंशंभोतत्पापं०॥६५॥ केदारेश्वरमाराध्यमानाराध्येवसं
स्थितं॥मयाकदाचिद्विश्वेशतत्पा०॥६६॥ एवमुच्चार्यसकलानपराधान्यथाक्रमं॥ततःस्नात्वाज्ञानवाप्यांपुनः
संपूज्यमांततः॥ वीरेश्वरादिस्थानेषुगत्वातंपूज्यसादरं॥पुनरभ्यर्चनंकार्यमपिभक्तिपुरःसरं॥६८॥ततो
मौनेननियमात्कृतांजलिपुटैर्नरैः॥ दंडपाणिंप्रणम्यैवगंतव्यंमुक्तिमंडपात्॥६९॥ दिनाद्यकेनविधिवत्पं
चक्रोशप्रदक्षिणं॥कर्तव्यमतियत्नेनभक्तिश्रद्धासमन्वितैः॥७०॥ मध्येसर्वेषुतीर्थेषुस्नात्वासम्यक्य
थाविधिः॥श्राद्धंकार्यंप्रयत्नेनस्वाद्वन्नैरतिशोभनैः॥७१॥ पूजनीयाःप्रयत्नेनपंचक्रोशस्यरक्षकाः॥यात्राविं
घ्नहराःसर्वेवंदनीयाःप्रयत्नतः॥७२॥ सहस्रकोटिलिंगानिदिव्यान्यत्यद्भुतानिच॥पंचक्रोशमहामार्गेनिष्ठं
तिकमलानने॥७३॥ बिल्वपत्राक्षताद्यैस्तुतानियत्नेनसर्वथा॥पूजनीयानिलिंगानियथाशक्तियथाक्रमं॥

॥७४॥ भैरवाणां गणेशानां दुर्गाणां च वरानने॥ संख्या न वर्त्तते तेषां दर्शनं चापि दुर्लभं॥७५॥ निराहा
रेण कुर्वंति देवगंधर्वदानवाः॥ केचिन्मुनीश्वराः दिव्याः पंचक्रोशप्रदक्षिणं॥७६॥ पंचक्रोशस्य या
त्रायां तिलमात्रमपि प्रिये॥ नातिक्रमेद्यथामार्गं गंतव्यमतियत्नतः॥७७॥ करसंचलनं त्यक्त्वा कृतां
जलिपुटैः सदा॥ मौनेनैव हि कर्त्तव्यं पंचक्रोशप्रदक्षिणं॥७८॥ मामेव सर्वदा ध्यात्वा शिवमद्वयमव्ययं॥ मत्क
थाश्रवणासक्तैस्तत्कर्त्तव्यं प्रयत्नतः॥७९॥ रात्रौ जागरणं कार्यं आदिनाथक्रमादरात्॥ भोजनीयाः प्रयत्ने
न शैवा ब्राह्मणपुंगवाः॥८०॥ ततो मम अंतिकं प्राप्य मामभ्यर्च्य सदाशिवं॥ यात्रां निवेद्य शुभदां ततस्त्वत्र गृहमा
विशेत्॥८१॥ प्रतिपक्षेपि कर्त्तव्यं पंचक्रोशप्रदक्षिणं॥ एवमेव तु निपतेन काशीवासरतैर्जनैः॥८२॥ एवं तु स्थूल
मार्गेण पंचक्रोशप्रदक्षिणं॥ यथाकथंचित्कर्त्तव्यं मनुजैरल्पसाधनैः॥८३॥ यथाशास्त्रं तु तत्कर्तुं देवैरपि
न शक्यते॥ यथाशास्त्रकृतं चेत्स्यान्मोक्षस्यादेव तत्क्षणात्॥८४॥ ब्रह्मविष्णवादयो देवाः पंचक्रोशप्रदक्षि
णं॥ एकवारं यथाशास्त्रं कर्त्तव्यमिति निर्दिशुः॥८५॥ सांगं प्रत्येकमेकैकं लिंगं संपूज्य सादरं॥ भैरवान्गण
पान्सम्यक्पूजयामश इति प्रियान्॥८६॥ पंचक्रोशस्य यात्रार्थे संकल्पविधिवत्ततः॥ निर्ययुश्चामराः स
र्वे ब्रह्मविष्णुपुरोगमाः॥८७॥ प्रत्येकं दिव्यलिंगानां कुर्वंतः पूजनं मुदा॥ रुधिरक्तास्तथाध्वेयमापुर्विंशति
वत्सरैः॥८८॥ ततो विश्रांतचित्तास्ते प्रत्येकं विस्मयंगताः॥ यात्रेयं विधिवत्कर्तुं न शक्यत इति प्रिये॥
॥८९॥ स्थितानि पश्चाल्लिंगानि स्वल्पान्येव पुरः परं॥ बहूनि संति लिंगानि दिव्यान्यत्यद्भुतानि च॥९०॥
गणेशभैरवादीनां गणनैव न सर्वथा॥ प्रत्येकं पूजनात्कालो भूयान्नेव गमिष्यति॥९१॥ कृतो वदायुरस्मा
कं कृतावत्पादयोर्बलं॥ यावद्देवं यथाशास्त्रं पूजनं मोक्षसाधकं॥९२॥ यथाशास्त्रं कृतं चेत्स्यात् पंचक्रोश
प्रदक्षिणं॥ मोक्षो भवति शीघ्रेण तत्तु कर्तुं न शक्यते॥९३॥ संकल्पस्तु कृतः पूर्वं किं कर्त्तव्यमतः परं॥ संक

ल्पमप्यवादन्यत्पातकं च समागतं ॥ ९४ ॥ घोरं पंचाग्निमध्येपि तपः कर्तुं हि शक्यते ॥ पंचक्रोशस्य यात्रेयं कर्तुमेव

न शक्यते ॥ ९५ ॥ इत्युक्त्वा दुःखिताः सर्वे पंचक्रोशप्रदक्षिणं ॥ स्थूलमार्गेण सर्वे ते कृत्वा काशीमुपागताः ॥ ९६ ॥

एकवारं कृतं पूर्वं पंचक्रोशप्रदक्षिणं ॥ शंकरेण नंदिकेशेन यथाशास्त्रं यथाक्रमं ॥ ९७ ॥ गणेशेनापि यत्नेन यथा

शास्त्रं यथाक्रमं ॥ कृतं न दैरवेणापि पंचक्रोशप्रदक्षिणं ॥ ९८ ॥ काशीनिवासिनां धर्माः विहिताः संति भूरिशः

॥ तान्कृत्वा विधिवत्काश्यां वासः कार्यो नरोत्तमैः ॥ ९९ ॥ उक्ताचारवनैः काश्यां स्थातव्यं धर्मतत्परैः ॥ अन्यैर्नरस्थे

यममलैः सत्यं सत्यं न संशयः ॥ १०० ॥ बहुयत्नेन साकाशी प्राप्तव्या मोक्षदा परा ॥ विना काशीनिवासेन मोक्षस्तु न

भविष्यति ॥ १ ॥ काश्यामप्यनियत्नेन स्थातव्यं धर्मतत्परैः ॥ अधर्मलेशरहितैः सर्वदा शिवपूजकैः ॥ २ ॥

काशीति स्मरणादेव महापातककोटयः ॥ क्षणाच्छिथिवि नश्यंति साकाशी कोपमीयते ॥ ३ ॥ यस्यां मरणमात्रे

ण पुनर्जन्म न जायते ॥ दुष्टस्यापि महादेवि साकाशी कोपमीयते ॥ ४ ॥ यस्यां मरणमिच्छंति ब्रह्मविष्णवादयः

सुराः ॥ शिवाकरासुराराध्या साकाशी० ॥ ५ ॥ काकादयोपि काशीस्थाः गणयंत्येव नामरान् ॥ तादृशी दिव्यरूपा

यासाकाशी० ॥ ६ ॥ यस्यां काश्यां मृतानां तु मरणं मंगलायते ॥ दिव्यान्नायते पर्णं साका० ॥ ७ ॥ यस्यां का

श्यां जलं पीत्वा सोमपानप्रतिवासरं ॥ तिरस्कारोति काकोपि साका० ॥ ८ ॥ यस्यां सोमायते चीरं विभूतिश्चंद

नायते ॥ दिव्याम्नायते नीरं साकाशी० ॥ ९ ॥ यस्यां रुद्राक्षमालापि रत्नमालायते सदा ॥ सुखशय्यायते घासः सा-

काशी० ॥ १० ॥ यस्यां तृणासनं शुभ्रं रत्नसिंहासनायते ॥ चक्रेश्वरायते दीनः साकाशी० ॥ ११ ॥ यस्यां धनविहीनो

पि दरिद्रो मनुजो धमः ॥ तिरस्कारोति धनदं साकाशी० ॥ १२ ॥ यावंतो मुक्तिमिच्छंति देवर्षिमुनिमानवाः ॥ तावता

मपि सर्वेषां गतिः काश्येव सर्वथा ॥ १३ ॥ काशी कल्पतरुर्नित्यं मुक्तिपुष्पफलान्विता ॥ मुमुक्षवो निशं तत्र वसंति

तमुपाश्रिताः ॥ १४ ॥ काश्यामेव मुनिश्रेष्ठैः स्थातव्यं धर्मतत्परैः ॥ विना काशीं न चान्यत्र मोक्षो भवति सर्वथा ॥ १५ ॥

अनंतकालममलैरनंतरसैरपि॥ काशीप्रभावो न मया शक्यते वक्तुमंबिके॥१६॥ वेदैरपि न विज्ञातं काशीतत्वं वरा
नने॥ किं पुनः विधिविष्ण्वाद्यैः सिद्धैर्मुनिवरैरपि॥१७॥ काशीस्तुतिपराजिह्वा धन्या धन्या वरानने॥ काशीध्यानप
रं धन्यं धन्यं धन्यं मनः सदा॥१८॥ इयं पुण्यसमध्यर्थं कथा पापौघनाशिनी॥ श्रोतव्या नियतेनैकाग्रमनसा नियतेन मान
वैः॥१९॥ यत्र त्वेतान्नित्यमध्यायान्पठिष्यति शिवालये॥ स महापातकेभ्योपि मुच्यते नात्र संशयः॥२०॥ यः काश्यां कृ
तपापेपि मनुष्यो नित्यमादरात्॥ एतान्पठित्वा ह्यध्यायान्स पापेभ्यो विमुच्यते॥२१॥ काश्यां तु कृतपापानि प्रत्यहं
मुदितानने॥ प्रत्यहाध्यायपाठेन विनश्यंति न संशयः॥२२॥ सहस्रवारमध्यायाः पठिता मुनिसत्तमैः॥ काश्यां पुराकृ
तं पापं नाशयंत्यग्निसंनिभैः॥२४॥ सहस्रवारमध्यायान्पठित्वैव तिलादिभिः॥ तन्मंत्रैर्लक्षहोमोपि कार्यस्तत्पा
पनाशकः॥२५॥ काशीमहात्म्यममलं इदं प्रत्यहमादरात्॥ यः पठेद्यातना तस्य न भविष्यति भैरवी॥२६॥ इदं मा
हात्म्यममलं कालभैरवसंनिधौ॥ प्रत्यष्टम्यां प्रयत्नेन पठनीयं विशेषतः॥२७॥ एतच्छ्लोकमहामंत्ररुक्षावत्याति
लादिभिः॥ शिवनिंदाघशांत्यर्थं होमः कार्यः प्रयत्नतः॥२८॥ बिल्वाश्वत्थपलाशादिसमिदाज्यान्विताः स्तिलाः॥
न होमसाधनीभूताः शुद्धाः कीटाद्यदूषिताः॥ स्वस्वशाखोक्तमार्गेण प्रतिष्ठाप्य हुताशनं॥ तस्मिन्नन्यैनोपयथा
शास्त्रं होमः कार्यो द्विजोत्तमैः॥३०॥ काशीमहात्म्यमंत्रस्य महादेवस्वयं ऋषिः॥ काश्येव देवता शक्तिः भैरवी यातन
नापहा॥३१॥ कीलकं सर्वयत्नेन काशीप्राप्तिरिहेप्सिता॥ छंदो नानाफलं दिव्यं मोक्षरूपमुदाहृतं॥३२॥ सहस्र
वदनां दिव्यां सहस्राक्षिकरान्वितां॥ विराटरूपधरां नित्यां ध्यायेत्काश्यधिदेवतां॥३३॥ श्लोकमुच्चार्य तदनु का
श्यै स्वाहेति चाहुतिः॥ देया भवति यत्नेन याज्ञिके होमकर्मणि॥३४॥ दशषट्द्वादशावृत्त्या श्लोकानां यथाक्र
मं॥ भोजनीयाः द्विजश्रेष्ठाः देया स्याद्दक्षिणा तथा॥३५॥ काशीमाहात्म्यममलं लिखित्वा पुस्तके शुभे॥ देयं
शैवाय लिंगं च ससाधनमनुत्तमं॥३६॥ ॥श्रीपार्वत्युवाच॥ ॥एवं केन कृतो होमः केन किं पानकं कृतं॥ तत्सर्वं

वद सर्वज्ञ शिवलिंगार्चनप्रिय॥ ३७॥ ॥ श्रीशिव उवाच॥ ॥ वसिष्ठे नृपुरा काश्यां अंतर्गेहे शिवात्मके॥ शि
वलिंगार्चको ह्यष्टः शैवः शिवपरायणः॥ ३८॥ वशिष्ठः शिवतत्त्वज्ञस्तदा शैवं शिवार्चकं॥ विलोक्यनिजगादे
वं ज्ञातुं तस्य मनस्तदा॥ ३९॥ वशिष्ठ उवाच॥ ॥ किमर्थं पूज्यते लिंगं एतल्लिंगे नभ्रयच्छति॥ अदृष्टेन विना लो
के वस्तुप्राप्तिर्नसर्वथा॥ ४०॥ किमर्थमतियत्नेन क्रियते भस्मधारणं॥ चंदनं शीतलं रम्यं अंगे सम्यग्विलेप
य॥ ४१॥ किमर्थं स्थीयते काश्यां निराहारेण सर्वदा॥ भुंक्ष्व नानाविधान्नानि यथेष्टमतियत्नतः॥ ४२॥ किमा
शयो हरो नित्यं श्मशाननिलयस्तव॥ शूली कपाली भालांगः सर्वदा वृषवाहनः॥ ४३॥ न दृष्टोऽस्ति मया वि
प्र लोके पाषाणपूजकः॥ अभाग्योऽसि भवान्नूनं कर्तव्यं च यमहर्निशं॥ ४४॥ इति श्रुत्वा वसिष्ठस्य वाक्यं दुःखकरं
द्विजः॥ घोरदुःखसंक्रांतो हाहा शिव शिवेति सः॥ ४५॥ तदा तद्रोदनं श्रुत्वा ब्रह्मा शिवपरायणः॥ तमुवा
च अतियत्नेन किमासीदितिदुःखितः॥ ४६॥ ॥ द्विज उवाच॥ ॥ शिवनिंदाकृतानेन नश्रुता सा पुण्यनाशि
नी॥ अशेषे दुरदृष्टेन दृष्टोऽयं पातकाश्रयः॥ ४७॥ इति तद्वचनं श्रुत्वा दुःखितो विधिरुत्तमं॥ पुरस्थितं वसि
ष्ठं तं दृष्ट्वा वचनमब्रवीत्॥ ४८॥ ॥ ब्रह्मोवाच॥ ॥ हा वसिष्ठ त्वया मूढ शिवनिंदा कथं कृता॥ दुःखितोऽयं म
हाशैवः शंकरस्यैव निंदया॥ ४९॥ भूलोके स्वर्गलोके वा पाताले वा कदाचन॥ एतावत्कालपर्यंतं न दृष्टः शिव
निंदकः॥ ५०॥ अघोरपातकौघस्य परिपाकस्तवाधुना॥ जातस्त्वया यतो निंदा शंकरस्य कृता ध्रुवं॥ ५१॥ यस्याः पु
त्रो महादेवं दूषयिष्यति दुर्भगः॥ दुर्भगा तस्य जननी जन्म तस्य वृथा ध्रुवं॥ ५२॥ शैवदुःखप्रदो मर्त्यो नथा शंक
रनिंदकः॥ अनेकजन्मपर्यंतममेध्ये जायते कृमिः॥ ५३॥ विष्ठायां कृमिरूपेण बहुदुःखेन सर्वदा॥ भवि
ष्यति स्थितिर्दुष्ट तव शंकरनिंदक॥ ५४॥ इति ब्रह्मवचः श्रुत्वा वसिष्ठो भयविह्वलः॥ प्रणिपत्य वचः प्राह
चतुर्वक्त्रं शिवार्चकं॥ ५५॥ ॥ वसिष्ठ उवाच॥ ॥ एतस्य हृदयं ज्ञातुं मयैवोक्तं चतुर्मुख॥ शिवस्य देवदेवस्य

निंदाकार्याकथंमया॥५६॥ ॥ब्रह्मोवाच॥ ॥भ्रमेणपरिहासेनशाठ्येनान्येनवाद्विज॥ शिवनिंदाकृतायेनतेन
नप्राप्येवयातना॥५७॥भ्रमेणाधिकरस्पर्शोवह्निर्दुःखकरोयथा॥ तथैवदुःखदंमन्येनित्यंशंकरदूषणं॥५८
कृतस्पर्शोदहत्यग्निःशिवदूषणपावकः॥शिवदूषकंपापिष्टंकुलंदहतिसर्वथा॥५९॥ब्रह्महत्यार्जितंपापंकदा
चिन्नाशमेष्यति॥शिवनिंदार्जितंपापंननश्यत्येवसर्वथा॥६०॥शिवनिंदकजिह्वाग्रंयमस्तत्रासिधारया॥
सदादहतितीव्रेणक्षुभितःक्रोधसंयुतः॥६१॥धिक्जन्मतवदुर्बुद्धेर्महामहापातकाश्रय॥ धिक्कुशीलंतवदुःशी
लशिवदूषकदुर्भग॥६२॥ त्वत्तोनपातकीलोकेनत्वत्तोनारकीध्रुवं॥ असंभाष्योनिरीक्ष्योसियतस्त्वंशिवनिं
दकः॥६३॥ अस्माभिरपिपापानिसंभाषाप्तानिनिमज्जायः॥महेशनिंदकेनाद्ययतःसंभाषणंकृतं॥६४॥इति
तद्वचनंश्रुत्वावसिष्ठोदुःखितस्तदा॥रुरोदोच्चैःतदावाचमुवाचचकृतांजलिः॥६५॥ ॥वसिष्ठउवाच॥ ॥
प्रायश्चित्तंवदश्रीमन्नेतत्पातकनाशकं॥ प्रायश्चित्तंयदस्त्यत्रतत्करिष्यामिसर्वथा॥६६॥ ॥ब्रह्मोवाच॥
उपवासेनविधिवद्दशाहंमुंडनपूर्वकं॥ पंचगव्यंचविधिवत्पीत्वाशंकरदूषकैः॥ ततोंतर्गृहयात्राणांकार्येसार्धे
शतत्रयं॥ततःपंचक्रोशयात्राशतकंकार्यमादरात्॥६८॥ ततःशिवरहस्यस्थकाशीमाहात्म्यमुत्तमं॥
सहस्रवारंयत्नेनपठनीयंसमाहितैः॥६९॥ ततस्तच्छ्लोकमंत्रैस्तुतिलहोमोयथाक्रमं॥कर्तव्योलक्षपर्यंतं
तिलाज्यादिभिरुत्तमैः॥७०॥तदष्टाविंशदावृत्याशैवाःशिवपरायणाः॥भोजनीयाःप्रयत्नेनदद्याच्चस्वर्णद
क्षिणा॥७१॥एतावदेतियत्नेनक्रियतेयदिसादरं॥तदातत्पापशांतिस्तेभविष्यतिनसंशयः॥७२॥इदंपुराम
हादेवःपप्रच्छःस्तनजगदंबया॥प्रायश्चित्तंजगादेवंशिवनिंदाघनाशकं॥७३॥शिवनिंदाश्रुतायेनकारितावा
भविष्यति॥तेनापियत्नतःकार्यंप्रायश्चित्तमिदंक्रमात्॥७४॥शिवलिंगस्थानभंगःकृतोयेनभ्रमाद्भवेत्
तदादशगुणंकार्यंप्रायश्चित्तमिदंक्रमात्॥७५॥भ्रमेणचरणाघातःशिवलिंगेकृतोयदि॥तदादशगुणंकार्यं

प्राय०॥७६॥ एवमुक्तस्तदादेवीं वसिष्ठो ब्रह्मणा ततः॥ तदुक्तेन तु आकारेण प्रायश्चित्तं चकार सः॥७७॥ सूत उवाच॥ ॥ काशीमाहात्म्यपीयूषवर्षधारापरिप्लुतां॥ संश्लिष्य गौरीं विश्वेशः प्रापानंदं जगत्पिता॥७८॥
ततो वृषेशमारुह्य काशीदर्शनलोलुपः॥ कैलासात् आगमत्काशीमुमया सह सर्वगः॥७९॥ भवद्भिरपि विप्रेंद्राः काशी विश्वेशसंश्रया॥ सम्यगाश्रयणीयैवं मोक्षार्थिभिरहर्निशं॥८०॥ इदं माहात्म्यममलं यः शृणोति पठिष्यति॥ स सर्वपापनिर्मुक्तः शिवलो[?]कं गमिष्यति॥८१॥ इदं माहात्म्यममलं लिखित्वा पुस्तकं यदि॥ पूज्यां करिष्यति प्रीत्या यस्तस्या धं प्रणश्यति॥८२॥ इदमेव हि माहात्म्यं यत्र कुत्रापि यः पठेत्॥
तत्रैव काशीविश्वेशौ वसतो नात्र संशयः॥८३॥ इदं माहात्म्यमनिशं इंद्राद्यैरमरैर्मुदा॥ श्रूयते सुखदं चित्ते सर्वपापौघनाशकं॥८४॥ इदमेव हि माहात्म्यं ब्रह्मा शिवपरायणः॥ ब्रह्मलोके सदा सम्यक् पठति प्रीतमानसः॥८५॥ विष्णुरप्यनिशं भक्त्या शिवलिंगार्चनप्रियः॥ पठति प्रीतिहृदयो माहात्म्यमिदमेव हि॥ येनेदं पठ्यते प्रीत्या माहात्म्यमतिशोभनं॥ विष्णुरप्यनिशं भक्त्या शिवलिंगार्चनप्रियः॥८७॥ पठति प्रीतहृदयो माहात्म्यमिदमेव हि॥ येनेदं पठ्यते प्रीत्या माहात्म्यमतिशोभनं॥ तेन प्राप्ता मुक्तिकांता सत्यं सत्यं न संशयः॥ देशांतरेऽपि वा स्थित्वा माहात्म्यमिदमुत्तमं॥८९॥ यः पठिष्यति पुण्यात्मा स काश्यां संस्थितो भवेत्॥ अशक्तैः पंगुभिर्वृद्धैः इदं माहात्म्यमन्वहं॥९०॥ काश्यामन्यदेशे स्थित्वापि पठनीयं प्रयत्नतः॥
ये जन्मदुःखादिविनाशकं सदा शृण्वंति माहात्म्यमिदं मनोहरं॥ ते शंकरस्याति हिताः शिवार्चकाः शिवैकदेवाः शिवसंमताः सदा॥९१॥ संसारदावानलदह्यमानैः काशीसुधाब्धिः सुखदं स सेव्यः॥ सेव्यो हि सर्वैरपि सर्वदायं पापापनुत्त्यै जनुदुःखशांत्यै॥९२॥ ॥ इति श्री शिवरहस्ये उग्राख्य सप्तमांशे शातसहस्रसंहितायां काशीमाहात्म्ये द्वादशोऽध्यायः॥१२॥ ॥ श्रीविश्वेश्वराय नमः॥ ॥ श्री उग्राय नमः॥ ॥

ऋषय ऊचुः॥ ॥सूत वेदार्थतत्त्वज्ञ काशीतत्त्वं यथार्थतः॥ यथा ज्ञानं तथैवोक्तं त्वयास्मभ्यं प्रयत्नतः॥१॥ वयं पुनीताः सर्वेपि त्वत्प्रसादान्मुनीश्वराः॥ तत्त्वावबोधो द्यकृतः त्वयास्मासु कृपानिधे॥२॥ संसारानलसंदग्धाः वयं सर्वे त्वयाधुना॥ तर्पिताः सत्कथालापामृतरस्नानसंश्रयः॥३॥ काशीकथामृतं श्रेष्ठं दुष्प्रापममृतादपि॥ नत्वायितं त्वयास्मभ्यमस्मद्भाग्यवशाद्ध्रुवं॥४॥ कृतकृत्या वयं सर्वे संभूतास्त्वदनुग्रहात्॥ अनुग्रहोयमस्माभिः लब्धप्रायः तपस्यया॥५॥ त्वयाहितोपदेशोयमस्मभ्यं यः कृतोधुना॥ सुदुर्लभतरो नूनं अन्याप्राप्यो न संशयः॥६॥ सूत काशीकथाः श्रुत्वा दग्धाः पातककोटयः॥ संप्राप्ताः पुण्यनिचयाः दुर्लभा मोक्षसाधनाः॥७॥ काशीकथासुधापानसमुत्कंठा भवत्पुरा॥ सफलासा समुत्कंठा जाताद्य त्वत्प्रसादतः॥८॥ काशीकथासुधापानात् संतोषो यादृशो भवेत्॥ संतोषस्तादृशः प्रायः सुधापानेपि न ध्रुवं॥ ॥९॥ काशीकथासुधापानं कृतं येन न सादरं॥ स जीवन्मृत एवाश्वासनी च पुल्कसादपि॥१०॥ यथा देवाः सुधां प्राप्य सुप्रीताश्च सुधाशनाः॥ काशीकथासुधां प्राप्य सुप्रीतास्म तथा वयं॥११॥ विद्यास्समग्राः संप्राप्य यथा प्रीता द्विजोत्तमाः॥ काशीसुधां०॥१२॥ यथा नवनिधीन्लब्ध्वा संतुष्टोभूद्धनाधिपः॥ काशीसुधां०॥ ॥१३॥ यथा शिवार्चनाल्लक्ष्मीं लब्ध्वा प्रीतो जनार्दनः॥ काशी०॥१४॥ यथेशानं प्राप्य वैकुंठे सुप्रीतोभूज्जनार्दनः॥ काशीसुधां०॥१५॥ यथा शिवार्चनाल्लब्ध्वा स्वर्गं प्रीतः शचीपतिः॥ काशीसुधां०॥१६॥ यथा नवतृणं प्राप्य प्रीताः गावः क्षुधातुराः॥ काशीकथासुधां प्राप्य सुप्रीतास्मो तथा वयं॥१७॥ यथा प्रीता निसस्या निवर्षिं प्राप्य यथाहितं॥ काशीसुधां०॥१८॥ यथा यथेष्टमन्नानि लब्ध्वा प्रीताः क्षुधातुराः॥ काशीं०॥ १९॥ यथेष्टं चैव वस्त्राणि लब्ध्वा प्रीतो हिमातुरः॥ काशीसु०॥२०॥ यथा यथेष्टं द्रविणं लब्ध्वा प्रीता धनैषिणः॥ काशीसु०॥२१॥ यथा कामातुराः प्राप्य सुप्रीता नवयौवनां॥ काशीसु०॥२२॥ यथा पुत्रैषिणः पुत्रान्लब्ध्वा

प्रीताश्चिरायुषः॥ काशी०॥२३॥ यथापितासुतान्दृष्ट्वा प्रीतो विद्यामदान्वितान्॥ काशी०॥२४॥ यथाविद्या
द्विजं प्राप्य सुप्रीतो विश्वसंमतं॥ काशीं०॥२५॥ यथा पात्रमनुप्राप्य सुप्रीतो दानतत्परः॥ काशीसु०॥२६॥
यथा दातारमभ्येत्य सुप्रीतोऽनिष्ठिरातुरः॥ काशी०॥२७॥ यथा चकोरः सुप्रीतो लब्ध्वा चंद्रकरामृतं॥
काशी०॥२८॥ यथा माकंदमालोक्य सुप्रीतापिकसुंदरि॥ काशी०॥२९॥ मकरंदं यथा प्राप्य सुप्रीता मकरे
दपाः॥ काशीसु०॥३०॥ यथा प्रोषितमालोक्य पतिं प्रीता पतिव्रता॥ काशी०॥३१॥ यथाश्रीतं जलं प्राप्य
पांथः प्रीतोऽर्कतापितः॥ काशी०॥३२॥ यथा ग्राममनुप्राप्य सुप्रीताः पादपंगवः॥ काशीसु०॥३३॥ यथेडमू
कः संप्राप्य प्रीतो वाक्जालमुज्ज्वलं॥ काशी०॥३४॥ यथा नेत्रबलं प्राप्य प्रीता जन्मांधवृत्तयः॥ काशी०॥
३५॥ यथा श्रोत्रबलं प्राप्य प्रीता बाधिरवृत्तयः॥ काशी०॥३६॥ यथा जिह्वेंद्रियं प्राप्य प्रीताः स्वादुरस
नहाः॥ काशी०॥३७॥ यथा घ्राणमनुप्राप्य प्रीता घ्राणविवर्जिताः॥ काशी०॥३८॥ यथा त्वगिंद्रियं प्राप्य
प्रीतास्तब्धत्वगिंद्रियाः॥ काशी०॥३९॥ यथा मनो वशीकृत्य सुप्रीताश्चित्तचंचलाः॥ काशी०॥४०॥ प्रायः
कृतानि पुण्यानि पूर्वमस्माभिरादरात्॥ कथं प्राप्यान्यथास्माभिः सेयं काशीकथासुधा॥४१॥ काशीक
थासुधादानं महद्दानमिदं मुने॥ नैतस्मादधिकं दानं सत्यं सत्यं न संशयः॥४२॥ अस्मासु दानपात्रे
षु दत्ता काशीकथासुधा॥ काशीकथासुधां प्राप्य न शोचामः कदाचन॥४३॥ अतः परं मुने स्मभ्यं का
शीसंप्राप्तिसाधनं॥ वद कारुणिको यस्मात् भवानसि विचक्षणः॥४४॥ ॥सूत उवाच॥ ॥ यूयं धन्या न
मा विप्राः विप्रवीर्ये समुद्भवाः॥ यतो युष्माकमुत्पन्ना प्रीतिः काशीकथामने॥४५॥ काश्यां काशीकथायां च
यस्य श्रद्धानपायिनी॥ स एव धन्यः पूतात्मा सत्यं सत्यं न संशयः॥४६॥ काश्यां शिव स्वयं साक्षात् सच्चिदा
नंदलक्षणः॥ तस्मिन्यस्य भवेच्छ्रद्धा स तु धन्यो महाशयः॥४७॥ यः काशीं दृष्टिमूढात्मा स शिवं द्वेष्टि व

स्तुतः॥ ततः स निरयं याति सवंशो नात्र संशयः॥४८॥ शिवं विश्वाधिकं सांबं अनन्यसदृशं प्रभुं॥ योन्यथा
मनुते मोहात् स भवेत् पुल्कसाधमः॥४९॥ शिवद्वेषोपि विविधः समयात्र निरूप्यते॥ श्रोतव्यं सावधानेन
श्रुत्वा च निश्चलचेतसा॥५०॥ विष्ण्वादिदेवतासाम्यं यो वदेदीश्वरे शिवे॥ स तु दुर्भगः शिवद्वेष्टा द्वेषस्तत्सा
म्यधीः शिवे॥५१॥ शिवेन देवदेवेन न सदृशो नास्ति सर्वथा॥ यस्माद्विश्वाधिकत्वेन शिवः सर्वश्रुतिश्रुतः॥
५२॥ यतः श्रुतो शिवान्यस्य विष्णोरन्यस्य वा द्विजाः॥ विश्वाधिकत्वं नैवोक्तं स्तोत्रार्थमपि सर्वथा॥५३॥
अतो विश्वाधिको रुद्रः कथं विष्णुसमो भवेत्॥ रुद्रो विश्वाधिकः श्रेष्ठो देवोत्तम इति श्रुतिः॥५४॥ विप्रा
विश्वाधिको रुद्रो यदि विष्णुसमस्तदा॥ श्रुतिर्विश्वाधिको रुद्र इत्येषा बाधिता भवेत्॥५५॥ विष्णोर्वि
श्वाधिकः सोमो जनितेति श्रुतिर्यतः॥ ततो विष्णुर्न सोमेन जनकेन समो ध्रुवं॥५६॥ पवनादिभिरप्येवं
न समः सोम उच्यते॥ सोमोयं पवनादीनां जनितेति श्रुतिर्यतः॥५७॥ शिवं विश्वाधिकत्वेन श्रुतिश्रुत
मनामयं॥ यो विष्णुसाम्यतां ब्रूयात् स वेदेभ्यो बहिष्कृतः॥५८॥ विश्वाधिकः शिवो नेति यो वदेन्मोहतो
पि वा॥ स स्यात् श्वपचचंडालरेतोबुद्बुदजो ध्रुवं॥५९॥ विश्वाधिकं महारुद्रं यो विष्णुसमतां वदेत्॥ सम०॥
६०॥ विश्वाधिकं महारुद्रं योन्यथा वर्णयेद्बुमान्॥ समद्य०॥६१॥ चक्रांकग्रावसाम्येन शिवलिंगस्य पूज
नं॥ शिवद्वेषिः स तु द्वेषः सर्वथा निरयप्रदः॥६२॥ शिवलिंगं शिवाकारं चक्रांकप्रस्तरैः सह॥ संनिवे
श्य महापापैः संयुतो भवति ध्रुवं॥६३॥ अत्युत्तमं स्थानसंस्थं शिवलिंगं शिवात्मकं॥ पूजनीयं प्र
यत्नेन त्यक्त्वान्याराधनं यतः॥६४॥ पतिव्रतान्यभर्तारं त्यक्त्वा स्वपतिमायया॥ तथा हि द्विजैरन्यदेवास्त्या
ज्याः पूज्यो महेश्वरः॥६५॥ महेश्वरातिरिक्तं यो भ्रमेणाप्युपधावति॥ स चंडाल इति ज्ञेयः सत्यं सत्यं
न संशयः॥६६॥ विभूतिधारणं त्यक्त्वा यः शिवं पूजयिष्यति॥ स दुर्भगः शिवद्वेष्टा सद्वेषो नरकप्रदः॥

॥६७॥ सर्वकर्मबहिर्भूतो भस्मधारणवर्जितः॥ भस्मना रहितं कर्म वृथा भवति सर्वथा॥६८॥ विभूतिधार
णं त्यक्त्वा कुर्वन्नेहमनुत्तमामपि॥ तत्फलं न समाप्नोति पतितोऽपि भविष्यति॥६९॥ संध्याशिवार्चनादीनि क
र्माण्येतानि वस्तुतः॥ वैदिकानि ततस्तेषु कर्तव्यं भस्मधारणं॥७०॥ यथोपवीतरहितैः संध्या न क्रियते द्वि
जैः॥ तथा संध्या न कर्तव्या विभूतिरहितैरपि॥७१॥ गतोपवीतैः संध्यायां कार्यः प्रतिनिधिः क्वचित्॥ विभू
तिधारणे त्वन्यो नास्ति प्रतिनिधिर्ध्रुवं॥७२॥ विभूतिधारणाभावे संध्यात्यागोऽपि वस्तुतः॥ द्विजो न प्रत्यवेत्ये
व नाधिकारी यतः तदा॥७३॥ विभूतिधारणाभावे यदि संध्यां करोति सः॥ प्रत्यवैत्येव येनासौ नाधिकारी
तदा द्विजः॥७४॥ यथाधीत्य त्यजेद्वेदान् प्रत्यवैति द्विजोत्तमः॥ प्रत्यवैति न संदेहः संध्यारुद्रस्मव
र्जितः॥७५॥ संध्यायां नाधिकारोऽस्ति मूर्छितानां यथा तथा॥ विभूतिरहितानां च संध्यायां नाधिकारिता॥
॥७६॥ संपादनीयं यत्नेन श्रौतं भस्म सदा द्विजैः॥ स्मार्तं वा तदभावे तु लौकिकं वा समाहितैः॥७७॥ या
दृशं तादृशं वास्तु पवित्रं भस्म संततं॥ धारणीयं प्रयत्नेन द्विजैः संध्यादिकर्मसु॥७८॥ नश्यंति विशति पापानि
भस्मलिप्ते तनौ सदा॥ कर्तव्यमनियत्नेन ब्राह्मणैर्भस्मधारणं॥७९॥ यत्कृतं भस्मनिष्ठेन श्रीमहादेवपूज
नं॥ तत्सर्वाभीष्टदं तस्मात्कर्तव्यं भस्मधारणं॥८०॥ शिवस्यार्थनमस्कारः शिवद्वेष इति श्रुतः॥ स पुण्यनाश
कस्तस्मात्तत्कर्ता पापकृद्भवेत॥८१॥ साष्टांगं दंडवद्भूमौ प्रणामो भक्तिपूर्वकं॥ कर्तव्यः श्रीमहेशाय देवाधी
शाय सर्वदा॥८२॥ महेश्वरजनद्वेषः शिवद्वेष इति श्रुतः॥ स पुण्यनाशकस्तस्मात्तत्कर्ता पापकृद्भवेत्॥
८३॥ सद्द्वेषः पापफलदो पापकर्मप्रवर्धकः॥ शिवभक्ताः पूजनीयाः स्वशक्त्या साधु संततं॥८४॥ हेमरत्ना
न्नवस्त्राद्यैः प्रीणनीयाः प्रयत्नतः॥ शांभवान्मधुरालापैः प्रणामाद्यैश्च संततं॥८५॥ यः प्रीणयेत्स गौरीशं
प्रीणयत्येव सर्वथा॥ यारुता शांभवे पूजा सा शंभोरेव वस्तुतः॥८६॥ साक्षादभ्यर्चितः शंभुः शांभवस्यैव वपु

जया॥ यतः शिवप्रियतमाः शांभवा भस्मभूषणाः॥८७॥ ततः कर्तव्यमनिशं शांभवाभ्यर्चनं मुदा॥ सदाशिवक
थाभिन्नकथाश्रवणवाचने॥८८॥ शिवद्वेषाय मा कल्पमघोरनरकप्रदः॥ श्रोतव्याः सर्वदा तेन सदाशिवकथाः
शुभाः॥८९॥ ततस्ता मोक्षदा श्रोताः सर्वपातकनाशकाः॥ कीर्तनीयो महादेवो जिह्वया पुण्यपूतया॥९०॥ म
हेशकीर्तनं यस्मात् महापातकनाशकं॥ भुक्तिमुक्तिप्रदं पुण्यं शिवश्रवणकीर्तनं॥९१॥ ततस्तैर्यत्नतः का
र्यं ब्राह्मणाद्यैर्मुमुक्षिभिः॥ शिवेतरसुरध्यानं शिवद्वेष इति श्रुतः॥९२॥ स द्वेषः सर्वपुण्यानि विनाशयति स
र्वथा॥ एतत्प्रभृतयो द्वेषा बहवः पापहेतवः॥९३॥ तस्मादेतादृशैर्दोषैः पच्यंते नरके जनाः॥ तस्मादेता
दृशैर्दोषैर्विमुक्ता ये भवादृशाः॥९४॥ तेषां काश्यां भवेद्ध्यानात्तेषां सत्यमुच्यते॥ काशी यतः शिवः साक्षा
त्ततस्तच्छ्रवणाज्जनाः॥९५॥ निर्मुक्ताः पापसंघेभ्यो घोरेभ्यस्सत्यमुच्यते॥ काशीकथासुधा विप्राः दुर्लभा दु
र्लभापि सा॥९६॥ सुलभा शिवभक्तानां शिवार्थकृतकर्मणां॥ काशीकथासुधा प्राप्या तपोध्यानसमाधिभिः॥
९७॥ तत्प्राप्त्यर्थं यतस्तेषां उपयोगा श्रुतिश्रुतः॥ काशीकथासुधां प्रीत्या ये पिबंति मुहुर्मुहुः॥ ते शिवानुग्र
हीतास्ते पूजनीया मनीषिभिः॥ काशीकथा शिवकथा सा कथा मोक्षदायिनी॥९९॥ तस्यां कथायां प्रीतिः स्तुत
शिवानुग्रहं विना॥ निष्कृतं निर्गुणं ब्रह्म शिवः काशीति गीयते॥१००॥ तस्यां प्रीतिरनंतानां तपसां फलमुच्य
ते॥ स्वाभिन्नयाम पीशस्य काश्यां प्रीतिरनामया॥१॥ ततस्तत्प्रीतिरुत्कृष्टा तपोदानफलं द्विजाः॥ काशीमू
र्तिः शिवस्यैव मूर्तिभेदेन तिष्ठति॥२॥ काशीमूर्तिः शिवस्येति वदंति श्रुतयो यतः॥ मूर्तयः संति विविधाः शिव
स्य परमात्मनः॥३॥ तासु मूर्तिषु काश्येव शिवप्रियतमा श्रुता॥ काशीमूर्तिं शिवाकारां शिवादृष्ट्वा मनोरमां॥४॥
शिवो दृष्ट्वा भवानीं च प्रीतो भवति सर्वथा॥ यदा संप्राप कैलासात् काशीमूर्तिं महेश्वरः॥५॥ तदा प्राह महादेवं
भवानी भक्तवत्सला॥ ॥श्रीगौर्युवाच॥ ॥शिव सर्वज्ञ सर्वात्मन् किं काशीप्राप्तिसाधनं॥ एतत्सर्वं विशेषेण

निरूपपकृपानिधिः॥ ॥श्रीमहेश्वरउवाच॥ ॥मयिभक्तिरविछिन्नायामदभ्यर्च्चनोद्भवा॥ साभक्तिरेवसुभ
गेकाशीसंप्राप्तिसाधनं॥ ममार्चनंचविविधंश्रुतिषुप्रतिपादितं॥ ८॥ नाहंतेनार्चनेनैवमयिभक्तिःप्रजाय
ते॥ मद्भक्तइतिविज्ञेयःसरोजकमलानने॥ ९॥ योमत्स्मनिष्ठसततंममैवाराधनेप्रियः॥ काश्मीरादिषुलिं
गेषुमविश्वंदेयतोनमं॥ १०॥ मामेवयोर्चयेन्नित्यंसमद्भक्तइतिश्रुतः॥ हिमवत्पर्वतादीनियानिस्थाना
निशोभने॥ ११॥ तेषुस्थानेषुदेवेंद्रैःमदर्थंतपनेतपः॥ तेषुतेषुतपस्तप्तंप्रयेरनैकयुगावधि॥ १२॥ तैरेव
प्राप्यतेकाशीमत्स्वरूपावरानने॥ गिरिजेसुलभोनाहंपरंत्वत्यंतदुर्लभः॥ १३॥ तथापिसुरभोत्यंतैरेवध
मेरतात्मनां॥ पुराहिमाद्रिशिखरेनानारत्नविराजिते॥ १४॥ ब्रह्मविष्णवादयोदेवाःस्थितामल्लिंगपूजकाः॥
ऋषयःपितरःसाध्याःगंधर्वासिद्धिपुंगवाः॥ १५॥ मल्लिंगपूजनासक्ताःस्थिताःपूर्वंहिमालये॥ हिमव
त्पर्वतेरम्येसर्वदामांमुमुक्षवः॥ १६॥ पूजयंत्याहिकंठेशंनिर्वाणपदकांक्षया॥ तत्रैकदाकश्यपाद्याऋ
षयोब्रह्मवादिनः॥ १७॥ ममाराध्यस्थितादेविहेमपद्मादिभिर्मुदा॥ तदाकण्वःसमागत्यस्नात्वा
छेमानसेजले॥ १८॥ मानसेशंसमभ्यर्च्यकश्यपंप्राहसादरं॥ ॥कण्वउवाच॥ ॥संसारदावखिन्ना
नांमर्त्यानामकृतात्मनां॥ घोरसंसारविछेदःकथंभवतिसत्वरं॥ १९॥ किमर्चनीयंकिंध्येयंकिंवासर्वा
र्थदंमहः॥ किमाज्ञाप्यकिमाराध्यंतद्वदस्वमहामुने॥ २०॥ ॥कश्यपउवाच॥ ॥शिवाभिधंमहःसेव्यंस
र्ववेदांतसंश्रुतं॥ तत्सेवयैवसर्वेषांमुक्तिर्भवतिवस्तुतः॥ २१॥ सच्चिदानंदमद्वैतंयत्तन्महःशिवसंज्ञितं॥ त
न्महःसततंसेव्यंअन्यंत्यक्त्वाखिलंमुने॥ २२॥ तुरीयमेकंविमलंशिवंमत्वायथार्थतः॥ येभजंतिशिवं
नित्यंनतेसंसारभागिनः॥ २३॥ येमायातीतमद्वैतंशिवमेवभजंतिते॥ कदापिजननीगर्भेनविशंत्ये
वसर्वथा॥ २४॥ संसारदंदशूकेनसंदष्टायेमुहुर्मुहुः॥ तेतद्विषाद्विमुच्यंतेशिवसेवौषधात्ततः॥
॥२५॥

संसारसागरोत्तारः शिवसेवारतिर्नरः॥ ततः सर्वात्मना नित्यं कर्तव्यं शिवसेवनं॥२६॥ संसारसागरे घोरे ते मज्जंति मुहुर्मुहुः॥ ये मुहुर्न भजंतीशं शिवं संसारतारकं॥२७॥ अनन्यशरणानित्यं शिवमव्यभिचारतः॥ ये भजंत्यन्वहं भक्त्या ते यांति शिवमद्वयं॥२८॥ बहुपुण्यफलैः कश्चिच्छिवे भक्तिः प्रजायते॥ साप्यनंततपोधर्मैः भवत्यव्यभिचारिणी॥२९॥ महापातककुंजानां महापापरतात्मनां॥ न भवत्येव गौरीशे भक्तिरव्यभिचारिणी॥३०॥ येषां चेतस्तपःपूतं तेषामेव महात्मनां॥ जायते गिरिजानाथे भक्तिरव्यभिचारिणी॥३१॥ या भक्तिः श्रीमहादेवे भवत्यव्यभिचारिणी॥ सैव मोक्षप्रदेत्याहुः वेदाः सर्वेपि सर्वदा॥३२॥ ब्रह्मविष्ण्वादिदेवानामधिपं गिरिजाधिपं॥ भजंति धीराः सततं निष्कलं निर्गुणं शिवं॥३३॥ रसना यस्य सततं शिवनामरसायनं॥ स धन्यः सकृतार्थश्च तीर्णः संसारसागरात्॥३४॥ संसारपाशसंबद्धः तावद्भवति मानवः॥ न यावद्भजति प्रीत्या देवदेवं महेश्वरं॥३५॥ देवोत्तमम नाद्यंतं निरवद्यं महेश्वरं॥ भजंति ये न्वहं प्रीत्या ते धन्या इति मन्महे॥३६॥ शिवं प्रयांत्ययत्नेन सर्वेपि शिवपूजया॥ अतो नानाविधोपायैः कर्तव्यं शिवपूजनं॥३७॥ सर्वज्ञः श्रीमहादेवः स सर्वव्यापकोपि सन्॥ स्वभक्तानुग्रहायात्र लिंगाकारेण तिष्ठति॥३८॥ विभूतिरशायोयत्र यत्र बिल्ववनान्यपि॥ यत्र शैवाः शिवपराः तत्र संनिहितः शिवः॥३९॥ यत्र रुद्राक्षतरवो यत्र रुद्राक्षभूषणाः॥ यत्र लिंगानि शैवानि तत्र संनिहितः शिवः॥४०॥ यत्र पंचाक्षरासक्ता यत्र श्रीरुद्रपूजकाः॥ यत्र पाशुपताचाराः तत्र सन्निहितः शिवः॥४१॥ विभूतिराशयः संति पश्य यात्र शतशो मुने॥ कोटिशः संति पश्यात्र नवबिल्वदलान्यपि॥४२॥ रुद्राक्षवृक्षान् पश्यात्र पक्वरुद्राक्षसंयुतान्॥ कोटिशस्संति रुद्राक्षा महारुद्रप्रिया मुने॥४३॥ रुद्राक्षदर्शनेनापि नश्यत्यघकुलं क्षणात्॥ पश्य पश्यात्र रुद्राक्षान् राशीभूताननेकधा॥४४॥ अत्र नाना

मुखाःसंतिरुद्राक्षाः शिवसंमताः॥ रुद्राक्षमालिकांकृत्वाकुरुरुद्राक्षधारणं॥४५॥ मुखंमुखेनसंयोज्य
कुरुरुद्राक्षमालिकां॥ कंठकर्णादिदेशेषुबहुरुद्राक्षमालिकाः॥४६॥ सहस्रमात्रंरुद्राक्षाःयस्यांगेसंति
सर्वदा॥ ससर्वदुःखनिर्मुक्तःप्रयातिशिवसन्निधिं॥४७॥ एतानेकादशमुखान्रुद्राक्षान्पश्यको
टिशः॥ अनर्घ्यानघहान्पुण्यान्धारयस्वयथेच्छया॥४८॥ रुद्राक्षधारणंकृत्वाभस्मधारणपूर्वकं॥कृ
तानेनमहापापोप्यनायासेनमुच्यते॥४९॥ मुनेकेवलभस्मांगैःकार्यंरुद्राक्षधारणं॥ तेषामेवाधिका
रोस्तियतोरुद्राक्षधारणे॥५०॥ वेदस्याध्ययनेकार्ये उपनीतैर्यथातथा॥ रुद्राक्षधारणंकार्यंशुभ्रभस्मा
नुलेपनैः॥ विभूतिधारणंकृत्वाकृत्वारुद्राक्षधारणं॥ यःशिवंपूजयेद्भक्त्यासमोक्षमधिगच्छति॥५२॥ भूति
रुद्राक्षपूतांगैःशिवैकपरदैवतैः॥ पूजितःश्रीमहादेवःतेभ्योमोक्षंप्रयच्छति॥ भुक्तिमुक्तिप्रदंमत्वाशिवं
शैवाःसमाहिताः॥ पूजयंत्यनियत्नेननित्यमव्यभिचारतः॥५४॥ नजानीमःशिवादन्यंनजानीमह
नीश्वरं॥ पूजयंत्यन्वहंभक्त्यासंसारछेदकारणं॥५५॥ संसारनरकमूलानिमहेशार्चनवह्निना॥ सद्योभ
वंतिदग्धानिप्रबलान्यपिसत्वरं॥५६॥ प्ररूढमूलसंबद्धंमहासंसारपादपं॥ शैवाःपदनखाग्रेणछि
त्वायांतिपरंशिवं॥५७॥ अतःशिवपरोभूत्वाभस्मरुद्राक्षधारिणः॥ पूजयस्वमहादेवंदेवदेवोत्तमंशि
वं॥५८॥ इदंसिद्धिप्रदंक्षेत्रंसिद्धलिंगमिदंमुने॥ अत्रसंसारशांत्यर्थंपूजयस्वमहेश्वरं॥५९॥
शिवाराधनेदक्षेयंवचित्तगह्वरदाहकः॥ शांतोभवत्युज्वलोपिसंसारवनपावकः॥६०॥ पुरासंसार
शांत्यर्थंबहवोत्रमुनीश्वराः॥ महेशाराधनंकृत्वामुक्ताःसंसारबंधनात्॥६१॥ विनाशिवार्चनंक
श्चसंसारोनविनश्यति॥ अतःसंसारशांत्यर्थंकुरुष्वशिवपूजनं॥६२॥ पुरात्रैवमहाशैवाःकाशीप्राप्त्यर्थ
मादरात्॥ तपःकृत्वास्थिताघोरंसंसारवनपावकं॥६३॥ इदानीमपिकुर्वंतिशैवालिंगार्चनप्रियाः॥

काशीप्राप्त्यर्थमत्यर्थं तपोयत्नपुरःसरं॥ ६४॥ काशीप्राप्तैव बहुभिरत्र पूर्वं तपस्यया॥ अत्रत्यप्रतपस्याप्तुकाशीप्राप्यते द्विजैः॥ ६५॥ अस्यसिद्धेश्वलिंगस्य प्रभावस्तादृशोयतः॥ सार्धार्बुदं द्विजाः पूर्वे मत्रकृत्वा तपोमुदा॥ ६६॥ काशीप्रापुरनायासात् श्रीमहेशप्रसादतः॥ अतोत्र यत्नतः कार्यं तपः सिद्धिप्रदं द्विजैः॥ ६७॥ अत्र पूर्वं शिवानित्याप्याविर्भूताद्धिमालये॥ चक्रेप्रागुमनीशायापत्र शिवं प्राप्तुं तपोमुदा॥ ६८॥ निष्कलानिरवद्यासाशिवानीशिवरूपिणी॥ दृष्टवात्र विष्णुना पूर्वमादिविद्यायशस्विनी॥ ६९॥ तांतादृशीं मुदा दृष्ट्वा विष्णुः संतुष्टमानसः॥ प्रणम्य दंडवद्भूमौ पूजयामाससादरं॥ ७०॥ ततस्तुष्टाव तां विष्णुरादिविद्यां महेश्वरीं॥ कृतांजलिपुटोभूत्वा प्रणम्य च मुहुर्मुहुः॥ ७१॥ ॥श्रीविष्णुरुवाच॥ ॥जयमातः जगद्वंद्ये जय विश्वेश्वरप्रिये॥ जयकल्याणदे भव्ये जयसौभाग्यसंश्रये॥ १॥ जयकल्याणनिलये जयवेदांतसंस्तुते॥ जयपुण्यैकनिलये जयकारुण्यसंश्रये॥ २॥ जयवेदांतसंवेद्ये जयनित्ये निरंजने॥ जयविंध्यैकनिलये जयापर्णे जयामले॥ ३॥ जयमंजुलमंदारपुष्पमालाविराजिते॥ जयनीलोत्पलानीललसन्नयनपंकजे॥ ४॥ जयसर्वकलापूर्णचंद्रबिंबविभानने॥ जयविद्रुमबिंबाभभव्याधरविराजिते॥ ॥ ५॥ जयदाडीमबीजाभदंतराजिविराजिते॥ जयशार्ङ्गनिभानीलभ्रुवल्लीसमलंकृते॥ ६॥ जयभृंगावलीतुल्यकेशपाशविराजिते॥ जयसिंदूरसंबद्धसीमंतललितालके॥ ७॥ जयपन्नीरसंबद्धघसृणारुणभालके॥ जयकंबुनिभापूर्णकंठमंडलशोभिते॥ ८॥ जयहेममृणालाभबाहुवल्लीविराजिते॥ जयकोकनदारक्तहस्तपद्मविराजिते॥ ९॥ जयकारुण्यपीयूषपूर्णवक्षोजशोभिते॥ जयकामजयोत्पन्नरोमराजिविराजिते॥ १०॥ जयत्रिवलिसंबद्धविलसद्रुचिरोदरे॥ जयसिंदूरकदलीसंनिभोरुमनोहरे॥ ११॥ जयदेवनतापूतविलसत्पदपंकजे॥ जयानवद्ये निर्द्वंद्वे निर्मले लयवर्जिते॥ १२॥

जयविद्येमहाविद्येजयावेदेजयोद्भवे॥ जयलीलाविलासार्थस्वीकृतामलविग्रहे॥ १३॥ जयमौनिमनो
रम्यसिंहासनवराश्रये॥ जयरत्नोच्चवलयरत्नावलिविराजिते॥ १४॥ जयदिव्यमणिभ्राजद्दिव्याभरणशो
भिते॥ जयमातर्महादेविजयमातर्महेश्वरी॥ १५॥ जयमातस्त्रिनयनेजयमातः सुरेश्वरी॥ जयमातः प्र
सीदत्वंजयमातःशिवप्रिये॥ १६॥ जयमातः कृपापूर्णेजयमातः परात्परे॥ किंध्यायतेत्वयादेवि ध्यात
शिवे व्यंनवर्किशिशुभे॥ ध्येयात्वमेवसर्वेषांभुक्तिमुक्तिप्रदायिनी॥ ध्येयध्यातृव्यशून्यात्वंध्यानगम्याकथंशि
वे॥ १८॥ दासास्तवैवसर्वेपिब्रह्मयंप्रसादयशिवे॥ दास्यस्तथास्मदादीनांदेवानांवनिताः शिवे॥ १९॥
देवतासार्वभौमस्यशिवस्यार्धांगभागिनी॥ त्वमस्यनः त्वयादेविकिमत्रध्यायतेवद॥ २०॥ ॥ श्रीपा
र्वत्युवाच॥ ॥ शरीरार्धमहंशंभोः येनप्राप्स्यामिकेशव॥ नदिदानींममाचक्ष्वस्तोत्रंशीघ्रफलप्रदं॥
२१॥ विष्णुरुवाच॥ ॥ शरीरार्धमहेशस्यप्राप्तमेवत्वयाशिवे॥ त्वमेवशिवरूपासितयाप्राप्तंनदृ
श्येत॥ २२॥ तथापिपृच्छतेदेविलोकानुग्रहवांछया॥ त्वयाततोहंवक्ष्यामिस्तोत्रमेकंशिवप्रदं॥
॥ २३॥ पुत्रोहंतवकल्याणीतनोवान्मत्वभावतः॥ मयासहत्वयादेविसर्वेवेदानसंस्तुतं॥ २४॥
द्रष्टंमयाकृतार्थोस्मित्वत्पादांबुजवीक्षणात्॥ यंपश्यसिजगद्दृश्येरूपयातमनेकधा॥ २५॥ पूजयंति
सुराःसिद्धाःमुनयःश्वनसंचायः॥ लक्ष्म्याद्याःसुभगाजाताः त्वत्पादांबुरुहार्चनात्॥ २६॥ त्वत्पा
दपद्मंसततंध्यायतेकमलादिभिः॥ त्वमादिशक्तिःपरमासर्वेवेदानसंस्तुता॥ २७॥ त्वमोंकारस्व
रूपात्वंसर्ववेदस्वरूपिणी॥ त्वमाद्यंतविहीनात्वंसच्चिदानंदरूपिणी॥ २८॥ विज्ञानसारिणीसा
क्षात्ज्ञानधाराविनोदिनी॥ कलाकाष्ठामुहूर्तादिकालोन्नयनकारिणी॥ १००॥ त्वत्तएवसमुत्पन्नाः
वयंब्रह्मादयःसुराः॥ त्वत्तएवसमुत्पन्नालोकाः सर्वेपिशांभवि॥ १॥ नवनेत्रामयःचंद्रःसूर्योग्निश्च

महेश्वरि॥ तवैवमूर्तयः सर्वे एव नाद्याशिवप्रिये॥२॥ त्वदन्यो दृश्यते नात्र त्वमेव सकलं शिवे॥ निष्कला
पि त्वमेवांब सकलासि त्वमीश्वरि॥३॥ त्वमेव सकला देवि सृष्टिस्थित्यंतकारिणी॥ त्वमेव निष्कला देवि
सर्वोपाधिविवर्जिता॥४॥ माया त्वमेव सर्वेषां मुक्तिरूपा स्वभावतः॥ त्वामीदृशीं विदित्वैव सच्चिदानंदलक्ष
णां॥५॥ भजंति मुनयः सर्वे नित्यं वेदास्तुवंति च॥ ईदृशी त्वं निराकारा साकारेवाद्य दृश्यसे॥६॥ यतस्त्व
मसि विज्ञानमनोरूपं न तु ध्रुवं॥ त्वं तथा यागदानानां फलदासि शिवप्रिये॥७॥ त्वामुद्दिश्यैव मुनिभिः
सन्ततं तप्यते तपः॥ संतुष्टा तपसा देवि ददासि परमं पदं॥८॥ सुश्रीता यास्त्वयो मे ननादेयं वस्तु दृश्य
ते॥ शिवे त्वयैव सत्वानि दैकुंठादि पदान्यपि॥९॥ तानि दत्तानि चास्मभ्यं त्वयैवाचितया ध्रुवं॥ य
तः शिव स्त्वमेवासि ततोदत्तं शिवेन यत्॥१०॥ त्वत्त्वयैव ध्रुवं दत्तं सर्वं कल्याणसंश्रये॥ रत्नराशेर्मनो
ज्ञानि रत्नानीव मया पुरा॥११॥ वेदराशेर्गृहीतानि शिवनामानि शोभने॥ संत्यनंतानि नामानि महादेव
स्य शोभवे॥१२॥ तानि सर्वाणि नामानि पावनानि न संशयः॥ तानि दिव्यानि नामानि प्रसिद्धानि वरान
ने॥१३॥ बहून्यपि तन नरस्तेषां आवर्तितुं न हि दुर्लभा॥ अस्ति गुह्यतमं देवि नाम्नामष्टोत्तरं शतं॥१४॥ शंभो
रहं प्रवक्ष्यामि पठतां शीघ्रकामदं॥ ॥श्रीविष्णुरुवाच॥ ॥श्रीकाशीविश्वेश्वराय नमः॥ ॥ओं॥

शिवो महेश्वरः शंभुः पिनाकी शशिशेखरः॥ वामदेवो विरूपाक्षः कपर्दी नीललोहितः॥१॥ शंकरः शूलपाणि
श्च खट्वांगी विष्णुवल्लभः॥ शिपिविष्टोंबिकानाथः श्रीकंठो भक्तवत्सलः॥२॥ भवः शर्वस्त्रिलोकेशः शि
तिकंठः शिवाप्रियः॥ उग्रः कपाली कामारिरंधकासुरसूदनः॥३॥ गंगाधरो ललाटाक्षः कालकालः कृपा
निधिः॥ भीमः परशुहस्तश्च मृगपाणिर्जटाधरः॥४॥ कैलासवासी कवची कठोरस्त्रिपुरांतकः॥ वृषांको वृ
षभारूढो भस्मोद्धूलितविग्रहः॥५॥ साम प्रियः स्वरमयस्त्रयीमूर्तिरनीश्वरः॥ सर्वज्ञः परमात्मा च सोमसू

यौग्निलोचनः॥६॥ हविर्यज्ञमयः सोमः पंचवक्त्रः सदाशिवः॥ विश्वेश्वरो वीरभद्रो गणनाथः प्रजापतिः॥

॥७॥ हिरण्यरेता दुर्धर्षो गिरिशो गिरिशोनघः॥ भुजंगभूषणो भर्गो गिरिधन्वा गिरिप्रियः॥८॥ कृत्ति

वासाः पुरारातिः भगवान्प्रमथाधिपः॥ मृत्युंजयः सूक्ष्मतनुः जगद्व्यापी जगद्गुरुः॥९॥ व्योमकेशो महा

सेनजनकश्चारुविक्रमः॥ रुद्रो भूतपतिः स्थाणुरहिर्बुध्न्यो दिगंबरः॥१०॥ अष्टमूर्तिरनेकात्मा सात्विकः

शुद्धविग्रहः॥ शाश्वतः खंडपरशुरजः पाशविमोचकः॥११॥ मडः पशुपतिर्देवो महादेवोऽव्ययः प्रभुः॥

पूषदंतभिदव्यग्रो दक्षाध्वरहरो हरः॥१२॥ भगनेत्रभिदव्यक्तः सहस्राक्षः सहस्रपात्॥ अपवर्गप्रदोनंत

स्तारकः परमेश्वरः॥१३॥ ॥ विष्णुरुवाच॥ ॥ इमानि दिव्यनामानि जप्यंते सर्वदा मया॥ नामकल्पल

तेयं मे सर्वाभीष्टप्रदायिनी॥१४॥ नामान्येतानि सुभगे शिवदानि न संशयः॥ वेदसर्वस्वभूतानि नामा

न्येतानि वस्तुतः॥१५॥ एतानि यानि नामानि तानि सर्वार्थदानि हि॥ जप्यंते सादरं नित्यं मया नियमपूर्व

कं॥१६॥ वेदेषु शिवनामानि श्रेष्ठान्यघहराणि च॥ संत्यनंतानि सुभगे वेदेषु विविधेषु च॥१७॥ तेभ्यो ना

मानि संगृह्य कुमाराय महेश्वरः॥ अष्टोत्तरशतं चैव नाम्नामुपदिशत्पुरा॥१८॥ तानि नामानि दिव्यानि ज

प्यंते सादरं मया॥ इत्युक्त्वा प्रणिपत्यांबां संपूज्य च जनार्दनः॥१९॥ ततो जगाम वैकुंठं प्रेषितो जगदंबया॥

शिवमाराधयंती सा गिरिजापि ततः शिवं॥१३४॥ संप्राप शिवरूपा सा भूयः प्राप शिवापि सा॥ गौरीलिंगमि

दं विप्र शिवानी निर्मितं पुरा॥१३५॥ एतल्लिंगार्चनान्मर्त्यैः मत्पुवाधा न लभ्यते॥ अस्मिन्लिंगे महादे

वः प्रादुरासीद्यदा तदा॥१३६॥ शिवोपि पूजयामास लिंगमेतन्मनोहरं॥ त्रिकालमेतल्लिंगस्य यः करिष्य

ति पूजनं॥३७॥ स सर्वान्लभते कामान्मोक्षमंते न संशयः॥ पुरात्र पुष्पदंतेन तपस्तप्तं दुरासदं॥३८॥

तत्कृतेनैव तपसा क्षुब्धमासीज्जगत्त्रयं॥ इंद्रादयो लोकपालाः क्षुब्धाश्चैव तदा मुने॥३९॥ विष्णु

लोकंययुः शीघ्रंब्रह्मणापिसमन्विताः॥ ततस्तानागतान्दृष्ट्वाज्ञात्वातत्क्षोभकारणं॥४०॥ ब्रह्मादीनाहतान्वि
ष्णुः उपवेश्यपयपानथं॥ ॥श्रीविष्णुरुवाच॥ ॥ पुष्पदंतोग्रतपसाभीतायूयंततोभयं॥ तथापिवस्तुनोदे
वाः भवतांनभविष्यति॥ यानिसंत्यधुनादेवाः पदान्यस्माकमस्तनं॥४२॥ तानितेनतृणगण्यंतेपुष्पदंतेनधी
मता॥ सगाणपत्यमधुनालब्धुमिच्छतिशंकरात्॥ ४३॥ सबलादपिदत्तानिपदान्येतानितेच्छति॥ वैकुंठा
दीनिसर्वाणिपदानिबहुधापुरा॥४४॥ तेनलब्धान्यतस्तस्यनैतेस्विच्छाभविष्यति॥ यश्चेदृशोग्रतपसाप्री
णयिष्यतिशंकरं॥४५॥ सकिमस्मत्पदंवांछांकरिष्यतिवदंतुनः॥ यःकरिष्यतियत्नेनतपोघोरंदुरासदं॥
॥४६॥ ससर्वदाशिवंप्राप्तुंसमुत्सुकोभविष्यति॥ अतस्तस्माद्भयंत्यक्त्वापूर्वंस्वस्वपदेसदा॥४७॥ तिष्ठं
तुसावधानेनस्वस्वकर्मसुसंयुताः॥ भ्रमुःस्थितोमयाप्येवंसंस्थितः नःशनैः शनैः॥४८॥ सुखेनस्थीयतांदे
वास्तदाप्रभृतिसर्वदा॥ इत्युक्त्वाविष्णुनादेवाः सर्वेस्वस्वपदंययुः॥४९॥ ततस्तस्माद्भयंत्यक्त्वंसर्वैरपि
सुरैर्मुने॥ एतादृशंतपोघोरंपुष्पदंतश्चकारसः॥५०॥ तेनैवतपसातुष्टः प्रत्यक्षोभून्महेश्वरः॥ प्रादुर्भूतंमहा
देवंगौरीलिंगान्मनोहरात्॥५१॥ पुष्पदंतोविलोक्याशुपूजयामाससादरं॥ ततःप्रणम्यतुष्टावव्यचिंतयानत
कंधरः॥५२॥ कृतांजलिपुटोभूत्वापुष्पैःसंपूज्यचांजलिः॥ ॥ श्रीपुष्पदंतउवाच॥ ॥महिम्नःपारंतेपर
मविदुषोयद्यसदृशीस्तुतिर्ब्रह्मादीनामपितदवसन्नास्त्वयिगिरः॥ अथावाच्यःसर्वःस्वमतिपरिणामावधि
गृणन्ममाप्येषस्तोत्रेहरनिरपवादःपरिकरः॥१॥ अतीतःपंथानंतवचमहिमावाङ्मनसयोरतद्व्यावृत्त्या
यंचकितमभिधत्तेश्रुतिरपि॥ सकस्यस्तोतव्यःकतिविधगुणःकस्यविषयःपदेत्वर्वाचीनेपततिनमनःकस्य
नवचः॥२॥ मधुस्फीतावाचःपरमममृतंनिर्मितवतस्तवब्रह्मन्किंवागपिसुरगुरोर्विस्मयपदं॥ ममत्वेतांवाणीं
गुणकथनपुण्येनभवतः पुनामीत्यर्थेस्मिन्पुरमथनबुद्धिर्व्यवसिता॥३॥ तवैश्वर्यंयत्तज्जगदुदयरक्षाप्रलय

रुत्रयीवस्तुव्यस्तंतिसृषुगुणभिन्नासुतनुषु॥अभव्यानामस्मिन्वरदरमणीयामरमणींविहंतुंव्याक्रोशींवि
दधतइहैकेजडधियः॥ ४॥ किमीहःकिंकायःसखलुकिमुपायस्त्रिभुवनंकिमाधारोधातासृजतिकिमु
पादानइतिच॥अतर्क्यैश्वर्येत्वय्यनवसरदुःस्थोहतधियःकुतर्कोयंकांश्चिन्मुखरयतिमोहायजगतः॥
॥५॥अजन्मानोलोकाःकिमवयववंतोपिजगतामधिष्ठातारंकिंभवविधिरनादृत्यभवति॥अनीशोवा
कुर्याद्भुवनजननेकःपरिकरोयतोमंदास्त्वांप्रत्यमरवरसंशेरतइमे॥६॥त्रयीसांख्यंयोगःपशुपतिमतं
वैष्णवमितिप्रभिन्नेप्रस्थानेपरमिदमदःपथ्यमितिच॥रुचीनांवैचित्र्यादृजुकुटिलनानापथजुषांनृणामे
कोगम्यस्त्वमसिपयसामर्णवइव॥७॥महोक्षःखट्वांगंपरशुरजिनंभस्मफणिनःकपालंचेतीयत्तववरदतंत्रो
पकरणं॥सुरास्तांतामृद्धिंदधतितुभवद्भ्रूप्रणिहितांनहिस्वात्मारामंविषयमृगतृष्णाभ्रमयति॥ ८॥
ध्रुवंकश्चित्सर्वंसकलमपरस्त्वध्रुवमिदंपरोध्रौव्याध्रौव्येजगतिगदतिव्यस्तविषये॥समस्तेप्येतस्मि
न्पुरमथनतैर्विस्मितइवस्तुवन्जिह्रेमित्वानखलुननुधृष्टामुखरता॥९॥तवैश्वर्यंयत्नाद्यदुपरिवि
रिंचोहरिरधःपरिच्छेत्तुंयातावनलमनलस्कंधवपुषः॥ततोभक्तिश्रद्धाभरगुरुगृणद्भ्यांगिरिशयत्स्वयंतस्थे
ताभ्यांतवकिमनुवृत्तिर्नफलति॥१०॥अयत्नादापाद्यत्रिभुवनमवैरव्यतिकरंदशास्योयद्बाहूनभृतरणकं
डूपरवशान्॥शिरःपद्मश्रेणीरचितचरणांभोरुहबलेःस्थिरायास्त्वद्भक्तेस्त्रिपुरहरविस्फूर्जितमिदं॥११॥
अमुष्यत्वत्सेवासमधिगतसारंभुजवनंबलात्कैलासेपित्वदधिवसतौविक्रमयतः॥अलभ्यापातालेप्यल
सचलितांगुष्ठशिरसिप्रतिष्ठात्वय्यासीद्ध्रुवमुपचितोमुह्यतिखलः॥१२॥यदृद्धिंसुत्राम्णोवरदपर
मोच्चैरपिसतीमधश्चक्रेबाणःपरिजनविधेयत्रिभुवनः॥नतच्चित्रंतस्मिन्वरिवसितरित्वच्चरणयोर्नकस्याप्यु
न्नत्यैभवतिशिरसस्त्वय्यवनतिः॥१३॥अकांडब्रह्मांडक्षयचकितदेवासुरकृपाविधेयस्यासीद्यस्त्रिनयनवि

वंसंहृनवन:॥ सकल्माषःकंठेननवकुरुतेनश्रियमहोविकारोपिश्लाघ्योभुवनभयभंगव्यसनिनं॥ १४॥ अ
सिद्धार्थानेवक्वचिदपिसदेवासुरनरेनिवर्तंतेनित्यंजगतिजयिनोयस्यविशिखा:॥ सपश्यंन्नीशत्वा
मितरसुरसाधारणमभूत्स्मर: स्मर्तव्यात्मानहिवशिषुपथ्य: परिभव:॥ १५॥ महीपादाघाताद्व्रजतिस
हसासंशयपदंपदंविष्णोर्भ्राम्यद्भुजपरिघरुग्णग्रहगणं॥ मुहुर्द्यौर्दौस्थ्यंयात्यनिभृतजटाताडि
ततटाजगद्रक्षायेत्वंनटसिननुवामेवविभुता॥ १६॥ वियद्व्यापीताराग्रणगुणितफेनोद्गमरुचि: प्रवा
होवारांय: पृषतलघुदृष्ट: शिरसिते॥ जगद्वीपाकारंजलधिवलयंतेनकृतमित्यनेनैवोन्नेयं
धृतमहिमदिव्यंतववपु:॥ १७॥ रथ: क्षोणीयंताशतधृतिरगेंद्रोधनुरथोरथांगेचंद्रार्कौरथचरणपा
णि: शरइति॥ दिधक्षोस्तेकोयंत्रिपुरतृणमाडंबरविधिर्विधेयै: क्रीडंत्योनखलुपरतंत्रा: प्रभुधि
य:॥ १८॥ हरिस्तेसाहस्रंकमलबलिमाधायपदयोर्यदेकोनेतस्मिन्निजमुदहरन्नेत्रकमलं॥ गतो
भक्त्युद्रेक: परिणतमसौचक्रवपुषात्रयाणांरक्षायैत्रिपुरहरजागर्तिजगतां॥ १९॥ क्रतौसुप्तेजाग्रत्त्व
मसिफलयोगेक्रतुमतांक्वकर्मप्रध्वस्तंफलतिपुरुषाराधनमृते॥ अतस्त्वांसंप्रेक्ष्यक्रतुषुफलदानप्र
तिभुवंश्रुतौश्रद्धांबध्वादृढपरिकर:कर्मसुजन:॥ २०॥ क्रियादक्षोदक्ष: क्रतुपतिरधीशस्तनुभृतामृषी
णामार्त्विज्यंशरणदसदस्या: सुरगणा:॥ क्रतुभ्रेषस्त्वत्त: क्रतुफलविधानव्यसनिनोध्रुवंकर्तु: श्रद्धा
विधुरमभिचारायहिमखा:॥ २१॥ सतांवर्त्मत्यक्त्वाश्रुतिसमधिगम्यंसहभुवंघृणामप्युन्मृज्यस्व
जनविषयस्नेहगुणिनां॥ द्विज: कृतन्यादेपितरमपराधत्वयिविभोमनुष्यत्वंसद्य: स्त्रिदशपरिणा
मेनचिजहौ॥ २२॥ प्रजानाथंनाथप्रसभमधिकंस्वांदुहितरंगतंरोहिद्भूतांरिरमयिषुमृष्यस्यव
पुषा॥ धनु:पाणेर्यातंदिवमपिसपत्रीकृतममुंत्रसंतंतेद्यापित्यजतिनमृगव्याधरभस:॥ २३॥ स्वलावण्या

ज्ञांसाधृतधनुषमन्हायतृणवत्पुरःप्लुष्टंदृष्ट्वापुरमथनपुष्पायुधमपि॥ यदिस्त्रैणंदेवीयमनिरतदे
हार्धघटनादवैतित्वामद्धाबतवरदमुग्धायुवतयः॥२४॥ श्मशानेष्वाक्रीडास्मरहरपिशाचाःसहच
राश्चिताभस्मालेपःस्रगपिनृकरोटीपरिकरः॥ अमंगल्यंशीलंतवभवतुनामैवमखिलं तथापिस्मर्तॄ
णांवरदपरमंमंगलमसि॥२५॥ मनःप्रत्यक्चित्तेसविधमविधायात्तमरुतः प्रहृष्यद्रोमाणःप्रमद
सलिलोत्संगितदृशः॥ यदालोक्याल्हादंहृदइवनिमज्यामृतमयेदधत्यंतस्तत्त्वंकिमपियमिनःतत्कि
लभवान्॥२६॥ त्वमर्कस्त्वंसोमस्त्वमसिपवनस्त्वंहुतवहः॥ त्वमापस्त्वंव्योमत्वमसिधरणीरात्मात्वमि
तिच॥ परिच्छिन्नामेवंत्वयिपरिणताबिभ्रतिगिरंनविद्मस्तत्तत्त्वंवयमिहतुयत्त्वंनभवसि॥२७॥ त्रयीं
तिस्रोवृत्तीस्त्रिभुवनमथोत्रीनपिसुरानकाराद्यैर्वर्णैस्त्रिभिरभिदधत्तीर्णविकृति॥ तुरीयंतेधाममध्व
निभिरवरुंधानमणुभिः समस्तव्यस्तंत्वांशरणदगृणात्योमितिपदं॥२८॥ भवःशर्वोरुद्रः पशुपति
रथोग्रःसहमहान् तथाभीमेशानाविति यदभिधानाष्टकमिदं॥ अमुष्मिन्प्रत्येकंप्रविचरतिदेवश्रुति
रपिप्रियायास्मैधाम्नेप्रणिहितनमस्योस्मिभवते॥२९॥ नमोनेदिष्ठायप्रियदवदविष्ठायचनमोनमः
क्षोदिष्ठायस्मरहरमहिष्ठायचनमः॥ नमोवर्षिष्ठायत्रिनयनयविष्ठायनमः सर्वस्मैतेतदिदमितिश
र्वायचनमः॥३०॥ बहलरजसेविश्वोत्पत्तौभवायनमोनमः॥ जनसुखकृतेसत्वोद्रेकेमृडायनमोनमः॥
प्रबलतमसेतत्संहारेहरायनमोनमः प्रमहसिपदेनिःस्त्रैगुण्येशिवायनमोनमः॥३१॥ कृशपरिण
तिचेतःक्लेशवश्यंक्वचेदंक्वचतवगुणसीमोल्लंघिनीशश्वदृद्धिः॥ इतिचकितममंदीकृत्यमांभक्तिराधाद्व
रदचरणयोस्तेवाक्यपुष्पोपहारं॥३२॥ वपुःप्रादुर्भावादनुमितमिदंजन्मनिपुरा पुरारेनकापिक्षणमपि
भवंतंप्रणतवान्॥ नमन्मुक्तःसंप्रत्यहमतनुरग्रेप्यनतिभाक् इतीशक्षंतव्यंतदिदमपराधद्वयमपि॥३३॥

असितगिरिसमंस्यात्कज्जलंसिंधुपात्रेसुरतरुवरशाखालेखनीपत्रमुर्वी॥ यदिलिखतिगृहीत्वाशा रदासार्वकालंतदपितवगुणानामीशपारंनयाति॥ ३४॥ असुरमुनींद्रैरर्चितस्येंदुमौलेःग्रथितगुणम हिम्नोनिर्गुणस्येश्वरस्य॥ सकलगुणवरिष्ठःपुष्पदंताभिधानःरुचिरमलघुवृत्तंस्तोत्रमेतच्चकार॥ ३५॥ अहरहरनवद्यंधूर्जटेस्तोत्रमेतत्पठतिपरमभक्त्याशुद्धचित्तःपुमान्यः॥ सभवतिशिवलोकेरुद्रतु ल्यस्तथात्रप्रचुरतरधनायुःपुत्रवान्कीर्तिमांश्च॥ ३६॥ महेशान्नापरोदेवोमहिम्नोनापरस्तवः॥ अ घोरान्नापरोमंत्रोनास्तितत्त्वंगुरोःपरं॥ ३७॥ ॥ कश्यपउवाच॥ ॥ एवंस्तुतोमहादेवःकरुणासागरः प्रभुः॥ गाणपत्यंददौतस्मैतदैवाखिलवत्सलः॥ ९०॥ दीक्षादानंतपस्तीर्थंज्ञानंयागादिकाःक्रियाः॥ म हिम्नस्तवपाठस्यकलांनार्हंतिषोडशीं॥ ९१॥ एतादृशैःस्तवैस्तत्रमंत्रैश्चबहुभिःपुरा॥ तेमहेशप्रसादेन मुक्ताश्चमुनिसत्तमाः॥ ९२॥ पुराविष्णुप्रभृतयःसुरामोहसमन्विताः॥ सार्धंसोमत्रयोदश्यांनार्च यामासुरीश्वरं॥ ९३॥ तदासमुद्रेपतितालक्ष्मीर्विष्णोर्मनोहरा॥ ऐरावतोपिपतितोदेवाश्वेनसहांबु धौ॥ ९४॥ अमृतंचापतत्तत्ररत्नैःश्चविविधैःसह॥ ततोबभूवुस्तेदेवानिस्तेजस्काभयाकुलाः॥ ९५॥ ततस्तपदात्सर्वेप्रच्युताःपृथिवींगताः॥ भूमावगस्त्यंशैवेंद्रंददृशुस्तेसुरामुने॥ ९६॥ प्रणेमुस्तेततोग स्त्यंनिस्तेजस्काःसुरास्थिराः॥ विचार्यसततस्तत्त्वंविष्ण्वादीनांकृतारुतं॥ ९७॥ तानुवाचततोधीमान्कुंभ योनिश्शिवार्चकः॥ ॥अगस्त्यउवाच॥ ॥भवद्भिरद्यमोहेनतशिवाभ्यर्चनंकृतं॥ तेनपापेनभवतामभव त्स्वपदच्युतिः॥ प्राप्याधिकारांविश्वेशात्मत्तायूयंबभूविथ॥ ९८॥ भवद्भिस्तन्मदाविष्टैःत्यक्तंशंकरपूजनं॥ अतएवाधिकारास्तेभवतांप्रच्युताःसुराः॥ १००॥ समुद्रेपतितालक्ष्मीरमृतेरत्नान्विता॥ रत्नैरश्वेनदेवे नसंयुतानर्चनात्प्रभोः॥ १॥ येनार्चयंतिगौरीशंसावधानेनसर्वदा॥ तेषामेतादृशाःक्लेशाःभविष्यंतिपदेपदे॥

॥२॥ येपूजयंतिगौरीशंपत्रेणापयसापिवा॥ तेसर्वभयनिर्मुक्ताःतिष्ठंतिसुखिनः सदा॥ ३॥ गौरीशपूजनंत्य
त्कमालस्येनभ्रमेणवा॥ तेषांकुसुरवंलेशमात्रमप्यन्वयसंभविष्यति॥४॥ येसंततंशिवरताःशिवपूजारताःसदा॥
तेषामेवशुभंनूनंअन्येषामशुभंध्रुवं॥ सुरवांः संप्राप्यः दुःखानिप्रकल्पयंतिपुनःपुनः॥ परंतुदुःखनाशार्थंना
र्चयंतिसदाशिवं॥ ६॥ अनुः स्मरतोवाद्दृष्टोवामहादेवःकृपानिधिः॥ ददातिमहदैश्वर्यंयपूजितश्चेत्परंपदं॥
॥७॥ एतादृशंमहादेवंसर्वदेवशिखामणिं॥ नार्चयंतिनरामूढाःभवंतद्दयमोहिताः॥ ८॥ शिवार्चनार्थं
यत्नेनसंपाद्यकुसुमादिकं॥ यःपूजयेन्महादेवसमुक्तोभवतिध्रुवं॥ यःपूजयेन्महादेवंकुसुमैरसुमैरपि॥
सपुल्कसोवाभूपोवान्समोप्यसमोभवेत्॥ १०॥ कृत्याणीपतिरीशानःस्मृतोपिसर्वदादरात्॥ पदेपदे
ऽपिकल्याणंतनुतेनात्रसंशयः॥ ११॥ यःकालांतकमश्रांतंनितांतंनार्चयिष्यति॥ सकालकवलःसद्यो
विनाकालंभविष्यति॥ १२॥ लक्ष्म्यादयःशंकरेणक्षीराब्धौरक्षिताशिवं॥ पूजयित्वाधकुर्वंस्तुक्षीरा
ब्धिमथनंसुराः॥ १३॥ येमजंत्यनिशंभक्त्यादेवदेवंमहेश्वरं॥ तेलभ्यतेविनायत्नंस्वाभीप्सितमसंशयं॥
१४॥ भवद्भिर्मोहसंक्रांतैः कदाचिन्नार्चितःशिवः॥ अतोत्रयूयमनिशंशिवपूजापरायणाः॥ १५॥ अतः
कृतमहादेवपूजनैरपियत्नतः॥ भवद्भिरब्धिमथनात्प्राप्तव्यंस्वेष्टमाशुचः॥ १६॥ विघ्नायदिभविष्यंति
क्षीराब्धिमथनेतदा॥ बिल्वपत्रादिभिःसम्यक्कुर्वंतुशिवपूजनं॥ १७॥ नश्यंतिविघ्नाःसर्वेपिश्रीमहा
देवपूजया॥ यतोविघ्नहरस्यापिजनकोविघ्नहाशिवः॥ १८॥ विघ्नघ्नपुत्रोविघ्नेशोयतस्तस्माद्गणाधिपः॥
विघ्नघ्नइतिविख्यातोयेदेवष्वन्येष्वपिध्रुवं॥ १९॥ असकृद्वासकृद्वापियस्मरेत्सांबमव्ययं॥ कृत्वापिसमहा
रंभंसतत्फलमवाप्नुयात्॥ २०॥ यःकार्यारंभसमयेनाराधयतिशंकरं॥ सविघ्नौघसमाक्रांतोभविष्यतिपदे
पदे॥ २१॥ विधिवत्पार्वतीनाथःकार्यारंभेषुपूजितः॥ संहृत्यविघ्ननिवहान्ददातिचफलंध्रुवं॥ २२॥ विघ्न

दोविघ्नहर्ताचफलदाफलदेपिच॥शिवएवेतिनिर्णीतोवेदवेदांतपारगैः॥२३॥नार्चयिष्यतियोभक्त्या
पार्वतीप्राणवल्लभं॥सविघ्नयत्नोनिहतोनिष्फलोनिहतोभवेत्॥२४॥अतोभवंतोयत्नेनपूजयित्वासदाशि
वं॥समुद्रमथनोद्योगंकुर्वंत्विष्टफलाप्तये॥मंथानंमंदरंकृत्वाशेषरूपेणरज्जुना॥कुर्वंत्वत्यंतयत्नेनसमु
द्रमथनंबुधाः॥२६॥इतितद्वचनंश्रुत्वाविष्णुब्रह्मादयःसुराः॥चक्रुःक्षीराब्धिमथनंशिवाराधनपूर्वकं॥
२७॥क्षीराब्धिमथनोद्युक्तानसुरानीशःसुरार्चितः॥आप्याययदहृष्टोपिसर्वांतरगतःसदा॥२८॥शिवे
नाप्यायितादेवाविष्णुबाद्यास्तेमुहुर्मुहुः॥शिवंसंपूज्ययत्नेनचक्रुश्चमथनंमुदा॥२९॥सत्वरंमथ्यमानस्तैः
क्षीराब्धिर्व्याकुलस्तदा॥तरंगहस्तैरमरान्वारयन्निवसंस्थितः॥३०॥ततस्तेमथनोद्युक्ताःशिवंविस्मृत्यसत्व
रं॥अहंबलीबलीत्युक्त्वाचक्रुर्मथनमुद्यताः॥३१॥ततःपरंमथ्यमानाद्दोलोलात्क्षीरसागरात्॥काल
कूटसमुत्पन्नोज्वालामालासमाकुलः॥३२॥ततस्तदब्धिसंभूतंहालाहलमनुद्भुतं॥दृष्ट्वाविहायमथनं
जग्मुःप्रतिदिशंसुराः॥३३॥हाहाकिमासीदिदमित्यतित्रस्तादिवौकसः॥पुनःप्राप्ताःकुंभयोनिंकाल
कूटहतप्रभाः॥३४॥तानागतान्सुरान्दृष्ट्वाकुंभयोनिःशिवार्चकः॥कालकूटभयभ्रष्टान्धानुवाचप्रीतिपूर्व
कं॥३५॥ ॥अगस्त्यउवाच॥ ॥अहंबलीबलीत्येवंभवद्भिर्मोहसंवृतैः॥विस्मृतःशंकरस्तस्मानभयंप्राप्त
नसंशयः॥३६॥क्वशक्तिर्भवतामस्तिसमुद्रमथनेसुराः॥श्रीमहेशबलेनैवकृतंतन्मथनंतदा॥३७॥
महेशःसर्वजंतूनांबलदःपुष्टिदःप्रभुः॥कर्ताकारयिताचैवशिवएवनसंशयः॥३८॥कर्ताहमितिमत्वा
नानित्यभ्रांताभवादृशाः॥बहवःसंतिभूलोकेशिवमायाविमोहिताः॥३९॥जगत्स्रष्टामहादेवःपाति
हंतीचलीलया॥पुनःसृजतिपातीशःसंहरत्यपिलीलया॥४०॥करोतिसर्वकर्माणिभगवान्पार्वतीपतिः
॥नतस्मादपरःकोपिकार्यकर्ताश्रुतिश्रुतः॥४१॥समुद्रमथनादीनिमहाकार्याणिवस्तुतः॥कर्तुंविश्वेश्व

गादन्योन समर्थोन संशयः॥ अप्यायितैर्महेशेन भवद्भिर्मथनं कृतं॥ अन्यथा मथने शक्तिः भवतां क्व भ
विष्यति॥४३॥ महेशानुग्रहीतान्यो यन्त्योण्वपि भूरिशः॥ सदा करोति कार्याणि नान्यः को वा भवादृशः॥
४४॥ महेशप्रेरितैरेव नरैः श्यामरैरपि॥ क्रीयंते खलु कार्याणि नानारूपाणि सादरं॥४५॥ भवादृशा महेशो
न यदि न प्रेरितास्तदा॥ शक्तास्तृणाग्रमप्यल्पं नैव चालयितुं सुराः॥४६॥ परतंत्रैर्भवद्भिस्तु महेशप्रेर
णं विना॥ क्रीयंते यदि कर्माणि तदानीशं जगद्भवेत्॥४७॥ जगदादि भवेद्देवाः सर्वमेतदनीश्वरं॥ त
दाक्षित्यादिके कार्ये को वा कर्ता भविष्यति॥४८॥ कार्ये यद्यद्भवेत्तत्तु वस्तुनः कर्त्रपेक्षितं॥ कर्तारमनपे
क्ष्येव कार्यं क्वापि न जायते॥४९॥ भवादृशानामज्ञानां जगत्कर्तृत्वकल्पने॥ बाधेति स्फुटमेवातो जग
त्कर्ता महेश्वरः॥५०॥ शिवः क्षित्याद्युपादानज्ञानवानत एव सः॥ जगदीशादिनिख्यातः स विश्वेश इति श्रु
तः॥५०॥ वस्तुतो जगदीशत्वं विश्वेशस्यैव संमतं॥ विश्वेशो जगदीशत्वं न्यायप्राप्तमरवंडितं॥५१॥ वि
श्वेश्वरस्तु विष्णुर्वा ब्रह्मा वा न भविष्यति॥ यतो न द्वयोरेकः प्रभुर्विश्वेश्वरः पिता॥५२॥ नमस्ते अस्तु भ
गवन्नित्यादिश्रुतिभिः सदा॥ विश्वेश्वरो महेशान्यो नेति निश्चीयते मया॥५३॥ सोमः पवत इत्यादिश्रुत्या
सोमः सदाशिवः॥ जनिता पवनादीनां विष्णुं वनानामिति श्रुतिः॥५४॥ ब्रह्माप्ययं समुत्पन्नो विश्वेशाच्चतु
राननः॥ सर्वेप्येते सुरा जाताः श्रीमहेशान्महौजसः॥५५॥ अतः सर्वसुराधीशः सर्वलोकेश्वरः शिवः॥ वेदे
रेवायमर्थस्तु निर्णीतोस्ति मुहुर्मुहुः॥५६॥ ईशानः सर्वविद्यानामित्यादिश्रुतिभिर्मुहुः॥ महेशस्यैव क
र्तृत्वं निश्चितं नात्र संशयः॥५७॥ तस्मान्मीश्वरं शक्तमविज्ञाय बलं स्वकं॥ स्तुतं भवद्भिः स्तेनैव कालकू
टो विनिर्मितः॥५८॥ यतस्तु तं बलं स्वीयमतः कुक्षोमहेश्वरः॥ कालकूटाभिधं क्रोधं ससर्जात्र न संशयः॥
॥५९॥ शरण्यं शरणं प्राप्तो भवद्भिरधुना शिवः॥ अन्यथा कालकूटोयं भवतां नाशको भवेत्॥६०॥ गत्वाहि

मगिरिंतत्रगौरीलिंगमनामयं॥पूजयध्वंयथाशास्त्रंसर्वलोकनिरंतरे॥६१॥पुराभवंतंगांधर्वाःसोमकासुर
नाशकं॥सदेवास्तुष्टुवुर्हृष्टाःकेशवंजगतांहितं॥६२॥तदानवाभवद्गर्वःसोमकासुरनाशकः॥तेनग
र्वेणसर्वेषांसुराणांमोहनंकृतं॥६३॥मोहितास्तेसुराभूयोभवंतंतुष्टुवुर्हरे॥तदाससभवद्धोरालक्ष्मीनाथा
शरीरवाक्॥६४॥श्रुत्वातांवाचमनघांसर्वेषांचभयप्रदां॥सर्वेपिकंपमापन्नास्त्वयाचसहकेशव॥६५॥
त्वयानस्मर्यतेकिंसातदोत्पन्नाशरीरवाक्॥सामयावक्ष्यतेविष्णोश्रुणुतायत्नतोधुना॥६६॥स्तूयमा
नंतदाविष्णुंभवंतंसाशरीरवाक्॥स्तोतव्योनायमित्याहस्तुत्योस्त्यन्यइतिध्रुवं॥६७॥पश्यतेहातिदू
रस्थंमहाबलसमप्रभं॥तंजित्वाकेशवंदेवाःस्तुवध्वंत्वान्यथातुन॥६८॥इतिश्रुत्वावचोदेवाःसर्वेवि
स्मयमागताः॥तदानत्पुरुषाभ्याशंप्रेषयुःपावकंभ्रमात्॥६९॥तदानमाहकोसीतिपुरुषंवह्निसन्निभं॥
सत्वंकइतिसंप्राहकाशक्तिरितिकेशव॥७०॥प्राहतंवह्निरुद्दहनोदाहकोहमितिध्रुवं॥तदानमाहपुरुषः
तृणंदहदहेतिसः॥७१॥तदादग्धुंसमर्थोपिवह्निरत्यंतमुज्वलः॥तृणदाहेप्यशक्तःसन्लज्जितोभूल
दाहरे॥७२॥ततोनिवृत्तोदेवानांप्रविष्टोमध्यमाधुसः॥स्ववृत्तांतमशेषेणजगादनतकंधरः॥७३॥ततो
वायुर्गतस्तत्रसोपिलज्जावशंगतः॥ततोयमोगतस्तत्रसोपिलज्जावशंगतः॥७४॥ततस्त्वयागतस्तत्र
त्वयालज्जासमाश्रिता॥ततःसर्वेगतादेवाःतेपिलज्जासमाश्रिताः॥७५॥ततःपरावृत्तंभवद्भिःशंभु
धिकृतेः॥सवृत्तांतःकथंविष्णोविस्मृतोद्यत्वयावद॥७६॥अतःसदाशिवःशक्तःसर्वशक्तिप्रपूरकः॥त
च्छक्तिकोटिकोट्यंशाच्छक्तिर्युष्मासुवर्तिता॥७७॥ ॥कश्यपउवाच॥ ॥इतितद्वचनंश्रुत्वाविष्णुब्र
ह्मादयःसुराः॥अत्रागत्यमहादेवंपूजयामासुरादरात्॥७८॥ततस्तत्पूजयाप्रीतःकरुणानिधीरीश्व
र॥प्रत्यक्षोभूदुमाकांतोनानाविधिगणान्वितः॥७९॥तेदृष्ट्वाश्रीमहादेवमनंतेदुरविप्रभं॥स्तोतुमारेभि

श्रीशिव

रेत्रांभुंब्रह्मविष्णवादयःसुराः॥ देवा ऊचुः॥ ॥नमोनमस्तेभगवन्महेशनमोनमस्तेभगवन्दयाब्धे॥
नमोनमस्तेवृषभेंद्रकेतोनमोनमस्तेनिगमैकहेतो॥ ८१॥ नमोनमस्तेभगवन्गिरीशनमोनमस्तेभग
वन्छरण्य॥नमोनमस्तेभगवन्वरेण्यनमोनमस्तेभगवन्सुरेश॥ ८२॥ नमोनमस्तेसकलांतरंगन
मोनमस्तेधनसुंदरांग॥ नमोनमस्तेहतमन्मथांगनमोनमस्तेनिगमानुषंग॥ ८३॥ नमोनमस्तेगि
रिजासमेतनमोनमस्तेगणनाथवीर॥ नमोनमस्तेजितकालसूतनमोनमस्तेहृतसर्वभूत॥ ८४॥न
मोनमस्तेसगुणाभिरामनमोनमस्तेधनदिव्यधाम॥ नमोनमस्तेधनचारुसोमनमोनमस्तेपरिपूर्णका
म॥ ८५॥नमोनमस्तेसुखस्वरूपमूर्तयेनमोनमस्तेभिन्नपुण्यकीर्त्तये॥ नमोनमस्तेसमवाप्तमूर्त्तयेनमोनमस्ते
निहिताखिलार्त्तये॥ ८६॥ नमोनमस्तेनिहितारिशत्रयेनमोनमस्तेधनदंतिकृत्तिने॥नमोनमस्तेमुनि
हृद्यवर्त्तयेनमोनमस्तेसुरवंद्यमूर्त्तये॥ ८७॥ नमोनमस्तेसुकृतप्रियायनमोनमस्तेगिरिजाधवाय॥न
मोनमस्तेवृषभध्वजायनमोनमस्तेवृषवाहनाय॥ ८८॥ नमोनमस्तेकलुषापहायनमोनमस्तेमितकाम
दाय॥ नमोनमस्तेपुरसूदनायनमोनमस्तेविबुधोत्तमाय॥ ८९॥ नमोनमस्तेमितभूषणायनमोनम
स्तेखिलकारणाय॥ नमोनमस्तेसमवीक्षणायनमोनमस्तेविषमेक्षणाय॥ ९०॥ नमोनमस्तेकरुणा
करायनमोनमस्तेकलिनाशनाय॥ नमोनमस्तेसकलौषधायनमोनमस्तेसकलास्तुताय॥ ९१॥ नमोन
मस्तेखिलमुक्तिदायनमोनमस्तेखिलसंस्तुताय॥नमोनमस्तेखिलपूजितायनमोनमस्तेखिलरक्षकाय॥
॥९२॥ ॥सूतउवाच॥ ॥ एवंस्तुतोमहादेवोविष्णुब्रह्मादिभिःसुरैः॥ कालकूटभयत्रस्तान्सुरानाह सु
रर्चितः॥ ९३॥ ॥श्रीमहेश्वर उवाच॥ ॥भवतोभयमेनस्मात्कालकूटात्समुद्भुतं॥ अतःपरंभयंनास्मानभव
तांनुभविष्यति॥ ९४॥तावद्भयंप्राप्नुवंति सर्वेपि भवदादयः॥ यावन्नमामर्चयंतिमोहगर्वेनिपातिताः॥ ९५॥

सर्वमदवमानेनभयाब्धौनिपतंत्यधः॥मत्सन्मानेनसर्वेपिनिर्यंतेभयांबुधेः॥९७॥योमामव्यभिचारेण
मदासंपूज्ययिष्यति॥सदुस्तराणिदुःखानितीर्त्वासुखमवाप्नुयात्॥९८॥मद्भक्तानविनश्यंतिप्रलयेपि
पिननस्तदा॥मोहमानाःसंवसंतिमद्भक्तामत्परायणाः॥९९॥नश्यंयन्तिपर्वताःसर्वेसमुद्राश्चसपन्नगाः॥
नश्यंतिमहदाद्याश्चमद्भक्तानविनश्यन्ति॥१००॥सदावसंतिमद्भक्ताःनित्यानंदेनिरामयाः॥अतस्तेन
विनश्यंतिप्रलयेपिऽशिवप्रियाः॥१॥एवमुक्त्वास्थितेशंभौकालकूटोतिभीषणः॥दिगंतराणिसं
दग्ध्वासुराश्चाश्रमुपाययौ॥२॥विष्णुब्रह्मादयोदृष्ट्वाकालकूटमुपागतं॥तत्प्रभातप्तसर्वांगाःक्रोशंतःप
तिताभुवि॥३॥कालकूटप्रभातप्तान्विष्णुब्रह्मादिकान्सुरान्॥ददर्शगिरिजाकांतःसगणोगिरिजापि
तान्॥४॥ततःपरमुमाप्राहमहादेवंकृपानिधिं॥विनयावनताभूत्वाकृतांजलिपुटामुने॥५॥ ॥श्री
पार्वत्युवाच॥ ॥देवदेवमहादेवकृपासागरशंकर॥संहरैनंकालकूटंप्रलयानलसंनिभं॥६॥अ
तिदूरेस्थितंचेत्कालकूटंमहोजसं॥दृष्ट्वैवपतितनाभूमौविष्णुब्रह्मादयःसुराः॥अयंयदिसमा
यातिविष्ण्वादिसुरसंन्निधिं॥तदादग्धाभविष्यंतिविष्णुब्रह्मादयःसुराः॥८॥नायंप्रलयकालो
पिविष्णुब्रह्मादिनाशकः॥अतःपालयदेवेशविष्ण्वादीन्भुविमूर्छितान्॥९॥महेशकालकूटोयंभू
भूधरविनाशकः॥यवसादीनिविष्ण्वादीन्संदहिष्यतिसत्वरं॥१०॥अभक्ष्यमस्यनास्त्येवकालकूट
स्यशंकर॥दृश्यतेकालकूटोयंजगद्भक्षणइत्यपि॥११॥विनिवारणमप्यस्यत्वदन्येनमहेश्वर॥क
र्तुंनशक्यतेनूनंअतस्त्वंनिवारय॥१२॥शूलंप्रयोजयाश्वेवकालकूटमहेश्वर॥अन्यथाशीघ्रमे
तस्यशक्यंनैवनिवारणं॥१३॥ ॥कश्यपउवाच॥ ॥ इत्युक्तःपार्वतीनाथःपार्वत्याकरुणानिधिः॥
शिवामुवाचसर्वज्ञःस्मितपूर्वंतदावचः॥१४॥शिवेशूलेनसहसाकालकूटनिवारणं॥कर्त्तव्यमयवान

श्रीशिव

स्यचिनाशं करवाण्यहं ॥ १५ ॥ उत कस्तूरिकावत्तं कंठेवाधारयाम्यहं ॥ अथ चोल्कावदधुना करवाणि
वदप्रिये ॥ १६ ॥ ॥ पार्वत्युवाच ॥ ॥ ब्रह्मांडमंडलं प्राप्य कालकूटोयमागतः ॥ एतन्निवारणं शंभो कथं
वाद्य भविष्यति ॥ १७ ॥ एतान्दग्ध्वा सुरान्सर्वान ब्रह्मांडमपि सत्वरं ॥ दहिष्यत्यधुना येशा कालकूटोय
मद्भुतः ॥ १८ ॥ येन केनापि रूपेण कृतं चेदस्य वारणं ॥ तदा लोका भविष्यंति सर्वेपि सुखिनः शिव ॥ १९ ॥
इत्युक्तः श्रीमहादेवः कालकूटं दुरासदं ॥ दधार लीलया कंठे कस्तूरीकणवन्मुने ॥ २० ॥ ततः समुत्थि
ताः सर्वे विष्णुब्रह्मादयः सुराः ॥ पुष्पवृष्टिरभूद्दिव्या दुंदुभिध्वनिपूर्वकं ॥ २१ ॥ निवृत्तमूर्छाविषबाधाः
सुरास्ते शिवपादुके ॥ प्रणम्य तुष्टुवुः भूयः कृतांजलिपुटाः मुने ॥ २२ ॥ देवा ऊचुः ॥ ॥ नमः शिवस्वरूपा
य शिवायामिततेजसे ॥ सच्चिदानंदरूपाय नमस्ते गिरिजापते ॥ २३ ॥ नमस्ते देवदेवाय सोमसूर्या
ग्निचक्षुषे ॥ सर्वाधिकाय शर्वाय नमस्ते सुखमूर्तये ॥ २४ ॥ नमस्ते सर्ववंद्याय वेदवेद्याय शंभवे ॥ न
मस्ते शूलहस्ताय महादेवाय ते नमः ॥ २५ ॥ निष्कलाय निरीहाय सर्वप्रत्यक्षसाक्षिणे ॥ नमस्ते निरव
द्याय नमस्ते प्रत्यगात्मने ॥ २६ ॥ नमस्ते गुणकूटाय नमस्ते गुणरूपिणे ॥ नमस्ते गुणसंगाय संगहीनाय ते
नमः ॥ २७ ॥ नमस्ते निर्मलायेशाय महेशाय शिवेश्वर ॥ नमस्ते जगतामीशानिरीशपरमेश्वर ॥ २८ ॥
सर्वांतरात्मन सर्वात्मन सर्वरूप महेश्वर ॥ सर्वाधार निराधार नमस्ते विश्वरूपिणे ॥ २९ ॥ भवान्छर
णमस्माकं सर्वेषामपि शंकर ॥ न भवंतं विनास्माकं अन्यच्छरणमीश्वर ॥ ३० ॥ तवैव पादकमलमस्मच्चि
त्तमधुव्रतैः ॥ सर्वदा संश्रितं भूयान्महादेव कृपानिधे ॥ ३१ ॥ महेशालव सामर्थ्यं नास्माभिर्ज्ञायते प्रभो ॥ वे
दैरपि न विज्ञातं सत्यं सत्यं न संशयः ॥ ३२ ॥ प्रलयानलसंकाशः कालकूटोयमद्भुतः ॥ त्वयास्मत्प्राणर
क्षार्थं संहृतः परमेश्वरः ॥ ३३ ॥ कालकूटाद्भयं घोरं यत्त्वयाद्य निवारितं ॥ एतद्भयं त्वदन्यस्तु कोवार

क्षयितुंक्षमः॥३४॥ अस्मत्तुल्योनापराधीसहिष्णुर्नत्वयासमः॥ नास्मत्कृतापराधानांगणनापा
र्वतीपते॥३५॥ अगणय्याधुनास्माकमपराधान्बहूनपि॥ महेशाकृतमस्माकंरक्षणंकालकूटतः॥
॥३६॥ भवान्याकृतमस्माकमतएवभवत्वया॥ रक्षणंकृतमस्माकंकालकूटभयात्प्रभो॥३७॥ कश्यप
उवाच॥ ॥ इतिस्तुत्वासुराःसर्वेशिवपादांबुजेततः॥ प्रणतादंडवद्भूत्वापुष्पैःसंपूज्यशंकरं॥३८॥
महेशाःप्रणतादेवैःस्तुतःसंपूजितश्चतैः॥ क्षीराब्धिमथनंकर्तुंप्रेषयामासतान्पुनः॥३९॥ ततःपुनर्म
हादेवंतत्रसंपूज्यतेसुराः॥ ममंथुराब्धिंमुदिताःस्मरंतःपार्वतीपतिं॥४०॥ ततस्तस्मात्समुत्पन्नाकमला
कमलानना॥ अमृतंचसमुत्पन्नंऐरावतसमन्वितं॥४१॥ देवाश्चोपिसमुत्पन्नःनानारत्नःसमन्वितः॥पा
रिजाताश्चसंभूताःमथ्यमानेमहोदधौ॥४२॥ ततःशिवप्रसादेनलक्ष्मींप्रापहरिःमुने॥ ऐरावतादीन्प्रापेंद्रः
शिवस्यैवप्रसादतः॥ अमृतंप्रापुरमराःसर्वेभागानुरूपतः॥ महादेवप्रसादेनविवादेनविनामुने॥ एवंशिव
प्रसादेनदेवालब्धमनोरथाः॥ स्वस्वस्थानानिसंप्रापुःकीर्तयंतोमहेश्वरं॥४५॥ अतएवमहादेवोभगवा
न्भक्तवत्सलः॥ सावधानंपूजनीयोभुक्तिमुक्तिफलार्थिभिः॥४६॥ महेशाराधनादन्यन्नास्तिसर्वार्थदाय
कं॥ अतःसदासावधानंपूजनीयोमहेश्वरः॥४७॥ पुरात्तनारदंवीक्ष्यहिमवान्मुनिपुंगवं॥ आसनाद्यैःसम
भ्यर्च्यतद्दत्तंचेतुमब्रवीत्॥४८॥ हिमवानुवाच॥ ॥ तत्त्वज्ञस्त्वमुनिश्रेष्ठशिवतत्त्वंवदस्वमे॥ शिवस्यकिंपरं
रूपंयद्रूपध्यानमिष्टदं॥४९॥ किंचसर्वेषुलोकेषुसंचारःक्रियतेत्वया॥ किंदृष्टंक्षेत्रमुत्कृष्टंयतःश्रेष्ठंन
किंचन॥५०॥ यत्रदेवात्प्रविष्टोपिनंयात्यन्यत्रवास्तिकः॥ यतोविनिर्गतोमोहात्नरकेपिपतिष्यति॥५१॥ ॥
कश्यपउवाच॥ ॥ इतितद्वचनंश्रुत्वाक्षणंध्यात्वामुनीश्वरः॥ प्रहृष्टवदनोभूत्वाततोवक्तुंसमारभे॥५२॥ ॥
नारदउवाच॥ ॥ हिमवन्पृष्टमिष्टंमेविद्धिदिष्टमभीष्टदं॥ इष्टंतच्छ्रपिविष्टस्याप्यष्टमूर्तेर्विशेषतः॥५३॥

ओंकाररूपमद्वैतंशिवज्ञानात्मकंप्रभुं॥ मोक्षदंप्राहुरमलंवेदवेदार्थपारगाः॥५४॥ यत्प्रसादसमोनास्ति
प्रसादोन्यस्यवस्तुनः॥सश्चोनत्य इतिश्रुत्याकीर्त्यतेभगवान्शिवः॥५५॥ यत्तत्त्वंनविदुर्देवाःवेदाश्चसशि
वःपरः॥ केनवाज्ञायतेसम्यगवाङ्मनसगोचरः॥५६॥ शिवेनानुगृहीतायेसच्चिदानंदमूर्तिना॥ तैः शिवोज्ञा
यतेसम्यगन्येर्नज्ञायतेध्रुवं॥५७॥ क्षेत्राणिचमयादृष्टान्यनेकानिसहस्रधा॥ काशीक्षेत्रसमंक्षेत्रंनदृष्टं
क्वापिसर्वथा॥५८॥ चतुर्दशापिभुवनान्येकस्मिन्दिवसेमया॥ दृष्टयंनेनेषुभुवनेष्वेकाकाश्येवमुक्तिदा॥
॥५९॥काशीपरतरंक्षेत्रंक्षेत्राणामधिदैवतं॥ भुक्तिमुक्तिप्रदंपुण्यंपावनानांचपावनं॥ ६०॥तपोदानादिध
र्मोणामनंतानांपरंफलं॥यत्प्राहुर्महर्षयःसाकाशीकाशतेसर्वदायतः॥६१॥ परात्परतरंयत्तुतत्परात्परतःशि
वः॥सएवकाशीकर्मीतिततःकिमधिकंवद॥६२॥काशीस्मृतापिसंसारमूलनिर्मूलनक्षमा॥ सासाक्षा
त्सेविताशैवैःमोक्षदेत्यत्रनाद्भुतं॥६३॥ हंत्यघंस्मृतिमात्रेणदृष्ट्वापुण्यंतनोतिया॥मानिर्वाणैकनिलया
काशीविश्वेश्वरालया॥६४॥ यस्यांशिवोपिनिर्गुणोश्रीमद्विश्वेश्वराभिधे॥लिंगेतिष्ठतिसाकाशीकलि
कल्मषनाशिनी॥६५॥ चतुर्दशापिभुवनान्येकदातुलितान्यपि॥ काशीकोट्यंशकोट्यंशतुल्यानिनतत्कृतं
कृतं॥६६॥ केनुवर्णयितुंशक्ताःकाशींमुक्तिप्रदांशिवां॥यतःकाशीवेदसंघैरपिस्तोतुंनशक्यते॥६७॥तिर
स्कृयंतेब्रह्माद्याःकाशिस्थैर्मशकैरपि॥अतस्तांतादृशींकाशींकेनुवर्णयितुंसमाः॥६८॥ च्यवंतेब्रह्मसदना
द्वैकुंठादपिवस्तुतः॥महाप्रलयकालेपिनकाशीवासिनांच्युतिः॥६९॥ एकार्णवेपिसंजातेत्रिशूलाग्रेणका
शिकां॥उर्ध्वंनयतिविश्वेशःसाकाशीक्वानुमीयते॥ ७०॥ तणीकरोतिदेवेंद्रंकाशीस्थःपुल्कसोप्यतः॥का
शीपुरीसमंवस्तुकुत्रकेनोपलभ्यते॥७१॥ यस्यांभवानीसततंभवभीमभयापहा॥ ददातिपरमामृद्धिंसा
काशीभुक्तिमुक्तिदा॥७२॥ यस्यांतनुव्ययोजंतोःमुक्तिःकरतलेस्थिता॥ सद्योभवतिशुद्धस्यसाकाशीसेव्य

तैर्बुधैः॥७३॥ काशीनीरप्रदानेनपितरःपूर्वमादरात्॥ नारदस्त्वंनारदोसीत्युक्त्वामुक्तास्ततःपरं॥७४॥ किंक
र्तव्यंमयातत्त्वंकाश्याःसुरसमाश्रये॥ वेदैरपिनविज्ञातंतत्तत्त्वंवस्तुतोध्रुवं॥७५॥ एतावदपियत्काश्याःतत्त्वं
ज्ञातंमयाधुना॥ इदंशिवप्रसादस्यलेशेनेत्यवगम्यतां॥७६॥ पुरादृष्टानिसर्वाणिभुवनानिमयेच्छया॥ ततो
गतंब्रह्मलोकेनदामामाहविश्वसृट्॥७७॥ ब्रह्मोवाच॥ ॥कस्मिन्प्रदेशेकिंदृष्टंकाश्यामपिविशेषतः॥
तद्वदस्वेतिमांपृष्ट्वाकाशीध्यानपरोभवत्॥७८॥ ततःकात्स्न्येन्यदेशानांवार्तासर्वामयोदिता॥ काशीवार्ता
वदस्वेतिपुनर्मामाहविश्वसृट्॥७९॥ काशीनदृष्टेवविधेकदाचिदपिवस्तुतः॥ तद्वार्तातःकथंज्ञेयायद्वार्ता
पापहारिणी॥८०॥ इतिमद्वचनंश्रुत्वाविधिःकरुणयाब्रवीत्॥ त्वयाकाशीनावलोकितवजन्मव्यर्थमितिमां॥
८१॥ तदुक्तंवचनंश्रुत्वादुःखितोहंतमब्रुवं॥ काशीप्राप्तिकरंपुण्यंमह्यंब्रूहीतिसादरं॥८२॥ इतिमद्वच
नंश्रुत्वाकाशीप्रापकपुण्यवित्॥ मामाहश्रुतितत्त्वज्ञोविश्वसृक्भावयन्शिवं॥८३॥ ब्रह्मोवाच॥ ॥
काशीप्राप्तिर्महादेवप्रसादेनभविष्यति॥ महादेवप्रसादार्थंपूजयस्वमहेश्वरं॥८४॥ पुण्येस्मिन्
कार्त्तिकेमासिसोमवारेशुभंकरं॥ उपोष्याभ्यर्चयप्रीत्यानिशायामचतुष्टये॥८५॥ अस्यकार्त्तिक
मासस्यचत्वारःसोमवासराः॥ पुण्यक्षेत्रेषुसर्वेषुनिशिपूजयशंकरं॥८६॥ शिवस्यामासमे
तस्यवासरःसोमवासरः॥ तस्मिन्निश्यर्चितेशंभौप्रसीदतिमहेश्वरः॥८७॥ अद्यैवयाहिकेदारंतत्रो
र्जेमासिसादरं॥ पूजयित्वामहादेवंकाशींप्राप्स्यसिसर्वथा॥८८॥ केदारान्यशिवस्थानेष्वर्चितोस्ति
त्वयाशिवः॥ केदारेस्मिन्पुण्यमासिपूजयस्वसदाशिवं॥८९॥ बिल्वपल्लवधत्तूरद्रोणनीलोत्पला
दिभिः॥ पूजयित्वाशिवंधूपैःदीपाद्यैश्चप्रसादय॥९०॥ मयोपेंद्रेंद्रचंद्रेणसूर्याद्यैरमरैरपि॥ विशे
षेणार्चितःसांबःकार्त्तिकेमासिसादरं॥९१॥ अंबाप्युपोष्यविश्वेशंकार्त्तिकेमासिभक्तितः॥ अर्चयिष्य

तिहेरंबस्कंदाद्याश्चार्चयंमितं॥९२॥ ऊर्जेश्च कृष्णचतुर्दश्यां काश्यां विश्वेश्वरं प्रभुं॥समर्चयितुमिंद्रा
द्यैर्गम्यते स्माभिरादरात्॥९३॥ त्वयापि तद्दिने काशीं संप्राप्य पुण्ययोगतः॥अनस्तदर्थं शीघ्रेण प्रस
न्नं कुरु शंकरं॥९४॥ इत्येतद्वचनं श्रुत्वा नत्वा हम्मिहागतः॥अत्रो जमाम्निशो रेशः पूजितश्च मया तदा
॥ततः शिवप्रसादेन काशी पापापनोदिनी॥भुक्तिमुक्तिप्रदा पुण्या मया प्राप्ता शिवात्मिका॥९६॥ ततो वि
श्वेश्वरो दृष्टः संसारभयनाशकः॥पूजितश्च मया भक्त्या विश्वेशो भक्तवत्सलः॥९७॥ बहुकालं स्थितं का
श्यां न तत्रानु कदाचन॥समागतं तथान्यत्र कदाचिद्गम्यते मया॥९८॥ ॥कश्यप उवाच॥ ॥इतितद्वचनं श्रु
त्वाहिमवान्तुष्टमानसः॥तं प्रीणयित्वा संप्राप काशीं विश्वेश्वरालयं॥९९॥ पुराशातर्चनो त्रैव चकारोग्रं त
पो मुने॥शैवदीक्षापरो नित्यं मोक्षार्थी विगतस्पृहः॥१००॥ प्रादुर्भूतो महादेवः प्रीतस्तत्तपसा मुने॥ शतस्मा
देव विमलान्शिवलिंगाच्छिवप्रियात्॥१॥प्रादुर्भूतं महादेवं दृष्ट्वासौ वंशातर्चनः॥संपूज्य परया भक्त्या तुष्टाव
मुनिसत्तमः॥२॥ ॥शातर्चन उवाच॥ ॥श्रीमन्महेश्वराविभवे वृषभध्वजाय ध्वस्तांधकाय मकरध्वजनाशका
य॥ दंभापहाय गरुडध्वजपूजिताय फालेक्षणाय भगवन्सततं नमस्ते॥३॥ पाशापहाय पशुपाशविमोच
काय पंचाननाय परमाद्भुतविक्रमाय॥ पाराय पालितसुरासुरमानवाय फालेक्षणाय भगवन्सततं नमस्ते॥
॥४॥मायापहाय मकरंदरसाकराय मानप्रदाय मधुराय महेश्वराय॥मानातिगाय मदमोहविवर्जिताय फा
लेक्ष०॥५॥मुक्तिप्रदाय मुनिमानसमंदिराय मुक्ताकलापकलिताम लकुंतलाय॥मुग्धाननाय मुदिताय मु
कुंदगाय फा०॥६॥सर्वोत्तमाय सकलाय समाश्रयाय सर्गस्थितिप्रलयकारणकारणाय॥सत्यप्रियाय सर
साय सर्मगलाय फा०॥७॥भद्राय भर्यविभवाय भयौषधाय भस्मप्रभासमभिभावितभूषणाय॥भर्गाय भा
नुशशिवन्हिगणप्रभाय फा०॥८॥भव्याय भग्यभगनेत्रविदारकाय भाग्यास्पदाय भवतापविनाशकाय भक्ता

भिवांछितविचित्रफलप्रदायफा॰॥९॥ भोगींद्रभोगमणिराजितकंधराय भोगिस्फुरंन्मरकतोज्वलकुंडलाय॥ भोगींदुयोगनिगलन्मुकुटप्रभायफा॰॥१०॥ भूताधिपायभुजगामलकंकणाय भूतिप्रियायभुवनोद्भवकारणाय ॥भूभृधरप्रभवनिभूतगणोदयायफा॰॥ ११॥ दिव्यायदिव्यचरितायदिगंबरायदिव्यांबरायदितिजानरुशाम कायु॥ दीनार्तिहायदिननाथनिषेवितायफा॰॥१२॥ सोमायसोमरुचिरंजितशेखराय सोमाग्निभानुवित नामललोचनाय॥ सोपेंद्रचंद्रविधिवंदीतपादुकायफालेक्षणायभगवन्सततंनमस्ते॥१३॥ कालांतका यकमनीयजटाधरायकालायकालविजयायकलाधराय॥ कल्याणदायकनकाचलकार्मुकायफालेक्ष॰॥१४॥ पुण्यायपुण्यहृदयायपुरातनायपूतायपूतजनचिंतितसत्क्रियाय॥पुण्यप्रियायपुरकाननपावकायफा॰॥ १५॥ विश्वाधिकायविधिविष्णुविदारकायविनाधिपायविबुधाबुधसर्जकाय॥ विस्तारदायविजयायविशो धकायफा॰॥१६॥ नित्यायनित्यविविधाभितविघ्नहायनीतिप्रदायनियतायनिरतिदाय॥ नीहारशैल निलयायनियामकायफा॰॥१७॥ निर्धर्मकायनिगमागमनिश्चितायनिर्णीतवस्तुनिचयायनिरामया य॥निर्धूतपातकहितायनिरंजनायफा॰॥ १८॥ मत्युंजयायमतिकारुविवर्जितायमक्षेमरजनाक रवध्विदाय॥ मल्लिंगपूजकमनोरथपूरकायफा॰॥ १९॥ गानप्रियायगतिवृत्तविशारदायगाथामया यगजकृत्तिवरछदाय॥ गम्यागमायगमनादिविवर्जितायफा॰॥२०॥ दांतायदाननिपुणायदयामयाय दारिद्र्यदुःखदुरिताद्रिदवानलाय॥ दानायदानरहितायदवप्रियायफा॰॥२१॥ यज्ञाययज्ञपुरुषाययशो मयाययज्ञादिकर्मफलदाययतिप्रियाय॥ यज्विप्रियायजनादिरताश्रयायफा॰॥२२॥ श्रीविष्णुनेत्रक मलार्चितपादुकायश्रीसेवितांद्रितनयायतनुसंयुताय॥ श्रीभूरुहारुणनवछदपूजितायफालेक्षणा यभगवन्सततंनमस्ते॥२४॥ ॥ कश्यपउवाच॥ ॥इतिस्तुत्वामहादेवंतंप्रणम्यप्रजातर्चनः॥ भूयोरुद्रे

णनुष्ठावसूक्तैरन्यैश्च शांभवैः॥२५॥ ततः शिवप्रसादेन जीवन्मुक्तः शातर्चनः॥ पुनः कर्तुं समारेभे तपो
घोरतरं मुने॥ एतादृशैः स्तपस्तप्तमनाने कैर्मुनीश्वरैः॥ मुक्तिश्च बहुभिः प्राप्ता शांकरानुग्रहान्मुने॥
२७॥ यावंतो निवसंत्यत्र संततं शिवपूजकाः॥ तावंतो मुक्तिमिच्छंति शिवव्रतपरायणाः॥२८॥ शिव
व्रतपराधन्याः शिवक्षेत्रनिवासिनः॥ मुक्त्यर्थिनस्तदन्यत्तु नतेषामभिलाषितं॥२९॥ पुरोंकारं मूर्ति
मंतं शिवध्यानपरायणं॥ ब्रह्मविष्ण्वादयो देवाः इंद्राद्यानोचुः मुमुक्षवः॥३०॥ देवा ऊचुः॥ ॥ त्वमोंकारो
स्यतः तत्त्वं त्वयेव ज्ञायते नेनतः॥ किं ध्येयं सततं मुक्त्यै तद्विचार्य वदस्व नः॥३१॥ ॥ॐकार उवाच॥ ॥ मोक्षार्थं
शिव एवैको ध्येयः सर्वेरहर्निशं॥ सर्वमन्यत्परित्यज्य सादरं भक्तिपूर्वकं॥३२॥ यः पितामयतां देवाः स एव शि
व मुच्यते॥ स एव पार्वतीनाथः स एव सुरसत्तमः॥३३॥ स एव श्रीमहादेवः स एव वृषभध्वजः॥ स एव सर्व
देवेशः स एव परमेश्वरः॥३४॥ स एव चंद्रनयनः स एवार्कविलोचनः॥ स एव वन्हिनयनः स एव त्रि
पुरांतकः॥३५॥ स एव वेदजनकः स एवांधकसूदनः॥ स एव विष्णुसंहर्त्ता स एव मदनांतकः॥३६॥ स ए
व ब्रह्मसंहर्त्ता स एवेंद्रविनाशकः॥ स एव यमसंहर्त्ता स एवाखिलशासकः॥३७॥ एतादृशं शिवं मत्वा स
च्चिदानंदलक्षणं॥ पूजयध्वं प्रयत्नेन मुक्त्यर्थं सर्वसाधनैः॥३८॥ शिवार्चनं शिवध्यानं शिवनामानुकीर्त
नं॥ शिवक्षेत्रनिवासश्च मुक्तिसाधनमुच्यते॥ शिवार्चनं च विविधं नानावेदांतसंश्रुतं॥ तन्मोक्षदमिति
प्रोक्तं महेशेनापि तत्त्वतः॥४०॥ पुरा ह पृष्टो महादेवः शिवया ज्ञानरूपया॥ किं मोक्षदमिति प्रीत्या तदा
ह भगवांछिवः॥४१॥ ॥श्रीसदाशिव उवाच॥ ॥ शिवे मदर्चनं ध्यानं मन्नाम्नामनुकीर्तनं॥ मदिष्टक्षे
त्रवासश्च मुक्तिसाधनमक्षतं॥४२॥ मदर्चनं च विविधं सद्यः सर्वाघनाशकं॥ मदर्चनाधिकारोपि मद्भ
क्तस्यैव वस्तुतः॥४३॥ मद्भक्ताश्च त एवेति विज्ञेयाः सततं बुधैः॥ ये वेदमार्गनिरतास्त्वशेषेष्वन्यपराङ्मु

खाः॥ वेदैः सर्वैरहं वेद्यो वेदांतैरपि शैलजे॥ मदन्यो वेद वेदांत वेद्यो नास्त्येव सर्वथा॥ ४५॥ मम तत्वमवि
ज्ञाय वेदबाह्या भवंत्यतः॥ भजंति वेदबाह्यास्ते मदन्यममरं भ्रमात्॥ ४६॥ मदन्यपूजासंसक्ता लब्ध्वा जन्मा
नि कोटिशः॥ प्राप्नुवंत्यपि घोराणि नरकाणि पुनःपुनः॥ ४७॥ वैदिकास्तु सदाचारा वेदोक्ताचारतत्पराः
॥ भजंति मां प्रयत्नेन वेदान्निश्वस्य संततं॥ ४८॥ ये मां विश्वाधिकं रुद्रं भजंत्यन्यपराङ्मुखाः॥ ते वैदि
का इति प्रोक्ता मद्भक्ताश्च न संशयः॥ ४९॥ भस्मोद्धूलितसर्वांगाः त्रिपुंड्रांकितमस्तकाः॥ ते वैदिका इति
प्रोक्ताः॥ ५०॥ ये रुद्राक्षलसत्कंठाः रुद्राक्षकरकंकणाः॥ ते वैदिकाः॥ ५१॥ ये मल्लिंगार्चनासक्ता बिल्व
पत्रादिभिः सदा॥ ते वैदि॰॥ ५२॥ ये मद्ध्यानरता नित्यमन्यध्यानविवर्जिताः॥ ते वै॰॥ ५३॥ ये मन्नामर
ता नित्यमन्यनामपराङ्मुखाः॥ ते वैदिका इति प्रोक्ता मद्भक्ताश्च न संशयः॥ ५४॥ ये मत्कथासु संसक्ताः संत्य
क्तान्यकथाः सदा॥ ते वै॰॥ ५५॥ ये मन्नीरीक्षणासक्ताः संत्यक्तान्यनिरीक्षणाः॥ ते वै॰॥ ५६॥ ये मत्तीर्थोद
का नित्यमन्यतीर्थपराङ्मुखाः॥ ५७॥ ते वै॰॥ नित्याग्निहोत्रं दर्शश्च चातुर्मास्यं तथैव च॥ ते वै॰॥ ५८॥
मदर्पणधिया कुर्युः ज्योतिष्टयज्ञं तथैव च॥ ते वै॰॥ ५९॥ वेदांतश्रवणं नित्यं मननं च विशेषतः॥ ते वै॰॥ ६०॥ ये
कुर्युः ते सदा विप्र मद्भक्ता इति कीर्त्यते॥ ते वै॰॥ ६१॥ ॥ ये मन्नैवेद्यपुष्पांगाः मत्स्नाताघ्राणनप्रियाः॥ ते
वै॰॥ ६२॥ ये मद्भक्तार्चनसंसक्ताः मद्भक्तान्यपराङ्मुखाः॥ ते वै॰॥ ६३॥ ये मत्क्षेत्रकृतावासाः त्यक्तान्यक्षे
त्रसंश्रयाः॥ ते वै॰॥ ६४॥ ये नक्तभोजिनो नित्यं सर्वदा सोमवासरे॥ ते वै॰॥ ६५॥ ये नित्यकृष्णभूतायामुपो
षणपराः सदा॥ ते वै॰॥ ६६॥ ये महेशाम महादेव नीलकंठेति वादिनः॥ ते वै॰॥ ६७॥ ये शिवेशान सर्वेश विश्व
नाथेति वादिनः॥ ते वै॰॥ ६८॥ ये चंद्रचूड गौरीश विरूपाक्षेति वादिनः॥ ते वै॰॥ ६९॥ ये वै रुतांतकोमेश भ
र्गभीमेति वादिनः॥ ते वै॰॥ ७०॥ ये देवोत्तम देवेश शर्व देवेति वादिनः॥ ते वै॰॥ ७१॥ ये शूलपाणे खट्वां

गिनरूनिवासेनिवादिनः॥ नेवै॰॥७२॥ येविष्णुपूज्यविश्वात्मनविधिपूज्येतिवादिनः॥ नेवै॰॥७३॥
येर्मृत्युंजयकामारेत्रिपुरघ्नेतिवादिनः॥ नेवै॰॥७४॥ योविष्णुविधिचंद्रेंद्रविधातानेतिवादिनः॥
नेवै॰॥७५॥ यसर्वज्ञाखिलाधारहरधीरेतिवादिनः॥ नेवैदिका इतिप्रोक्तामद्भक्ताश्चनरयचहि॥
७६॥ एनादृशामहाशैवाः रुद्रैकपरदेवताः॥ मद्भक्ता इतिविज्ञेयाः वेदमार्गरताः सदा॥७७॥ त्रिवे
सुराणांमर्त्यानांमद्भक्तिर्मेदनुग्रहात॥ भवत्यनस्तयाभक्तामय्येवप्रविशंतिते॥७८॥ योमांजाना
तितत्त्वेनज्ञात्वामामर्चयिष्यति॥ तमहंसर्वदुःखेभ्योमोचयामिशिवेध्रुवं॥७९॥ मद्भक्तिनारिरेवेकासंसा
रार्णवतारिणी॥ नास्तिमद्भक्तिसदृशांसंसारार्णवतारकं॥ ॥८०॥ मद्भक्तियुक्तोमामीशंसर्वदेवगणा
धिपं॥ यःपूजयतियत्नेनसमोक्षमधिगच्छति॥८१॥ तिष्ठन्गच्छन्वदन्भुंजनयःसदामांस्मरिष्यति॥
सनिर्दग्धमहापापोमामुपेष्यत्यसंशयं॥८२॥ पुण्यकालेषुसर्वेषुपुण्यक्षेत्रेष्वपिसादरं॥ क्षीराद्यैस्नापये
द्योमांससमोक्षमधिगच्छति॥८३॥ भस्मनास्नापयेद्योमांशोधितेनसितेनच॥ समांप्रविश्यसुभगेमत्स्वरू
पोभविष्यति॥८४॥ स्वार्जितैर्बिल्वपत्रैर्मांयःपूजयतियत्नतः॥ समांप्रविश्यसुभगेमत्स्वरूपोभविष्यति॥
८५॥ रुद्राक्षधरोभूत्वायोमामन्नैःप्रतर्पयेत्॥ समांप्र॰॥८६॥ योमांगोघृतसंयुक्तैर्धूपैःसंधूपयेन्मुदा॥
समांप्र॰॥८७॥ योमांगोघृतसंयुक्तैःदीपैःसंदीपयेन्मुदा॥ समांप्र॰॥८८॥ योमांप्रदक्षिणैर्नित्यंप्रणामै
श्चानुमोदयेत्॥ समांप्र॰॥८९॥ योभस्मोद्धूलितोनित्यंरुद्राध्यायंजपन्मुदा॥ समां॰॥९०॥ योभस्मोद्धू
लितोनित्यंचोर्ध्वंपंचाक्षरंजपेत्॥ समां॰॥९१॥ यःप्रीणयेत्स्तोत्रपाठैःनृत्यैश्चकरतालनैः॥ समां॰॥
॥९२॥ योवाचयेमन्त्रशंसासानुमोदंमदालये॥ समां॰॥९३॥ योमद्भक्तानतिप्रीत्याभोजयेत्पायसादिभिः॥
समां॰॥९४॥ योमद्भक्तायवस्त्राणिदत्वासंप्रीणयेन्मुदा॥ समां॰॥९५॥ योमद्भक्तान्प्रतिप्रीत्यामोदयेत्प्र

यरत्नानिदद्यात्स्वर्णंचसादरं॥ सम॰॥९६॥ योमद्भक्तायरुद्राक्षानदद्यात्प्रीतिपुरःसरं॥सम॰॥ ९७॥ योद
द्याद्रत्नलिंगानिमद्भक्तायविधानतः॥ समांप्रविश्यसुभगेमत्स्वरूपेभविष्यति॥ ९८॥ एवंमद्भक्तनिरतामे
मेवानुग्रहाच्छिवे॥मांप्राप्नुवंतिज्वलनेहवींषीवनसंशयः॥९९॥ यस्यागेनभविष्यंति दुःखानिविविधान्य
पि॥समद्भक्तिंपरांप्राप्यततःप्राप्नोतिमांशिवे॥ १००॥ मयियस्यसमुद्भूताभक्तिरव्यभिचारिणी॥ सदुःखसा
गरंतीर्त्वामयिसंविशतिप्रिये॥ १॥ यस्यभक्तिरविच्छिन्नामयिजातानपायिनी॥ तस्याहंसुलभोदेविदुर्ल
भोपिनसंशयः॥ २॥ येमांयत्नैर्महादेवंभजंतिश्रद्धयान्विताः॥भावयेतानहंदेविहृदयेमाणवत्सदा॥
३॥ स्वतंत्रोपिमहादेवः सोहंभक्तैर्वशीकृतः॥ अवश्योप्यहमीशानोमद्भक्तवशतांगतः॥ ४॥ मांनजानं
तिसहसाशैवमार्गबहिष्कृताः॥ शैवमार्गैरताएवजानंतिभुविमांशिवे॥ १००॥ वेदैरपिनविज्ञातंय
तत्वंममशाश्वतं॥ तद्विज्ञानमुमेशैवैः ममानुग्रहभाजनैः॥ १॥ मामनन्यमसंनित्यंदेवदेवंपिनाकिनं॥
विज्ञायशैवाः सततंपूजयंतिमुमुक्षवः॥ २॥ त्यक्ताहाराः हाराः पूजयंतिकेचिच्छैवाः सदापिमां॥ केचिद्भु
क्त्वादिवाशैवाः पूजयंतिचयत्नतः॥ ३॥ केचान्नक्ताशिनश्शैवाः पूजयंत्यनिशंचमां॥ उपोष्यान्वहमा
सायं अतः संपूमांप्रभुं॥ ४॥ भोजयित्वामद्भक्तान्योश्नातिसममप्रियः॥ नित्यनक्तव्रतंदेवियःकरिष्य
तियत्नतः॥ सभूयोगार्भदुःखानिनप्राप्नोत्येवसर्वथा॥ नित्यनक्तव्रतंदेविसुलभंभुक्तिमुक्तिदं॥ ६॥ तद्वि
धानंचवक्ष्यामिश्रणुयत्नपुरःसरं॥ प्रातरादिषुकालेषुस्नात्वोद्धूल्ययथाविधि॥ ७॥ त्रिपुंड्रधारणंकार्यं
तथारुद्राक्षधारणं॥ ततोमन्मयलिंगानांअष्टोत्तरशतंक्रमात्॥ ८॥ प्रातरादिषुकालेषुपूजनीयंप्रय
त्नतः॥ पूजातिलाक्षतैः कार्याबिल्वपत्रैश्चकोमलैः॥ ९॥ करवीरादिपुष्पैश्चतत्तत्कालसमुद्भवैः॥ दी
पमालाकल्पनीयाकृष्णागोघृतनिर्मिता॥ १०॥ प्रतिकालेपिसामालाशतदीपसमन्विता॥ प्रतिकाले

पिसामालाज्ञानदीपसमन्विता॥ प्रतिकालेपिलशानंकृष्णागोघृतसंयुतः॥ ११॥ धूपश्चागरुसारे
णाकल्पनीयोविशेषतः॥ गोक्षीरपाचितैरन्नैः अपूपैर्लड्डुकैरपि॥१२॥ मधुक्षीराज्यसंयुक्तैर्नैवेद्यमपि
कल्पयेत्॥ तांबूलंकल्पयित्वाथपुनर्धूपंप्रकल्पयेत्॥१३॥ ततोनीराजनंदेयंशतदीपविराजितं॥ बद्धह
स्तंप्रजप्तव्यःशैवपंचाक्षरस्ततः॥ १४॥ रुद्राध्यायजपःकार्योमौनेनविधिपूर्वकं॥ ततःप्रदक्षिणाका
र्यायत्नादष्टोत्तरंशतं॥१५॥ ततःप्रणामाःकर्तव्यायत्नादष्टोत्तरंशतं॥ आसायमेवसंपूज्यमामनन्यचेत
मव्ययं॥१६॥ सायंकालेततःकार्यंतथैवममपूजनं॥ ततःपरंप्रयत्नेनतिलैर्गोघृतसंयुतैः॥१७॥ होमः
कार्योबिल्वपत्रैःसहस्रत्रयमादरात्॥ भोजनीयास्ततोयत्नादष्टभक्ताःपायसादिभिः॥१८॥ सुवर्णद
क्षिणादेयामद्भक्तेभ्यस्ततःपरं॥ एवंकृत्वाविधानेनस्वकृतंकर्मसादरं॥१९॥ निवेदनीयंयत्नेनम
ह्यंपूजापुरःसरं॥ पीत्वामत्तीर्थममलंमन्नैवेद्यंततःपरं॥२०॥ भोक्तव्यंमौनमासाद्यमत्स्मृतिपू
र्वकं॥ एवंनक्तव्रतंकृत्वायस्तिष्ठतिसदाशिवे॥२१॥ ममहापापराशिभ्योमुक्तोभवतिसर्वथा॥ एवंन
क्तव्रतंदेवियःकरिष्यतियत्नतः॥ २२॥ सवंशकोटिसंयुक्तोमत्स्वरूपंप्रयास्यति॥ नक्तव्रतंप्रयत्नेनक्रि
यतेयेनसर्वदा॥ २३॥ तेनव्रतानिसर्वाणिचीर्णान्येववरानने॥ सनिराशीतिविज्ञेयोयोनक्ताशीसदाभ
वेत्॥२४॥ सर्वेषांतपसांश्रेष्ठंयतोनक्ताशनंशिवे॥ नक्ताशनरताधीराअस्मन्निष्ठाजितेंद्रियाः॥२५॥
गर्भवासादिदुःखेभ्योनिवर्तंतेनसंशयः॥ गर्भवासादिदुःखैघ्यमहानारकभीरवः॥२६॥ कुर्वंतिसाव
धानेननक्तव्रतमिदंशिवे॥ पूजाममप्रियतरानक्तव्रतरतैःकृता॥२७॥ नक्तव्रतरताःयस्मात्ममप्रियतमाः
प्रिये॥ यस्यनक्तव्रतेश्रद्धातथाभस्मानुलेपने॥२८॥ तथालिंगार्चनेश्रद्धासजीवन्मुक्तउच्यते॥ यस्यप्री
तिर्मयिश्रद्धाविश्वासोपिमदर्चने॥२९॥ सममातिप्रियतमोममसात्म्यमवरानने॥ मयिप्रीतिनसहसा

जायते वस्तुतोनृणां॥ ३०॥ यदि प्रीतिर्मयि भवेत्तदा मुक्तिरदूरतः॥ मुक्तिदोहं महादेवो नमत्तोन्योस्तिमु
क्तिदः॥ ३१॥ यतोहं सर्वदेवानामधिपो मुक्तिनायकः॥ मद्भक्तास्त्वमुच्यंते घोरसंसारसागरात्॥ ३२॥
नान्यभक्ताश्चविमुच्यंते संसारात्तत्त्यमुच्यते॥ शिवेमद्भक्तभक्तानां योभक्तः सोपि मुच्यते॥ ३३॥ तथा सति हि
मद्भक्तो मुच्यतेत्यत्र नाद्भुतं॥ इत्युक्तं श्रीमहेशेन गौरीं प्रति सुराश्ततः॥ ३४॥ भजध्वं पार्वतीनाथं मनोवा
क्कायकर्मभिः॥ मनसा कर्मणा वाचा शिवं यो यजते सदा॥ ३५॥ तं तारयति गोरीशो घोरसंसारसागरात्॥
महेशार्चनमेवैकं भुक्तिमुक्तिप्रदं स्मृतं॥ ३६॥ तदेव घोरसंसारमहासागरतारकं॥ श्रीमहेश महेशेति म
हेशेति त्रिरुच्चरन्॥ ३७॥ स घोरमहाघसंघेभ्यो मुच्यते नात्र संशयः॥ महेशेति परं नाम भुक्तिमुक्ति
प्रदं स्मृतं॥ ३८॥ ततस्तद्देवसततं स्मर्तव्यं मुक्तिकांक्षिभिः॥ मुक्तिकांताकर्षको सो शिवमंत्रः श्रुतिश्रुतः॥
॥ ३९॥ गोपनीयोपि मोक्षार्थं वेदांतैः प्रकटीकृतः॥ अतो महेश्वरं सावधानेन संततं॥ ४०॥ भजध्वंभ
वसंतापविच्छित्त्यर्थं मुदा सुराः॥ शिवान्यान गति यस्मात्भवतां मुक्तिकांक्षिणां॥ ४१॥ ततो भजध्वं मुक्त्यर्थे
शिवमेव सदा मुदा॥ मोक्षार्थी च शिवादन्यं यः पूजयितुमिच्छति॥ स उन्मत्त इति ज्ञेयो वेदमार्गबहिष्कृतः
॥ तत्प्रत्यर्थं कूटकग्रासीय यातिर्भिन्नविंदति॥ ४३॥ शिवेतरस्तस्तद्वन्मुक्तिमभिवंदति॥ शिवेतरार्चने
श्रद्धा यस्य संजायते भ्रमात्॥ ४४॥ तज्जन्मगतमेवाशु यथा कंटकजन्मवत्॥ नवरं ताद्दशं जन्म या
द्दशं प्राप्य मानवः॥ ४५॥ शिवेतरार्चने श्रद्धां कुरुते मोहसंयुतः॥ जन्मतादृक्वरं देवाः यादृशं प्राप्य मा
नवः॥ ४६॥ महेशाराधने श्रद्धां कुरुते भुक्तिमुक्तिदां॥ गर्भधारणजक्लेशाः तन्मातुः सफलाः स्मृताः॥ ४७॥
यद्गर्भनिर्गतः पुत्रः शिवभक्तिरतो भवेत्॥ तदेव कुलमुत्कृष्टं धन्यमित्यभिमन्महे॥ ४८॥ यस्मिन्कु

लेसमुत्पन्नः शिवपूजापरो भवेत्॥ किमत्र बहुनोक्तेन शिवभक्तिर्मुमुक्षुभिः॥ नित्यमव्यभिचारेण कर्त

योसत्यमुच्यते॥ ॥कश्यपउवाच॥ ॥ इत्योंकारवचः श्रुत्वाविष्णुब्रह्मादयःसुराः॥ शिवार्चनरताः
संतः तपस्ते पुर्दुरासदं॥ ५०॥ पश्यैतान शांकरान्धन्यान महेशाराधनोत्सुकान॥ एतेषांशंकराद
न्यः पूज्योनास्त्येवसर्वथा॥ ५१॥ शिवान्यंनार्चयंत्येते स्वप्नेपिशिवतत्पराः॥ ननमंतिचमोहेनाप्य
शिवंसंशितव्रताः॥ ५२॥ नमंतिचंद्रं रेखांकंत्रिशूलांकंमहेश्वरं॥ बिल्वपत्रादिभिः सम्यक् पूजयं
तिस्तुवंतिच॥ ५३॥ शिवलिंगंपूजयंतिप्रणमंतिस्तुवंतिच॥ पश्यंतिचप्रयत्नेनशिवलिंगंसमर्चि
तं॥ ५४॥ एतेसर्वेप्यनेनैवजन्मनाशिवपूजकाः॥ शीघ्रंमुक्ताभविष्यंतिमहेशानुग्रहान्मुने॥ ५५॥
पूजयस्वमहादेवंभवानप्यत्रयत्नतः॥ महादेवप्रसादेनशीघ्रमुक्तोभविष्यसि॥ ५६॥ ॥ श्री
शिवउवाच॥ ॥ इतितद्वचनंश्रुत्वातपस्तेपेतनोमुनिः॥ अन्यैश्चमुनिभिः साकंबहुभिर्मुक्तिकांक्षि
भिः॥ ५७॥ त्यक्त्वान्यपूजांमदनुग्रहेणमामेवयेसंततमर्चयंति॥ तेभ्यः शिवोभीप्सितमर्थमीशोदा
स्याम्यहंभक्तजनाभिसेव्यः॥ ५८॥ ॥ इतिश्रीशिवरहस्येसप्तमांशेउग्राख्येशिवगौरीसंवादेत्रयो
दशोध्यायः॥ १३॥ ॥श्रीउग्रायनमः॥ ॥श्रीशिवउवाच॥ ॥पुरानैमिषमाश्रित्यशौनकाद्यामुनीश्व
राः॥ प्रणम्यभानुंपप्रच्छुः मोक्षसाधनमुत्तमं॥ १॥ मुनयऊचुः॥ ॥भानोशंकरलत्वज्ञशिवपूजापराय
ण॥ कथंसंसारदावाग्नितापशांतिर्भविष्यति॥ २॥ असारतरसंसारमतिर्यस्यैःप्रजायते॥ संसारेसार
बुद्धिश्चजायतेकर्मबंधनात॥ ३॥ असारबुद्धिः संसारेकथंभवतिसर्वदा॥ तत्वज्ञानस्यकोहेतुः किं
वातत्वंवदस्वनः॥ ४॥ ॥ श्रीभानुरुवाच॥ ॥ पुराश्रीशैलशिखरेस्कंदंयोगरतंशिवः॥ त्रिलोकपाया
द्धियत्नांतज्ज्ञात्वाचेत्याहनंदिनं॥ ५॥ शिवाज्ञांशिरसाधत्वानंदिकेशोपिहृष्टधीः॥ कैलासाच्चलितः
काशींमध्येमार्गेददर्शसः॥ ६॥ दृष्ट्वाकाशींनंदिकेशोमहेशाप्रियकृत्तमां॥ अवापपरमानंदंकृतार्थोस्मी

तिसत्तमाः॥७॥ प्रविश्य काशीं नंदीशः शिवगंगाजले मले॥ स्नात्वा गौधं पूजयित्वा मणिकर्णीययो
ततः॥ मणिकर्णीं ततः स्नात्वा कृत्वोध्दूलनमादरात्॥ श्रीनंत्रिपुंड्रं रुद्राक्षान्धृत्वा देवं महेश्वरं॥ ९॥
प्रहृष्टवदनो भूत्वा संचरन्नार्थमभमन्यत॥ प्राप्ता काशीपुण्यपुंजा महेशाकृपयेति सः॥१०॥ मणिकर्णीज
ले स्थित्वा त्रिपीत्वा तज्जलं मुदा॥ धिकृता मनतो मनधिजलमित्यप्यमन्यत॥११॥ मणिकर्णीसमं तीर्थं
पापशोकविनाशकं॥ चतुर्दशेष्वपि भुवनेष्वपि नास्तीत्यमन्यत॥१२॥ हेमकुंभेन संगृह्य मणिकर्णिजलं
मुदा॥ श्रीमद्विश्वेश्वरं द्रष्टुं नंदिकेशो ययौ ततः॥ ज्ञानवाप्यां ततः स्नात्वा कृत्वा चोध्दूलनादिकं॥ ज्ञा
नेशादीन विलोक्याथ प्रविशन्मुक्तिमंटपं॥१४॥ ततो विश्वेश्वरं दृष्ट्वा परमानंदसंयुतः॥ श्रीमद्विश्वेश्व
रं लिंगं ज्योतिरूपं समस्तशान्॥१५॥ दुग्धाद्यैरभिषिंच्यादावभिषिच्य जलैः स्ततः॥ पूजयामास मर
न्नाद्यैः बिल्वपत्रादिभिस्तथा॥१६॥ नैवेद्यधूपदीपादीन समर्प्य तदनंतरं॥ कृत्वा प्रदक्षिणादीं श्च जप
जाप च षडक्षरं॥१७॥ कृत्वा ततो खिलां यात्रां दृष्ट्वा विश्वेश्वरं पुनः॥ संपूज्य नत्वा स्तुत्वा च हृष्टचित्तो
बभूव सः॥१८॥ ततो महेश्वरस्याज्ञां संस्मरन्नंदिकेश्वरः॥ ययौ श्रीशैलशिखरं यत्र तिष्ठति षण्मुखः॥
॥१९॥ तत्र स्कंधं समालोक्य नत्वा नंदी ननत्त च॥ पूजयामास बिल्वाद्यैः शिवपुत्र्या शिवात्मजं॥२०॥ भ
क्तिभारसमाक्रांतः स्कंदं नत्वा पुनश्च तं॥ नंदिकेशो मुहुः सम्यक् पूजयामास सादरं॥२१॥ नंदिके
शं षण्मुखोपि स्वागतं पर्यपृच्छत॥ कुतः समागतं नंदिन्कुशलं खलु सर्वतः॥२२॥ शिवैककारणस्या
द्य तवाभूद्दर्शनं मम॥ शिवभक्तस्वरूपेण शिवः संचरति स्वयं॥२३॥ शिवस्य दर्शनं साक्षात् मंगलावहमु
त्तमं॥ सर्वसंपत्करं यस्माद्भुक्तिमुक्तिफलप्रदं॥२४॥ भूयसा तपसा नंदिन्संतुष्टः पार्वतीपतिः॥ प्रयच्छति
दृढां भक्तिं स्वस्मिन्कुंभोपरावरे॥२५॥ शरीरं यस्य चरमं यत्यागानंतरं शिवः॥ मोक्षं ददाति तस्यैव शिवे

भक्तिःप्रजायते॥२६॥ दुर्लभाद्दुर्लभा नंदिन् शिवभक्तिर्न संशयः॥ सा मुक्तिदायिनी भक्तिः शैवी यानन्य

संश्रया॥२७॥ श्रद्धया ऽनन्यगामिन्या मुक्तिर्भवति सर्वथा॥ श्रद्धा शिवे हि कर्तव्या सैव मुक्तिप्रदायिनी

॥२८॥ शैवी श्रद्धा कल्पवृक्षः श्रद्धा सा कामधुक् ध्रुवं॥ सा मोक्षदायिनी तस्मात् शैवी श्रद्धा तु दुर्लभा॥

॥२९॥ महेश्वरश्रद्धयैव मुक्तिः प्राप्या जनैः खलः॥ तस्मान्महेशे श्रेष्ठे श्रद्धा कार्या प्रयत्नतः॥३०॥ महादा

नानि यज्ञाश्च ये च सर्वस्वदक्षिणाः॥ तपांसि यानि घोराणि तेषां तु फलदः शिवः॥३१॥ येनानंताः कृताः

सम्यगश्वमेधाः शिवप्रिय॥ तेनैव शैवी संप्राप्या श्रद्धा नान्येन सर्वथा॥३२॥ तपांसि यानि घोराणि कृता

नि बहुधा मुदा॥ तेनैव शैवी सं०॥३३॥ गोकोटयो येन दत्ताः शैवेभ्यः स्वर्णभूषिताः॥ तेनैव शैवी संप्रा

प्या श्रद्धा नान्येन सर्वथा॥३४॥ ससुवर्णा येन दत्ताः मत्तमातंगकोटयः॥ तेनैव शैवी०॥३५॥ ससु

वर्णा येन दत्ताः तुरंगोत्तमकोटयः॥ तेनैव शै०॥३६॥ ससस्या पृथिवी दत्ता शैवेभ्यो येन सादरं॥ तेनैव०॥३६॥

येन दत्तानि बहुधा शिवलिंगानि सादरं॥ तेनैव०॥ ३७॥ कन्यादानानि बहुधा येन सम्यक् कृतानि हि॥ तेनै

व०॥३८॥ मुक्तातुलाः कृता येन बहुधा सांगदक्षिणाः॥ तेनैव०॥३९॥ पुष्परागादिरत्नानां तुला येन कृता

मुहुः॥ तेनैव शै०॥४०॥ शैवक्षेत्रेषु धर्मेण येन वासः कृतो मुहुः॥ तेनैव०॥४१॥ किमुक्तेनात्र बहुना महद्भा

ग्येन शांभवी॥ भक्तिर्भवति नाल्पेन भाग्येनेति न्ध्रुवं ध्रुवं॥४२॥ ॥नंदिकेश उवाच॥ ॥ स्कंद सत्यं सत्यमे

तत् सत्यं सत्यं न संशयः॥ यत्त्वयोक्तं वेदतत्त्वं नंदिन्येव मतिर्मम॥४३॥ शिवतत्त्वं शिवो वेद ज्ञातं तत्त्वं

त्वयापि तत्॥ न शिवादन्यस्त्वदन्यो वा वेद तत्त्वं शिवस्य हि॥ त्वद्रूपा मयि संजाता धन्योस्म्यहमतः

परं॥ रूपेयं तव कल्याणी शंकरस्य रूपा ध्रुवं॥४५॥ यथा गणेश्वरे प्रीतिः ब्रह्मविष्ण्वादिवंदिते॥ त

था प्रीतिर्मयि श्रीमन् क्रियते षण्मुख त्वया॥४६॥ सर्वज्ञस्त्वं सर्वगश्च षण्मुख त्वं न संशयः॥ वदंस्ते

त्रस्यमहात्म्यंशैवस्यास्याखिलस्यच॥४७॥ शिवक्षेत्राणियान्यत्र संतितेषांचषण्मुख॥ प्रभावंवेत्तिन
त्वन्योवेत्सेत्वंचन संशयः॥४८॥ माहात्म्यंवदसर्वज्ञपृच्छतोममसादरं॥ ॥श्रीस्कंदउवाच॥ ॥
नंदिकेशाद्यसंतोषोजानन्त्वद्वचनात्प्रभ॥ श्रीशैलस्यास्यमाहात्म्यंवक्ष्येमोक्षप्रदंशृणु॥४९॥
अशीतियोजनायामःपर्वतोयंशिवात्मकः॥प्रभावोस्यमयावक्तुंशक्यमेवनसर्वथा॥५०॥ या
वंतःसंतिपाषाणाःशैलेस्मिन्नंदिकेश्वर॥ तावंतिशिवलिंगानिपाषाणानात्रसंशयः॥५१॥ तृणा
निवृक्षगुल्माश्चलताःपर्णानिजंतवः॥ यावंतःसंतितावंतोलिंगान्येवसंशयः॥५२॥अभितान्यत्रती
र्थानिसर्वतीर्थोत्तमानिहि॥ सर्वार्थदानिसर्वेषांस्मरणादपिसर्वदा॥५३॥ पदेपदेत्रतीर्थानिलिंगा
न्यत्रपदेपदे॥पदेपदेतपःसिद्धिःतपतामत्रजायते॥५४॥ सर्वसिद्धिकरंतीर्थमीदृशंनेवदृश्य
ते॥ पश्यक्षेत्राणितीर्थानिमुक्तिदान्यत्रपर्वते॥५५॥ अत्रपूर्वंतपस्तप्तंकाशीप्राप्त्यर्थमास्तिकैः॥ काशी
प्राप्ताचतैःशुद्धैःशुद्धासिद्धतपोधनैः॥५६॥ काशींप्राप्यततःसिद्धैःअविमुक्तेमुनीश्वरैः॥मुक्तीश्व
रप्रसादेनमुक्तिर्लब्धाचतैस्तदा॥इदानीमपिकुर्वंतिकाशीप्राप्त्यर्थमास्तिकाः॥५७॥ तपोग्रेपिकरिष्यं
तिसिद्धिक्षेत्रमिदंयतः॥५८॥ पंचाग्निमध्यगोत्रैवकपिलःसिद्धसत्तमः॥अनिशंतस्तपोनित्यंकरोतिप्री
तिमानसः॥५७॥ तपःपूर्वमनेनैवयुगानामयुतंकृतं॥प्रज्वाल्याग्नीनयंभूयस्तपःकर्तुंसमारभे॥५८॥
वसिष्ठश्रमसंक्रांततपसाभूयसामुहुः॥करोत्यत्रतपोघोरंमनतंनियमाश्रयः॥५९॥ तपस्योस्य
प्रभावेनपावकास्वयमेवते॥ प्रज्वलंत्यनिशंपश्यकथंभांत्यग्नयोमुदा॥६०॥ कण्वोपिघोरतप
साशरीरंपावनंचकं॥ चकारपुनरप्यत्रकरोत्येवतपोमुदा॥६१॥ गर्गोपितपसाप्यत्रप्रीणयंत्यं
बिकापतिं॥ऊर्ध्वबाहुकयंप्रीत्यापश्यत्यर्कंविलोकय॥६२॥अत्रिणात्रतपस्तप्तमपुत्रेणपुरामुदा॥

नतः शिवप्रसन्नोभून अंबिकारमणस्तदा॥ ६३॥ नत्वा दृष्ट्वा महादेवं अत्रिर्देवोत्तमं शिवं॥ प्रणम्य
पूजयित्वा यनुष्टाव गिरिजापतिं॥ ६४॥ ॥ अत्रिरुवाच॥ ॥ नमोनमो निर्गुणनिर्विकार न
मोनमो निष्कलनिष्प्रपंच॥ नमोनमः शांत नमोनमस्ते नमोनमस्ते शिव सर्वरूप॥ ६५॥ नमोनमः
सांब नमोनमस्ते नमोनमः शंकर सर्वहेतो॥ नमोनमो मे यगुणस्वरूप तुरीय शंभो सततं नमस्ते॥ ६६॥
नमोनमोनंतगुणैकसिंधो प्रपन्नबंधो भगवन्नमस्ते॥ नमोनमः शर्व नमोनमस्ते नमोनमः पर्ण्यनमोन
मस्ते॥ ६७॥ नमोनमस्तेस्तु नमोस्तु शंभो नमोनमस्तेस्तु नमोस्तु रुद्र॥ नमोनमस्ते गिरिजासहाय नमो
नमस्तेस्तु नमो महेश॥ ६८॥ नमोनमस्तेस्तु हिरण्यबाहो नमोनमस्तेस्तु हिरण्यरूप॥ नमोनमस्ते
स्तु हिरण्यवर्ण नमोनमस्तेस्तु हिरण्यहेतो॥ ६९॥ नमोनमस्तेस्तु शशांकमौले नमोनमस्तेस्तु पिनाक
पाणे॥ नमोनमस्तेस्तु शशांकहेतो नमोनमस्तेस्तु नमो गिरीश॥ ७०॥ नमोनमस्ते पृथिवीस्वरूप नमो
नमस्तेस्तु जलस्वरूप॥ तेजःस्वरूपाय नमोनमस्ते वायुस्वरूपाय नमोनमस्ते॥ ७१॥ आकाशरूपा
य नमोनमस्ते कालस्वरूपाय नमोनमस्ते॥ नमोनमस्तेस्तु दिगात्मने सदासदा नमो नमस्ते सकला
त्ममूर्तये॥ ७२॥ नमोनमस्तेस्तु कपर्दिने सदा नमोनमस्तेस्तु कपालमालिने॥ नमोनमस्तेस्तु नम
स्त्विषीमते नमोनमस्तेस्तु निषंगिणे नमः॥ ७३॥ नमोनमस्तेस्तु नमोस्तु शंगवे नमोनमस्तेस्तु नमोस्तु
बल्भुषे॥ नमोनमस्ते शिपिविष्ट शंभो नमोनमस्तेस्तु हरामरेश॥ ७४॥ नमोनमस्ते हरिपूजितांघ्रेन
मोनमस्ते हरिनेत्रपाद॥ नमोनमस्ते हरिजन्महेतो नमोनमस्ते हरिनाशहेतो॥ ७५॥ नमोनमस्ते वि
धिजन्महेतो नमोनमस्ते विधिनाशहेतो॥ नमोनमस्ते हरजन्महेतो नमोनमस्ते हरनाशहेतो॥ ७६॥
नमोनमस्ते रविललोकहेतो नमोनमस्ते खिलनाशहेतो॥ नमोनमो निर्मलनित्यरूप नमोनमो नित्य

विचारशुद्धये॥ ७७॥ नमो नमो नित्यविशुद्धबुद्धये नमो नमो निर्भयभीमरूप॥ नमो नमः सर्गसुसर्ज
हेतो नमो नमः सर्गविनाशहेतो॥ ७८॥ नमो नमस्ते हर मृत्युमृत्यो नमो नमस्ते शिव विष्णुमृत्यो॥ नमो
नमस्ते जगदेकमृत्यो नमो नमः शंकर शंकरेश॥ ७९॥ श्रीस्कंद उवाच॥ ॥ एवमत्रिस्त्रिनेत्रं न स्तोत्रैः
स्तुत्वा महेश्वरं॥ मुहुर्मुहुः प्रणम्याग्रे कृतांजलिपुटः स्थितः॥ ८०॥ तमुवाच कृपासिंधुः स्तुतस्तेन महे
श्वरः॥ अदेयमप्यभीष्टं ते दास्यामीति कृपानिधिः॥ ८१॥ ॥ अत्रिरुवाच॥ ॥ पुनीतोस्मि महादेव
प्रसन्नोसि यतो मम॥ इतोप्यभीष्टमन्यन्मे किमस्ति करुणानिधे॥ ८२॥ यद्विष्णुनेत्रभ्रमरनिलयं पदपंक
जं॥ तत्ते दृष्टं महादेव किमभीष्टं मनः परं॥ ८३॥ यत्ते सहृत्पंकजगं पादपंकजमुत्तमं॥ तत्ते दृष्टं म॰॥ ८४॥
यद्ध्यानं योगिवर्यैश्च पादपद्ममभीष्टदं॥ ८५॥ तत्ते दृ॰॥ ८५॥ विष्णुनेत्रार्चितं यत्तु पदद्वंद्वमनुत्तमं॥ तत्ते दृ॰
॥ ८६॥ यत्तु श्रुतिशिरोरत्नचरणद्वंद्वमुत्तमं॥ तत्ते दृ॰॥ ८७॥ यन्मौनिमानससरोहंसभूतं पदांबुजं॥ तत्ते दृ॰॥
८८॥ मोक्षहेतुरनायासात् यत्पदद्वंद्वदर्शनं॥ तत्ते दृ॰॥ ८९॥ पूर्णा मनोरथाः सर्वे त्वत्पदद्वंद्वदर्शनात्॥ ध
न्यं मम कुलं जातं त्वत्पादद्वंद्वदर्शनात्॥ ९०॥ कृतार्थोस्मि कृतार्थोस्मि कृतार्थोस्मि महेश्वर॥ ९०॥ धन्यमक्षि
युगं जातं त्वत्पादद्वंद्वदर्शनात्॥ कृतार्थोस्मि॰॥ ९१॥ मच्चित्तभ्रमरो नित्यं अस्मिंस्त्वत्पदपंकजे॥ यथा निवसं
ति देवेश तथा कुरु महेश्वर॥ ९२॥ अस्य देहस्यावसाने मोक्षपात्रं कुरुष्व मां॥ नत्वदन्यो मोक्षहेतुः इति वे
दा वदंत्यतः॥ ९३॥ ॥ स्कंद पिता उवाच॥ ॥ इत्यत्रिवचनं श्रुत्वा शंकरः करुणानिधिः॥ पुत्रं सर्वसुराराध्यं
लभस्वेति वरं ददौ॥ ९४॥ धर्ममर्थं च कामं च लभस्व मुनिसत्तम॥ मोक्षोप्यंते मयैवाग्रे देयस्तुभ्यं न संशयः॥
९५॥ यन्मदाश्रितचित्तानां मदर्पितसुकर्मणां॥ मोक्षदोहं मदन्यस्तु मोक्षदो नास्ति सर्वथा॥ ९६ ॥ स्कंद उ॰॥
इत्युक्त्वांतर्दधे शंभुः वेदवेदांतसंस्तुतः॥ ब्रह्मविष्ण्वादिवंद्यांघ्रिर्विकासहितः प्रभुः॥ ९७॥ ततः पुत्रो बभू

वात्रेरत्रिनेत्रसमुद्भवः॥ सर्वानंदकरो नित्यं सीतांशुः शुभलक्षणः ॥कलाः षोडश तस्यासन् अत्रिपुत्रस्य धी
मतः॥अष्टाशीति सहस्राणि विस्तीर्णं योजनानि तु॥९९॥ तदा महानुभूत्सर्वे सर्वेषां नंदिकेश्वर॥ तं दृष्ट्वा
मुनयः सर्वे तुष्टुवुर्मुदितानना॥॥१००॥ ततोत्रिं तुष्टुवुः प्रीत्या मुनयः शंकरार्चकाः॥ शंभुराराधितः सम्यक्
त्वयात्रात्रे मुनिश्वर॥ १॥ शिवप्रसादलब्धो यं पुत्रस्तव सुरेश्वरः॥ विनाशिवप्रसादेन पुत्रः कुत्र दृशः प्र
भो॥२॥ ऐहिकामुष्मिकानर्थान् शंकरो भक्तवत्सलः॥ ददात्येव स्वभक्तेभ्यः स्वतंत्रः सुरसत्तमः॥ ३॥ शिवा
न्यदेवास्तवस्य त्वयैहिकाप्यर्थकामदाः॥ अल्पं प्रीताः प्रयच्छंति स्वस्वशक्त्यनुरोधतः॥४॥ तेपि देवाः प्रयच्छं
ति प्रसादाच्छंकरान्मुने॥ अस्वतंत्राय तस्मैपि स्वानं स्यात्फलदास्तु न॥५॥ देवतानां सार्वभौमस्तु शंकरः सर्व
कामदः॥ धर्मार्थकाममोक्षाणां दाता सांबः शिवः स्वयं॥ ६॥ सर्वदेवेश्वरः पुत्रो धीमानमितविक्रमः॥ शिवा
न्यदेवताभक्त्या प्राप्यं किं दुर्लभं ध्रुवं॥ ७॥ शंकरो विष्णुतपसा संतुष्टो विष्णवे मुदा॥ ददौ वैकुंठममलं
अतो देवोत्तमः शिवः॥८॥ ब्रह्मणे ब्रह्मतपसा संतुष्टः शंकरो मुदा॥ ब्रह्मलोकं ददौ पूर्वं अतो०॥ ९॥
इंद्रायेंद्रस्य तपसा संतुष्टः शंकरो मुदा॥ स्वर्गलोकं ददौ पूर्वं अतो०॥ १०॥ पुराग्नितपसा प्रीतः शंकरस्त्व
ग्नये मुदा॥ अग्निलोकं ददौ पूर्वं अतो०॥ ११॥ अन्येभ्योपि च देवेभ्यः प्रीतस्तत्तपसा शिवः॥ लोकान्निष्टा
न्ददौ पूर्वं अतो०॥१२॥ देवाः सर्वे महादेवं स्तुवंति विविधा मुदा॥ तदन्यं न स्तुवंत्येव अतो दे०॥१३॥
मोक्षप्रदाता सर्वेभ्यः स्वभक्तेभ्यो महेश्वरः॥ मोक्षप्राप्तो महाशैवैः अतो०॥१४॥ यथा श्रेष्ठो मनुष्येषु
ब्राह्मणो ब्रह्मवित्तमः॥ तथा देवेषु सर्वेषु श्रेष्ठः सांबः शिवः प्रभुः॥१५॥ विद्यामध्ये यथा श्रेष्ठा वेदविद्या
प्रकीर्तिता॥ तथा देवेषु०॥ १६॥ गौरुत्तमकामदोग्ध्री यथा सर्वचतुष्पदा॥ तथा देवेषु०॥ १७॥ लोहमध्ये
यथा श्रेष्ठं कांचनं सर्वसिद्धिमत्॥ तथा सर्वे०॥ १८॥ ऐरावतो यथा श्रेष्ठो गजेष्वमितविक्रमः॥ तथा स०॥१९॥

हयेषूच्चैःश्रवाश्रेष्ठो यथामितपराक्रमः ॥ तथा सर्वे० ॥२०॥ यथा सर्वमृगश्रेष्ठः सिंहो लंघ्यपराक्रमः ॥
॥ तथा स० ॥२१॥ कैलासः सर्वलोकेषु यथा श्रेष्ठो नगोत्तमः ॥ तथा स० ॥२२॥ पुष्परागो यथा श्रेष्ठो रत्ने
षु विविधेष्वपि ॥ तथा स० ॥२३॥ समुद्रेषु यथा श्रेष्ठः क्षीराब्धिरमितप्रभः ॥ तथा स० ॥२४॥ सिद्धानां क
पिलः श्रेष्ठो यथा सिद्धाश्रयः सदा ॥ तथा सर्वेषु० ॥२५॥ यथा चित्ररथः श्रेष्ठो गंधर्वेषु बलोन्नतः ॥ त
था सर्वेषु० ॥२६॥ यथागस्त्यो मुनिश्रेष्ठः सर्वदा शिवचिंतकः ॥ तथा० ॥२७॥ यथा सुगंधो गंधेषु श्रेष्ठः
सर्वजनप्रियः ॥ तथा सर्वेषु देवेषु श्रेष्ठः सांबशिवः प्रभुः ॥२८॥ शिवान्नास्त्यधिको देवः सत्यं सत्यं न
संशयः ॥ सत्यं सत्यं पुनः सत्यमुद्धृत्य भुजमुच्यते ॥२९॥ न शिवेन समो देवः सत्यं सत्यं न संशयः ॥ सत्यं
सत्यं पुनः सत्यमुद्धृत्य भुजमुच्यते ॥३०॥ शंकरस्य प्रसादेन ज्ञानं भवति धीमता ॥ शंकरस्य प्रसादेन
मोक्षो भवति धीमतां ॥३१॥ शंकरः सर्वभावेन शरण्यः शरणार्थिनां ॥ सेव्यः पूज्यः सदा सर्वैरप्रमा
देन सर्वदा ॥३२॥ ॥ स्कंद उवाच ॥ ॥ इत्यत्रिर्वचनं श्रुत्वा मुनीनां भावितात्मनां ॥ तुतोष पूजयामास
तान्सर्वान्मुनिपुंगवान् ॥३३॥ चकार नामकरणं मुनीनामाज्ञया मुनिः ॥ सोमप्रसादलब्धस्य सोम
इत्येव धीमतः ॥३४॥ उमया सहितो देवः सोम इत्यभिधीयते ॥ उमाज्ञानमयी शक्तिः सेव विधे
निगीयते ॥३५॥ विद्याः सर्वाश्चुमारूपा विद्यानामीश्वरः शिवः ॥ विद्यापतिर्न देवोन्यो विद्यान्यत्र नहि
ध्रुवं ॥ ईशानः सर्वविद्यानां भूतानामीश्वरः शिवः ॥ विष्णुब्रह्मादिदेवानां प्रभुः सांबः सदाशिवः ॥३७॥
रुद्रपिंडसमुत्पन्ना ब्रह्मणा रुद्रदेवताः ॥ ततः कार्यं द्विजैर्नित्यं श्रीरुद्रस्यैव पूजनं ॥३८॥ देवाश्च
ब्राह्मणोत्पन्नाः शिवान्यो ब्राह्मण्याः सुराः ॥ ततो देवैश्च कर्तव्यं रुद्रस्यैव हि पूजनं ॥३९॥ विश्वाधिको ऋषी
रुद्रो महान्यद्यपि सत्स्वयं ॥ तथापि नित्यो जन्यत्वाद्भावज्ञानात्मकः स्वयं ॥४०॥ स्वाधिकः पूज्यते लोके

पूजा च त्वाधिके मता ॥ त्वतोधमे त्वतुल्ये वा पूजा नैव विधीयते ॥४१॥ न शिवादधिको यस्माद्विश्वा
धिक इति श्रुतिः ॥ बाधिता स्यादतो रुद्रो विश्वाधिक उदीर्यते ॥४२॥ ततो रुद्रस्य पूजां तु स्वयं नैव करि
ष्यति ॥ रौद्रैस्तु ब्राह्मणैः सर्वैः क्रियते रुद्रपूजनं ॥४३॥ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ॥
स भूमिं विश्वतो वृत्वा अत्यतिष्ठद्दशांगुलं ॥ पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यं ॥ उतामृतत्वस्येशानो यद
न्येनातिरोहति ॥४५॥ एतावानस्य महिमातो ज्यायांश्च पुरुषः ॥ पादोस्य विश्वा भूतानि त्रिपादस्यामृ
तं दिवि ॥४६॥ त्रिपादूर्ध्व उदैत्पुरुषः परमो रुद्रो देवदेवो नमो नमः ॥ पुरुषो वै रुद्र एव श्रुतिरेवाय
तो मता ॥४७॥ यो रुद्रो अग्नौ यो अप्सु रुद्रो यो रुद्र ओषधीष्वपि ॥ यो विश्वा भुवनान्येको विवेश सपरात्परः ॥
॥४८॥ विश्वं भूतं च भुवनं चित्रं बहुधा च यत् ॥ तज्जातं जायमानं च रुद्रा रुद्रात्मकं विदुः ॥४९॥ ऋ
चो यजूंषि सामानि रुद्राद्देवाद्धि जज्ञिरे ॥ छंदांसि जज्ञिरे रुद्रान् जज्ञिरे विविधाः प्रजाः ॥५०॥ सोमो म
तीनां जनिता सोमो हि जनिता दिवः ॥ सशैलायाः पृथिव्याश्च जनिता सोम एव हि ॥५१॥ अग्नेश्च
जनिता सोमो नान्योस्य जनिता ध्रुवं ॥ सूर्याणां जनिता सोमो द्वादशानामपि प्रभुः ॥५२॥ चंद्रस्य जनि
ता सोमः कलानां जनिता तथा ॥ इंद्रस्य जनिता सोमो यमस्य वरुणस्य च ॥५३॥ विष्णोश्च जनि
ता सोमो ब्रह्मणः पवनस्य च ॥ नदीनां जनिता सोमः समुद्राणामपि प्रभुः ॥५४॥ मनसो जनिता
सोमः स्कंदस्य गणपस्य च ॥ आकाशस्यापि जनिता ओषधीनामपामपि ॥५५॥ ब्राह्मणो रुद्रम
भ्यर्च्य मनभ्यर्च्य तु यो भ्रमात् ॥ भुंक्ते स पापकृद्भूयः पापभुक् जायते ध्रुवं ॥ विश्वाधिकमुमाकांतमस
मं देवतोत्तमं ॥ जानाति यो न्यसदृशं स चंडालः समश्वपः ॥५७॥ पुरा कश्चिदभूद्विप्रो देवदारुव
नाश्रितः ॥ स सर्वत्र समत्वेन बुद्धिं कृत्वैव संस्थितः ॥५८॥ तं तथाविधमालोक्य केचिच्छैवाः शिवार्चे

कः॥ तमब्रवीद्भ्रांतचित्तं ज्ञातुं तस्य मनस्तदा॥५९॥ ॥शैवउवाच॥ ॥ त्वया किं ध्यायते नित्यं प्रत्यहं क्रियते चार्किं॥ को वा देवेषु विज्ञातो देवो लभ इति त्वया॥६०॥ ॥ विप्रउवाच॥ ॥ देवो न मे न कोप्यस्ति देवाः सर्वे समाः स्मृताः॥ ध्येयो न्यो मम नास्त्येव ब्रह्मादेर्ध्येयते मया॥६१॥ तथा रुद्रस्तथा विष्णुः यथा विष्णुस्तथा विधिः॥ यथा विधिस्तथैवेंद्रो यथैवेंद्रस्तथानलः॥६२॥ यथानलस्तथा वायुः यथा वायुस्तथा यमः॥ यथा यमस्तथान्येपि ततः को वाधिको न हि॥६३॥ इति तद्वचनं श्रुत्वा तत्त्वज्ञः शिवचिंतकः॥ तं भ्रांतचित्तमभ्रांतं कर्तुमेव वचोब्रवीत्॥६४॥ ॥शैवउवाच॥ रे विप्र भ्रांतचित्तोसि वेदः किं विस्मृतस्त्वया॥ वेदतत्त्वं न विज्ञानं निस्सारस्ते कथं वदः॥६५॥ ईशानः सर्वविद्यानामित्यादि नैश्रुता श्रुतिः॥ नमोस्ते स्तु भगवन्बहुधा वदति श्रुतिः॥६६॥ निष्कलं निर्गुणं शांतमित्यादि नैश्रुता श्रुतिः॥ सोमः पवत इत्यादि रुद्रसूक्तं च विस्मृतं॥६७॥ तत्रास्ति जनिता विष्णोः सोम इत्यप्युत्तमः॥ यो रुद्र इति वेदोपि त्वया न स्मर्यते ध्रुवं॥६८॥ न विश्वं भूतमित्यादि वेदोपि स्मर्यते न त्वया॥ हरिं हरंतमित्यादिर्वेदो न स्मर्यते त्वया॥६९॥ नमस्ते रुद्र इत्यादि वेदसारोपि विस्मृतः॥ सद्योजातं प्रपद्यामीत्यादि वेदोपि विस्मृतः॥७०॥ तमीशानमित्यादि वेदोपि स्मर्यते न त्वया॥ इमा रुद्राय इत्यादि मंत्रो न स्मर्यते त्वया॥७१॥ नमुष्ट्वीति मंत्रोपि स्मर्यते न त्वया ध्रुवं॥ कद्रुद्रायेति मंत्रोपि स्मर्यते न त्वया ध्रुवं॥७२॥ किंच सर्वेश्वरः शंभुः सर्वोपनिषदां प्रभुः॥ सर्वोपनिषदामीशः परमात्मा सदाशिवः॥७३॥ य एको जालवानीश ईशानीभिः समीशते॥ उद्भवे संभवे चैव य एक एव प्रभुः शिवः॥७४॥ य एतं विदुरीशानममृतास्ते भवंति हि॥ एक एव हि रुद्रोयं न द्वितीयोयमीश्वरः॥७५॥ सर्वान्लोकानीशते य ईशानीभिः सदा शिवः॥ इमां लोकानीशानीभिः रीशानेन स्फुरत्तते॥७६॥ प्रत्यगात्मनि यो विश्वे शैशिवे तिष्ठंति ये जनाः॥

नानेवसंचुकोचायमंतकालेनिभूलधकः॥७७॥ तंसृज्यविश्वभुवनान्येवमेवपुनःपुनः॥ पातिहंति
पुनःसृष्ट्वापातिहंतिपुनःपुनः॥७८॥ विश्वतश्चक्षुरीशानोविश्वतोमुखःशिवः॥विश्वतोबा
हुरनघोविश्वतस्पान्महेश्वरः॥७९॥ द्यावाभूमीचजनयन्नेकएवसदाशिवः॥ सबाहुभ्यांसंपत
त्रैर्धमत्येवपुनःपुनः॥ ८०॥ प्रभवश्चोद्भवश्चासीन्नरुद्रोविश्वाधिकोऽऋषिः॥ ब्रह्मविष्णवीपादेवा
नांयःसएवसदाशिवः॥८१॥ हिरण्यगर्भमेवादौजनयामासशंकरः॥ विष्णुंचजनयामासत
स्माद्विष्णोःपिताशिवः॥८२॥ ततश्चेंद्रमुखान्देवान्जनयामासशंकरः॥ ततोभूमिंततोवायुंत
तोगगनमीश्वरः॥ततोनानाविधान्जीवान्ससर्जोमामहेश्वरः॥ततःसमुद्रान्सरितोगिरीन्पो
षधीनपरः॥परएवनिष्कलःशांतोनिरवद्योनिरंजनः॥ सएवोमासमेतःसन्सृजत्यवतिहं
तिच॥ ८५॥ ततःपरंब्रह्मपरंबृहंतंसर्वमेवहि॥ यथानिकायंभूतेषुगूढंसर्वेषुसर्वदा॥एकएव
हिरुद्रोयंविश्वस्यपरिवेष्टिता॥ज्ञात्वातमीशममृताःभवंत्येवसदाशिवं॥८७॥महांतमेतंपुरुषं
परस्तात्तमसःपरं॥आदित्यवर्णंवेदाश्चनजानंत्येवशंकरं॥ ८८॥ शिवमेवविदित्वातिमृत्युमे
तितमात्मवान्॥नविद्यतेयनायास्यचान्यःपंथाशिवंविना॥ ८९॥ यस्मात्परंनास्तिपरंशिवान्नयो
त्तमात्ततः॥नास्तिकश्चिच्छिवाज्यायान्नाणीयोनस्तमर्चयेत्॥९०॥ तेनपूर्णमिदंसर्वंपुरुषेणशि
वेनहि॥ ततोयदुत्तरतरंतदरूपमनामयं॥९१॥ यएवंविदुरीशानममृतास्तेभवंतिहि॥दुःख
मेवाभियांत्यन्येशिवध्यानपराङ्मुखाः॥९२॥सर्वाननशिरोग्रीवःसर्वभूतगुहाशयः॥सर्वव्यापी
चभगवान्तस्मात्सर्वगतःशिवः॥९३॥महान्प्रभुर्वैपुरुषःसत्वस्यैषप्रवर्तकः॥सुनिर्मलमिदं
प्रातेईशानोज्योतिरव्ययः॥९४॥अंतरात्मांगुष्ठमात्रःपुरुषोयंसदाशिवः॥सदाजनानांहृदयेस

न्नविशेषेनिरंतरं॥९५॥सदामनीषामनसापिहिहृत्स्थःसदाशिवः॥ यएवंविदुरीशानममृतास्तेभवं
तिहि॥सर्वतःपाणिपादंतत्सर्वतोऽक्षिशिरोमुखं॥ सर्वतःश्रुतिमल्लोकेसर्वमावृत्यतिष्ठति॥९७॥
सर्वेंद्रियगुणाभासंसर्वेंद्रियविवर्जितं॥सर्वस्यप्रभुमीशानंसर्वस्यशरणंसुहृत्॥९८॥ नवद्वारेपुरेदे
हेहंसोलीलायतेबहिः॥ वशीसर्वस्यभूतस्यस्थावरस्यचरस्यच॥९९॥ अपाणिपादोजवनोग्रहीता
पश्यत्यचक्षुःसशृणोत्यकर्णः॥ सवेत्तिसर्वंनचतस्यास्तिवेत्तातमाहुरग्र्यंपुरुषंमहांतं॥१००॥अ
णोरणीयान्महतोमहीयानात्मागुहायांनिहितोस्यजंतोः॥ तमक्रतुंपश्यतिवीतशोकोधातुः
प्रसादान्महिमानमीशं॥१॥ वेदाहमेतमजरंपुराणंसर्वात्मानंसर्वगतंविभुत्वात्॥जन्मनिरोधं
प्रवदंतियस्यब्रह्मवादिनोहिप्रवदंतिनित्यं॥२॥ यएकवर्णःशक्तियोगाद्धनेकोबहुधाशिवः॥व
र्णाननेकाननुमयासहीनोर्थान्ददातिहि॥३॥ विचैतिचांतेविश्वात्माविश्वमादौसशंकरः॥ संपुनक्तु
सनोबुध्याशुभयादेवतोत्तमः॥४॥ तएवाग्निःसआदित्यःसवायुःसतुचंद्रमाः॥ शुभ्रब्रह्मसएवेशः
सचापःसप्रजापतिः॥५॥ स्त्रीरूपःपुरुषाकारःसर्वाकारःसदाशिवः॥कुमारात्माकुमार्यात्मासर्वा
त्माविश्वतोमुखः॥ ६॥ नीलोगौरश्चहरितोलोहिताक्षःसदाशिवः॥निर्मलोनियतोयंतानिरवं
द्यश्चिदाकृतिः॥७॥ छंदांसियज्ञाःक्रतवोव्रतानिभूतंभव्यंयच्चवेदावदंति॥तस्मान्मायीसृजते
विश्वमेतत्तस्मिंश्चान्योमाययासंनिरुद्धः॥८॥मायांतुप्रकृतिंविद्यान्मायिनंतुमहेश्वरं॥तस्या
वयवभूतैस्तुव्याप्तंसर्वमिदंजगत्॥९॥योयोनिंयोनिमधितिष्ठत्येकोयस्मिन्निदंसंचविचैतिसर्वं॥
तमीशानंवरदंदेवमीड्यंविचार्यमीशांतिमत्यंतमेति॥१०॥योदेवानांप्रभवश्चोद्भवश्चविश्वाधिकोरुद्र
श्चमहर्षिः॥हिरण्यगर्भंजनयामाससजायमानंचपश्यत॥११॥ विष्णुंचजनयामासजायमानंचपश्यत॥

इंद्रंचज०॥१२॥ वन्हिंचज०॥ वायुंचज०॥१३॥ वरुणंच०॥ यमंचज०॥१४॥ लोकांश्चजन०॥ यईशः
सर्वभोग्नाक्षनोबुध्वा शंकरःसंयुनक्तु॥ योदेवानामधियोयास्मिंदेवा अधिश्रिताः॥ सएवसर्वदेवेशःशं
करःपरमागतिः॥१६॥ यस्मिन्सदाशिवेदेवाः द्विपदश्चचतुष्पदः॥ तस्मैदेवायहविषाशंकरायामि
तात्मने॥१७॥ सूक्ष्मातिसूक्ष्मंकलिलस्यमध्येविश्वस्यस्त्रष्टारमनेकरूप॥ विश्वस्यैकंपरिवेष्टिता
रंज्ञात्वाशिवंशांतिमत्यंतमेति॥१८॥ सएवकालेभुवनस्यगोप्ताविश्वाधिकः सर्वभूतेषुगूढः॥ यस्मि
न्युक्ताब्रह्मर्षयोदेवताश्चतमेवंज्ञात्वामृत्युपाशांश्छिनत्ति॥ घृतात्परंमंडमिवातिसूक्ष्मंज्ञात्वाशि
वंसर्वभूतेषुगूढं॥ विश्वस्यैकंपरिवेष्टितारमीशंज्ञात्वादेवंमुच्यतेसर्वपाशैः॥२०॥ यएषदेवोविश्वक
र्मोमहात्मासदाजनानांहृदयेसन्निविष्टः॥ हृदामनीषामनसाभिक्लृप्तायएवंविदुरमृताःस्तेभवंति॥२१॥
यदातमस्तन्नदिवानरात्रिर्नसन्नचासन्‌शिवएवकेवलः॥ तदक्षरंतत्सवितुर्वरेण्यंप्रज्ञाचतस्मात्प्रसृता
पुराणि॥२२॥ नैनमूर्ध्वंनतिर्यंचनमध्येपरिजग्रभत्॥ नतस्यप्रतिमाप्यस्तितस्यनाममहद्यशः॥२३॥
नसंदृशेतिष्ठतिरूपमस्यनचक्षुषापश्यतिकश्चनैनं॥ हृदामनीषामनसाभिक्लृप्तःयएनंविदुरमृतास्ते
भवंति॥२४॥ निष्कलंनिर्गुणंशांतंनिरवद्यंनिरंजनं॥ अमृतस्यपरंसेतुंदग्धेंधनमिवानलं॥२५॥ यदा
चर्मवदाकाशंवेष्टयिष्यंतिमानवाः॥ तदाशिवमविज्ञायदुःखस्यांतोभविष्यति॥२६॥ शिवंसांबंविदित्वै
नंब्रह्मनिर्वाणमृच्छति॥ नतत्रसूर्योभातिनचंद्रतारकंनेमाविद्युतोभांतिकुतोयमग्निः॥ तमेवभांतमनु
भातिसर्वंतस्यभासासर्वमिदंविभाति॥ एकोहंसोभुवनस्यास्यमध्येसएवाग्निःसलिलेसन्निविष्टः॥२८॥
तमेवंविदित्वातिमृत्युमेतिनान्योहेतुर्विद्यतेईशनाय॥ सविश्वकृत्‌विश्वविदात्मयोनिःसकालका
लोगुणीसर्वविद्यः॥२९॥ प्रधानक्षेत्रज्ञपतिर्गुणेशःसंसारमोक्षस्थितिबंधहेतुः॥ नातःपरंवेद्यमचिंत्य

रूपं शिवाख्यं सांबादद्वयादित्य वेद्मि ॥३०॥ शिवात्मकं यच्च समस्तमेतत् शिवादन्यत् किंचिद्व्यतिरिक्तमस्ति ॥ अवि
ज्ञाय महादेवमचिंत्यविभवं शिवं ॥३१॥ अमरा अपि मुह्यंति किमन्ये मनुजाधमाः ॥ द्वे अक्षरे ब्रह्मपरे त्वनं
ते विद्याविद्ये निहिते यत्र गूढे ॥३२॥ क्षरं त्वविद्या ह्यमृतं तु विद्या विद्ये ईशते यस्तु सोन्यः ॥ महेश्वरो यं यम
धोनिनीषते स चोदयत्येनमसाधुकर्मणि ॥३३॥ यमेव नमर्धं समनथोन्निनीषते तं साधु कर्मण्यनुसंनियोज
ति ॥ तस्मात्कलो प्रभुः सर्वेशश्च सर्वस्यात्माधेरकः सर्वरूपः ॥३४॥ शिवः सांबः सच्चिदानंदरूपः ध्येयो नित्यं
मोक्षहेतुर्निरीशः ॥ अवमान्य नमेवेशं निरयं यांति दुर्जनाः ॥३५॥ संमानयित्वा तं देवं प्रयांति परमं पदं ॥
तस्यैव मायया व्याप्ता स्तमविज्ञाय वस्तुतः ॥३६॥ नानाविधानि दुःखानि प्राप्नुवंति न संशयः ॥ पुराकृतानेक
धर्मो दक्षो दक्षप्रजापतिः ॥३७॥ शिवान्यसुरसंयुक्तो यागं कर्तुं समारभे ॥ तस्मिन् यागे समारब्धे सुराविष्णुपुरोगमाः ॥३८॥ सर्वेप्यागत्य दक्षाय चक्रुः साहाय्यमादरात् ॥ सुरर्षयो नारदाद्याः सर्वे तत्र समागताः ॥
॥३९॥ दक्षाय जनयामासुः संतोषं यागमंटपे ॥ भौमाश्चात्र ऋषयो ये च नानादेशसमाश्रिताः ॥४०॥ ते च
सर्वे समागत्य दक्षं चक्रुः प्रहर्षितं ॥ गंधर्वाः किंनराः सिद्धा यक्षाश्चाति बलान्विताः ॥४१॥ साश्च सर्वे स
मागत्य दक्षं चक्रुः प्रहर्षितः ॥ सोमाय राज्ञे याः दत्ताः याव[illegible]त्यो दक्षकन्यकाः ॥ ताश्च सर्वाः समागत्य दक्षं च
क्रुः प्रहर्षितं ॥ देवपत्न्यः चित्रवेषा याश्च लक्ष्मीपुरोगमाः ॥४३॥ अभेयारुंधती मुख्याः ऋषिपत्न्यश्च या
स्थिताः ॥ ताश्च सर्वाः स॰ ॥४४॥ यक्षगंधर्वपत्न्यश्च याश्चान्या नागकन्यकाः ॥ दक्षः स सर्वसंभारान् संप्राप्य
तदनंतरं ॥४५॥ ददौ ऋषीणामार्त्विज्यं श्रोताधिष्ठितचेतसां ॥ देवा बभूवुः विष्णवाद्याः सदस्या दक्षयंत्रिताः ॥
क्रतुसंरक्षका जाता गंधर्वाद्याबलान्विताः ॥ एतस्मिन्नंतरे काले कैलासनिलयं शिवं ॥४७॥ गौरी विनय
नम्रांगा स्मितपूर्वमभाषत ॥ ॥गौर्युवाच॥ ॥शंभो दक्षोध्वरं कर्तुमिदानीमुद्यतोस्त्यतः ॥ तत्राहं गंतुमिच्छा

मियदाज्ञातेनदाप्रभो॥ इतितद्वचनंश्रुत्वामहादेवः कृपानिधिः॥४९॥ उवाचमंगलांशुभ्रांसर्वज्ञःस्मितपूर्वकं॥ ॥श्रीमहादेवउवाच॥ ॥ गंतुमिच्छसिकल्याणिदक्षयागंप्रतिप्रिये॥ गत्वासत्वरमायासिचिरंमानत्रसंवस॥ इत्युक्त्वाप्रेषयामाससमंगलांमंगलापतिः॥५१॥ गणांश्चप्रेषयामासकोटिशोविकृयासह॥ रत्नछत्रार्बुदाकीर्णाःचामरार्बुदशोभिताः॥५२॥ विमानरत्नमारूह्यपयोदसगदंशिवा॥ पुष्परथेरभूद्दिव्यानदारम्याप्रनिक्षणं॥५३॥ सपुष्पगंधमंदाश्चनदागंधवहाववुः॥ नदानूर्यध्वनिरभून्ननानावीणास्वनान्वितः॥ ॥५४॥ देवदुंदुभयोनेदुः जगुःगंधर्वनायकाः॥ ननृतुश्चोर्वशीमुख्याःमंगलादर्शनोत्सुकाः॥५५॥ गानशास्त्रानुसारेणसंजगुर्नागकन्यकाः॥ लक्ष्मीमुख्याश्चपत्न्योदूराद्दृष्ट्वाशिवप्रियां॥५६॥ दृष्ट्वासत्वरमुत्थायप्रणेमुर्विनयान्विताः॥ शिवांसरस्वतीनत्वाध्दोन्वायेत्रमुत्तमं॥५७॥ कृतांजलिपुटाभूत्वातुष्टावविविधैस्तवैः॥ दृष्ट्वादूरात्सुराश्चांबांब्रह्मविष्णुपुरोगमाः॥५८॥ प्रणेमुर्दंडवद्भूमौमुनिवृंदसमन्विताः॥ यक्षपन्नगगंधर्वसिध्दविद्याधरादयः॥५९॥ प्रणेमुरंबिकांदृष्ट्वादूरादेवपुनःपुनः॥ अंबिकावीक्षणोत्सुकदेवाद्यागमनात्तदा॥ भूयाद्दभूवसंमर्दोदुर्धर्षोगणपैरपि॥ संमर्दंविकलीकर्तुंवेत्रहस्तास्तदागणाः॥६१॥ सकिरीटान्सुरान्सर्वान्नताडयामासुरक्षतान्॥ गतरत्नकिरीटाश्चविष्णुमुख्याःसुराःस्तदा॥६२॥ प्रहृष्टवदनांदेवींतुष्टुवुर्विविधैस्तवैः॥ ॥देवाऊचुः॥ नमोदेव्यैनमोदेव्यैनमोदेव्यैनमोनमः॥ नमोनमोजगद्धात्रीजगद्धात्र्यैनमोनमः॥६३॥ नमोनमस्तेकल्याण्यैमंगलायैनमोनमः॥ नमोनमस्तेशर्वाण्यैसुखदायैनमोनमः॥६४॥ नमोनमस्तेभद्रायैशोभनायैनमोनमः॥ नमोनमस्तेशुभ्रायैशांभव्यैतेनमोनमः॥६५॥ नमोनमोनमोनमोमातः नमोमातर्नमोनमः॥ नमोनमोनमोमातर्नमोमातर्नमोनमः॥६६॥ नमस्तेपरमेश्वर्यैपरमायैनमोनमः॥ नमस्तेभुक्तिदायिन्यैमुक्तिदायैनमोनमः॥६७॥ नमस्तेविश्वरूपिण्यैविश्वमात्रेनमोनमः॥ नमस्तेलिंगरूपि

ण्यैभूतिदायैनमोनमः॥६८॥नमःसंतुष्टचित्तायैपुष्टिदायैनमोनमः॥नमोनमोन्नपूर्णायैसुवर्णायैनमोनमः॥
॥६९॥नमश्चंद्रावतंसायैसर्वैश्वर्यैनमोनमः॥नमस्तेचंद्रसूर्याग्निप्रतिमायैशिवप्रिये॥७०॥नमस्तेभाग्य
दायिन्यैभोगदायैनमोनमः॥नमस्तेशांतिदायिन्यैदमदायैनमोनमः॥७१॥नमस्तेपुण्यरूपिण्यैपुण्य
दायैनमोनमः॥नमस्तेकीर्तिरूपिण्यैकीर्तिदायैनमोनमः॥७२॥नमस्तेधर्मरूपिण्यैधर्मदायैनमो
नमः॥नमस्तेबुद्धिरूपिण्यैबुद्धिदायैनमोनमः॥७३॥यात्वंविद्यास्वरूपेणविद्यावहृदयेस्थिता॥
तस्यैशिवांगभागिन्यैनमस्तुभ्यंनमोनमः॥७४॥यात्वंस्वकीर्तिस्वरूपेणकीर्तिमस्वदयेस्थिता॥त
स्यैशि॰॥७५॥यात्वंपुण्यस्वरूपेणपुण्यवक्षदयेस्थिता॥तस्यैशि॰॥७६॥यात्वंधर्मस्वरूपेणध
र्मेव॰॥तस्यैशि॰॥७७॥यात्वंशांतिस्वरूपेणशांतिव॰॥तस्यैशिवान्यै॰॥७८॥यात्वंदमस्वरूपेण
दमव॰॥तस्यैशिवा॰॥७९॥यात्वंदयास्वरूपेणदयाव॰॥तस्यैशि॰॥८०॥यात्वंज्ञानस्वरूपेणज्ञानव॰॥
तस्यैशि॰॥८१॥यात्वंपुष्टिस्वरूपेणपुष्टिव॰॥तस्यैशिवा॰॥८२॥यात्वंतुष्टिस्वरूपेणतुष्टिव॰॥त
स्यैशि॰॥८३॥यात्वंशुभस्वरूपेणशुभव॰॥तस्यैशि॰॥८४॥यात्वंयोगस्वरूपेणयोगव॰॥तस्यैशिवान्यै॰॥
॥८५॥यात्वंसिद्धिस्वरूपेणसिद्धिव॰॥तस्यै॰॥८६॥यात्वंकल्याणरूपेणभक्तकल्याणदायिनी॥
॥तस्यै॰॥८७॥यात्वंध्यानस्वरूपेणभक्तानांध्यानदायिनी॥तस्यैशि॰॥८८॥यात्वंसंतोषरूपेण
भक्तसंतोषदायिनी॥तस्यै॰॥८९॥यात्वमैश्वर्यरूपेणभक्तैश्वर्यप्रदायिनी॥तस्यै॰॥९०॥यात्वं
रक्षणरूपेणभक्तरक्षणदायिनी॥तस्यैशि॰॥९१॥यात्वमारोग्यरूपेणभक्तारोग्यप्रदायिनी॥तस्यै
शि॰॥९२॥यात्वंसुखस्वरूपेणभक्तानांसुखदायिनी॥तस्यैशिवांगभागिन्यैनमस्तुभ्यंनमोनमः॥९३॥
इतिदेवैःस्तुतादेवीब्रह्मविष्णुपुरोगमैः॥विद्युत्स्तेनेवविमलाविवेशाध्वरमंडपं॥९४॥तामागतांसु

गराध्यांदक्षोदृष्ट्वापिशांकरीं॥ अर्घ्यपाद्यादिभिः शीघ्रंनोपनस्तेभ्रमान्वितः ॥९५॥ तदातंनारदःशंद
क्षंउपविष्टंकुशासने॥ विलोक्याहऋषिःश्रेष्ठोदधीचिःक्रोधसंयुतः॥ ९६॥ ॥दधीचिरुवाच॥ ॥रेरे
दक्षदुराचारदंभाचारपरायणः॥ नकरोषिकथंपूजांमंगलायैयथाविधि॥९७॥ इयमेवसुराराध्यास
र्वयागफलप्रदा॥ इयमेवाद्यकल्याणीशंकरार्धांगभागिनी॥९८॥ इयमेवार्चितानित्यंसर्वसौभाग्य
दायिनी॥ इयमेवार्चितानित्यंसर्वमंगलदायिनी॥९९॥ इयमेवार्चितानित्यंसंसारभयनाशिनी॥ इय
मेवार्चितानित्यंसर्वोपद्रवहारिणी॥१००॥ इयमेवार्चितानित्यंकीर्तिसंपत्प्रदायिनी॥ इयमेवार्चि
तानित्यंभुक्तिमुक्तिप्रदायिनी॥ १॥ इयमेवजगद्धात्रीजगद्रक्षणकारिणी॥ इयमेवहिकल्पांतेजगत्सं
हारकारिणी॥२॥ इयमेवहिकल्पाणिविष्णुमातायशस्विनी॥ इयमेवहिचन्द्रार्कब्रह्मादिजन
नीस्मृता॥३॥ इयमेवतपोधर्मदानादिफलदायिनी॥ इयमेवहिवेदोक्तसर्वकर्मफलप्रदा॥४॥ इयमेव
स्तुतादेवैःवेदांतैरखिलैरपि॥ इयमेवस्तुतासर्वैरितिहासादिभिस्सदा॥५॥ तप्यन्तेहितपःसिद्धैःएत
द्दर्शनकांक्षिभिः॥ पूज्यतेयोगिभिर्योगैरेतद्दर्शनकांक्षिभिः॥ ६॥ धर्माःक्रियंतेमुनिभिःरेतद्द०॥ इज्यंते
यज्विभिर्यागैरेत०॥ ७॥ अनंतदानधर्माणांशांकरीदर्शनंफलं॥ यागादीनांचधर्माणांशांकरीदर्शनं
फलं॥ ८॥ इयमेवजगन्मातासर्वविद्यास्वरूपिणी॥ इयमेवादिविधेयंसर्वमंगलरूपिणी॥९॥ भवा
न्यांपूजनंशीघ्रंयतोधनकृतंत्वया॥ अतस्तेवाध्वरस्यास्यविनाशोह्यभविष्यति॥१०॥ अमंगलंभवत्ये
वपूजार्हाणामपूजया॥ पूज्यमात्रापिनैवेयंयतःपूज्यतमाशिवा॥११॥ सहस्रेणापिशिरसामपियत्पा
दजंरजः॥ वहत्यनघहेभुग्नांगःसेयंभगवतीशिवा॥१२॥ विधिप्रायानियतेनयत्पादांबुजरजःकणं॥
रक्षयत्यखिलान्लोकान्सेयंभगवतीशिवा॥१३॥ इंद्रोपियत्प्रसादेनवृत्रंहत्वामहासुरं॥ स्वर्गाधि

पत्वं संप्राप्ता सेयंभगवतीशिवा॥ १४॥ यत्पादपद्ममनिशं ध्यात्वा संपूज्य सादरं॥ विष्णुर्विष्णुत्वमापन्नः सेयंभगवतीशिवा॥ १५॥ यत्पादपद्ममनिशं ध्या॰॥ ब्रह्मा ब्रह्मत्वमापन्नः सेयंभ॰॥ १६॥ यत्पादपद्ममनिशं ध्या॰॥ ईशोपिईशत्वमापन्न सेयं॰॥ १७॥ यत्पादपद्ममनिशंध्या॰॥ इंद्रोपींद्रत्वमापन्नः सेयंभ॰॥ १८॥ यत्पादपद्म॰॥ सूर्यः सूर्यत्वमापन्नः सेयं॰॥ १९॥ यत्पादपद्म॰॥ चंद्रश्चंद्रत्वमापन्नः सेयं॰॥ २०॥ यत्पादपद्म॰॥ वन्हिर्वन्हि॰॥ २१॥ यत्पादपद्मम॰॥ वायुर्वायुत्वमाप॰॥ २२॥ यत्पादपद्म॰॥ यमोयमत्वमाप॰॥ २३॥ यत्पादपद्म॰॥ पाशीपाशित्व॰॥ २४॥ महादेवोपि यांत्यक्त्वा क्षणमात्रमपि प्रभुः॥ नतिष्ठत्येव सहसा सेयं॰॥ २५॥ एतस्याः शोभनादृष्टिः यस्मिन्प्रसरति क्षणं॥ सधन्यः सगुणी धन्यः सर्वसौभाग्यसंश्रयः॥ २६॥ भवान्याकुटिलादृष्टिः यस्मिं॰॥ सदुर्भगोनिर्गुणश्च सर्वापत्संश्रयश्च सः॥ २७॥ सेयंभगवती धन्याभवानीभाग्यदायिनी॥ यदिनाराध्यते भक्त्या कथं भाग्यं भविष्यति॥ २८॥ दौर्भाग्यंत्वयि संक्रांतं संक्रांता श्चापदस्त्वपि॥ यतोनाराधिता भक्त्या भवानी सर्वमंगला॥ कल्याणं तनुते सेयं स्मतापि शुभदा शिवा॥ सेयं कथं त्वया भक्त्या दक्ष नाराध्यते वद॥ अनभ्यर्च्यापि कल्याणीं कल्याणं प्राप्नुयामिति॥ किमस्ति गर्वो दुर्वारः सगर्वो ध्वंसयिष्यति॥ ३१॥ दक्ष ते गर्वनिर्वाहः कमाश्रित्य भविष्यति॥ नास्ति कोप्यत्र देवेषु गर्वनिर्वाहकस्तव॥ ३२॥ शर्वाणीविमुखो भूत्वा देवेष्वेते सुखकस्तव॥ करिष्यंति ध्रुवं साहाय्यं तं न पश्यामि सर्वथा॥ ३३॥ यदि देवाः करिष्यंति साहाय्यमधुना तव॥ तदा नाशं प्रयास्यंति शलभा इव वन्हिगाः॥ ३४॥ तवाद्य शूलसंभूतपावकेनामितौजसा॥ दहनं प्राप्य शोभा विसंशयो नात्र सर्वथा॥ संभावितं तनकल्याणं भवानीविमुखस्य ते॥ सत्यमेतत्पुनः सत्यमुद्धृत्य भुजमुच्यते॥ ३६॥ ज्वलत्त्वद्य मुखं तेद्य यागध्वंसो भविष्यति॥ सहायास्तव ये चावंतः ते ज्वलंत्वद्य सत्वरं॥ ३७॥ अमराणां मदस्यानां शापयोमंगलायते॥

करिष्यंत्यद्यसाहाय्यं यद्येनस्य दुरात्मनः ॥ गंधर्वाणां भदस्यानां शापयो० ॥ करिष्यत्यद्य साहाय्यं यद्ये
न० ॥३९॥ पंनगानां दुरात्मा नां शाप० ॥ करिष्य० ॥४०॥ किंन्नराणां स० ॥ करिष्य० ॥४१॥ यक्षाणां सद० ॥ क
रि० ॥४२॥ सिद्धानां० ॥ करिष्यत्य० ॥४३॥ ऋषीणां च० ॥ करिष्य० ॥४४॥ ऋत्विजां तापसानां च शा० ॥ क
रिष्य० ॥ ४५ ॥ निर्गछंत्स्वमराः शीघ्रं एतद्ध्वरमंडपात् ॥ अन्यथा भवतां नाशो भविष्यत्यद्य सर्वथा ॥४६॥
निर्गछंतु सगंधर्वाः पंन्नगा याग मंडपात् ॥ अन्यथा० ॥४७॥ यक्षाः सकिंन्नराः शीघ्रं निर्यांत्वध्वरमंडपात् ॥
अन्यथा भ० ॥४८॥ सिद्धाः सऋषयः शीघ्रं निर्यांत्वध्वर मंडपात् ॥ अन्यथा० ॥४९॥ ऋत्विजो ऋषयः सर्वे
निर्यांत्व० ॥ अन्यथा० ॥५०॥ शेषं चं शापयुक्तं च दक्षस्यास्य धरे बलात् ॥ यस्तिष्ठति स पापिष्ठो विनश्य
त्यद्य सत्वरं ॥५१॥ इत्युक्त्वा क्रोधनो लाक्षो दधीचिर्मुनिपुंगवः ॥ क्रोधानलं त्यजन्नेव ययावध्वरमंड
पात् ॥५२॥ मुनयः कोटिशः शीघ्रं दधीचिः सहितास्तदा ॥ निर्ययुः सिद्धसंयुक्ताः संकुद्धा याग मंडपात्
॥५३॥ विमानवरमारुह्य मंगलाधिपतेः परं ॥ चकार गंतुमुद्योगं श्रीमत्कैलाशमंदिरं ॥ ५४॥ तदा प्रा
दुर्भगवतीं प्रमथाः शूलपाणयः ॥ कृतांजलिपुटा भूत्वा विनयानतकंधराः ॥५५॥ ॥ गणा ऊचुः ॥ ॥
आज्ञां देहि सुराराध्ये दक्षनाशाय सत्वरं ॥ सोढुं न शक्यते ऽस्माभिः अवज्ञा त्वयि यत्कृता ॥ को वा व
राको दक्षोऽयं गर्वोऽस्य कथमीदृशः ॥ एतत्सहायभूताश्च के वराका वदस्व नः ॥५७॥ सत्वरं भस्मसात्कृ
त्वा दक्षमेनं ततः परं ॥ भवाम सुखिनो देवी नान्यथा सुखिनो वयं ॥५८॥ पीताब्धेः पूर्वमस्माभिः स
त्य मुद्राः सप्त सत्वरं ॥ अस्माकं ना दृशानां तु किमशक्यं जगत्त्रये ॥५९॥ जगत्त्रयं चर्धिमुखं त्वया द्य यदि स
त्वरं ॥ तदा जगत्त्रयं चैतत्नाशयामः क्षणांतरे ॥ देहि देहि शिवे शीघ्रं आज्ञां दक्षविनाशकां ॥ नास्मा
भिरस्य वदनं शक्यते द्रष्टुमंबिके ॥६१॥ इत्युक्तं न द्दुच श्रुत्वा नानाश्वास्य ततः शिवा ॥ विमानरत्नमारु

ध्युपयोः शंकरसंनिधिं॥६२॥ ततः समुत्थितः शीघ्रं दधीचिः क्रोधपावकः॥ ज्वालामालासमाकीर्णो
ददाहाध्वरमंडपं॥६३॥ तेनैव यागसंभाराः दग्धाः क्रोधाग्निना तदा॥ प्रपलाय्य गता देवा दक्षयज्ञा
दिसंयुताः॥६४॥ भस्मीभूतां यागशालां दृष्ट्वा दक्षः पुनः सुरान्॥ सहायीकृत्य सहसा यागशालाम
कारयत्॥६५॥ संपाद्य यागसंभारान् स कैश्चिन्मुनिभिः सह॥ यागं कर्तुं समारेभे बलवीर्यसमन्वि
तः॥६६॥ तदा दक्षं समालोक्य विष्णुरिंद्रादिसंयुतः॥ नीतिशास्त्राविरोधेन प्राह वाचमुदारधीः॥
६७॥ ॥विष्णुरुवाच॥ ॥ यागान्कर्तुमनायासं दक्ष दक्षोसि यद्यपि॥ तथापि त्वृषिशापोयं सोन्य
था न भविष्यति॥६८॥ दधीचिर्मुनिशार्दूलः श्रीमहारुद्रपूजकः॥ तस्य शक्तिर्न केनापि ज्ञायते द
क्ष वस्तुतः॥६९॥ त्रैलोक्यदहने शक्तो दधीचिः क्रोधसंकुलः॥ शक्तिस्तथाविधा प्राप्ता तेन श्रीरुद्रपू
जया॥७०॥ रुद्रमव्यभिचारेण येर्चयंत्यन्वहं मुदा॥ ते सर्वे प्यतिदुर्धर्षाः सत्यं सत्यं न संशयः॥७१॥अ
गस्त्येन यदा पीताः समुद्राः सप्त लीलया॥ तदा लक्ष्मीसमेतेन मया तदुदरे स्थितं॥७२॥ अगस्त्येन त
तस्त्यक्तो निरस्तैश्च मया ततः॥ एतादृशं हि सामर्थ्यं तेन प्राप्तं शिवार्चया॥७३॥ ताडितोहं पुरा शूलैर्ब
हुधा शिवकिंकरैः॥ अनिवार्यबलास्तस्मात्क्रूराः शंकरकिंकराः॥७४॥ भुवनानां कृतः पूर्वं यत्त्रासः शि
वकिंकरैः॥ तेषामशक्यं लोकेषु न किमप्यस्ति वस्तुतः॥७५॥ शांकराणां प्रतिद्वंद्वं नास्ति लोकेषु स
र्वथा॥ तृणीकुर्वन्त्यस्मदादीन् अमरान्शांकरा यतः॥७६॥ कुपिता न भवत्येव सहसा शांकरा ध्रुवं॥ कु
पिताश्चेत्तदा लोकान् दहिष्यंत्येव शांकराः॥७७॥ शक्तो दधीचिरद्यैव दग्धुमस्मान्स यद्यपि॥ तथाप्य
स्मान्न दग्ध्वैव स गतः करुणानिधिः॥७८॥ धन्या हि शांकरा यस्मात्सदयाः कुपिता अपि॥ अतो न शां
करादन्यो धन्यो नास्ति जगत्त्रये॥७९॥ किंच दत्तोस्ति शापश्च तेन विश्वपतेरतः॥ क्षणमप्येन मया संस्था
त्र

तुमुचितं ध्रुवं ॥ ८० ॥ सर्वेश्वरस्य शापध्यः केनो त्वं ध्योभविष्यति ॥ तमुत्सृज्य पुनः कोत्र क्षणं जीवितुमि
च्छति ॥ ८१ ॥ आदावेव जगन्मातुः त्वयाभाभ्युर्वनं कृतं ॥ अनरग्वत्वया दुःखं प्राप्यमद्यान संशयः ॥ ८२ ॥
यद वज्ञां विधिः कृत्वाच्छिन्नमूर्धाभवत्पुरा ॥ तस्त्रिया ऽवज्ञया दक्ष तव नाशो भविष्यति ॥ ८३ ॥ याशर्वाणी
भवानी भक्तमंगलदायिनी ॥ तदवज्ञाग्निना दक्ष तव नाशो भविष्यति ॥ यामाहुः परमां विद्यां प
रब्रह्मस्वरूपिणीं ॥ तदवज्ञा० ॥ ८५ ॥ यामाहुर्देवजननीं निष्कलामपि शाश्वतीं ॥ तदवज्ञा० ॥ ८६ ॥ या
माहुर्वेदजननीं वेदवादरता बुधाः ॥ तदवज्ञा० ॥ ८७ ॥ यामाहुर्निर्गुणां नित्यां आनंदामम्तां शिवां ॥ त
दवज्ञा० ॥ ८८ ॥ यामाहुः परमां शक्तिं स्वशक्त्या वर्तते द्विजाः ॥ तद० ॥ ८९ ॥ यामाहुरक्षरां शुद्धां वेद
वेदांतवादिनः ॥ तद० ॥ ९० ॥ यामाहुरीश्वरार्धांगीं संगासंगविवर्जितां ॥ तदवज्ञा० ॥ ९१ ॥ यामाहुः
सच्चिदानंदस्वरूपामपराजितां ॥ तदव० ॥ ९२ ॥ यामाहुः कृतकल्याणीं कल्याणगुणसागरां ॥ तदव० ॥
९३ ॥ यामाहुर्योगफलदां तथा योगफलप्रदां ॥ तदव० ॥ ९४ ॥ यया ततमिदं विश्वं यस्यामंते प्रलीयते ॥
तदवज्ञा० ॥ ९५ ॥ यत्नेनैव प्रसादार्थं योगमार्गविचक्षणाः ॥ तदव० ॥ ९६ ॥ या शंकरप्रिया साक्षात्सर्व
मंगलरूपिणी ॥ तदवज्ञा० ॥ ९७ ॥ तिरस्कुर्वेत्यल्पभाग्यामोहाद्भगवतीं शिवां ॥ तदव० ॥ ९८ ॥ भवं
तितत्तिरस्कारं निर्भाग्या भुवि संततं ॥ तएव दुर्भगा दुष्टाः तरग्या भाग्यसंश्रयाः ॥ ९९ ॥ तिरस्कुर्वंति
ये मोहाद्देवीं भगवतीं शिवां ॥ यद्दर्शनं विरक्तानां सिद्धानामपि दुर्लभं ॥ १०० ॥ तां दृष्ट्वापि त्वया मोहात्क
थं नाराधनं कृतं ॥ किं कर्तव्यं त्वया दक्ष दुरदृष्टं त्ववेदशं ॥ ॥ तवापि नापराधोस्ति दुरदृष्टाश्रयो
यतः ॥ इत्युक्त्वाध्वरशालायां स्थितो विष्णुस्तदंतरे ॥ १ ॥ भवानी पूर्ववृत्तांतं ज्ञापयामास शंभवे ॥
शंभुस्तद्वचनं श्रुत्वा शांतोपि क्रोधसंयुतः ॥ २ ॥ क्रोधेन जनयामास वीरभद्रं दुरासदं ॥ वीरभद्रः स

मुत्पन्नः सहस्राक्षः सहस्रपात् ॥३॥ स भूमिं विश्वतो रत्वा अत्यतिष्ठद्दशांगुलं ॥ समुत्पन्नो वीरभद्रः
प्रणम्य परमेश्वरं ॥४॥ कृतांजलिपुटः प्राह वाक्यं वाक्यविशारदः ॥५॥ ॥ वीरभद्र उवाच ॥ ॥ महारु
द्र महारौद्र सोमसूर्याग्निलोचन ॥ किं कर्तव्यं मया कार्यं शीघ्रमाज्ञपय प्रभो ॥ त्वत्क्रोधानलसंभूतः सो
हं कालाग्निरुज्ज्वलः ॥७॥ कुकस्य दहनं कार्यं नद्ददस्त्व महेश्वर ॥ शोषणीयाः किमीशान क्षणार्धे ने
व सिंधवः ॥८॥ पेषणीयाः किमीशान क्षणार्धे नैव पर्वताः ॥ क्षणेन भस्मसात्कार्यं ब्रह्मांडमुदकं हरेः ॥
॥९॥ क्षणेन भस्मसात्कार्या सुरा वा किमु नेश्वर ॥ व्यत्यासः सर्वलोकानां किमु कार्योस्ति शंकर ॥१०॥
कर्तव्यं किमु नेशान सर्वप्राणिविनाशनं ॥ ममाशक्यं न कुत्रापि त्वत्प्रसादान्महेश्वर ॥११॥ पराक्रमेण म
तुल्यो न भूतो न भविष्यति ॥ यत्र यत्कार्यमुद्दिश्य प्रेषयिष्यसि मां प्रभो ॥१२॥ तत्तत्कार्यं साधयामि सा
धयाम्येव सत्वरं ॥ सर्वत्र गतिरीशान मम मास्ति त्वत्प्रसादतः ॥१३॥ नरास्तरंति संसारसागरं शंकरं
स्मृतेः ॥ हरतो हं न किं लंघितुं महापत्सागरं क्षमः ॥१४॥ त्वत्प्रेषितं तृणेनापि महत्कार्यं भयत्ततः ॥ क्ष
णेन शक्यते कर्तुं शंकरात्र न संशयः ॥१५॥ लीलामात्रेण देवेशं भो कार्यं यद्यपि सिध्यति ॥ तथाप्यहं
प्रेषणीयः ममैवानुग्रहो ह्ययं ॥१६॥ शक्तिरेतादृशी शंभो ममापि त्वदनुग्रहात् ॥ विना शक्ति
र्न कस्यापि शंकर त्वदनुग्रहात् ॥१७॥ त्वदाज्ञया विना कोपि तृणादीन्यपि वस्तुतः ॥ नैव चालयितुं
शक्यः सत्यमेतन्न संशयः ॥१८॥ त्वदाज्ञयाग्निर्दहति तृणादीनि स वस्तुनः ॥ विना त्वदाज्ञां अग्निश्च
दग्धुं नैव समो ध्रुवं ॥१९॥ कृशक्ति दहने वह्नेः तृणानामपि चालने ॥ नतस्य शक्तिरस्त्येव विनाज्ञां त
व शंकर ॥२०॥ भीतस्त्वत्तो यमः नित्यं पवनश्च तथा रविः ॥ इंदुर्यमो वसुश्चापि नित्यं तितींद्रो न संशयः ॥
२१॥ ततो नियम्याः सर्वेपि देवास्तव महेश्वर ॥ तथैवाहं नियम्यस्ते नानियम्योस्मि सर्वथा ॥२२॥ प्रणतो

स्मिमहादेवभ्र्योपिप्रणतोस्म्यहं॥प्रेषयस्वेषमिध्यर्थंमामघहरसत्वरं॥२३॥स्पंदोपिजायतेवा
मोदणिस्यभुजस्यमे॥भविष्यत्यद्यविजयोमामतःप्रेषयप्रभो॥२४॥स्पंदोदक्षिणनेत्रस्याप्यधुना
जायतेमम॥भविष्यत्यद्यविजयोमामतःप्रेषयप्रभो॥२५॥हर्षोत्साहविशेषोपिजायतेममकश्चन॥
भविष्यन्॥२६॥शिवत्वत्पादकमलसंसक्तामरुचेनसः॥ममप्रतिपदेभाविशुभसंतानसंततिः॥२७॥
तस्येवविजयोभावितस्यैवशुभमन्वहं॥लब्धभक्तिदृढांशंभोत्वयिशोभनसंश्रये॥२८॥इत्युक्तंतद्व
चःश्रुत्वासंतुष्टोमंगलापतिः॥वीरभद्रजयस्वेतिप्राहाशीर्वादपूर्वकं॥२९॥ ॥श्रीमहादेवउवाच॥
यागंकर्तुंसमुद्युक्तोदक्षोमद्विमुखोधुना॥तमद्यभस्मसात्कृत्वापुनरायाहिसत्वरं॥३०॥किंच
निष्ठतिमोहेनयेदक्षाध्वरमंडपे॥तानमप्यद्यैवसहसाभस्मसात्कुरुसत्वरं॥३१॥किंचनिष्ठति
मोहेनयेदक्षाध्वरमंडपे॥सुराश्चयक्षगंधर्वाद्यपक्षपातेचकेचन॥तानप्यद्यैवसहसाभस्मसात्कुरु
सत्वरं॥३२॥ दधीचोक्तंसमुल्लंघ्यमच्छापथंमयितत्रये॥तिष्ठंतियेप्रयत्नेनज्वालनीयास्त्वयाध्रुवं॥
॥३३॥तत्रास्तुविष्णुर्ब्रह्मावाशचीनाथोयमोथवा॥अविचार्यैवतान्सर्वान्पातयस्वप्रयत्नतः॥३४॥
प्रपलाय्यगमिष्यंतियदिविष्णवादयोभ्रमात्॥नानाकर्षयमंत्रेणज्वालयानयसत्वरं॥३५॥ये
तत्रोल्लंघ्यमच्छापथंमदीयंगर्वतस्थिताः॥तेद्विमद्द्रोहिणोतस्तान्ज्वालयानलमालया॥३६॥
सपत्नीकान्ससंभारानदक्षयागस्थलेस्थितान्॥प्रज्वाल्यभस्मसात्कृत्वापुनरायाहिसत्वरं॥
॥३७॥तत्रत्वयिगतेदेवाःविष्णवाद्यायदिसादरं॥तोष्यंतित्वांतदाप्याशुज्वालयाज्वालयेवता
न्॥३८॥देवान्मयिकृतद्रोहान्ज्वालमालसमाकुलैः॥ज्वालयज्वलनत्रीघ्नमाधमयाध्मयंपा
वकान्॥३९॥विष्णवादीन्दक्षयज्ञादीनसपत्नीकान्सबांधवान्॥प्रज्वाल्यवीरतदनुसनीलंस

लिलंपिबं।।४०।। इत्युक्तं श्रीमहेशस्य श्रुत्वा वचनमादरात्।। वीरभद्रो नि संतुष्टः प्रणनाम महेश्वरं।।४१।।
प्रणतं शंकरः प्राह वीरभद्र जयेति तं।। ततः प्रचलितः शीघ्रं वीरभद्रो द्रिराडिव।।४२।। शंकरः प्रेषया
मास शोभार्थं कोटिशो गणान्।। वीरभद्रस्य पुरतः पश्चादपि ययुर्गणाः।।४३।। कल्पवृक्षसमुत्था
पुष्पवृष्टिरभूत्तदा।। तुष्टुवुश्च गणा वीरं शिवपिविष्टरचेष्टितं।।४४।। वीरभद्रे प्रचलिते दक्षनाशा
य सत्वरं।। दक्षेण दुष्टचिन्हानि दृष्टानि विविधेरपि।।४५।। दक्षवामभुजस्पंदो बहुधा समजाय
त।। सुरवामभुजस्पंदः तथैव समजायत।।४६।। भूकंपः समभूत्तत्र दक्षयागस्थले तदा।। दक्षो ददर्श
मध्यान्हे नक्षत्राण्यद्भुतानि सः।।४७।। दिशो बभूवुर्मलिनाः कर्बुरोभूद्दिवाकरः।। परिवेषसहस्रेण संक्रांत
श्चाभवद्रविः।।४८।। नक्षत्राणि तदा पेतुर्विद्युद्वह्निसमन्विताः।। नक्षत्राणामभूद्वक्रा गतिश्चाधोमुखी तदा।।
।।४९।। गृध्रा दक्षशिरः स्पृष्ट्वा समुद्भूताः सहस्रशः।। गृध्रपक्षच्छायया सीत्तमच्छायो यागमंडपः।।५०।। ववा
शिरे यागभूमौ क्रोष्टारः कोटिशस्तदा।। उल्कावृष्टिरभूत्तत्र श्वेतवृश्चिकसंयुताः।।५१।। तदासोष्णा ववुर्वाता
पांसुवृष्टिसमन्विताः।। शलभाश्च समुद्भूताः विवर्तानिलकंपिताः।।५२।। नीलश्च पवनेनोर्ध्वं सदस्याध्वरमं
डपाः।। देवान्विलेन दक्षेणयः कृतोन्नतनःपुनः।।५३।। वेमुर्दक्षादयः सर्वे तदा शोणितमद्भुतं।। वेमुश्चमां
सखंडानि सशल्यानि मुहुर्मुहुः।।५४।। सकंपाश्च बभूवुस्ते दीपावातहता इव।। दुःखिताश्च बभूवुस्ते श
स्त्रधाराहता इव।।५५।। तदाननानि जातानि खिन्नानि विशदान्यपि।। निशायां कमलानीव कुमुदानीव
संगवे।।५६।। दक्षाद्यक्षीणि जातानि वाष्पवर्षीणि तत्क्षणे।। प्रातस्तुषारवर्षीणि पद्मानीव वनांतरे।।५७।।
भुवि ते मूर्छिताः पेतुः हा हताः स्म इति द्रुतं।। तरवस्तीरसंजाता नदीवेगहता इव।।५८।। पतित्वा ते स्थिता
भूमौ क्रूराः सर्पा इवाहताः।। केतुका इव ते भूयः पतिताः पुनरुत्थिताः।।५९।। ततस्ते तापसंतप्ता रुरुदुः

कुररीइव॥रोदनध्वनिसंक्रांतासंक्रांतोत्क्रांतिकाइव॥६०॥ सर्वेकुंठास्ततःसर्वेनदक्षकुंठितशक्तयः॥
स्वस्वोपकंठमाकंठंलुलुठुःकमठाइव॥६१॥ दुर्भगाभाग्यसंक्रांतशिवपूजापराङ्मुखाः॥ धिक्जन्म
नयदक्षेतिसंजाताचाशरीरवाक्॥६२॥ नदानीमागतोभीमोवीरभद्रोरिमर्दनः॥ नरसिंहइविनाशार्थे
पुरारिरिवसत्वरं॥६३॥ उपेंद्रेंद्रप्रमुखानयोदक्षाद्याश्च ततःपरं॥ ददृशुर्वीरभद्रंतंज्वलंतमिवपर्वतं॥
॥६४॥ विलोक्येनंवीरभद्रंदक्षमाहहरिस्तदा॥ प्रभंजनहतोक्रांततनालवंतमिवास्थितं॥६५॥ ॥
विष्णुरुवाच॥ ॥अयंरुद्रगणश्रेष्ठोवीरभद्रोरिमर्दनः॥रुद्रक्रोधाग्निसंभूतःसमायातोध्वरांगणे॥
॥६६॥अयंसर्वस्यहिनाशार्थमागतोत्रनसंशयः॥अशक्यमस्यनास्त्येवकिमप्यत्रैववस्तुतः॥६७॥प्रज्वा
ल्यास्मानयंसर्वानधुनाधैवसत्वरं॥ ततःप्रशांतहृदयोभविष्यतिनसंशयः॥६८॥ श्रीमहादेवशापयंस
मुल्लंघ्यभ्रमात्मया॥ यतःस्थितंततःप्राप्यंमयादुःखंत्वयासह॥६९॥शक्तिर्मेमनुनास्त्येवदक्षाद्येत
न्निवारणे॥शापयोल्लंघनाददघशिवद्रोहीयतोस्म्यहं॥७०॥ कालत्रयेपिनयतोमहेशद्रोहिणांसु
खं॥ततोवश्यंमयाप्राप्यंदुःखमद्यत्वयासह॥७१॥सुदर्शनाभिदंचक्रंएतस्मिन्नभविष्यति॥शैव
चक्रमिदंयस्माद्दुशैवक्षयकारकं॥७२॥ विनापिवीरभद्रेणमामेतच्चक्रमेश्वरं॥ हत्वागमिष्यत्यधु
नासत्वरंहरसंनिधिं॥७३॥ शैवंशापथमुल्लंघ्यास्थितंमांचक्रमीदृशं॥ असंहृत्यैवसहसारूपयेवस्थि
तंपरं॥७४॥ अतःपरमिदंचक्रंमयिनस्त्वास्यतिध्रुवं॥गमिष्यत्यधुनाशीघ्रंज्वालामालासमाकुलं॥
॥७५॥वीरभद्रःपूजितोपिशीघ्रमस्माभिरादरात्॥ महाक्रोधसमाक्रांतोनास्मान्संरक्षयिष्यति॥७६॥
अकांडप्रलयोस्माकंआगतोद्यहिहाहहा॥हाहाबलवतेदानींनाशोस्माकमुपस्थितः॥७७॥ शरण्यो
स्माकमधुनानास्त्येवहिजगत्त्रये॥शंकरद्रोहिणांलोकेकःशरण्योभविष्यति॥७८॥ तनुनाशोपिसं

प्राप्तोद्यस्माभिर्यमयातना॥ सानेवशक्यतेसोढुं बहुदुःखप्रदायिनी॥७९॥ शिवद्रोहिणमालोक्यदष्टदंतो यमःस्वयं॥ तप्ततैलकटाहेषुपातयिष्यत्यसंशयं॥ ८०॥ मामिंद्रंवाशिधिंवान्यंशिवद्रोहपरंयमः॥ विलोक्य सहसाक्रूरः सकृपांनकरिष्यति॥ ८१॥ यमस्यनयतोऽस्माकंअपेक्षास्मात्ततोयमः॥ पातयिष्यतिघोरेषुवन्हि कुंडेषुसत्वरं॥ ८२॥ आज्ञप्तः श्रीमहेशेनविष्णुर्ब्रह्मातुवासवः॥ मद्रोहपरचित्तश्चेत्तमग्नौपातयेन्निसः॥ ॥८३॥ अतोवश्यंयमः क्रूरःशिवद्रोहिजनानलः॥ अस्मानलकुंडेषुपातयिष्यत्यसंशयं॥८४॥ यद्यद्यवी रभद्रोयमस्मान्शूलेनसत्वरं॥ प्रोथयित्वाविपोथ्येततदानयमयातना॥ ८५॥ अस्माकमीदृशंभाग्यं कथंवासंभविष्यति॥ यत्त्रिशूलपरिपोतास्त्यक्षामोक्षनिहाधुना॥ ८६॥ त्रिशूलप्रोथितांः पूर्वेमुक्ताजा ताःपुरादयः॥ मुक्ताजातास्तदन्येपित्रिशूलेनतनिपातिताः॥ ८७॥ शूलदर्शनमात्रेणमुक्तिर्भवतिवस्तु तः॥ तत्संयोगात्तदामुक्तिर्भवतीत्यत्रनाद्भुतं॥ ८८॥ गंतुमेवाहमुद्युक्तः सर्वथाशापयोतरं॥ तथापिनशतं शीघ्रंदुष्टसंगजपापतः॥ ८९॥ अतस्त्वहितत्संगः कर्तव्यः सर्वदाबुधैः॥ असत्संगःप्रयत्नेनपरित्याज्यो हितैषिभिः॥ ९०॥ यद्यद्यक्रियतेस्माभिः पलायनमितस्ततः॥ अस्मानाकर्षकैशस्त्रैःससमाकर्षयिष्य ति॥ ९१॥ स्वर्गेवाभुविपाताले पत्रकुत्रापिवायतः॥ श्रीवीरभद्रशस्त्राणांगमनंनहिदुर्लभं॥ ९२॥ ग णावसंतियावंतःश्रीरुद्रस्यत्रिशूलिनः॥ तावतामपिसर्वेषांशक्तिरेतादृशीध्रुवं॥ ९३॥ श्रीकालभैरवः काश्यांनखाग्रेणेवलीलया॥ पुराशिरांसिचिच्छेदचत्वारिब्रह्मणोद्भुतं॥ ९४॥ एतादृशागणाःसंति कोटि शोमंगलायनेः॥ तेषामजेयंनास्त्येवत्रिषुलोकेषुवस्तुनः॥ ९५॥ एवमुक्त्वास्थितोविष्णुः अतिम्लान मुखांबुजः॥ वीरभद्रोपिसंप्रापनदेवाध्वरमंडपं॥ ९६॥ वीरभद्रः शूलपाणिःनानागणसमन्वितः॥ दद र्शविष्णुप्रमुखान्यागमंडपसंस्थितान्॥ ९७॥ तान्दृष्ट्वावीरभद्रोभूत्तभ्रकुटीकृतलोचनः॥ कृतांतइ

वपापिस्थान्मृगेंद्रइववारणान्॥ ९८॥ ततोविष्णवादयस्सर्वेद्रुतमुत्थायसादरं॥ प्रणामान्कर्तुमु
द्युक्तास्तदाप्राहहरात्मजः॥ ९९॥ ॥ वीरभद्रउवाच॥ ॥ रेरेहरेमहादेवशापयोग्यस्त्वंधनंत्वया॥ क
थमधकृतंदुष्टगर्वैःकिमभक्ष्यत्तव॥ १००॥ नवश्रीरुद्रशापयोग्योयंघनेशक्तिरस्तिकिं॥ कोवात्वमसिको
वानेरक्षकोस्तिजगत्त्रये॥ १॥ बक्षोविदारयिष्यामित्रिशूलेनहरेतव॥ कस्तवाद्यसमायातुरक्ष
कोद्यममाग्निकं॥ २॥ पातयिष्यामिभूपृष्ठेज्वालयिष्यामिवह्निना॥ दग्धंभवंतमधुनापेषयिष्यामि
सत्वरं॥ ३॥ रेरेहरेदुराचार त्वमेवंकर्तुमिच्छसि॥ श्रीमहारुद्रमाहात्म्यंकिंनजानासिशाश्वतं॥ ४॥ इ
त्युक्त्वाशूलमादायवीरभद्रोरुणेक्षणः॥ हरिंविदार्यभूपृष्ठेपातयामाससत्वरं॥ ५॥ ततोदक्षंसमा
लोक्यकशाभिःकोटिशःस्तदा॥ संताड्यपातयामासविदार्यास्त्रेणतत्तनुं॥ ६॥ ततोविधींद्रयक्षादीन्
विदार्यपृथिवीतले॥ पातयामासशीघ्रेणक्रोधाक्रांतारुणेक्षणः॥ ७॥ वीरभद्रोविदार्यापिविष्णु
ब्रह्मपुरोगमान्॥ नाभूत्तृप्तोनभवक्रोधःफणिराडिवमंत्रतः॥ ८॥ दिशोधिलोकयामासकः कु
त्रास्तीत्यनुक्षणं॥ वीरभद्रोहतारातिःकेसरीववनद्विपान्॥ ९॥ बभौहत्वाहरींद्राद्रीन्सपत्नीकान्
गणान्वितः॥ त्रिपुरारिरिवाराध्योहत्वात्रिपुरकानने॥ १०॥ रेजेतदावीरभद्रस्त्रिशूलंभ्रामयन्करे॥
क्रुधारुणाक्षःसंवर्तःप्रज्वलन्पर्वतोपमः॥ वीरभद्रहताःतस्थुर्भुविविष्णुपुरोगमाः॥ तूर्णेवज्रहताः
पूर्वंपर्वताइवगर्विताः॥ १२॥ अनायासेनहत्वैतान्वीरभद्रस्तलोग्निना॥ ज्वालयामासविष्णवादीन्
दीप्ताग्निःशलभानिव॥ १३॥ वीरभद्रःक्षणार्धेनदग्ध्वाविष्णुपुरोगमान्॥ अट्टहासंततश्चक्रेपूर
यन्जगतांत्रयं॥ १४॥ चंचरीकसमाक्रांतानतनोनंदसंभवा॥ पुष्पवृष्टिरभूद्भूम्यांवीरभद्रेगणान्वि
ते॥ ववुःगंधवहाःशीताःसुगंधास्तदनंतरं॥ देवदुंदुभयोनेदुःस्वयमेवनतःपरं॥ १६॥ दिशोबभूवुर्वि

मलाः भानुमानपि संबभौ॥ मलाः प्रशांताः सर्वेपि ततोभून्मंगलं भुवि॥ १७॥ वीरभद्रः प्रचलितः कृतका र्यस्ततः परं॥ विनाशिवहृदध्यांनो भानुमानिव सत्वरं॥ १८॥ उत्फुल्लपद्मपत्राक्षो वीरभद्रो गणान्वि तः॥ ददर्श पार्वतीकांतं ननाम च पुनः पुनः॥ १९॥ कृतकार्यं वीरभद्रं दृष्ट्वा संतुष्टमानसः॥ वीरं वीर गणाध्यक्षं चकार परमेश्वरः॥ २०॥ ततो हिमगिरिं प्राप्तो शिवपूजापरायणान्॥ दृष्ट्वा स्वभक्त्या गौरीना थः तद्दत्तां प्रापली[illegible]लया॥ २१॥ ततस्तत्पूजितः शंभुस्तुतश्च विविधैः स्तवैः॥ संतुष्टो भूतमहादेवः स गणो मंगलान्वितः॥ २२॥ ततः कस्मैचिदीशानो ददौ विष्णुत्वमादरात्॥ स्रष्ट्वा लक्ष्मीं ददात स्मै ददौ लक्ष्मीं गुणान्वितां॥ २३॥ ततः कस्मैचिदीशानो ब्रह्मत्वं च ददौ ततः॥ स्रष्ट्वा सरस्वतीं तस्मै ददद्यां वाममनोहरः॥ ददौ रुद्रत्वमेकस्मै गौरीं स्रष्ट्वा ततः परं॥ ददौ कस्मिंश्च इंद्रत्वं शा चीं स्रष्ट्वा ततः परं॥ २५॥ तस्मै शाचीं ददौ तस्मै स्वर्गलोकं च शंकरः॥ गंधर्वादीन् ततः शंभुः यथा पूर्वमकल्पयत्॥ २६॥ ततः शिवान्वितो रेमे स्वतंत्रः परमेश्वरः॥ अत एव यदा भ्रांता गणपं तिनशं करं॥ २७॥ तदानश्यंतिविष्ण्वाद्याः रुद्रो रोद्राश्च वन्हिना॥ कामः कृतशिवावज्ञः पपात नरके पुरा॥ ॥२८॥ अतोवज्ञा महादेवे न कुर्वंति हितैषिणः॥ मदनेन पुरा पूर्वं इतरामरतुल्यतां॥ विधाय शं करे मोहात् स्वनाशः परिकल्पितः॥ इंद्रः पूर्वं समाहूय वरुणादीनुवाच ह॥ ३०॥ ॥ इंद्र उवाच॥ ॥ काशक्तिरस्ति भवतां तां वदंत्विति सादरं॥ इति तद्वचनं श्रुत्वा स्वस्वशक्तिं यथार्थतः॥ ३१॥ सर्वे निवे दयामासुरिंद्रायेंद्रहितार्थिनः॥ ततो मन्मथमालोक्य स्वसभामध्यवर्तिनं॥ ३२॥ तवापि शक्तिर स्तीति देवेंद्रः प्राह मन्मथं॥ ॥ शचीपते मदीयानामस्त्राणां कामगा गतिः॥ मच्छस्त्राणां गतिः कापि नैव प्रतिहता ध्रुवं॥ ३३॥ मया मदीयशास्त्रेण मुनयोपि वशीकृताः॥ वशीकृता मया सि

क्षामदीयैः शास्त्रपंजरैः ॥ ३४ ॥ कुसुमान्येव शास्त्राणि मृदुलानि तथापि तैः ॥ लोकत्रयजयं कृत्वा
वसाम्यहमहर्निशं ॥ ३५ ॥ प्रयुक्तानि महास्त्राणि शिवान्यखिलेष्वपि ॥ न प्रयुक्तं मया शंभो
शास्त्रमिंद्र कदाचन ॥ ३६ ॥ शाक्तं प्रयोक्तं शास्त्राणि शिवान्येष्विषवर्षं करे ॥ यतो मदीयशास्त्राणां
लक्ष्यभूतमिदं जगत् ॥ ३७ ॥ इत्युक्तं तद्वचः श्रुत्वा शचीपतिरुवाच तं ॥ शृणु मद्वचनं काम सा
वधानं यदुच्यते ॥ ३८ ॥ ईंद्र उवाच ॥ ॥ अवतीर्णोस्ति भूलोके प्रबलस्तारकासुरः ॥ ३९ ॥
तेनोपद्राविताः सर्वे सुराश्च त्वमुखाः सदा ॥ स भुंक्ते तारको नित्यं यज्ञभागान्यथेच्छया ॥ अत्रा
गत्य स्वर्गलोके पीडामपि करोति सः ॥ समानगणयत्येव विष्णुमप्यति दुर्जनः ॥ विधिमप्यम
रानन्यानपि सर्वानसौ बली ॥ ४१ ॥ स चकार पुरा युद्धं विष्णुना सहवीर्यवान् ॥ युद्धे पराजितो विष्णु
स्तेनैव शमितते जसा ॥ ४३ ॥ तस्याहंकृतिमात्रेण चूर्णो भवति पर्वतः ॥ विदारिता भवत्येव पृथिवी च
सकानना ॥ ४३ ॥ तत्कोपश्वासमात्रेण महापर्वतसंनिभाः ॥ कोटिशः प्रबलाः सद्यो भवंत्यसुरपुंग
वाः ॥ ४४ ॥ तस्य संहारकः कोपि नास्त्यस्मासु ततः सदा ॥ अस्माभिः प्राप्यते दुःखं तत्कृतोद्योगसं
भवं ॥ ४५ ॥ एतदर्थं तु गुरुणा ब्रह्मलोके गतं पुरा ॥ मया निवेदितं दुःखं ब्रह्मणे काम वेदितं ॥ ४६ ॥ त
दातिरिविन्नवदनं मां दृष्ट्वा सगुरुं विधिः ॥ आह मां विधिवद्ध्यात्वा बहुकालं प्रयत्नतः ॥ ४७ ॥
॥ ब्रह्मोवाच ॥ ॥ तारकासुरसंहर्ता रुद्रो रौद्रोथवा न यो ॥ यतस्तत्क्षननेशक्तिर्यतस्तावभितौजसौ ॥
॥ ४८ ॥ रुद्ररौद्रसमो नास्ति सुरेष्वन्येषु वा नतः ॥ तारको रुद्ररौद्राभ्यं यतरेणैव भविष्यति ॥ ४९ ॥
तारकासुरसंहर्ता विष्णुस्तु न भविष्यति ॥ विष्णुना ह्यल्पवीर्येण कार्येतद्धननं कथं ॥ ५० ॥ श्री
रुद्रशक्तिको द्वयं शोणपुत्रेंद्रो न यतस्ततः ॥ तस्य तद्धनने शक्तिर्न भविष्यति वस्तुतः ॥ ५१ ॥ स्वतंत्रः श्रीम

हारुद्रः तस्य रुद्रस्य वस्तुतः॥ कर्तव्यं नास्ति कुत्रापि नित्यानंदाय तः प्रभुः॥ ५२॥ तदिच्छास्मदृष्टेन य
दि संचलिता भवेत॥ तदा करिष्यत्यस्माकं कार्यं स गिरिजापतिः॥ ५३॥ तथा च षण्मुखोत्पत्तिर्भविष्यति य
था नया॥ प्रयत्नश्चिंतनीयोस्ति सर्वथा सर्वसाधनैः॥ ५४॥ षण्मुखो रुद्रवीर्येण भविष्यति यदा तदा॥ स
संहर्ता तारकस्य भविष्यत्येव सर्वथा॥ ५५॥ अयमर्थो मया ज्ञातो ध्यानेनाद्य मया ततः॥ विश्वासो
मयि कर्तव्यो नान्यथा महदुत्तोध्रुवं॥ ५६॥ शिवयोः संगमे नैव शिववीर्यसमुद्भवः॥ भविष्यति म
हावीरः षण्मुखः तारकांतकः॥ ५७॥ शिवयोः संगमः शीघ्रं भवेद्यदि तदा ततः॥ तारकासुर
संहर्ता जातस्तं नाशयिष्यति॥ ५८॥ इति तद्वचनं श्रुत्वा ब्रह्मणा प्रेषितोधुना॥ समागतो
सि कामातः तत्कार्यं कुरु सादरं॥ ५९॥ इति तद्वचनं श्रुत्वा मन्मथो मदमोहितः॥ प्राह प्रगल्भवच
नैस्त्वविनाशैकसाधनं॥ ६०॥ ॥मन्मथ उवाच॥ ॥मदीयपुष्पशस्त्राणि योगिनामपि मानसं॥ मोहयि
ष्यंयतस्तावन्मोहयिष्यंति शंकरं॥ ६१॥ यथा मदीयशस्त्रेण मोहिता भवदादयः॥ भविष्यति तथेशो
पि भवंत इव मोहितः॥ ६२॥ भवतु श्रीमहादेवः वस्तुतः सुरपुंगवः॥ मदस्त्रलक्ष्यभावेन भवद्भिः समो
ध्रुवं॥ ६३॥ इति तद्वचनं श्रुत्वा संतोष्य कुसुमायुधं॥ बाणप्रयोगो गौरीशे कुरुष्वेत्याह सत्वरं॥ ६४॥ इ
ति तद्वचनं श्रुत्वा मन्मथः परमेश्वरे॥ बाणप्रयोगमुद्योगं चकार भ्रांतमानसः॥ ६५॥ ततः समागतः
शीघ्रं ज्वालामालासमाकुलः॥ भालाक्षफालसंभूतः चित्रभानुर्भयंकरः॥ ६६॥ स पावकः समाग
त्य जज्वाल कुसुमायुधं॥ भस्मावशेषं कृत्वैव प्रशांतस्तदनंतरं॥ ६७॥ स मन्मथस्ततो नीतः तदै
व यमकिंकरैः॥ पातितश्चातिघोरेषु नरकेषु प्रयत्नतः॥ ६८॥ अतोन्यसमं शंभुं अन्यतुल्यतया
भ्रमात्॥ ये भिजानंति दुर्वृत्ताः तेषामेतादृशी गतिः॥ ६९॥ संत्याज्य मोहमखिलं अतस्त्वं भवानपि॥

श्रीशिव

सर्वदेवोत्तमत्वेनजानीहिगिरिजापतिं॥ ७०॥ महादेवोखिलाराध्यः सर्वदेवशिखामणिः॥ न
ततोस्त्यधिकोविप्रन तत्तुल्योथवाध्रुवं॥ ७१॥ शिवेत्वयान्यतुल्यत्वमुक्तमोहवशात्ततः॥ त्वयातदु
क्तिमात्रेणपातकंमहदार्जितं॥ ७२॥ अतस्तत्पापशांत्यर्थंश्रीशैलस्यप्रदक्षिणे॥ सहस्रवारंयत्नेनकु
रुमौनपुरःसरं॥ ७३॥ तत्प्रदक्षिणकालेषुरुद्रसावर्तेयादरात्॥ रुद्राध्यायजपादेवयतोनश्यतिपात
कं॥ ७४॥ उद्धूलनंत्रिपुंड्रंचतथारुद्राक्षधारणं॥ कुरुयत्नेनतन्नित्यंमनसापिनलंघय॥ ७५॥ य
स्मादुद्धूलनादीनिश्रुत्युक्तानिततोद्विज॥ तदुल्लंघनमात्रेणपतित्वंतेभविष्यति॥ ७६॥ यस्मा
दुद्धूलनादीनिद्विजैःकार्याणिसंततं॥ तस्मात्त्वयापियत्नेनतानिकार्याणिसंततं॥ ७७॥ मापिबोद्धू
लनंत्यक्त्वाजलमल्पमपिद्विज॥ त्रिपुंड्रधारणंत्यक्त्वामापिबापःस्तथाद्विज॥ ७८॥ रुद्राक्षधार
णंत्यक्त्वामापिबापस्तथाद्विज॥ शिवलिंगार्चनंत्यक्त्वामापि०॥ ७९॥ पंचाक्षरजपंत्यक्त्वामापि०
॥ रुद्राध्यायजपंत्यक्त्वामा०॥ ८०॥ अयंधर्मोपदेशस्तुयःकृतोस्तिमयाद्विज॥ सोयंमोक्षप्रदः
सत्यंसत्यंसत्यंनसंशयः॥ ८१॥ शिवंदेवोत्तमंमत्वायज्ञाद्यप्रभृतिद्विज॥ शिवान्यसुरतुल्यत्वंवि
वेस्वप्नेपिमावद॥ ८२॥ शिवान्यसुरतुल्यत्वंयेवदंतिसदाशिवे॥ तेवांवशाखयःशीघ्रंभविष्यति
नसंशयः॥ ८३॥ शिवान्यसु०॥ तेपतिष्यंतिनरकेयावदाचंद्रतारकं॥ ८४॥ शिवान्यसुर०॥
॥ नतैःसहभ्रमेणापिकुरुसंभाषणंद्विज॥ देवोत्तममहादेवंअन्यथायेवदंतिते॥ चंडालयोनि
संभूताजन्मजन्मांतरेध्रुवं॥ ८६॥ देवोत्तमंमहादेवमन्याथेनवदंतिते॥ भूयोभूयोभविष्यंतिचंडा
लाएवसर्वथा॥ ८७॥ अतःसंतःसावधानंसंततंशांतचेतनाः॥ उमाकांतंप्रयत्नेनभजंतिभवभीरवः॥
॥ ८८॥ संसारानलतप्तानांउमाकांतार्चनामृतं॥ संसारतापंपापंचसद्योदूरीकरोतिहि॥ ८९॥

भगवंतंमुमाकांतंसंततंसञ्चितव्रताः॥ संतः प्रशांतमभ्रांताः पूजयंतिस्तुवंतिच॥ ९०॥ कःस्तुतांनरू
तांततंनचिंतयंतिसंततं॥ पूनरवांतेसंववसंनंतमितांनंश्रुतिसंस्तुतं॥ ९१॥ स्कंदउवाच॥ ॥इतिशैव
वचः श्रुत्वानिर्धूताखिलकल्मषः॥ सर्वोपनिषदांसारंश्रुत्वानुष्टोबभूवसः॥ ततः स्वपापशुद्ध्यर्थं
श्रीशैलस्यप्रदक्षिणं॥ कर्तुंसंकल्प्यविधिवतंनत्वासययौमुदा॥ ९३॥ अतः सर्वोत्तमः सांबोनंदिके
शप्रपन्नतः॥ नित्यमव्यभिचारेणपूज्यस्त्यक्त्वान्यदेवतं॥ ९४॥ ॥भानुरुवाच॥ ॥इतिस्कंदवचः
श्रुत्वानंदिकेशोतिहृष्टधीः॥ शिवप्रेषितदूतानांवक्तुंसमुपचक्रमे॥ ९५॥ ॥नंदिकेश्वरउवाच॥ ॥स्कं
दयोगरतंशंभुस्त्वादृष्ट्वाशैलवर्तिनं॥ दूतांतंमपिविज्ञायसमायाहीतिचाब्रवीत॥ ९६॥ इतितद्वचनंश्रु
त्वास्कंदः संतुष्टमानसः॥ दृष्ट्वोमहेश्वरंसांबंआनंदाश्रूणिसंत्यजन॥ ९७॥ ततः प्राहतदास्कंदोनंदि
केशंमुदावहं॥ समागतंत्वयानंदिन्केनमार्गेणतद्वद॥ ९८॥ ॥नंदिकेश्वरउवाच॥ ॥कैलासान्निर्गतः
काशींसंप्राप्तोस्मिशिवप्रियां॥ यस्यांत्यक्त्वातनुंमर्त्यो प्राप्नोतिशिवमद्वयं॥ ९९॥ यस्यांस्थितोनरोप्यो
पिसुरैः संपूज्यतेसदा॥ साकाशीमुक्तिदाभाग्यान्नयनैरतिपीकृता॥ १००॥ यस्यांतीर्थ्येमहत्पुण्यंम
णिकर्ण्यभिधंशुभं॥ साकाशी०॥ १॥ यस्यांकान्त्यामहादेवः क्रीडंत्यंबासमन्वितः॥ साकाशी०॥ २॥
यस्यांवैश्वेश्वरंलिंगंमुक्तिलिंगंप्रकीर्तितं॥ साकाशीमु०॥ ३॥ यस्यामंबामोक्षभिक्षांप्रयच्छतिशिव
प्रिया॥ साकाशीमु०॥ ४॥ यस्यांसमस्तदेवानांशास्ताश्रीकालभैरवः॥ साकाशी०॥ ५॥ भानुरुवाच॥
इतितद्वचनंश्रुत्वाषण्मुखोत्यंतहृष्टधीः॥ शिवंद्रष्टुंसमुत्सुकः काशींप्रापशिवात्मिकां॥ संप्राप्यानं
दरांकाशींस्कंदः संतुष्टमानसः॥ मनकर्णीजलेस्नात्वाययौविश्वेशमंदिरं॥ ७॥ ततः स्नात्वाज्ञानवा
प्यांउत्धूल्यचसमाहितः॥ ज्ञानेशादीन्समभ्यर्च्यमुक्तिमंडपमाश्रितः॥ ८॥ ततोददर्शविश्वेश्वंसर्वदेवो

त्तमोत्तमं॥ इत्थंससमर्चयामासपूजाद्रव्यैरनेकधा॥ ९॥ ततस्तुष्टावरुद्रेणरुद्रसूक्तैस्तथेश्वरं॥ ततः
प्रसन्नोविश्वेशस्तमुवाचातिहृष्टधीः॥ १०॥ ॥श्रीईश्वरउवाच॥ ॥अत्रमत्पूजनासक्तोऽनित्यंमांवीक्ष्य
यन्मुदा॥ संवसेत्ततनगंतव्यंस्कंदपुत्रापिसर्वथा॥ ११॥ कृत्वात्वदर्चनंपूर्वंमत्पुरस्थितमाक्तिकाः॥ ततो
मामर्चयिष्यंतिस्कंदातःसंवसादरात्॥ १२॥ इतिदत्वावरंतस्मैनंदिकेशंस्वपूजकं॥ त्वमप्यत्रैववस
ततंवसस्वेत्याहशंकरः॥ १३॥ इतीशोक्तोनंदिकेशस्तस्थौविश्वेश्वराग्रतः॥ स्कंदोपीशपुरस्तस्थौ
समक्षंशंकराग्रतः॥ १४॥ पूजयित्वास्थितःशंभुंसर्वदेवोत्तमंप्रभुं॥ शिवपूजाप्रभावेनकाशीसंप्रा
प्यषण्मुखः॥ १५॥ अतोभवंतोमुनयःपूजयध्वंमहेश्वरं॥ समर्वदेवदेवेशःचतुर्वर्गफलप्रदः॥ १६॥
श्रीशिवउवाच॥ ॥ इतिभानुवचःश्रुत्वाश्रीशैलंमुनयोययुः॥ तपसातत्रमांनित्यंपूजयामासुरन्वहं॥
॥ १७॥ मय्येवार्पितकर्मणामनुदिनंमय्येवसक्तात्मनांमत्पूजारतचेतसांनियमतोमत्स्थानपूजात्मनां॥
सौभाग्यंसुखमक्षयंचसततंदास्येपवर्गंततःसत्यंसत्यमिदंगिरींद्रतनयेसत्यंपुनःशोभने॥ १८॥ ॥
इतिश्रीशिवरहस्येउग्राख्येसप्तमांशेश्रीशैलमाहात्म्येशिवगौरीसंवादोनामचतुर्दशोध्यायः॥ १४॥ ॥
श्रीपार्वत्युवाच॥ ॥महेशादेवदेवेशातवपूजनमन्वहं॥ कथंकार्यंसाधनानिकानिशंभोतवार्चने॥ १॥
श्रीशिवउवाच॥ ॥नंदिकेशःपुरादेविमामभ्यर्च्ययत्नतः॥ पूजाविधानंपप्रच्छममैवपरमात्मनः॥ २॥ ॥
नंदिकेश्वरउवाच॥ ॥गौरीवल्लभदेवेशसर्वज्ञकरुणानिधे॥ शिवपूजाविधानंमेनिरूपयकृपानिधे॥ ३॥
शिवस्यपूजनात्पूर्वंकिंकर्तव्यंप्रयत्नतः॥ शिवपूजासाधनानिकानिपापहराणिच॥ ४॥ कीदृशःशिवपूजा
यामधिकारोमहेश्वर॥ कीदृशेनकृतापूजातवप्रियकराविभो॥ ५॥ कथंध्येयोसिभगवन्पूजनीयःकथंभ
वान्॥ कथंवापूजितोमोक्षंप्रयच्छसिसदाशिव॥ ६॥ ॥श्रीसदाशिवउवाच॥ ॥साधुसाधुगणश्रेष्ठप्रश्नो

यंशुभदस्तव॥ वक्ष्येपूजाविधिंसम्यक्शृणुसर्वार्थसाधनं॥ ७॥ मद्यंविधाययांपूजांमद्भक्तोमत्परायणः॥ मुच्यतेसर्व
पापेभ्यःसेयंपूजामयाच्यते॥ ८॥ पूज्योहमेवसर्वेभ्योदेवेभ्योदेवपुंगव॥ सर्वोत्कर्षेणपूज्योहंसर्वेभ्योप्युत्तमोयतः॥ ९॥
देवाधिदेवंविश्वेशंमहादेवंजगत्प्रभुं॥ सर्वोत्कर्षेणसंपूज्यमुच्यतेसर्वकिल्बिषैः॥ १०॥ सर्वदेवाधिदेवंमामनन्यसदृशं
शिवं॥ योन्यतुल्यतयावेत्तिसएवश्वपचाधमः॥ ११॥ विश्वाधिकंविभुंरुद्रंयोन्यतुल्यंवदिष्यति॥ सजारजइतिज्ञेयःसंत

तिस्तस्यजारजा॥ १२॥ ईशानंसर्वभूतानांयोमामन्यसमंवदेत्॥ समद्यपवरोज्ञेयःसत्यंसत्यंनसंशयः॥ १३॥ ईश्वरंसर्वभू
तानांयोमामन्यसमंवदेत्॥ सब्रह्महेतिविज्ञेयःनतेनसहसंवदेत्॥ १४॥ उमापतिमहादेवंयोमा०॥ सगोसहस्रहानित्यंनते
नसहसं०॥ १५॥ श्रीनीलकंठंविश्वेशंयोमा०॥ सचंडालइतिज्ञेयःसत्यंसत्यंनसंशयः॥ १६॥ शिवोन्यसुरतुल्योयमितिय
स्तुवदिष्यति॥ तज्जिह्वांद्रुतमुत्पाद्यपुरीषेणविलेपयेत्॥ १७॥ योमामन्यसमंमत्वाक्षणार्धंवावसेन्नरः॥ समहाघोरनरके
स्थास्यत्याकल्पमन्वहं॥ १८॥ शिवोयमन्यदेवेभ्यःकनिष्ठइतियोवदेत्॥ ससर्वयातनाभोक्ताकल्पांतेपिनमुच्यते॥ १९॥
सनष्टःसमहापापीसमातृपितृहाशिवे॥ यस्तुमांशिवमाराध्यमनाराध्यैवसंवसेत्॥ २०॥ समद्यपइतिज्ञेयःसर्वदासर्वदेहिभिः
॥ यस्तुमांशिव०॥ २२॥ सगुरुस्त्रीरतोज्ञेयःसर्वदासर्वदेहिभिः॥ यस्तुमांशिव०॥ २३॥ योनित्यंशिवपूजायांनिरतःशिवतत्प
रः॥ सविष्णुमुख्यैरमरैःपूजनीयोनसंशयः॥ २४॥ शिवपूजापरंदृष्ट्वादेवाविष्णुपुरोगमाः॥ पूजयंतिप्रस्तुवंतिनमंतिच
मुहुर्मुहुः॥ २५॥ अयंधन्यतमोमर्त्यःशिवपूजापरायणः॥ भाग्यवानितिसर्वेपिवदंत्येवामराःसदा॥ २६॥ यद्देहापगमेमोक्षो

यस्यतस्यैवदेहिनः॥ महादेवस्यपूजायांमतिर्भवतिनान्यथा॥ २७॥ शिवोयंसर्वदेवानांप्रभुरित्यस्तियामतिः॥ सातस्य
यस्ययद्देहापगमेशांकरंपदं॥ सर्वोत्कृष्टंशिवंमत्वामामर्चयतियोनरः॥ तस्मैदास्यामिकैवल्यंनान्यस्मैसत्यमुच्यते॥ २९॥
यस्यासाधारणाभक्तिःमयिसर्वोत्तमेशिवे॥ सएवमुक्तिकांतायाःकांतःसत्यंवरानने॥ ३०॥ सर्वदेवाधिदेवंमांशिवंयोभ्य
र्चयिष्यति॥ सदेवोरगगंधर्वयक्षपूज्योभविष्यति॥ ३१॥ योमत्पूजापरोमर्त्यःतद्द्वारिसकलाःसुराः॥ कृतांजलिपुटानित्यं

स्थास्यंत्येवनसंशयः ॥ ३२ ॥ अनन्यशरणोयस्तुशिवपूजापरायणः ॥ नतस्यसंपदोदूरेसत्यंसत्यंनसंशयः ॥ ३३ ॥ तस्यै
श्वर्यंतस्यविद्यायस्यभक्तिस्सदाशिवे ॥ तस्यैवमुक्तिरप्यंतेसत्यंसत्यंनसंशयः ॥ ३४ ॥ यस्यनास्तिगृहेनित्यंशिवलिंगार्च
नंशिवे ॥ तद्गृहंचंडचंडालगृहमेवनसंशयः ॥ ३५ ॥ शिवलिंगंनयस्यास्तिगृहेबिल्वदलार्चितं ॥ तद्गृहंदूरतस्त्याज्यंचंडालागारव
त्ध्रुवं ॥ शिवलिंगंनयस्यास्तिगृहेबिल्वादिपूजितं ॥ तद्गृहेजलमल्पंवानग्राह्यंसर्वथाद्विजैः ॥ ३७ ॥ येननाभ्यर्चितंलिंगंतेनभ्रां
त्यापिसर्वथा ॥ नसंवदेद्भ्रमेणापितेनसार्धंनसंवसेत् ॥ ३८ ॥ शिवलिंगार्चनंयस्तुनकरिष्यतिसन्मतं ॥ तत्स्पर्शेभानुमालोक्य
सचेलस्नानमाचरेत् ॥ ३९ ॥ शिवलिंगार्चनेयस्यनास्यसाधारणीमतिः ॥ तत्स्पर्शेभानुमालोक्यसचेलस्नानमाचरेत् ॥ ४० ॥
शिवलिंगार्चकेभ्यः शिवलिंगार्चकःसदा ॥ चंडालोपिवरःसत्यंनशिवानर्चकोद्विजः ॥ ४१ ॥ शिवलिंगार्चनंनित्यंयस्त्यजेदविवेकतः
॥ सयातिनरकंघोरंयावदाचंद्रतारकं ॥ ४२ ॥ शिवलिंगंसमभ्यर्च्ययःपश्यतिशिवंमुदा ॥ सएवसर्वभाग्यानामालयोभवतिध्रुवं ॥
॥ ४३ ॥ शिवेकिंबहुनोक्तेननित्यंयःशिवपूजकः ॥ सममातिप्रियःसत्यंसत्यंनसंशयः ॥ ४४ ॥ एकमेवमहादेवंभक्त्यायोभ्यर्चयिष्य
ति ॥ सशंकरइतिज्ञेयःसएवममसंमतः ॥ ४५ ॥ एकोहंपूजितोनित्यंदास्यामिपरमांगतिं ॥ सत्यंसत्यंपुनःसत्यंउद्धृत्यभुजमुच्य
ते ॥ ४६ ॥ अनन्यशरणोयस्तुसर्वान्धर्मानविहायमां ॥ योर्चयिष्यतिपुण्यात्मासएवममसंमतः ॥ यःशंकरैकशरणोयःशिवार्चनप्रियः
सएवसर्वधर्माणांआश्रयोभवतिध्रुवं ॥ ४८ ॥ धर्मार्थकाममोक्षार्थेमामभ्यर्च्यसदाशिवं ॥ धर्मार्थकाममोक्षाणांक्षिप्रंभवतिभाजनं ॥
॥ ४९ ॥ ऐहिकामुष्मिकंवापियोमत्तःकांक्षतेफलं ॥ समामभ्यर्च्यविश्वेशंसमवाप्नोतितत्फलं ॥ ५० ॥ मामभ्यर्च्यमहादेवंस्वशक्त्या
मन्मनाःसदा ॥ कदाचिदपिदुःखानिनप्राप्नोत्येवमानवः ॥ ५१ ॥ योमदर्पितसत्कर्मामदाराधनतत्परः ॥ समद्भक्तस्ततस्तेन
कृतपूजाममप्रिया ॥ यस्यास्तिमत्तमातंगस्वामिलेच्छातिसौख्यदा ॥ तेनमल्लिंगमभ्यर्च्यसत्यंसत्यंमयोच्यते ॥ ५३ ॥ यस्यो
च्चैश्रवतुल्याश्वस्वामिलेच्छातिसौख्यदा ॥ तेनम० ॥ ५४ ॥ यस्यवन्हिपदेवांछामोक्षवांछापिशोभने ॥ तेनम० ॥ ५५ ॥ यस्यसौज्या
म्नपदेवांछामोक्ष० ॥ तेनमल्लिं० ॥ राज्याधिपत्येछामोक्षवांछापिशोभने ॥ तेनम० ॥ ५६ ॥ यस्यसोमपदेवांछामोक्ष० ॥ तेनमल्लिं० ॥
॥ ५७ ॥ यस्यविष्णुपदेवांछामोक्ष० ॥ तेनम० ॥ ५८ ॥ यस्यब्रह्मपदेवांछामोक्ष० ॥ तेनमल्लिंग० ॥ ५९ ॥ यस्यरुद्रपदेवांछामो० ॥ तेनम० ॥

यस्यचेंद्रपदेवांछामोक्ष०॥ तेनमल्लिंगे०॥ ६१॥ यस्यसूर्यपदेवांछामोक्ष०॥ तेनम०॥ ६२॥ यस्यकालपदेवांछामो०॥ तेनमल्लिंग०॥ ६३॥ यस्याप्यातिपदेवांछामोक्ष०॥ तेनम०॥ ६४॥ यस्यविश्वेशतावांछामो०॥ तेनम०॥ ६५॥ यस्यवित्तेशतावांछामो०॥ तेनम०॥ ६६॥ यस्यविद्याधिपत्येछामोक्ष०॥ तेनमल्लिं०॥ ६७॥ गाणपत्यस्यवांछापियस्यसंजायतेशिवे॥ तेनमल्लिं०॥ ६८॥ परमेश्वरमाराध्यंसर्वैश्वर्यपतिंशिवं॥ अनाराध्यैकमप्यर्थंनैवप्राप्नोतिमानवः॥ धनवानेवधनदोन दरिद्रोधनप्रदः॥ ततोहमेवधनवान्पूजनीयोधनार्थिभिः॥ ७०॥ ब्रह्मोपेंद्रेंद्रचंद्राद्यैःशेषैरमरैरपि॥ पूजनीयोनएवाहं पूजनीयोनरैरपि॥ ७१॥ ब्रह्मोपेंद्रप्रभृतयोदेवाःसर्वेमुनीश्वराः॥ मामर्चयंतिमामेवशरणंप्राप्नुवंतिच॥ ७२॥ सर्वेभ्यएव देवेभ्यःयतएवमहानहं॥ ततएवमहादेवंवदंतिनिगमश्चमां॥ ७३॥ राजमध्येमहाराजामहाराजेतिकीर्त्यते॥ यथातथैवदेवेषु महादेवोहमेवहि॥ ७४॥ नमत्तोभ्यधिकोदेवःसर्वेभ्योपिमहानहं॥ अतएवमहादेवःप्रथितोनिगमेष्वहं॥ ७५॥ यंयमुद्दिश्य कर्माणिकरिष्यंतिफलेप्सवः॥ तानिकर्माणिमय्येवप्रविशंतिफलप्रदे॥ ७६॥ विष्णुमुद्दिश्ययत्कर्मकृतंतद्विष्णुनाम यि॥ निवेद्यतेफलंदातुअशक्तोनस्वयंशिवे॥ ७७॥ एवमिंद्राग्निवरुणसूर्यचंद्रादिभिःशिवे॥ निवेद्यतेखिलंकर्मस्वमुद्दिश्यकृतमयि॥ ७८॥ फलप्रदाताभगवान्कर्मणामहमेवहि॥ तस्मान्मदन्यःफलदःकर्मणांनास्तिसर्वदा॥ ७९॥ प्रजाभ्योकरमादायराज्ञेप्रकृतिभिर्यथा॥ निवेद्यतेतथामह्यंकर्मदेवैःनिवेद्यते॥ ८०॥ विष्णुब्रह्मादयःसर्वेमम प्रकृतयस्ततः॥ निवेद्यतेखिलंकर्मतैरानीयमयिप्रिये॥ ८१॥ यंयंदेवंसमुद्दिश्यनमःस्काराःकृतानरैः॥ तेसर्वेपि नमःस्काराःप्रविशंतिचमांशिवे॥ ८२॥ यंयंदेवंसमुद्दिश्ययायापूजाकृतामुदा॥ सामयिप्रविशत्येवपूजासर्वापिसर्वथा॥ ८३॥ यथाधिकारिणोदत्तोप्युत्तमोरत्नसंचयः॥ राजानंप्रविशत्येवंमयिपूजाधितिष्ठति॥ ८४॥ साक्षा[illegible]त्पूजनेयेषामधिकारोनविद्यते॥ तेषामन्यत्रचेत्पूजासामय्येवाधितिष्ठति॥ ८५॥ राज्ञेसाक्षात्धनंदातुमशक्तोमनुजाधमः॥ धनंतुप्रकृतिद्वाराप्रवेशयातिभूपतौ॥ ८६॥ साक्षान्मत्पूजनेयस्तुसमर्थस्तेनसर्वदा॥ ममैवपूजाकर्त्तव्यानान्यस्याल्पप्रयस्यसर्वथा॥ ८७॥ द्रव्यदानेसमर्थोयःसाक्षाद्राज्ञेनरस्तदा॥ राज्ञेद्रव्यंददात्येवसाक्षान्मानपुरः

त्म

च

स्त्ररं ॥ ८८ ॥ अतःसाक्षात्धनं दत्तं येन येन राज्ञे मनीषिणा ॥ तेन राजप्रसादोपि प्राप्यते सर्वसौख्य[illegible]दाः ॥ ८९ ॥ यं साक्षाद्वेत्ति राजानं
यस्तु राजप्रसादतः स राजान्यान्प्रधानांस्तु नाराधयति सर्वथा ॥ ९० ॥ एवमेव मदर्चायां अधिकारी स्वतः सन्तु ॥ मदन्यं नार्चयत्येव मत्स्व
रूपविदं तरा ॥ ९१ ॥ किमन्याराधनेनापि मदन्यः फलदस्तु न ॥ ततोहमेक एवार्यैः पूजनीयः प्रयत्नतः ॥ ९२ ॥ शिवान्य फलदोस्तीति प्रव
दंत्यशिवास्ततः ॥ तादृशानशिवान्स्पृष्ट्वा सचेलं स्नानमाचरेत् ॥ ९३ ॥ मदन्यः कर्मफलदः कथं भवतुमर्हति ॥ मत्स्वेर्या मदधीनास्ते विष्णवाद्याः
फलदास्तु नः ॥ ९४ ॥ पुरा तु विष्णुमुद्दिश्य तपस्तेपे जलाकरः ॥ विष्णुपूजापरो नित्यं शालग्रामशिलास्थले ॥ ९५ ॥ तद्घोरतपसा क्षुब्धं स
र्वं च पृथिवीतलं ॥ फणिदिक्करिमुख्याश्च क्षुब्धास्सर्वेप्यहर्निशं ॥ ९६ ॥ देवाश्चेंद्रादयः सर्वे क्षुब्धं दृष्ट्वा महीतलं ॥ क्षुब्धा बभूवुः क
र्तव्याकर्तव्यं ज्ञानविक्लवाः ॥ ९७ ॥ ततश्चेंद्रादयो देवा ब्रह्माणं शरणं गताः ॥ परिम्लानमुखाः सर्वे कृतांजलिपुटाः शिवे ॥ ९८ ॥
देवान्दृष्ट्वा स देवेशे देवेंद्रप्रमुखान् चतुराननः ॥ जगाद वचनं चारु सुरदुःखविनाशकं ॥ ९९ ॥ ॥ ब्रह्मोवाच ॥ ॥ किं भो देवा भयग्र
स्ताः किं वा तद्भय कारणं ॥ किमिदृशं भयं येन बहुदुःखमवाप्यते ॥ १०० ॥ कुर्वंतु देवदेवस्य महादेवस्य शूलिनः ॥ स्मरणं पूजनं
भक्त्या भयं संहर्तुरादरात् ॥ १ ॥ शंकरार्चनशीलानां शिवैकरतचेतसां ॥ भयलेशोपि नास्त्येव क्क महद्भयमुच्यतां ॥ २ ॥ गौरी
कांतो यदा चित्ते संचरत्यमरोत्तमः ॥ तदा भयानि यांत्येव दूरतः शिवशासनात् ॥ ३ ॥ लाभः प्रतिपदं तेषां तेषां प्रतिपदं जयः ॥ येषां चेत
सि कुंदेंदुधवलः पार्वतीपतिः ॥ ४ ॥ संपदोनुदिनं तेषां तेषां कल्याणमन्वहं ॥ एषां चेतसि कुं० ॥ तेषां पुत्राश्च पौत्राश्च वेदशास्त्रविशा
रदाः ॥ येषां चे० ॥ तेषामारोग्यमैश्वर्यं तेषामौदार्यमुत्कटं ॥ येषां चेतसि० ॥ ७ ॥ तेषां भाग्यानि पुण्यानि तेषामानंदमन्वहः ॥ येषां चेत० ॥
तेषां द्वारि मदोन्मत्ता मात्तंगोत्तमकोटयः ॥ येषां चे० ॥ ९ ॥ तेषां गृहे घटोधाढ्याः गावः क्षीरामृताशयाः ॥ येषां चे० ॥ १० ॥ तेषां कर
स्थितो स्वर्गो नानायज्ञफलप्रदः ॥ येषां चेत० ॥ ११ ॥ तेषां करास्थितो मोक्षः पुनरावृत्तिवर्जितः ॥ येषां चे० ॥ १२ ॥ भाग्यं शंकरभक्तानां
अमेयममलं ध्रुवं ॥ येषां वयममींद्राद्याः सेवका नात्र संशयः ॥ १३ ॥ धन्याः शंकरपादाब्जध्यानमात्रपरा नराः ॥ येषां चे० ॥ १४ ॥ धन्या
स्ते शिवलिंगार्च्यासक्तांतःकरणा नराः ॥ येषां चे० ॥ १५ ॥ धन्यास्ते शिवपूजार्थमुपात्तद्रविणा नराः ॥ येषां चेतसि० ॥ १६ ॥ धन्यास्ते
मंत्रपूताघभस्मफाला नरोत्तमाः ॥ येषां चे० ॥ १७ ॥ धन्यास्ते कंठसंसक्तरुद्राक्षभरणा नराः ॥ येषां चे० ॥ १८ ॥ धन्यास्ते शिवनामैक

जीवनाः शिवपूजकाः ॥ येषांचे० ॥ २० ॥ धन्यास्तेशिवनामांकाशिवैककुलदेवताः ॥ येषांचे० ॥ २१ ॥ धन्यास्तेशिवनामांकगायनासक्त
चेतसः ॥ येषांचे० ॥ २२ ॥ धन्यास्तेशिवपूजार्थंनित्यमुद्युक्तमानसः ॥ येषांचे० ॥ २३ ॥ धन्यास्तेशिवभक्तार्थंदत्तवित्तानरोत्तमाः ॥ ये
षांचे० ॥ २४ ॥ नभयंशिवभक्तानांअभयप्रदमीश्वरं ॥ यतोर्चयंतिसततमप्रमत्ताःशिवार्चकाः ॥ २५ ॥ उदेतुभानुरप्येषःपश्चिमादिशि
सर्वदा ॥ तथापिशिवभक्तानांभयलेशोपिनध्रुवं ॥ भवंतुसागराःसर्वेउद्वेलाःक्षोभहेतवः ॥ तथापि० ॥ २७ ॥ कंपमेत्वनिशंभूमिसशै
लवनकानना ॥ तथापि० ॥ २८ ॥ अमायामुदयंयातुपूर्णचंद्रोभयप्रदः ॥ २९ ॥ उदयंयांतुनक्षत्राण्यपिनित्यमहर्निशं ॥ तथा० ॥ ३० ॥ व
र्षंतुपुष्कलावर्त्ताःप्लावयंत्ववनीमिमां ॥ तथापि० ॥ ३१ ॥ उल्काःपतंतुसततमासमुद्रांतमंडले ॥ तथापि० ॥ ३२ ॥ धूसराःसंतुस
र्वास्ताःदिशःप्रतिदिशास्तथा ॥ तथा० ॥ ३३ ॥ पतंत्वशनिसंघाश्चबहवःसततंभुवि ॥ तथापि ॥ ३४ ॥ देवाःकिंबहुनोक्तेन
सर्वथाशांकरैर्जनैः ॥ पदेपदेपिकल्याणंप्राप्तव्यंनात्रसंशयः ॥ ३३ ॥ शंकरासक्तचित्तानांशंकरःकरुणाकरः ॥ ददाति
मंगलंयस्मात्मंगलापतिरीश्वरः ॥ ३४ ॥ ध्यातोददातिगौरीशःमंगलंमंगलाश्रयः ॥ मंगलापतिसंसक्तचित्तानांनास्त्यमंगलं
॥ ३५ ॥ अतएवमुनिश्रेष्ठाःशिवतत्वविशारदाः ॥ शिवमेवशिवप्राप्त्यैध्यात्वातिष्ठंत्यनाकुलाः ॥ अनेकजन्मभिर्येनतप्तंघोर
तरंतपः ॥ तेनैवशंकरेभक्तिःक्रियतेनन्यसेविना ॥ ३७ ॥ अनन्यभाकमहादेवंयोर्चयिष्यतिसर्वदा ॥ सएवधन्यःपुण्या
त्मातस्याप्राप्यंनकिंचन ॥ ३८ ॥ यजंतिशंकराद्न्यंकेचिन्मायाविमोहिताः ॥ नतेषांसुखसंपत्तिःकल्पकोटिशतैरपि
॥ ३९ ॥ अप्रमेयमनाद्यंतंनित्यंशंकरमीश्वरं ॥ अनाराध्यजडाःकेचित्अर्चयंतिह्यनीश्वरं ॥ ४० ॥ ईश्वरत्वेनविज्ञायानी
श्वरंयेभजंतिये ॥ स्वेष्टंनप्राप्नुवंत्येवकल्पकोटिशतैरपि ॥ ४१ ॥ रजतत्वेनविज्ञायारंजतेयःप्रवर्त्तते ॥ तस्यकिंशु
क्तिशकलंकंकणायोपयुज्यते ॥ ४२ ॥ ईश्वरःशिवएवेतिवदत्येवश्रुतिस्ततः ॥ सर्वभावेनसततंभजनीयोमहेश्वरः ॥
॥ ४३ ॥ महादेवंविहायान्यंसुरंयःसमुपासते ॥ समूर्खइतिविज्ञेयःसत्यंसत्यंनसंशयः ॥ ४४ ॥ यःशंकरंविहायान्यंसुरम
र्चितुमिच्छति ॥ समुखस्थंसुधांत्यक्त्वाक्षाराभःपातुमिच्छति ॥ ४५ ॥ यःशंक० ॥ सकरस्थंनिधिंत्यक्त्वाचंडालमुपसेवते ॥
॥ ४६ ॥ यःशंकरंवि० ॥ सकामदोध्रींसंत्यक्त्वाविटश्रीमनुसेवते ॥ ४७ ॥ यःशंकरं० ॥ सरत्नस्ववशंत्यक्त्वाकाचंसंप्राप्तु

मिच्छति ॥४८॥ यः शंक० ॥ सभार्यां युवतीं त्यक्त्वा गार्द्दभीमनुसेवते ॥४९॥ यः शंक० ॥ सभक्ष्यं सघृतं त्यक्त्वा लोष्टभक्षणमिच्छति ॥५०॥ यः शंकरं० ॥ सविहाय स्वर्गभोगं नरकावासमिच्छति ॥५१॥ यः शंकरं० ॥ सपायसान्नं सघृतं त्यक्त्वा विष्टां समिच्छति ॥५२॥ यः शंक० ॥ सपीतमंबरं त्यक्त्वा कंबलं प्राप्तुमिच्छति ॥५३॥ यः शंकरं० ॥ सविहायैव कस्तूरीं विष्टालेपनमिच्छति ॥ यः शंक० ॥ सरत्नमालिकां त्यक्त्वा काष्ठमालां समिच्छति ॥ ५५ ॥ यस्संविहाय गजारोहं गृध्रारोहणमिच्छति ॥५६॥ यः शंक० ॥ सविहाय धराधीशं किरातमनुसेवते ॥ ५७ ॥ यः शंक० ॥ सविहाय महाराज्यं नीचभृत्यत्वमिच्छति ॥ ५८ ॥ यः शंक० ॥ सपरित्यज्य विप्रत्वं चंडालत्वं समिच्छति ॥ ५९ ॥ ॥ यः शंक० ॥ ते सर्वे शंकरेणैव वंचिताः सत्यमुच्यते ॥ ६० ॥ यस्यास्त्यनन्यगा भक्तिर्महादेवे महेश्वरे ॥ स एव कृतकृत्यश्च स एव सुभगोत्तमः ॥ ६१ ॥ यस्यास्त्यनन्यगा भक्तिर्महादेवे सुरोत्तमे ॥ तस्य तज्जन्मविगमे मुक्तिरेव न संशयः ॥ ६२ ॥ शिवे परमकल्याणनिदाने परमेश्वरे ॥ धन्या एव हि कुर्वीत भक्तिं मुक्तिप्रदायिनीं ॥ ६३ ॥ यं यं सदाशिवो नित्यमनुगृह्णातुमिच्छति ॥ तस्यैव शंकरे भक्तिश्चानन्यगा ध्रुवं ॥ ॥ ६४ ॥ यः शंकरैकशरणो न भविष्यति सर्वथा ॥ स एव दुर्भगो भाग्यः स एवाघौघभाजनं ॥ ६५ ॥ यः शंकरार्चानियतो न भविष्यति सर्वथा ॥ स एव० ॥ ६६ ॥ यः शंकरकथालापसक्तचित्तो न सर्वथा ॥ स एव० ॥ ६७ ॥ यः शंकरं समभ्यर्च्य पूजितं नाभिनंदति ॥ स एव० ॥ ॥ ६८ ॥ यः शंकरं समालोक्य सादरं नाभिनंदति ॥ स एव० ॥ ६९ ॥ यः शंकरं समालोक्य नर्त्तनं न करिष्यति ॥ स एव० ॥७०॥ यः शंकरं समालोक्य न स्तोत्रं कर्त्तुमिच्छति ॥ स एव० ॥ ७१ ॥ यः शंकरं समालोक्य सव्यं परिवर्त्तते ॥ स एव० ॥ ७२ ॥ यः शंकरं समालोक्य तत्स्पर्शं न न करिष्यति ॥ स एव० ॥ ७३ ॥ यः शंकरं समालोक्य पूजां नैव करिष्यति ॥ स दग्धकर इत्येव ज्ञेयः पापकुलाश्रयः ॥७४॥ यः शंकरं० समालोक्य प्रणामं न करिष्यति ॥ स दग्धदेह इत्येव ज्ञेयः पापकुलाश्रयः ॥ ७५ ॥ यः शंकरं समालोक्य स्तोत्रं नैव करिष्यति ॥ स दग्धजिव्ह इत्येव ज्ञेयः पापकुलाश्रयः ॥ ७६ ॥ यः शंकरं समालोक्य नाभिनंदति सत्वरं ॥ स दग्धचित्त इत्येव ज्ञेयः पापकुलाश्रयः ॥ ७७ ॥ पूजितः प्रणतः स्पृष्टश्चिंतितः संस्तुतः शिवः ॥ ददाति सौख्यमतुलं मुक्तिमप्यमरोत्तमः ॥ ७८ ॥ स भाग्यवान्स पुण्यात्मा स धन्यो धन्यपूजितः ॥ यः शंकरार्चनध्याननतिस्तुतिरतः सदा ॥ ७९ ॥ तस्यैव जननी धन्या जन्म तस्यैव सार्थकं ॥ यस्य सांबे महादेवे संसक्तं चित्तमन्वहं ॥ ८० ॥ तस्यैव हि पिता धन्यः तस्यैव कुलमुन्नतं ॥ येन सांबो महादेवः पूज्यते सर्वदा मुदा ॥ सर्वोत्तमं महादेवं विदित्वा योर्च

यिष्यति॥ नमस्तस्मैनमस्तस्मैनमस्तस्मैनमोनमः॥८२॥ सर्वोत्तमंमहादेवंविदित्वास्तौतियःसदा॥ नमस्तस्मै०॥८३॥स
र्वोत्तमंमहादेवंविदित्वायोनुसेवते॥नम०॥८६॥ अनन्यशरणाःसंतःसक्तांतःकरणाःशिवे॥ सर्वैरपिनमस्कार्यासत्यंसत्यं
मयोच्यते॥८७॥अनन्यशरणोधन्यःशांकरोवेदशंकरं॥अतःशांकरवत्सर्वैपूजनीयःप्रयत्नतः॥८८॥ विदित्वाशंकरंधन्याः
छिन्नसंसारबंधनाः॥ प्रयांतिशांकरंरूपमतःपूज्याहितेसदा॥८९॥ अनेकजन्मभिर्येनतपस्तप्तमनेकधाः॥ सवेदशंकरंत
स्मात्सपूज्योस्माभिरन्वहं॥९०॥ यावंतःसंतिभूलोकेशांकराःशंकरार्चकाः॥ तावद्भ्योपिनमोनित्यंनमोनित्यंचमत्कृतं॥
॥९१॥ शांकरःशंकरःसाक्षात्तयोर्भेदोनवस्तुतः॥ नमस्तस्मैनमस्तस्मैनमस्तस्मैनमोनमः॥९२॥ शंकरार्चारतंशैवंदृ
ष्ट्वायोनिभिनंदतिनतस्मादधिकःपापीसत्यंसत्यंनसंशयः॥९३॥ शांकरार्चारतंशैवंयोनार्चतिसादरं॥ सयातिनरकंघो
रंयावदाचंद्रतारकं॥९४॥ शांकरार्चापरःशैवःसर्वपुण्यनिधिस्ततः॥ सपूजनीयःसर्वैश्चसत्यमेवमयोच्यते॥९५॥
शंकरःपूजितोनूनंसाक्षाच्छंकरपूजया॥ शांकरस्तोषितःसाक्षात्तोषितःशंकरोबुधैः॥९६॥ कर्मणामनसावाचाशंक
रार्चापरायणाः॥ अतीवदुर्लभालोकेभविष्यंतिनसंशयः॥९७॥ अन्यदेवपरादुष्टाःशंकरध्यानवर्जिताः॥ नष्टधर्मदु
राचाराःभविष्यंतिनसंशयः॥९८॥ सर्वदेवोत्तमंसांबंमहादेवमनामयं॥ अन्यदेवसमंज्ञात्वाविनश्यंतिकलौयुगे॥
॥९९॥ सर्वा॰राध्यंमहादेवमनाराध्यान्नभोजिनः॥ संत्यक्तशंकरध्यानाःभविष्यंतिकलौयुगे॥ अनाराध्यमहादेवंप्रा
तर्नियमपूर्वकं॥ जलपानरतामर्त्याभविष्यंतिकलौयुगे॥१॥ अनाराध्यमहादेवंप्रातर्नियमपूर्वकं॥ अन्यकर्मर
तामर्त्याभविष्यंतिकलौयुगे॥२॥ भस्मानुलेपनंकार्यइत्युक्तंश्रुतिभिर्मुहुः॥ तत्त्यक्त्वालेपयिष्यंतिमृत्कालेषुकलौ
युगे॥३॥ रुद्राक्षधारणंत्यक्त्वाबृहज्जाबालचोदितं॥ काष्ठमालालग्नकंठाभविष्यंतिकलौयुगे॥४॥ श्रीरुद्रालंकृ
तान्वेदाननधीत्यैवदुर्जनाः॥ अन्याभ्यासपरानित्यंभविष्यंतिकलौयुगे॥५॥ सर्ववेदश्रुतंपुण्यंशिवनामानिपाव
नं॥ त्यक्त्वान्यनामसंयुक्ताभवि०॥६॥ सायंशिवार्चनंत्यक्त्वादुर्वातासक्तचेतसः॥ शिवान्यार्चनंसंत्यक्त्वाभवि०॥
॥७॥ शिवमायामोहितानांअभाग्यानांदुरात्मनां॥ शिवार्चनेकलौप्रीतिःनभविष्यतिसर्वथा॥८॥ कलिंप्राप्यमहादे

वंयोर्चयिष्यतिसर्वदा ॥ नतस्मादधिकोधन्यः सत्यंसत्यंनसंशयः ॥ ९ ॥ यावत्पुण्यंकृतयुगेशिवस्याभ्यर्चनेभवेत् ॥ ततः
शतगुणंपुण्यंत्रेतायांशिवपूजने ॥ १० ॥ त्रेतायांपूजनेशंभोर्यावत्पुण्यमवाप्यते ॥ ततोयुतगुणंपुण्यंद्वापरेशिवपूजने ॥ ११ ॥ द्वापरेशि
वपूजायांयावत्पुण्यमवाप्यते ॥ ततोलक्षगुणंपुण्यंकलौशंकरपूजया ॥ १२ ॥ कलावपिमहाद्वीपेजंबुद्वीपइतिश्रुतः ॥ तत्रशंकरम-
भ्यर्च्यदुःखंनाप्नोतिमानवः ॥ १३ ॥ श्वेतद्वीपादयोद्वीपाह्येतेषुशिवपूजया ॥ यत्पुण्यंतच्छतंपुण्यंजंबुद्वीपेशिवार्चनात् ॥ १४ ॥ जंबु
द्वीपेपिसंत्येवशिवक्षेत्राणिभूरिशः ॥ तेषुशंकरमाराध्यलभ्यतेसुकृतंबहु ॥ १५ ॥ जंबुद्वीपेशिवक्षेत्रंकुंभकोणाभिदंमहत् ॥
तस्मिन्क्षेत्रेजन्ममात्राज्जन्मनप्राप्यतेपुनः ॥ १६ ॥ तत्रशंकरमभ्यर्च्ययावत्पुण्यमवाप्यते ॥ ततःशतगुणंपुण्यंशिवार्चा
यांचिदंबरे ॥ १७ ॥ चिदंबरेशिवार्चातोयावत्पुण्यमवाप्यते ॥ ततःशतगुणंपुण्यंश्रीमद्वृद्धाचलेश्वरे ॥ १८ ॥ वृद्धाचलेशिवार्चा
तोयावत्पुण्यमवाप्यते ॥ ततःशतगुणंपुण्यंशिवार्चातोनलेश्वरे ॥ १९ ॥ ततोप्यत्युत्तमंक्षेत्रमरुणाचलनामकं ॥ ततःशत
गुणंपुण्यंतत्रशंकरपूजया ॥ २० ॥ ततोप्यत्युतमंक्षेत्रंकांचीक्षेत्रंशिवात्मकं ॥ ततोयुतगुणंपुण्यंतत्रशंकरपूजया ॥ २१ ॥ त
तोदक्षिणकैलासःशिवप्रियकरोवरः ॥ ततोयुतगुणंपुण्यंतत्रशंकरपूजया ॥ २२ ॥ ततःपुण्यतमंक्षेत्रंश्रीशैलक्षेत्रमुत्तमं ॥
ततोयुतगुणंपुण्यंतत्रशंकरपूजया ॥ २३ ॥ ततश्श्रेष्ठतरंक्षेत्रंकाशीक्षेत्रमनुत्तमं ॥ ततःकोटिगुणंपुण्यंतत्रशंकरपूजया ॥ २४ ॥
॥ तत्राप्यत्युत्तमंक्षेत्रंज्ञानवापीतटंवरं ॥ तत्रकोटिगुणंपुण्यंप्राप्यंशंकरपूजया ॥ २६ ॥ तत्राप्यत्युत्तमंस्थानंमुक्तिमंटप
नामकं ॥ तत्रकोटिगुणंपुण्यंप्राप्यंशंकरपूजया ॥ २७ ॥ तत्राप्यत्युत्तमंज्ञेयंविलासस्थानमैश्वरं ॥ तत्रकोटिगुणंपुण्यंप्रा
प्यंशंकरपूजया ॥ २८ ॥ तत्राप्यत्युत्तमंस्थानंसर्ववेदस्तुतंसदा ॥ शिवागारमितिज्ञेयंतत्तुसर्वोत्तमोत्तमं ॥ २९ ॥ तत्रसां
बोमहादेवःसर्वदेवोत्तमोत्तमः ॥ सर्ववेदस्तुतोनित्यंलिंगाकारेणातिष्ठति ॥ ३० ॥ यस्यभासाविभातीदंसर्वंचसचराच
रं ॥ सएवभगवान्तत्रलिंगरूपेणातिष्ठति ॥ ३१ ॥ नयंभासयितुंशक्तःसहस्रकिरणोरविः ॥ सएवभगवान्त० ॥ ३२ ॥ नयंभा
सयितुंशक्तः चंद्रोनेककलाश्रयः ॥ सएवभग० ॥ ३३ ॥ नयंभासयितुंशक्तास्तारकास्सप्रभाअपि ॥ सएवभगवा० ॥
॥ ३४ ॥ नयंभासयितुंशक्तःसर्वधाविद्युतांगणः ॥ सएवभगवा० ॥ ३५ ॥ योनिष्कलोनिर्गुणश्चनिराकारोनिरंजनः ॥ स

२८ तत्रश्रेष्ठतमंक्षेत्रंश्रीमद्देवगृहाभिधं ॥ तत्रकोटिगुणंपु
पुण्यंप्राप्यंशंकरपूजया ॥ २५ ॥

४ यद्भीत्या पवतेवायुर्यद्भीत्येति भानुमान्।। सए०॥४५॥

एव०॥ ३६॥ यः शांतोनिष्क्रियोनित्योनिरवद्योनिरामयः॥ सएव०॥ ३७॥ यः सर्वरूपीसर्वात्मायः सर्वांतरगःसदा॥ सएवभ०॥ ३७॥ यः प्रविश्यांतरंसुसंप्रचोदयतिमानसं॥ सएव०॥ ३८॥ यः प्रविश्यांतरं वाचंप्रचोदयतिसर्वगः॥ सएव०॥ ३९॥ यः प्रविश्यांतरंचक्षुःप्रचोदयतिसर्वगः॥ सएव०॥ ४०॥ यः प्रविश्यांतरं घ्राणंप्रचोदयतिसर्वगः॥ सएव०॥ ४१॥ यः प्रविश्यांतरंश्रोत्रंप्रचोदयतिसर्वगः॥ सएव०॥ ४२॥ यः प्रविश्यांतरंप्राणंप्रचोदयतिसर्वगः॥ सएव०॥ ४३॥ यः प्रविश्यांतरंत्वचंप्रचोदयत्तिसर्वगः॥ सएव०॥ ४४॥ यद्भीत्या पवतेवन्हिरिंद्रश्चंद्रश्चसर्वदा॥ सएव०॥ ४६॥ यः सोमोजनितानित्योमतीनांसकलात्मकः॥ सएव०॥ ४७॥ यः सोमोजनिताशंभुर्दिवोपिसकलात्मकः॥ सएव०॥ ४८॥ यः सोमोजनिताशंभुः पृथिव्याःसकलात्मकः॥ सएव०॥ ४९॥ यः सोमोजनिताशंभुरग्नेश्चसकलात्मकः॥ स०॥ ॥५०॥ यः सोमोजनिताशंभुर्भानोश्चसकलात्मकः॥ सएव०॥ ५१॥ यः सोमोजनिताशंभुश्चंद्रश्चसकलात्मकः॥ सएव०॥ ५२॥ यः सोमोजनिताशंभुर्वायोश्चसकलात्मकः॥ सएव०॥ ५३॥ यः सोमोजनिताशंभुरिंद्रस्यसकलात्मकः॥ सएव०॥ ५४॥ यः सोमो जनिताशंभुर्विष्णोश्चसकलात्मकः॥ सए०॥ ५५॥ यः सोमोजनिताशंभुः ब्रह्मणोममसर्वगः॥ सएव०॥ ५६॥ यः सोमोजनितान्येषांद्विपदांच चतुष्पदां॥ सएव०॥ ५७॥ यः सोमोजनितान्येषांवृक्षादीनांचसर्वगः॥ ५८॥ यः सोमोजनितान्येषांशैलादीनांचसर्वगः॥ सएव०॥ ५९॥ यः त्वप्रसादेनवैकुंठंप्रापपूर्वंजनार्दनः॥ सएव०॥ ६०॥ यत्प्रसादेनलोकानांपालकोभूज्जनार्दनः॥ सएव०॥ ६१॥ यत्प्रसादाच्चक्रंवचक्रेपूर्वंप्रापजनार्दनः॥ सएव०॥ यत्प्रसादान्महालक्ष्मीं प्रापपूर्वंजनार्दनः॥ सएव०॥ ६३॥ यत्प्रसादेनदीनोपिभवत्येवधनेश्वरः॥

सएव०॥ ६४॥ यत्प्रसादेनमोक्षोपिसुलभस्तपसाविना॥ सएवभगवान्तत्रलिंगरूपेणतिष्ठति॥ ६५॥ नयस्मादधिकोदेवः सुरासुरनमस्कृतः॥ सएवभ०॥ ६६॥ यतोवाचोनिवर्त्तंतेअप्राप्यमनसासह॥ सएव०॥ ६७॥ यस्यस्मरणमात्रेणमुच्यतेकर्मबंधनात्॥ सएव०॥ ॥६८॥ यस्यपूजनमात्रेणत्रैलोक्यश्रीरवाप्यते॥ सएव०॥ ६९॥ यत्पूजामात्रसंसक्तोविष्णुस्त्रैलोक्यवंदितः॥ सएव०॥ ७०॥ यत्पूजयाजगत्सर्वंस्ववशीक्रियतेनरैः॥ सएव०॥ ७१॥ यत्पूजासक्तचित्तानांयमोभृत्यायतेसदा॥ सएव०॥ ७२॥ यत्पूजासक्तचित्तानांवयंसर्वेपिसेवकाः॥ सएव०॥ ७३॥ यत्पूजासक्तचित्तानांनकिंचिदपिदुर्लभं॥ सएवभ०॥ ७४॥ योविष्णुब्रह्मचंद्रेंद्रप्रभृतीनांप्रशासकः॥ सएव०॥ ७५॥ वयंवेत्रप्रहाराणांपात्रंयद्द्वारिसर्वदा॥ सएव०॥ ७६॥ अचिंत्यामेयमहिमोयस्तुदेवशिखामणिः॥ सएव०॥ ७७॥ अमितानंतविभवोयस्तु

सर्वसुराधिपः॥ सएव०॥७८॥ यः सदाविष्णुनेन्द्राब्दपूजितांघ्रिसरोरुहः॥ सएव०॥७९॥ यः प्रभुः सर्वदेवानांसर्वदेवार्चितः सदा॥ सए
वभ०॥८०॥ तल्लिंगपूजयानंतफलंसंप्राप्यतेजनैः॥ तल्लिंगपूजापुण्यस्यनेयत्तासत्यमुच्यते॥८१॥ तल्लिंगंवीक्षितंयेनस्पृष्टमभ्यर्चितं
मुदा॥ तत्पुण्यमन्यपुण्येभ्योभवत्यत्युत्तमोत्तमं॥८२॥ चतुर्दशानिभुवनान्यपिकाशीसमानिन॥ सायतःशिवरूपातस्तस्तुल्यंकिं
भविष्यति॥८३॥ यत्रकाश्यांमहादेवोजंतुमात्रस्यसादरं॥ देहांतेपरमंमंत्रंशैवंदातुंसमुद्यतः॥८४॥ तत्रकाश्यांमहादे
वोलीलारूपधरः सदा॥ उमयासहितः प्रीत्याविचरत्यंबिकापतिः॥ यत्रकाश्यांमहादेवः स्वभक्तेभ्योयथायथं॥ सददा
तिचसर्वार्थान्साकाशीभुक्तिसंमता॥८६॥ पश्यंतुपुण्यपुरुषंशिवप्रजापरायणं॥ येनमेतस्यसततं पूजनंक्रियतेमया॥८७॥ अ
यंधन्यतमोमर्त्यः काशींप्राप्यमहेश्वरं॥ पूजयित्वास्थितः प्रीत्याबिल्वपत्रादिसाधनैः॥८८॥ चैत्रशुक्लाष्टमींप्राप्यसोयमुद्धूल्यभस्म
ना॥ कृत्वाविश्वेश्वरस्यार्चांजजापायंषडक्षरं॥८९॥ अन्नपूर्णांततः सम्यक्संपूज्यतदनंतरं॥ अष्टोत्तरशतंचक्रेमौनेनायंप्रदक्षिणं॥९०॥
नमस्कारान्ततश्चक्रेशतमष्टोत्तरंमुदा॥ पुनः समर्चयामासदेवींत्रिभुवनेश्वरीं॥९१॥ ततःसायंपुनः प्रीत्याकृत्वाविश्वेश्वरार्चनं॥ अन्न
पूर्णालयेप्रीत्याचक्रेजागरणंसुराः॥९२॥ वाचयन्शंकरस्यैवकथाश्राव्यामनोहराः॥ उपवासंचकारायंनिराहारेणसादरं॥९३॥ तस्यां
रात्रौमहानासीत्संमर्दःसुरसत्तमाः॥ प्रदक्षिणनमस्काराः संमर्देपिकृतामुदा॥९४॥ आवहंतीतिमंत्रेणकृतोहोमोमुनीश्वरैः॥
क्षीरेणाज्येनमधुनासर्वसंपत्प्रवृद्धिदः॥९५॥ अनेनापिकृतोहोमः क्षीराज्यादिभिरादरात्॥ आवहंतीतिमंत्रेणसर्वसंपत्तिका-
म्यया॥९६॥ ततःप्रातःसमुत्थायविश्वेशार्चनपूर्वकं॥ अन्नपूर्णामपिप्रीत्यापूजयामासशक्तितः॥९७॥ ततोयंभोजयामासशैवान्द्रे
वसतीस्तथा॥ स्वयंचपारणंचक्रेशिवध्यानपुरःसरं॥९८॥ ईदृशोयंपुराकाश्यांस्थित्वापितदनंतरं॥ चैत्रशुक्लाष्टमींप्राप्यनार्चया-
मासशंकरं॥९९॥ भ्रमेणशांकरींदेवीमनभ्यर्च्यास्थितंशिवं॥ एनंदेशांतरंप्राप्तुमुद्युक्तंचचकारसा॥१००॥ ततःपरमयंविप्रोनर्मदां
प्राप्यनिर्मलां॥ तत्रस्नात्वाततोन्यत्रमृतः सर्पेणदंशितः॥१॥ ततोयंभूपतिर्जातः सर्वभूचक्रपालकः॥ सर्वसौभाग्यसंपन्नः पुत्रपौ
त्रसमन्वितः॥२॥ ततोमृतोयंराजेंद्रोविमानवरमाश्रितः॥ गीतस्तुतश्चगंधर्वैर्ममलोकमुपागतः॥ मयायंपूज्यतेभक्त्यामत्स
भासद्भिरप्ययं॥ संपूज्यतेसुरानित्यंसादरंभक्तिपूर्वकं॥४॥ कल्पाष्टकमुषित्वात्रततोभूत्वाबराधिपः॥ काशींप्राप्यमुदातत्र

देहत्यागंकरिष्यति ॥ ५ ॥ शिवयोः पूजनं पूर्वकृतमेतेनयत्नतः ॥ यतस्ततः पुनः काशींसंप्राप्यायं शिवाज्ञया ॥ ६ ॥ सर्वसंसार
विछित्त्यैकाश्यांमरणपूर्वकं ॥ मोक्षंमहेशकृपयाप्राप्नोत्येवनसंशयः ॥ ७ ॥ एतादृशैः द्विजवरैः पुराकाशीमुपाश्रितैः ॥ मु
क्तिः प्राप्तामहेशस्यकृपयासत्यमुच्यते ॥ ८ ॥ कलौतुमानुषंजन्मभवत्यत्यंतदुर्लभं ॥ तत्रचेन्मानुषंजन्मकर्त्तव्यंशिवपूज
नं ॥ ९ ॥ मानुष्येष्वपिचेज्जन्मब्राह्मण्यं ब्राह्मणाद्यदि ॥ तदात्ववश्यंकर्त्तव्यंश्रीशिवाभ्यर्चनंमुदा ॥ १० ॥ अत्यंतंदुर्लभंज
न्मकलौप्राप्यापिमानुषं ॥ यदिनाराधयेछंभुंसतस्यजन्मनिरर्थकं ॥ शिवैकशरणोभूत्वाकलौयदिवसेन्नरः ॥ तस्य
मोक्षोभवत्येवसत्यंसत्यंमयोच्यते ॥ १२ ॥ मोक्षोभवतिमर्त्यानांशंकरस्यैवपूजया ॥ सत्यंसत्यंपुनः सत्यमुधृत्यभुजमुच्य
ते ॥ १३ ॥ यथाविनासुवर्णेनदुर्लभेहेमकुंडले ॥ तथाविनामहादेवपूजांमोक्षोपिदुर्लभः ॥ १४ ॥ यथाविनाभोजनेनतृप्तिरत्यं
तदुर्लभः ॥ १४ ॥ यथाविनाभोजनेनतृप्तिरत्यंतदुर्लभा ॥ तथाविनामहादेवपूजांमोक्षोपिदुर्लभः ॥ १५ ॥ यथा चक्षु
र्विनाज्ञानंचाक्षुषंत्वतिदुर्लभं ॥ तथावि० ॥ १६ ॥ यथाश्रोत्रंविनाज्ञानंश्रोतुमत्यंतदुर्लभं ॥ तथावि० ॥ १७ ॥ यथाधी
र्विनाज्ञानंचाक्षुषंत्वतिदुर्लभं ॥ तथावि० ॥ १६ ॥ यथाश्रोत्रंविनाज्ञानंश्रोतुमत्यंतदुर्लभं ॥ तथावि० ॥ १७ ॥ यथाधी
रसनाभावेरसनात्वतिदुर्लभा ॥ तथा० ॥ १८ ॥ यथार्थघ्राणविरहेघ्राणधीत्वतिदुर्लभा ॥ तथावि० ॥ १९ ॥ यथा
त्वगिंद्रियाभावेत्वाचेयादुर्लभामतिः ॥ तथा० ॥ २० ॥ यथामनोविनाज्ञानंमानसंत्वतिदुर्लभं ॥ तथावि० ॥ २१ ॥
यथानुमानविरहेदुर्लभानुमितिर्मता ॥ तथा० ॥ २२ ॥ यथासुखस्यविरहेनसुखानुभवोत्तमः ॥ तथा० ॥ २३ ॥ यथा
वृष्टिंविनासस्यंनभविष्यतिसर्वथा ॥ तथा० ॥ २४ ॥ यथाविनाग्निपुंड्रेणब्राह्मण्यमतिदुर्लभं ॥ तथा० ॥ २५ ॥ शि
वपूजांविनामोक्षंयस्तुकामयतेनरः ॥ समूर्खइतिविज्ञेयः सत्यंसत्यंनसंशयः ॥ २६ ॥ मयायदिकलौजन्ममा
नुषंप्राप्यतेतदा ॥ शिवपूजांकरिष्यामिमोक्षार्थमतियत्नतः ॥ २७ ॥ क्रियतेयाधुनापूजामहादेवस्यसामया ॥ श्रु
त्युक्तेत्येवसततंक्रियतेशिवसंमता ॥ २८ ॥ देवत्वमेवदेवानांमोक्षस्यप्रतिबंधकं ॥ ततः कृतापिसापूजानाधु
नामोक्षमायिनी ॥ कदादेवत्वसंबंधनाशोस्माकंभविष्यति ॥ कदादास्यतिगौरीशोमोक्षंविश्वेशपूजया ॥ ३० ॥ पुरा

शंकरमभ्यर्च्यब्रह्मत्वं प्रार्थितंमया।। तद्दत्तंशंकरेणेदंकदैतन्मेविनश्यति।। ३१।। एवंशंकरमभ्यर्च्यविष्णुनाप्यतियत्न
तः।। विष्णुत्वंप्रार्थितंतेनतत्प्राप्तंशंकरार्चया।। ३२।। एवंशंकरमभ्यर्च्यदेवैरन्यैश्चसादरं।। महादेवप्रसादेनतत्तत्पदमुपा
र्जितं।। ३३।। इदानींमानुषंजन्मविष्णुःप्रार्थयतेस्वयं।। मयापिप्रार्थ्यतेनित्यंतत्कदावाभविष्यति।। इदानींविष्णुरनिशं
शिवपूजापरायणः।। शिवपूजांकरोत्येवमोक्षार्थमतियत्नतः।। ३५।। मयेदंपूज्यतेनित्यंशिवलिंगंप्रयत्नतः।। भवद्भिश्चमहा
देवःपूजनीयःसदासुराः।। ३६।। वसामःशंकरंनित्यंसंपूज्यात्यंतयत्नतः।। एवंसतिमहादेवःकृपांकिंनकरिष्यति।। ३७।।
कदाचिन्मानुषंजन्मप्राप्यकाशीमवाप्यच।। संपूज्यशंकरंमोक्षंप्राप्स्यामःशिवपूजया।। ३८।। स्मरध्वंदेवदेवेशंशंकरंसां
बमव्ययं।। तेनैवदुःखलेशोपिभवतांनभविष्यति।। ३९।। भवदागमनेहेतुःज्ञातएवमयाधुना।। तत्तापोभवतांदुःखं
नकरिष्यतिसर्वथा।। ४०।। यमोद्यवैष्णवंधामविष्णुःकिंवावदिष्यति।। श्रुत्वातद्वाक्यमप्यग्रेयत्नःकार्योभविष्यति।। ४१।।
।। श्रीमहादेवउवाच।। ।। इत्युक्तादेविवैकुंठंजग्मुर्ब्रह्मादयःसुराः।। मदेकसक्तचित्तास्तेस्मरंतोमामनुत्तमं।। ४२।। येनित्य
मव्याहतदत्तचित्ताःसदाशिवाराधनसक्तचित्ताः अन्याश्रयाराधनतोनिवृत्ताःसंत्येवधन्याःशिवदत्तचित्ताः।। ४३।। ।।
इतिश्रीशिवरहस्येउग्राख्येसप्तमांशेशिवगौरीसंवादेपंचदशोध्यायः।। १५।। ।। श्रीउग्रायनमः।। ।। श्रीपार्वत्युवाच।।
वैष्णवंधामसंप्राप्यकिमुक्तंब्रह्मणाविभो।। तदाजनार्दनेनापिकिमुक्तंतद्वदस्वमे।। १।। ।। श्रीमहादेवउवाच।। ।। शिवेवि
ष्णुस्तुमालोक्यब्रह्मादीनमरान्तदा।। पप्रच्छस्वागतंतेषांवर्धयन्मुदमादरात्।। २।। ।। विष्णुरुवाच।। ।। कुतःसमागतं
ब्रह्मन्निंद्राद्यैरमरैःसह।। स्वस्वाधिकारेसर्वेषामधुनाकुशलंखलु।। ३।। तावत्कुशलमस्माकंसर्वेषामितिनिश्चितं।। या
वत्सांबोमहादेवःपूज्यतेसर्वयत्नतः।। ४।। अशुभंतुतदाभावीयदानाभ्यर्च्यतेशिवः।। शिवानभ्यर्चनादेवसंप्राप्यमशु
भंध्रुवं।। ५।। शिवाराधनसंसक्तोदावानलगतोपिसन्।। दुःखंसर्वात्मनाब्रह्मन्नूनप्राप्नोतिनसंशयः।। ६।। अस्माभिः
शिवपूजायांयत्नःकार्यःपुनःपुनः।। शंकराभ्यर्चनंत्यक्त्वानस्थातव्यंकदाचन।। ७।। शंकराभ्यर्चनादेवसर्वासि
द्ध्येतिसिद्धयः।। तथाचशंकरस्यैवपूजांकुर्मोनिरंतरं।। ८।। स्मर्तव्यःशंकरोनित्यंशंकरोतीतिशंकरः।। शंनामानल्पमा

नंदं अनिर्वाच्यमनामयं ॥९॥ सततंनामजिह्वाग्रेशंकरेत्यस्तियस्यसः ॥ दुःखभाक्नभवत्येवसत्यंसत्यंनसंशयः ॥१०॥ शिवेतिनाममिमलंशिवनामोत्तमोत्तमं ॥ तदेवस्मर्यतेनित्यंतस्यदासोभवाम्यहं ॥११॥ त्रिपुंड्रधारणंकृत्वामहादेवमनुत्तमं ॥ योयातियत्रतत्रैव महादेवोधितिष्ठति ॥१२॥ महादेवमहादेवमहादेवेतिवादिनं ॥ वत्संगौरिवगौरीशोधावंतमनुधावति ॥१३॥ महादेवमहादेवमहादेवेत्ययंध्वनिः ॥ सुधियोमुक्तिकांतायाःपाणिग्रहणडिंडिमः ॥१४॥ महादेवमहादेवमहादेवेत्ययंध्वनिः ॥ अपमृत्युहरोनूनंकालमृत्योश्चनाशकः ॥१५॥ महादेवमहादेवमहादेवेत्ययंध्वनिः ॥ संसारबीजदावाग्निःसत्यंसत्यंनसंशयः ॥१६॥ महादेवमहादेवमहादेवेत्ययंध्वनिः ॥ संसारसर्पदष्टानांदिव्यौषधमनुत्तमं ॥१७॥ महादेवेतिवाग्वल्लीचतुरक्षरपल्लवा ॥ भक्तिसिक्ताभवत्येकाचतुर्वर्गफलप्रदा ॥ ॥१८॥ महादेवेतिविमलोनामकल्पतरुर्विधे ॥ यंयंकामयतेकामंतंतंकामंददातिसः ॥१९॥ महादेवमहादेवेत्यरण्येसंचरन्जनः ॥ वशीकरोतिव्याघ्रादीन्सत्यंसत्यंमयोच्यते ॥ महादेवमहादेवेत्युच्चरंल्लियतेंद्रियः ॥ मृत्युंनगणयत्येवसत्यमेवोच्यतेमया ॥२१॥ कोटयोब्रह्महत्यानामगम्यागमकोटयः ॥ सद्यःप्रलयमायांतिमहादेवेतिकीर्त्तनात् ॥२२॥ महादेवेतिनामेदंयःशृणोतिवदिष्यति ॥ नतस्यनरकावासःसत्यंसत्यंनसंशयः ॥२३॥ पुराकश्चिद्द्विजवरोमहादेवमनुस्मरन् ॥ वदन्नुच्चैर्महादेवेत्यरण्येसंचचारहि ॥२४॥ तदाकश्चिद्घोररूपोमहापर्वतसंनिभः ॥ सूच्यग्रमाल्लवदनोदीर्घपिंगशिरोरुहः ॥२५॥ ज्वलद्वह्निगणाकारोमहाविश्वासमोचकः ॥ दूराद्ददर्शतंविप्रंमहादेवेतिवादिनं ॥२६॥ तंदृष्ट्वासोपिसंतोषाद्भक्षणंप्राप्तमितिद्रुतं ॥ संतुष्टोद्यभवामीतिविप्राभ्याशमुपाययौ ॥२७॥ विप्रोपितादृशंदृष्ट्वापिशाचमतिविह्वलः ॥ कोयंभयप्रदोमह्यंइतिचिंतापरोभवन् ॥२८॥ यःकश्चनायंभवतुचिंताकाममवर्त्तते ॥ महादेवोमराधीशोरक्षांममकरिष्यति ॥२९॥ भस्मोद्धूलितसर्वांगंमहादेवेतिवादिनं ॥ स्पृष्टुंशक्तःकथंभूयात्कालमृत्युरपिस्वयं ॥३०॥ यदिवेदाःप्रमाणंस्युःतदातुभयदोप्ययं ॥ महद्यंनभयदःसत्यंशैवायत्रनसंशयः ॥३१॥ ममशंकरभक्तस्यभयंयदिभवेत्तदा ॥ कथंवेदाःप्रमाणंस्युःश्री

रुद्राक्षैरलंकृता ध्रुवं॥३२॥ इत्युक्त्वा भस्मनांगानि संस्पृश्य हितमानसः॥ शिशिवलिंगमुपस्पृश्य जगाद वचनं तदा॥३३॥ गौरीवल्लभ कामारे कालकूटविषादनः॥ मामुद्धरापदंभोधेस्त्रिपुरघ्नांतकोतकः॥३४॥ पाहि पाहि महादेव भक्त वर्गैक जीवन॥ भयं दूरीकुरुष्वाद्य किमेतदनुवर्त्तते॥३५॥ महादेवस्मृतिर्यस्य तस्य नास्ति भयं ध्रुवं॥ इति वेदा वदंत्येव न ते त्वनृतवादिनः॥३६॥ अद्यैव सत्यं द्रष्टव्यं वेदानामपि सर्वथा॥ भयं यदि भवेदद्य ते षां सत्यं कवर्त्तते॥३७॥ ॥विष्णुरुवाच॥ ॥इत्युक्त्वा पुनरुद्धूल्य भस्मनांगानि संस्पृशत्॥ बिल्वपत्रं समाघ्राय दध्यौ देवोत्तमं शिवं॥३८॥ ततो लुब्धैर्महादेवेत्यवादीन्नाम शंकरं॥ तन्नाम सर्वपापघ्नं पिशाचेन श्रुतं तदा॥३९॥ तन्नाम श्रुतिमात्रेण पिशाचोपि स्वकां तनुं॥ घोरं जहौ क्षणार्धेन बहुदुःखप्रदं सदा॥४०॥ स पिशाचतनुं त्यक्त्वा दिव्यरूपधरस्ततः॥ ननाम दंडवद्भूमौ विप्रमालोक्य सादरं॥४१॥ धन्योस्मि त्वत्प्रसादेन शैवोत्तम शिवार्चक॥ पिशाचतनुरेषाद्य त्यक्त्वा पापकुलप्रिया॥४२॥ ब्रह्मकल्पान्यतीतानि बहूनि द्विजसत्तम॥ पिशाचतनुरेषा मे न गता घोरदुःखदा॥४३॥ महादेवेति नामैतदधुना त्वन्मुखाच्छ्रुतं॥ वेदोपगीतमनिशं सर्वपापभयापहं॥४४॥ महादेवेति नामैतच्छ्रुतं सर्वार्थदायकं॥ कदापि न श्रुतं पूर्वं महाभयनिवारकं॥४५॥ ॥विप्र उवाच॥ ॥दुष्कृतं किं कृतं पूर्वं येनैतत्तनुभाग्भवान्॥ तद्वदस्वाविशेषेण लज्जां त्यक्त्वा विचार्य च॥४६॥ कः पिता तव का माता किन्नाम तव किं कुलं॥ का जातिस्तव का वृत्तिस्तत्सर्वं वद सत्वरं॥४७॥ ॥पिशाच उवाच॥ ॥पिता कुलुंजको माता सुशीला नाम कर्कशा॥ कुले तु मम सावित्रं ब्राह्मणोहं बहुश्रुतः॥४८॥ कृतमध्ययनं पूर्वं वेदानामेव सादरं॥ तथापि भस्मनानांगमिदमुद्धूलितं पुरा॥४९॥ त्रिपुंड्रं भस्मना पूतं महापातकनाशकं॥ शिरोललाटकंठोरःस्कंधादौ न कृतं मया॥५०॥ रुद्राक्षाः सर्वपापघ्नाः जाबालश्रुतिसंमताः॥ न धृत्ताः कंठकर्णादिष्वंगेष्वादरपूर्वकं॥५१॥ नित्यं त्रिसंध्यमभ्यर्च्य देवदेवोत्तमं शिवं॥ अनभ्यर्च्याशितं पूर्वमभाग्य परिपातकः॥५२॥ बिल्वपत्रैर्जलापुष्पैरच्छिद्रैः कोमलैर्नवैः॥ नाराधि गिरिजानाथः प्रत्यहं भक्तिपूर्वकं॥५३॥ संपूज्य शंकरं पुष्पैर्बिल्वपत्रैश्च कोमलैः॥ प्रदक्षिण

नमस्कारायथेष्टंनकृतामया॥ ५५॥ प्रणम्यदंडवद्भूमौउत्थायोत्थायभूरिशः॥ प्रणामानकृताः पूर्वमतिभक्तिपुरः सरं॥५६॥ नर्तनंशंकरस्याग्रेसम्यग्गात्वेदमादरात्॥ नकृतंसर्वपापघ्नं मालेस्थेन पुरामया॥५७॥ मुहुर्मुहुर्बिल्वपत्रैराराध्यपरमेश्वरं॥ दृष्ट्वासंस्पृश्यमंत्रेणनानंदमगमंपुरा॥ ५८॥ शंकरेतिमहेशेतिमहादेवेतिसादरं॥ नस्मृतंशंकरंनाममहापातकनाशकं॥५९॥ मुक्तिप्रकाशिकाकाशीसाक्षादीश्वररूपिणी॥ नदृष्टानस्तुतापूर्वंअभाग्यपरिपाकतः॥६०॥ यस्यांकाश्यांमहादेवःपार्वतीरमणःप्रभुः॥ लीलांकरोतिसाकाशीनदृष्टापापयोगतः॥ ६१॥ याकाशीसंश्रुतादृष्टास्मृताप्यघविनाशिनी॥ साकाशीनमयादृष्टाघोरदुष्कृतकर्मणा॥ ६२॥ यस्यांसंसारबीजानांविनाशोजायतेद्विज॥ साकाशीनमया०॥ ६३॥ यस्यांमृतस्यविश्वेशोमुक्तिकांतांप्रयच्छति॥ साका०॥ ६४॥ यस्यांकाश्यांमहत्तीर्थंमणिकर्णीतिसंज्ञितं॥ साका०॥ ६५॥ यस्यांकाश्यांमहत्तीर्थंज्ञानवापीतिसंज्ञितं॥ साका०॥ ६६॥ यस्यांकाश्यांमहत्स्थानंमुक्तिमंटपसंज्ञितं॥ साकाशी०॥ ६७॥ यस्यांकाश्यांमहालिंगंश्रीमद्विश्वेश्वराभिधं॥ साका०॥ ६८॥ यस्यांकाश्यामन्नपूर्णासर्वसौभाग्यदायिनी॥ सा०॥ ६९॥ यस्यांसंसारविटपोदग्धोनैवप्ररोहति॥ साका०॥ ७०॥ यस्यांमरणमात्रेण मंगलंपरमंद्विज॥ साकाशी०॥ ७१॥ यस्यांविभूतिःपरमंभूषणंपापनाशकं॥ सा०॥ ७२॥ यस्यांस्थितोनरोप्यल्पोपूज्यतेदेवतागणैः॥ साकाशी०॥ ७३॥ यस्यांस्थितौनरोप्यल्पोनेच्छतिस्वर्गजंसुखं॥ सा०॥ ७४॥ किंचपूर्वंतुसायाह्निपुत्रलालनतत्परः॥ भार्याविलोक्ययुवतींवाक्यमेतदवादिषं॥७५॥ सत्वरंत्वंकुरुशय्यांमेमहोत्साहकरांपरां॥ क्षीरमानयपानार्थंशर्कराघृतसंयुतं॥ ७६॥ इत्युक्तंजउमालोक्यसाबभाषेवचस्तदा॥ सायंकालेमहादेवंपूजयस्वेतियत्नतः॥ ७७॥ पश्यपश्यामलालोकान्लोकान्शिवपूजापरायणान॥ पूजाद्रव्यकराः सर्वेप्रयांतिशिवमंदिरं॥७८॥ इत्युक्तंतद्वचःश्रुत्वाभ्रांतासीत्यहमुच्चरं॥ तच्छ्रुतंशिवभक्तेनकेनचित्तद्वचस्तदा॥७९॥ शंकरेणतदाशप्तस्तदैवाहंद्विजोत्तम॥ तच्छापेनतनुःप्राप्तापैशाचीदुःखदायिनी॥ ८०॥ नाराधयतियःसायंदेवदेवोत्तमंशिवं॥ सपिशाचोभवत्येव उक्तंशैवेनतेनहि॥ ८१॥ तेनशापेनपैशाचीतनुःप्राप्तामयातदा॥ तेनैवात्रवनेदुःखंबहुप्राप्तंमयाद्विज॥ बहवोस्मिन्वनेसंतिपिशाचतनुभागिनः॥ अनर्चितमहादेवाःसायं

कालेयथाविधिः॥ ८३॥ अहंतुत्वत्प्रसादेनमोचितःकर्मबंधबंधनात्॥ तवशिष्योभविष्यामिपालयस्वयथोचितं॥ ८४॥ ॥
विष्णुरुवाच॥ ॥ इत्युक्त्वा प्रणतंविप्रमुत्थाप्यविनयान्वितं॥ पंचाक्षरंमहामंत्रंसस्माराघविनाशकं॥ ८५॥ ततस्तस्मै
ददौविप्रोमंत्रंशैवमनुत्तमं॥ संगृहीत्वामनुंशैवमतितुष्टोभवत्तदा॥ ८६॥ अतोब्रह्मन्महादेवः पूजनीयः प्रयत्नतः॥ स्मर्त्तव्यः
सततंश्रेष्ठः ध्यातव्यश्चयथेच्छया॥ ८७॥ महेशनामस्मरणंसंसारछेदकारणं॥ तत्किंपिशाचदेहस्यनाशकंनभविष्यति॥
॥ ८८॥ अनेकजन्मसंसारमूलोछेदकरोहरः॥ नकिमेकस्यसंसारंनाशयिष्यतिशंकरं॥ ८९॥ मयाप्राप्तोस्तिवैकुंठोयत्प्रसा
दांबुजपूजया॥ ९०॥ तमेवशंकरंसांबंभजामःशरणंसदा॥ ९०॥ शंखचक्रेमयाप्राप्तेयत्पादांबुजपूजया॥ तमेवशंक०॥ ९१॥
लक्ष्मीःप्राप्तामयापूर्वंयत्पा०॥ तमेव०॥ ९२॥ विष्णुत्वंचमयाप्राप्तंयत्पा०॥ तमेवशं०॥ ९३॥ जगत्पालकताप्राप्तायत्प०॥ तमेव
शंक०॥ ९४॥ मृत्युःस्ववशमायातियत्पा०॥ तमेवशं०॥ ९५॥ संपदःस्ववशंयांतियत्पादां०॥ तमेव०॥ ९६॥ सर्वेदेवाःवशंयांतिय
त्पा०॥ तमेवशं०॥ ९७॥ सिद्धयोष्टौवशंयांतियत्पादां०॥ तमेवशं०॥ ९८॥ स्वर्गस्स्ववशमायातियत्पा०॥ तमेवशं०॥ ९९॥
सत्यलोकोवशंयातियत्पादांबु०॥ तमेवशं०॥ १००॥ वैकुंठोयंवशंयातियत्पादां०॥ तमेवशं०॥ १॥ मोक्षस्स्ववशमायातियत्पा०
॥ तमेवशं०॥ २॥ वाजपेयादियागानांस्वर्गमात्रफलंस्मृतं॥ फलंतुमोक्षपर्यंतंशंकरस्मरणस्यतु॥ ३॥ यागाश्चसांगाःस्युर्वा
जपेयादयस्तदा॥ स्वर्गोन्यथातुनास्त्येवतादृशीनशिवस्मृतिः॥ ४॥ शिवस्मरणमात्रेणव्यंगेनाप्यघहारिणा॥ मोक्षलक्ष्मीर
यत्नेनप्राप्तव्यानात्रसंशयः॥ ५॥ शिवस्मरणसंसक्तंयस्यचित्तमहर्निशं॥ नतस्यदुर्लभंवस्तुब्रह्मन्ब्रह्मांडमंडले॥ ६॥
शिवस्मरणसंसक्तोवैकुंठमपिवस्तुतः॥ मर्त्योयंवसतिंपश्यत्यत्रनास्त्येवसंशयः॥ ७॥ शिवपूजापरोनित्यंशैवःशिवपरायणः
॥ नसत्यलोकंवैकुंठंगणयत्येवसर्वथा॥ ८॥ शिवनामसमंनामनास्तिनास्तिनसंशयः॥ सत्यंसत्यंपुनःसत्यंउद्धृत्यभुज
मुच्यते॥ ९॥ सर्ववेदश्रुतंपुण्यंसर्वाभीष्टप्रदायकं॥ अनन्यसदृशंभुत्थंशिवनामेतिनिश्चितं॥ १०॥ ब्रह्मन्सुरासुरैर्मर्त्यैर्गं
धर्वैर्यक्षपन्नगैः॥ पूजनीयःप्रयत्नेनशिवएवमहेश्वरः॥ येनसंपूज्यतेनित्यंलिंगरूपीसदाशिवः॥ सधन्यस्तत्कुलंध
न्यंधन्यंतज्जन्मसर्वथा॥ १२॥ उद्धूलनत्रिपुंड्राभ्यांअलंकृततनुःशिवं॥ योर्चयिष्यतितत्तुल्योभुविकोवाभविष्यति॥ १३॥

अनभ्यर्च्यमहादेवंयोश्नातिफलमंबुवा॥सप्राप्नोतिमुहुर्जन्मश्चुद्रचंडालयोनिषु॥१४॥स्मृतोपिमुक्तिदः सांबः शंकरः करुणाकरः॥ पूजितोबिल्वपत्राद्यैर्मुक्तिंकिंनप्रयच्छति॥१५॥अनन्यसदृशंमत्वादेवदेवोत्तमंशिवं॥योनार्चयतिपुष्पाद्यैः सशिवेनैववंचितः॥१६॥अनन्यसदृशोदेवः शिवएवमहेश्वरः॥तमन्यसदृशंमत्वानरकंयातिमानवः॥१७॥पुराकश्चिद्द्विजवरोहिमवद्देशसंस्थितः॥ददर्शान्यंद्विजंतत्रतमुवाचससादरं॥१८॥ ॥विप्रउवाच॥ ॥द्विजदेवेषुकः पूज्यः सर्वदेवोत्तमश्च कः॥यस्यपूजयामोक्षलक्ष्मीः प्राप्तव्यातद्वदस्वमे॥१९॥इत्युक्तंतद्वचः श्रुत्वाभ्रमाद्वाचमुवाचसः॥शिवोपेंद्रादयोदेवाः समाइत्येवसत्वरं॥२०॥ततस्तद्वचनंश्रुत्वाभ्रांतोयमितितंद्विजं॥भर्त्सयित्वाययौविप्रः शिवंदेवोत्तमंस्मरन्॥२१॥शिवेनसुरतुल्यत्वंयेनोक्तंभ्रांतिपूर्वकं॥तेनोग्रसर्पदष्टेनतनुस्त्यक्ताकदाचन॥२२॥ततोयमांतिकंनीतः सयाम्यैरतिदारुणैः॥यमाग्रेताडितोघोरंप्रलपन्नतिदारुणं॥२३॥ ॥यमदूतउवाच॥ ॥यमायंब्राह्मणः पूर्वंहिमवद्गिरिसंश्रयः॥सर्वदान्यसुरैः सार्धंशिवंवदतिमोहितः॥२४॥ ॥विष्णुरुवाच॥ ॥इत्युदीरितमाकर्ण्ययमदूतवचोयमः॥विवृत्यलोचनेघोरेक्रोधसंकुलितेक्षणः॥२५॥तीक्ष्णमत्यंतकुटिलंहेतिमत्यंतलोहितं॥जग्राहात्यंतसंतप्तंकंपयन्नखिलानपि॥२६॥ततस्तद्रसनामाशुचिच्छेदकुपितेक्षणः॥ततः प्रवेशयामासनरकेप्यतिदारुणे॥२७॥तस्मादनन्यसदृशंमहादेवंसुराधिपं॥योन्यतुल्यतयादेवसयातिनरकंध्रुवं॥२८॥अन्यसाधारणंमत्वादेवदेवोत्तमंशिवं॥पिशाचतनवोभूत्वावसंतिबहवोवने॥२९॥ममैवपुत्रोमद्नोदेवदेवोत्तमंशिवं॥अन्यसाधारणंमत्वादग्धएवहिसत्वरं॥३०॥यथापतंतिशलभाः पावकेनक्तमंजसा॥तथापतंतिनरकेशिवद्रोहरताजनाः॥३१॥शिवद्रोहात्परंपापंनास्तिकुत्रापिसर्वथा॥तद्द्रोहेणातिघोरेषुनरकेषुपतिष्यति॥३२॥पातकानांविचित्राणांविचित्रायातनाः स्मृताः॥विचित्रयातनाभाजोचित्राएवहिनिश्चिताः॥३३॥शिवद्रोहरतैरेताः सर्वाएवहियातनाः॥भोक्तव्यानात्रसंदेहः सत्यमेवोच्यतेमया॥३४॥अनंब्रह्महत्याभ्यः यावत्पापमवाप्यते॥तावत्पापंशिवद्रोहात्प्राप्तव्यंनात्रसंशयः॥३५॥शिवेशिवान्यतुल्यत्वधीः शिवद्रोहउच्यते॥तेनद्रोहेणनरकेतिष्ठतिसततंजनाः॥३६॥विश्वाधिकंमहारुद्रंविश्वस्येशानमव्ययं॥कोन्यतुल्यतयादेविविनाचंडालयोनिजं॥ईशानं

सर्वविद्यानांसर्वभूतेश्वरंशिवं ।।योन्यतुल्यतयावेदतन्माताव्यभिचारिणी ।। ३८ ।। सर्वाधारमनाधारं हरमाद्यंतवर्जितं ।।
योन्यतुल्यतयावेदतन्माताव्यभिचारिणी ।। ३९ ।। सर्वाधारमनाधारं हरमाद्यंतवर्जितं ।। योन्यतु० ।। ४० ।। त्रियंबकं म
हादेवंसांबमव्यक्तलक्षणं ।। योन्य० ।। ४१ ।। अनंतंशंकरंसांबंअंबिकाप्राणवल्लभं ।। योन्यतु० ।। ४२ ।। सोमंरुद्रंताम्रमेकं
अरुणंशंगमक्षरं ।। योन्यतु० ।। ४३ ।। कर्पूरगौरंविश्वेशंसर्वज्ञंमदनांतकं ।। योन्य० ।। ४४ ।। चंद्रचूडंसुराधीशमप्रमेय
मनामयं ।। योन्य० ।। ४५ ।। निष्कलंनिर्गुणंशांतंशिवमक्षरमव्ययं ।। योन्यतु० ।। ४६ ।। अष्टमूर्त्तिमहादेवंसृष्टिस्थित्यंत
कारिणं ।। योन्यतु० ।। ४७ ।। कुलौकलिहतामर्त्याः देवदेवोत्तमंशिवं ।। अन्यसाधारणंमत्वायास्यंतिनरकंध्रुवं ।। ४८ ।। ज
गतांजननीगौरीयद्देवार्धांगभागिनी ।। सदेवोन्यामरैस्तुल्योभविष्यतिकथंवद ।। ४९ ।। यस्यपुत्रोगणाध्यक्षः सर्ववि
घ्नविनाशकः ।। सदेवोन्यामरैस्तुल्योभविष्यतिकथंवद ।। ५० ।। यस्यपुत्रोमहासेनः षण्मुखोसुरशिक्षकः ।। सदेवोन्या०
।। ५१ ।। यस्यप्रसादलेशेनवैकुंठप्राप्तवानहं ।। सदेवोन्या० ।। ५२ ।। यदाज्ञावशगसर्वंजगत्स्थावरजंगमं ।। सदेवो० ।। ५३ ।।
यद्द्वारपालकानित्यमस्माकमतिशासकाः ।। सदेवो० ।। ५४ ।। पार्श्ववेत्रहाराणांयद्द्वारिवयमन्वहं ।। सदे० ।। ५५ ।। यद्भूत्ये
रूर्ध्वमप्रापिपृथिवी पृथुशक्तिभिः ।। सदेवो० ।। ५६ ।। यस्यैश्वर्याण्यनंतानियस्तुदेवशिखामणिः ।। सदेवोन्या० ।। ५७ ।।
यस्यविश्वसितंवेदाः नानाशाखाविजृंभिताः ।। सदेवोन्या० ।। ५८ ।। यल्लिंगार्चनमात्रेणत्रैलोक्यश्रीरवाप्यते ।। सदेवा० ।।
।। ५९ ।। यद्ध्यानात्प्राप्यतेमर्त्यैः मुक्तिकांतातिदुर्लभा ।। सदेवोन्या० ।। ६० ।। यतंतेयोगिनः सर्वेयमुपासितमन्वहं ।।
सदेवोन्या० ।। ६१ ।। यजंतियागैर्विविधैः यज्विनोयमनामयं ।। सदेवा० ।। ६२ ।। यस्यनज्ञायतेतत्वंअनंतैरपिसाधनैः ।।
सदेवान्या० ।। ६३ ।। यः कल्पांतेखिलानस्मान् संहृत्यैकोहितिष्ठति ।। सदेवोन्या० ।। ६४ ।। यद्वामांगादहंजातोदक्षिणांगा
द्रवान्विधे ।। ललाटात्कालरुद्राख्योसंहर्त्तासचराचरं ।। ६६ ।। त्र्यक्षनेत्रत्रयंभुत्थंसोमसूर्याग्निसंज्ञिकं ।। सदेवोन्या०
।। ६७ ।। यस्त्वप्रमेयविभवोयोनन्यशरणप्रियः ।। सदे० ।। ६८ ।। त्र्यक्षनेत्रत्रयंभुत्थंसोमसूर्याग्निसंज्ञिकं ।। सदेवोन्या

श्रीशिवर०७
११६

उ-ग्रा-स-

यः शास्तासर्वदेवानांपितामाताचरक्षकः॥ सदेवोन्या०॥६९॥ यस्तुदापयितादाताभोज्यंभोजकमेवच॥ सदे०॥७०॥ य
स्त्वप्रमेयविभवोयोनन्यशरणप्रियः॥ सदेवोन्यामरैस्तुल्योभविष्यतिकथंवद॥७१॥ यःशास्तासर्वदेवानांपितामाताचर
क्षकः॥ सदेवोन्या०॥७२॥ यःसत्यंज्ञानमानंदोविज्ञानमानंदोविज्ञानंज्ञेयमेवच॥ सदेवोन्या०॥७३॥ यःसाक्षीपरमाद्वैतंपरं
ब्रह्मपरात्परं॥ सदेवो०॥७४॥ अतःसर्वामराधीशःशंकरःकरुणाकरः॥ पूजनीयःप्रयत्नेनचतुर्वर्गफलार्थिभिः॥७५॥ शिव
स्मृतेरनायासान्मोक्षलक्ष्मीरवाप्यते॥ अतोनतंविहायान्यःस्मर्त्तव्योमुक्तिकांक्षिभिः॥७६॥ अतःकार्यंविहायान्यात्कुरुशंक
रपूजनं॥ तत्पूजयामोक्षलक्ष्मीःप्राप्तवानान्नसंशयः॥ ७७॥ तमापदोनस्पृशंतियोनित्यंशिवपूजकः॥ अतःकार्यंविहायान्य
त्कुरुशंकरपूजनं॥७८॥ तमेवभजतेलक्ष्मीर्योनित्यंशिवपूजकः॥ तमेवसर्वेसेवंते योनित्यंशिवपूजकः॥ ७९॥ सएवपु
त्रपौत्राढ्योयोनित्यंशिवपूजकः॥ ~~तमेवसर्वेसेवंते~~ अतःकार्यंविहायान्यत्कुरुशंकरपूजनं॥८०॥ सएवाश्रयतांयातियो
नित्यंशिवपूजकः॥ सएवपुण्यनिलयोयोनित्यंशिवपूजकः॥८१॥ अतःकार्यंविहायान्यत् कुरुशंकरपूजनं॥ सएवसर्व
धर्माणां आश्रयःसततंविधे॥८२॥ अतःका०॥ सएवभगवान्ब्रह्मलयोनित्यंशिवपूजकः॥८३॥ अतःकार्यं०॥ सएवलभतेमो
क्षंयोनित्यंशिवपूजकः॥८४॥ अतःका०॥ आलोड्यवेदानखिलान् सारमेतत्समुद्धृतं॥८५॥ शिवपूजनमेवेदंचतुर्व
र्गफलप्रदं॥ शिवस्याभ्यर्चनात्पुंसांकिमलभ्यंजगत्त्रये॥८६॥ यत्पूजनान्मोक्षलक्ष्मीसुलभापिसा॥ अस्माकंतुशिवादन्यो
नास्तिसंरक्षकस्ततः॥८७॥ व्रजामःशरणंसांबंशंकरंकरुणाकरं॥ शिवोस्माकंधनंदाताशिवोस्माकंप्रभुःपिता॥ ८८॥
शिवोस्माकंपरंसेव्यःसत्यंसत्यंमयोच्यते॥ स्मर्त्तव्यःपार्वतीनाथःकर्त्तव्यंशिवपूजनं॥८९॥ स्थातव्यंशंकरस्थानेमर्तव्यं
शिवसंनिधौ॥ यस्यस्वर्गापवर्गेच्छातेनपूज्यःसदाशिवः॥९०॥ स्वतंत्रःपार्वतीनाथोयतःस्वर्गापवर्गदः॥ रहस्यंशृणुवक्ष्यामिगोप
नीयंप्रयत्नतः॥९१॥ यच्छ्रुत्वासर्वपापेभ्योमुक्तोमुक्तिंचविंदति॥ पुरातुहिमवत्प्रांतेकश्चिदासीद्द्विजोत्तमः॥९२॥ लिंगपूजाप
रोनित्यंनिष्कामःशंकरप्रियः॥ ऐहिकामुष्मिकान्भोगान् अवधार्यशिवार्चकः॥९३॥ सर्वदाबिल्वपत्राद्यैरर्चयामास
शंकरं॥ उद्धूलनत्रिपुंड्राभ्यां अलंकृत्यतनुंमुदा॥९४॥ रुद्राक्षैरप्यलंकृत्यध्यात्वेशंसतुसंस्थितः॥ रुद्राक्षकर्णकणो

श्रीशिव
११६

नित्यंबहून्रुद्राक्षमालिकां॥९५॥ पंचाक्षरंपरंमंत्रंजजापायमहर्निशं॥पूजयित्वामहादेवंनृत्यत्यग्रेपिनाकिनः॥९६॥
आखेदमतियत्नेनकरताडनपूर्वकं॥ स्तौतिशंभुंकृपासिंधुंसर्वदेवशिखामणिं॥९७॥अनन्यशरणोनित्यंशिवैकशर
णोमुदा॥एवंप्रत्यहमाराध्यमाराधयतिशंकरं॥९८॥कार्यांतरंविहायैवजाड्यलेशविवर्जितः॥ जलैःशुद्धैर्महादेव
मभिषिच्यपुनःपुनः॥९९॥मुहुर्मुहुर्बिल्वपत्रैरभ्यर्चयतिशंकरं॥शिवपूजांकरोत्येषःशिवध्यानपुरःसरं॥१००॥
प्रदक्षिणप्रणामादीनपीशध्यानपूर्वकं॥शिवमभ्यर्च्यबिल्वाद्यैःशृण्वन्शिवकथांमुहुः॥विप्रस्तिष्ठत्यहोरात्रमन्यका
र्यविवर्जितः॥एतादृशंद्विजंदृष्ट्वातत्पत्नीपतिदेवता॥२॥कृतांजलिरुवाचेदंवचनंललितानना॥स्वामिन्भवद्भिरनि
शंक्रियतेशिवपूजनं॥३॥अनेनमोक्षोभवतांभविष्यत्येवसर्वथा॥सकृदप्यर्चितःशंभुर्ददातिपरमांगतिं॥४॥करु
णासागरःसांबः किंपुनर्मुहुरर्चितः॥अनन्यशरणोयस्तुनित्यंशंकरमर्चयेत्॥५॥तमभ्यायातिमुदितामुक्तिकां
ताकामकस्तुनशिवार्चनकस्ततः॥७॥शिवार्चकंविहायैयंकागमिष्यतितद्वद॥ यथाकामयतेवेश्याधनिकंधनकं
मुहुः॥८॥तथाकामयतेनित्यंमुक्तिकांताशिवार्चकं॥नशिवाराधकादन्योमुक्तिकांतामनोहरः॥९॥तथाचमुक्ति
कांतायाःपतिस्तुशिवपूजकः॥किंचान्यद्वक्तुमिछामितच्छ्रोतव्यंप्रयत्नतः॥१०॥तत्सम्यगस्त्वसम्यग्वातत्रचित्तंन
दीयतां॥ ॥विमलोवाच॥ ॥धर्मप्रजार्थमुद्वाहःकृतःसम्यग्यथाविधि॥एतावत्कालपर्यंतंप्रजामयिनदृश्यते॥
॥११॥यद्येकावाभवेत्पुत्रस्तस्मादग्रेपिसंततिः॥वृद्धिमेष्यत्यन्यथासाकथंवावृद्धिमेष्यति॥१२॥शिवभक्तःस
दाचारःसर्वदाशिवपूजकः॥यस्यवंशेनसंजातस्तत्कुलंकिंननश्यति॥१३॥इत्युक्त्वानम्रवदनाकंपमानामुहुर्मुहुः
॥तूष्णीमुवासविमलातामुवाचाथसद्द्विजः॥१४॥शृणुकौतूहलंभद्रेयदुक्तंतत्तथैवहि॥परंतुमोहमायायासावि
छिनानहित्वयि॥१५॥शिवैकशरणःपुत्रोभवेद्यदितथैवहि॥सुखंभवत्यन्यथातु॥सुखलेशोपिनध्रुवं॥
॥१६॥जातोपिपुत्रःसततंशिवैकशरणःसदा॥शिवंसंपूज्यसततंस्थास्यतीतिनिश्चयः॥१७॥पुरालक्ष्मी
रुवाचैवंविष्णुंप्रतिहरिस्ततः॥एवमेवोत्तरंदत्वापुनरन्यमुवाचच॥१८॥पुत्रस्तेभविताल्क्ष्मीःकश्चिदत्यंतसुं

हरः॥ सपुष्पबाणोभविता जगन्मोहकरः सदा ॥१९॥ कदाचित्तादृशः पुत्रोभगवत्कृपया विना॥ यदि नस्यात्तदादुःखं नकार्यं
सर्वथात्वया॥२०॥ अन्यसाधारणत्वेन यदि जानाति शंकरं॥ सतुजातो पिते पुत्रो मरिष्यति न संशयः॥२१॥ अन्यसाधारणत्वे
नमत्वादेवोत्तमं शिवं॥ कोवा जीवति कोवांते सुखं प्राप्नोति तद्वद॥२२॥ कोवा माहेश्वरीमाज्ञामन्यथा कर्तुमिच्छति॥ शिवद्वे
षरतो यस्तु स न संजीवयिष्यति॥२३॥ चंद्रेण विधिनेंद्रेण मया वा शिवदूषकः॥ न द्रष्टव्यो रक्षणं तु दूरतोपास्तमद्विजे॥
॥२४॥ कदाचिद्यदि पश्यामो वयं शंकरदूषकं॥ तदास्माकमवस्थानं न कुत्रापि भविष्यति॥२५॥ ताडयिष्यंति शूलाग्रैर
स्मान्छंकरकिंकराः॥ तेयतो निर्भया वीराः नास्मान्स्ते गणयंति हि॥२६॥ शिवभक्तिं प्रकुर्वाणैरप्यस्माभिरहर्निशं॥ कंपा
यमानैरमरैस्त्रीयते सत्यमुच्यते॥२७॥ पुरा तु शिवपूजार्थमस्माभिरमरैर्गतं॥ सायंकाले हरद्वारि प्रवेशो नाभवत्तदा॥
॥२८॥ ततोस्माभिः सुरैः सर्वैः समूहीभूय सत्वरं॥ द्वारि प्रवेष्टुमुद्युक्तमादायार्चनसाधनं॥२९॥ तदा वेत्रं समादाय कश्चि
च्छंकरकिंकरः॥ अभ्यधावति संक्रुद्धः क्रोधसंरक्तलोचनः॥३०॥ स ततो भ्रामयामास वेत्रं कांचनरंजितं॥ वेत्राग्रसंगमात्रे
ण सर्वेपि पतिता वयं॥३१॥ कः समर्थोन्यथा कर्तुं शैवाज्ञां जगतीतले॥ सुराणामपि शास्तारस्ते यतः क्रूरशासनाः॥३२॥ आदौ
सायं महादेवं पूजयत्यंबिका ततः॥ षण्मुखोभ्यर्चयत्यंबां शंकरं च सुरेश्वरं॥३३॥ ततो गणपतिः सांबं अभ्यर्चयति सादरं॥ ततोर्चयं
ति सर्वेशं नंदीशोतीव भक्तितः॥३४॥ ततोर्चयंति सर्वेशं प्रमथाः साधुसाधनाः॥ अनंताः प्रमथास्तेषां संख्या कर्तुं न शक्यते॥३५॥
ततः परं सुरैः सर्वैः अस्माभिः पूज्यते शिवः॥ ततः परं प्रयत्नेन गंधर्वैः पूज्यते शिवः॥३६॥ ततः संपूज्यते शंभुः किंनरैर्भूरिसाधनैः
॥ ततः संपूजिते शंभुः शेषाद्यैरुरगेश्वरैः॥३७॥ ततो मुनिगणैरन्यैः पूज्यते परमेश्वरः॥ ततो नरवरैरन्यैः पूज्यते सततं शिवः॥३८॥
एवमेव क्रमेणैव सायमत्वहमीश्वरः॥ सर्वैरभ्यर्च्यते सांबो देवदेवोत्तमः शिवः॥३९॥ शैववेत्रप्रहाराणां पात्रं चेदमरा वयं॥ कोन्यः
समर्थः शैवाज्ञामन्यथा कर्तुमुच्यतां॥४०॥ पुरा समागतः कश्चिदिह शंकरकिंकरः॥ समागते तदा शीघ्रं भ्रमानैवोत्थितं मया॥४१॥
तदा जहार वैकुंठं ससिंहासनसंस्थितः॥ पतितोहं महारण्ये जलान्नादिविवर्जिते॥४२॥ ततः परं निराहारं समाश्रित्य स्वकं वपुः॥ तप
श्चीर्णं मया पूर्वं शिवमुद्दिश्य सादरं॥ ततः परं मया प्राप्तो वैकुंठोयं शिवाज्ञया॥ शिवपूजाप्रभावेन लब्धोयं नान्यथा ध्रुवं॥४४॥ अत्यंतं

सावधानेनतदाप्रभृतिसर्वदा॥ शिवपूजारतेनैवस्थीयतेत्रमयाध्रुवं॥४५॥ शिवनिंदकसंगश्चेत्क्रियतेभ्रांतितोमया॥॥त
दाजीवनमेवास्यममात्यंतंहिदुर्लभं॥४६॥ इत्युवाचपुरालक्ष्मीविष्णुःशिवपरायणः॥तथाचसंततिःसुश्रुषादुर्लभास
त्यमुच्यते॥४७॥अश्रुत्यासंततिर्जाताह्यस्माकंलक्ष्ययोजिका॥सासंततिर्यतोस्माकंसुखदानभविष्यति॥४८॥शिवव्रतप
रोनित्यंसर्वदाशिवपूजकः॥ पुत्रोयस्यभवेद्भाग्यात्तस्यभाग्यंमहत्तरं॥४९॥ जातोपिपुत्रः सर्वथायोनशैवोभविष्यति॥
व्यर्थंचजीवनंतस्यशिवार्चाविमुखस्यतु॥५०॥ अशैवोयदियद्दंशेभवत्येकोपिकोमले॥सवंशःसर्वथायातिनरकंस
त्यमुच्यते॥५१॥ ॥विष्णुरुवाच॥ ॥इत्युक्त्वायामिनीमध्येभार्यासंगमकामिनीं॥संवीक्ष्यसंगमंचक्रेततोगर्भंदधा
रसा॥५२॥ ततोसूतचसापुत्रंपद्मपत्रायतेक्षणं॥ दृष्ट्वातमतिसंतुष्टाबभूवसुतवत्सला ततःपुत्रंसमुत्पन्नंश्रुत्वातज्जन
कस्तदा॥जातकर्मादिकंकर्मचकारमुदिताननः॥५४॥ ततोन्नप्राशनादीनितत्तत्कालेषुतत्पिता॥कृत्वोपनयनंचक्रेसु
मुहूर्तेयथाविधिः॥५५॥तमेवाध्यापयामाससांगान्वेदांयथाक्रमं॥शास्त्राणिधर्मशास्त्रादीन्यपिमेधाविनंसुतं॥५६॥
तादृशंतंसुतंवीक्ष्यपितरौमुदिताननौ॥पुत्रपोषणसंसक्तौस्थितावन्नादिभिःसदा॥५७॥ततःकदाचित्तंपुत्रंविलो
क्यातीवसुंदरं॥किमस्यभाग्यंभावीतिदध्यौयोगपरःपिता॥॥ततःसषोडशेवर्षेमृत्युपाशंगमिष्यति॥अल्पायुरिति
निश्चित्यक्षणदुःखवशोभवत्॥५९॥ततश्चित्तसमाधायसएवद्विजपुंगवः॥पुत्रमाहूयसंश्लिष्यबभाषेवचनंतदा
॥६०॥श्रुतिपारगपुत्राहंदर्शनात्तवसर्वदा॥तुष्टएवबसाम्यद्यसंतोषोनोपलभ्यते॥६१॥ध्यानंत्वद्विषयंपुत्रकृतमद्यम
यातत॥अल्पायुःष्ट्वंत्वयिज्ञातंपित्तदुःखप्रवर्त्तकं॥६२॥इत्युक्तंतद्वचःश्रुत्वातदातज्जननीसुतं॥समालिंग्या
तिदुःखेनरुरोदभृशमंजसा॥६३॥ततस्तांजननींदृष्ट्वाशोकार्त्तांपितरंचतं॥उवाचवचनंपुत्रःपितृसंतोषवर्धकः
॥६४॥ ॥पुत्रउवाच॥ ॥किमर्थंक्रियतेदुःखंमातर्माशुचमाशुच॥शरीरंचेदिदंगच्छेन्नमहानिर्नसर्वथा॥
॥६५॥नित्योहमजरोनंतोममनाशःकथंभवेत्॥कालत्रयेपिनाशस्तुमयिवाधितएवहि॥६६॥शरीरमेत
दनिशंस्थातव्यमितिचेन्मतिः॥जन्मस्यास्यशरीरस्यदुर्लभावस्थितिःसदा॥६७॥शरीरनाशोविज्ञातोदैवाद

घमयाधुना॥ अतःपरंसावधानंपूजयामिमहेश्वरं॥६८॥ भस्मनोद्धूल्यसर्वांगंधृत्वात्रैपुंड्रकंततः॥ रुद्राक्षधा
रणंकृत्वापूजयामिसदाशिवं॥६९॥ शिवकाशीतिसततंप्रवक्ष्येनामशंकरं॥ एतन्नामद्वयंयस्मान्मोक्षदंसर्वसिद्धि
दं॥७०॥ शिवइत्यक्षरद्वंद्वंयेनसंस्मृतमादरात्॥ तेनसर्वाणिपापानिनिर्जितान्येववस्तुतः॥७१॥ काशीतिपरमोमंत्रोग
र्भरक्षामणिस्ततः॥ सयेनजप्यतेतेनजितंलोकत्रयंध्रुवं॥७२॥ शरीरस्यावसानेस्मिन्काशीप्राप्तिर्ममाधुना॥ दुर्लभासा
यतःकाशीदेवानामपिदुर्लभा॥७३॥ यस्यांकाश्यांसुराधीशोविश्वेशोविश्ववंदितः॥ सोवसत्तिष्ठतिसाकाशीदुर्लभै
वनृणांध्रुवं॥७४॥ यस्यांकाश्यांनिविष्टेनस्वर्गभोगःतृणीकृतः॥ साकाशीमोक्षदानित्याकथंप्राप्यामयाधुना॥ य
स्यांकाश्यांतुचंडालःपूज्यतेविबुधोत्तमैः॥ साकाशीदुर्लभाजातामरणावसरेमम॥ यस्यांनकलिपापानिप्ररोहंतिक
दाचन॥ साकाशीमुक्तिदासाक्षान्मरणेदुर्लभामम॥७७॥ जननीगर्भदुःखानिकास्यांतुमरणेसति॥ नबाधंतेनबा
धंतेनबाधंतेनसंशयः॥७८॥ संसारबीजनाशस्तुकाश्यामेवप्रजायते॥ स्वबीजनाशोनान्यत्रसत्यंसत्यंनसंश
यः॥७९॥ ममजन्मान्यतीतानिकोटिशोदुष्टयोनिषु॥ तेषुदुःखानिभुक्तानिकोटिशोहंमुहुर्मुहुः॥८०॥ मातृग
र्भमलाक्रांतेमूत्रशोणितसंकुले॥ महद्दुःखंमयाभुक्तंबहुधानात्रसंशयः॥८१॥ प्रसवावसरेदुःखंयद्भुक्तंपूर्वमु
त्कटं॥ तादृशंदुःखमन्येनभोक्तुमेवनशक्यते॥८२॥ नरकेषुविचित्रेषुसंस्थितिश्चाभवन्मम॥ तेषुदुःखानिभुक्तानि
बहुधालमतःपरं॥८३॥ यतोनाराधितःशंभुःपूर्वमादरपूर्वकं॥ अतोदुःखानिबहुधाप्राप्तान्येवमयापुरा॥८४॥ विज्ञा
ततनुनाशोहंभस्मोद्धूलनपूर्वकंपूजयित्वामहादेवंशिवनामवदाम्यहं॥८५॥ ममास्यतुशरीरस्यनापेक्षावर्त्ततेध्रुवं॥
स्नेहपाशेनभवतांशरीरेप्रीतिरस्तिमे॥८६॥ कियत्कालमवस्थानंशरीरस्यास्यरोचते॥ नवतन्मेवदस्वाद्यतत्करिष्ये
नसंशयः॥८७॥ इत्युक्तंतद्वचःश्रुत्वाजननीनिजगादसा॥ समालिंग्याश्रुपूर्णाक्षीपुत्रंवीक्ष्यातिसुंदरं॥८८॥ आब्रह्म
कल्पंपुत्रेदंशरीरंतवतिष्ठतु॥ तावताममसंप्रीतिरन्यथादुःखमेवमे॥८९॥ इत्युदीरितमाकर्ण्यमातुस्तद्वचनंसुतः॥
भविष्यतितथैवेतिजगादवचनंमुदा॥९०॥ शरीररक्षणोपायंतिष्ठत्येकोमहान्मम॥ तेनोपायेनमेमातःस्थास्यत्ये

षातनुः सदा ॥ ९१ ॥ शिवपूजैव सर्वेषां च चतुर्वर्गफलप्रदा ॥ ततः सा किमम्मुं देहं सम्यग्रक्षितुमक्षमा ॥ ९२ ॥ शिवपूजैव सर्वेषां सर्वा
भीष्टप्रदायिनी ॥ ततः शिवार्चनं नित्यं करिष्यामीष्टसिद्धये ॥ ९३ ॥ ब्रह्मत्वं ब्रह्मणे दत्तं शिवेन शिवपूजया ॥ तादृशः किं महादेवः
शरीरं मे न रक्षति ॥ ९४ ॥ विष्णुत्वं विष्णवे दत्तं शिवेन शिवपूजया ॥ तादृशः कि० ॥ ९५ ॥ इंद्रत्वं दत्तमिंद्राय शिवेन शिवपूजया ॥ ता
दृशः किं मह० ॥ ९६ ॥ इत्युक्त्वा पितरं नत्वा बभाषे वचनं तदा ॥ मृत्युंजयमनुं मह्यमंजसोपदिशेति सः ॥ ९७ ॥ ततस्तमास्तिकं दृ
ष्ट्वा शंकरार्चनतत्परं ॥ आनंदपरिपूर्णोऽभूदाश्लिष्य सुतमादरात् ॥ ९८ ॥ ततस्तं भस्मरुद्राक्षालंकृतांगमकल्मषं ॥ पुत्रं स्वां
के सन्निवेश्य मनुं त्र्यंबकं ददौ ॥ ९९ ॥ ततः संतुष्टहृदयः प्राप्य त्र्यंबकं मनुं ॥ संपूज्य पितरं सम्यङ्मेधावी निर्ययौ गृहात् ॥
ततस्तं निर्गतं दृष्ट्वा पुत्रं तज्जननी तदा ॥ हा पुत्र पुत्र पुत्रेति तेनैव सह निर्ययौ ॥ १ ॥ ततः स गत्वा मेधावी सरः तीरमनुत्त
मं ॥ स्नानं चक्रे विधानेन मनुं त्र्यंबकं स्मरन् ॥ २ ॥ स्नात्वा वासः समादाय प्रोक्षितं भस्मवारिणा ॥ उद्धूलनं चकारा

त्रि दौ मंत्रपूतेन भस्मना ॥ ३ ॥ त्रिपुंड्रालंकृतं चक्रे ललाटं सितभस्मना ॥ त्र्यायुषेति वेदोक्तं स्मरन्मंत्रं शिवात्मकं ॥
॥ ४ ॥ आदौ भूर्ध्नि विधायैव त्रिपुंड्रं सितभस्मना ॥ त्रिपुंड्रधारणं चक्रे ललाटे तदनंतरं ॥ ५ ॥ ततोंगेष्वपि सर्वेषु त्रिपुं
ड्रं विधिपूर्वकं ॥ जाबालोक्तेन मार्गेण चकार सितभस्मना ॥ ६ ॥ ततः परं यथायोग्यं रुद्राक्षालंकृतः शुचिः संध्यां समाप्य
तदनु नत्वा मातरमादरात् ॥ ७ ॥ संपाद्य बिल्वपत्राणि पुष्पाणि विविधानि च ॥ विधाय मृन्मयं लिंगं पूजयामास शंकरं
॥ ८ ॥ एवं दिनाष्टकं तस्थौ संपूज्य परमेश्वरं ॥ प्राप्तेऽह्नि नवमे प्रातः पुनः पूजापरोऽभवत् ॥ ९ ॥ आदाय जलपुष्पादिन्यने
कानि शिवार्चकः ॥ संकल्पपूर्वकं शंभोश्चक्रे रुद्राभिषेचनं ॥ १० ॥ तदैव मृत्युर्विविधैर्दूतैरुग्रैः समावृतः ॥ समाययावतिक्रु
द्धो विमृशंतमितस्ततः ॥ ११ ॥ तदा तमागतं वीक्ष्य पुत्रं संवीक्ष्य बालकं ॥ उवाच वचनं भीत्या तन्माता स्वसुतं प्रति ॥ १२ ॥ ॥
मेधाविजननी विमलोवाच ॥ ॥ पुत्र कोयमिहायाति पश्य पश्याति भीषणं ॥ प्रायशो मृत्युरेवायं भविष्यति न संशयः ॥ १३ ॥
विशीर्णं जायते नूनमिदानीं हृदयं मम ॥ नानुभूतं मया पूर्वं भयमेतादृशं ध्रुवं ॥ १४ ॥ इत्युक्तं तद्वचः श्रुत्वा पूजयन् शंकरं मुदा
॥ मौनी धैर्यवहेत्येनां ज्ञापयामास संज्ञया ॥ १५ ॥ ततो यथाक्रमं पूजां कृत्वा देवस्य शूलिनः ॥ त्र्यंबकं महामंत्रं जजाप स्थि

रमानसः॥१६॥ततस्तोत्रंचकारेदंमहामृत्युविनाशकं॥अंजलिंमूर्ध्निविन्यस्यध्यायन्नेवत्रिशूलिनं॥१७॥ ॥मेधावीउवाच॥
ॐनमःशंभवेनित्यंमृत्युंजयनमोस्तुते॥ॐनमःपार्वतीनाथशरणागतवत्सल॥१८॥ॐनमोविश्वरूपायॐनमोनंतमूर्त्तये॥
ॐनमोरूपहीनायनानारूपायतेनमः॥१९॥ॐनमोनिष्कलेशायॐनमोनिर्गुणायते॥ॐनमोनिर्विकारायशांताका
रायतेनमः॥२०॥ॐनमोनिष्प्रपंचायनमःश्रुत्यात्मकायते॥ॐनमःकालरूपायकालातीतायतेनमः॥२१॥ॐनमःश्री
महेशायसर्वाधारायतेनमः॥ॐनमःपुण्यरूपायपुण्यातीतायतेनमः॥२२॥ॐनमोभूःस्वरूपायॐनमोजलमूर्त्तये॥
ॐनमोग्निस्वरूपायॐनमोवायुमूर्त्तये॥२३॥ॐनमोकाशस्वरूपायदिक्स्वरूपायतेनमः॥ॐनमःकालरूपायय
ज्वरूपायतेनमः॥२४॥ॐनमोभानुरूपायचंद्ररूपायतेनमः॥ॐनमःसर्वरूपायशरण्यायनमोनमः॥२५॥नमस्ते
रुद्रमन्यवउतोतइषवेनमः॥इत्यादिर्बीजंभेदधामीतिपर्यंतंनमर्कपठित्वास्तोत्रं॥ ॥प्रणतोस्मिमहादेवप्रपन्नोस्मिस
दाशिव॥निवारयमहामृत्युंमृत्युंजयनमोस्तुते॥२७॥गौरीपतेविरूपाक्षशरणागतवत्सल॥निवारयमहामृत्युंमृत्युंजय
नमोस्तुते॥२८॥कालकूटधरश्रीमन्कालकालकृपानिधे॥निवारयमहामृत्युंमृत्युंजयनमोस्तुते॥२९॥चंद्रशेखरविश्वा
त्मन्करुणाकरशंकर॥निवारयमहा०॥३०॥ऋग्यजुःसामरूपेशत्रिलोचनसुरोत्तम॥निवारय०॥३१॥अनंतामेयक
ल्याणकल्याणगुणसंश्रय॥निवारय०॥३२॥सुरेश्वरसुराराध्यदग्धत्रिपुरकानन॥निवारय०॥३३॥त्रिशूलपाणेपापारि
न्कल्पक्षयकरानघ॥निवारय०॥३४॥पाशांकुशधरश्रीमन्नमोडमरुभूषण॥निवार०॥३५॥भस्मोद्धूलितसर्वांग
हरनिर्धूतकल्मष॥निवार०॥३६॥प्रदर्शयमहाशूलंकल्पक्षयकरंहर॥निवारय०॥३७॥भुजंगभूषणश्रीमन्वृषभ
ध्वजविश्वग॥निवारय०॥३८॥इतिस्तुत्वापुष्पांजलिंततः॥प्रणम्यबहुधाप्रीत्याननर्त्तास्वेदमादरात्॥३९॥पुनःसं
पूज्यविश्वेशंबिल्वपत्रैर्मनोहरैः॥पुनर्मृत्युहरंमंत्रंजजापद्विजपुंगवः॥४०॥तदानींद्विजमालोक्यशिवपूजापरा
यणं॥चित्रगुप्तंविलोक्येदंमृत्युर्वचनमब्रवीत्॥४१॥ ॥मृत्युरुवाच॥ ॥एनमल्पायुषंविप्रमहंनेतुमुपागतः॥
पाशप्रहरणेशक्तिःकुंठितैवममाधुना॥४२॥अंतःपरंकर्पंनेयोमृत्युकालोमयास्यहि॥धैर्येणशिवलिंगाग्रेकथं
तिष्ठतिपश्यतं॥४३॥एनमुद्दिश्यबहुधाव्याधयःप्रेरितापुरा॥तेपिनैनंस्पृशंत्येवबहुदुःखप्रदाअपि॥४४॥

मयाद्ययेनवेगेननतुमेनंसमागतं॥तेनवेगेनकार्यंतुदृश्यतेनाद्यसर्वथा॥४५॥धृत्वासमानयिष्यामियद्यग्रेगम्यतेमया॥
परंतुगतिरेवात्रकुंठितामम सर्वथा॥४६॥अव्याहतं तुगमनंममपूर्वमभूत्सदा॥अद्यैवकुंठितंजातंगमनंद्विजबालके॥४७॥
नायंजीवनकालोयमित्यहं॥समागतोस्मिमरणंकथमस्यनजायते॥४८॥मयातुतादृशानीतायादृशाःसुरवंदिताः॥क
थंमेकुंठिताशक्तिरेतस्मिंद्विजबालके॥४९॥इंद्रःपुलोमयानीतःपूर्वमत्यंतलीलया॥ब्रह्मपुत्राश्चबहवोनीताएवमुहुर्मुहुः
॥५०॥विष्णुपुत्रोपिमदनोलक्ष्मीप्रियविवर्धनः॥अत्यंतबलवान्नीतःक्षणेनैवहिलीलया॥५१॥एतादृशास्यशक्तिर्मेकथमत्यंतं
कुंठिताः॥किंकर्त्तव्यमयेदानींकर्त्तव्यंनोपलभ्यते॥५२॥कथमेतादृशःकालोममेदानींसमागतः॥अयमल्पायुरत्यल्पोमयाने
तुंनशक्यते॥५३॥अधिकारःशिवेनाद्यममदूरीकृतोथवा॥यदिदूरीकृतोन्योपिमृत्युर्नैवात्रदृश्यते॥५४॥इत्युक्तंतद्वचःश्रुत्वाचि
त्रगुप्तोमहामतिः॥वचोमृत्युमुवाचेदमतिविस्मयकारणं॥५५॥ ॥चित्रगुप्तउवाच॥ ॥महामृत्युहरंमंत्रंजपत्ययमिहार्भ
कः॥संपूज्यशांकरंलिंगंबिल्वपत्रादिभिर्मुदा॥५६॥स्वर्गापवर्गदातारंशंकरंयोर्चयिष्यति॥सनमृत्युवशंयातिसत्यंसत्यंन
संशयः॥५७॥अभीप्सितार्थदंनित्यंमहेशंयोर्चयिष्यति॥सनमृत्युवशंयातिसत्यंसत्यंनसंशयः॥५८॥अनन्यशरणोनि
त्यंयोर्चयिष्यतिशंकरं॥सनमृत्यु०॥५९॥मृत्युंजयंमहारुद्रंयोर्चयिष्यतिशंकरं॥सनमृत्युव०॥६०॥सर्वदेवोत्तमंसांबंयोर्चयि
ष्यति॥सनमृ०॥६३॥मृत्युंजयंसमभ्यर्च्यबिल्वपत्रादिसाधनैः॥कालमृत्युंतरत्येवकिमुतर्ह्यपमृत्यवः॥६४॥यत्पूजयामहावि
ष्णुःविष्णुत्वंप्राप दुर्लभं॥यत्पूजयापुराब्रह्माब्रह्मत्वंप्राप दुर्लभं॥६५॥तदर्चनपरःकोपिनमृत्युवशमेष्यति॥यत्पूजयापुरा
देवाःसर्वेदेवत्वमाययुः॥६६॥यत्पूजयापरोमोक्षोप्ययत्नेनैवलभ्यते॥तदर्चनपर०॥६७॥यस्यस्मरणमात्रेणविनश्यंत्या
पदःक्षणात्॥तदर्च०॥६८॥यत्प्रभावंनजानंतिवेदाअपिसहस्रशः॥तदर्च०॥६९॥यःसच्चिदानंदघनःसर्वज्ञश्चिन्मयः
प्रभुः॥तदर्चन०॥७०॥यःसर्वात्मासर्वरूपःसाक्षीसर्वत्रकर्मणां॥तदर्चन०॥७१॥यःकालकालःकालात्माकालरू
पीसदाशिवः॥तदर्च०॥७१॥यःत्रिनेत्रोविश्वकर्त्ताविश्वाशापरिपूरकः॥तदर्च०॥७२॥यमर्चयंतियोगींद्राः
सर्वदासांबमीश्वरं॥तदर्चन०॥७३॥सएवसुखमाप्नोतिसएवाऽखिलसंपदः॥यस्यनित्यंमहादेवेभक्तिरव्य

द्यैवं

भिचारिणी ॥ तस्यैवजन्मसफलंजीवितंचसुजीवितं । यस्यनित्यं० ॥ ७५ ॥ तस्यैवजननीधन्यातस्यैवकुलमुत्तमं ॥ यस्य
नि० ॥ ७६ ॥ तस्यैवजनकोधन्यः धन्यास्तस्यपितामहाः ॥ यस्यनित्यंमहादेवेभक्तिरव्यभिचारिणी ॥ ७७ ॥ तस्यैवारोग्यमनिशंआ
युर्वृद्धिःक्षणेक्षणे ॥ यस्यनित्यंमहादे० ॥ ७८ ॥ तस्यैवभाग्यमुत्कृष्टंतस्यैवसकलोत्सवाः ॥ यस्यनि० ॥ ७९ ॥ तस्यैवविमलं
ज्ञानंतस्यैवविमलंमनः ॥ यस्य० ॥ ८० ॥ तस्यैवविमलंशीलंतस्यैवविमलंयशः ॥ यस्यनि० ॥ ८१ ॥ अत्यास्तिकोबालकोपिमृत्यु
जयमनामयं ॥ जपत्ययंमहामंत्रंपूजयित्वासदाशिवं ॥ ८२ ॥ मृत्युंजयेनमंत्रेणमृन्मयंलिंगमुत्तमं ॥ सम्यकबिल्वतरोर्मूलेपू
जयत्यविलोकय ॥ ८३ ॥ यस्तुबिल्वतरोर्मूलेशुद्धोमृत्युंजयंजपेत् ॥ तस्यमृत्युभयंनास्तिसत्यंसत्यंमयोच्यते ॥ ८४ ॥ बि
ल्वमूलेमहादेवंलिंगरूपिणमास्तिकः ॥ पूजत्यतियत्नेनमृत्युपाशविमुक्तये ॥ ८५ ॥ सिध्यंतिसंपदःस्तस्यबिल्वमूलेशिवार्चना
त् ॥ यस्यास्त्यनन्यगाभक्तिः महादेवेसुरोत्तमे ॥ ८६ ॥ क्षरितारव्येनरुद्रेणशिवैकशरणोयदि ॥ पूजयिष्यतिगौरीशंसमोक्ष
मधिगच्छति ॥ ८७ ॥ बिल्वमूलेबिल्वपत्रैःक्षीराद्भुष्टैरखंडितैः ॥ हुलाशैवेनमनुनालभ्यतेसंपदोखिलाः ॥ ८९ ॥ पूतोबिल्वतरोर्मूले
शैवंयदिमनुंजपेत ॥ तदासद्गुरुसंदिष्टोमंत्रःसिद्धिंप्रयच्छति ॥ ९० ॥ एतस्यहिपिताशुद्धोमहाशैवोत्तमोयतः ॥ ततस्त
दुपदिष्टोस्यमंत्रःसफलितोध्रुवं ॥ ९१ ॥ ज्वलज्ज्वलनसंकाशंपश्यशैवोत्तमार्भकं ॥ उद्धूलनत्रिपुंड्राभ्यांरुद्राक्षैरपिभूषि
तं ॥ ९२ ॥ रुद्राक्षकंकणःसांबलिंगरूपिणमद्वयं ॥ अभ्यर्च्चयतिपश्यामुंबिल्वपत्रैरखंडितैः ॥ ९३ ॥ आब्रह्मकल्पमेतस्यम
रणंनभविष्यति ॥ सिद्धमृत्युंजयमनोरस्यस्यान्मरणंकथं ॥ ९४ ॥ यस्यमृत्युंजयोदेवोयस्यमृत्युंजयोमनुः ॥ तस्यदूरतरोमृत्युःव्याधयः
किमुतापरे ॥ ९५ ॥ मृत्युंजयतियोदेवःसतुमृत्युंजयस्मृतः ॥ सतुशंकरएवान्यःस्तादृशोनास्तिसर्वथा ॥ ९६ ॥ येतुमृत्युंजयंनित्यंपूज
यंतिप्रयत्नतः ॥ तेषांस्वप्नेपिमरणंनभविष्यतिसर्वथा ॥ ९७ ॥ अयंशिवैकशरणःश्रीमृत्युंजयजापकः ॥ कथंमृत्युवशंगच्छेन्मृत्यु
धिक्करणक्षमः ॥ ९८ ॥ बालोपिबलवानेषोयतोमृत्युंजयार्चकः ॥ अतोधिक्करणंतस्यकर्त्तुमत्रनशक्यते ॥ ९९ ॥ सकिंशासयितुंशक्यो
मृत्युंजयपरायणः ॥ यंमृत्युंजयमाश्रित्यस्थितोन्यैःपूज्यतेसदा ॥ १०० ॥ सकिंस्पृष्टुंत्वयाशक्योमृत्युंजयवशंगतः ॥ सर्वथानवशंयास्य
त्ययंतवतथासति ॥ १ ॥ आयाहियामोनिलयंयामेनात्रप्रयोजनं ॥ ॥ विष्णुरुवाच ॥ ॥ इत्युदीरितमाकर्ण्यमृत्युःतद्वचनंतदा ॥ २ ॥

सत्यमुक्तमितिज्ञात्वाखिन्नः स्वनिलयंययौ॥ ततस्तज्जननीमृत्युंपरावृत्तंविलोक्यसा॥ ३॥ आनंदंपरमंप्रापविलोक्यचतमर्भकं॥ ततः
साहर्षसंपन्नाआनंदाश्रूण्यमुंचत॥ ४॥ मृतएवायमधुनापुनर्जीवितवानिति॥ तदापुत्रोपिसंतुष्टोबिल्वपत्रैर्महेश्वरं॥ ५॥ संपूज्यसपु
नस्तोत्रंचकाराघविनाशकं॥ ॥ मेधावीउवाच॥ ॥ जयविश्वोत्तमश्रीमन्जयभक्तजनप्रिय॥ जयमृत्युंजयानंतजयमृत्युहराव्यय॥ ६॥
जयगौरीपतेब्रह्मन्जयशंकरशाश्वत॥ जयविश्वैकवंद्यांघ्रेजयविष्णुवरप्रद॥ ७॥ जयमन्मथकालाग्नेजयकालहरानघ॥ जयपिंगजटा
जूटजयभस्मविभूषण॥ ८॥ जयत्रिलोचनामेयजयशूलवरप्रिय॥ जयकल्याणविजयजयकल्याणदायक॥ ९॥ जयशैवजनाधारजय
शैवजनप्रिय॥ जयशैवोत्तमाराध्यजयपंचमुखानघ॥ १०॥ जयनिष्कलकामारेजयनिर्मलनिर्गुण॥ जयशांतमहादेवजयशंकरशा
श्वत॥ ११॥ जयभस्मोद्धूलितांगजयरुद्राक्षभूषण॥ जयशंभोसुराधीशजयसर्वामरार्चित॥ १२॥ जयभानुगणाकारजयचंद्रकलाधर
॥ जयानेकगुणाकारजयनेकगुणाश्रय॥ १३॥ जयपुंण्यैकनिलयजयलिंगार्चनप्रिय॥ १४॥ जययज्ञफलाकारजययज्ञफलप्रद॥
जयश्रीमंगलाकारजयश्रीमंगलप्रद॥ १५॥ जयोग्रजयपापारेजयभूतेश्वरप्रभो॥ जयभीमभवावेद्यभववैद्याभयप्रद॥ १६॥ जयश्री
कंठसर्वज्ञजयसर्पविभूषण॥ जयमंडितसर्वांगजयभक्तार्त्तिभंजन॥ १७॥ जयभर्गमहेशायजयसर्वशिवप्रिय॥ जयब्रह्मादिवंद्यां
घ्रेजयब्रह्मादिपूजित॥ १८॥ जयश्रीविष्णुनेत्राब्जपूजितांघ्रिसरोरुह॥ जयोज्वलललाटाक्षजयकारणसर्वद॥ १९॥ जयचिद्घनचिद्रू
पजयदेवशिखामणे॥ जयकर्पूरगौरांगजयशाश्वतसर्वग॥ जयसर्गकराशास्यजयस्थितिकराश्रय॥ जयमायागुणातीतब्रह्मांडक्षय
कारण॥ जयाप्रधृष्यनिर्द्वंद्वनिरंजननिरामय॥ जयाखंडउमयाकारजयश्रीचंद्रशेखर॥ २०॥ जयवेदांतवेद्येशजयमंगलविग्रह॥ ज
यामितप्रभावाद्यजयाचिंत्यगुणाश्रय॥ २१॥ जयाश्रितामरतरोजयबिल्वदलार्चित॥ जयसर्वागमस्तव्यजयसर्वागमप्रिय॥ २२॥
जयरुद्रजयोमेशजयोत्कृष्टजयेश्वर॥ जयशंगजयाराध्यजयसर्वोत्तमोत्तम॥ २३॥ जयनाथैकशरणशरण्यपदपंकज॥ जयपंचाक्षरा
कारजयपंचाक्षरप्रिय॥ २४॥ जयगौरीप्रियानंतजयपूर्णमनोरथ॥ जयोंकारमयाकल्पजयसर्वात्मकप्रभो॥ २५॥ जयकुंदेंदुधवल
जयब्रह्मपितामह॥ जयषण्मुखनंदीशगणनाथादिसेवित॥ २६॥ जयचिन्मयचिन्मूर्त्तेजयानंदमनोन्मय॥ जयान्नमयनिर्द्वंद्वनिरी
हनिरुपाधिक॥ २७॥ प्रसीदप्रसीदप्रभोचंद्रमौलेप्रसीदप्रभोमन्मथारे॥ प्रसीदप्रसीदप्रभोशूलपाणेप्रसीदप्रसीदप्रभोमृत्युमृत्यो॥

॥२८॥ प्रसीद प्रसीद प्रभो नाथ बंधो प्रसीद प्रसीद प्रभो पुण्यसिंधो॥ प्रसीद प्रसीद प्रभो देव बंधो प्रसीद प्रसीद प्रभो मृत्युबधो॥२९॥ ॥वि
ष्णुरुवाच॥ ॥ इति स्तुत्वा महादेवं पुनः संपूज्य सादरं॥ प्रणम्य भक्तिभावेन ननर्त्त स्वेदमादरात्॥३०॥ ततः शिवमभिस्पृश्य समा
लिंग्य मनुं जपन्॥ मत्वा कृतार्थमात्मानं परमं पर्यपश्यत॥३१॥ ततो मध्याह्निकीं पूजां कृत्वा बिल्वदलादिभिः॥ स्तुत्वा प्रणम्य बहुधा पु
पुनः संपूज्य शंकरं॥३२॥ पूजां समाप्य पूतात्मा लिंगमादाय मृन्मयं॥ जले संक्षेपयामास सबिल्वदलमर्भकः॥३३॥ ततो मातरमालो
क्य प्रणम्य चरणौ स्पृशन्॥ मात्रा सह गृहं प्रापदुंदुभिध्वनिपूर्वकं॥३४॥ ततो ददर्श जनकं शिवपूजापरायणं॥ त्रिपुंड्रलेखाविलसत्का
लभागमकल्मषं॥३५॥ रुद्राक्षमालावलयं भस्मोद्धूलितविग्रहं॥ शिवपादांबुजध्यानसंसक्तशुचिमानसं॥३६॥ मंत्राधिराजममलं
सर्ववेदांतसंस्तुतं॥ वेदावर्तं समाराध्यं जपंतं शिवसंमतं॥३७॥ मंत्राणामाश्रयं नित्यं शिवमंत्रजपोत्सुकं॥ शिवनामामृतं भूयः पि
बंतं मुहुरादरात्॥३८॥ ततः प्रणम्य बहुधा कृतांजलिपुटोऽर्भकः॥ तादृशं पितरं दृष्ट्वा स्वं कृतार्थममन्यत॥३९॥ शैवोत्तमस्ततस्तातापि
समाप्य शिवपूजनं॥ ददर्श विनयात्लम्नं सुतं मेधाविनं तदा॥४०॥ ततस्तमंकमारोप्य शिरो जिघ्राय सादरं॥ समालिंग्याति संतुष्टो ब
भूव सुतवीक्षणात्॥४१॥ इदमुक्तं मया ब्रह्मन् कौतुकार्थमिहाधुना॥ केन वा ज्ञायते पूर्णं शिवपूजाविधेः फलं॥ समभ्यर्च्य महादेवं मान
वोपि सकृन्मुदा॥ तृणीकरोति सहसा सुरानस्मानपि ध्रुवं॥४२॥ न पश्यत्येव दुःखानि शिवपूजापरायणः॥ स्वप्नेपि सर्वथा ब्रह्मन् सत्यं
सत्यं न संशयः॥४३॥ ततो यत्नेन महता श्रीमहादेवपूजनं॥ कर्त्तव्यमन्यदेवानां त्यक्त्वा पूजनमादरात्॥४४॥ शिवपूजा कल्पवृक्षो यथा

कामान्प्रयच्छति॥ तथास्मदादिपूजा तु न भविष्यति कामदा॥ सर्वकामाश्रयो यस्मान्महादेवस्ततः शिवः॥ कामितार्थप्रदः सम्यक् भवि
ष्यत्येव पूजितः॥४६॥ यदि कामेश्वरः कामान् पूजितो न प्रयच्छति॥ तदा कामप्रदोन्यः किं भविष्यति वदस्व मे॥४७॥ अतः सर्वात्मना
सर्वं परित्यज्य प्रयत्नतः॥ पूजयध्वं महादेवं सर्वाभीष्टप्रदायकं॥४८॥ विधिं विना प्रयासेन पत्रेणाभ्यर्चितः शिवः॥ ददाति परमामृद्धिं
सकेनेह न पूज्यते॥४९॥ महेशपूजया ब्रह्मन् पापं तापश्च नश्यति॥ ततः शिवार्चनसमं पुण्यं क्वापि न विद्यते॥ यद्विना राध्यते शंभुरस्मा
भिरतियत्नतः॥ तदाधिकारादस्माकं शिवो दूरीकरिष्यति॥५१॥ देवता सार्वभौमस्तु महादेवः श्रुतिश्रुतः॥ ततो वयं तु सर्वेपि महादेव
स्य सेवकाः॥५२॥ सेवकैर्यदि सेव्यस्य पूजा न क्रियते तदा॥ सेव्यात्सुखं कथं प्राप्यमस्माभिः शिवसेवकैः॥५३॥ शिवपूजापरं ब्रह्म

नापदोनस्पृशंतिहि ॥ ततः सर्वंपरित्यज्य पूजयामः सदाशिवं ॥ ५४ ॥ शंकरंशरणं यामो भक्ताभीष्टप्रदायकं ॥ शरणंशंकरा
दन्योनास्माकं सत्यमुच्यते ॥ ५५ ॥ यः शंकरं विहायान्यंशरणं याति मोहतः ॥ सदुर्भगइतिज्ञेयो मोहमात्रविवर्जितः ॥ ५६ ॥
किमत्र बहुनोक्तेन सारमेतद्वचः शृणु ॥ भजस्वशिवमवैकं अस्माकंशरणंशिवः ॥ ५७ ॥ भवदागमनस्यापि ज्ञातमेवप्र
योजनं ॥ त्वयाकिमर्थमिंद्रस्य मोहः सननिवारितः ॥ ५८ ॥ कश्चिन्मामीश्वरंमत्वा भ्रमेणऋषिबालकः ॥ तपः करोतिमू
ढात्माशालग्रामशिलास्थले ॥ ५९ ॥ तत्रयास्याम्यहंब्रह्मन्त्वमेमायाहिसानुगः ॥ निवर्त्तनीयस्तपसोमामुद्दिश्यजटाक
रः ॥ ६० ॥ ॥ श्रीशिव उवाच ॥ ॥ इत्युक्ते द्रादिभिः साकंशालिग्रामशिलास्थलं ॥ पापविष्णुः सलक्ष्मीको गरुडाद्यै
श्चसंयुतः ॥ ददर्शसमहाविष्णुब्रह्मेंद्रादिसमन्वितं ॥ ततः प्रणम्यबहुधास्तुत्वास्तोत्रैरुपस्थितः ॥ ६२ ॥ सययाचेवरंदेवि
मोक्षंदेहीतिसादरं ॥ ततोविष्णुरुवाचेदंवचनंस्वानुसारतः ॥ ॥ विष्णुरुवाच ॥ ॥ अत्रघोरंतपस्तप्तंमामुद्दिश्यज
टाकर ॥ मोक्षदानेनशक्तोहंसत्यंसत्यंनसंशयः ॥ ६४ ॥ मोक्षप्रदाताभगवान् देवदेवोत्तमः शिवः ॥ नशिवान्योमोक्षदाता
सत्यंसत्यंनसंशयः ॥ ६५ ॥ सर्वापवर्गदातारंसृष्टिस्थित्यंतकारणं ॥ मोक्षार्थमतियत्नेनशरणंव्रजशंकरं ॥ ६६ ॥ ईश्व
रत्वभ्रमेणैवमहादेवेनवंचिताः ॥ मामर्चयंतिबहवः शिवमायाविमोहिताः ॥ ६७ ॥ शुक्तिस्तुरजतत्वेनज्ञाताकिंकंकणाय
ते ॥ तथाहमीश्वरत्वेनज्ञातश्चेदीश्वरोस्मिकिं ॥ ६८ ॥ ईशानः सर्वविद्यानां इत्याद्यैरीश्वरः शिवः ॥ विज्ञातोनतदन्यस्तुव
स्तुतस्त्वीश्वरोध्रुवं ॥ ६९ ॥ ॥ महादेव उवाच ॥ ॥ इतिविष्णुवचः श्रुत्वाबभाषेवचनंद्विजः ॥ ममवैकुंठवासोवादेयइ
त्यभिनम्यतं ॥ ७० ॥ ततोविष्णुरुवाचेदंवचनंसुरसन्निधौ ॥ विप्रवैकुंठवासोपिमयादातुंनशक्यते ॥ ७१ ॥ अधिकारोमया
प्राप्तोवैकुंठस्यशिवार्चनात् ॥ यथेष्टमधिकारोपिममनास्त्यधुनाध्रुवं ॥ ७२ ॥ तुभ्यंवैकुंठवासोपिमयादातुंनशक्यते ॥
शिवपूजांविनातत्रवासस्त्वत्यंतदुर्लभः ॥ क्षणार्धमपियद्वासान्महत्सुखमवाप्यते ॥ तत्सुखंदुर्लभंविप्रविनाशंकरपूज
या ॥ ७४ ॥ स्वतंत्रः पार्वतीनामः सर्वदेवशिरोमणिः ॥ ससमाराधितोभीष्टंप्रयच्छतिनसंशयः ॥ ७५ ॥ अचलत्वाव
नेसा यंसर्वेब्रह्माद्यानात्रसंशयः ॥ अतोस्माकमभीष्टार्थदा[illegible]मर्थ्यमेवन ॥ ७६ ॥ मामुद्दिश्यतपश्चर्यायाकृतास्तित्वया

द्विज ॥ मत्कृतोपद्रवः कोपिन भविष्यतिते ध्रुवं ॥ ७७ ॥ तुभ्यंमयापिसाहाय्यंकार्यंशक्त्यनुरोधतः ॥ यजस्वाभीष्टसिध्यर्थं देवदेवोत्तमंशि
वं ॥ ७८ ॥ शिवंयजस्वयत्नेनत्यक्त्वालस्यमहर्निशं ॥ प्रयच्छतिमहादेवः पूजितोभीष्टमन्वहं ॥ ७९ ॥ संतुष्टश्चेन्महादेवस्तस्यादेयंनदृश्यते
॥ ददातिमोक्षपर्यंतं पूजितः पार्वतीपतिः ॥ ८० ॥ अनभ्यर्च्यमहादेवंयः यः सुखंप्राप्तुमिच्छति ॥ समूर्खइतिविज्ञेयस्तत्वज्ञैः सत्यमुच्य
ते ॥ मयाविचार्यवेदेभ्यः सर्वेभ्यस्तत्वमादरात् ॥ शिवसंपूज्यतेनित्यंसत्यंसत्यंनसंशयः ॥ पश्यमांभस्मलिप्तांगंरुद्राक्षाभरणान्वि
तं ॥ लिंगपूजापरंनित्यंशिवमंत्रजपोत्सुखं ॥ पश्यब्रह्मादिकान्देवान्शिवनामजपोत्सुकान् ॥ भस्मोद्धूलितसर्वांगान् लिंगपूजाप
रायणान् ॥ देवर्षियक्षगंधर्वकिंनरैरुरगैरपि ॥ पूजनीयः प्रयत्नेनशिवएवेष्टसिध्यये ॥ शिवपूजैवसर्वेषांमभीष्टफलदायिनी ॥ तत
स्त्वमपियत्नेनकुरुशंकरपूजनं ॥ शिवपूजैवसर्वेषांमभीष्टफलदायिनी ॥ ततस्त्वमपियत्नेनकुरुशंकरपूजनं ॥ शिवपूजनमात्रेणत्वया
मोक्षश्चलभ्यते ॥ किमर्थमन्यपूजार्थंप्रयत्नोपिवदस्वमे ॥ त्रिपुंड्रधारणंकृत्वाभस्मोद्धूलनपूर्वकं ॥ रुद्राक्षधारणंकृत्वायजदेवोत्तमंशि
वं ॥ विभूतिधारणंत्यक्त्वाविनारुद्राक्षधारणं ॥ मामापूजायविश्वेशंशिवंलिंगस्वरूपिणं ॥ ॥ शिवउवाच ॥ ॥ इत्युक्तेंद्रादिभिःसार्कं
विष्णुर्विधिसमन्वितः ॥ वैकुंठंप्रापविमलंआरूह्यगरुडेमुदा ॥ अतोमदर्चनादेवमोक्षसंप्राप्यतेशिवे ॥ विनामदर्चनंदेविमोक्षोनभव
तिध्रुवं ॥ पूजितोहंमहादेवोयस्ययद्यदभीप्सितं ॥ ततद्दास्यामिसुभगेसत्यंसत्यंनसंशयः ॥ देवतासार्वभौमोहंभुक्तिमुक्तिप्रदायकः ॥
सत्यमेतत्पुनःसत्यंउद्धृत्यभुजमुच्यते ॥ सर्वाधारंसर्वलोकैकबंधुसर्वाधास्यंसर्ववेदांतवेद्यं ॥ सर्वातीतंसर्वमोक्षैकहेतुंविज्ञायेशंमामन
न्याभजंति ॥ ९५ ॥ इतिश्रीशिवरहस्येसप्तमांशेशिवगौरीसंवादेषोडशोध्यायः ॥ १६ ॥ ॥ ५२ ॥ ५२ ॥ ५१ ॥ ५१ ॥

॥ श्रीउमायनमः ॥ ॥ श्रीशिवउवाच ॥ ॥ अथातःसंप्रवक्ष्यामिपूजोपकरणंशिवे ॥ अधिकार्यपिपूजायांउच्यतेश्रुणसादरं ॥ १ ॥
ब्रह्मक्षत्रियविट्शूद्रदेवगंधर्वमानवाः ॥ यक्षादयोपीष्टसिध्यैमामीशंपूजयंतिहि ॥ २ ॥ ब्रह्मणैर्देवमुनिभिर्देवैश्चाहरहरःशिवे ॥ वेद
मंत्रैरहंपूज्यस्तदन्यैस्तंत्रमार्गतः ॥ ३ ॥ आदौमत्पूजनात्पूर्वंयत्कर्त्तव्यंतदुच्यते ॥ कर्त्तव्यकरणाभावेनाधिकारीभविष्यति ॥ ४ ॥ प्रा
तःशौचादिकंकृत्वास्नानंकार्यंप्रयत्नतः ॥ रुद्रसूक्तैर्मार्जनंचकर्त्तव्यंस्नानतत्परैः ॥ ५ ॥ जलेनिमज्यमामीशंध्यात्वासांबंमहेश्वरं ॥ म
हादेवेतिमंत्रोयंजपनीयोष्टधाशिवे ॥ ६ ॥ ततःप्रयत्नतोदेविकर्त्तव्यंजलतर्पणं ॥ परिधानंततःकार्यंवस्त्रचीरादिभिःशिवे ॥ तदनंतर

माचम्यभस्मग्राह्यंप्रयत्नतः।।सद्योजातादिभिर्भस्मततःसमभिमंत्रयेत्।।८।।ततःशरीरंसर्वांगंभस्मनोद्धूलयेत्ततः।।त्रिपुंड्रधा
रणंकृत्वाजाबालोपनिषत्क्रमात्।।९।।रुद्राक्षधारणंकार्यंततोंगेषुयथाक्रमं।।ततःसंध्याप्रयत्नेनकर्त्तव्यासकुशाततः।।१०।।
गोमयेनभुवंसम्यक्अनुलिप्योत्क्षिपेज्जलं।।ततोपविश्यसकुशेस्वासनेजलशोधिते।।११।।पूज्योपकरणंद्रव्यंसर्वंस्वीकार्यमा
शो दरात्।।अष्टौपात्राणिसंग्राह्याण्यर्घ्यार्थमतिभिने।।१२।।तानिसंप्रोक्ष्यसकुशंजलंतेषुप्रपूरयेत्।।पूरयित्वाततोमंत्रंशुध्धःशैवं
जपेत्ततः।।१३।।सौवर्णंरजतंताम्रंअथवामृण्मयंशिवे।।शिवलिंगाभिषेकार्थंपात्रंग्राह्यंप्रयत्नतः।।१४।।बिल्वपत्राणितत्साग्रे
स्थापनीयानियत्नतः।।तदुपर्येवसंस्थाप्यंशिवलिंगंप्रयत्नतः।।१५।।ततोरौद्रेणमंत्रेणसंप्रोक्ष्यार्चनसाधनं।।भस्मनांगानिसं
मृज्यसंकल्पंचसमाचरेत्।।१६।।ततःकुंदेंदुधवलंमामुमारमणंशिवं।।ध्यात्वानमःशिवायेतिमंत्रेणसमुपस्पृशेत्।।१७।।जल
कुंभंभस्मपूतंस्पृष्ट्वामूलमनुंपठेत्।।मूलमंत्रस्तुसर्वत्रशिवपंचाक्षरस्मृतः।।१८।।पठनीयोन्यमंत्रांतेमूलमंत्रस्तुसर्वतः।।मूल
मंत्रोपमंत्रास्तुसर्वेमंत्रायतःस्मृतः।।१९।।सुगंधजलमीशानपवित्रकलशाहृतं।।अभिषेकार्थममलमर्घ्यार्थंचमहेश्वर।।२०।।
इत्युक्त्वाशंकरंध्यात्वासर्वदेवशिखामणिं।।पंचाक्षरजपःकार्योदशवारंप्रयत्नतः।।२१।।ततोष्टमूर्त्तयेमह्यंअर्घ्याण्यपिनिवेदयेत्
।।अर्घ्यमंत्राश्चविविधास्तेप्युच्यंतेमयाधुना।।२२।।पृथिवीरूपविश्वेशपृथिवीजनकप्रभो।।ग्रहाणार्घ्यमिदंशंभोप्रसीदसुरसत्त
म।।२३।।जलरूपमहादेवजलप्रभवकारण।।ग्रहाणा०।।२४।।तेजोरूपमहेशानतेजोजनकशंकर।।ग्रहाणा०।।२५।।वायुस्वरू
पमायात्मन्वायुप्रभवकारण।।ग्रहाणा०।।२६।।आकाशरूपसर्वेशआकाशजनकप्रभो।।ग्रहाणा०।।२७।।सूर्यस्वरूपसर्वेशशिव
सूर्यैककारण।।ग्रहाणा०।।२८।।चंद्रस्वरूपचंद्रात्मन्चंद्रशेखरसर्वग।।ग्रहाणा०।।२९।।यज्वमूर्त्तेयज्ञकर्मफलप्रद।।ग्रहाणा०।। जगन्मूर्ते
।।३०।।अष्टावर्घ्याणिदेयानिमंत्रैरेतैर्यथाक्रमं।।श्वेतशाल्यक्षताकृष्टबिल्वपत्रयुतैर्जलैः।।३१।।ततःपंचामृतैःशुध्धैरभिषेकंस
माचरेत्।।पंचामृतस्नानमध्येजलस्नानंसमाचरेत्।।३२।।क्षीरंगव्यमिदंशुध्धंजलसंयुतमीश्वर।।अभिषेकार्थमानीतंग्रहाणेमामम
हेश्वर।।३३।।दधिगव्यमिदंशुध्धंपरिष्कृतमुमापते।।अभिषेकार्थमानीतंग्रहाणेमामहेश्वर।।३४।।घृतमेतन्महादेवसुगंधंगव्यमुत्त
मं।।अभिषेकार्थ०।।३५।।नवंमधुसमानीतमिदंकीटाद्यदूषितं।।अभिषेका०।।३६।।शर्करेयंसमानीतासिताकीटाद्यदूषिता।।अभि

षेकार्थमानीतां गृहाणो मामहेश्वर ॥ ३७॥ एवं पंचामृतैरीशमभिषिच्य ततः परं ॥ सांगेन नमकेनेशं सांबमामभिषिंचयेत् ॥ ३८॥ जलधाराविच्छिन्ना सं पाद्यमयि भक्तितः ॥ या धारामृतधारा सा मुक्तिधारा मम प्रिया ॥ ३९॥ ततः परं कल्पनीयं बिल्वपत्रोत्तरासनं ॥ हेमादिनिर्मितं मह्यं मूलमंत्रेण भक्तितः ॥ ४०॥ ततो नवेन शुद्धेन वस्त्रेण परिवृत्य मां ॥ सितेन भस्मना सम्यक् अर्चयेन्मूलमंत्रतः ॥ ४१॥ चंदनेन सुगंधेन मूलमंत्रेण पूजयेत् ॥ मध्ये त्वेकैकपूजांते देयमाचमनं मम ॥ ४२॥ ततः शाल्यक्षतैः श्वेतैः अर्चयेन्मां तिलान्वितैः ॥ ततो बिल्वदलैः शुद्धैरर्चयेद्घनाशकैः ॥ ४३॥ बिल्वपत्रं गृहाणेश बिल्वपत्रप्रिय प्रभो ॥ प्रसीद भगवन् शंभो पातकानि हरस्व मे ॥ ४४॥ अमुं मंत्रं समुच्चार्य मूलमंत्रमपि प्रिये ॥ बिल्वपत्रैः समभ्यर्च्य पुष्पैरपि समर्चयेत् ॥ ४५॥ साज्येनागरुसारेण सुगंधेन मनोहरः ॥ धूपस्ततः कल्पनीयो मह्यं यत्नपुरःसरं ॥ ४६॥ धूपं गृहाण देवेश सुगंधसघृतं शिव ॥ पातकानि हरस्वेश धूपदानेन सादरं ॥ ४७॥ दीपं गृहाण देवेश पातकध्वांतनाशक ॥ प्रसीद पार्वतीनाथ दीनबंधो दयानिधे ॥ ४८॥ इति दत्वा धूपदीपौ नैवेद्यं परिकल्पयेत् ॥ ततः परं कल्पनीयं करोद्वर्तनमादरात् ॥ ४९॥ ततः परं धूपदीपौ तांबूलं च ततः परं ॥ ततः पुनर्धूपदीपौ देयावत्यंतभक्तितः ॥ ५०॥ गृहाण परमेशान तांबूलमिदमुत्तमं ॥ एलालवंगकर्पूरपरिष्कृतमुमापते ॥ ५१॥ ततः प्रदक्षिणाः कार्या द्वादशैकादशाथवा ॥ ततः प्रणामाः कर्तव्या एकविंशतिसंख्यया ॥ ५२॥ नर्त्तनं च ततः कार्यं सांबध्यानपुरःसरं ॥ शिवपंचाक्षरः शुद्धो जपनीयः प्रयत्नतः ॥ ५३॥ अष्टोत्तरसहस्रं तु न्यासध्यानपुरःसरं ॥ शिवपंचाक्षरो जप्यो यद्वा न्यासादिकं विना ॥ ५४॥ ततः परं बिल्वपत्रैः पुष्पैर्नानाविधैरपि ॥ पुनः पूजा प्रयत्नेन कर्त्तव्या मह्यमादरात् ॥ ५५॥ ततो नानाविधैः स्तोत्रैः स्तोतव्योहं प्रयत्नतः ॥ ततः छत्रं चामरं च दर्पणं च निवेदयेत् ॥ ५६॥ पुनर्नत्वा क्षमस्वेति संस्पृशेत् ध्यानपूर्वकं ॥ स्पर्शं कृत्वा पुनर्मंत्रममुमेव पठेच्छिवे ॥ ५७॥ अयं मे इति मंत्रेण स्पृष्ट्वा हस्ततलेन मां ॥ अष्टोत्तरशतं मंत्रो जपनीयः षडक्षरः ॥ ५८॥ एवं पूजान्वहं कार्या विबुलोकेषु सादरं ॥ नित्या पूजेयममले भुक्तिमुक्तिफलप्रदा ॥ ५९॥ प्रातः संध्या विधायादौ पूजनीयोन्वहं शिवः ॥ कार्यमन्यन्न कर्तव्यं मामनभ्यर्च्य सर्वदा ॥ ६०॥ एवं प्रयत्नतः कार्यं शक्तेन मम पूजनं ॥ यथाकथंचित्कर्त्तव्यं अशक्तेनापि सर्वथा ॥ ६१॥ न पेयं जलमप्यादौ मामनभ्यर्च्य सर्वथा ॥ पिबेद्यदि प्रमादेन रेतःपायी भविष्यति ॥ ६२॥ अस

त्कुलप्रसूतानामभाग्यानांदुरात्मनां ।। नित्यंमदर्चनेश्रद्धाकलौतुनभविष्यति ।। ६३ ।। अन्यकर्मरतादुष्टाः वेदमार्गवि
वर्जिताः ।। द्विजाः कलौभविष्यंतिशिवपूजापराङ्मुखाः ।। ६४ ।। अर्च्यंशिवमनर्च्यादावनर्च्यार्चनतत्पराः ।। द्विजाः क
लौभविष्यंतिशिवपूजापराङ्मुखाः ।। ६५ ।। शिवमर्च्यमनर्च्यान्यमनर्च्यंयोर्चयिष्यति ।। सजारजइतिज्ञेयोवेदमार्ग
बहिष्कृतः ।। ६६ ।। अर्च्योहमेवसर्वेषुवेदेष्वहरहोग्रतः ।। ततोर्चस्यमहेशस्यपूजाकार्यामममैवहि ।। ६७ ।। मदर्चनपरो
नित्यंयस्त्रिकालंभविष्यति ।। तमूर्ध्वंनेतुमिच्छामिप्रतिज्ञेयंममप्रिये ।। ६८ ।। भस्मोद्धूलनसक्तोयस्त्रिकालंचभविष्य
ति ।। तमूर्ध्वंनेतुमिच्छामिप्रतिज्ञेयंममप्रिये ।। त्रिपुंड्रधारणासक्तोयस्त्रिकालंभविष्यति ।। तमूर्ध्वंनेतुमिच्छामिप्रति० ।।
।। ७० ।। पंचाक्षरजपासक्तोयस्त्रिकालंभविष्यति ।। तमूर्ध्वंनेतु० ।। ७१ ।। मदेकशरणोनित्यंयोमामभ्यर्च्ययिष्यति ।। तमूर्ध्वं० ।। ७२ ।।
मत्कथाश्रवणासक्तोमन्मनोयोभविष्यति ।। तमूर्ध्वं० ।। ७३ ।। मद्भक्त्यासततंयुक्तोयोमद्याजीभविष्यति ।। तमूर्ध्वं० ।। ७४ ।। मामे
वसततंध्यात्वायस्तुहृष्टोभविष्यति ।। तमूर्ध्वं० ।। ७५ ।। रुद्राध्यायेनसततंयोमांसंस्नापयिष्यति ।। तमूर्ध्वं० ।। ७६ ।। बिल्वपत्रै
स्त्रिशाखैर्मांयोनित्यंपूजयिष्यति ।। तमूर्ध्वं० ।। ७७ ।। अर्चयिष्यतियोनित्यमखंडैःशालितंडुलैः ।। तमूर्ध्वं० ।। ७८ ।। यस्तुनित्यंतिलैः
कृष्णैःश्वेतैर्वापूजयिष्यति ।। तमूर्ध्वं० ।। ७९ ।। यवैर्यःसततंभक्त्यापूजयिष्यतिमामजं ।। तमूर्ध्वं० ।। ८० ।। गोधूमैश्चणकैर्माषैर्यैर्मामभ्य
र्चयिष्यति ।। तमूर्ध्वं० ।। ८१ ।। असितैर्वासितैर्वामांसिद्धार्थैर्योर्चयिष्यति ।। तमूर्ध्वं० ।। ८२ ।। नीवारतंडुलैःसाग्रैर्योमामभ्यर्च्ययि-
ष्यति ।। तमूर्ध्वं० ।। ८३ ।। श्यामाकतंडुलैर्नित्यंयोमामभ्यर्च्ययिष्यति ।। तमूर्ध्वं० ।। ८४ ।। प्रियंगुतंडुलैर्नित्यंयोमामभ्यर्च्ययिष्यति ।।
तमूर्ध्वं० ।। ८५ ।। रत्नैर्मुक्ताफलैर्योमांशिवमभ्यर्च्ययिष्यति ।। तमूर्ध्वं० ।। ८६ ।। नित्यंसुवर्णपुष्पैर्मांयोर्चयिष्यतिभक्तितः ।। तमूर्ध्वं० ।। ८७ ।।
नित्यंचंपकपुष्पैर्मांयोर्चयिष्यतिसादरं ।। तमूर्ध्वं० ।। ८८ ।। नित्यंकुशेशयैर्यो मांशिवमभ्यर्चयिष्यति ।। तमूर्ध्वं० ।। ८९ ।। कमलैर
मलैर्भक्त्यायोमामभ्यर्चयिष्यति ।। तमूर्ध्वं० ।। ९० ।। नीलोत्पलैःपुंडरीकैर्योमामभ्यर्चयिष्यति ।। तमूर्ध्वं० ।। ९१ ।। कल्हारैःपरयाभ
क्त्यायोमामभ्यर्चयिष्यति ।। तमूर्ध्वंपुन्नागैःसततंभक्त्यायोमामभ्यर्चयिष्यति ।। तमूर्ध्वं० ।। ९३ ।। शतपत्रैरनर्घैर्मांयोर्चयिष्य
तिसादरं ।। तमूर्ध्वं० ।। कदंबपुष्पैरमलैःयोमामभ्यर्चयिष्यति ।। तमूर्ध्वं ।। ९५ ।। नागचंपकपुष्पैर्मांयोर्चयिष्यतिसादरं ।। तमू

ष्य

नि

३ यस्तुदाडिमपुष्पैर्मांसांबमभ्यर्चयिष्यति॥तमूर्ध्वं०॥२॥नित्यमर्जुनपुष्पैर्मांयोर्चयिष्यतिसा
दरं॥तमूर्ध्वं०॥३॥

र्ध्वं०॥९६॥सितासितैः पारिजातैर्योर्चयिष्यतिसादरं॥तमूर्ध्वं०॥९७॥अर्चयिष्यतिमां यस्तुकरवीरैः सितासितैः॥तमू०॥ विवि
धैर्मल्लिकापुष्पैर्योर्चयिष्यतिसादरं॥ तमूर्ध्वं०॥९९॥धत्तूरकुसुमैः शुभ्रैः योर्चयिष्यतिसादरं॥ तमू०॥ विविधैरर्कपुष्पैर्मांयो
र्चयिष्यतिभक्तितः॥तमूर्ध्वं०॥१०१॥द्रोणपुष्पैः शमीपुष्पैः योर्चयिष्यतिसादरं॥तमूर्ध्वं०॥ यस्तुकंदलपुष्पैर्मांनित्यम
भ्यर्चयिष्यति॥तमूर्ध्वं०॥४॥योविष्णुक्रांतकुसुमैः नित्यमभ्यर्चयिष्यति॥ तमूर्ध्वं०॥ योनित्यंबृहतीपुष्पैः मामीशंपूज
यिष्यति॥तमूर्ध्वं०॥६॥जंबूपुष्पैराम्रपुष्पैः योमामभ्यर्च्चयिष्यति॥तमूर्ध्वं०॥ यस्तुवेतसपुष्पैर्मांसादरंपूजयिष्यति॥त
मूर्ध्वं०॥८॥कुशपुष्पैः काशपुष्पैर्योमामभ्यर्चयिष्यति॥तमूर्ध्वं०॥ बंधूकपुष्पैरमलैः योमामभ्यर्चयिष्यति॥तमूर्ध्वं०॥१०॥पला
शपुष्पैरमलैः योर्च्चयिष्यतिसादरं॥तमूर्ध्वं॥११॥योलोध्रपुष्पैरमलैरर्चयिष्यतिमामजं॥तमूर्ध्वं०॥१२॥जपाम्रतुलसीपत्रैः
योर्चयिष्यतिमामजं॥तमूर्ध्वं०॥ नारिकेलफलैर्यस्तुमामर्चयतिसादरं॥तमूर्ध्वं०॥ पूजयिष्यतियोभक्त्यानित्यंदमनकेनमां॥
तेमूर्ध्वं०॥१५॥ पूजयिष्यतिमांयस्तुजंब्वाम्रबदरीफलैः॥तमूर्ध्वं०॥१६॥योमांद्राक्षाफलैरीशमभ्यर्चयतिसादरं॥तमूर्ध्वं०॥
॥१७॥पूजयिष्यतिमांभक्त्यायः पक्वैः कदलीफलैः॥ तमूर्ध्वं०॥१८॥ पक्वदाडिमबीजैर्मांश्रुत्यैर्योभ्यर्चयिष्यति॥तमूर्ध्वं०॥१९॥
दूर्वापमार्गदर्भैर्मांभक्त्यायोभ्यर्च्चयिष्यति॥तमूर्ध्वं०॥२०॥भृंगराजशमीपत्रैः योमामभ्यर्चयिष्यति॥तमूर्ध्वं०॥२१॥दध्यन्ने
नाज्ययुक्तेनयोमामभ्यर्चयिष्यति॥तमू०॥२२॥क्षीरान्नेनाज्ययुक्तेनयोमामभ्यर्चयिष्यति॥तमूर्ध्वं०॥२३॥शर्करा घृतमध्वान्ने
र्योमामभ्यर्चयिष्यति॥तमू०॥२४॥मदालयेदीपमालांयस्तुनित्यंकरिष्यति॥तमूर्ध्वं०॥२५॥कर्पूरदीपदोयस्तुमह्यंभक्त्याभवि
ष्यति॥तमू०॥२६॥साज्यगुग्गुलुधूपेनयोमांसंधूपयिष्यति॥तमूर्ध्वं०॥२७॥यः साज्यागरुधूपेननित्यंमांधूपयिष्यति॥तमू०
॥२८॥आर्यावर्तेपुराकश्चिद्ब्राह्मणोवेदवित्तमः॥२९॥भसितोद्धूलितवपुः त्रिपुंड्रांकितमस्तकः॥रुद्राक्षमालाभरणः
सांबंमामजमीश्वरं॥३०॥संपूज्यबिल्वपत्राद्यैरालोक्यमुदितंस्थितः॥तदानीमागतः कश्चिन्मदन्यः सुरपूजकः
॥३१॥मृद्भूषितललाटांगोभ्रांतोब्राह्मणवंशजः॥[illegible] सवेदवित्तमोविप्रस्तंदृष्ट्वामूढचेतसं॥३२॥धैर्यंकृत्वाकिय
त्कालंतृणपाणिरुवाचतं॥ ॥विप्रउवाच॥ ॥मृन्मर्दितललाटांगगच्छदुर्मुखदूरतः॥मादर्शयमुखंमह्यंशिव

वंचितदुर्भग ॥ ३३ ॥ भस्मालयमितिप्रोक्तंललाटंवेदवित्तमैः ॥ तद्भस्मलेपनायार्हंतत्कथंनिंदितंमुदा ॥ ३४ ॥ त्रिपुंड्रंभस्मने
त्यादिश्रुतिभिर्भस्मधारणं ॥ आवश्यकमितिप्रोक्तंतत्कथंनकृतंत्वया ॥ ३५ ॥ त्वयावेदमनूच्येतिश्रुतिर्नस्मर्यतेकथं ॥ सत्यं
वदेत्यादिधर्मान्सावधानेनसंस्मर ॥ ३६ ॥ अनुलिप्यमृदंफाले दृढंपापमुपार्जितं ॥ भ्रमेणापिकृतंकर्मपापसंपादकंध्रु
वं ॥ उद्धूलनंत्रिपुंड्रंचक्षणमात्रमपिद्विजैः ॥ नत्याज्यमेवनत्याज्यंनत्याज्यंसत्यमुच्यते ॥ ३८ ॥ उद्धूलनंत्रिपुंड्रंचब्राह्मणो
यदिसंत्यजेत् ॥ प्रमादादथवामोहात्सयातिनरकंध्रुवं ॥ ३९ ॥ संध्यात्यागेनविप्राणांब्राह्मण्यप्रच्यवोध्रुवं ॥ यज्ञोपवी
तत्यागेनब्राह्मण्यप्रच्यवोध्रुवं ॥ ४० ॥ तथैवभस्मत्यागेनब्राह्मण्यप्रच्यवोध्रुवं ॥ स्वाध्यायाध्ययनाभावेब्राह्मण्यप्रच्यवोयथा
॥ ४१ ॥ तथैवभस्मत्यागेनब्राह्मण्यप्रच्यवोध्रुवं ॥ मादर्शयमुखंमह्यऊर्ध्वपुंड्रविनिर्मितं ॥ स्वयंनष्टोन्यनाशार्थंउद्योगंकुरुते
कथं ॥ त्रिपुंड्रधारणंकृत्वाप्रातःकार्यंशिवार्चनं ॥ ४३ ॥ तद्विहायकथंभ्रांत्यासंचारःक्रियतेत्वया ॥ प्रातःशिवार्चनंकार्यंभस्म
धारणपूर्वकं ॥ ४४ ॥ तस्मात्प्रमदोभूयादितिवेदस्मृतोनकिं ॥ त्रिसंध्यमपिसंपूज्यशिवलिंगमितिश्रुतिः ॥ ४५ ॥ कथंनस्मर्यते
मूर्खभ्रांतोजातःकथंवद ॥ ॥ शिवउवाच ॥ ॥ इत्युक्तमादौवचनंविप्रःश्रुत्वाततःपरं ॥ ४६ ॥ तंप्रणम्यजगादेवंकृतां
जलिपुटःशिवे ॥ ॥ विप्रउवाच ॥ ॥ द्विजोत्तममयाफालंमृदाभ्रांत्याद्यदूषितं ॥ ४७ ॥ प्रायश्चित्तंकरिष्यामित्वहज्ज्ञा
बालचोदितं ॥ ॥ शिवउवाच ॥ ॥ इत्युक्त्वातंद्विजंसम्यक्प्रणम्यचपुनःपुनः ॥ ४८ ॥ स्नात्वाचकारविधिवत्प्राय
श्चित्तमतंद्रितः ॥ ततोभस्मोद्धूलनादिसर्वंकृत्वायथाविधि ॥ ४९ ॥ शिवलिंगार्चनंचक्रेयथाविधियथाक्रमं ॥ तदाप्र
भृतिवेदोक्तकर्माचरणतत्परः ॥ ५० ॥ उवासोद्धूलनादीनिनित्यंकुर्वन्नतंद्रितः ॥ ततःप्रयत्नतःकार्यंविप्रैरुद्धूल
नादिकं ॥ ५१ ॥ तत्यागेसर्वथाविप्राःभ्रष्टाःब्राह्मण्यतःशिवे ॥ धर्मार्थकाममोक्षेछायेषांतेषांतुसर्वथा ॥ ५२ ॥ मद
र्चनंप्रयत्नेनकर्त्तव्यंविधिपूर्वकं ॥ सदाराधनसंसक्तायेमदेकपरायणाः ॥ ५३ ॥ तेषांतुनरकावासोनभविष्यति
सर्वथा ॥ पुरायमभटाक्रूरायमशासनकारिणः ॥ ५४ ॥ संचरंतोवनीपृष्ठेसोत्सहंसंस्थिताःशिवे ॥ तदाकश्चिद्द्वि
जवरोमदर्चनपरायणः ॥ ५५ ॥ उद्धूलनत्रिपुंड्राभ्यांरुद्राक्षैस्तुविभूषितः ॥ पंचाक्षरजपासक्तोमत्पूजानिर

तःसदा ॥ ५६ ॥ उवासबिल्वछायायांबिल्वपत्रार्जनंप्रियः ॥ तदातंद्विजमालोक्यब्राह्मणंकश्चिदागतः ॥ ५७ ॥ तत
स्तमभिवाद्येदंबभाषेवचनंद्विजः ॥ द्विजोत्तममयापूर्वंपातकंबहुधाकृतं ॥ ५८ ॥ इदानीमपिपापेभ्योननिवृत्तंमनोमम ॥ किंचि
द्दिनंशतंजातंवत्सराणामपिद्विज ॥ ५९ ॥ सर्वथाश्वःपरश्वोवामरणंमेभविष्यति ॥ किंचत्स्वप्नोपिजातोस्तिह्यचित्पूर्वदिनेद्विज
॥ ६० ॥ तद्वस्येस्वप्नवृत्तांतंशृणुसम्यग्द्विजोत्तम ॥ नीलाद्रिसंनिभा दृष्टायमदूताभयानकाः ॥ ६१ ॥ अतःपरंद्विजाधीशकिंकर्त्त
व्यंवदस्वमे ॥ तदुक्तंतद्वचःश्रुत्वातमुवाचद्विजोत्तमः ॥ ६२ ॥ परदुःखप्रहाणेषुःतत्वज्ञःशिवचिंतकः ॥ ॥ शैवद्विजउवाच ॥
द्विजतेयदिमोक्षेच्छातदायत्नेनसादरं ॥ ६३ ॥ कुरुदेवाधिदेवस्यपूजनंभक्तिपूर्वकं ॥ महादेवार्चनात्पुंसांविनश्यंत्यघकोटयः ॥
॥ ६४ ॥ सत्यंसत्यंपुनःसत्यंउध्धृत्यभुजमुच्यते ॥ शंकरस्मरणादेवविनश्यंत्यघकोटयः ॥ ६५ ॥ यत्पूजनाद्विनश्यंतिपापानी
त्यन्ननाद्भुतं ॥ शिवपूजनमात्रेणमुच्यतेदुःखसागरात् ॥ ६६ ॥ सत्यमित्यादिवाक्यानिसंतिवेदेषुभूरिशः ॥ वेदाःप्रमाणमस्मा
कंब्राह्मणानांतथासति ॥ ६७ ॥ मोक्षःशिवार्चनादेवभविष्यतिनसंशयः ॥ शिवपूजांविनामोक्षोनभविष्यतिसर्वथा ॥ ६८ ॥ सत्यमि
त्यादिवाक्यानिसंतिवेदेषुभूरिशः ॥ नसत्याचरणान्मोक्षोनत्यागैर्विविधैरपि ॥ ६९ ॥ किंतुमोक्षोमहादेवपूजयैवेतुतिहिश्रुतिः
॥ धर्मार्थकाममोक्षास्तुशिवपूजाविधेःफलं ॥ ७० ॥ सत्यमित्यादिवाक्यानिसंतिवेदेषुभूरिशः ॥ ततःपूजयदेवेशमहादेवमुमाप
तिं ॥ ७१ ॥ उध्धूलनादिकंकृत्वाजाबालोक्तविधानतः ॥ इतितद्वचनंश्रुत्वाविश्वस्याद्विजपुंगवः ॥ ७२ ॥ स्नात्वाकृत्वोध्धूलनादि
चकारशिवपूजनं ॥ ततोनत्वामहादेवंसम्यक्कृत्वाचन्वर्त्तनं ॥ ७३ ॥ ततःप्राणान्जहौमर्त्यःकुर्वन्नेवमदर्चनं ॥ ततःसदुःखान्य
खिलान्यपास्यमदनुग्रहात् ॥ ७४ ॥ मद्रूपमगमद्विप्रस्तन्मत्पूजाविधेःफलं ॥ तदानींद्विजसंवादंश्रुत्वातुयमकिंकराः ॥ तत
मुद्गलंचपतितंविलोक्यतमुपाययुः ॥ ततस्तंदूरतोनत्वाबिल्वार्चनपरंद्विजं ॥ ७६ ॥ किमयंपुरुषोमुक्तःइतिपप्रच्छुरादरात् ॥
मुक्तएवेतितद्वाक्यंश्रुत्वातमभिपूज्यते ॥ ७७ ॥ पपुरत्यंतवेगेनयमस्यैवनिकेतनं ॥ ततस्तेयममालोक्यसभासद्भिरुपा
सितं ॥ ७८ ॥ दंडंनिवेद्यकालायतस्थुःखिन्नमुखाभटाः ॥ यमःखिन्नमुखान्दूतान्विलोक्यात्यंतदुःखितः ॥ ७९ ॥ कि
मासीदितिपप्रच्छतद्वृत्तांतंन्यवेदयन् ॥ ततःतद्वचनंश्रुत्वाप्रहस्यमुदिताननः ॥ ८० ॥ बभाषेवचनंचारुयमोदूतहि

तावहं॥ ॥ यमउवाच॥ ॥ महादेवार्चने प्रीतिः यस्यातिष्ठत्य चंचला॥ ८१॥ तस्यापिमुक्तिः फालाक्ष पूजकस्य तु किंपुनः॥ प्राप्यतेस
सर्वथामुक्तिः शिवपूजकपूजकैः॥ ८२॥ मुक्तिर्नलभ्यते किंतैः साक्षाछंकरपूजकैः॥ शिवलिंगार्चनंकृत्वा शिवलिंगस्यसन्निधौ॥ ८३॥
येनत्यक्तातनुस्तेनमुक्तिः प्राप्यैवसर्वथा॥ भस्मधारणमात्रेण मुक्तिः संप्राप्यतेनरैः॥ ८४॥ ततः कथंनसंप्राप्यामुक्तिः शंकरपूजया॥ शि
वपूजनरुद्राक्षभस्मधारणतत्परः॥ ८५॥ कीकटेपितनुंत्यक्त्वा शिवरूपंप्रयातिहि॥ शिवपूजनमाहात्म्यंशिवेनज्ञायतेध्रुवं॥ ८६॥ त
दन्यैतत्कथंज्ञेयतत्वतोस्माभिरीदृशैः॥ रत्नस्वरूपंजानातिसम्यग्रत्नपरीक्षकः॥ ८७॥ तथाशिवाचकस्यापिमाहात्म्यंवेदशंकरः
॥ अतः परंहितंवक्ष्ये शृण्वंत्वत्यंतयत्नतः॥ ८८॥ कर्त्तव्यमपिवक्ष्येहमपूर्वेदेनसादरं॥ त्रिपुंड्रमात्रंयत्कालेभासतेभस्मनाकृतं॥ ८९॥
तान्दृष्ट्वाप्रियमेधासः प्रार्च्यताघ्यादिसाधनैः॥ त्रिपुंड्ररुद्राक्षधरः शिवपूजापरायणः॥ ९०॥ शिवएवेतिविज्ञेयोभवद्भिः सर्वथाभ
टाः॥ भासतेफालमनिशंयस्यकेवलभस्मना॥ ९१॥ तस्यफालाक्षतेफालेलिखितैवनसंशयः॥ भस्मरेखात्रयंशुभ्रंतत्कालाक्षा
क्षरत्रयंशुभ्रंतत्कालाक्षाक्षरत्रयं॥ ९२॥ फालाक्षइतिसंज्ञापितदाकारेणतिष्ठति॥ फालपट्टेभस्मरेखास्वरूपैः त्रिभिरक्षरैः॥
॥ ९३॥ फालाक्षताभाविनीतिफालाक्षाक्षरलेखनं॥ अतः केवलभस्मांकाः शिवपूजापरायणाः॥ ९४॥ शिवाकाराइतिज्ञेयासत्यं
सत्यंनसंशयः॥ भस्मोद्धूलितसर्वांगान् दृष्ट्वासोत्साहमन्वहं॥ ९५॥ पूजयंत्वतियत्नेनभ्रमालस्यपराङ्मुखाः॥ रुद्राक्षमाला
भरणान्भस्मधारणपूर्वकं॥ पूजयंत्वतियत्नेन०॥ ९६॥ शिवलिंगार्चनासक्तान् भस्मधारणपूर्वकं॥ पूजयंत्वति०॥ ९७॥ शिव
नामजपासक्तान्भस्मधारणपूर्वकं॥ पूजयंत्व०॥ ९८॥ शिवप्रदक्षिणासक्तान् भस्मधारणपूर्वकं॥ पूजयंत्वति०॥ ९९॥ शिवाभि
वादनासक्तान्भस्मधारणपूर्वकं॥ पूज०॥ १००॥ शिवाग्रेनर्त्तनासक्तान्भ०॥ पूजयं०॥ १॥ धूपदान्छंकरस्थानेभस्मधारणपू
र्वकं॥ पूजयंत्व०॥ २॥ दीपदान्छंकरस्थानेभ०॥ पूजयं०॥ ३॥ सोमवारव्रतपरान्भ०॥ पूजयं०॥ ४॥ प्रदोषपूजनासक्तान्
भ०॥ पूजयंत्व०॥ ५॥ नित्यंशिवकथासक्तान्भ०॥ पूजयं०॥ ६॥ भूताष्टमीव्रतपरान्भ०॥ पूज०॥ ७॥ त्रयोदशीव्रतपरान्भ
स्म०॥ पूजयंत्वतियत्नेनभ्रमालस्यपराङ्मुखाः॥ ८॥ रुद्राध्यायजपासक्तान्भस्मो०॥ पूजयं०॥ ९॥ रुद्राभिषेकसंसक्ता
न्भस्मो०॥ पूजयंत्व०॥ १०॥ शिवध्यानरतान्नित्यंभस्मो०॥ ११॥ शिवभक्तार्चनपरान्भ०पू०॥ १२॥ बिल्वपत्रार्चनरता

मा

न्भस्मो०पूज०॥१३॥बिल्वपोषणसंसक्तान्भस्म०॥पूजयं०॥१४॥बिल्वारोपणसंसक्ताम्भस्म०पू०॥बिल्वस्पर्शन
संसक्तान्भस्म०॥पूजयंत्व०॥१६॥बिल्वदर्शनसंसक्तान्भस्मो०॥पूजयं०॥१७॥बिल्वाभिवादनासक्तान्भस्मो०॥पू
जयं०॥१८॥शिवहरभवभर्गभीमशंभोत्रिनयनशंकरशर्वचंद्रमौले॥भवशरणमितीरयंतियेतान्भजतमुहुर्विनये
नपूजयध्वं॥१९॥पुरहरसुरनाथमन्मथारेहरिनयनामलपूजितांघ्रिपद्म॥भवशरणमि०॥२०॥निरवधिकरुणासु
धैकसिंधोगिरिशगिरीशमहेशपार्वतीश॥भवशरण०॥२१॥धृतभसितभुजंगराजराजप्रियहरिवल्लभदिव्यनील
कंठ॥भवशरण०॥२२॥विनिहतनरसिंहचर्मवस्त्रस्फुरदुरुकंधरकंधराग्निमूर्त्ते॥भव०॥विनिहतविधिमुंडमुंडमाला
कलनकरालविलोलशूलपाणे॥भव०॥२४॥विविधविभववेदगीतकीर्त्तेविहितविनोदितभास्वराष्टमूर्त्ते॥भवश०॥२५॥
शरणदशिपिविष्टकालकालन्निदशवरामरसेवितांघ्रिपीत॥भवशरणमितीरयंतीयेतान् भजतमुहुर्विनयेनपूजय
ध्वं॥येभस्मधारणंत्यक्त्वासंध्यांकुर्वंतिमानवाः॥२६॥तान्पातयंतुनरकेक्षतिघोरेभुयत्नतः॥येभस्मधारणंत्यक्त्वाहो
मंकुर्वंतिमानवाः॥२७॥तान्पा०॥येभस्मधारणंत्यक्त्वापिबंतिजलमादरात्॥तान्पात०॥२८॥येभस्मधारणंत्यक्त्वाभ
क्षयंतिफलादिकं॥तान्पात०॥२९॥येभस्मधारणंत्यक्त्वास्वेच्छंकुर्वंतिभोजनं॥तान्पात०॥३०॥येरुद्राक्षान्नधृत्वैवहोमंकु
र्वंतिमानवाः॥तान्पात०॥३१॥येरुद्राक्षान्नधृत्वैवपिबंत्युदकंजनाः॥तान्पात०॥३२॥येरुद्राक्षान्नधृत्वैवभक्षयंतिफला
दिकं॥तान्पात०॥३३॥येरुद्राक्षान्नधृत्वैवस्वेच्छंकुर्वंतिभोजनं॥तान्पात०॥३३॥येशिवाराधनंत्यक्त्वापिबंतिजलमादरा
त्॥तान्पातयं॥३४॥येशिवाराधनंत्यक्त्वाभक्षयंतिफलादिकं॥तान्पात०॥३५॥येशिवाराधनंत्यक्त्वास्वेच्छंकुर्वंतिभो
जनं॥तान्पात०॥येचरुद्रजपंत्यक्त्वाभक्षयंतिफलादिकं॥तान्पात०॥३७॥पंचाक्षरजपंत्यक्त्वाभक्षयेत्तिजलंजनाः॥
तान्पात०॥३८॥पंचाक्षरजपंत्यक्त्वायेःफलादिकंचभक्षणं॥तान्पात०॥३९॥पंचाक्षरजपंत्यक्त्वाभुक्तंयैराद्वराज्जनैः॥ता
न्पात०॥४०॥रुद्राभिषेकपानीयंनपिबंत्यन्वहंचये॥तान्पात०॥४१॥येनकुर्वंत्यहरहःप्रणामान्शूलपाणये॥तान्पात

यं०॥४२॥ येनकुर्वंत्यहरहः बिल्वपत्रैःशिवार्चनं॥ तान्यातय०॥४३॥ येनकुर्वंत्यहरहः त्रिकालेशंकरार्चनं॥ तान्यातयं०॥४४॥ येनकुर्वंत्यहरहः भस्मोद्धूलनमादरात्॥ तान्यातय०॥ ४५॥ येनकुर्वंत्यहरहः त्रिकालंभस्मधारणं॥ तान्यातयं०॥४६॥ येनकुर्वंत्यहरहः पंचाक्षरजपंद्विजाः॥ तान्यातयं०॥ ४७॥ येनकुर्वंत्यहरहः श्रीमद्रुद्रजपंद्विजाः॥ तान्यातयं०॥४८॥ येसोमवासरेस्वेच्छंदिवाकुर्वंतिभोजनं॥ तान्यातयं०॥ ४९॥ शिवरात्रिव्रतंपुण्यंयेनकुर्वंतिदुर्धियः॥ तान्यातय०॥ ५०॥ येषांशिवकथालापेष्वश्रद्धादुष्टमेधसां॥ तान्यात०॥ ५१॥ येनकुर्वंतिसततंशैवेषुप्रीतिमादरात्॥ तान्यात०॥ ५२॥ येनकुर्वंतिसततंस्वशक्त्याशैवपूजनं॥ तान्यात०॥ ५३॥ येकुर्वंतिभ्रमेणापिशिवनिंदामघाश्रयां॥ तान्यात०॥ ५४॥ सुरापानादिसंसक्ताः येपापिष्ठानराधमाः॥ तान्यात०॥ ५५॥ येवसंतिद्विजाभूमौशिवपूजापराङ्मुखाः॥ तेभ्यस्सृष्टानिनरकाण्येतान्यत्रमयाभटाः॥ ५६॥ येभस्मधारणंत्यक्त्वातिष्ठंतिब्राह्मणाभुवि॥ तेभ्यः सृष्टानिनरकाण्येतान्यत्रमयाभटाः॥ ५७॥ येभस्मोद्धूलनंत्यक्त्वासंध्याद्याचारतत्पराः॥ तेभ्य०॥ ॥५८॥ येभस्मधारणंत्यक्त्वाजलाद्याहारतत्पराः॥ तेभ्य०॥ ५९॥ चकारभोजनंमतः त्यक्त्वायंभस्मधारणं॥ अतोयमग्निकुंडेस्मिन्पतितः परिवर्त्तते॥ प्रज्वलद्घस्लकुंडेषु पतिष्यत्ययमीदृशः॥ ततः संततरुधिरे पतिष्यत्ययमीदृशः॥ ततः संततरुधिरे॥ ६१॥ सार्धार्बुदेषु पुनरकेष्वयंस्थित्वाततः परं॥ चांडालयोनिष्वेवायंमुहुरुत्पत्तिमेष्यति॥ ६३॥ एकैकनरकावासः क्रमशः शतयुगावधि॥ तावत्पर्यंतमनिशमतिदुःखंभविष्यति॥ येभस्मधारणंत्यक्त्वास्वेच्छंकुर्वंतिभोजनं॥ तेषामेतादृशीघोरायातनात्रहिजायते॥ ६५॥ येशिवाराधनंत्यक्त्वास्वेच्छंकुर्वंतिभोजनं॥ तेषामेतच्छतगुणंयातनात्रभविष्यति॥ ६६॥ महापातकिनोप्येतेशिवपूजांविधायमे॥ प्राणास्त्यजंतितेषांतुयातनानभविष्यति॥ ६७॥ शिवार्चनंशिवध्यानं अंतकालिनमस्तियत्॥ तत्तदूरीकृत्यदुरितंमोक्षंदास्यत्यसंशयं॥ ६८॥ दुर्लभंदुर्लभंपुसामंतकालेशिवार्चनं॥ सत्यंसत्यमिदंसत्यमुत्धृत्यभुजमुच्यते॥ शंकरानुग्रहेजातेकुर्वंत्येतेशिवार्चनं॥ तेनसद्योभवंत्येवजनानिर्धूतकल्मषाः॥ ७०॥ शिवार्चनेनन

ष्वेषुपापेषुविविधेष्वपि॥ततःसंप्राप्नुवंत्यैवशिवरूपमकल्मषं॥७१॥शिवार्चनंविनानास्तिपापनाशस्तथासति॥शिवा
र्चनंविनानास्तिपापनाशस्तथासति॥शिवार्चनेननश्यंतिपापानिविविधान्यपि॥७२॥शिवार्चनपरःपापान्नबिभेतिकदाच
न॥कृतेशिवार्चनेपापान्यपयांत्येवसर्वथा॥७३॥यथादावानलेप्राप्तेघ्नंनश्यंतिशलभादयः॥तथाशिवार्चनेनैवनश्यंत्यघ
कुलंक्षणात्॥७४॥यःशंकरार्चनपरोभस्मोद्धूलनपूर्वकं॥अनन्यशरणोनित्यंसपापैर्नैवबिभ्यति॥७५॥अनन्यशरणा
नित्यंशंकरार्चनतत्पराः॥धन्याधन्यतमाःसत्यंसत्यंधन्यतराश्चते॥७६॥तेषामुद्धूलनेप्रीतिर्नित्यंस्वाभाविकीभवेत्॥तए
वध०॥८०॥रुद्राध्यायजपेप्रीतिर्येषांस्वाभाविकीभवेत्॥तएवधन्या०॥८१॥पंचाक्षरजपेप्रीतिर्येषांस्वा०॥तएवधन्या०॥
॥८१॥शिवार्चनपराःसर्वेचतुर्वर्गफलाश्रयाः॥शिवार्चनपरैःप्राप्यंनास्तिसर्वथा॥८२॥येयजंतिमहादेवंउपचारैस्तुषोडशैः
तेसर्वेभाग्यनिलयाःभविष्यंतिनसंशयः॥८३॥यस्यस्मरणमात्रेणमोक्षःसंप्राप्यतेजनैः॥तस्यार्चनेनसौभाग्यमवश्यंप्राप्यतेज
नैः॥८४॥भुक्तिमुक्तिप्रदंनृणांमहादेवस्यपूजनं॥सत्यंसत्यंपुनःसत्यंउद्धृत्यभुजमुच्यते॥८५॥शिवपूजांविहायान्यन्ना
भीष्टफलदायकं॥सत्यंसत्यं०॥८६॥वैकुंठलोकंसंप्रापविष्णुःशंकरपूजया॥सत्यंसत्यंपुनःसत्यंउद्धृत्यभुजमुच्यते
॥८७॥सत्यलोकंविधिःप्रापशंकरस्यैवपूजया॥सत्यं०॥८८॥शंकराभ्यर्चनाद्देवस्वर्गंप्रापशचीपतिः॥सत्यंसत्यं०॥
॥८९॥किंचकिंबहुनोक्तेनश्रृण्वंत्वेकंवचोमम॥सत्यंस०॥९०॥अशैवानानयंत्वत्रशैवास्तुनकदाचन॥९०॥शैवास्तेयेमहा
देवमनन्यशरणाःसदा॥पूजयंत्यतियत्नेनतेसंपूज्याममध्रुवं॥९१॥येभस्मछन्नसर्वांगास्त्रिपुंड्रांकितमस्तकाः॥तेशैवाःशंक
राःसक्तास्तेतुपूज्याममध्रुवं॥९२॥येकंठाद्यंगसंसक्तरुद्राक्षाभरणाःसदा॥तेशैवाःशंक०॥९३॥येषामस्तिमहादेवेभक्तिर
व्यभिचारिणी॥तेषामुक्तिर्भवत्येवमाकुर्वन्त्वत्रसंशयः॥९४॥येषांभस्मनिरुद्राक्षेभक्तिरव्यभिचारिणी॥तेषांमु०॥९५॥
येकुर्वंतिप्रयत्नेनसोमवारव्रतंजनाः॥तेषांमु०॥९७॥येकुर्वंतिप्रयत्नेनशिवस्थानेधूपदानंप्रयत्नतः॥तेषांमु०॥९८॥येकु
र्वंतिशिवस्थानेदीपमालांप्रयत्नतः॥तेषां०॥९९॥येकुर्वंतिप्रतियत्नेनबिल्वपत्रैःशिवार्चनं॥तेषांमु०॥१००॥येकुर्वंत्यतिय
त्नेनभस्मरुद्राक्षधारणं॥तेषांमु०॥१॥येकुर्वंत्यतियत्नेनरुद्राध्यायजपंमुदा॥तेषांमु०॥येकुर्वंत्यतियत्नेनपंचाक्षरजपंमु

हा॥ तेषांमुक्तिर्भवत्येवमाकुर्वंत्यत्रसंशं॥ ३॥ शैवास्तुरुद्रंरुद्राक्षंभोगिभोगविभूषणाः॥ त्रिपुंड्रचंद्रार्धधरानित्यंशंकरकिंकराः
॥ ४॥ कः समीक्षयितुंशक्तोभुविशंकरकिंकरान्॥ यैरिंद्रोपेंद्रचंद्राद्यातृणवत्समुपेक्षिताः॥ ५॥ इंद्रोपेंद्रादयोदेवाः शैवान्दृ
ष्ट्वातियत्नतः॥ अभ्युत्थायार्घ्यपाद्याद्यैः पूजाः कुर्वंतिसादरं॥ ६॥ भूरिभाग्यप्रभावेनशैवोभवतिमानवः॥ तंनार्चयं
तियेभक्त्यातेमूढाः शिवचिंतकाः॥ ७॥ अतोभवंतः सततंयदिजीवितुमिछथ॥ तदाशैवान्पूजयंतुप्रयत्नेनस्वशक्तितः॥
॥ ८॥ रुद्राक्षभस्माभरणाः शिवैकपरदेवताः॥ पूजाः भवंतियत्नेनब्रह्मनारायणादिभिः॥ ९॥ मागछंतुभ्रमेणापिपूयंशै
वग्रहान्प्रति॥ भवद्रूपंसमालोक्यतेषांपीडाभविष्यति॥ १०॥ भवत्कृतंयदिभवेत्तेषांदुःखंतदामय॥ त्याज्याभवंतःसर्वे
पिशिक्षणीयाश्चयत्नतः॥ ११॥ भवद्भिःशैवपूजार्थंगम्यतेयदिसादरं॥ सौम्यरूपधरैरेवगंतव्यंपुष्पपाणिभिः॥ १२॥ यथाशि
वार्चनेप्रीतिस्तथाशैवजनार्चने॥ प्रीतिःकार्यातयाप्रीत्याप्रीतोभवतिशंकरः॥ १३॥ पुराविष्णुप्रभृतिभिःकदाचिद्भूतलेगतं॥
तदाहिमालयप्रांतेददृशुःशिवपूजकं॥ १४॥ भस्मोद्धूलितसर्वांगंत्रिपुंड्रांकितमस्तकं॥ रुद्राक्षमालाभरणंपंचाक्षरपराय
णं॥ १५॥ बिल्वपत्रैर्महादेवंपूजयंतंप्रयत्नतः॥ पश्यंतंदेवदेवेशंमहेशंपूजितंमुदा॥ १६॥ एतादृशंविलोक्यैतेरोमांचां
कितविग्रहाः॥ शिवंसंपूज्यनत्वातंप्रणेमुरतिभक्तितः॥ १७॥ ततःकृतांजलिपुटाःविष्ण्वाद्यास्तत्रसंस्थिताः॥ शैवःस
माप्यपूजांतान्विष्ण्वादीनवलोकयन्॥ १८॥ कृतांजलिपुटान्देवान्दृष्ट्वासंतुष्टमानसः॥ प्रणम्यशैवबुध्यातान्कुश
लंपर्यपृछतः॥ १९॥ ततःप्रसन्नवदनोविष्णुःशिवपरायणः॥ उवाचवचनंचारुश्रद्धाभक्तिपुरःसरं॥ २०॥ यद्भवद्दर्श
नंजातंतत्तुपुण्येनभूयसा॥ अतःपरंतुकुशलमस्माकंभाविसर्वदा॥ २१॥ शिवैकशरणस्याद्यदृष्टंतत्पदपंकजं॥ अ
तःपरंतुकल्याणमस्माकंभाविसर्वथा॥ शिवभक्तस्यसंसर्गःकल्याणंतनुतेनकिं॥ शिवपूजापरैःशैवैःवह
वःपूर्वमुद्धृताः॥ २३॥ यस्यांगेभसितंभातिभवरोगभयापहं॥ तद्दर्शनंभावुकानिभूयासिजनयिष्यति॥ २४॥
यस्यास्तिशंकरेनित्यंभक्तिरव्यभिचारिणी॥ तद्दर्शनेनपापानिविनश्यंतिवहून्यपि॥ २५॥ त्रिपुंड्रबालचंद्रांकाः

रुद्राक्षफणिभूषिताः॥ शैवाः शिवैकशरणाः शिवस्यापरविग्रहाः॥२६॥ शिवनामामृतास्वादमोदमानामनीषिणः॥ भूरि
पुण्यप्रभावेन दृश्यंते खलु शांकराः॥२७॥ ईदृशी शांकरीनिष्ठा किंनानंततपःफलं॥ धन्योसि वयमप्येव धन्यास्मत्त्वद
र्शनात् शांकराणां दर्शनेन धन्याजाताः पुरायतः॥ अतो वयंच धन्यास्मतव शांकरदर्शनात्॥२९॥ इत्युदीरितमाकर्ण्य विष्णु
वाक्यं स शांकरः॥ कृतांजलिपुटो भूत्वा विष्णुं प्रत्याह शांकरः॥३०॥ भस्मभासितभालाय रुद्राक्षाभरणायते॥ चंद्रचूडकिरी
टाय नमः शैवाय विष्णवे॥३१॥ शैवोत्तमस्त्वमेवासि विष्णो धन्योसि सर्वथा॥ ज्ञातं यतस्त्वया तत्वं शैवं सम्यगसंशयं॥३२॥ सए
व धन्यः पूज्यश्च यतस्त्वं वेद शांकरं॥ अतः शंकरतत्वज्ञः पूजनीयो भवान्मया॥३३॥ विष्णुत्वं यत्प्रसादेन त्वया प्राप्तं स शंकरः॥ शंक
रोतु सदा तुभ्यं शिवैकशरणो भव॥३४॥ ॥यमउवाच॥ ॥इत्युक्तस्तद्वचः श्रुत्वा विष्णुरानंदपूरितः॥ प्रणम्याभ्यर्चितं शैवं जगाम
चतदाज्ञया॥३५॥ अतः शैवाः पूजनीयाः प्रयत्नेन स्वशक्तितः॥ शैवाः शिवैकशरणाः यतः शंकरविग्रहाः॥३६॥ स्वप्नेपि शैवधिक्का
रो न कर्त्तव्यं शुभेप्सुभिः॥ सत्यमेतत्सत्यमेतदुध्धृत्य भुजमुच्यते॥३७॥ शैवद्रोहो भ्रमेणापि न कार्य इति याच्यते॥ कदापि नैव कर्त्त
व्यायांचेयं विफला मम॥३८॥ क्रियते यदि मोहेन भवद्भिः शैवपीडनं॥ तदा तु नरकावासो ~~न किंतु भवतामपि॥ भविष्यति मसंदेहः स~~
~~त्यमेवोच्यते मया॥~~ अतो मध्रुवं॥३९॥ ममैव नरकावासो न किंतु भवतामपि॥ भविष्यति न संदेहः सत्यमेवोच्यते मया॥४०॥ भूयो
भूयोपि यत्नेन यांचेयं क्रियते मया॥ अतो भवंतः शैवानां पूजयंतु पदांबुजं॥४१॥ स देशोयत्नतस्त्याज्यो यत्र तिष्ठंति शांकराः॥
भवद्भिः क्रूररूपैस्तु यत्र गंतव्यमेव न॥४२॥ किमुक्तेनात्र बहुना सारं वचनमुच्यते॥ शैवाः पूज्याः प्रयत्नेन भवद्भिः साधु
साधनैः॥४३॥ ॥शिवउवाच॥ ॥इत्युक्तास्ते भटाः सर्वे यमेन विनयान्विताः॥ दुःखं विहाय तेकालं प्रणेमुर्भक्तिपूर्वकं॥
॥४४॥ एतस्मिन्नंतरे देवि दुंदुभिध्वनिपूर्वकं॥ नंदिध्वजसमाकीर्णं विमानं ददृशुर्दिवि॥४५॥ तद्विमानस्थमालोक्य तेजःपुं
जमयं द्विजं॥ यमः संतुष्टहृदयश्चित्रगुप्तमुवाच च॥४६॥ ॥यमउवाच॥ ॥चित्रगुप्त विमानस्थः कोयं याति वदस्व मे॥ कि
मनेन कृतं पुण्यं विचार्यादरपूर्वकं॥४७॥ ॥चित्रगुप्तउवाच॥ ॥किं वक्तव्यं मया कालकालकालस्य कीर्त्तनात्॥ पापि
नोपि प्रयास्यंति कैलासनिलयालयं॥४८॥ ब्राह्मणोप्ययमाचारं संत्यज त्सापि संगमात्॥ स्वकुलाचार संगस्तु त्यक्त एव

दुरात्मना॥ ४९॥ अनेनबहवःशिष्टाःब्राह्मणाएवसंहताः। एतद्धतब्राह्मणानांसंख्याकर्तुंनशक्यते॥ ५०॥ गावोहताब्राह्मणानामनेनैव
हिकोटिशः॥ वित्तापहारोबहुधाब्राह्मणानांकृतोमुनाबहुधानेनभुक्ताहियुवत्योब्राह्मणस्त्रियः॥ ५२॥ कदाचिद्युवतींदृष्ट्वास्व
कन्यामतिसुंदरीं॥ तामाकार्यप्रयत्नेनरेमेरतिविशारदः॥ ५३॥ तस्यामुत्पादयामासकन्यकाद्वयमुत्तमं॥ कालेनयौवनंप्राप्यस्थि
तंतत्कन्यकाद्वयं॥ ५४॥ ततःकामातुरोरेमेसुंदरंकन्यकाद्वयं॥ तत्रापिजनयामासपुत्रान्दुःसंगमप्रियान्॥ ५५॥ एवमन्यानि
कृत्वायंसंस्थितःपुरा॥ एवंस्थितोवनंप्राप्यकदाचिदयमुद्धतः॥ ५६॥ तत्रापश्यद्द्विजान्मार्गेदशवित्तकरान्मुदा॥ ततस्तान्हंतुमुद्यु
क्तःशस्त्रंजग्राहपाणिना॥ ५७॥ ततोजघानतेष्वष्टौद्विजानमितविक्रमान्॥ ततस्तान्स्तद्धतान्दृष्ट्वाविप्रौदुःखवशंगतौ॥ ५८॥
ततस्तंतादृशंदृष्ट्वाविप्रावुर्वरितावुभौ॥ तमेवहंतुमुद्युक्तौद्रव्यःलोभवशीकृतौ॥ ५९॥ ततस्तच्छस्त्रमादायद्विजौतौतंनिज
घ्नतुः॥ ताभ्यांहतःसपापिष्ठःपपातपृथिवीतले॥ ६०॥ तदावनचरःकश्चिच्छस्त्रपाणिरुपाययौ॥ तंविलोक्यजगादैवंप
तितोप्यवनीतले॥ ६१॥ आहरास्त्रंसंहरेतौप्रहरप्रहराधुना॥ इत्युक्त्वासजहौप्राणान्शस्त्रघातनिपीडितः॥ ६२॥ ततस्तद्वचना
द्देवतौहतौविप्रसत्तमौ॥ ततोगृहीत्वातद्द्रव्यंसययौविप्रघाततः॥ ६३॥ प्रहृष्टवदनोभिल्लोविप्रौनिक्षिप्यभूतले॥ तवाच्छाद्यमृदास्थू
लैरुपलैश्चमनोहरैः॥ ६४॥ आहरेत्यादितद्वाक्यंसर्वसाक्षीसदाशिवः॥ श्रुत्वापार्श्वस्थितान्प्राहगणान्प्रतिकृपानिधिः॥ ६५॥ ॥
श्रीमहादेवउवाच॥ ॥ रेरेसौम्यगणायाहिश्रृणुकौतुहलंवचः॥ ६६॥ यच्छ्रुत्वाभवतांचेतःप्रसादमुपगच्छति॥ अद्यकश्चिन्महा
पापीमृतोब्रह्मवधप्रियः॥ तत्कृतानांतुपापानांसंख्यानास्त्येवसर्वथा॥ ६७॥ तेनैवोक्तमिदंवाक्यंश्रृणुतद्वक्ष्यतेमया॥ आहरास्त्रं
संहरेतौप्रहरप्रहराधुना॥ ६८॥ इत्युक्त्वासमृतःपापीकृतब्रह्मवधःखलः॥ तस्मात्कानिनष्टानितद्वाक्योच्चारणात्तदा॥ ६९॥ आहरे
त्यादिवाक्यस्थंहरनामाघनाशकं॥ जातंहिमृतकालीनंसर्वपापविनाशकं॥ ७०॥ अतःपरंसंहरेतिवाक्यस्थंहरनामतः॥ तस्मैविन
ष्टपापायमोक्षंदास्याम्यसंशयं॥ प्रहरप्रहरेत्यत्रयन्नामद्वयमस्तितत्॥ मत्स्रजार्थमभूत्सत्यमुत्स्मृत्यभुजमुच्यते॥ ७२॥ आहरेत्यादिवा
क्यस्थहरनामचतुष्टयं॥ सर्वाभीष्टप्रदंसत्यमुपसर्गविनाकृतं॥ ७३॥ अबुद्धिपूर्वकंवास्तुबुद्धिपूर्वकमेववामन्नामोच्चरितंपुंसांमुक्ति
दंमृतिकालिकं॥ ७४॥ मृतिकालीनमन्नामस्मरणान्मोक्षमाप्नुहे॥ दास्यामिसत्यमेवेतिप्रतिज्ञेयंमयाकृता॥ ७५॥ अहरेत्यादिवाक्य

स्थ्यंनुपसर्गान्विहाययत्॥ राजतेमुक्तिदंनॄणांतन्मेनामचतुष्टयं॥७६॥ महापातकिनाप्युक्तमन्नाममृतिकालिने॥ तस्मैमोक्षंददा
त्येवस्वभावस्तस्यतादृशः॥७७॥ ममनामानियावंतितावतामपिसर्वथा॥ मुक्तिदत्वस्वभावोस्तितादृशान्येवतानिहि॥७८ मृतिकाली
नमन्नामस्मरणाद्बहुभिः पुरा॥ मोक्षःप्राप्तः किमेतत्तन्नचित्रंनामैवतादृशं॥७९॥ हरनामहरत्येवपातकानिबहून्यपि॥ यतःपापहरत्वेन
प्रसिद्धंनामतादृशं॥८०॥ सद्यःकृतमहापापोप्यंतकालशिवस्मृतेः॥ मोक्षंप्राप्नोत्यतःसौम्यतमिहानयसत्वरं॥८१॥ इत्युक्तःसम
हेशेनतमेवनयतिद्विजं॥ अतःपरंनतस्यास्तिदुःखलेशोपिसर्वथा॥८२॥ इत्युक्तंतद्वचंश्रुत्वायमःसंतुष्टमानसः॥ इत्युक्तंतद्व
चःश्रुत्वायमस्संतुष्टमानसः॥ श्रुतंकिंचित्रगुप्तोक्तमितिदूतानुवाचसः॥ ततःसविप्रःसंप्रापमामेवसुरपुंगवं॥८३॥ सोपिमांप्रापसुभगे
यमेनपरिपूजितः॥ अतएवातियत्नेनमदर्चनपरायणाः॥ ८४॥ निःश्रेयसंप्राप्नुवंतिसुलभेनवरानने॥ देवतासार्वभौमोहंमदेकशर
णात्मनां॥ ८५॥ मोक्षंदास्यामिसुभगेसत्यंसत्यंनसंशयः॥ रुद्राक्षांगदकंकणाःसितलसद्भस्मांगरागाःसदा॥ शंभोशंकरचंद्रशेखर
महादेवेतिसंवादिनः॥ मन्नामैकसुधासमुद्रलहरीकल्लोललोलेक्षणस्जिव्हाजिह्वविवर्जितामममहिताःसत्यंब्रवीमिप्रिये॥८६॥
॥ ॥ इतिश्रीशिवरहस्येउग्राख्येसप्तमांशेशिवगौरीसंवादेसप्तदशोध्यायः॥१७॥ ॥ श्रीउग्रायनमः॥ ॥ श्रीशिवउवाच॥
शृणुदेविकथामन्यांअतिसंतोषदामिमां॥ यत्कथाश्रवणादेवहृष्टचित्ताभविष्यसि॥१॥ पुरास्वर्गेशचीनाथंदृष्ट्वागुरुरतिप्रियं॥
उवाचवचनंवाग्मीसस्मितंप्रीतिपूर्वकं॥२॥ भूलोकतीर्थसेवार्थमयागतमनेकधा॥ दृष्टानिशिवतीर्थानिवेदोक्तान्येवसादरं॥
३॥ तीर्थेषुबहवोदृष्टाःशैवाएवशिवार्चकाः॥ तेषांतुदर्शनादेवसंतोषोवर्धतेमहान्॥४॥ भस्मोद्धूलितसर्वांगाःदृश्यंतेभाग्यतो
यदा॥ तदाममातिसंतोषोभवत्येवनसंशयः॥५॥ दृश्यंतेयत्रयत्रैवभस्मरुद्राक्षभूषणाः॥ तत्रतत्रतदातेषुशिवबुद्धिःप्रजायते॥
तत्संगतिंविहायात्रबलादागम्यतेमया॥ तत्संगतिपरित्यागःकर्तुमेवनशक्यते॥७॥ यथातत्रसुखंभूरितथानात्रममध्रुवं॥ शै
वानामेवसंगेनस्थातव्यमितिधीर्मम॥८॥ शैवाःशंकरतत्वज्ञाःबहवःसंतिभूतले॥ तेषांदर्शनमात्रेणनश्यत्यघकुलंक्षणात्
॥९॥ यदातेबिल्वपत्राद्यैरर्चयंतिमहेश्वरं॥ तदातदर्चनंसम्यक्दृष्ट्वैवस्थीयतेमया॥१०॥ तद्दर्शनेनसंतोषोजायतेयादृशः
स्तदा॥ तादृशस्त्वत्रसंतोषःकदापिनभविष्यति॥११॥ शिवलिंगार्चनंकृत्वाभक्तिश्रद्धापुरःसरं॥ प्रणम्यनर्त्तनंकृत्वास्तु

वंतिविविधैस्तवैः ॥१२॥ शिवनामामृतं पीत्वा संतुष्टाः संति सर्वदा ॥ तदुत्साहसमोत्साहो न केनाप्यनुभूयते ॥ १३ ॥ तेषां शिवा
र्चनं त्यक्त्वा कार्यमन्यन्न विद्यते ॥ प्रदक्षिणं विना ऽन्यत्र संचारो नाण्वपि दृश्यते ॥१४॥ शिवोत्कर्षप्रधानैव कथा संश्रू
यते हि तैः ॥ वेदार्थ एव सततं विचार्यः स्थीयते मुदा ॥१५॥ बहिस्तु तेषां गमनं बिल्वपत्रार्थमेव हि ॥ तदन्यार्थं तु गमनं तेषां नैव हि
दृश्यते ॥१६॥ एतादृशाः शिवाचारनिरताः शिवपूजकाः ॥ बहवः संति भूलोके शिवपारिषदा इव ॥१७॥ एवं सति मया दृष्टं अपूर्वं तद्वदाम्य
हं ॥ तच्छृणुष्वातियत्नेन कौतूहलकरं परं ॥१८॥ कश्चिद्बिल्वदलैरीशं संपूज्यात्यंतयत्नतः ॥ स्तोत्रैरनेकधा स्तुत्वा हृष्टचित्तो बभूव सः ॥
॥१९॥ तदा कश्चिद्द्विजस्तत्र समागत्य तमब्रवीत् ॥ एनमेवातियत्नेन किमर्थं पूजयत्ययं ॥ यथायमेवमेवान्याः पूजास्तिष्ठंति देवताः ॥
ता विहायातियत्नेन पूजयत्येव वै वद किं ॥२१॥ देवाः सर्वे समा एव तथापीनं विशेषतः ॥ एकमेवात्र संपूज्य मोहेनायं तु तिष्ठति ॥२२॥
इत्युक्तं तद्वचः श्रुत्वा स शैवः शिवपूजनं ॥ शीघ्रं समाप्य यत्नेन निर्ययौ शिवमंटपात् ॥ २३॥ ततो जग्राह तं विप्रं शिवानुत्कर्षवादिनं ॥
गृहीत्वा तस्य रसनामुत्खाय स जघान तं ॥२४॥ विष्ठानुलिप्तां रसनां मुखे तस्य ततः परं ॥ प्रक्षिप्य विष्ठया पूर्णं मुखं तस्य चकार सः ॥
ततः परमुपानद्भ्यां ताडयित्वा सदाननं ॥ शिश्नमुत्पाद्य तद्वक्त्रे प्रक्षिप्य ताडयत्ततः ॥२६॥ ततः परं तच्छरीरं चकर्त क्रोधसंकुलः ॥
ततः परं सुखं प्राप स शिवाराधनप्रियः ॥२७॥ एतादृशः स शैवेंद्रः शिवानुत्कर्षवादिनं ॥ हत्वैव चंडचंडालगृहमध्ये विनिक्षिपेत् ॥२८॥
ततः परं स चंडालैर्गर्तमध्ये निपातितः ॥ एवं बहुविधं दुःखं प्राप शंकरदूषकः ॥ २९॥ स शैवेंद्रस्तु तं हत्वा प्रापानंदमखंडितं ॥ ततः परं यम
भटैः स नीतोस्ति द्विजोधुना ॥३०॥ तस्य किं शासनं भावि तद्द्रष्टव्यं प्रयत्नतः ॥ वक्तुं वार्त्तामिमामिंद्र संप्राप्तोस्मि तवांतिकं ॥ ३१ ॥
त्वमप्यायाहि देवेंद्र सत्वरं सानुगोधुना ॥ द्रष्टव्यं कालसदनं अशैवभयदं सदा ॥३२॥ इति तद्वचनं श्रुत्वा देवेंद्रो गुरुणा सह ॥ ययाव
त्यंतवेगेन यमदर्शनकांक्षया ॥३३॥ ततस्तमागतं दृष्ट्वा यमो देवेंद्रमादरात् ॥ पूजयामास सगुरुमुपवेश्यासने शुभे ॥ तदानीमेव

क्षि

मामीयाः शिवानुत्कर्षवादिनं ॥ प्रोथयित्वैव शूलाग्रे तमानीय निचिक्षिपुः ॥३५॥ ततः परं चित्रगुप्तं विलोक्य स यमस्तदा ॥ कोयमित्या
ह विनयाच्चित्रगुप्तोप्युवाच तं ॥३६॥ ॥ चित्रगुप्त उवाच ॥ ॥ यमायं ब्राह्मणोनेन कृतं शंकरदूषणं ॥ शैवाय दुःखं दत्तं च महादेव
स्य निंदया ॥३७॥ देवाधिदेवमजरमनन्यसदृशं शिवं ॥ अन्यदेवसमत्वेन ज्ञात्वा मोहात्तमब्रवीत् ॥३८॥ इत्युक्त्वा चित्रगुप्तोक्तिं श्रुत्वा

कालोतिभीषणः॥क्रोधाविष्टोब्रवीत्दुष्टान्द्विजमत्रानयंत्विति॥३९॥ततःपुरःसनिक्षिप्तोयमदूतैर्भयाकुलैः॥ततःशूलमतिक्रूरोग्र
हीत्वातमताडयत्॥४०॥ततःशतघ्नीमादायकालस्तंक्रूरशासनः॥ताडयामासवेगेनक्रोधसंकुलितेक्षणः॥४१॥संतप्तायसपिंडेन
तमताडयदुत्थतं॥ततोविविधसंतप्तशस्त्रैश्चतमताडयत्॥४२॥ततःपरंप्रयत्नेनसंतप्तगिरिसंनिभं॥शतघ्नीसमुपादायतयासंता
डयद्द्विजं॥४३॥ततस्तमायसस्तंभेसंतप्तेवह्निशृंखलैः॥बध्वातमतिवेगेनबबंधक्रूरशासनः॥४४॥ततस्तत्ताडनायायंदूतानाम
यूतंयमः॥प्रेरयामासशूलाग्रैस्ताडयंत्वितिसत्वरं॥४५॥एवमादिश्यकालोयंसंदष्टाधरपल्लवः॥निश्वासवायून्विसृजन्नुवास
क्रूरशासनः॥४६॥तदेदृशंयमंदृष्ट्वादेवेंद्रोभयविह्वलः॥शनैरुवाचवचनंविनयाल्लयकोविदः॥४७॥ ॥देवेंद्रउवाच॥ ॥
यमस्यतुशिवावज्ञाकारणःशासनंकृतं॥किमेतावदुतान्यच्चशासनंवर्त्ततेवद॥४८॥इत्युक्तंतद्वचःश्रुत्वाबभाषेवचनंयमः॥तदास
गुरुदेवेंद्रप्रभृतीनांभयप्रदं॥ ॥यमउवाच॥ ॥किमद्यशासनंजातंशिवानुत्कर्षवादिनः॥आब्रह्मकल्पमेतस्यक्रूरंभाव्येन
शासनं॥५०॥शिवानुत्कर्षवादीयःससुरोस्तुनरोस्तुवा॥तस्याहमेवशास्तास्मिसोहमित्युग्रशासनः॥५१॥शिवभृत्योस्म्यहंतस्मा
च्छिवानुत्कर्षवादिनं॥पातयिष्यामिनरकेष्वशेषेषुनसंशयः॥५२॥सार्धार्बुदानिनरकाण्यतिदुःखप्रदानिहि॥तेष्वयंप्रत्यहंदुष्टः
पातनीयोनसंशयः॥५३॥किंचैतत्पितरःसंतिस्वर्गेधर्मवराजिते॥तेप्यानेयाहिनरकेपातनीयाःप्रयत्नतः॥५४॥सर्वदेवोत्त
मंशंभुंयोन्यथावक्तुमिच्छति॥तस्यापिनरकावासःसम्यगेवभविष्यति॥५५॥यःशिवंदेवदेवेशमन्यथावदतिस्फुटं॥तस्यवासो
स्तिनरकेष्वित्यत्रास्तिकिमद्भुतं॥५६॥भ्रमेणवाप्रमादेनयद्वामोहेनशंकरं॥जानातियोन्यथातस्यनरकेषुस्थितिर्ध्रुवा॥५७॥इं
द्राश्चबहवोजाताःशिवानुत्कर्षवादिनः॥नरकेष्वतिघोरेषुभुक्त्वातिष्ठंतियातनां॥५८॥इंद्रेंद्रोस्त्वस्तुचंद्रोवायद्वोपेंद्रोस्तुकिंमम॥

यदितेषुशिवद्रोहीनरकेपातयामितान्॥५९॥शिवद्रोहीयदिभवेदुपेंद्रोपिभ्रमात्तदा॥पातयिष्यामिनरकेष्वशेषेषुनसंशयः॥म
ह्यंमहेशभृत्यस्यकिमुपेंद्रःकरिष्यति॥शिवद्रोहीयदिभवेत्तदामच्छास्य एवसः॥६१॥शासनीयाःप्रयत्नेननशिवानुत्कर्षवा
दिनः॥इत्याज्ञाशंकरेणैवमह्यंदत्तापुरामुदा॥६२॥इत्युक्तंतद्वचःश्रुत्वादेवेंद्रोभयसंकुलः॥उवाचविनयेनैवकृतांजलि
पुटस्तदा॥६३॥ ॥इंद्रउवाच॥ ॥एतैःकिंकिंकृतंपापंनरकेपतितैर्यम॥तत्सर्वमविशेषेणवदमह्यंयथाक्रमं॥६४॥
शिवउवाच॥ ॥इत्युक्तंतद्वचःश्रुत्वायमोवक्तुमुपक्रमे॥अंगुल्यग्रेणतीक्ष्णेनदर्शयन्नुग्रलोचनः॥ ॥यमउवाच॥ ॥

हे

एतेसर्वेपिपापिष्ठाः शिवार्चनपराङ्मुखाः॥ एतेसर्वेपिपापिष्ठाः शिवस्मृतिपराङ्मुखाः॥ ६६॥ एतेशिवायसाष्टांगंप्रणामाक
रिणोभ्रमात्॥ नित्यंसंदग्धसर्वांगास्तिष्ठंत्येतान्विलोकय॥ ६७॥ यःशंकरायसाष्टांगंप्रणामान्नकरिष्यति॥ सदग्धांगोग्नि
कुंडेषुपतित्वेवहितिष्ठति॥ ६८॥ एतेत्यक्तशिवालापाःशिवध्यानपराङ्मुखाः॥ संदग्धशल्यकुंडेषुतिष्ठंत्येतान्विलोकय
॥ ६९॥ एतेसर्वेमहादेवकथाश्रवणवर्जिताः॥ भुजंगगर्तपतितातिष्ठंति त्येतान्विलोकय॥ ७०॥ एतेसर्वेप्रदोषेषुत्यक्तशंकर
पूजनाः॥ घोरवृश्चिककुंडेषुतिष्ठंति पतिताःसदा॥ ७१॥ एतेशिवान्नर्पितान्नफलदुग्धादिभोजिनः॥ क्रिमिपूयास्रकुं
डेषुतिष्ठंत्येतान्विलोकय॥ ७२॥ एतेशिवाभिषेकांबुपानधारणवर्जिताः॥ समूत्ररेतःकुंडेषुविलुंठंत्यविलोकय॥ ७३॥
त्यक्तपंचाक्षरजपाःसर्वेप्येतेदुराशयाः॥ संतप्तामेध्यकुंडेषुतिष्ठंत्येतान्विलोकय॥ ७४॥ त्यक्तरुद्रजपाह्येतेरुद्रा
ध्ययनवर्जिताः॥ संतप्तमूत्रकुंडेषुतिष्ठंत्ये०॥ ७५॥ एतेसर्वेपिमोहेनशिवानुत्कर्षवादिनः॥ बध्वान्दग्धायसस्तंभेष्वे
तान्पश्यानलार्चितान्॥ ७६॥ एतेसर्वेश्रुतिप्रोक्ताभस्मोद्धूलितवर्जिताः॥ तिष्ठंत्यजगरावर्त्तेदुःखार्तास्तान्विलोक
य॥ ७७॥ भस्मत्रिपुंड्ररहिताःसर्वेप्येतेशचीपते॥ दंश्यमाना नालोहकाकैस्तिष्ठंत्येतान्विलोकय॥ ७८॥ एतेसर्वेपि
देवेंद्रत्यक्तरुद्राक्षधारणाः॥ संतप्तवन्हिकुंडेतिष्ठंत्येतान्विलोकय॥ ७९॥ एतेदिवाफलान्नादिभोक्तारस्सोमवासरे॥
संततश्लेष्मकुंडेषुतिष्ठंत्येतान्विलोकय॥ ८०॥ काश्यांकृत्वापातकानियेतुकाशीबहिर्मृताः॥ तेसर्वेपतिताःसंतिवन्हि
कुन्डेषुपश्यतान्॥ काश्यामंतर्गृहेमध्येमलादीनिविहायये॥ मृताःकाशीबहिर्देशेतेतिष्ठंतिमलेन्हदे॥ एतेःकाश्याम
पिस्थित्वाविनाविश्वेशदर्शनं॥ भुक्तंकाशीबहिर्देशेमृतंरेतोह्रदस्थितैः॥ ८३॥ एतैःकाश्यामपिस्थित्वानकृतंभस्मधा
रणं॥ ततःकाशीबहिर्देशेमृतंपूयन्ह्रदस्थितैः॥ ८४॥ एतैःकाश्यामपिस्थित्वात्यक्तंरुद्राक्षधारणं॥ ततःकाशीबहिर्देशे
मृतंपूयह्रदस्थितैः॥ ८५॥ एतैःकाश्यामपिस्थित्वानकृतंभैरवार्चनं॥ ततःकाशीबहिर्देशेमृतंपूयह्रदस्थितैः॥ ८६॥
एतैःकाश्यामपिस्थित्वानकृतंशिवचिंतनं॥ ततःकाशीबहिर्देशेमृतंपूयह्रदस्थितैः॥ ८७॥ एतैःकाश्यामपिस्थित्वा
नकृतंशैवपूजनं॥ ततःकाशीबहिर्देशेमृतंपूयह्रदस्थितैः॥ ८८॥ एतेत्यक्तशिवाचाराःसर्वेत्यक्तशिवव्रताः॥ विविधे

स्वेषु तिष्ठंति नरकेष्ववलोकय ॥ ८९ ॥ सार्धार्बुदे पुनरकेष्वेतेषां प्रतिवासरं ॥ मुहुर्मुहुर्भवत्येव वासो दुःसहदुःखदः ॥ ९० ॥
अघौघाः संति यावंतस्तावतामपि सर्वदा ॥ भवत्येते पुनरकेष्ववश्यं वसति ध्रुवं ॥ १० ॥ एवं पश्यान्निकुन्डस्थं वार्त्ताप्यस्योच्य
ते मया ॥ यद्वार्त्ताश्रवणात्सद्यो रोमांचो पि भविष्यति ॥ ११ ॥ अयं कुरूटको नाम ब्राह्मणो वेदपारगः ॥ धनधान्यादिसंपन्नो गो
महिष्यादि पोषकः ॥ १२ ॥ कोटकोठर इत्येकः पुत्रो हि भवदुत्तमः ॥ स सर्वदा शिवाचारनिरतः शिवतत्परः ॥ १३ ॥ उद्धूलनत्रि
पुंड्राभ्यां रुद्राक्षैश्च विभूषितः ॥ स पूजयति पुष्पाद्यैः शिवलिंगं प्रयत्नतः ॥ १४ ॥ शिवनामामृतेनैव जिह्वा तेन पवित्रिता
॥ नित्यं शिवकथामेव शुश्राव प्रीतमानसः ॥ १५ ॥ सप्तवारं प्रयत्नेन प्रत्यहं गिरिजापतिं ॥ सबिल्वपत्रपुष्पाद्यैः पूज
यत्यतिभक्तितः ॥ १६ ॥ प्रणामान्बहुधा कृत्वा साष्टांगान्भक्तिपूर्वकं ॥ नृत्यं चकार यत्नेन शिवं वीक्ष्यातिहर्षितः ॥ १७ ॥
यदा भुंक्ते तदा भोज्यं यावदन्नमपेक्षितं ॥ सोपदंशं सपानीयं निवेदयति शंकरे ॥ १८ ॥ अनर्पितं महेशाय फलं वा जलमेव वा
॥ न गृण्हात्येव नियमान्नित्यं शपथपूर्वकं ॥ १९ ॥ भस्मनो भिभवो भावी त्युत्कृष्टमपि चंदनं ॥ न तेन लापितं भाले विभूत्युपरि
सर्वथा ॥ २० ॥ उद्धूलितगमालोक्य हृष्टो भवति सर्वदा ॥ करोत्युद्धूलनं भक्त्या नित्यमापादमस्तकं ॥ २१ ॥ नित्ये प्युद्धूलने तस्य
भक्तिः श्रद्धापि तादृशी ॥ वेदे तु महती भक्तिस्तस्योद्धूलनबोधके ॥ २२ ॥ स्वेदेनोद्धूलितं भस्म देहाद्गच्छति चेत्तदा ॥ पुनरुद्धूल
नं सम्यक्करोति विधिपूर्वकं ॥ त्रिपुंड्रधारणं सम्यक्करोति च ततः परं ॥ उद्धूलनत्रिपुंड्राभ्यां सर्वदापि स भूषितः ॥ २३ ॥
उद्धूलनांकितांगं यदा पश्यति तत्क्षणे ॥ दृष्ट्वा भानुं प्रयत्नेन शिवं ध्यात्वा सतिष्ठति ॥ २४ ॥ अयं केवलभस्मांगं विप्रं चंडाल
मेव वा ॥ दृष्ट्वा संतोषपूर्णांगः करोत्यभ्यर्चनं मुदा ॥ २५ ॥ नित्यं शिवकथामेव शृणोति प्रीतमानसः ॥ शैवैः सहैव सततं तिष्ठ
ति प्रीतिपूर्वकं ॥ २६ ॥ स कदाचित्प्रयत्नेन बिल्वपत्रार्जनप्रियः ॥ एकाकी बिल्ववृक्षाढ्यं वनं प्राप मृगावृतं ॥ २७ ॥ तत्र कश्चि
द्घोररूपः पिशाचः पर्वताकृतिः ॥ विलोक्य बालकं विप्रमाजगामातिवेगतः ॥ २८ ॥ तं तादृशं समायांतं पिशाचं वीक्ष्य दूर
तः ॥ जगाद वचनं बालो हसन्विस्मयपूर्वकं ॥ २९ ॥ ॥ काटकोटर उवाच ॥ ॥ पिशाचो यं समागत्य किं वा मह्यं करिष्य
ति ॥ मूर्खो यं नाभिजानाति प्रभावं भस्मनो ध्रुवं ॥ ३० ॥ परिवेषं करिष्यामि भस्मना सावधानतः ॥ परिवेषमतीत्याय

मार्गं तु शक्नुयात्कथं ॥ ३१ ॥ वेदास्तु वदंति बहुधा प्रभावं भस्मनः सदा ॥ जानंति महिमानं ते तदेव क्रियते मया ॥ ३२ ॥ मंत्रपूत
मिदं भस्म मम रक्षां करिष्यति ॥ सत्यं सत्यमिदं सत्यं संशयो नात्र सर्वथा ॥ ३३ ॥ न करिष्यति चेद्भस्म पिशाचाद्रक्षणं मम ॥
तदा भस्म कथं भूयात् घोरसंसारनाशकं ॥ ३४ ॥ संसारभर्त्सकं भस्म घोरपापौघभर्त्सकं ॥ ॥ ॥ ॥ ॥ ॥
भर्त्सनाद्भस्म इत्येवा श्रुतिरेव बलं मम ॥ ३५ ॥ वेदा एव प्रमाणं मे ब्राह्मणोत्तमजन्मनः ॥ तथा चेदं धृतं भस्म भयं मे नाश
यिष्यति ॥ ३६ ॥ इत्युक्त्वा भस्म संगृह्य शिवमंत्राभिमंत्रितं ॥ चकारोद्धूलनं विप्रः त्रिपुंड्रं च यथाविधि ॥ ३७ ॥ परिवे
षं ततश्चक्रे भस्मना त्रिर्निरास्तिकः ॥ ततः समागतो घोरः सोपि पिशाचो विकृताननः ॥ ३८ ॥ गृहीतुकामः तरसा धृत
मुष्टिः समुद्यतः ॥ परिवेषाद्बहिः स्थित्वा बलवान् दुःखितोप्यभूत् ॥ ३९ ॥ अंतः प्रवेष्टुं शक्तो पि न शशाकाभिमंत्रितं ॥
तद्भस्म मंडलं श्रुत्यं महाशैवकृतं शुभं ॥ ४० ॥ बहुधा परिवृत्यायं परिवेषं मुहुर्मुहुः ॥ अत्यंतमलसो जातः स्वेदापू
रितविग्रहः ॥ ४१ ॥ ततस्स दूरतः स्थित्वा परिवेषादुवाच तं ॥ बालक त्वया किं वा कृतमस्ति वदस्व मे ॥ ४२ ॥ अहं तु पर्व
ताकारः सिंहानामपि मर्दकः ॥ एतादृशस्य मे बालक कथं वा कुंठितं बलं ॥ ४३ ॥ एवं विलोक्य तं दुष्टं विलोक्यायं तं दुःखितं ॥
उवाच वचनं बालः स्मितपूर्वमतंद्रितः ॥ ४४ ॥ ॥ काष्ठकोठर उवाच ॥ रे रे पिशाच किं पूर्वं पापमस्ति कृतं त्वया ॥ येन प्राप्तं
पिशाचत्वं बहुदुःखप्रदायकं ॥ ४५ ॥ इत्युक्तं तद्वचः श्रुत्वा दुःखितस्तमुवाच सः ॥ न स्मर्यते मया पापमिति नत्वा पुनः पुनः
॥ ४६ ॥ इत्युक्तं तद्वचः श्रुत्वा दृष्ट्वा च विनयान्वितं ॥ मंत्रितं भस्म संगृह्य तदा च सः ॥ तस्यैव मूर्ध्नि स विनिक्षिपत् ॥ ४७ ॥
ततस्तद्भस्मयोगेन ध्वस्तपापः स तत्क्षणे ॥ दिव्यां स्वकांतनुं प्राप सूर्यमंडलसन्निभां ॥ ४८ ॥ ततः संतुष्टहृदयः पुष्पैः
संपूज्य बालकं ॥ नत्वा कृतांजलिपुटः कृतार्थोस्मीत्युवाच सः ॥ ४९ ॥ तं दृष्ट्वा विस्मितो बालस्तमुवाच वचो मुदा ॥ किं पा
तकं त्वया पूर्वं कृतमित्यनुमोदय ॥ ५० ॥ ततस्तं बालकं दृष्ट्वा स्मितपूर्वकमादरात् ॥ उवाच वचनं चारु प्रतिज्ञापूर्वकं मुदा ॥
॥ ५१ ॥ गंधर्वोहं द्विजश्रेष्ठ गानशास्त्रविशारदः ॥ मया दुःखं पुरा दत्तं शैवायामिततेजसे ॥ एवमुक्तं मया पूर्वं शैवमालोक्य बालक ॥
भस्मनाश्वेतमभवच्छरीरमिति मोहतः ॥ ५३ ॥ ततः स दुःखितः शैवो मां शशाप हि तत्क्षणे ॥ पिशाचतनुमाश्रित्य व्रजेति स्फुतिसत्व

रं॥तदाप्रभृतिघोरेयंपिशाचतनुरागता॥कल्पानामयुतंजातंदुःखंभुक्तंमयाबहु॥५५॥त्वत्प्रसादेनशैवेंद्रमुक्ताहंघोरपातका
त्॥त्वदीयोयंनसंदेहःपालनीयोस्मिसर्वथा॥५६॥पुनर्मह्यंमह्यंमंत्रपूतंभस्मदेहिद्विजोत्तम॥यद्योगेनमयाप्राप्तागांधर्वीतनुरुत्त
मा॥५७॥उपकारोमयाकार्यःस्वशक्त्याशैवपुंगव॥किंवातवेप्सितंवस्तुवदात्रभुवनत्रये॥५८॥शिवभक्त्याभवान्नित्यप्राप्तकामोसि
यद्यपि॥तथापिवदशैवेंद्रमत्तःसंतोषार्थमादरात्॥५९॥इत्युक्तंतद्वचःश्रुत्वाभस्मदत्वाभिमंत्रितं॥मयास्मृतःत्वमायाहीत्युवाच
प्रीतिपूर्वकं॥६०॥ततःसनत्वाशैवेंद्रंतथेत्युक्त्वाजगामसः॥ततःपरंविल्वपत्राण्याहर्त्तुंसमुपक्रमे॥६१॥सतत्रात्यंतरम्याणिबिल्व
पत्राणिसादरं॥गृहीत्वासवनंत्यक्त्वास्वगृहाभिमुखोययौ॥६२॥तदानीमेवसवितास्तंप्रापास्तगिरिंतदा॥बालःप्रदोषकालीनांपूजां
कर्त्तुंसमारभे॥सगोमयमयंलिंगंसंपाद्यात्यंतयत्नतः॥ध्यात्वासम्यक्महादेवंचकारावाहनंमुदा॥तदानींतत्पितापुत्रःक्वगतोसी
तिसंवदन्॥६६॥लिंगोपरिस्थितंदृष्ट्वातत्पितुश्चरणद्वयं॥चिच्छेदक्रूरशस्त्रेणक्रोधसंकुलितेक्षणः॥६७॥ततःसभूमौपतितःपि
तादुःखाभिकर्षितः॥हाहाहतोस्मिपुत्रेतिरुरोदाश्रूणिमोचयत्॥६८॥ततःसजिह्वांमुत्खायप्राणेभ्योपिवियोजयत्॥शिवलिंगेक
थंदत्तश्चरणेद्येतिसंवदन्॥६९॥एतस्मिन्नंतरेतस्यक्रोधःशांतोभवत्तदा॥ततःपूजांचकारायंशिवलिंगांतरेतदा॥७०॥तदानी
मतिसंतुष्टःशिवःप्रत्यक्षतांगतः॥विलोक्यशंकरंशैवस्तुष्टावबहुधास्तवैः॥ततोदेवोभवस्वेतिवरोदत्तःशिवेनहि॥शैवस्तद्वरमाक
र्ण्ययाचेन्यंवरंमुदा॥७२॥त्वय्यस्तुममगौरीशभक्तिरव्यभिचारिणी॥सैवभक्तिरभीष्टानिमह्यंदास्यत्यसंशयं॥७३॥किं
मेत्रिदशभावेनत्रिदशत्वंनमेमतं॥त्रिदशत्वंमयाप्राप्यंमहेशतवपूजया॥७४॥अधुनात्रिदशत्वंचममामास्तुमहेश्वर॥भूलो
कएवास्थित्वाहंतवपूजांकरोमह्यं॥७५॥अनेकजन्मतपसामानुषंजन्मलभ्यते॥तत्रास्तिद्विजजन्मेदंत्वत्प्रसादेनलभ्यते॥७६॥
तत्रापिभारतेवर्षेजन्मदुर्लभमेवहि॥ब्राह्मण्यंभारतेवर्षेत्वत्प्रसादेनलभ्यते॥७७॥तत्रापिभूरिभाग्येनत्वयिभक्तिःप्रजायते॥
सामेसदाभवत्वेवभक्तिरव्यभिचारिणी॥७८॥स्थित्वास्मिन्भारतेवर्षेतवपूजांकरोम्यहं॥पुष्पैर्नानाविधैर्दिव्यैर्बिल्वपत्रैश्च
कोमलैः॥७९॥अविच्छिन्नायथापूजाक्रियतेसर्वदामया॥तथावरंमहादेवदेहिमह्यंसुरोत्तम॥८०॥किंचमांप्रापयविभो
काशींदेवोत्तमेश्वर॥यत्रगत्वानशोचंतिदेवाइवशिवार्चकाः॥८१॥विश्वेशलिंगरूपेणयत्रत्वमधितिष्ठति॥तत्रास्तुमम

वा

देहस्यविनाशःशीघ्रमीश्वर॥८२॥तत्रत्वत्कृतनोःशंभोश्रीमत्पंचाक्षरःपरः॥देयस्त्वयाकृपासिंधोयेनमोक्षमवाप्नुयात्॥
॥८३॥भक्तिर्वैश्वेश्वरेलिंगेकाश्यांनिवसतोमम॥यथादृढाभवेन्नित्यंतथाकुरुमहेश्वर॥८४॥अयंवरोत्तमःशंभोवरोन्यो

यमउवाच

नैवयाच्यते॥अयमेववरोयस्मादनेकतपसाफलं॥८५॥इत्युक्तंतद्वचःश्रुत्वातथास्त्वित्यनुमोदितः॥तत्रैवांतर्दधेलिं
गेलिंगरूपीसदाशिवः॥८६॥तत्पिताशिवद्रोहीतत्पुत्रेणैवमारितः॥भुक्त्वाबहूनिदुःखानिस्वच्छस्यत्यत्रनसंशयः॥पश्यशं
करभक्तानांमाहात्म्यमतिशोभनं॥अगण्यद्विजंतातंहत्वाहृष्टोधितिष्ठति॥८८॥स्नेहाश्रयःपितातत्राप्ययंवेदविदुत्तमः
तथापिनिजघानैनंशिवद्रोहवशात्सुतः॥८९॥पितापितामहोवास्तुब्राह्मणःक्षत्रियोथवा॥शिवद्रोहीयदिभवेत्सहंतव्यइ
तिश्रुतिः॥९०॥शिवद्रोहिणमायांतंयादृशंतादृशंद्विजं॥हत्वामोक्षमवाप्नोतिऽस्त्यस्तिश्रुतिरनेकधा॥९१॥प्रबलश्चेच्छि
वद्रोहीयदिहंतुंनशक्यते॥तद्देशांतरंगच्छेदतियत्नेनसादरं॥तथाचश्रुतितत्वज्ञःशैवःस्वपितरंद्विजं॥श्रुतितत्वंविचा

च

र्यैवजघानश्रुतिपारगः॥९३॥शिवान्यसुरतुल्यत्वंयः शिवेवक्तुमिच्छति॥वियोजयतितंशीघ्रंप्राणेभ्योयंशिवार्चकः॥९४॥
शिवेशिवान्यदेवेभ्योन्यूनतायेनचोच्यते॥तत्तुंक्रकचैरेवविदारयतिसत्वरं॥९५॥दृष्टास्तेनतुयावंतःशिवानुत्कर्षवादिनः॥तावता
मपिसर्वेषांमुखानिज्वालयत्ययं॥९६॥दिवायेनभ्रमेणापिभुज्यतेसोमवासरे॥तमानीयक्रूरचित्तःकशाभिस्ताडयत्ययं॥९७॥योभस्म
धारणंत्यक्त्वाभोक्तुमिच्छतिमानवः॥तमानीयातियत्नेनपाषाणैस्ताडयत्ययं॥९८॥रुद्राक्षंधारणंत्यक्त्वायेनभ्रांत्यापितंनरं॥कारागृहेप्र
यत्नेनप्रवेशयतिसत्वरं॥९९॥शिवलिंगार्चनंत्यक्त्वाभोक्तुमिच्छतियोनरः॥तमानीयायसैःपिंडैःसंताडयतितत्तनुं॥
॥१००॥येननक्रियतेनित्यंप्रदोषेशिवपूजनं॥तमानीयातियत्नेनकंटकैस्ताडयत्ययं॥११॥शिवव्रतानित्यक्तानि
येननित्यंभ्रमादपि॥तंनरंशृंखलैर्बध्वागर्त्तेसंपातयत्ययं॥१२॥अधर्मनिरतान्दुष्टान्शासयन्नेवमास्तिकः॥बहून्ध
र्मरतानेवचकारोयंशिवार्चकः॥१३॥एवमेतादृशंश्रुत्वातद्देशाधिपतिर्धनी॥तद्दर्शनार्थंयत्नेनसामात्यःसमुपाय
यौ॥१४॥आगमात्यंतविनयात्सराजाकुसुमांजलिः॥पूजयामासशैवेंद्रंसामात्यःसानुगोमुदा॥१५॥ततःसशै
वस्तंदृष्ट्वाभस्मभूषितविग्रहं॥कुशलंकिंमुराजेंद्रेत्याचभाषेनताननं॥६॥ततःसराजाविनयाद्ब्राह्मणंप्योवाचसा

दरं॥ बृहस्पतिरिवात्यंतंश्राव्यंवचनमुत्तमं॥ ७॥ राजोवाच॥ ॥ शैवेंद्रत्वत्प्रसादेनकुशलंसर्वतोमम॥ राष्ट्रंसर्वंत्वत्प्रसादात्सु
खेनैवाधितिष्ठति॥ ८॥ यस्मिन्राष्ट्रेत्वयानित्यंस्थीयतेशैवपुंगव॥ तस्यराष्ट्रस्यसर्वस्यशुभमस्त्येवसर्वदा॥ ९॥ तवदर्शनमात्रेण
कृतार्थोस्मिशिवार्चक॥ आज्ञापयमयानित्यंकिंकर्तव्यंप्रयत्नतः॥ १०॥ इत्युक्तंतद्वचःश्रुत्वाबभाषेशैवपुंगवः॥ स्मितपूर्वंप्र
यत्नेनवाक्यमेवंमनोहरं॥ ११॥ ॥ काटकोटरउवाच॥ ॥ अप्रमादेनसततंभस्मनोद्धूलनंकुरु॥ त्रिपुंड्रधारणंसम्यक्कु
रुविध्युक्तमार्गतः॥ १२॥ रुद्राक्षधारणंनित्यंकुरुयत्नेनसादरं॥ शिवपूजांप्रयत्नेनकुरुबिल्वदलैर्मुदा॥ १३॥ शैवपंचाक्षरंनि
त्यंजपयत्नपुरःसरं॥ कालत्रयेप्यर्चयस्वाशिवलिंगंप्रयत्नतः॥ १४॥ रुद्राभिषेकपानीयपिबप्रत्यहमादरात्॥ भुक्ष्वान्नंप्र
त्यहंसर्वंशिवायविनिवेदितं॥ १५॥ शंकरायनिवेद्यैवपिबोदकमपिप्रियं॥ निवेदितंशंकरायतांबूलंस्वीकुरुप्रियं॥ १६॥ शय
नेभोजनेनित्यंशंकरंस्मरसादरं॥ नित्यंशिवकथामेवश्रृणुभक्तिपुरःसरं॥ शैवैःसहैवसततंवार्तांकुरुयथोचितं॥ शैवेभ्य
एवयत्नेनधनंदेहिस्वशक्तितः॥ १८॥ शैवान्दृष्ट्वातियत्नेनपूजयोत्थायसादरं॥ शैवेषुविनयेनैववार्तांकुरुकृतांजलिः
॥ १९॥ शैवेनकुरुकौटिल्यंप्रमादेनापिसर्वथा॥ शैवान्तोषययत्नेनपूजयासर्वदानृप॥ २०॥ अशैवानतियत्नेनसंहरा
दरपूर्वकं॥ अशैवसंश्रयंदेशंमापालयनराधिप॥ २१॥ शिवालयानियत्नेनकारयस्वस्वशक्तितः॥ शिवालयेषुसर्वे

षुकारयस्वार्चनंमुदा॥ २२॥ शिवस्थानेषुरम्याणिजलकुंडानिकारय॥ शिवस्थानेषुविभवाःकारणीयाःप्रयत्नतः
॥ २३॥ कारयस्वालंकृतानिशिवस्थानानिसादरं॥ नाट्यंकारयसर्वेषुशिवस्थानेषुसादरं॥ २४॥ दीपमालालंकृता
निशिवस्थानानिकारय॥ समार्जितानितिष्ठंतुशिवस्थानानिसर्वदा॥ २५॥ दुंदुभिध्वनिपूर्णानिशिवस्थानानिकारय
॥ २६॥ मापालयस्वतद्राष्ट्रमशिवालयं॥ मावलोकयतंदेशंयोदेशोस्त्यशिवालयः॥ २७॥ मावलोकययत्नेन
स्त्रियंत्यक्तशिवार्चनां॥ मावलोकयभृत्यांश्चाशिवचिन्हविवर्जितान्॥ २८॥ शिवव्रतानिसततंकुरुयत्नेनपार्थिव॥
नित्यंपार्थिवलिंगानिपूजयस्वनरेश्वर॥ २९॥ यस्तुपार्थिवलिंगानिपूजयिष्यतिसादरं॥ समहाभाग्यभुग्भू
त्वालभतेशांकरंपदं॥ ३०॥ यस्यास्त्यैश्वर्यमोक्षेछातेनयत्नेनसादरं॥ पूजनीयंविधानेनपार्थिवंलिंगमुत्तमं॥ ३१॥

राजन् पार्थिवलिंगस्य पूजनादेव सर्वथा ॥ मुक्तिकांता समायाति स्वयमेवातियत्नतः ॥ ३२ ॥ मृन्मयं लिंगमभ्यर्च्य महादारिद्र्यनाशकं ॥ तेन दारिद्र्यनाशस्तु भवत्येव हि सर्वथा ॥ ३३ ॥ अर्चितं पार्थिवं लिंगं नाशयत्स सपर्वतान् ॥ ददाति महदैश्वर्यं मुक्तिमंते ददाति च ॥ ३४ ॥ पार्थिवं लिंगमभ्यर्च्य शिवैकपरदैवतैः ॥ नान्यदित्याह जाबालस्तत्तथैव हि सर्वथा ॥ ३५ ॥ शिवान्यदेवतासक्तः पार्थिवं लिंगमर्चयेत् ॥ न तत्फलमवाप्नोति सत्यमित्याह गौतमः ॥ ३६ ॥ अतः शैवो भव प्रीत्या पार्थिवं लिंगमर्चय ॥ तत्पूजया तवेष्टार्थाः सिध्यंत्येव न संशयः ॥ ३७ ॥ कुबेरस्य धनं पूर्वं सर्वं विश्रवसाहृतं ॥ ततो दरिद्रः समभूत्कुबेरो धनवर्जितः ॥ ३८ ॥ ततोतिदुःखसंप्राप्य जगाम हिमवद्गृहे ॥ हिमवान् पूजयित्वा तं पप्रच्छात्यंतदुःखितं ॥ ३९ ॥ किमासीद्राजराजाद्य खिन्न एव हि दृश्यते ॥ खेदकारणमाचक्ष्व दुःखं त्यक्त्वा स्थिरो भव ॥ ४० ॥ एवं पृष्टो हिमवता बाष्पधारापरिप्लुतः ॥ जगाद वचनं दुःखी गतं धनमिति स्वकं ॥ ४१ ॥ तच्छ्रुत्वा हिमवान् धीरो विस्मितः पर्यपृच्छत ॥ कथं गतं किमद्यासीदित्येनं प्रत्युवाच सः ॥ ४२ ॥ पूर्वं द्युरन्यासक्तेन त्यक्तं सायं शिवार्चनं ॥ ततः परं मया रात्रौ न कृतं शिवपूजनं ॥ ४३ ॥ तदानीं विश्रवा नाम गंधर्वः कश्चिदागतः ॥ तेन सर्वं धनं नीतं तिरस्कृत्यैव मां ततः ॥ ४४ ॥ इत्युदीरितमाकर्ण्य कुबेरस्याहितावहं ॥ बभाषे वचनं धीमान् विचार्य च पुनः पुनः ॥ ४५ ॥ कुरुष्व पार्थिवं लिंगं षोडशांगुलमुन्नतं ॥ अनावृतासमावृत्तमामूलाग्रमनुन्नतं ॥ ४६ ॥ सार्धवत्सरपर्यंतं पूजयस्व विधानतः ॥ भस्मरुद्राक्षवीतांगो ब्रह्मचर्येण संस्थितः ॥ ४७ ॥ आनयस्वातियत्नेन हेमपद्मातिसादरं ॥ बिल्वपत्राणि हैमानि कैलासादन्यान्वहं ॥ ४८ ॥ रत्नैः पत्रैः बिल्वपत्रैः पूजयस्व महेश्वरं ॥ सहस्रं रचय प्रीत्या दीपानां लिंगसन्निधौ ॥ प्रदक्षिणशतं नित्यं सम्यगष्टोत्तरं कुरु ॥ प्रणामान्कुरु साष्टांगं नित्यमष्टोत्तरं शतं ॥ ५० ॥ परमान्नेन नैवेद्यं कुरु यत्नेन सादरं ॥ कर्पूरदीपानमलान् कुरु सार्धायुतत्रयं ॥ ५१ ॥ गंडोलागरुधूपेन प्रीणयस्व महेश्वरं ॥ चतुर्विंशतिसाहस्रं जप पंचाक्षरं सदा ॥ ५२ ॥ एवमेवान्वहं प्रीत्या सप्तपारं महेश्वरं ॥ पूजयस्वातियत्नेन शिवैकशरणः सदा ॥ ५४ ॥ सार्धवत्सरपर्यंतं एवं कृत्वा शिवार्चनं ॥ ततः कुरु यथाशास्त्रमुद्यापनमतंद्रितः ॥ उद्यापनविधिं वक्ष्ये शृणु सर्वं विशेषतः ॥ यत्कृत्वैवा विलंबेन लप्स्यसे धनमुत्तमं ॥ ५६ ॥

१० होमस्तत्वान्विधीयते।। ६९।।ततः सक्षीरमधुनाबिल्वपत्रान्वितेनच।।

उक्तमृल्लिंगमानेनसौवर्णीलिंगमुत्तमं।।संपादनीयंयत्नेननवलक्षणलक्षितं।।५७।।राजतान्यपिलिंगानितादृशानिचतुर्दश।।सं
पाद्यहेमवृषभाःकार्यापंचदशोत्तमाः।।५८।।सौवर्णायुतविंशत्याकार्यंलिंगंहिरण्मयं।।राजतान्यपिलिंगानितेनमानेनका
रयेत।।५९।।सुवर्णैरयुतैःकार्यएकैकोवृषभेश्वरः।।अन्यूनानतिरिक्तास्तुवृषभेषाःप्रकीर्त्तिताः।।६०।।एतानिसोपकरणा
न्युपादायततःपरं।।ग्राह्याणिपट्टवस्त्राणिश्वेतान्यत्युज्वलानिच।। ६१।।ततश्चश्रावणेमासिपौर्णमास्यांविशेषतः।।उद्याप
नंप्रयत्नेनकर्त्तव्यंविधिपूर्वकं।। ६२।।तत्पूर्वेद्युःप्रयत्नेनविप्राःषोडशशांकराः।।निमंत्रणीयाविधिवदर्घ्यदानपुरःसरं।।६३।।
आचार्यस्तत्रकर्त्तव्यस्तदन्यःशैवपुंगवः।।तत्रब्रह्मातुकर्त्तव्यस्तदन्यःशांकरोत्तमः।। ६४।।ततोलिंगानिदुग्धाद्यैरभिषिच्यय
थाविधि।।मंटपेस्थापनीयानिवितानाद्यैरलंकृते।।६५।।रात्रौपूजाप्रयत्नेनकर्त्तव्याविधिपूर्वकं।।रात्रौजागरणंकार्यमुपोष
णपुरस्सरं।।६६।।ततःप्रातःसमुत्थायस्नात्वापूजांविधायच।।ब्राह्मणैःसहसर्वैश्चशांभवैर्यत्नपूर्वकं।।मध्वाज्यशर्करायुक्तप
रमान्नेनसादरं।।होमःकार्यःप्रयत्नेनपंचाक्षरविधानतः।। ६८।।पंचलक्षंप्रयत्नेनहुत्वातुपरमान्नतः।।ततःसबिल्वमधु
~~नौबिल्वपत्रान्वितेनच~~।।साज्यसक्षीरमधुनाबिल्वपत्रान्वितेनच।।~~साज्यसक्षीरमधुनाबिल्वपत्रा~~।।७०।।एवंहोमःप्रयत्नेन
कर्त्तव्यस्तदनंतरं।।लिंगदानानिकार्याणिजाबालोक्तविधानतः।।७१।।भोजनीयाःप्रयत्नेनततःशांकरपुंगवाः।।७१।।
सुवर्णायुतमुत्कृष्टंदक्षिणात्रविधीयते।।७२।।वृषभान्वितलिंगानिदत्वावस्त्राणिचादरात्।।स्वकृतंकर्मकर्त्तव्यंमहादेवार्प
णंततः।।एवंकरोतियःसम्यक्महादेवस्यपूजनं।।तेनैवनिधयःप्राप्यानवाप्याश्चनसंशयः।।७४।। ।।काटकोठरउवाच।।
एवमुक्तोहिमवतासचकारतदाव्रतं।।ततःकुबेरःसंप्रापशीघ्रंसनिधयोनव।।७५।।तदाप्रभृतियत्नेनकुबेरःशिवपूजनं।।
सपरिवारंप्रयत्नेनकर्त्तुंसमुपचक्रमे।।७६।।अतःपार्थिवयत्नेननभवानपिशिवार्चनं।।कुरुयत्नेनसततंबिल्वपत्रादि
साधनैः।।७७।।सर्वदाशंकरस्यैवकुरुध्यानंप्रयत्नतः।।निरीक्ष्यप्रयत्नेनपूजितेश्रीमहेश्वरं।।७८।।जपपंचाक्षरंमं
त्रंअप्रमादेनसादरं।।तेनसर्वार्थसिद्धिस्तेभविष्यतिनसंशयः।।७९।।क्षणंधर्ममपिराजेंद्रशंकरध्यानवर्जितं।।माकुरुष्वो
पदेशोयंसर्वार्थफलदायकः।।८०।।सर्वसाधारणाधर्माइदानींमदुदीरिताः।।राजधर्मेणसततंपालयस्वस्वकाःप्रजाः।।
८१।।

॥ यमउवाच॥ ॥ इत्युक्तंतद्वचः श्रुत्वाराजाविनयपूर्वकं ॥ शैवंसंपूज्ययत्नेनजगामनगरंस्वकं ॥ तस्यशैवस्यजनकः शिवद्रोहवशादिह ॥
पातितोभूरिदुःखानिभुक्त्वातिष्ठतिदुःखितः ॥ ८३ ॥ अनेनचरणौदत्तौशिवलिंगोपरिभ्रमात् ॥ तावताप्यनुभूयंतेदुःखान्येतानिसर्वदा ॥
॥ ८४ ॥ ध्यायमानाग्निकुंडस्थोदृष्टव्योमन्मथस्त्वया ॥ स्तंभंदंदह्यमानंतंसमालिंग्याधितिष्ठति ॥ ८५ ॥ मन्मथोयंताड्यतेहिसंतप्तायसमुद्गरैः
खलैः ॥ कशाभिस्ताड्यतेतत्सैर्वक्रैर्दीर्घैश्चदारुणैः ॥ भिंडिवालैस्ताड्यंतेतथैरत्यंतमुन्नतैः ॥ संतप्तायसपिंडैश्चताड्यतेदुःखदायकैः ॥
॥ ८७ ॥ कथंवातप्तशूलाग्रैः प्रोथितोस्त्यतिदारुणैः ॥ कथंवातप्ततैलेनसिच्यतेदुःसहेनच ॥ ८८ ॥ अन्यदेवसमोरुद्रोदेवतोत्तमः ॥ इत्युवा
चपुराकामस्तस्येदंकर्मणः फलं ॥ ८९ ॥ सर्वदेवाधिदेवेशंशिवंयोमनुतेन्यथा ॥ तेनैवमेवदुःखानिप्राप्तव्यानिनसंशयः ॥ ९० ॥ महाविष्णुप्रिय
तमः शंबरारिस्तथाप्ययं ॥ भुक्त्वाघोराणिनरकान्यत्रतिष्ठतिसर्वदा ॥ ९१ ॥ नरकेपतितंश्रुत्वामन्मथंकमलापुरा ॥ दुःखाद्विष्णुमुवाचेदंव
चनंसारुदन्मुखी ॥ ९२ ॥ ॥ लक्ष्मीरुवाच ॥ ॥ तवप्रियतमोमारोनरकेपतितोहरे ॥ तमुध्दरात्तियत्नेनममदुःखंनिवारय ॥ ९३ ॥ [illegible]
इतितद्वचनंश्रुत्वासलक्ष्मीरमणोब्रवीत् ॥ दुःखंमाकुरुमुग्धेतिपुनरन्यदुवाचच ॥ ९४ ॥ अस्मदादिसमत्वेनशिवंवेदसमन्मथः ॥ देवाधिदेवः
सशिवः सोस्मत्तुल्यः कथंभवेत् ॥ ९५ ॥ अहंतुदेवदेवस्यमहादेवस्यसेवकः ॥ मत्तुल्यः सकथंभूयाच्छिवोदेवशिखामणिः ॥ ९६ ॥ सेव
कादधिकः सेव्यः सर्वसेव्योमहेश्वरः ॥ तथाचसेवकान्मत्तोमहानेवमहेश्वरः ॥ ९७ ॥ महेश्वरइतिख्यातःशिवएवतथासति ॥ सोस्मत्तुल्यः
कथंभूयात्सर्वदेवमहेश्वरः ॥ ९८ ॥ ब्रह्मेंद्रप्रमुखादेवाःशंकरस्यैवसेवकाः ॥ ततस्तत्तुल्यताशंभोःकथंभवतितद्वद ॥ सेव्यसेवकतु
ल्यंचेत्मनुतेमोहतस्तदा ॥ ससेवकोदंडनीयः सेव्येनभवतिध्रुवं ॥ १०० ॥ वयंब्रह्मादयोदेवानित्यंयद्द्वारकिंकरैः ॥ ताड्यंतेतेनदेवेनसमा
स्यामः कथंप्रिये ॥ १ ॥ अस्मान्नगणयत्येवकोपिशंकरकिंकरः ॥ तादृशःशंकरोस्माभिःकथंतुल्योभविष्यति ॥ २ ॥ मन्मथः समहादेवमस्मत्तु
ममन्यत ॥ अतस्तेनैवपापेननरकेपतितोध्रुवं ॥ ३ ॥ प्रार्थ्यतत्पदजयास्माभिःदेवत्वंकमलेऽमले ॥ तेनदेवेनतुल्यत्वंकथमस्मासुतद्वद ॥ ४ ॥ यो
न्यतुल्यतयादेवंभ्रमेणापिमहेश्वरं ॥ सघोरनरकावासंप्राप्नोत्येवनसंशयः ॥ ५ ॥ तदुध्दारायपत्नोपिमयाकर्तुंनशक्यते ॥ कृतोपिविफलोयत्नोभ
विष्यतिनसंशयः ॥ ६६ ॥ पतितोयमहस्तेयः श्रीमहादेवनिंदकः ॥ नतस्यनिर्गमस्तस्मात्कल्पकोटयर्बुदैरपि ॥ ७ ॥ यमस्तुदेवदेवस्यमहादेवस्यकिं
करः ॥ सकिंमद्वचनंश्रुत्वायातनांनकरिष्यति ॥ शासनीयः प्रयत्नेनपुत्रोपिशिवनिंदकः ॥ सशासनीयएवातः पालनीयाननतादृशः ॥ ९ ॥ तदुध्दारा

यस्तलक्षेंक्षिपतेद्यमयाप्रिये ॥ तदामयापितेनैवसहस्रेष्वयं भविष्यति ॥ १० ॥ तदुत्थारार्थमुद्युक्तं विष्णुंमांसयमःप्रिये ॥ अंशोवायमितिज्ञात्वाग्रहिष्यत्येवसर्वथा ॥ ११ ॥ गृहीत्वासतुलोकामांमोचयिष्यतिनध्रुवं ॥ तथस्तेपतितःकोपिनमुक्तोद्यापिदृश्यते ॥ १२ ॥ अतस्तत्रप्रयत्नस्तुनचलिष्यतिसर्वथा ॥ वसतूष्णीमितिप्राहलक्ष्मींलक्ष्मिपतिःस्वयं ॥ १३ ॥ अतोमत्थस्तपतितःसुरोपिशिवनिंदकः ॥ भुक्त्वातिष्ठतिघोराणिनरकाणिनसंशयः ॥ अनंतब्रह्महत्याभिःयावद्दुःखमवाप्यते ॥ ततोपिदुःखमधिकंप्राप्यतेशिवनिंदया ॥ १५ ॥ ब्रह्महत्याकृतायेनतस्यैवनरकेस्थितिः ॥ तद्वंशजानांनरकस्तेनपापेननध्रुवं ॥ १६ ॥ शिवनिंदाकृतायेनतस्यैवनरकस्तुन ॥ किंतुतद्वंशजानांचनरकेष्वेषुसंस्थितिः ॥ १७ ॥ शिवनिंदासमंपापंनभूतंनभविष्यति ॥ तयायत्प्राप्यतेदुःखंतद्दुःखमतिदुःसहं ॥ १८ ॥ शचीपतेसमुत्पन्नोयद्वंशेशिवनिंदकः ॥ तद्वंशोनरकेघोरेपतिष्यत्येवसर्वथा ॥ नसंरक्षतितद्वंशंशिवनिन्दादवानलः ॥ यद्वंशेकालकूटाभोजातोस्तिशिवनिंदकः ॥ तद्वंशेनरकेघोरेपतिष्यत्येवसर्वथा ॥ नसंरक्षतितद्वंशांशिवनिंदादवानलः ॥ यद्वंशेकालकूटाभोजातोस्तिशिवनिंदकः ॥ यस्यवंशेसमुत्पन्नःशिवनिंदापरोनरः ॥ तद्वंशेजलमप्यल्पंनग्राह्यंसर्वथाद्विजैः ॥ २१ ॥ तच्चंडालकुलेज्ञेयंयत्कुलेशिवदूषकः ॥ ततस्तत्रनुग्राह्यंजलान्नादिविवेकिभिः ॥ २२ ॥ शिवनिंदकवंशेचेज्जलंपिबतिमोहतः ॥ तप्तकृच्छ्रंतदाकार्यंप्रयत्नेनविवेकिना ॥ २३ ॥ त्यक्तभस्मत्रिपुंड्रस्यगृहेभुक्त्वातुमोहतः ॥ प्रायश्चित्तंद्वादशाब्दंकर्तव्यमतियत्नतः ॥ २४ ॥ त्यक्तलिंगार्चनगृहेयदिभुक्तंभ्रमाद्द्विजैः ॥ तदातद्द्विगुणंकार्यंप्रायश्चित्तमतंद्रितैः ॥ २५ ॥ त्यक्तभस्मत्रिपुंड्रस्ययदिदृष्टंमुखंभ्रमात् ॥ तदासूर्यंविलोक्याशुसवासाजलमाविशेत् ॥ २६ ॥ त्यक्तभस्मत्रिपुंड्रस्यस्पर्शोयदिभवेद्भ्रमात् ॥ स्नात्वोपवासःकर्तव्यःशिवपूजापुरःसरं ॥ २७ ॥ त्यक्तभस्मत्रिपुंड्रेणयद्यालापःकृतोभवेत् ॥ तदोपवासःकर्तव्यस्त्र्यहंवैब्रह्मवादिभिः ॥ २८ ॥ विभूतिधारणंत्यक्त्वायदिभुंक्तेभ्रमाद्द्विजः ॥ तदातदन्नंनिष्कास्यचरेच्चांद्रायणाष्टकं ॥ २९ ॥ शिवपूजांविहायैवयदिभुंक्तेभ्रमाद्द्विजः ॥ तदातदन्नंनिष्कास्यचरेच्चांद्रायणाष्टकं ॥ ३० ॥ रुद्राभिषेकपानीयमपीत्वायदिभुज्यते ॥ तदातदन्नंनिष्कास्यचरेच्चांद्रायणत्रयं ॥ रुद्राक्षधारणंत्यक्त्वायदिभुंक्तेप्रमादतः ॥ तदातदन्नंनिष्कास्यचरेच्चांद्रायणद्वयं ॥ ३२ ॥ यद्येकदैवतत्यक्तंप्रायश्चित्तमिदंतदा ॥ तत्त्यागसंख्ययाकार्यंप्रायश्चित्तंयथोचितं ॥ ॥ ३३ ॥ यद्विभुंक्तेमासमात्रंसंत्यक्त्वाभस्मधारणं ॥ तदातुसतुपापिष्ठोनप्रायश्चित्तमर्हति ॥ ३४ ॥ शिवपूजादिकंत्यक्त्वाप्येवमेवद्विजाधमः ॥ प्रायश्चित्तायुतेनापिशुधोनभवतिध्रुवं ॥ ३५ ॥ शिवपूजादिकंत्यक्त्वायेमृताःपापिनोजनाः ॥ तएवैतेषुनरकेष्वानीयानीयपातिताः ॥ ३६ ॥ अत्यंतसुलभंपुण्यंत्यक्त्वाशंकरपूजनं ॥ पतंतिघोरनरकेष्वेतेषुजडबुद्धयः ॥ ३७ ॥ भस्मोद्धूलनमायुष्यंत्यक्त्वाजाबालचोदितं ॥ पतंतिघोरन० ॥ ३८ ॥ त्यक्त्वात्रिपुंड्रमनघंकेवलंश्रुतिचोदितं ॥ पतंति० ॥ रुद्राक्षधारणंत्यक्त्वापापारण्यदवानलं ॥ पतंति० ॥ ४० ॥ श्रीरुद्राध्ययनंत्यक्त्वापापारण्यदवानलं ॥ पतंति० ॥ ४१ ॥ पंचाक्षरजपं

त्यक्त्वापापारण्यदवानलं॥ पतंति०॥४२॥रुद्राभिषेकपानीयपानंत्यक्त्वाघनाशकं॥पतंति०॥४३॥अरण्येबिल्वपत्राणिसंतितिरण्यानिभूरिशः॥तै
रीशोनार्चितस्तस्मादेतेनरकपातिनः॥४४॥अत्यंतसुलभंपुण्यंशिवइत्यक्षरद्वयं॥मुदानोच्चरितंतस्मादेतेनरकपातिनः॥४५॥मुक्तिकांतावश्यहे
तौशिवमंत्रेविराजति॥कथमेतेपतंत्यत्रनरकेमहदद्भुतं॥४६॥शिवमंत्रजपेनिष्ठायेषांनैवभविष्यति॥तेषांतुनरकावासोभविष्यत्येवसर्वथा॥४७॥शि
वमंत्रोष्णकिरणोनरकध्वांतनाशकः॥तास्मिन्सत्यपितंत्यक्त्वानरकेषुपतंत्यहो॥पुराकश्चिन्नराधीशोमित्रराडितिविश्रुतः॥युवापुष्टतनुर्गौरःसुं
दरःक्रूरशासनः॥४९॥तद्रक्षितगजाश्वानांनसंख्यादृश्यतेमया॥सर्वेसामंतभूपालास्तदाज्ञाकारिणःसदा॥५०॥एतादृशःसभूपालःस्व
पत्नीमतिसुंदरी॥तिरस्कृतस्वर्गनारींदृष्ट्वावचनमब्रवीत्॥५१॥ ॥राजोवाच॥ ॥आयाहिसुभगेभद्रेरात्रिर्जाताद्यभूयसी॥मह्य
मालिंगनंदेहियेनतुष्टोभवाम्यहं॥५२॥त्वदालिंगनमात्रेणसंतोषोयादृशोमम॥तादृशोममसंतोषोनान्यसंगेनजायते॥५३॥बहिःस्थि
त्वातवैवेदंसौंदर्यमतिसुंदरं॥अतिसौख्यकरंचित्तेध्यायतेसर्वदामया॥५४॥इत्युक्तंतद्वचःश्रुत्वासुभगासामनोहरा॥जगादवचनंचा
रुसद्योवैराग्यसाधकं॥५५॥ ॥सुभगाउवाच॥ ॥शंकरार्चनकालोयंक्रियतेशंकरार्चनं॥अयंनभोगकालोतोंमयानागम्यतेघु
ना॥५६॥कुरुत्वमपिराजेंद्रमहादेवस्यपूजं॥वृथाकालोननेयोयंपरलोकार्थिभिर्यतः॥५७॥जपेंद्रेद्रादयोदेवागंधर्वामुनिस
त्तमाः॥अस्मिन्कालेमहादेवंपूजयंतिप्रयत्नतः॥५८॥याजगज्जननीसाक्षाद्भवानीसापिशंकरं॥संपूजयतियत्नेनसाधनैर्बहुभि
र्मुदा॥५९॥कुमाराद्यागणाधीशाःसर्वेप्यत्यंतयत्नतः॥पूजयंतिमहादेवंब्रह्मविष्ण्वादिपूजितं॥६०॥गंधर्वोरगयक्षाद्याविवि
धैःसाधनैःशिवं॥पूजयंतिप्रयत्नेनसर्वदेवोत्तमोत्तमं॥६१॥अयंसोमान्वितःकालःत्रयोदश्यापिसंयुतः॥अतोधुनापूजनी
योमहादेवःप्रयत्नतः॥६२॥अर्धरात्रार्चनंशंभोसोमेप्रियकरंयतः॥ततःपूज्योधुनाशंभुर्बिल्वपत्रादिभिःसाधनैः॥६३॥त्वया
पिशंकरःसम्यक्पूजनीयःप्रयत्नतः॥विलंबंमाकुरुभ्रांत्यासावधानोभवाधुना॥करिष्यसिसदाभक्त्यायदिशंकरपूजनं॥तदाविपुलभोगां
स्तेलभ्योमोक्षस्त्वयाध्रुवं॥६५॥यमभ्यर्च्यमहादेवंवैकुंठप्रापकेशवः॥तमनाद्यंतमीशानंशंकरंशरणंव्रज॥६६॥सर्वदेवोत्तमःसांबःसर्व
देवशिखामणिः॥पूजनीयःप्रयत्नेनभुक्तिमुक्तिफलेप्सुभिः॥६७॥महद्भाग्यंतवास्त्यद्यतथाचबहुसाधनैः॥पूजनीयस्त्वमहादेवमप्रमा
देनसर्वदा॥६८॥दीपान्लक्षावधिप्रीत्याघृतकर्पूरराजितान्॥रचयस्वातियत्नेनमहादेवालयेसदा॥लक्षपूजांकुरुप्रीत्यारत्नैरन्वहमा

२ ईशोपिश्रीमहेशान्योनास्तिनास्त्येवसर्वथा ॥ राजन्माकुरुभोगेच्छांराज्येच्छामपिसंत्यज ॥ कुरुयत्नेनसततंश्रीमहादेवपूजनं ॥ ७७ ॥

दरात् ॥ हेमपुष्पैश्चविपुलैर्हेमबिल्वदलैरपि ॥ ७० ॥ शतवारंप्रयत्नेनदधिदुग्धाज्यमिश्रितं ॥ नैवेद्यमतियत्नेनशंकरायनिवेदय ॥ ७१ ॥ यद्यस्मि न्भाग्यसमयेशंकरंनार्चयिष्यसि ॥ तदाकदावादेवेशंशंकरः पूजयिष्यसि ॥ ७२ ॥ राजन्नैश्वर्यमखिलंतदेदंसफलंभवेत् ॥ यद्यर्चयिष्यसिप्रीत्यादेवदेवं महेश्वरं ॥ ७३ ॥ शिवानर्पितरत्नानिभविष्यंतिवृथातव ॥ तथाहेमादिवस्तूनिभविष्यंतिवृथाध्रुवं ॥ धिग्धिग्धिक्तवैश्वर्यंयन्नेशार्चनसाधनं ॥ विहा यचंदनंराजन्भस्मनांगेविलेपय ॥ ७५ ॥ विहायरत्नाभरणंकुरुरुद्राक्षधारणं ॥ श्रुणुशैवींकथांरम्यांकथामन्यांत्यजादरात् ॥ ७६ ॥ जपपंचाक्षरंशैवं महापातकनाशकं ॥ अनित्यमिदमैश्वर्यंराज्यंतेदुःखदायकं ॥ ७७ ॥ त्यजैश्वर्यमिदंशीघ्रंपूजयस्वमहेश्वरं ॥ मयिमाकुरुराजेंद्रस्नेहंदुःखैकसाधनं ॥ ॥ ७८ ॥ स्त्रीवशोनिरयंयातिसत्यमेवोच्यतेमया ॥ मांसग्रंथीस्तनावेतौकिमत्रास्तिवदस्वमे ॥ ७९ ॥ विदारितेमांसमात्रेनिःसरिष्यतिसर्वथा ॥ श्लेष्मागारं मुखंपश्यनेत्रेचनविनाश्रये ॥ विवेकीश्लेष्मपानार्थंयततेकिंवदस्वमे ॥ मूत्रागारोयोनिदेशःसतुदुर्गंधिसर्वदा ॥ तत्रयःकुरुतेप्रीतिंसएवहिवराधमः ॥ अतस्त्यजमयिप्रीतिंकुरुशंकरपूजनं ॥ ८३ ॥ भजनित्यंमहादेवंब्रह्मविष्ण्वादिसेवितं ॥ देवतासार्वभौमस्यमहादेवस्यसर्वदा ॥ ८४ ॥ विष्णुब्रह्मादयः सर्वेपूजांकुर्वंतियत्नतः ॥ यौवनभ्रांतचित्तेनत्वयात्यक्तंशिवार्चनं ॥ ८५ ॥ तत्त्यागेनरकावासोभविष्यतिनसंशयः ॥ राजन्शिवार्चनत्यागात्पतंतिनरके जनाः ॥ ८६ ॥ प्राप्तानिनरकाण्यत्थापुरात्यक्तशिवार्चनैः ॥ मित्रराडितितद्वाक्यंश्रुत्वावचनमब्रवीत् ॥ ८७ ॥ कथंज्ञानमिदंसर्वमितिसातमुवाचच ॥ अहंपूर्वभवेराजन्किराताधमकन्यका ॥ ८८ ॥ जातंहिजीवनंपूर्वंकाष्ठविक्रयणादिना ॥ नप्राप्तमन्नंसंपूर्णंकदाचिदपिसर्वथा ॥ ८९ ॥ वस्त्रस्यवार्त्ता कातत्रपत्रंतुपरिधीयते ॥ वनेगतंमयापूर्वंकाष्ठान्याहर्त्तुमेकदा ॥ ९० ॥ तत्रशैवोमयादृष्टःशिवपूजाविशारदः ॥ नाट्यंकृत्वास्थितंतेनशंकराग्रेप्र यत्नतः ॥ ९१ ॥ तंवीक्ष्यशंकरंनत्वामयानाट्यंकृतंतदा ॥ ततोदैवादभूत्तस्मिन्नरण्येमरणंमम ॥ ९२ ॥ तदानीमागतंमह्यंपुष्पकंस्वर्गलोकतः ॥ त न्नगत्वास्वर्गलोकेबहुकालंस्थितंमया ॥ ९३ ॥ ततोनराधिनाथस्यसंभूतमुदरेमया ॥ रंभाद्याश्चजिताःसर्वाःसौंदर्येणमयाध्रुवं ॥ ९४ ॥ सर्वदासुखमेवास्तिममदुःखंनकिंचन ॥ शिवप्रमाणनाट्याभ्यांनिरंतरसुखंमया ॥ ९५ ॥ प्राप्तमंतेमयामुक्तिःप्राप्तव्यासत्यमुच्यते ॥ अतीतानागत ज्ञानंमहादेवप्रसादतः ॥ ९६ ॥ ममजातमतःसर्वंस्मर्यतेनात्रसंशयः ॥ स्वमुखंदृश्यतेसम्यक्विमलेदर्पणेयथा ॥ ९७ ॥ तथातीतानागतार्थाःदृ श्यंतेसर्वदामया ॥ प्रणामनर्त्तनादीनिमहादेवस्यपूजनं ॥ ९८ ॥ ततस्तत्पूजयासर्वंमयेदंज्ञायतेध्रुवं ॥ जातिस्मरत्वंसौभाग्यंमोक्षश्चशिवपूज या ॥ ९९ ॥ प्राप्यतेनात्रसंदेहःश्रद्धस्वपृथिवीपते ॥ एकवारंनर्त्तनेनप्रणामेनचशंकरः ॥ १०० ॥ सौभाग्यमीदृशंमह्यंअतिकारुणिको ददौ ॥ मयालहर्निशंसांबःपूज्यतेबहुसाधनैः ॥ १ ॥ इदानींतुविशेषेणपूज्यतेपार्वतीपतिः ॥ इत्युदीरितमाकर्ण्यरोमांचिततनुस्तदा ॥

॥२॥ कोहंपूर्वभवेसर्वंवदेत्याहसभूपतिः॥ ॥सुमगाउवाच॥ ॥शूद्रस्त्वमसिराजेंद्र पूर्वजन्मनिदुर्बलः॥ अतिकुत्सितवृत्त्यैवजातंहितवजीवनं॥ क्रयार्थं
बिल्वपत्राणिसमानेतुंत्वयापुरा॥४॥ वनंप्रविष्टंगहनंसुबिल्वतरुसंश्रितं॥ तत्रैवबिल्वपत्राणित्रोटितानित्वयावने॥५॥ बहूनितानिसंबध्वापरावृत्तंत्वया
वनात्॥ मध्येमार्गंतदाचोराबहवःसमुपागताः॥६॥ तद्दर्शनेनभीतिस्ते बभूवप्राणहारिणी॥ सर्वाणिबिल्वपत्राणित्यक्त्वैवत्वरयात्वया॥७॥ प्रपलाय्यग
तंभीत्यातद्भयेनमृतंत्वया॥ त्यक्तानिबिल्वपत्राणिशिवलिंगेतुनार्मदे॥८॥ पतितानितदातेनसंतुष्टःपार्वतीपतिः॥ ततःपरंलिंगरूपीस्वयमेवमहेश्वरः॥९॥
कृपालुःपार्वतीयुक्तस्तवप्रत्यक्षतांगतः॥ वरःपृष्टस्त्वयाराजन् प्रत्यक्षेपरमेश्वरे॥१०॥ राज्यंदेहिमहादेवमुक्तिंचेतिप्रणम्यतं॥ ॥ततःसपार्वतीनाथःत
थास्त्वित्यनुमोद्यच॥११॥ तत्रैवांतर्दधेलिंगेबिल्वपत्राभिवेष्टिते॥ ततःपरंसमुत्पन्नंत्वयाक्षोणीश्वरोदरे॥१२॥ भुज्यतेराज्यभोगादिशंकरानुग्रहात्सदा॥
त्वयाज्ञात्वाबिल्वपत्रैर्नमहेशार्चनंकृतं॥१३॥ तथापिभाग्यमतुलंददौतुभ्यंसदाशिवः॥ एतादृशःकृपासिंधुःत्वयानाभ्यर्च्यतेशिवः॥१४॥ यत्प्रसादेन
सौभाग्यंप्राप्तमेवंत्वयाधुना॥ मोहंत्यजाधुनाराजन् पूजयस्वमहेश्वरं॥१५॥ नित्यमव्यभिचारेणशंकरंशरणंव्रज॥ इत्युक्तःसततोराजासंत्यक्त्वामोहम
न्वहं॥१६॥ अत्यंतंसावधानेनचकारशिवपूजनं॥ शिवस्थानानिबहुधाकारयामासभूपतिः॥१७॥ रत्नपुष्पैर्महादेवंपूजयामासयत्नतः॥ सुवर्ण
बिल्वपत्रैश्चदशलक्षमितैर्नृपः॥१८॥ पूजयामासयत्नेनहेमपद्मैश्चसंततं॥ अन्यैश्चपुष्पैरनिशंसंख्याहीनैर्महेश्वरं॥१९॥ पूजयामासयत्नेनबिल्व
पत्रैश्चकोमलैः॥ दीपान्लक्षावधिप्रीत्याददानन्वहमादरात्॥२०॥ नैवेद्यानिप्रयत्नेनसबहूनिददौनृपः॥ एवंशिवार्थमखिलंरत्नागारंनिवेद्यसः॥
॥२१॥ शिवमेवसदाध्यात्वास्थितःशिवपरायणः॥ ततस्तस्याभवत्पुत्रःशिवपूजापरायणः॥२२॥ तस्मिन्निधायतद्राज्यंसपत्नीकोवनंययौ॥ तत्रतेन
प्रयत्नेनबिल्वपत्रैर्महेश्वरः॥२३॥ पूजितःसततंभक्त्यासपत्नीकेनसादरं॥ नवानिबिल्वपत्राणिसंपाद्यगिरिजापतिं॥२४॥ पूजयित्वा
प्रणम्येशंनर्तनंचचकारसः॥ ततःकदाचित्संपूज्यबिल्वपत्रैःसदाशिवं॥२५॥ पंचाक्षरजपंकुर्वन्सपत्नीको मृतोनृपः॥ तदैवकरु
णासिंधुर्महेशोवीक्ष्यतंनृपं॥२६॥ सहस्रंप्रेषयामासगणानांपुष्पकान्वितं॥ ततःपुष्पकमारुह्यसपत्नीकोनराधिपः॥२७॥ अनेने
वहिमार्गेणगतःशंकरसंनिधिं॥ तदादुंदुभयोनेदुःपुष्पवृष्टिर्बभूवच॥२८॥ जगुर्गंधर्वपतयोननृतुश्चाप्सरोगणाः॥ सपूजितोम
याराजापुष्पैर्नानाविधैस्तदा॥२९॥ तदानीमेवमेवाहवचनंप्रीतमानसः॥ राजोवाच॥ ॥ यमशासययत्नेनशिवपूजापराङ्मु
खान्॥३०॥ अशैवानग्निकुंडेषुपातयस्वदुराशयान्॥ भस्मरुद्राक्षविमुखानग्नौप्रज्वाल्ययत्नतः॥३१॥ बहुधैवातियत्नेनस्तंबे

शि०७ बध्वाग्निश्शृंखलैः॥ इत्युक्त्वासययौपूर्वंसोत्साहैर्मुदितानन॥३२॥ बहुधैवैवमेवोक्तं बहुभिः शांकरैर्मुदा॥ यः शैवस्तस्यनियमात्पूजनंक्रियतेम उ-
१३८ या॥३३॥ शैवेद्वेष्टेममोत्साहोमहानेवहिजायते॥ रुद्राक्षधारणंभुत्यर्थंकेवलंभस्मधारणं॥३४॥ लिंगार्चनेनकेवलंचयस्यशैवः सउच्यते॥ तादृ
शस्यतुशैवस्ययः पूजांनकरिष्यति॥३५॥ सोप्यस्मिन्नरकेघोरेपतित्वातिष्ठतिध्रुवं॥ शंकरस्यप्रियः शैवस्ततः शैवार्चनंसदा॥ प्रयत्नेनैवक
र्त्तव्यंतेनतुष्यतिशंकरः॥ यस्यास्तिनरकाद्भीतिस्तेनकार्यंशिवार्चनं॥३७॥ शिवार्चनंचकर्त्तव्यंअप्रमादेनसादरं॥ पश्यैनंमलकुंडस्थंमूत्रपंक्तिमिभ
क्षकं॥३८॥ संतप्ततीक्ष्णशस्त्रौघैस्ताड्यमानमहर्निशं॥ अयंतुब्राह्मणः पूर्ववेदशास्त्रविशारदः॥३९॥ अनेनबहवोयागाः कृतास्वर्गार्थमाद
रात्॥ अनेनैवैकदादृष्टः शैवः शिवपरायणः॥४०॥ तंदृष्ट्वाप्राहवचनंअयमेवातिगर्हितं॥ अनेननियमेनेदंपूज्यतेभ्रांतचेतसा॥४१॥ भस्म
नांगमयंश्चैतंकरोतीतिभ्रमात्तदा॥ इत्युक्तंतद्वचः श्रुत्वाशैवोदुःखमुपागतः॥४२॥ अनेनाशिवलिंगस्यनाममनोच्चरितंमुदा॥ जगादेदमि
तिभ्रांत्यासंपूज्यतेतिच॥४३॥ श्रीसदाशिवलिंगस्यनामग्रहणमात्रतः॥ नश्यंतिपापगिरयोवज्रसंताडिताइव॥४४॥ भस्मनांगमयंश्चैतं
करोतीत्युक्तवानयं॥ नवेत्तिभस्ममहात्म्यमयंपापकृदुत्तमः॥४५॥ इत्युक्त्वातद्वचः श्रुत्वाशैवोदुःखमुपागतः॥ ततोश्रुपूर्णनयनः हाहाहे
तिरुरोदच॥४६॥ तदादर्दशराजेनंशांभवंशिवसंमतं॥ तादृशंखिन्नहृदयंतंदृष्ट्वाशैवपुंगवं॥४७॥ बभाषेवचनंराजादेवात्तत्रसमाग
तः॥ ॥राजोवाच॥ ॥किमासीदधुनाब्रह्मन्किंवादुःखस्यकारणं॥ दुःखंचेत्तवमद्राष्ट्रेरा[illegible]हानिर्भविष्यतीति॥ इत्युक्तंराज छ्र
वचनंश्रुत्वाशैवोत्तमस्तदा॥४९॥ प्र[illegible]श्यैनमनेनोक्तंवचस्तस्मैन्यवेदयत्॥ ततः सराजाधर्मज्ञानाहूयद्विजपुंगवान्॥५०॥ एत
स्यकीदृशीशास्तिः कर्त्तव्येत्यब्रवीत्तदा॥ ततस्तेब्राह्मणाः सर्वेधर्ममार्गप्रवर्त्तकाः॥५१॥ शूलारोपोस्यकर्त्तव्यः शीघ्रमीत्यूचिरेतदा॥ १३७
इतितद्वचनंश्रुत्वाधर्मज्ञः सनराधिपः॥५२॥ तस्मैचकारशीघ्रेणशूलारोपंप्रयत्नतः॥ शैवदुःखप्रदोमर्त्यः शिवपूजापराङ्मुखः॥५३॥ आ
ततायीतिविज्ञेयस्ततोहंतव्यएवसः॥ यथाततायिनंराजाहत्वाधर्मविदुत्तमः॥५४॥ ~~शिवदुःखप्रदोमर्त्यः~~ यात्येवनरकंघोरंयावदाचंद्रता
रकं॥ अतएवहिधर्मज्ञाः लोभमोहविवर्जिताः॥५५॥ अशैवानांप्रयत्नेनकुर्वंत्येवहिशासनं॥ तदादुःखमयंभुक्त्वातथात्रापिसमागतः॥५६॥ ए
तस्यबहुधान्यापिभविष्यत्येवयातना॥ कल्पकोट्ययुतंघोरेरौरवंसमुपाश्रितः॥५७॥ ततोयंपुल्कसोभूत्वाचंडालोपिभविष्यति॥ आलोकयेता
न्संतप्तांस्ताड्यमानानयोघनैः॥५८॥ तप्तस्तंभान्समालिंग्यसंस्थितान्दुःखितान्सदा॥ उपहासाः कृताह्येतैः शैवस्यबलतः पथितेनदुःखमि

ह्यभुक्त्वाति[illegible]त्यैते हि सर्वदा ॥ भिंडिपालैस्ताड्यमानान्पश्यैतान्सावधानतः ॥ ६० ॥ एतैस्तु शैवधिक्कारः कृतो मोहेन
सत्वरं ॥ संतप्तांगारभ्राकटस्थितानेतान् विलोकय ॥ ६१ ॥ एतैर्गर्वेण न कृतं शैवानां वंदनं मुदा ॥ विदार्यमाणान्क्रकचैः प
श्यैतान्कालकुंडस्थांस्तप्तचक्रांकितान्मुदा ॥ पश्यैतान्पूयकुंडस्थान् एतैरेव दुरात्मभिः ॥ ६५ ॥ शंकरायानिवेद्यैव
जलं पीतं प्रमादतः ॥ पश्यैतान्मलकुंडस्थानेतैरेव दुरात्मभिः ॥ ६६ ॥ शिवानर्पितमेवान्नं भुक्तं यत्नपुरःसरं ॥ पश्यैतान्मू
लकुंडस्थान् एतैरेव दुरात्मभिः ॥ ६७ ॥ शिवायानर्पितं दुग्धं साज्यं पीतं प्रयत्नतः ॥ पश्यैतान्मलकुंडस्थान् एतैरेव दुरा
त्मभिः ॥ ६८ ॥ शिवतीर्थमपीत्वैव भुक्तं यत्नपुरःसरं ॥ पश्यसंतप्तशस्त्राग्रे भ्रमंतमति दारुणे ॥ ६९ ॥ अनेन न कृताः पूर्वं
शंकराय प्रदक्षिणाः ॥ पश्यैतान्पातितान्तप्तलोहस्तंभे भयप्रदे ॥ ७० ॥ शिवायन कृता ह्येतैः साष्टांगनतयो भ्रमात् ॥ प
श्यैतान्मलकुंडस्थान् समूत्रमलभक्षकान् ॥ ७१ ॥ एतैः पुरा दिवा भुक्तं सर्वदा सोमवासरे ॥ मूत्रगर्तस्थितान्पश्य नित्यं
संतप्तमूत्रपान् ॥ ७२ ॥ त्रिपुंड्रधारणं त्यक्त्वा भुक्तमेतैर्दुरात्मभिः ॥ पश्यैतान्मलकुंडस्थान् समूत्रमलपूयपान् ॥ ७३ ॥
शिवार्चनं विहायैव भुक्तमेतैर्दुरात्मभिः ॥ पश्यैतान्क्रिमिकुंडस्थान् क्रिमिभणतत्परान् ॥ ७४ ॥ रुद्राक्षधारणं त्यक्त्वा
भुक्तमेतैर्दुरात्मभिः ॥ अग्निकुंडादिकुंडस्थानशैवान्पश्य सादरं ॥ ७५ ॥ शूलादिभिस्ताड्यमानां सर्वदा दुःखबृंहि
शै तान् ॥ अशैवाः संति यावंतः पाताले पृथिवीतले ॥ ७६ ॥ तावंतो ह्येषु तिष्ठंति नरकेषु विलोकय ॥ अशैवा बहवो भूमौ भ
विष्यंति कलौ युगे ॥ ७७ ॥ ते पातनीया यत्नेन नरकेषु मया ध्रुवं ॥ अन्यासमरसं मं ज्ञात्वा ये तिष्ठंति महेश्वरं ॥ ७८ ॥ अ
शैवास्त इति ज्ञेयास्ते घोरनरकाश्रयाः ॥ शिवार्चनं विहायान्यं येर्चयंति नराधमाः ॥ ७९ ॥ अशैवास्त इति० ॥ शिवस्यै
वाति यत्नेन येन पश्यंति सादरं ॥ अशैवास्त० ॥ ८० ॥ येन कुर्वंति यत्नेन त्रिकालं शंकरार्चनं ॥ अशै० शिवमेवाति यत्नेन ये
न पश्यंति ये सदा ॥ अशैवा० ॥ ८५ ॥ शिवस्यैव कथां पुण्यां ये न शृण्वंति भक्तितः ॥ अशैवा० ॥ ८६ ॥ शिवस्यैवाति यत्नेन नाम
नोच्चारयंति ये ॥ अशैवा० ॥ ८७ ॥ शिवमेवाति यत्नेन स्तुवंति सदैव ये ॥ अशैवास्त इति ज्ञेयास्ते घोरनरकाश्रयाः ॥ ८८ ॥
येन कुर्वंति सततं केवलं भस्मधारणं ॥ अशैवा० ॥ ८९ ॥ येन कुर्वंति सततं भस्मनोद्धूलनं मुदा ॥ अशैवा० ॥ ९० ॥ येन कु

वींतिसदैवये॥ अशैवास्त इतिज्ञेयास्ते घोरनरकाश्रया॥ ८८॥ येनकुर्वंतिसततं केवलंभस्मधारणं॥ अशैवा०॥ ८९॥ ये
नकुर्वंतिसततंभस्मनोद्धूलनंमुदा॥ अशैवा०॥ ९०॥ येनकुर्वंतिसततंगलेरुद्राक्षधारणं॥ अशैवा०॥ ९१॥ येनकुर्वंति
सततंरुद्राध्यायजपंसदा॥ अशैवा०॥ ९२॥ येनकुर्वंतिसततंपंचाक्षरजपंसदा॥ अशैवा०॥ ९३॥ दत्तंजगंहुतंतपंनशिवा
यार्पयंतिये॥ अशैवा०॥ ९४॥ येनकुर्वंत्यहरहःशिवायेनर्त्तनंमुदा॥ अशैवा०॥ ९५॥ येभुंजतेफलान्नादिशंकरानर्पि
तंसदा॥ अशैवा०॥ ९६॥ नित्यमव्यभिचारेणशिवभक्तानयेमुदा॥ अशैवा०॥ ९७॥ सर्वदासर्वभावेनशिवनिष्ठा
नयमुदा॥ अशै०॥ शिवनिर्णेजनजलंनपिबंतिमुदातुये॥ अशैवा०॥ ९९॥ नभोजयंतियेशैवं क्षीराज्यादिभिराद
रात्॥ अशैवा०॥ १००॥ नतोषयंतियेशैवंस्वशक्त्याद्रव्यदानतः॥ अशैव०॥ १॥ अत्युत्कृष्टंशिवक्षेत्रंयेन्यक्षेत्र
समंविदुः॥ अशैवा०॥ २॥ शिवयात्रांविहायान्यांयात्रांकुर्वंतियेमुदा॥ अशैवा०॥ ३॥ शिवैकशरणायेनमनोवाक्काय
कर्मभिः॥ अशैवास्तइति ज्ञेयास्ते घोरनरकाश्रयाः॥ ४॥ ईदृशानामशैवानांनरकेभ्योननिर्गतिः॥ अनेकब्रह्म
कल्पेषुगतेष्वपिनसंशयः॥ ५॥ एतेषांकोटिशोजाताब्रह्मकल्पास्तथाप्यमी॥ ननिर्गच्छंतिघोरेभ्योनरकेभ्यो
ननिष्कृतिः॥ ६॥ ध्वस्तएवघटोभूयोयदिकर्मक्षयोभवेत्॥ अशैवानांतदाप्येभ्योनरकेभ्योननिर्गतिः॥ ७॥ भ
स्मनादग्धमेवान्नंयदिपुष्टिकरंभवेत्॥ अशैवानांतदाप्येभ्यो०॥ मृतोदग्धोभस्मभूतोयदिजीवतिमानवः॥
अशैवानांतदाप्येभ्योनरकेभ्योननिर्गतिः॥ ९॥ सुगंधंपुष्पमुत्कृष्टंगमनेयदिजायते॥ अशैवानां०॥ १०॥ यदिस्वभा
वतोवन्हिर्भवत्यत्यंतशीतलः॥ अशैवानां०॥ ११॥ यदिस्वभावतःशैत्यंजलंत्यजतिसर्वदा॥ अशैवानां०॥ १२॥
पश्चिमायांदिशिस्वेच्छंयदिभानुरुदेष्यति॥ अशैवानां०॥ यदिस्वभावतःशैत्यंजलंत्यजतिसर्वदा॥ यद्ययंदेव
निलयःसमेरुर्दक्षिणादिशि॥ अशैवानां०॥ १४॥ क्षीराब्धिप्रमुखाःसर्वेसमुद्रायदिसंगताः॥ अशैवा०॥ १५॥ पा
तालेयदिभूमौस्याद्भूमिःपातालगायदि॥ अशैवानांत०॥ १६॥ जलंवन्हिर्यदिभवेद्वन्हिर्यदिजलंभवेत्॥ अशै०॥
॥ १७॥ यदिवायुर्भवेत्तेजोयद्याकाशोजलंभवेत्॥ अशैवा०॥ १८॥ बहुनोक्तेनकिंवाक्यमेकंसत्यमुदीर्यते॥

अशैवानांअघोरेभ्योनरकेभ्योननिर्गमः॥१९॥ अतःप्रयत्नतोनित्यंकर्त्तव्यंशंकरार्चनं॥ शैवोभूत्वाशिवोनित्यंभजनीयःप्रयत्नतः॥२०॥
आर्यावर्त्तेपुराकश्चिद्द्विजोवेदांतपारगः॥ शिवैकशरणोनित्यंशिवपूजापरायणः॥ २१॥ रुद्राक्षमालाभरणोभस्मोद्धूलितविग्रहः॥ भ
स्मत्रिपुंड्रनिटिलःशिवध्यानपरस्थितः॥ २२॥ एतादृशंद्विजंश्रेष्ठंकश्चित्षोडशवार्षिकः॥ वेदाध्ययनसंपन्नोददर्शवनमध्यगं॥२३॥
तदानींतंद्विजंदृष्ट्वाशिवपूजारतंमुदा॥ प्रणम्यविनयाद्वाचमुवाचसकृतांजलिः॥२४॥ स्वामिन्सर्वज्ञविप्रेंद्रमोक्षोपायंवदस्वमे॥
प्रपन्नोस्मिकृपासिंधोशिक्षयस्वयथोचितं॥ २५॥ इतितद्वचनंश्रुत्वाशिवपूजांसमाप्यसः॥ उवाचवचनंचारुसर्वलोकहिताव
हं॥ २६॥ ब्राह्मणश्रुणुमद्वाक्यमप्रमादेनसादरं॥ श्रुतिसिद्धंवदिष्येहंमोक्षोपायमनाकुलं॥ २७॥ यामिनीपश्चिमेयामेकुरु
शंकरचिंतनं॥ ततःशौचादिकंकृत्वाकुरुस्नानंप्रयत्नतः॥ २८॥ स्नानकालेमहादेवंस्मरसांबमतंद्रितः॥ परिधायततोवस्त्रंभ
स्मनोद्धूलनंकुरु॥ २९॥ ततःशिरोललाटादौयथामंत्रंयथाक्रमं॥ त्रिपुंड्रधारणंश्रौतंकुरुकेवलमादरात्॥ ३०॥ त्रिपुंड्रधा
रणात्पूर्वंतदनंतरमेववा॥ विप्रमृच्चंदनादीनिललाटादौनलापय॥ ३१॥ विप्रजाबालमार्गेणकुरुरुद्राक्षधारणं॥ ततःकुरुयथायो
ग्यंसंध्यांदेवींततोजप॥ ३२॥ ततःकुरुयथायोग्यंहोममाज्यादिसाधनैः॥ ततोयत्नेनविधिवन्महादेवार्चनंकुरु॥ ३३॥ महादेवस्य
पूजायांसावधानःसदाभव॥ रुद्राध्यायेनसततमभिषेकंकुरुप्रभो॥ ३४॥ बिल्वपत्रैर्महादेवंपूजयस्वातिभक्तितः॥ शंभोःपंचा
क्षरेणैवबिल्वपत्रार्पणंकुरु॥ ३५॥ पंचाक्षरोमहामंत्रःसर्वमंत्रशिरोमणिः॥ तेनसंपूजितःशंभुर्भुक्तिंप्रयच्छतिवैदिकोयंमहामंत्रस्त
तोवैदिकपूजनं॥ शिवप्रियंकरंयस्मात्तेनपूजयशंकरं॥ ३७॥ फलेनान्नेनवाशंभोःकुरुनैवेद्यमादरात्॥ प्रदक्षिणविधानेनकुरु
सम्यक्प्रदक्षिणं॥ ३८॥ साष्टांगान्कुरुयत्नेनप्रणामान्श्रीमहेशितुः॥ शंकराग्रेप्रयत्नेनकुरुनर्त्तनमादरात्॥ ३९॥ पश्यनित्यंप्रय
त्नेनपूजितंसांबमीश्वरं॥ पिबयत्नेनसततंशिवनिर्णेजनोदकं॥ ४०॥ एवमेवप्रयत्नेनमध्यान्हेपिमहेश्वरं॥ बिल्वपत्रादिभिःसम्यक्पू
जयस्वातियत्नतः॥ ४१॥ सायंकालेपियत्नेनपूजयस्वैवमीश्वरं॥ पूजांप्रदोषकालीनांदृष्ट्वाहृष्टोभवद्विजः॥ ४२॥ शैवंपंचाक्षरंशुद्धं
जपयत्नपुरःसरं॥ निवेद्यशंकरायान्नंततोभुंक्ष्वयथोचितं॥ ४३॥ श्रुणुयत्नेनसततंमहादेवकथाःशुभाः॥ निरंतरमतिप्रीत्याकु
रुशैवाभिवादनं॥ ४४॥ स्वशक्त्यापुष्पपत्राद्यैःशैवानांपूजनंकुरु॥ दूरेपियदितिष्ठंतिशैवाःशंकरपूजकाः॥ ४५॥ तत्रापिगत्वाय

त्नेनकुरुशांकरपूजनं॥ कुरुसल्लापमनिशंशांकरैःसहसर्वदा॥ ४६॥ मासंत्यजभ्रमेणापिद्विजशांकरसन्निधिं॥ कु
रुप्रीतिंप्रयत्नेनशांकरेष्वेवसादरं॥ ४७॥ सदाशिवकृतांशिक्षांशिरसास्वीकुरुद्विज॥ शिवबुद्धिंकुरुप्रीत्याशैवेपुस
तंतंद्विज॥ ४८॥ सहसाशांकरास्तुभ्यंतथानोपदिशंतिते॥ तथापिशैववार्त्तायासैवपापापनोदिनी॥ ४९॥ शैवाः
शांकरतत्वज्ञाःवस्तुतोदुर्लभाभुवि॥ तादृशान्सावधानेनपूजयस्वस्वशक्तितः॥ अशैवायत्नातेस्तुतितन्नमाव
समावस॥ अशैवसंगमोदुष्टोनरकावाससाधनं॥ ५१॥ अशैवंपथिवान्यत्रकदाचिद्यदिपश्यसि॥ तदातुभस्मनांग
निसंमृज्यार्कंविलोकय॥ ५२॥ सायमुद्धूलनंकृत्वाकुरुशांकरपूजनं॥ प्रदक्षिणनमस्कारनर्त्तनानिकुरुप्रियान्
॥ ५३॥ जपपंचाक्षरंनित्यंरात्रावप्यातियत्नतः॥ शिवस्यसंनिधावेवशयनंकुरुसादरं॥ ५४॥ उद्धूलनंत्रिपुंड्रंचकृत्वे
वशयनंकुरु॥ यज्ञोपवीतवन्नित्यंकुरुरुद्राक्षधारणं॥ ५५॥ उद्धूलनंविहायांबुतृषितोपिनसंपिब॥ उद्धूलनं
विहायान्नंमामाभुंक्ष्वद्विजोत्तम॥ ५६॥ उद्धूलनंत्रिपुंड्रंचतथारुद्राक्षधारणं॥ लिंगार्चनंचविधिवत्कृत्वाद्विजजलंपिब
॥ ५७॥ सर्वदासावधानेनकुरुशांकरचिंतनं॥ कर्मणामनसावाचाशंकरंशरणंव्रज॥ ५८॥ शंकरंप्रणवोयस्तुमनो
वाक्कायकर्मभिः॥ सतरत्येवसंसारमनायासेनसर्वथा॥ ५९॥ शंकरंशरणंगत्वासर्वदेवशिखामणिं॥ संसारसा
गरेघोरेनपतिष्यंतिमानवाः॥ संसारतरणोपायःश्रीमहादेवपूजनं॥ नतस्मादधिकोपायःसत्यंसत्यंवदाम्यहं॥ ६१॥ मो
क्षमिच्छतियोमर्त्यःशंकराभ्यर्चनंविना॥ समूर्खइतिविज्ञेयःसतुसंभाष्यएवन॥ ६२॥ शंकराभ्यर्चनंनित्यंतत्तुस
र्वश्रुतिश्रुतं॥ तत्यागेरौरवेघोरेभवत्येवहिसंस्थितिः॥ ६३॥ महादेवार्चनादेवमुक्तिःसंप्राप्यतेजनैः॥ बहवोमोक्ष
मापन्नाःपूर्वंशंकरपूजया॥ ६४॥ कुरुनित्यंमहादेवेभक्तिमव्यभिचारिणी॥ शिवमव्यभिचारेणपूजयस्वप्रयत्न
तः॥ ६५॥ शिवमव्यभिचारेणयान्वहंपूजयिष्यति॥ नतस्यनरकावासःसर्वथेत्यस्तिहिश्रुतिः॥ ६६॥ यथाप
तिव्रतानांचपतिसेवापरायथा॥ शिवमेवभजप्रीत्यामनोवाक्कायकर्मभिः महापद्यपिघोरायांमाविस्मरमहे
श्वरं॥ नायास्यंत्यापदःपुंसांशंकरस्मरणेकृते॥ ६८॥ शंकरस्मरणादेवमहापातककोटयः॥ विनश्यंतिक्षणा

र्धेनसत्यमित्यस्तिहिश्रुतिः ॥ ६९ ॥ ततः प्रयत्नतोनित्यंशंकरं पूजय प्रभुं ॥ श्रीमहादेवार्चनादेवमोक्षइत्यस्तिहिश्रुतिः ॥ ७० ॥
कुरुसर्वप्रयत्नेनरत्नवद्भस्मसंग्रहं ॥ क्षणार्धमपिनस्थेयंभस्मयोगंविनाद्विज ॥ ७१ ॥ एस्त्वेदादिनाकदाचित्त्वेद्भस्मनिर्या
तितत्क्षणे ॥ कुरुजाबालविधिनाभस्मनोद्धूलनंद्विज ॥ ७२ ॥ सितकेवलभस्मांगस्त्रिपुंड्रांकितमस्तकं ॥ शिवलिंगैक
निरतंनमंतिखलुदेवताः ॥ ७३ ॥ शिवमव्यभिचारेणस्मरणंयदियास्यसि ॥ तदाविष्णुप्रभृतिभिः पूजनीयोभविष्यसि ॥ ७४ ॥
भूरिपुण्यवतांपुंसांशिवएवेष्टदैवतं ॥ अन्येषामल्पपुण्यानांदैवतंस्याच्छिवेतरः ॥ ७५ ॥ शिवैकदैवायेतेषांशिवभवति
सर्वदा ॥ शिवान्यदेवायेतेषामाशिवंसर्वदाभवेत् ॥ ७६ ॥ भजंत्यभाग्याःपापिष्ठाःशिवान्यमशिवार्थिनः ॥ तेषांतुघोरसंसारा
न्निर्गमोनकदाचन ॥ ७७ ॥ आशिवंयस्यनिटिलेतस्यैवाशिवदैवतं ॥ शिवंयस्यललाटेस्तितस्यस्याद्दैवतंशिवः ॥ ७८ ॥ भज
त्वमपियत्नेनशंकरंलोकशंकरं ॥ नित्यमव्यभिचारेणशरणंयाहिशंकरं ॥ ७९ ॥ संसारतारणोपायःशंकरस्यैवपूजनं ॥
सत्यंसत्यमिदंसत्यमुद्धृत्यभुजमुच्यते ॥ ८० ॥ संसारसर्पदष्टस्याशिवपूजनमौषधं ॥ तदन्यदौषधंक्वापिनास्तिनास्त्येवसर्व
था ॥ ८१ ॥ येमग्नाःसंतिसततंघोरसंसारसागरे ॥ तैरन्वहंप्रयत्नेननाराधिगिरिजापतिः ॥ ८२ ॥ ततस्त्वंसर्वभावेनपूजयस्वमहे
श्वरं ॥ संसारसागराद्घोराद्यदिसंतर्तुमिच्छति ॥ ८३ ॥ ॥ यमउवाच ॥ ॥ इत्युक्तंतद्वचःश्रुत्वासंतुष्टहृदयस्तदा ॥ सर्वमन्यत्परित्यज्य
शिवपूजापरोभवेत् ॥ ८४ ॥ ततःसबालकस्तत्रबिल्वपत्रैर्मनोहरैः ॥ समर्चयन्महादेवमुवासप्रीतमानसः ॥ ८५ ॥ उद्धूलनत्रिपुंड्राभ्यां
अलंकृततनुर्द्विजः ॥ शिवपूजांप्रकुर्वाणःकृतार्थंस्वममन्यत ॥ ८६ ॥ अम्लानबिल्वैरातांम्रैरसंख्यातैर्महेश्वरं ॥ पूजयामासयत्ने
नप्रत्यहंमुदिताननः ॥ ८७ ॥ अखेदमतियत्नेनप्रणामान्सचकारच ॥ चकारनर्तनंनित्यंशंकराग्रेप्रयत्नतः ॥ ८८ ॥ सशंकरैकशर
णःसर्वदाशंकरार्चकः ॥ शंकरंपूजयन्नेवजहौप्राणान्कदाचन ॥ ततस्तस्मैमहेशेनविमानंप्रेषितंमुदा ॥ सविमानंप्रेषितंमुदा ॥ सवि
मानंसमारुह्यगतःशंकरसंनिधिं ॥ ९० ॥ अनेनैवहिमार्गेणसगतुःशैवपुंगवः ॥ तदातस्मैमयापूजाकृताशक्त्यनुरोधतः ॥ ९१ ॥ तदास
मामुवाचेदंप्रहसन्नुन्नताननः ॥ शिवपुण्यपूजापुण्यपुंजोमजुलंमजवाक्मुदा ॥ ९२ ॥ यमकिंक्रियतेनित्यंसर्वदासावधानतः
अशैवास्तमधश्लोघैःशास्यंतेखलुसत्वरं ॥ ९३ ॥ अशैवेपुत्वयाकालकृपानक्रियतेखलु ॥ अशैवाःखलुपात्यंतेनरकेषुयथाय

र्थं॥९४॥अशैवानस्त्रिकुंडेषुपातयस्वप्रयत्नतः॥ विद्रावयस्वकचैरग्नितप्तैरशंकरान्॥९५॥ इत्युक्तःसययोशैवः
शिवाराधनतत्परः॥ इंद्रोपेंद्रादिभिःसम्यक्पूजितःशंकरालयं॥९६॥मवालब्धोधिकारोयंयदासांबान्महेश्व
रात्॥तदैवमाहवचनंशंकरःसुरसत्तमः॥९७॥ ॥श्रीमहादेवउवाच॥ ॥रेरेयमत्वयानीतंयत्कर्तव्यंतदु
च्यते॥शृणुष्वसावधानेनचित्तमन्यन्नमाकुरु॥९८॥येमामव्यभिचारेणपूजयिष्यंतिशंकरं॥तानर्चयानिशंभ
क्त्यापुष्पबिल्वदलादिभिः॥९९॥अनन्यचित्ताःसततंयेमद्भक्तिंप्रकुर्वते॥तानर्चयानिशेभ०॥१००॥येमामन
न्याःसततंप्रणमंतिस्तुवंतिच॥तानर्चया०॥१॥येमदर्पितकर्माणोमदेकशरणाःसदा॥तानर्च०॥ येकुर्वंतिप्रय
त्नेनभस्मनोधूलनंसदा॥ तानर्चया०॥३॥त्रिपुंड्रमात्रनिटिलारुद्राक्षाभरणाश्चये॥तानर्च०॥४॥रुद्राध्यायज
पासक्ताःपंचाक्षरपराश्चये॥तानर्च०॥५॥नित्यंशिवकथाःसक्ताःशिवनामपराश्चये॥तानर्चया०॥६॥शिव
लिंगसमभ्यर्च्ययेभिनंदंतिसर्वदा॥तानर्च०॥७॥येमांसर्वोत्तमत्वेनज्ञात्वातिष्ठंतिसर्वदा॥तानर्चयानिशंभक्त्यापु
ष्पबिल्वदलादिभिः॥८॥उक्तलक्षणसंपन्नाःशैवाइत्यवगम्यतो॥येतादृशानोशैवानांपूजयापूजितोस्म्यहं॥९॥
उक्तलक्षणसंपन्नानभजिष्यंतियेजनाः॥अशैवास्तेततस्तेषांकुरुशासनमन्वहं॥१०॥ अशैवाघोरनरकेष्वशैवेषुप्रय
त्नतः॥पातनीयासर्वशैवमामाकुरुकृपांयम॥११॥अशैवेषुप्रमादाद्वाकृपांयदिकरिष्यसि॥तदानुपातयिष्या
मिभवंतंनरकेष्वहं॥येशिवद्रोहिणस्तेतुशासनीयास्त्वयान्वहं॥अन्यथात्वधिकारोयमन्यस्मैदीयतेमया॥१३॥
इत्युक्तोहंमहेशेननप्रेषितोस्मिशचीपते॥तदाप्रभृतियत्नेनमयात्रस्थीयतेध्रुवं॥१४॥ ॥सदाशिवउवाच॥ ॥
इतिकालवचःश्रुत्वाप्राचीनाथस्तदाशिवे॥रोमांचिततनुर्जातोबाष्पपूरितलोचनः॥१५॥एतस्मिन्नंतरेदेवित्रल
लोकनिवासिनः॥कोटिशःपतितान्विप्रानिष्प्रभानरकार्णवे॥१६॥नरकेपतितान्दृष्ट्वातानिंद्रोयमभविष्यमब्रवीत्॥
कंपमानोगलद्बाष्पोयमेंदृष्ट्वाभयानकं॥१७॥ ॥इंद्रउवाच॥ ॥एतेकेकिंकृतंकर्मस्थितंकुत्रपुरायम॥की
दृग्विधेषुनरकेष्वेतेस्थास्यंतितद्वद॥१८॥नभूलोकःसमायातमेतैःकिंतूर्ध्वलोकतः॥समागतमतःकाल

किमेतन्माद्भुतंवद ॥१९॥ ॥ यमउवाच ॥ ॥ दृंद्रवद्भुतंवृत्तंवृत्तांतंशृणुसादरं ॥ यद्वृत्तांतस्यकथनंश्रवणंचभयप्रदं
॥२०॥ एतत्कुलसमुत्पन्नःकाशींप्राप्यविधानतः ॥ काश्यांपिंडप्रदानानिचकारविधिपूर्वकं ॥ २१॥ एतेतेनैवपुण्येनब्रह्म-
लोकमुपागताः ॥ पुरातुस्थितमत्रैवनरकेष्वतिदुःखितैः ॥ २२॥ एतत्कुलसमुत्पन्नःकाश्यांस्थित्वायदायदा ॥ चकार
तर्पणंतेनप्रीत्याहेतेतदातदा ॥ सुधापानेनयाप्रीतिर्देवानामभवत्सदा ॥ ततोप्यत्युत्तमाप्रीतिरेतेराशाशचीपते ॥२४॥ का
शीसलीलदानेनपितृतृप्तिर्बधातथा ॥ सुधापानेपिनप्रीतिःसत्यमत्रनसंशयः ॥२५॥ काशीस्थसतिलंतोयंपितृभ्यो
दत्तमास्तियत् ॥ तत्पितृभ्योऽमृतंभूत्वासंप्रीणयतितत्पितॄन् ॥ २६॥ मणिकर्णिजलंयेनपितृभ्योदत्तमादरात् ॥ तेनदत्तसुधासिंधुः
पितृभ्योनात्रसंशयः ॥ २७॥ पितॄनुद्दिश्यसतिलंक्षीरान्नंमधुसंयुतं ॥ मणिकर्ण्यांयेनदत्तंसपितॄंस्तारयिष्यति ॥ २८॥ अमा
मवतींप्राप्यकाश्यांश्रीवृषभध्वजे ॥ यःकरोतिपितृश्राद्धंसपितॄंस्तारयिष्यति ॥ २९॥ अमांसोमवतींप्राप्यपुरैतद्वंशसंभवः ॥
श्राद्धंचकारयत्नेनवृषभध्वजसंन्निधौ ॥ ३०॥ अथर्वशिरसंयत्नाच्छ्राद्धकालेसभक्तिमान् ॥ ब्राह्मणान्श्रावयामासश्राद्धभो
जनतत्परान् ॥ ३१॥ पठन्नथर्वशिरसंयःकुर्याच्छ्राद्धमादरात् ॥ सपितॄंस्तारयत्येववाराणस्यांविशेषतः ॥ ३२॥ तेनपुण्यप्रभावेन
पुरैतेमुदिताननाः ॥ तिरस्कृत्यामृतंतस्थुःपूजिताब्रह्मणोपुरा ॥ ३३॥ नित्यंब्रह्मसभासद्भिःब्रह्मणापिसमर्चिताः ॥ अतिसंतो
षमासाद्यब्रह्मलोकेस्थिताध्रुवं ॥ ३४॥ अद्यैवघटिकापूर्वंकाश्यामेतत्कुलोद्भवः ॥ श्रीमदंतर्गृहेरम्येचक्रेमूत्रविसर्जनं ॥ ३५॥ तेनै
वपातकेनैतेसर्वेतेपितरोऽधुना ॥ प्रच्युताब्रह्मसदनात्पतितानरकार्णवे ॥ ३६॥ अतःपरंतप्तशस्त्रैरेतेसंताडितास्ततः ॥ पतिष्यं
त्यग्निकुंडेषुघोरेषुविविधेष्वपि ॥ ततःपरंमूत्रकुंडेपतिष्यंत्यतिदारुणे ॥ ततःपुरीषकुंडेषुपतिष्यंत्यतिदारुणे ॥ ततस्तप्तक
टाहेषुतप्ततैलाप्लुतेष्वपि ॥ पतित्वावन्हिकुंडेषुपतिष्यंतिततःपरं ॥ ३९॥ ततस्तप्तायसैस्तंभेष्वेतेबध्याःप्रयत्नतः ॥ ताडनी
यास्तप्तशस्त्रैराकल्पंनात्रसंशयः ॥ ४०॥ अनंतब्रह्मकल्पांतेप्येतेनरकलोकतः ॥ निर्गताःनभविष्यंतिसत्यंसत्यंशचीप
पतेः ॥४१॥ ॥ शिवउवाच ॥ ॥ इत्युक्त्वाप्रेरयामासदूतांस्तत्ताडनायसः ॥ ततस्तप्तायसास्त्रैस्ताडितापितरःशि
वे ॥४२॥ ॥ पार्वत्युवाच ॥ ॥ अंतर्गृहेकृतोयेनमूत्रोत्सर्गोदुरात्मना ॥ सगतःकुत्रद्वार्त्तांवदशंभोदयानिधे ॥४३॥

॥श्रीशिवउवाच॥ ॥अंतर्गृहे समोहेन कृत्वा मूत्रविसर्जनं॥ हा हतोस्मीति दुःखेन रुरोदव्यु[?]धाशिवे ॥४४॥ त्वय दंतर्गृहे मोहात्त्वक्के मूत्रविसर्जनं॥ तदातं दृष्ट्वा विप्रा जाबालश्रुतिपारगाः॥४५॥ दृष्ट्वातं मूचुः सर्वे पिक्रोधताम्र लोचनाः॥ पाषाणैस्ताडयेतस्तेत्तण हस्तावराननै॥४६॥ ॥विप्राऊचुः॥ ॥रे विप्र शंकरागारे श्रीमदंतर्गृहे त्वया॥ मूत्रोत्सर्गः कृतो मोहात्तेन दुःखमवाप्स्यसि॥४७॥ सर्पपाइवलिंगानि श्रीमदंतर्गृहे सदा॥ तिष्ठंति तेषु पतितं मूलमेतत्त्वया धुना॥ अनेन मूत्रपातेन यावत्पातकमर्जितं॥ तावत्सापं ब्रह्महत्याकोटिभिश्चन चार्जितं॥४९॥ अनंतब्रह्महत्यादि पातकानि कदाचन॥ विनश्यंति दृशं पापं[?] कदापि न विनश्यति॥५०॥ अंतर्गृहे प्रवेशस्तु सुराणामपि दुर्लभः॥ ईदृशेंतर्गृहे शैवे मूत्रोत्सर्गः कथं कृतः॥ यथाकथंचिद्यात्रार्थमंतर्गृहे प्रविश्यते॥ शंकरानुग्रहान्नो चेत्प्रवेशो प्यति दुर्लभः॥५२॥ अंतर्गृहे पूजयंति देवा बिल्वदलादिभिः॥ स्तुवंत्यंतर्गृहे देवाः कृतांजलिपुटाः सदा ॥५३॥ यस्मिन्नंतर्गृहे सांबो विश्वेशो देवतोत्तमः॥ तदंतर्गृहमुत्कृष्टं कोवानाराधयिष्यति॥५४॥ अंतर्गृहं पूजयंति येबिल्वकुसुमादिभिः॥ तानर्चयंति यत्नेन देवा विष्णुपुरोगमाः॥ अंतर्गृहस्य माहात्म्यं शिवो वेदामराधिपः॥ तदन्ये नैव जानंति सत्यं सत्यं न संशयः॥५६॥ अनंतशाखो वेदो वा शेषो वा मनयोपिवा॥ अंतर्गृहस्य माहात्म्यं न जानंत्येव वस्तुतः॥५७॥ एतादृशे शिवागारे श्रीमदंतर्गृहे त्वया॥ कथं कृतं दुराचार मूत्रस्योत्सर्जनं वद॥५८॥ त्वदन्यो महापापी पापराशिस्त्वमीदृशः॥ त्वदृशस्य दुष्टस्य मुक्तिरत्यंतदुर्लभा॥५०॥ नरकेषु पतिष्यंति पितरस्तव सर्वथा॥ तवापि यातना घोरा भविष्यंति न संशयः॥६०॥ तवतु ब्रह्मकल्पांते ऽप्यनल्पा यातना द्विज॥ भविष्यति न संदेहो वेदा एवात्र साक्षिणः॥६१॥ यद्यत्रते तनुत्यागस्तदा भैरवयातना॥ अन्यत्रापि तनुत्यागो घोरास्ते यमयातनाः॥६२॥ अनंतकल्पपर्यं[?]तं भविष्यति न संशयः॥ पितृभिः सह दुःखानि यमलोके त्वया द्विज॥ भोक्तव्यान्यति घोराणि न तस्मात्प्रच्युतिस्तव॥ तपोभिरुग्रैर्दानैर्वा यागैर्वा बहुदक्षिणैः॥६४॥ त्वत्कृतस्यास्य पापस्य विनाशो न भविष्यति॥ संततं मूत्रकुंडेषु तव वासो भविष्यति॥ ततः पुरीषकुंडेषु वासस्तव भविष्यति॥

४ ततःसदुःखितोविप्रः काशींत्यक्त्वा तृषातुरः ॥ जहौप्राणांस्ततोनीतः सदुष्टोयमकिंकरैः ॥७०॥

संतप्तलोहस्तंभाग्रे बध्वासंतप्तश्रृंखलैः ॥ भवंतंताडयिष्यंतियमदूताशरोत्करैः ॥ ततस्तप्तायसैःपिंडैःभवंतंपाप

कृत्तमं ॥ ताडयित्वातप्तशस्त्रैस्ताडयिष्यंतिसंततं ॥ ६७ ॥ ॥ शिवउवाच ॥ ॥ इत्युक्त्वातेततोविप्रान्भर्त्सयित्वातु

तंद्विजं ॥ ययुर्यत्नार्थमुद्युक्ता मन्नामस्मृतिपूर्वकं ॥ ६८ ॥ ततःसभर्त्सितोविप्रैर्बहुभिर्निंदितोमुहुः ॥ जहौकाशीमि

मांपुण्यांशिवेसर्वश्रुतिश्रुतां ॥ ६९ ॥ ततःसपातितोविप्रोयमाग्रेक्रूरशासनैः ॥ तंदृष्ट्वाप्राहशमनश्चित्रगुप्तं ह

विशारदं ॥ ७१ ॥ ॥ यम उवाच ॥ ॥ चित्रगुप्तायमानीतोमदीयैःकिंकरैरिह ॥ अनेनकिंकृतंकर्मतद्वदस्वयथार्थतः

॥ ७२ ॥ इत्युक्तश्चित्रगुप्तोतियमेनयममाहतं ॥ तत्कृतंदुष्कृतंकर्मविचार्यादरपूर्वकं ॥ ७३ ॥ ॥ चित्रगुप्तउवाच ॥

अयंकाश्यांशिवागारेश्रीमदंतर्गृहेयम ॥ अमान्मूत्रविसृज्यादौततःकाशीबहिर्मृतः ॥ ७४ ॥ काश्यांअंतर्गृहेयेन

कृतंमूत्रविसर्जनं ॥ तेनघोराणिदुःखानिप्राप्तव्यानिनसंशयः ॥ ७५ ॥ यमस्तमतिवेगेनताडयित्वायसैःशरैः ॥ आंतोभ

टानुवाचेदंताडयंत्वितिसत्वरं ॥ ७६ ॥ ततोयुतंयमभटायमेनप्रेरिताःशिवे ॥ तंद्विजंताडयामासुस्तप्तास्त्रैरतिदारुणैः ॥ ७७ ॥

ततःसपातितोविप्रस्तप्तमूत्रह्रदेभटैः ॥ ततःसपातितोविप्रोवन्हितप्तमलप्रदे ॥ ७८ ॥ प्रतप्तलोहस्तंभाग्रेसंबध्यस्तप्तश्रृं

खलैः ॥ ताडितस्तप्तशस्त्रौघैर्भिंडिपालैश्चताडितैः ॥ ७९ ॥ तप्ततैलकटाहेषुपातितःसततोभटैः ॥ प्रज्वलद्वन्हि-

कुंडेषुपातितःसततःपरं ॥ ८० ॥ एवंप्राप्यस्थितोविप्रःपितृभिःसहयातना ॥ अनंतदुःखदांदेविपुनरावृत्तिदु

र्लभां ॥ ८१ ॥ येकाश्यामामर्मभ्यर्च्यैस्थित्वाकाशीबहिर्मृताः ॥ तेषामपिभवत्येवंघोरानरकयातना ॥ ८२ ॥ येका न

श्यांमत्कथांत्यक्त्वास्थित्वाकाशीबहिर्मृताः ॥ तेषामपि० ॥ ८३ ॥ काश्यामन्यत्रवायेतुभक्त्यानाराधयंतिमां ॥ ते

षामपि० ॥ ८४ ॥ विभूतिधारणादीनित्यक्त्वातिष्ठंतियेनराः ॥ तेषाम० ॥ ८५ ॥ सोमवारव्रतंशैवंनकरिष्यंतियेज

डाः ॥ तेषामपि० ॥ ८६ ॥ एवंयमभटैःक्रूरैःशास्यमानंद्विजाधमं ॥ तंदृष्ट्वाप्राहवचनंशचीपतिरकल्मषः ॥ ८७ ॥

इंद्रउवाच ॥ ॥ यमेदमेवतेकार्यमन्यत्कार्यंनकिंचन ॥ कार्यांतरंयदिभवेत्तद्वदस्वबदाऽधुना ॥ ८८ ॥ यमउवाच ॥

अशैवशिक्षणादन्यदत्र नास्ति प्रयोजनं॥ अशैवान्पतितान्पश्यन नरकेषु यथाक्रमं॥ ८९॥ यावत् दुःखमिह प्राप्यमनु
द्धूलितभस्मना॥ तावद्दुःखं ब्रह्महत्याकोटिभिश्च न लभ्यते॥ यावद्दुःखमिह प्राप्यं त्यक्तभस्मत्रिपुंड्रकैः॥ ताव
दु०॥ ९१॥ यावद्दुःखमिह प्राप्यं त्यक्तरुद्राक्षधारणैः॥ तावद्दुःखं ब्रह्म०॥ ९२॥ यावद्दुःखमिह प्राप्यं त्यक्तशंकरपूजनैः
॥ तावद्दुःखं ब्रह्महत्याकोटिभिश्च न लभ्यते॥ ९३॥ यावद्दुःखमिह प्राप्यं शिवानुत्कर्षवादिभिः॥ तावद्दुःख०॥ ९४॥ यावद्दुःख
मिह प्राप्यं शैवदुःखप्रदैर्नरैः॥ तावद्दुःखं०॥ ९५॥ त्रिपुंड्रोद्धूलनादीनि न करिष्यंति ये द्विजाः॥ ते घोरनरकेष्वशैवेष्व
न्वहं स्थितिः॥ ९६॥ इदं विचार्य बहवः कुर्वंत्युद्धूलनादिकं॥ उद्धूलनादिसंसक्तान पश्यंत्येव यातनां॥ ९७॥ यस्य भालं
महद्भाभ्याद्भस्मरेखाविराजितं॥ स घोरतरसंसारं तरिष्यत्येव सर्वथा॥ ९८॥ मुक्तिकारणमित्याहुः केवलं भस्मधारणं
॥ तत्रापि शिवभक्तिश्चेत्किं वक्तव्यमतः परं॥ ९९॥ भाग्येन भूषितं भूयाद्भालं केवलभस्मना॥ १००॥ किमत्र बहुनोक्तेन

सारमेकं वचः शृणु॥ अशैवदुःखदानार्थं शिवेन प्रेरितोस्म्यहं॥ १॥ वैकुंठसत्यस्वर्गेभ्योप्यशैवानानयाम्यहं॥ पात
यामि प्रयत्नेन नरकेषु यथेच्छया॥ २॥ भूपातालातलादिभ्योप्यशैवानानयाम्यहं॥ पातयामि०॥ ३॥ श्वेतद्वीपादपि स्वेच्छा
दशैवानानयाम्यहं॥ पातयामि०॥ क्षीराब्धिप्रमुखाब्धिभ्योप्यशैवानानयाम्यहं॥ पातयामि०॥ ४॥ क्षीराब्धिप्रमुखा
ब्धिभ्योप्यशैवानानयाम्यहं॥ पातयामि०॥ ५॥ हिमवत्पर्वतादिभ्योप्यशैवानानयाम्यहं॥ पातया०॥ अशैवेषु मुकुंदो
पि पक्षपाती भवेद्यदि॥ मुकुंदमपि घोरेस्मिन्नरके पातयाम्यहं॥ ७॥ अशैवजनतूलाद्रेः प्रलयाग्निरहं यमः॥ मत्को
पानलदग्धांगानशैवान्पश्य सादरं॥ ८॥ मत्कृता यातना सह्या न भविष्यति सर्वथा॥ अशैवेषु कृपालेशोप्यस्य मे न भ
विष्यति॥ ९॥ अशैवमात्रदाहार्थं सृष्टोहमत एव मां॥ अशैवदाहकः कालो यम इत्याहुरास्तिकाः॥ १०॥ अशै
वाः संति यावंतः तावंतः शत्रवो मम॥ अत एव हि घोरेषु तिष्ठंति नरकेषु ते॥ ११॥ अत एव शचीनाथ यदि ते

नरकाद्भयं॥ तदाभ्यजस्व सततं देवदेवोत्तमं शिवं॥ १२॥ इदं मत्वैव सततं विष्णुः शंकरपूजनं॥ करोति
सावधानेन बिल्वपत्रादिसाधनैः॥ १३॥ ब्रह्मापि प्रत्यहं सांबं शिवलिंगस्वरूपिणं॥ पूजयत्यति यत्नेन यातनाभीरु

सं

रादरात्॥१४॥कश्यपात्रिवसिष्ठाद्याऋषयःशैवपुंगवाः॥ पूजयंतिमहादेवंसावधानेनसर्वदा॥१५॥गंधर्वोरगय
क्षाद्याःसर्वेपिगिरिजापतिं॥पूजयंतिप्रयत्नेनप्रत्यहंविधिपूर्वकं॥१६॥ ॥श्रीशिवउवाच॥ ॥इत्युक्तःसश
चीनाथोयमंपूज्यसादरं॥यमाज्ञयास्वर्गलोकंसगुरुःसानुगोययौ॥१७॥यमोक्तंप्रतिसंधायविस्मितःसशची
पतिः॥तदाप्रभृतियत्नेनशिवपूजापरोभवत्॥१८॥बृहस्पतिश्चयत्नेनशिवलिंगस्वरूपिणं॥मामर्चयत्यहरहर्बिल्वपत्रादिसा
धनैः॥१९॥पुराविप्रशचीकाचिदार्यावर्तेस्थितानिधिः॥कामातुरंपतिंप्राहस्वयंमत्पूजनेरता॥२०॥ ॥विप्रसतीउवाच॥
बाल्येनाराधितःशंभुरज्ञानेनत्वयाधुना॥कामातुरेणनाराधिभगवान्गिरिजापतिः॥२१॥अधुनांगानिसर्वाणितिष्ठंत्य
तिपटूनिते॥अद्यचेन्नार्चितःशंभुरर्चनीयःकदात्वया॥२२॥गत्वारण्येबिल्वपत्रैःकोमलैर्बहुभिर्नवैः कृत्वापार्थिवलिं-
गानिपूजयस्वयथाविधि॥२३॥कुशपुष्पैःपलाशकुसुमैरपि॥पूजयस्वमहादेवंसर्वलोकाधिपत्यदं॥२४॥नीलोत्पलै
लकृतांमालांकृत्वायत्नपुरस्सरं॥लिंगरूपायसांबायमहेशायसमर्पय॥२५॥नवबिल्वकृतांमालांतथाधुत्तूरमालि
कां॥लिंगरूपायसांबायमहेशायसमर्पय॥२६॥पुण्योवैशाखमासोयमस्मिन्मास्यरुणोदये॥स्नात्वापूजयगौरीशं
बहुभिर्बिल्वपल्लवैः॥२७॥अस्मिन्मासिमहेशायजलधारांप्रकल्पय॥शिवालयंजलैःशुद्धैःपरिपूरयसादरं॥२८॥चं

वा

दनंदेहिदेवायसकर्पूरंसुशीतलं॥ततोनवैर्बिल्वपत्रैःपूजयस्वसदाशिवं॥२९॥धूपयस्वमहादेवंगुग्गुलेनयथाविधि॥दी
पयस्वमहादेवंदीपैःकर्पूरसंभवैः॥३०॥दध्यन्नेनमहेशायनैवेद्यंकल्पयादरात्॥पुनर्धूपादिकंकृत्वाचामरैर्वीजयेश्वरं॥
॥३०॥ततःशिवप्रसादार्थंशैवान्यत्नपुरःसरं॥भोजयस्वाज्यदध्यन्नैर्भक्तिश्रद्धासमन्वितः॥३१॥एवमाराधयाराध्यंमहादेवं
कृपानिधिं॥सुप्रसन्नोमहादेवोभुक्तिंमुक्तिंप्रयच्छति॥३२॥नयौवनंस्थिरंविद्धनैश्वर्यमपिचंचलं॥इदमेवंविदित्वैवपूजय
स्वमहेश्वरं॥३३॥अधुनायौवनोद्धस्यत्वदेवोत्तमेशिवे॥नोदेतिभक्तिरमलाभुक्तिमुक्तिफलप्रदा॥३४॥अहोमोहस्यमहात्म्य
मीदृशंदुरतिक्रमं॥येनमोहेनविश्वेशपूजनंविस्मृतंत्वया॥३५॥विश्वेशःकरुणासिंधुःसर्वदेवशिखामणिः॥येननाराध्य
तेनित्यंतस्यजन्मनिरर्थकं॥३६॥विश्वेशपूजनंकर्तुंनिर्मितंयत्करद्वयं॥तेनचेन्नार्चितःशंभुस्तद्वृथादग्धकाष्ठवत्॥

॥३७॥ विश्वेशपूजनं द्रष्टुं निर्मितं नयनद्वयं॥ तेन चेन्नेक्षितं लिङ्गं व्यर्थमेव शास्त्र द्वयं दानयनं द्वयं॥३८॥ श्रोत्रे शिवकथां श्रोतुं निर्मिते सा
कथामुदा॥ ताभ्यां चेन्न श्रुता श्रोत्रे व्यर्थे नास्ति संशयः॥३९॥ शिवनाम जपं कर्त्तुं सृष्टा जिह्वा तया यदि॥ न जप्यते मनुः
शैवः सा जिह्वा चर्मवद्वृथा॥४०॥ येन चित्तेन न ध्यातो भगवान्पार्वतीपतिः॥ तच्चित्तं पित्तवन्नित्यं न वा धावति किंवद॥
॥४१॥ दंडवत्प्रणिपत्येशं स्वतनुं सार्थकां कुरु॥ अन्यथा तनुरेषा ते संदग्ध तनुवद्वृथा॥४२॥ प्रणमंति महादेवं दंडवच्चेय दा तदा॥
पतंति पापगिरयो वज्रसंताडिता इव॥४३॥ नित्यं शिवशिवेत्येव शिवं यजा शिवं जप॥ विहितं यत्कृतं कर्म तद्गुरुष्व शिवार्पणं॥
॥४४॥ परलोकस्य पाथेयं मोक्षोपायमनामयं॥ पुण्यसंघैकनिलयं शिव इत्यक्षरद्वयं॥४५॥ ॥श्रीशिव उवाच॥ ॥इति त
द्वचनं श्रुत्वा कथं ज्ञातमिदं त्वया॥ तद्वद स्वेति तामाह सा तमाह ततः शिवे॥४६॥ ॥सती उवाच॥ ॥पूर्वजन्मन्यहं वि
प्रकन्या विप्रस्य मेधसः॥ अस्मद्गृहप्रांत्यदेशे कश्चिद्बिल्वतरुः स्थितः॥४७॥ बिल्वाया च्छं जलं दत्तं कदाचिद्यत्नतो मया॥
तेन नपल्लवितो वृक्षस्तद्बिल्वतरुपल्लवैः॥४८॥ मलिना पूजया मास महादेवमुमापतिं॥ शिवं संस्छादया मास तद्बिल्वतरु
पल्लवैः॥४९॥ तेन पुण्यप्रभावेन जन्मना मे शतत्रयं॥ मया विज्ञायते विद्वन्मुक्त्युपायोपि तत्त्वतः॥५०॥ ॥श्रीमहादेव
उवाच॥ ॥इति तद्वचनं श्रुत्वा त्यक्त्वा समदनव्यथां॥ शिवार्चनपरा जातो मुक्तश्च तदनंतरं॥५१॥ मामुपाश्रित्य यो भक्त्या
मामाराधयति प्रिये॥ स मुक्तिं लभते नूनं सत्यं सत्यं न संशयः॥५२॥ शिवे मदर्चने प्रीतिर्महद्भाग्यफलं ततः॥ मदर्चनं प्रयत्ने
न कर्त्तव्यं विधिवत्सदा॥५३॥ तारकः सर्वलोकानामहमेव ततः सदा॥ पूजनीयः प्रयत्नेन सर्वोपायैर्यथाविधिः॥
॥५४॥ सर्वेषामेव वेदानां सारभूतमिदं वचः॥ मदर्चनं सदा कार्यमुद्धृत्य भुजमुच्यते॥५५॥ जपनीयोहमनिशं पूजनी
योहमन्वहं॥ सत्यमेतत्सत्यमेतदुद्धृत्य भुजमुच्यते॥५६॥ जपनीयोहमनिशं पूजनीयोहमन्वहं॥ मुक्तिदाताहमेवास्मि सर्व
स्य जगतः शिवे॥५७॥ ततः सर्वं परित्यज्य पूजनीयोहमास्तिकैः॥ सर्वोत्तमः सर्ववंद्यः सर्वपूज्योहमंबिके॥५८॥ अयमर्थ
स्तु विविधैर्वेदैरेवाच्यते ध्रुवं॥ सर्वभावेन सततं पूजनीयोहमंबिके॥५९॥ मदर्चनाद्भुक्तिमुक्ती संप्राप्येसत्यमुच्यते
॥ संसारपाशनाशार्थं मामेव मुनिपुंगवाः॥६०॥ पूजयंत्यति यत्नेन भस्मोद्धूलितविग्रहाः॥ विचार्य वेदवेदांतानिदं निष्पादि

तंबुधैः॥ ६१॥ शिव एव सदा ध्येयो मुक्तिकामैरिति ध्रुवं॥ मुक्तिस्तु सर्वथा नास्ति शंकराराधनं विना॥ ६२॥ सत्यं सत्यं पुनः सत्यं
इति वेदेपि वर्त्तते॥ अतोन्वहं प्रयत्नेन पूजनीयो हमंबिके॥ ६३॥ बिल्वपत्रादिभिः सम्यक् चतुर्वर्गफलार्थिभिः॥ मदर्चन
पराधीराः मदेकपरदेवताः॥ ६४॥ निर्दग्धकल्मषादेवि प्रविशंति मयि ध्रुवं॥ विश्वाधिको हि मजरो निष्कलो निर्गुणोंबिके॥
॥ ६५॥ मयि प्रविष्टो भूयोन्यं न विशत्येव सर्वथा॥ ये मामनन्यशरणाः सितभस्मभालारुद्राक्षकंकणलसत्करदंडयुग्माः॥ सं
पूजयंत्यहरहः श्रुतितत्वभूतं तानेव घोरनरकादहमुद्धरिष्ये॥ ६६॥ ॥ इति श्रीशिवरहस्ये उग्राख्ये सप्तमांशे शिवगौरी
संवादो नामाष्टादशोध्यायः॥ १८॥ ॥ श्रीउग्रायनमः॥ ॥ श्री० ॥ शिवे दक्षिणकैलासो विलासस्याश्रयो मम॥ स यथो
त्तरकैलासस्तथैव सुखदः सदा॥ १॥ सुवर्णमुखरीनाम नदी तत्रास्ति शोभना॥ यज्जलस्नानमात्रेण मुच्यंते सर्वकिल्बि
षैः॥ २॥ तत्तीरे कोटिशः संति बिल्वबिल्ववृक्षा मनोहराः॥ अखंडबिल्वपत्राणि ते षु तिष्ठंति कोटिशः॥ ३॥ सुवर्णमुखरीतीरे
कोटिशः संति शांकराः॥ ते सर्वे नियताहारा भस्मोद्धूलितविग्रहाः॥ ४॥ त्रिपुंड्रमात्रविलसद्भालाश्चंगातिशोभनाः॥ रु
द्राक्षमालाभरणा जटामंडलमंडिताः॥ ५॥ शिवपूजैकनिरता निरीहा निर्मलाशयाः॥ शिवनामैकनिरतास्त्यक्तभोगा निरा
कुलाः॥ ६॥ स्वप्नेप्यनन्यशरणा मदेकपरदेवताः॥ मन्नाममात्रपीयूषा मदेकशरणा मुदा॥ ७॥ शिवलिंगार्चने नित्ये सर्वदा
सक्तमानसाः॥ ध्यायंति ते महादेवं मामनाद्यंतमव्ययं॥ ८॥ निष्कलं निर्गुणं शांतं शिवमक्षरमव्ययं॥ सर्वाधारमनाधारं विदि
त्वा मां वसंति ते॥ ९॥ तत्र त्यक्ततनुर्मर्त्यः कीटो वा मशको पि वा॥ भुक्त्वा भोगा[illegible]न्यथा कामं मत्स्वरूपं प्रयांति च॥ १०॥ तत्रा
स्ति पर्वतः कश्चित्समदात्मक एव हि॥ स तु लिंगमयो यस्माल्लिंगाकारः स पर्वतः॥ ११॥ तत्पर्वतस्य विधिवद्द्वेशाखे माघमा
सि वा॥ कृत्वा प्रदक्षिणं सम्यक् ब्रह्महत्या विमुच्यते॥ १२॥ कैलासनामकं लिंगं तत्रास्त्येकं मदात्मकं॥ तत्र तल्लिंगरूपेण
निवसाम्यहमादरात्॥ १३॥ कर्पूरगौरं तल्लिंगं पश्चिमाभिमुखं सदा॥ वर्णांतरं प्रतियुगे तस्य लिंगस्य जायते॥ १४॥ विष्णु
ब्रह्मादयो देवाः सततं शिवपूजकाः॥ तल्लिंगमतियत्नेन पूजयंति मुमुक्षवः॥ १५॥ तल्लिंगदर्शनात्सद्यो नश्यत्यघकु
लं शिवे॥ तल्लिंगं सावधानेन पूजनीयं मुमुक्षुभिः॥ १६॥ सुवर्णमुखरीतीर्थे स्नात्वा सम्यग्यथाविधि॥ अशेषपापनि

गा

मुक्ताभविष्यंतिनसंशयः॥१७॥ स्नात्वातत्रविधानेनपितॄन्संतर्प्यवारिणा॥ अन्नादिभिश्चसंतर्प्यसर्वपापैः प्रमुच्यते॥
॥१८॥ तत्तीरेश्राद्धकरणात्पितॄणांऋणबंधनात्॥ मुच्यतेमनुजः सद्यः पद्मपत्रमिवांभसा॥१९॥ तत्रस्नात्वाविधाने
नस्वशक्त्याशिवयोगिने॥ देयंसुवर्णंयत्नेनमत्प्रीत्यर्थमतंद्रितैः॥ भोजनीयः प्रयत्नेनशिवयोगीयथासुखं॥ सुदुग्धपरमा
न्नाद्यैर्यथेष्टंघृतमिश्रितैः॥२१॥ तत्तुक्षेत्रंशिवक्षेत्रमतएवहिशांकराः॥ भोजनीयाः प्रयत्नेनतोषणीयाधनादिभिः॥२२॥
एकस्मिन्भोजितेशैवेभोजिताःकोटिशाद्विजाः॥ यतःशैवमुखद्वाराभुज्यतेगिरिजेमया॥२३॥ परंतुश्रद्धयाभक्त्यावि
नयेनविचक्षणैः॥ भोज्यतेयदिशैवेंद्रस्तदातद्भुज्यतेमया॥२४॥ शिवयोगिनिसंतुष्टेसंतुष्टोस्म्यहमंबिके॥ शिवयो
गिस्वरूपेणसंचराम्यहमेवहि॥२५॥ शैवक्षेत्रेषुसर्वेषुपूज्याहिशिवयोगिनः॥ अहंतुपूजितःसत्यंशिवयोगिनिपूजि
ते॥२६॥ तत्रार्द्राकृत्तिकायोगेपातामाष्टमीदिने॥ संपूज्यमांबिल्वपत्रैर्ब्रह्महापिविमुच्यते॥२७॥ वैशाखपौर्णमा
स्यांयः संपूजयतितत्रमां॥ यदिपातार्द्रयुक्तायांसमोक्षमधिगच्छति॥२८॥ योमांबिल्वदलैस्तत्रकोमलैः पूज
यिष्यति॥ ससद्यएवसंसारान्मुक्तोभवतिसर्वथा॥२९॥ शेषः प्रत्यहमागत्यतत्ररत्नैर्मनोहरैः॥ तदेवलिंग
ममलंसंपूजयतिसादरं॥३०॥ अत्युत्तमैर्लक्षरत्नैःशेषः प्रत्यहमादरात्॥ समर्चयतितल्लिंगंनियमेनातियत्न
तः॥३१॥ तत्रकश्चिद्द्विजोनित्यंनियमेनैवसादरं॥ तुंडेनजलमानीयमुदामामभिषिंचति॥३२॥ ततःपरंबिल्व
पत्राण्याहृत्यायोस्वस्वतुंडतः॥ मामर्चयतियत्नेनपुष्पैर्नानाविधैरपि॥३३॥ अयंयदासमायातिमत्पूजार्थंमद
द्विपः॥ तत्पूर्वंफणिराड्रत्नैःपूजांकृत्वासगच्छति॥३४॥ तानिरत्नानिदृष्ट्वायंहस्तीपाषाणशंकया॥ दूरीक
रोतिरत्नानिसकोपःसत्वरंशिवे॥३५॥ एवंप्रत्यहमेवायंरत्नानिविमलान्यपि॥ दूरीकृत्वैवबिल्वैर्मांपूज
यामासभक्तितः॥३६॥ तद्दूरीकृतरत्नानिदृष्ट्वाशेषःसविस्मितः॥ केनदूरीकृतानीतिदुःखंप्राप्नोत्यहर्नि
शं॥३७॥ अत्युत्तमानिरत्नानिसमानीयमयामुदा॥ समर्प्यंतेमहालिंगेकेनदूरीकृतान्यहो॥३८॥ शि
वपूजापनयनापातकंयदुपार्जिते॥ तत्कृतोदुःखलेशोपि किंनतस्याभिजायते॥३९॥ इतिकृत्वा

महद्दुःखं रत्नैस्संपूज्य मां पुनः सयाति त्वामकुहरं नानानागविराजितं ॥४०॥ एवमेव समागत्य पूजयित्वा पुनः पुनः ॥ सयात्यायाति सततं पुनरायाति याति च ॥४१॥ उभाभ्यां हस्तिनागाभ्यामेवमन्वहमादरात् ॥ लिंगरूपे मयि प्रीत्या पूजां कृत्वा मुदास्थितं ॥४२॥ ततः कदाचित्सफणी पूजां कृत्वा प्रयत्नतः ॥ कोयमायाति तं द्रक्ष्ये नूनमद्येति संस्थितः ॥४३॥ दृष्ट्वा महतियत्नेन शिवपूजाविनाशकं ॥ विनाशयामि देवो वा नरो वास्तु न संशयः ॥४४॥ मत्वा लयं तत यत्नेन रत्नैरन्वहमादरात् ॥ पूज्यते शंकरस्तानि नित्यं त्वेव शंकरे ॥४५॥ इति निश्चित्य नागेंद्रः क्वचित्कोणे निलीय सः ॥ स्थितस्तदा द्विपः सोपि पूजार्थं समुपागतः ॥४६॥ द्विपस्सतानि रत्नानि दूरीकृत्य ततः परं ॥ बिल्वपत्रैः प्रसूनैश्च पूजयामास सादरं ॥४७॥ द्विपस्तस्मिन्दिने भूयो बिल्वपत्रार्थमादरात् ॥ संपूज्य नत्वा यत्नेन त्वरया बहिरागतः ॥४८॥ बहिरागत्य रम्याणि बिल्वपत्राणि शोभने ॥ गृहीत्वा पूजयामास सम्यग्भक्तिपुरःसरं ॥४९॥ ततस्तं दंतिनं दृष्ट्वा नागः सत्वरसन्मुखः ॥ तद्दंतितुंडद्वारेण शिरोमध्यं जगाम सः ॥ ततस्त दूषितो दंती द्वारस्तंभे शिलामये ॥ शिरः संघर्षयामास क्रोधशब्दक्रोधसंयुतः ॥५१॥ ततः स्वसंघर्षणेनैव स्फुटितं तच्छिरस्तदा ॥ निर्जगाम ततो भोगी मृतस्तच्छिरसस्तदा ॥५२॥ ततो विषार्दितो दंती मृतो भूमौ पपात च ॥ पतिते दंतिवर्ये स्मिन्नागे च पृथिवीतले ॥५३॥ प्रादुरासमहं देवि तदा तत्लिंगमध्यतः ॥ स्तुतस्ताभ्यां ततो यत्नात्क्षीरुद्रे णयथाक्रम ॥५४॥ ततस्ताभ्यां प्रयत्नेन वृतो यं वर उत्तमः ॥ उभयोरपि नाम्नेदं लिंगं प्रख्यातिमेष्यत ॥५५॥ नामानुवृत्तिरस्त्वीश पृथिव्यामावयोः सदा ॥ मुक्तिस्त्वद्दर्शनाद्देव भविष्यत्येव सर्वथा ॥ ॥५६॥ इत्युक्तं तद्वचः श्रुत्वा वरो दत्तस्तदा शिवे ॥ तयोर्मुक्तिरभूद्देवि मत्साक्षात्कारतस्तनः ॥५७॥ ॥ पार्वत्युवाच ॥ महादेव गजस्यास्य भक्तिरेतादृशी त्वयि ॥ कथं जाता भोगिनोऽपि तद्वदस्व महेश्वर ॥५८॥ अनंतजन्मभिर्घोरैर्यदि तप्तं तपस्तदा ॥ त्वयि भक्तिर्महादेव भविष्यत्यन्यथा तु न ॥५९॥ शरीरं यस्य चरमं तस्यैव त्वयि शंकरे ॥ भक्तिर्भवति सा भक्तिर्मुक्तिदानन्यगो[illegible]भा ॥६०॥ येषां संसारविच्छित्तिर्यद्देहापगमे सति ॥ त एव सर्वभावेन शरणं याति शंकरे ॥६१॥

शु

सोल्कंठंनीलकंठेतिश्रीकंठेतिवदंतिये॥तेषांशरीरंनश्वरमंसत्यमित्यस्तिहिश्रुतिः॥विश्वाधिकमहादेवविश्वेशेतिवदं
तिये॥तेषांशरीरंनश्वरमंसत्यमित्यस्तिहिश्रुतिः॥६३॥देवतासार्वभौमेतिशंकरेतिवदंतिये॥तेषांश०॥६४॥
सर्वदेवाधिदेवेतिमहेशेतिवदंतिये॥तेषां०॥६५॥सर्वोत्तमोत्तमानंतश्रीशर्वेतिवदंतिच॥तेषां०॥विदारितनृ
सिंहेतिश्रीरुद्रेतिवदंतिये॥तेषांश०॥६७॥गरुडध्वजवंद्येतिसर्वेशेतिवदंतिये॥तेषांश०॥६८॥विष्णुनेत्रार्चितांघ्रि
श्रीमहादेवेतिवादिनः॥जीवन्मुक्ताहितेज्ञेयाःसत्यमित्यस्तिहिश्रुतिः॥६९॥अनन्यशरणानित्यंयेर्चयंतिमहेश्वरं॥ता
नहंपूजयामीतिवेदोपिवदतिस्वयं॥७०॥अनन्याःशंकरंनित्यंयेर्चयंतिसुरेश्वरं॥नतेषांगर्भवासादिदुःखानीत्यस्ति
हिश्रुतिः॥७१॥एवंसतिद्विपोनित्यंबिल्वपत्रजलादिभिः॥करोतिपूजनंनित्यंकथंत्वयिमहेश्वर॥कोयंपूर्वभवेस्वामि-
न्किमनेनकृतंतपः॥यच्छरीरस्यविगमेसद्योमोक्षमवाप्स्यति॥७३॥नगोप्ययंसदाभक्त्यारत्नैरत्युत्तमैर्मुदा॥पूजय
त्याद्रभावेनलिंगरूपेत्वयिप्रभो॥७४॥एकैकस्यचरत्नस्यमौल्यमेवनविद्यते॥तादृशानिसमानीयकरोतिकथमर्च
नं॥७५॥एतत्सर्वंविशेषेणश्रोतव्यमितिवर्त्तते॥वदसर्वज्ञविश्वेशकरुणाकरशंकर॥७६॥ ॥सूतउवाच॥ ॥इत्युक्
त्वातद्वचःश्रुत्वासर्वदेवशिखामणिः॥उवाचवचनंचारुश्रोत्रानन्दकरंपरं॥७७॥ ॥श्रीसदाशिवउवाच॥ ॥
हस्तीपूर्वभवेदेविब्राह्मणोवेदपारगः॥मलयाचलदेशस्थोदरिद्रोव्याधिपीडितः॥७८॥अन्यार्थंशिवभूतायामनेनोपो
षणंकृतं॥कृतंजागरणंरात्रौतेनयामचतुष्टयं॥७९॥रात्रावन्यकृतांपूजांशिवलिंगेमदात्मके॥ददर्शायमतिप्रीत्या
दीपमालांचतत्कृतां॥८०॥ततःकदाचित्सर्पेणदष्टोभूत्सततोमृतः॥ततोयमभवद्दंतीधर्मविक्रयदोषतः॥८१॥पूजा
विलोकितानेनरात्रौभक्त्यायतोमम॥तेनजातिस्मरोजातोद्विपजन्मन्यपिप्रिये॥८२॥आबाल्यमतियत्नेनममपू
जांकरोत्ययं॥कदाचिदपिनत्यक्तमनेनममपूजनं॥८३॥बिल्वपत्रैर्जलैःपुष्पैःमामभ्यर्च्यान्वहंततः॥जलंपिबतितन्म
ध्येचैवप्रयत्नतः॥८४॥एतादृशंद्विपंदृष्ट्वाब्रह्मविष्ण्वादयःसुराः॥पूजयंत्यतियत्नेननमंतिचमुहुर्मुहुः॥८५॥
यादृशस्तादृशोवास्तुशंकरार्चनतत्परः॥पूजनीयःप्रयत्नेनसर्वथेत्यस्तिहिश्रुतिः॥८६॥ब्राह्मणःक्षत्रियावैश्यः

ने

नि

शूद्रः श्वपचो वा ॥ माननीयः पूजनीयो मदर्चनपरायणः ॥ ८७ ॥ भार्यापि यदि यत्नेन शिवपूजापरा तदा ॥ पुत्रो पि यदि यत्नेन मदर्चनपरस्तदा ॥ ८८ ॥ तास्मिन्निपुरमुत्क्रान्ते न रकं यान्ति सर्वथा ॥ अप्रमादेन सततं निष्ठायस्य शिवार्चने ॥ ८९ ॥ स पूजनीयो यत्नेन तस्मिन्नम्रः सदा भवेत् ॥ अत एव गजं सर्वे प्रणमन्ति सुराः सदा ॥ ९० ॥ बिल्वार्जनप्रियं नित्यं मदर्चनपरायणं ॥ स सर्पोपि पुरा विप्रो वेदशास्त्रविशारदः ॥ ९१ ॥ मत्पूजानिरतो नित्यं हिमवत्पर्वतोस्थितः ॥ स ददर्शाथ गंधर्वं शिवपूजापरायणं ॥ ९२ ॥ स रत्नैरुत्तमैर्निर्त्यं मामर्चयति सादरं ॥ द्विजस्तमूचे गंधर्वं प्रणिपत्याभिपूज्य च ॥ ॥ ९३ ॥ रत्नानि कुत्र संतीति पप्रच्छ विनयान्वितः ॥ ततस्तद्वचनं श्रुत्वा गंधर्वस्तमभाषत ॥ ९४ ॥ विनयेन प्रणम्यैनं मदर्चनपरायणं ॥ ॥ गंधर्व उवाच ॥ ॥ समुद्रैः सहसरत्नमेव बहुधा वर्त्तते द्विज ॥ तैरेवैतानि रत्नानि दीयन्ते मह्यमन्वहं ॥ रत्नैः प्रत्यहमभ्यर्च्य शंकरं लोकशंकरं ॥ ततः परं जलादीनि गृह्यंते नियमान्मया ॥ ९६ ॥ रत्नैरभ्यर्च्यते लिंगे सर्वपापैः प्रमुच्यते ॥ रत्नपूजनमात्रेण मुक्ताश्च बहवः पुरा ॥ ९७ ॥ भवत्येव [illegible] संतुष्टः शंकरो रत्नपूजया ॥ संतुष्टे शंकरे मुक्तिर्हस्तलभ्येव वस्तुतः ॥ ९८ ॥ नागलोकेपि रत्नानि तिष्ठंत्यत्युत्तमानि च ॥ गच्छ पूजय यत्नेन पाताले नागजन्मना ॥ इत्युक्तः स तदा विप्रस्त्यक्त्वा सद्यस्तनुं स्वकं ॥ नागो बभूव नागः सन् स तु जातिस्मरो भवेत् ॥ १०० ॥ तदा प्रभृति यत्नेन स नागोन्वहमादरात् ॥ रत्नैरत्युत्तमैः सम्यक् पूजयामास भक्तितः ॥ १ ॥ एतावेतादृशौ देवि शिवपूजापरायणौ ॥ तन्नाम्ने वहितल्लिंगं प्रख्यातं मुक्तिदायकं ॥ २ ॥ पश्चिमाभिमुखं लिंगं कालहस्तीश्वरं मुदा ॥ स्मृत्वापि सर्वपापेभ्यो मुक्तो भवति सर्वथा ॥ ३ ॥ पश्चिमाभिमुखं लिंगं शेषो[illegible]रमनुत्तमं ॥ बिल्वपत्रैः समभ्यर्च्य प्रयाति मम संनिधिं ॥ ४ ॥ न दृष्टं येन तल्लिंगं तस्य जन्म निरर्थकं ॥ नार्चितं येन तल्लिंगं जीवन्नपि मृतो हि सः ॥ ५ ॥ द्रष्टव्योति प्रयत्नेन कालहस्तीश्वरो मुदा ॥ यष्टव्यो बिल्वपत्राद्यैः संसारभयनाशकः ॥ ६ ॥ श्रीमद्दक्षिणकैलासे सर्वे ब्रह्मादयः सुराः ॥ तिष्ठंति देवदेवेशं मामभ्यर्च्यान्वहं मुदा ॥ ७ ॥ नित्यं श्रीकालहस्तीशं यो तु सेवितुमिच्छति ॥ स मदीयगणो ज्ञेयो मम प्रियकरश्च सः ॥ ८ ॥

का

प्राणविश्लेषसमये कालहस्तीश्वरेति मां ॥ यस्मरिष्यति भाग्येन तस्मै मोक्षं ददाम्यहं ॥९॥ यं यं कामयते कामं प्राण
विश्लेषणक्षणे ॥ तस्मिन्क्षेत्रवरे देवि तं तं कामं स विंदति ॥१०॥ तन्मोक्षदं कामदं च तत्तु क्षेत्रमनुत्तमं ॥ अत एव हि तत्क्षे-
त्रं सेवनीयं प्रयत्नतः ॥११॥ पुरा कश्चिद्द्विजः स्नात्वा सुवर्णमुखरीजले ॥ पूजयामास यत्नेन कालहस्तीश्वरं मुदा ॥ ततः प्रदक्षिणा
दीनि कृत्वा सुष्वाप चिंतया ॥ ततः स्वप्नो बभूवैवं तस्य चिंताविनाशकः ॥१३॥ यत्स्वप्नश्रवणादेव रोमांचस्ते भविष्यति ॥ सुभगे
तादृशं वक्ष्ये शृणु स्वप्नं प्रयत्नतः ॥१४॥ ॥ श्रीशिव उवाच ॥ ॥ चिंतां मा कुरु विप्रेंद्र क्षेत्रेऽस्मिन्कामदे मम ॥ चिंतितार्थ
प्रदोऽत्राहं निवसामि न संशयः ॥१५॥ आदेहपातं यत्नेन कुरु मत्पूजनं सदा ॥ तेनाहं सर्वथा कामान् पूजयिष्ये न संशयः ॥
॥१६॥ मामाश्रित्य महादेवं सर्वाभीप्सितदायकं ॥ न कोपि चिंतावशगो न जातो न भविष्यति ॥१७॥ तावद्दुःखानि चिंतापि-
चिंतावशगो यावन्मां नोपसेवते ॥ मयि संसेविते नित्यं भवत्यानंद एव हि ॥१८॥ अहं त्वनन्यसदृशः सर्वदेवशिरोमणिः ॥
उपेंद्रेंद्रादयो देवाः सर्वेपि मम सेवकाः ॥१९॥ मत्त एवाभवद्विष्णुर्मत्त एवाभवद्विधिः ॥ मत्त एव तदन्यच्च जगदासीच्चरा
चरं ॥२०॥ चिंता न कार्या विप्रेंद्र तवाभीष्टं ददाम्यहं ॥ मद्भक्ताय सुशीलाय न देयं मम वर्त्तते ॥२१॥ द्विजोपेंद्रमिंद्रत्वं
ब्रह्मत्वं वा यदि त्वया ॥ प्रार्थ्यते तन्मया तुभ्यं देयमेव न संशयः ॥२२॥ किं चेदं कामदं क्षेत्रं मम प्रियकरं द्विज ॥ अत्राभी
ष्टं ददाम्येव मद्भक्ताय न संशयः ॥२३॥ एतादृशीं स्वप्नवार्त्तां प्रातरुत्थाय यत्नतः ॥ कथयामास शैवेभ्यो विनीतो भक्ति
पूर्वकं ॥२४॥ ततस्तां स्वप्नवार्तां ते श्रुत्वा शैवोत्तमास्तदा ॥ संतोषं परमं प्रापुरपूर्वस्वप्नवार्त्तया ॥२५॥ तदाप्रभृति विप्रोसौ
प्रयत्नेन मदर्चनं ॥ कृत्वा कदाचिद्द्विजहो प्राणान्मामनुसंस्मरन् ॥२६॥ तदानीमेव शैवाय सोहं प्रत्यक्षतां गतः ॥ ततः प्रणम्य
मां विप्रश्चकार स्तोत्रमादरात् ॥२७॥ ततः स विप्रो विनयान्नत्वा संपूज्य मां शिवे ॥ इदमेव वचः प्राह कृतांजलिपुटस्तदा ॥२८॥
॥ द्विज उवाच ॥ ॥ अनामयं पदं देहि महेशं शंकर सर्वदा ॥ यत्प्राप्य न निवर्त्तंते कल्पांतेप्यक्षयं पदं ॥२९॥ मया नयाच्यते शं
भो विष्णुत्वं तेन किं मम ॥ विष्णोरपि यतो घोरो गर्भवासोखिलैः श्रुतः ॥३०॥ संसारोपि महानेव विष्णुनाप्यनुभूयते ॥
उत्पत्तिर्बहुधा जाता तस्य मत्स्यादियोनिषु ॥३१॥ त्वया दत्तोस्ति वैकुंठः शिवभक्ताय विष्णवे ॥ त्वयि भक्तिः कृता ते

कृ

नतदर्थं पूर्वमीश्वर॥ ३२॥ अलब्धान्यपदस्यास्य तद्विष्णोः परमं पदं ॥ अलब्धान्यपदाः केचित्तद्धिपश्यंति सूरयः॥ ३३॥
कदन्नमप्यनन्नस्य परमान्नं यथा तथा ॥ अलब्धान्नपदस्यासीत्तद्विष्णोः परमं पदं॥ ३४॥ नित्यं निष्कंटकं राज्यं भाग्यवान
भिवांछति॥ क्षुत्पीडितो दरिद्रस्तु कुत्सितान्नानि वांछति॥ ३५॥ अलब्धान्यपदो विष्णुस्तदा वैकुंठवांछया॥ त्वयि भक्तिं चकारा
तो वैकुंठो प्रापकेशवः॥ ३६॥ मया वैकुंठलोकस्तु मनसापि न गण्यते॥ तस्मात्सदं महादेव देहि मह्यमनामयं॥ ३७॥ मया ब्र
ह्मत्वमिंद्रत्वं कृतं यबस वल्लभो॥ न तत्र वांछा स्वप्नेपि जायते मन्मनस्त्वयि॥ ३८॥ इत्युक्तं तद्वचः श्रुत्वा शांकरस्य महात्मनः
॥ तस्मै मुक्तिर्मया दत्ता प्रीतिपूर्वकमादरात्॥ ३९॥ षष्ठ्यर्बुदसहस्राणि शांकरास्तत्र सर्वदा॥ अनन्यमनसः संति मदर्चनपराय
णाः॥ ४०॥ तेष्वेवमेव ब्रह्मादीन् कदाचिदपि शोभने॥ शैवा न गणयंत्येव मदर्चनपरायणाः॥ ४१॥ अस्माभिरत्र मरणान्मुक्तिः प्रा
प्यैव सर्वथा॥ विष्णुब्रह्मादिदेवानां कदा मुक्तिर्भविष्यति॥ ४२॥ संसारपाशसंबद्धा विष्णुब्रह्मादयः सुराः॥ तेषां तु ब्रह्मकल्पांते मुक्तिरी
शप्रसादतः॥ ४३॥ अस्माभिरल्पकालेन शंकरार्चनपूर्वकं॥ श्रीमद्दक्षिणकैलासे तनुस्त्याज्येह मुक्तये॥ ४४॥ अस्माभिर्भारते
वर्षे जन्म प्राप्तं तपस्यया॥ तत्राप्यत्यद्भुतमं क्षेत्रं शैवं प्राप्तमिदं महत्॥ ४५॥ अस्माभिः सावधानेन भस्मोद्धूलितविग्रहैः॥ नित्यं श्री
कालहस्तीशः पूजनीयो यथाविधिः॥ ४६॥ पश्चिमाभिमुखं लिंगमिदमत्यंत दुर्लभं॥ एतस्य दर्शनं क्वास्ति विना बहुतपस्यया॥
॥ ४७॥ पश्चिमाभिमुखं लिंगं यद्यन्यत्रापि तिष्ठति॥ तत्रापि मरणे मुक्तिर्भविष्यत्येव सर्वथा॥ ४८॥ कालहस्तीश्वरं लिंगं बिल्व
पत्रैर्जलाप्लुतैः॥ यः पूजयिष्यति प्रीत्या न तस्य नरकाद्भयं॥ ५१॥ शांकरायात्र दुग्धान्नं शर्करा घृतसंयुतं॥ देयमत्यंतयत्नेन शि
वप्रीत्यर्थमादरात्॥ यत्न कुत्रापि यत्नेन भोजिते शिवयोगिनि॥ तत्रापि शंकरप्रीतो भवत्यत्र तु किं पुनः॥ ५३॥ यद्यत्र शांकरो
भक्त्या पूज्यते शंकरार्चकः॥ तदा तुष्टो भवत्येव सांबः सर्वोत्तमः शिवः॥ ५४॥ अत्राल्पमपि चेद्दत्तं तदानंत्याय कल्पते॥ ५५॥ भू
रिपुण्यप्रभावेन प्राप्यते क्षेत्रमीदृशं॥ अस्माभिरतियत्नेन स्थातव्यं शिवपूजकैः॥ ५६॥ इत्यन्योन्यं वदंतस्ते मुनयो
ब्रह्मवादिनः॥ श्रीमद्दक्षिणकैलासे निवसंति मनोरमे॥ ५७॥ पुरा निष्कल्मषो नाम मुनिर्मल्लिंगपूजकः॥ श्रीमद्दक्षि
णकैलासे चकार वसतिं शिवे॥ ५८॥ तेन तप्तं तपो घोरं तत्रैवाति प्रयत्नतः॥ तेनैव तपसा देवाः क्षुब्धाः सर्वेपि शांकरि॥ ५९॥

न

भस्मनोद्धूल्यसर्वांगंसम्रदर्चनतत्परः॥ मामेवसततंप्रीत्यापूजयित्वास्थितःशिवे॥६०॥ तंददर्शमहाशैवंविनीतइतिशांकरः॥
दृष्ट्वातंपूजयामासबिल्वपत्रेणभस्मना॥६१॥ ततस्तमब्रवीद्विप्रोनिष्कल्मषमनाकुलं॥ मुक्तिक्षेत्रोत्तमक्षेत्रंकिमस्तीतिय
थार्थतः॥६२॥ ततोनिष्कल्मषोविप्रंविनीतंतमभाषत॥ मुक्तिक्षेत्रोत्तमंक्षेत्रंकाश्येकाश्रुतिसंमता॥६३॥ मुक्तिक्षेत्रमिदं
विप्रमुक्तिक्षेत्रोत्तमंतुन॥ मुक्तिक्षेत्रोत्तमंकाशीनान्येतिश्रुतिसंमता॥६४॥ महेशराजधानीयासासर्वश्रुतिसंमता॥ सतु
काश्येवनान्येतिवेदांसंतिसहस्रशः॥६५॥ व्याचष्टेतारकंब्रह्मयत्रसाक्षात्सदाशिवः॥ तदेवमुक्तिक्षेत्रेषुश्रेष्ठमित्युच्यतेबुधैः
॥६६॥ इदंमुक्तिप्रदंक्षेत्रंकाशीसंप्राप्तिसाधनं॥ ततस्तदेवहिक्षेत्रंमुक्तिक्षेत्रोत्तमोत्तमं॥६७॥ यत्रादेवाधिदेवोस्तिविश्वेशो
विश्वनायकः॥ ततःक्षेत्रोत्तमंनान्यत्क्षेत्रमित्यस्तिहिश्रुतिः॥६८॥ काश्यांविश्वेशरूपेणमुक्तिःपुंजीकृताद्विज॥ ततस्त
त्सदृशंक्षेत्रंनास्तिनास्तीत्यपिश्रुतिः॥६९॥ यत्रस्थितःपुल्कसोपिधिक्करोतिशचीपतिं॥ तत्तुकाश्यभिधंक्षेत्रंतत्तुविश्वेश्वराश्रि
तं॥७०॥ यत्रविश्वेश्वरंलिंगंदृष्ट्वापिमुनिपुंगव॥ नगर्भभाक्पुनःसत्यंसत्यंसत्यमितिश्रुतिः॥७१॥ तत्रास्तिमणिकर्णाख्यं
कुंडंकेशवनिर्मितं॥ तत्रपीत्वापयोभूयस्तन्यपानंभविष्यति॥७२॥ मणिकर्ण्यायःप्रविष्टःशिवोदरे॥ शिवोदरंप्रविष्टोयः
सपुनर्जन्मभाक्नहि॥७३॥ मणिकर्ण्यांवसेद्यस्तुनियमेनसमन्वितः॥ सवसत्येवकैलासेनानागणनिषेविते॥७४॥ मणि
कर्ण्युपविष्टेनसुखंयदनुभूयते॥ सुखंतुतादृशंविप्रनकुत्राप्यनुभूयते॥७५॥ मणिकर्ण्यांनरःस्नात्वादृष्ट्वाविश्वेश्व
रंप्रभुं॥ सवंशकोटिसंयुक्तःप्रयातिशिवमव्ययं॥७६॥ परंतुकाशीक्षेत्रस्यप्राप्तिरत्यंतदुर्लभा॥ सामहेशप्रसादेनभ
वतीत्यनुशुश्रुमः॥७७॥ ततस्तत्प्राप्तिकामेनकार्यमत्रतपोमुदा॥ संतुष्टेतपसात्रेशेकाशीप्राप्तिर्भविष्यति॥७८॥ इ
तितद्वचनंश्रुत्वातपश्चक्रेततोद्विजः॥ तत्रदक्षिणकैलासेसर्वकामप्रदेशुभे॥७९॥ पुरातत्रममक्षेत्रेकश्चिद्विप्रोवनाश्रयः
पूजयामासयत्नान्मांबिल्वपत्रादिभिर्मुदा॥८०॥ प्रत्यहंमामनभ्यर्च्यनगृह्णातिजलादिकं॥ करोतिसततंभक्त्याभस्मरुद्रा
क्षधारणं॥८१॥ अरण्यंप्रत्यहंतेनस्थीयतेवनवासिना॥ तत्रस्थित्वापिमामेवस्मृत्वास्मृत्वाभिनंदति॥ समहत्यंमांसमम
लंमास्वाद्यस्वाद्यभक्तितः॥ उपहारंप्रयत्नेनकल्पयन्त्यन्वहंमुदा॥८३॥ कुसुमैर्बिल्वपत्रैश्चमुखेमध्यस्थितेर्जलैः॥

मामर्चयतिय त्वेनभिक्षोनियमपूर्वकं ॥ ८४ ॥ तंदृष्ट्वामुनयः सर्वेभिक्षुंतादृशमन्वहं । दुःखिताएवतिष्ठंतिमुखमध्यजला
र्चकं ॥ ८५ ॥ उच्छिष्टोदकमानीयकिंनित्यमभिषिंचति ॥ मांसोपहारंशर्वायनिवेदयतिकिंजडः ॥ ८६ ॥ प्रत्यहंनियमेनैवबि
ल्वपत्रैर्मनोहरैः ॥ पूजयत्ययमीशानंशिवंलिंगस्वरूपिणं ॥ ईदृशोमुखमध्यस्थैः शिवंसमभिषिंचति ॥ दुर्बुद्धिरीदृशीजाता
कथमेतस्यसर्वदा ॥ ८८ ॥ एवंनकार्यंभिक्षेतियद्यस्माभीरिहोच्यते ॥ शरपाणिरयंक्रूरः सर्वानेवहनिष्यति ॥ ८९ ॥ एवंस्थिता
मुनिवराः प्रत्यहंदुःखिताशिवे ॥ तत्रस्थितेपुतेष्वेवंनित्यंकृत्वाससंस्थितः ॥ ९० ॥ तेतपोव्ययभीत्यैनंनशपंतिकदाचन ॥ किं
चास्मिन्शिवभक्तत्वंदृष्ट्वातूष्णींस्थिताशिवे ॥ ९१ ॥ सदाचारोदुराचारोनियमेनशिवार्चकः ॥ पूजनीयोतियत्नेननतस्मिन्नि
ष्ठुरंवदेत् ॥ ९२ ॥ कदाचित्संचरन्भिक्षोवनमध्यगतः शिवे ॥ भिक्षोघर्मंश्रुसंतप्तस्तृषितश्चबभूवसः ॥ ९३ ॥ तस्यैवनिकटेकुंडं
शीतलोदकसंवृतं ॥ स्थितंतथापिभिन्नपीतंशीतलंजलं ॥ ९४ ॥ मयाश्रीकालहस्तीशेबिल्वपत्रादिसाधनैः ॥ नाराधितः प्रय
त्नेवनतश्चपुनः पुनः ॥ ९५ ॥ विभूतिर्नधृताशुद्धासर्वपापापनोदिनी ॥ शैवः पंचाक्षरः शुद्धोनजप्तः शिवसंनिधौ ॥ ९६ ॥
एवंसतितृषार्त्तेनजलंपेयंकथंमया ॥ तृषयायदिगच्छंतिगच्छंत्वद्यासवोमम ॥ ९७ ॥ तृषार्दितेनचेत्त्यक्तातनुरेषातदाम
म ॥ सर्वथानरकावासोनभविष्यतिशाश्वतः ॥ ९८ ॥ विभूतिधारणंत्यक्त्वामयाचेत्पीयतेजलं ॥ तदातुनरकावासोभविष्य
त्येवसर्वथा ॥ ९९ ॥ विभूतिधारणंत्यक्त्वापीतंकैश्चित्पुराजलं ॥ तैर्दुःखमनुभुक्त्वैवस्थीयतेनरकार्णवे ॥ १०० ॥ त्यक्त्वाशिवार्च
नंकैश्चित्पुरापीतंजलंततः ॥ तैरिदानीमपिध्यातेभुज्यतेदुःखमापसे ॥ १ ॥ पंचाक्षरजपंत्यक्त्वाकैश्चित्पीतंजलंपुरा ॥ तेत
त्मूत्रंसमलंपीत्वातिष्ठंतिदुःखिताः ॥ २ ॥ ततः शिवार्चनंत्यक्त्वाभस्मनोधारणंतथा ॥ पंचाक्षरजपंत्यक्त्वानपेयमुदकंम
या ॥ ३ ॥ किमेतैर्ममकर्त्तव्यंप्राणैर्देहेनवाममम ॥ मयाशिवार्चनंत्यक्त्वाभस्मनोधारणंतथा ॥ नादीनित्यक्त्वापेयंजलंकथं ॥
॥ ४ ॥ एवमत्यंतयत्नेनशरीरंयदिरक्ष्यते ॥ तदाकिमिदमाकल्पंशरीरमेवाशिष्यति ॥ ५ ॥ पूयशोणितमूत्राढ्यंपुरीषनिलयंस
दा ॥ शरीरमेतद्दुर्गंधिकिमनेनसुखंमम ॥ ६ ॥ आंत्रास्थिबद्धंसमलमपायशतसंकुलं ॥ क्षयिष्णुरोगसंबद्धंसमलमेनरो शरीरं
चते ॥ ७ ॥ अनंतानिशरीराणित्यक्तान्येवपुरामया ॥ इदमप्यधुनात्याज्यंतृषार्तेनमयाध्रुवं ॥ ८ ॥ वस्त्राणिकतिनष्टानि

कृटिबत्थामिसादरं॥ तन्नाशेनयथादुःखंतथेहापिनसंशयः॥९॥ मयापूर्वंस्थितंनूनंशंकराराधनेविना॥ अतःप्राप्तानि बहुधाशरीराणिमयापुरा॥१०॥ शिवपूजनमेवाहुःसंसारोच्छेदकारणं॥ तथासत्यद्यमनसाशंकरंपूजयाम्यहं॥११॥ सर्वव्यापी सर्वभूतांतरात्मासाक्षीचेतानिर्गुणश्चेश्वरश्च॥ सोमोनित्योनिर्विकारश्चिदात्मानीलग्रीवःपातुमामद्यदुःखात्॥१२॥ मायाती तोमोहिताशेषलोकःसोमाकारःसामवेदस्वरूपः॥ सर्वाशास्यःसर्वरूपोमहेशोनीलग्रीव०॥१३॥ व्यक्ताव्यक्तानादिकर्माभिग म्योव्यक्ताव्यक्तानादिधर्माभिगम्यः॥ व्यक्ताव्यक्तानाधिदिवेदाधिगम्योनील०॥१४॥ यंवेदांतानैवजानंतिशंभुंयस्मान्नित्यंवेर वाचोनिवृत्ताः॥ यंब्रह्माद्यानैवजानंतिसोयंनीलग्रीव०॥१५॥ यत्सव्यांगादुद्भवःसृष्टिकर्त्तुर्यद्वामांगाज्जन्मसंप्रापविष्णुः॥ यःसर्वेशःसोयमाद्यंतशून्योनीलग्रीवः०॥१६॥ यंसर्वेशंतत्वतोवेदनिष्ठाविज्ञायेशंपूजयंत्यादरेण॥ सोयंशर्वःसर्ववेदांत वेद्योनीलग्रीवः०॥१७॥ यस्यापांगस्पंदमात्रेणनित्यंब्रह्मोपेंद्रेंद्रादयःकंपमानाः॥ दूरेतिष्ठंत्यन्वहंसोयमीशोनीलग्रीवः०॥ ॥१८॥ यत्प्रसादाङ्गंविष्णुरत्यंतभक्त्यास्वीयंनेत्रंसम्यगुत्पाद्यरम्यं॥ स्वाभीष्टार्थंपूजयामाससोयंनीलग्री०॥१९॥ यस्यस्मृत्या सर्वपापौघनाशोयत्पूजातोघोरसंसारनाशः॥ यस्यस्तुत्यामुक्तिराप्यैवसोयंनीलग्री०॥२०॥ ॥श्रीशिवउवाच॥ ॥एवं स्तुत्वासभिल्लोमामानंदाश्रुलसन्मुखः॥ दध्यौदेवाधिदेवंमाममृताप्लुतविग्रहं॥२१॥ तदानीमभवद्वृष्टिःमंदारकुसुमान्विता॥ श रीरंसिक्तमभवत्तस्यवृष्ट्यातदाशिवे॥२२॥ यदावृष्टिरभूद्रम्यासपिधायमुखंतदा॥ स्थितोमुखेजलस्यास्यप्रवेशोमास्त्विति प्रिये॥२३॥ ततोस्यतृट्तदाशांताजलपानंविनाप्रिये॥ जलंनपीतंभिल्लेनपात्यमानमपिध्रुवं॥२४॥ ततःसबिल्वपत्राणिपु ष्पाण्यत्युत्तमानिच॥ मांसान्यपिविचित्राणिसमादायैवनिर्गतः॥२५॥ ततःशनैःशनैर्भिल्लःकालहस्तीश्वरालयं॥ संप्रापपू जाद्रव्याणिगृहीत्वामुदिताननः॥२६॥ ततःस्नात्वाप्रयत्नेनसुवर्णमुखरीजले॥ भस्मनोद्धूलनंकृत्वात्रिपुंड्रंचचकारसः ॥२७॥ ततोगृहीत्वापुष्पाणिबिल्वपत्राणिचादरात्॥ मांसंचजगृहेभिल्लोजलंचमुखतस्तदा॥२८॥ ततोमुखजलैःसम्य क् अभिषिच्यसमाहितः॥ बिल्वपत्रैःसपुष्पैश्चचक्रेपूजांप्रयत्नतः॥२९॥ ततोमांसानिसर्वाणिसुस्वादूनिप्रयत्नतः॥ म ह्यंनिवेदयामासपंचाक्षरपुरःसरं॥३०॥ प्रदक्षिणनमस्कारान्नर्तनंचचकारसः॥ ततःपंचाक्षरंश्रुत्यंजजापप्रीतमानसः॥३१॥

एतस्मिन्नंतरे देवि ऋषयो ब्रह्मवादिनः॥ सायं प्रदोष पूजार्थं कोटिशः समुपागताः॥३२॥ तदा मया भिल्ल भक्तिप्र
ख्यापनमनीषया॥ दृढ देवालयस्यैव भ्रंशस्तेभ्यः प्रदर्शितः॥३३॥ भ्रंश्यमानं ततो दृष्ट्वा देवालयमनुत्तमं॥
ऋषयो निर्ययुः सर्वे विस्मितास्ते शिवालयात्॥३४॥ भ्रंश्यमानं तु तद्दृष्ट्वा भिल्लो देवालयं तदा॥ विस्मितश्चिंतयामा दा
स किं कर्त्तव्यमिति प्रिये॥३५॥ भ्रंश्यमानस्तु पाषाणः शिवलिंगे पतिष्यति॥ तत्पातेन लिंगाघातः शिवलिंगे भवि
ष्यति॥३६॥ जीवता त्वयमाघातो मया द्रष्टुं न शक्यते॥ भ्रंश्यमानाश्च पाषाणाः न धर्त्तव्या यतो दृढाः॥३७॥ शक्ति
श्च मम नास्त्येव बहुपाषाण धारणे॥ पतिष्यंत्येव पाषाणाः शिवलिंगोपरि ध्रुवं॥३८॥ तनुं वितानवत्कृत्वा शिवलिं
गोपरि स्थिते॥ भ्रंश्यमानस्तु पाषाणा मत्पृष्ठे तु पतिष्यति॥३९॥ यदि पाषाणभारेण मच्छरीरं पतिष्यति॥३९॥
तदा तु शिवलिंगाग्रे शरीरं मे पतिष्यति॥४०॥ ततः परं तु पाषाणा बहवोपि पतंतु ते॥ तथापि शिवलिंगस्य त्वाघातो न
भविष्यति॥४१॥ येन केनापि रूपेण शिवलिंगस्य सर्वथा॥ आघातो न यथात्र स्यात्तथा कार्यं प्रयत्नतः॥४२॥ बहिः पला
यनगमने रक्षिते यं तनुर्भवेत्॥ किमस्तु फलमेतस्य शरीरस्य तु रक्षणे॥४३॥ देहरक्षणमात्रं तु पुरुषार्थो न सर्वथा॥ ए
तत्संरक्षणं कर्त्तुं कोनु यत्नं करिष्यति॥४४॥ सुखलेशोपि नास्त्यद्य बहिश्चेद्गम्यते तदा॥ शिवलिंगाघातहेतुर्दर्शने कु
सुखं भवेत्॥४५॥ किं चात्र यदि भाग्येन शरीरं चेत्पतिष्यति॥ तदा मुक्तिरनायासाद्भविष्यति मम ध्रुवं॥४६॥ यदि स्याच्छि
दा वलिंगस्य संनिधौ मरणं तथा॥ मुक्तिकांताकराक्रांता सद्य एव भविष्यति॥ मरणं दुर्लभं पुंसां शिवलिंगस्य संनिधौ॥ तत्र चे
न न्मरणं पुंसां संसारो बंधपुनः ध्रुवं॥४८॥ शीर्यमाणस्वभावस्य शरीरस्यास्य रक्षणं॥ अस्मिन्काले कथं कार्यं परलोकार्थिनाम
या॥४९॥ यदि मृत्युः समायाति तदा रक्षणमस्य तु॥ कर्त्तुं न शक्यते नूनमुपायैः कोटिशः कृतैः॥५०॥ मृत्योरागमने
न कुत्र कर्त्तव्यं स्यात्पलायनं॥ कृते पलायने तेन त्यजंतेपि बसर्वथा॥५१॥ मृत्युंजयं विनान्यस्तु न मृत्युभयनाशकः॥ यस्य
मृत्युभयं नास्ति स तु मृत्युंजयः स्मृतः॥५२॥ एकस्यैव महेशस्य मृत्योर्नास्ति भयं ततः॥ शिव एव हि देवेषु मृत्युंज

यस्तिस्मृतः ॥ ५३ ॥ मृत्युपाशवशाः सर्वे विष्णुब्रह्मादयः सुराः ॥ ततस्तद्दर्शनात्पुंसां मृत्युभीतिर्न्नश्यति ॥ ५४ ॥ अतो
मृत्युंजयस्यैव पूजनं मृत्युनाशकं ॥ मृत्युंजयस्य पूजापि कर्तव्या भक्तिपूर्वकं ॥ ५५ ॥ बहिर्देहस्य रक्षार्थमिदानीं यदि ग
म्यते ॥ तदा मृत्युंजये भक्तिर्मम का वा भविष्यति ॥ मृत्युंजयोन्यभक्तस्य न मृत्युभयनाशकः ॥ ततोन्यभक्तिस्त्याज्यैव श्री
मृत्युंजयपूजकैः ॥ ५७ ॥ श्रीमृत्युंजयभक्तस्य मृत्युर्नास्त्येव सर्वथा ॥ ततो मया प्रयत्नेन स्थातव्यं शिवसंनिधौ ॥ ५८ ॥ इत्यु
क्तः सदृढो भिक्षुः पुनः संपूज्य मां तथा ॥ स्वांगं वितानवत्कृत्वा शिवलिंगोपरि स्थितः ॥ ५९ ॥ तदा रवो महानासीत्पाषाणभ्रंश
संभवः ॥ तदाप्यति दृढो भिक्षुर्धैर्येणैव हि संस्थितः ॥ ६० ॥ तदानीं तादृशं दृष्ट्वा सर्वे ते ऋषिपुंगवाः ॥ अतिविस्मयमापन्ना
स्तुष्टुवुर्भिक्षुमादरात् ॥ ६१ ॥ धन्योसि कृतकृत्योसि कृतार्थोसि न संशयः ॥ यतः सदाशिवे भक्तिरीदृशी त्वयि राजते ॥ ६२ ॥
तव धन्यतरो देहः सत्यं सत्यं न संशयः ॥ यत॰ ॥ तव धन्यतरो देहः सत्यं सत्यं न संशयः ॥ यतः स॰ ॥ ६४ ॥ तवैव जीवनं ध
भाग्यस्य तव नांतोस्ति सत्यं सत्यं न संशयः ॥ यत॰ ॥ तव धन्यतरो देहः सत्यं सत्यं न संशयः ॥ यतः स॰ ॥ ६४ ॥ तवैव जीवनं ध
न्यं सत्यं ॰ ॥ यतः स॰ ॥ ६५ ॥ तवैव जन्म सफलं सत्यं स॰ ॥ यतः स॰ ॥ ६६ ॥ तवैव जननी धन्या सत्यं ॰ ॥ यतः स॰ ॥ ६७ ॥ त
वैव जनको धन्यः सत्यं ॰ ॥ यतः स॰ ॥ ६८ ॥ तवैव कुलमुत्कृष्टं सत्यं ॰ ॥ यतस्स॰ ॥ ६९ ॥ शक्तिस्त्वमानुषी सेयं धैर्यमेतदमा
नुषं ॥ भक्तिरेतादृशी लोके न कुत्रापि श्रुता ध्रुवं ॥ ७० ॥ यस्यास्त्येतादृशी भक्तिर्महादेवे सुरोत्तमे ॥ तस्य हस्तगतैवास्ति
मुक्तिः कांता न संशयः ॥ ७१ ॥ त्वयेदं मानुषं रूपं धृतमास्ति शिवप्रिय ॥ भवान्कश्चन देवोसि देवमध्ये न संशयः ॥ ७२ ॥ देवे
ष्वपीदृशो भक्तः शंकरस्य जनार्दन ॥ शिवार्चनपरो जातो तत्त्ववेत्ता यतो हरिः ॥ ७३ ॥ विदित्वा तत्त्वतो विष्णुः देवदेवं सदाशि
वं ॥ पूजयामास बहुधा तपश्चरणपूर्वकं ॥ ७४ ॥ विष्णुस्स्वनेत्रकमलं समुत्पाद्य प्रयत्नतः ॥ चकार मुदितो भक्त्या शिवपादां
बुजार्चनं ॥ ७५ ॥ अनेन कल्पपर्यंतं पुरा नारायणः स्वयं ॥ चक्रे शंकरमुद्दिश्य तपश्चर्यां प्रयत्नतः ॥ ७६ ॥ स एव विष्णुः
शैवेंद्रः गृहीत्वा मानुषीं तनुं ॥ एवं शिवार्चनपरः तिष्ठत्यत्र न संशयः ॥ ७७ ॥ कथमेतादृशं धैर्यं मानुषस्य भविष्यति ॥ य
द्दृश्यमानपाषाणेष्वप्यासीत्सुस्थिरं मनः ॥ ७८ ॥ एवं स्तुत्वा स्थिताः सर्वे भिक्षुमेनं मुनीश्वराः ॥ भिक्षुस्तु मन्मनो भूत्वा
मां ध्यायन्नेव संस्थितः ॥ ७९ ॥ ततो मुनिवरैर्दृष्टो यथास्थानं शिवालयः ॥ ततो बभूव विमला पुष्पवृष्टिर्मनोहरा ॥ ८० ॥

ततः साम्बशिवः संतुष्टः पुनरभ्यर्च्यमांमुदा ॥ विस्मितोनिर्ययौमंदं मुहुर्मांसविलोकयन् ॥ ८१ ॥ भिल्लंविलोक्यमुनयः त
मेवबहिरागतं ॥ पुष्पाद्यैःपूजयामासुर्विनयानतकंधरं ॥ ८२ ॥ ततः संपूज्यमांभक्त्याबिल्वपत्राधिसाधनैः ॥ जग्मुःस्व
स्वालयंसर्वेशंसंतःयस्यविक्रमं ॥ ८३ ॥ एतादृशास्तुमद्भक्ताःकोटिशः संतिशोभने । तस्मिन्नेवाशिवक्षेत्रेमम दर्शनपरा
यणाः ॥ ८४ ॥ ॥ श्रीपार्वत्युवाच ॥ ॥ कोयंपूर्वभवेशंभोकुत्रवासंस्थितःपुरा ॥ कथमेतादृशीभक्तिः त्वयितस्यवद
प्रभो ॥ ८५ ॥ ॥ श्रीसदाशिव उवाच ॥ ॥ अयंपूर्वभवेदेविकुक्कुटोमांसभक्षकः ॥ भिल्लेनकेनचित्सोपिपोषितो हिमव
द्गिरौ ॥ ८६ ॥ सभिल्लः प्रत्यहंधन्वीवनेहत्वाबहून्मृगान् ॥ उत्तमंमांसमादायपचतिप्रीतिपूर्वकं ॥ ८७ ॥ ततोमंदाच्छ
मादायसघृतंमांसमुत्तमं ॥ मह्यंनिवेद्ययत्नेनस्वयमश्नातिसादरं ॥ ८८ ॥ मह्यंनिवेदितंमांसं अन्यस्मैनददातिसः ॥ स्वयं
मेवातियत्नेनप्राश्नातिप्रीतिपूर्वकं ॥ ८९ ॥ तद्भक्ष्यमाणमांसस्य कश्चिल्लेशःकदाचन ॥ पपातभूमौतन्मांसंकुक्कुटेनहि
भक्षितं ॥ ९० ॥ ततःसभिल्लस्तंशीघ्रंजघानक्रोधसंकुलः ॥ ततःसकुक्कुटःप्रापभिल्लजन्मैवसत्वरं ॥ ९१ ॥ भिल्लजन्मस
मासाद्यसतुजातिस्मरोभवेत् ॥ ९२ ॥ कुक्कुटस्यास्यपूर्वं मांसभक्षणवासना ॥ तयावासनयामांसंसंपादयतिसादरं ॥
९३ ॥ तत्तुमह्यंनिवेद्यैवभक्षयत्यन्वहंमुदा ॥ संपूज्यसादरंभक्त्यालिंगरूपिणमव्ययं ॥ ९४ ॥ अतीतज्ञानवानेवजातो
भिल्लोगिरींद्रजे ॥ तस्यनानागतज्ञानंतत्रकारणमुच्यते ॥ ९५ ॥ मह्यमन्नंप्रयत्नेननिवेद्याश्नातियःसदा ॥ सभूपालःस
र्वज्ञोभवत्येवहिसर्वथा ॥ ९६ ॥ अतीतानागतज्ञान भूपालत्वंचशाश्वतं ॥ जातिस्मरत्वंसोदर्यमन्नैवेद्यस्यभक्षणात् ॥
॥ ९७ ॥ मन्नैवेद्यमनुच्छिष्टमन्यानुच्छिष्टमुत्तमं ॥ योश्नातिसतुसर्वज्ञःसभूपालोपिजायते ॥ ९८ ॥ अन्योच्छिष्टंकुक्कुटे
नमन्नैवेद्यंतुभक्षितं ॥ तेनातीतज्ञानमासीन्मयिभक्तिश्चशाश्वती ॥ ९९ ॥ यया भक्त्यामुनिश्रेष्ठाः लज्जिताःसाधुवृत्त
यः ॥ भक्तिस्तुतादृशीप्राप्तामन्नैवेद्यस्यभक्षणात् ॥ १०० ॥ ततःपरमयंभिल्लःसर्वभूचक्रपालकः ॥ बभूवसर्ववेत्ताच
सर्वसौभाग्यसंयुतः ॥ १ ॥ स्वर्गलोकादिलोकेषुसंचचारनराधिपः ॥ विष्णुब्रह्मादिभिर्नित्यं पूजितश्चबभूवसः ॥ २ ॥

ता

राज्याधिपत्यंसंप्राप्यसोयंप्रत्यहमादरात्॥ रत्नैर्लक्ष्यमितैर्नित्यंचकारममपूजनं॥३॥अष्टलक्षमितैर्नित्यंस्वर्णपू
ष्पैश्चसादरं॥ पूजयामासभक्त्यायमामनाद्यंतमव्ययं॥४॥ दीपान्लक्षावधिप्रीत्याकृष्णागोघृतपूरितान्॥ ददातिम
ह्यमनिशंतथाकर्पूरदीपकान्॥५॥ एवमत्यंतयत्नेनमदर्चनपरायणः॥ कृत्वाराज्यंततःपुत्रेराज्यंसर्वंन्यवेदयत्
॥६॥ ततोदक्षिणकैलासेनित्यंकृत्वामदर्चनं॥ बहुकालमुवासायंततस्तत्रतनुंजहौ॥७॥ ततस्तस्मैमयादत्तोमो
क्षोपिवरवर्णिनि॥ मुक्तोभिक्षुस्तथान्येपिमुक्तास्तत्रमदर्चकाः॥ विश्वस्यमांप्रयत्नेनयस्तुसंपूजयिष्यति॥ सभुक्त्वा
राज्यमनिशंअंतेमुक्तिंप्रयास्यति॥९॥ राजप्रदोहंरंकस्याप्यन्वहंपूजितेंबिके॥ मुक्तिदश्चनसंदेहःसत्यंसत्यंनसंशयः
॥१०॥ शरण्योहंवेदवेद्योभुक्तिमुक्तिप्रदायकः॥ नमदन्योमुक्तिदाताभुक्तिदाताचसर्वथा॥११॥ मदन्यार्चनसंसक्ताः
प्रतिजन्मनिदुर्भगः॥ भविष्यंतिभ्रष्टपुण्याः नानाकुत्सितयोनिजाः॥१२॥ विश्वस्यमांप्रयत्नेनसर्वदामामुपासते॥ भू
रिभाग्याश्रितोमर्त्यः तदन्योन्यमुपासते॥ भूरिभाग्याश्रितोमर्त्यः तदन्योन्यमुपासते॥१३॥ यस्यानुग्रहमिच्छामितस्मै
राज्यंददाम्यहं॥ मोक्षमंतेप्रयच्छामिप्रतिज्ञेयंममप्रिये॥१४॥ भुक्तिमुक्तिप्रदंमत्वामामेवगतकल्मषाः॥ भजंतिस
ततंभक्त्याभवबंधविमोचकं॥१५॥ तत्रदक्षिणकैलासेपुराकश्चिद्द्विजोत्तमः॥ मामभ्यर्च्यस्थितःप्रीत्याबिल्वप
त्रादिसाधनैः॥१६॥ तस्यपत्नीबभूवैकासुभगायुवतीप्रिया॥ तयासहायंबहुधानचकारैवसंगमं॥१७॥ अ
यंनिरंतरंसेवांकरोतिममसद्मनि॥ दूरीचकारसततंरजांसिशिवचिंतकः॥१८॥ सुवर्णमुखरीतोयैरयमन्व
हमादरात्॥ अभिषिच्यस्थितःपूर्वंरुद्राध्यायपुरःसरं॥ कोमलैर्बिल्वपत्रैर्मांपूजयामाससादरं॥ पुष्पैरन्यै
श्चसततंपद्मैर्नीलोत्पलैरपि॥२०॥ चकारानुक्षणंविप्रोभस्मनोद्धूलनंमुदा॥ उद्धूलितंविलोक्यांगंहृष्टोभूत्सर्व
दाद्विजः॥२१॥ भालंत्रिपुंड्ररेखाभिरलंकृतमहर्निशं॥ स्मृत्वास्मृत्वातिसंतुष्टोनित्यंनित्यंचकारसः॥२२॥
शिवेतिनामविमलंसदाजप्यैवसंस्थितः॥ रुद्राक्षधारणेतस्यप्रीतिरत्युत्तमास्थिता॥ भस्मरुद्राक्षसं

च्छन्नोयदामामर्च्यपसयं॥तदासंतुष्टहृदयःकरोत्सभ्यर्चनंमुदा॥२४॥अथैवान्दूरतोदृष्ट्वाकरोतिरविदर्शनं
॥अथैवंसंभ्रमात्स्पृष्ट्वाप्रायश्चित्तंकरोहिति॥२५॥ऊर्ध्वपुंड्रांकितान्विप्रानसतुसंत्यज्यदूरतः॥त्रिपुंड्रचिन्हितै
र्विप्रैःश्चकारप्रीतिमन्वहं॥२६॥एतादृशंविलोक्यैनंपत्नीभोगपराङ्मुखं॥रात्रावाकारयामासभोगार्थंभोगलोलु
पा॥२७॥साशय्यायांविलसनातद्धस्तेचंदनंददौ॥ददौमाल्यानिचप्रोत्यासुगंधीनिमनोहरा॥२८॥तदासशैवोति
दृष्ट्वमातुलिंगफलोपमं॥तस्याकुचयुगंरम्यंददर्शपृथुलंशिवे॥२९॥ततस्तस्मिन्कुचयुगेशिवलिंगभ्रमोभवे
त्॥ततःसलिंगसदृशंपस्पर्शकुचमंडलं॥३०॥ततःसलिंगबुध्यैवगंधमाल्यादिभिर्द्विजः॥पूजयामासय
त्नेनविकाररहितस्तदा॥३१॥ततःप्रदक्षिणादीनिचकारप्रीतमानसः॥ततःपूजांसमाप्यायंसत्वरंबहिरा
गतः॥३२॥बहिर्निर्गतमालोक्यतत्पत्नीदुःखितातदा॥उवाचेदंवचोदेवितच्छृणुष्वयथाक्रमं॥३३॥निर्वि
कारःपतिरयंसर्वदाशिवचिंतकः॥मनोनिवृत्तिरेतस्यविषयेभ्यस्तुसर्वथा॥३४॥भाग्यवान्नात्रसंदेहोभाग्यघ्नी
दृग्नकस्यचित्॥वैराग्यमीदृशंलोकेबहुपुण्यतपोफलं॥३५॥स्वाधीनांत्यक्तवसनांयुवतीमतिसुंदरीं॥मा
मयंवीक्ष्यसुभगोविकारंनापसर्वथा॥३६॥शिवलिंगमयंसर्वंजानात्येवमुदारधीः॥अस्मिन्विकारलेशोपिन
मयादृश्यतेध्रुवं॥३७॥विकाररहितेप्रीतिःस्त्रीषुनैवभविष्यति॥विकारतोयतःप्रीतिःस्त्रीषुपुंसांप्रजायते
॥३८॥ब्रह्मापिरूप्यवपुषारोहिद्भूतांस्वकन्यकां॥विकाराक्रांतहृदयःसद्योरंतुमुपक्रमे॥३९॥व्यासादयोपि
दुर्वृत्तैःकृतस्त्रीसंग्रहोमुदा॥दुर्लभःपुरुषाणांतुनित्यमिंद्रियनिग्रहः॥४०॥विषयेभ्यस्तुसर्वेभ्यःस्त्रीरूपविष
योमहान्॥पुमांसंमोहयत्येवविरक्तमपिसत्वरं॥४१॥विषयेभ्यःपरावृत्तोनिराहारेकदाचन॥साहारोविषये
भ्यस्तुपरावृत्तोनदृश्यते॥४२॥भोग्यमेतस्यविप्रस्यतपश्चर्यापिभूयसी॥निवृत्तोयंनसंदेहःप्रवृत्तिर्नास्यदृ
श्यते॥४३॥एवंनिवृत्तचितस्तुपुरुषोदुर्लभोभुवि॥विषयेभ्योनिवृत्तिश्चेतजितंतेननसंशयः॥४४॥अतः
परंकृशाकार्याममेयंतनुरीदृशी॥शिवलिंगैकनिरताशिवपूजांकरोम्यहं॥४५॥मयापिसर्वदाशंभुःपूजनीयः

प्रयत्नतः॥ शीवपूजोपकरणंशरीरंजायतांमम॥ ४६॥ किंवापुष्टेनदेहेनयौवनेनापिकिंमम॥ यावदस्तिबलंताव
न्महेशंपूजयाम्यहं॥ ४७॥ नित्यंमृन्मयलिंगानांशतमभ्यर्च्चयाम्यहं॥ प्रदक्षिणनमस्कारान्करिष्येहंयथेच्छया॥ ४८॥ इदा
नींपार्वतीनाथोयदिनाभ्यर्च्यतेमया॥ वार्द्धकेशिवपूजायांशक्तिर्ममकथंभवेत्॥ ४९॥ किंचतावदयंदेहःस्थास्यतीति
ननिश्चयः॥ एवंसत्यधुनासम्यक्शंकरंपूजयाम्यहं॥ ५०॥ शिवपूजापरंचित्तंयद्येतन्नभविष्यति॥ तदेहं चंचलंचित्तमन्य
त्रैवप्रयास्यति॥ ५१॥ प्रकारोत्रतुनान्योस्तिविनाशंकरपूजया॥ चेतःस्थिरीकरिष्यामिशंकरस्यैवपूजया॥ ५२॥ शिवपू
जांविनामुक्तिर्नभविष्यतिसर्वथा॥ अतःकरिष्येनियतंश्रीमहादेवपूजनं॥ ५३॥ महादेवोखिलाराध्यःकदाचिद्भक्तवत्सलः
॥ करिष्यतिकृपासिंधुःकृपांमयिनसंशयः॥ ५४॥ प्रसन्नेदेवदेवेशेशंकरेलोकशंकरे॥ संसारपाशनाशस्तुभविष्यत्येवना
न्यथा॥ ५५॥ प्रसन्नेपार्वतीनाथेकीटोवापुल्कसोथवा॥ मुच्यतेनात्रसंदेहोघोरसंसारपाशतः॥ ५६॥ सर्वथाविषयासक्तं
यदिचित्तंभविष्यति॥ तदाकथंवासंसारसागरोत्तरणंभवेत्॥ ५७॥ ममभाग्यवशादेवभर्त्ताविषयनिस्पृहः॥ अन्यथाघोर
संसारान्निवृत्तिस्यात्कथंमम॥ ५८॥ गर्भधारणमुख्यानिस्त्रीणांदुःखानिकोटिशः॥ तानिदुःखानिसर्वाणिसह्यान्येवनस
र्वथा॥ ५९॥ प्रसूतिवेदनायासावहुधादुःसहाततः॥ जीवनस्यापिसंदेहोभवत्येवहिवस्तुतः॥ ६०॥ तद्दुःखसहनेप्राप्यंफलं
नैवहिदृश्यते॥ तद्दुःखसहनेभूयोदुःखायहिभविष्यति॥ ६१॥ महेशस्यप्रसादोस्तिमयिसर्वात्मनायतः॥ विरक्तोयमभू
द्भर्त्तातपस्यापरमानसः॥ ६२॥ अतःपरंतुदुःखानिमयाप्राप्यानिनध्रुवं॥ दुःखनाशार्थमेवाहंकरिष्येयत्नमादरात्॥ ६३॥
दुःखनाशोपिनान्यस्माद्विनाशंकरपूजनं॥ अतएवमहादेवंपूजयामियथाविधि॥ ६४॥ नानाविधानिदुःखानिपापजन्या
निवस्तुतः॥ तानिपापानिनश्यंतिमहेशस्यैवपूजया॥ इत्यक्त्वाविषयेभ्यस्सानिवृत्तानियतेंद्रिया॥ गृहंदत्वाशांभवायपराव
त्तातगृहात्॥ ६६॥ ततःपरंप्रयत्नेनसुवर्णमुखरीजले॥ स्नात्वाचकारयत्नेनभस्मनोद्धूलनंमुदा॥ ६७॥ कृत्वात्रिपुंड्रमन
घाललाटादौततःपरं॥ सुवर्णभरणंत्यक्त्वाचक्रेरुद्राक्षधारणं॥ ६८॥ चकाराभरणंभुत्याऽरुद्राक्षैरेवसादरं॥ कंठकर्णादिदे
शेषुभक्तिश्रद्धापुरःसरं॥ ततस्तीर्थजलंरम्यंबिल्वपत्राणिचादरात्॥ गृहीत्वासावधानेनममपूजांचकारसा॥ ७०॥ ततःप्र
दक्षिणादीनिकृत्वामौनेनभक्तितः॥ निमीलिताक्षीमद्देहेसंविष्टमपितत्परा॥ ७१॥ ततोददर्शशैवेंद्रंकृपालुंशिवतत्परं

॥तंप्रणम्यबभाषेसाकृतांजलिपुटाशिवे॥७२॥ ॥सुभगाउवाच॥ ॥शैवोत्तमकृपालुस्त्वंशिवपूजापरायणः॥शिवपू
जाकथंकार्यावदतन्मह्यमादरात्॥७३॥ इतितद्वचनंश्रुत्वासशैवोमत्परायणः॥शिवपूजाकथंकार्यावदतन्मह्यमाद
रात्॥७३॥ इतितद्वचनंश्रुत्वासशैवोमत्परायणः॥ तामुवाचप्रहृष्टात्माभूतिधारणभूषणः॥७४॥ ॥शैवउवाच॥ ॥
धन्यासिकृतकृत्यासियतस्त्वंशिवतत्परा॥शिवपूजाविधिंवक्ष्येश्रुणुमोक्षदमादरात्॥७५॥शैवादिकंनिवृत्यादौस्नात्वो
द्धूल्यैवभस्मना॥त्रिपुंड्रंधारणंकार्यंततोरुद्राक्षधारणं॥७६॥ ततःपरंबाणलिंगंमृन्मयंलिंगमेववा॥ पूजनीयंप्रयत्ले
नबिल्वपत्रादिभिर्मुदा॥७७॥ पंचाक्षरेणकर्त्तव्यंस्त्रीभिःशंकरपूजनं॥षडक्षरेणकर्त्तव्यंपुरुषैस्तुप्रयत्नतः॥७८॥स्प
र्शःपार्थिवलिंगस्यबाणलिंगस्यचादरात्॥स्त्रीभिःकार्यस्थावरस्यलिंगस्यतुनसर्वथा॥७९॥ विहितश्चरलिंगेषुसत्यमे
तत्मयोच्यते॥८०॥स्थावरेष्वपिलिंगेषुयत्रदिव्यंभविष्यति॥ तत्रपर्वणिकर्त्तव्यंस्पर्शनंत्रीभिरादरात्॥८१॥स्त्रीभिः
स्पर्शोपिकर्त्तव्यःपंचाक्षरपुरःसरं॥पूजाप्यन्यायथायोग्यंपंचाक्षरपुरःसरं॥८२॥ पंचाक्षरःपरोमंत्रःसर्वमंत्रशिरोम
णिः॥ स्त्रीभिरप्यन्वहंजप्यःसहस्रंविधिपूर्वकं॥८३॥ पंचाक्षरप्रभावस्तुनज्ञातोमादृशैर्जनैः॥ किंतुवेदमहादेवस्तत्प्र
भावंयथार्थतः॥८४॥ जप्तेपंचाक्षरेशुद्धेनश्यत्यघकुलंक्षणात्॥ पंचाक्षरोमहामंत्रःसशिवात्मकएवहि॥८५॥ इत्युक्ता
सुभगासाध्वीतंप्रणम्यपुनर्द्विजं॥मह्यंपंचाक्षरंदेहीत्याबभाषेकृतांजलिः॥८६॥ सशैवेंद्रःकृपासिंधुस्ततस्तस्यैयथा
विधि॥ददौपंचाक्षरंशुद्धंसर्वपापौघनाशकं॥८७॥ ततस्तदाज्ञयासाध्वीतंप्रणम्ययथाविधि॥ नित्यंपार्थिवलिंगा
निपूजयामाससादरं॥८८॥ एतादृशींसुशीलांतांदृष्ट्वासर्वेमुनीश्वराः॥ धन्येयंपूजनीयेतिसंवदंतःस्थिताःसदा
॥८९॥ एवंस्थितासुशीलासातन्मनोद्रष्टुमेकदा॥ मयापुरुषरूपेणगतंलीलाविहारिणा॥९०॥ साचाप्रतिमसौंदर्यं
मयिदृष्ट्वाततःपरं॥ निमीलिताक्षियुगलाशिवध्यानचकारसः॥९१॥ तदैवोक्तमिदंवाक्यंमयासादरमंबिके॥
तेनापितन्मनोवृत्तिरन्ययानबभूवहि॥९२॥ तदेदंयौवनंबालेपरिपूर्णमितिस्फुटं॥ ईदृशंयौवनंक्वापिनदृष्टं
सर्वथामया॥९३॥ तवैवमुखचंद्रोयंपरिपूर्णकलःसदा॥ सतुक्षीणकलश्चंद्रःसनुपूर्णःकदाचन॥९४॥

श्रीशिव र० ७ १५२

तवेदमक्षियुगलं धिक्कृतामलपंकजं ॥ भालभटनिभं वस्तु न कुत्राप्यास्ति वस्तुतः ॥ ९५ ॥ तव सीमंतरेखेयं केन वा सदृशी भवेत् ॥ भ्रमद्भ्रमर पुंजोपि धिक्कृतः केशपाशतः ॥ ९६ ॥ नासेयं तिलपुष्पाणि धिक्करोत्येव सर्वथा ॥ कुचयुग्ममिदं यत्तत्तदृष्टं न कदाचन ॥ ९७ ॥ त्रिवल्युपरि नीलेयं रोमावल्यपि जायते ॥ अयं जघनदेशोपि बाले सर्व सुखप्रदः ॥ ९८ ॥ त्वद्रूपसदृशं रूपं नानुभूतं मया ध्रुवं ॥ रंभोर्वश्यादिरूपं च नेदृशं हि भविष्यति ॥ ९९ ॥ एवं सति त्वया बाले किमिदं क्रियते वद ॥ वरमां सुंदरं शीघ्रं विलंबं मा कुरु प्रिये ॥ १०० ॥ धनधान्यादि संपत्तिर्भूयसी मम विद्यते ॥ साधनानि बहून्येव भोगार्थं संति मद्गृहे ॥ १ ॥ ईदृशं यौवनं प्राप्य भोगेच्छा क्रियते यदि ॥ तदिदं यौवनं धन्यं अन्यथा त्वन्यथा ध्रुवं ॥ २ ॥ इत्युक्तं मद्वचः श्रुत्वा तयैवं समुदीरितं ॥ तदा नेत्रे निमील्यैव पश्यंत्या पूजितं शिवं ॥ ३ ॥ ॥ सुभगा उवाच ॥ ॥ मैवं वद त्वं विप्रेंद्र संसारे मा रतिं कुरु ॥ संसारोन्मूलनायेह कुरु शंकरपूजनं ॥ ४ ॥ असारतरसंसारप्रचारचतुरो नरः ॥ स्मर स्मरहरं नित्यं स्मरं मा स्मर मा स्मर ॥ ५ ॥ अधीतवेदशास्त्राणां कथमेतादृशी मतिः ॥ अज्ञानेन कथं ज्ञानमावृतं स्फुरदुज्वलं ॥ ६ ॥ दुर्लभं प्राप्य जन्मेदं ब्राह्मण्यमतिसत्तमं ॥ कथं नाराध्यते नित्यं देवदेवो महेश्वरः ॥ ७ ॥ नित्यमास्मिन्नपि क्षेत्रे स्थित्वा स्मरहरो हरः ॥ नाराध्यते कथं भक्त्या विहाय विषये रतिं ॥ ८ ॥ भज नित्यं प्रयत्नेन सांबं संसारमोचकं ॥ अनर्थहेतुसंसारे न कुरुष्व रतिं द्विज ॥ ९ ॥ स्मर निःसारसंसारतरुमूलमनातुरः ॥ स्मरहारी पुरारी यस्तमाराधय सादरं ॥ १० ॥ संसारघोरकूपेषु पतनेच्छा कथं तव ॥ ११ ॥ अयुक्तं क्रियते ब्रह्मन् युक्तं न किमपि ध्रुवं ॥ कथं संसारवृध्यर्थं यत्नो धन्क्रियते त्वया ॥ १२ ॥ अत्यंत दुर्लभं क्षेत्रमिदं ब्रह्मादिसेवितं ॥ अत्र स्थित्वापि सततं कथं नाराध्यते शिवः ॥ १३ ॥ नित्यं श्रीकालहस्तीशं सुवर्णमुखरीजलैः ॥ अभिषिच्य प्रयत्नेन बिल्वपत्रैः समर्चय ॥ १४ ॥ प्रदक्षिणनमस्कारैः प्रीणयस्व सदाशिवं ॥ जप पंचाक्षरं शैवं संसारोन्मूलकारणं ॥ १५ ॥ शरीरं सबलं तिष्ठत्यधुना यौवने तव ॥ सहस्रं कुरु साष्टांगान् प्रणामाच्छंभवे मुदा ॥ १६ ॥ बलं यावच्छरीरेस्ति तावच्छंकरमर्चय ॥ निर्बलेन शरीरेण शंकरार्चा ॥ १७ ॥ शंकरश्चेत्कृपासिंधुरधुना पूज्यते सदा ॥ निःसारतर संसारतरुनाशो भविष्यति ॥ १८ ॥ पुरुषार्थो यमेवैकः पुरुषाणां द्विजन्मनां ॥ यः स्वभावो महादेवपदपंकजसात्कृतेः ॥

उ० ग्रा० स०

श्रीशिव १५२

२ मयिमाकुरु॥२१॥ मयिचेत्क्रियतेप्रीतिः

॥१९॥ पूजितःसंस्मृतोवापियोददातिपरंपदं॥ तमेवदेवदेवेशंमहेशंशरणंव्रज॥२०॥ यथेदानींमयिप्रीतिस्तथाप्रीतिं
सदाशिवे॥कुरुयत्नेनविप्रेंद्रतांप्रीतिंसुखमल्पंभविष्यति॥सुखंतज्जातमत्यल्पमंतेनरकसाधनं॥२२॥प्रीतिश्चे
त्क्रियतेनित्यंशंकरेभक्तशंकरे॥ तदाप्राप्यंत्वयाविप्रसुखमक्षय्यमन्वहं॥जनानिक्षेपलाभार्थंयत्नंकुर्वंतिसादरं॥
तेतुस्फुटितकाचार्थंयत्नंकुर्वंतिकिंवद॥२४॥ शंकरःसुखनिक्षेपान्स्वभक्तेभ्योददातिसः॥ अतस्त्वंसुखनिक्षेपान्
लभशंकरपूजया॥२५॥ यंप्राप्यननिवर्त्तंतेयोगिनोयत्तवृत्तयः॥ तमेवभजदेवेशंदेवदेवमुमापतिं॥२६॥ सांबमद्वय
मानंदंलिंगरूपंभजप्रभुं॥ तस्यैवभजनेनत्वंतंप्रभुंप्राप्स्यसिध्रुवं॥२७॥ प्रत्यगात्मासर्वसाक्षीलिंगरूपेणतिष्ठति॥
तमर्चयप्रयत्नेनभुक्तिमुक्तिप्रदायकं॥२८॥ उमासहायमानंदंयःप्रीत्यानार्चयिष्यति॥नतस्यानंदलेशोपिसत्यं
सत्यंनसंशयः॥२९॥सर्वांतिरगतंशर्वंसाक्षिणंसर्वकर्मणां॥ नाराधयसिविप्रेंद्रकथंवासावधानतः॥३०॥नप
श्यंतिमहादेवंसर्वसाक्षिणमीश्वरं॥ अतएवनकुर्वंतिमूर्खाःशंकरपूजनं॥३१॥ अनायासेनसंप्राप्यामुक्तिर्य
त्पूजयाद्विज॥ तमर्चयप्रयत्नेनबिल्वपत्रैर्वनस्थितैः॥३२॥सुवर्णमुखरीतोयैर्बिल्वपत्रैश्चशंकरं॥ पूजय
स्वलभस्वेशाद्भुक्तिमुक्तिंद्विजोत्तम॥३३॥ यमर्चयंतिदेवाश्चतमर्चयमहेश्वरं॥यंभजंतिमुनींद्राश्चतंभज
स्वमहेश्वरं॥३४॥ नीलोत्पलानिसंत्यत्रतैरर्चयसदाशिवं॥ तैरर्चितोमहादेवोभुक्तिंमुक्तिंप्रयच्छति॥३५॥
पूजयित्वामहादेवंजपपंचाक्षरंमुदा॥ तेनैवमोहविच्छित्तिर्भविष्यतितवध्रुवं॥३६॥ शतश्रुतिस्मृतंपुण्यंजपरुद्रं
द्विजोत्तम॥रुद्राध्यायजपेनेशःप्रीणातिभगवान्छिवः॥३७॥ मुक्तिप्रदंत्रयंप्राहुर्मुनयःशिवतत्पराः॥लिंगार्चनं
रुद्रजपःपंचाक्षरजपस्तथा॥३८॥ तापत्रयोपशमनंमेतत्त्रयमतोद्विज॥कुरुयत्नेनसततंसंसारेमारतिंकुरु
॥३९॥ मामेकांतस्थितामेकांविप्रमामाविलोकय॥ याहियाहियथाकामंयत्रकुत्रापिसत्वरं॥ ४०॥ एकांतवा
सिनींदृष्ट्वास्त्रियंसर्वेपिसज्जना॥ दूरतोयांतिविप्रेंद्रत्वयाकिंक्रियतेवद॥४०॥ विषयेभ्योनिवृत्तांमांवलाद्य

द्विवरिष्यति॥ तुभ्यंशापोमयादेयः सत्यमत्रान्यथातुन॥ ४१॥ एवंवदंतीसादेविदृष्ट्वासंपूजितंशिवं॥ निवारयैनमीशो
तिपूजांचक्रेपुनःपुनः॥ ४२॥ ततः परमहंदेवितस्मिंलिंगेमदात्मके॥ आविरासंत्वयासाकंविष्णुब्रह्मादिवंदितः॥ ४३॥
ततःस्तुष्टावबहुधासैवमांसांबमुत्तमं॥ वरंययाचेसाशंभोत्वयिभक्तिर्दृढास्त्विति॥ ४४॥ पुनःसंपूज्यमांसम्यग्ययाचेसावरांतरं॥ त्वय्येवाहर्निशंचेतःस्थिरमास्त्विति सादरं॥ ४५॥ इत्युक्तानम्रवदनापश्यंतीमत्पदांबुजे॥ पुनरभ्यर्चयामास
बिल्वपत्रादिभिर्मुदा॥ ४६॥ ततस्तस्यैवरोदत्वामयात्वंतर्हितेशिवे॥ एवंसासुभगासाध्वीस्थितादृढमनोरथा॥ ४७॥
ततस्तत्रैवसुभगासामामभ्यर्च्यसादरं॥ तत्रैवविजहौप्राणान्महादेवेतिवादिनी॥ ४८॥ ततःसासर्वदुःखानिविहा
यैवहितत्क्षणे॥ प्रापमुक्तिंमत्प्रसादात्सामत्पूजाविधेःफलं॥ ४९॥ नरोभवतुनारीवामामभ्यर्च्यसदाशिवं॥ धर्ममर्थं
चकामंचप्राप्यमुक्तिंचविंदति॥ ५०॥ श्रीमद्दक्षिणकैलासेविलासःक्रियतेमया॥ भक्तास्तत्रानुगृह्यंतेशिवैकश
रणाःशिवे॥ ५१॥ श्रीकालहस्तीशपिनाकपाणेकंदर्पदर्पापहकालकाल॥ नारायणाराधितपादपद्मेत्यहर्निशंतत्र

वदंतिशैवाः॥ ५२॥ ॥ इतिश्रीशिवरहस्येउग्राख्येसप्तमांशेशिवगौरीसंवादेदक्षिणकैलासमहिमावर्णनंनामविं
शोध्यायः॥ २०॥ ॥ श्रीउग्रायनमः॥ ॥ श्रीशिवउवाच॥ ॥ देविकांचीपुरीकाचिद्यत्रवेगवतीनदी॥ तत्रवास
मपेक्षंतेनित्यंब्रह्मादयःसुराः॥ १॥ एकाम्बराभिधंलिंगंतत्रास्त्येकंमदात्मकं॥ तद्दर्शनेनपापानिविनश्यंत्येवतत्क्षणे॥
२॥ कोटितीर्थाभिधंतीर्थंतत्रास्त्येकमघापहं॥ तत्रैकमज्जनादेवब्रह्महत्याविमुच्यते॥ ३॥ तत्रश्राद्धंविधानेनकर्त्तव्यं
पितृमुक्तये॥ तर्पणीयाश्चपितरःकोटितीर्थेदकैःशुभैः॥ ४॥ कोटितीर्थेनरःस्नात्वासंपूज्यैकाम्बरेश्वरं॥ मुच्यतेसर्व
पादेविब्रह्महत्यायुतैरपि॥ ५॥ तत्रैवमामुपाश्रित्यऋषयोब्रह्मवादिनः॥ वसंतिबहवस्तेषांसंख्याकर्त्तुंनशक्यते
॥ ६॥ भस्मोद्धूलितसर्वांगास्तेसर्वेनियतेंद्रियाः॥ रुद्राक्षमालाभरणास्त्रिपुंड्रांकितमस्तकाः॥ ७॥ मच्चित्ता
मद्गताःमदाराधनतत्पराः॥ स्वप्नेप्यन्येनपश्यंतिमांविहायवरानने॥ ८॥ तत्क्षेत्रंभूरिभाग्येनप्राप्नुवंतिनराःशिवे॥
तत्प्राप्त्यर्थंतपश्चर्यांकुर्वंतिऋषयःसदा॥ ९॥ अनेकयुगपर्यंततत्रघोरतरंतपः॥ चकारविष्णुरद्यापिमामा

राध्यैवतिष्ठति ॥१०॥ तत्रमांप्रत्यहंविष्णुर्लक्षबिल्वदलैर्नवैः ॥ करोतिपूजनंभक्त्यात्रिकालंसावधानतः
॥११॥ प्रदोषसमयेविष्णुर्मामभ्यर्च्यविधानतः ॥ सेवांकरोतिसानंदंमृदंगमभिवादयन् ॥ विविधैःकुसुमैःशुभ्रैर्बिल्वपत्रै
श्चतुर्मुखः ॥ मामभ्यर्च्यततःसायंतालान्वादयतेशिवे ॥१३॥ वाग्देवीवल्लकींधृत्वासायमभ्यर्च्यमांशिवं ॥ करोतिगान
ममलंगानशास्त्रविशारदा ॥१४॥ इंद्रःसंपूज्यमांसायंबिल्वपत्रादिभिर्मुदा ॥ करोतिवैणवंवाद्यंतत्तद्रंध्रनिषेव
णात् ॥१५॥ शचीनृत्यंकरोत्यग्रेसायमन्वहमादरात् ॥ रंभाद्यैःसहसंतुष्टासायंसंपूज्यमांशिवं ॥१६॥ लक्ष्मीःसा
यंसमभ्यर्च्यस्वर्णवज्रामरद्वयं ॥ गृहीत्वातवपार्श्वस्थाभवतीमुपसेवते ॥१७॥ देवपत्न्यास्तथान्याश्चसायंसंपू
ज्यमांशिवं ॥ सेवांकुर्वंतियत्नेनतवैववरवर्णिनि ॥ विष्णुप्रभृतयोदेवाःसर्वेऽपिममसेवकाः ॥१७॥ कुर्वन्तिसेवा
मनिशंसायंकालेविशेषतः ॥ विष्णुप्रभृतिदेवानांपत्न्योयास्तास्तुशैलजे ॥१८॥ तवदास्यस्ततस्तास्तेसेवां
कुर्वंतिसादरं ॥ कामाक्षीरूपमासाद्यत्वयातत्रमनोरमे ॥१९॥ स्थीयतेसततंत्वंतुदेवदेवांगनार्चिता ॥
कुबेरेणपुरातत्ररत्नस्तंभविराजितं ॥२०॥ शिवस्थानंकृतंरम्यंरत्नगोपुरराजितं ॥ पंचक्रोशमितंचक्रेहे
मप्राकारमुत्तमं ॥२१॥ चक्रेप्राकारशृंगाणिश्रेष्ठरत्नमयानिसः ॥ स्थीयतेतत्रसततंमयारत्नशिवालये
॥२२॥ तच्छिवालयरत्नानांप्रभयाव्यावृतादिशः ॥ पुराकदाचिद्धिमवानुपबर्हणमुत्तमं ॥२३॥ तुभ्यंकर्तुं
शि समारेभेमहदैश्वर्यगर्वितः ॥ ऐश्वर्यंतुपुरातस्मैदत्तमास्तिमयाँ[illegible]वे ॥२४॥ तदविज्ञायरे[illegible]नितुभ्यंदातुंस ला
मारभे ॥ कोटिशोरत्नभाराणिगृहीत्वासततःपरं ॥२५॥ आजगामततःकांचीदूरादेवददर्शसः ॥ हेमप्रा
कारसंयुक्तारत्नगोपुरराजिता ॥२६॥ दृष्ट्वाकांचीपुरींरम्यांविस्मयंसमुपागमत् ॥ समासाद्यततःकांचीस्ना
त्वातीर्थेषुसादरं ॥२७॥ रत्नैरभ्यर्चयामासहेमवानुत्तमैस्ततः ॥ षष्टिकोटिसहस्रैस्तुरत्नैर्मामन्वहंशिवे ॥
॥२८॥ पूजयन्नेवसततमुवासाकल्पमादरात् ॥ विष्णुनापितपस्तप्तंकोटिलययुगावधि ॥२९॥ कांच्या
मेकांघ्रिणास्थित्वामामुद्दिश्यप्रयत्नतः ॥ मदर्चनरतास्तत्रबहवःसंतिशांकराः ॥३०॥ मोक्षार्थिनस्त

हातन्नमामेकमजरामरं ॥ तपस्यंतंमहाविष्णुमेकपादंजितेंद्रियं ॥ ३१ ॥ चतुर्मुखसमभ्यर्च्यपप्रच्छचकृतां
जलिः ॥ ॥ ब्रह्मोवाच ॥ ॥ विष्णोसंपूज्यतेनित्यंत्वयाकिं ध्यायतेमुदा ॥ अन्नैर्वातिप्रयत्नेनस्थीयते
किंवदस्वमे ॥ ३२ ॥ ॥ विष्णुरुवाच ॥ ॥ अस्यांकांच्यांमहादेवःकामाक्षीवल्लभःप्रभुः ॥ लीलांकरोतिसतत
मर्चितःसकलैःसुरैः ॥ ३३ ॥ उमासहायःसर्वेशोमहादेवोजगत्प्रभुः ॥ पूज्यतेध्यायतेनित्यंमयेशप्रवणेनहि ॥ ३४ ॥
सर्वैश्वर्यशंकरःसांबःपूजनीयःप्रयत्नतः ॥ ततोमयापिसततंपूज्यतेपार्वतीपतिः ॥ ३५ ॥ देवतासार्वभौमोयंसर्व
देवशिखामणिः ॥ सर्ववेदांतवेद्योयंशिवएवेतिहिश्रुतिः ॥ ३६ ॥ शिवःशिवार्थिभिर्नित्यंपूजनीयःप्रयत्नतः ॥ ततःशिवा
र्थिनानित्यंमयासंपूज्यतेशिव ॥ ३७ ॥ देवानांमानवानांचसांबःसंसारमोचकः ॥ संपूजितःकरोत्येवसंसार
तरुनाशनं ॥ ३८ ॥ यावत्तुष्टिर्बलंदृष्टिर्यावदायुरनामयं ॥ तावद्यत्नेनसंपूज्योनित्यंसांबःसदाशिवः ॥ ३९ ॥ तस्यह
स्तद्वयंधन्यंयेनसांबःसदाशिवः ॥ पूज्यतेबिल्वपत्राद्यैःप्रत्यहंप्रीतिपूर्वकं ॥ तस्यैवरसनाधन्यायया सांबः० ॥ ४० ॥
तस्यैवाक्षियुगंधन्यंयेनसांबःसदाशिवः ॥ संपूजितःप्रयत्नेनदृश्यतेप्रत्यहंमुदा ॥ तस्यैवहिशिरोधन्यंयेन० ॥
प्रणम्यातिप्रयत्नेनप्रत्यहंपूजितोमुदा ॥ स्तूयतेसावधानेनसानंदंमधुरोक्तिभिः ॥ तस्यैवहिमनोधन्यंयेनसांबः
सदाशिवः ॥ ४४ ॥ ध्यायतेसर्वकालेषुकालमृत्युविनाशकः ॥ उद्धूलितांगोयोनित्यंमहेशमुपसेवते ॥ ४५ ॥
तस्यभाग्यस्यनांतोस्तिसत्यमेवोच्यतेमया ॥ यस्तुसांबंमहादेवंवाम्यर्चयतिसादरं ॥ ४६ ॥ सघोरतरसंसार
सागरान्नोत्तरिष्यति ॥ शंभुर्नाराधितोयेनभगवान्भक्तवत्सलः ॥ तेनसंप्राप्यतेभूयोगर्भवासोनसंशयः ॥
गर्भवासभयंयस्यभविष्यतिचतुर्मुखः ॥ ४८ ॥ तस्यतद्भयनाशस्तुनविनाशंभुपूजया ॥ शंभुर्नाराधितोयेनभग
वान्भक्तवत्सलः ॥ ४९ ॥ तेनसंप्राप्यतेभूयोगर्भवासोनसंशयः ॥ गर्भवासभयंयस्यभविष्यतिचतुर्मुख ॥
॥ ५० ॥ शंभोशंभोमहेशेतियेवदंत्यनिशंमुदा ॥ नतेषांगर्भभीभूयस्तदन्येषांतुगर्भभीः शिवेतिपरमेशेतियेवदं

त्यनिशंमुदा॥ नतेषांग०॥ ५२॥ मृत्युंजयामरेशेतितियेवदंत्यनिशंमुदा॥ नतेषां०॥ ५३॥ महादेवमहेशेतितियेवदंत्यनिशं
मुदा॥ नतेषां०॥ ५४॥ त्र्यंबकेतिशर्वेतियेवदंत्यनिशंमुदा॥ नतेषां०॥ शंकरोमासहायेतितियेवदंत्यनिशंमुदा॥ नतेषां०॥ ५६॥
कालाग्निरुद्रवीरेतितियेवदंत्यनिशंमुदा॥ नतेषां०॥ ५७॥ त्रिपुरारेमखारेतितियेवदंत्यनिशंमुदा॥ नतेषां०॥ ५८॥ त्रिलोच
नेतिभर्गेतियेवदंत्यनिशंमुदा॥ नतेषां०॥ ५९॥ पिनाकपाणेसोमेतितियेवदंत्यनिशंमुदा॥ नतेषां०॥ ६०॥ चंद्रचूडेतिभी
मेतियेवदंत्यनिशंमया॥ नतेषां०॥ ६१॥ यस्यस्मरणमात्रेणसद्यःसंसारनाशनं॥ तस्यदेवाधिदेवस्यशिवस्यस्मरणंपरं॥
॥ ६२॥ यस्यदेवाधिदेवस्यपूजनंसर्वकामदं॥ तस्यदेवाधिदेवस्यशिवस्यैवार्चनंपरं॥ नयनामसमंनामश्रुतौश्रुत्यतएववा
॥ ६३॥ तस्यदेवाधिदेवस्यनामस्मर्तव्यमैश्वरं॥ शिवपूजांविहाय्यान्यंनास्तिमोक्षस्यकारणं॥ ६४॥ सत्यंसत्यमिदंस
त्यमुत्धृत्यभुजमुच्यते॥ धर्मार्थकाममोक्षाणांसाधनंशिवपूजनं॥ ६५॥ धर्मादिसिद्धिर्नास्त्येवविनाशंकर
पूजया॥ यःशंकरोतिसर्वेषांपूजनःस्मरणादिभिः॥ ६६॥ सशंकरःपूजनीयोनियमेनान्वहंमुदा॥ धर्मार्थकाममो
क्षास्तुसमेतेःशंकरार्चनात्॥ ६७॥ लभ्यंतेसर्वथाब्रह्मन्नन्यथानकदाचन॥ शिवोन्यःशंकरोनास्तिदेवेष्वन्येषुवावि
धे॥ ६८॥ सएवशंकरस्तस्मात्तस्यैवाभ्यर्चनंवरं॥ शंकरंयोर्चयेन्नित्यंशंकरंसर्वसाधनैः॥ ६९॥ शंकरःतस्यनियमाच्छं
करस्तुभविष्यति॥ शंकरेतिमुदायस्तुवदिष्यन्ननुवासरं॥ ७०॥ सतुधन्यतरोज्ञेयःसत्यंसत्यंमयोच्यते॥ संसारसाग
रंतत्तुतरैर्नामैवशांकरं॥ ७१॥ तदन्यत्तुनसंसारघोरसागरतारकं॥ शंकरंनामविमलंमिष्टान्मिष्टतरंविधे॥ ७२॥
तन्नाममुक्तिदंभव्यंसंसारभयनाशकं॥ शंकरस्मरणंनित्यंतथाशंकरपूजनं॥ ७३॥ तत्त्यागेनरकावासोभवत्ये
वनसंशयः॥ कृतादयोयुगायेतुतेषुसर्वेषुसर्वदा॥ ७४॥ पूजनीयोमहादेवोब्राह्मणाद्यैःसुरैरपि॥ हरःस्मरहरोब्र
ह्मन्घोरसंसारतारकं॥ ७५॥ हृतस्मरोमहेशेनससंसारप्रवर्तकः॥ परंत्वव्यभिचारेणभक्तिःकार्यामहेश्वरे॥ साना
शयतिसंसारंभक्तिरव्यभिचारिणी॥ यथापतिव्रताशुद्धानान्यंकामयतेतथा॥ ७७॥ शांकरःशंकरादन्यंनार्च
यत्येवसर्वथा॥ शांकरःशंकरादन्यंयद्यर्चयतिमोहतः॥ ७८॥ सशांकरःकथंभूयात्नशिवैकपरोयतः॥ मोक्षो

पिशांकरस्यैवमोक्षोनान्यस्यसर्वथा॥ ७९॥ सत्यमेतत्पुनःसत्यंशपथःक्रियतेमया॥ एतावत्कालपर्यंतंशांकरान्य
स्यसर्वथा॥ ८०॥ नजातामुक्तिरग्रेपिनभविष्यतिवस्तुतः॥ अशांकरास्तुसर्वेपिनरकेषुवसंतिहि॥ ८१॥ तेषांतुनिर्गमो
नास्तिकल्पकोटिशतैरपि॥ यमेनतुकृतःपूर्वंशपथःक्रूरचक्षुषा॥ ८२॥ मत्संन्निधौसशपथःकीदृशस्तंवदाम्यहं॥
यमउवाच॥ ॥ अशांकरान्यातयामिनरकेष्वनिशंध्रुवं॥ अत्रसाक्षीमहादेवःसर्वद्रष्टासदाशिवः॥ ८३॥ अशांकरानयः
पिंडैःसंततंस्ताडयाम्यहं॥ अत्रसाक्षीमहादेवः सर्वद्रष्टासदाशिवः॥ ८४॥ अशैवांस्तप्तशस्त्राग्रैरत्युच्चैस्ताडयाम्यहं॥
॥अत्रसाक्षीमहादेवःसर्वद्रष्टासदाशिवः॥ ८४॥ अशैवांस्तप्तशस्त्राग्रैरत्युच्चैस्ताडयाम्यहं॥ अत्रसा॰॥ ८५॥ अशैवान्वा
लुकायंत्रेसंततंभर्जयाम्यहं॥ अत्रसा॰॥ ८६॥ अशैवान्पूयकुंडेषुसर्वदापातयाम्यहं॥ अत्रसा॰॥ अशैवान्मलकुंडेषुस
र्वदापातयाम्यहं॥ अत्रसा॰॥ ८७॥ अशैवानायसस्तंभैबध्वासंताडयाम्यहं॥ अत्रसा॰॥ ८८॥ अशैवान्मलकुंडेषुसर्वदा
पातयाम्यहं॥ अत्रसा॰॥ ८९॥ अशैवानग्निकुंडेषुसर्वदापातयाम्यहं॥ अत्रसाक्षी॰॥ ९०॥ अशैवान्स्तप्तशस्त्राग्रेसर्वदा
पातयाम्यहं॥ अत्रसा॰॥ ९१॥ अशांकरान्नसंत्यक्ष्येब्रह्मघ्नमप्यहं॥ अत्र॰॥ ९२॥ अशांकरंनसंत्यक्षेत्यक्ष्येमित्रघ्नमप्य
हं॥ अत्रसा॰॥ ९३॥ अशांकरंनसंत्यक्षेत्यक्षेतातघ्नमप्यहं॥ अत्रसा॰॥ ९४॥ अशांकरंनसंत्यक्षेत्यक्षेतातघ्नमप्यहं॥
अत्रसा॰॥ ९५॥ अशांकरंनत्यक्षेत्यक्षेबालघ्नमप्यहं॥ अत्रसा॰॥ ९६॥ अशांकरंनसंत्यक्षेत्यक्षेमद्यपमप्यहं॥ अत्रसा॰॥
॥ ९७॥ अशांकरंनसंत्यक्षेत्यक्षेवीरघ्नमप्यहं॥ अत्र॰॥ ९८॥ अशांकरंनसंत्यक्षेत्यक्षेवीरघ्नमप्यहं॥ अत्र॰॥ ९९॥ अशां
करंनसंत्यक्षेत्यक्षेराजघ्नमप्यहं॥ अत्र॰॥ १००॥ अशांकरंनसंत्यक्षेत्यक्षेस्वर्णापहारिणं॥ अत्रसा॰॥ १॥ अशांकरंनसंत्यक्षे
त्यक्षेन्यवनितापहं॥ अत्र॰॥ २॥ अशांकरंनसंत्यक्षेत्यक्षेभूचोरमप्यहं॥ अत्र॰॥ ३॥ अशैवान्दलयाम्येवतप्तघोरघरट्ट
नैः॥ दलितान्याचयिष्यामितप्ततैलेनिपातितान्॥ ४॥ अशैवान्स्तप्तमुसलैः कंडयामिपुनःपुनः॥ उलूखलेषुतप्तेषुपात
यित्वायथेच्छया॥ ५॥ उपेंद्रोवामहेंद्रोवायश्चकश्चिदशांकरः॥ तमानीयशितैःशस्त्रैःताडयिष्येनसंशयः॥ ६॥ इतिपूर्वं
यमेनोक्तंशपथश्चकृतस्तदा॥ तत्कृतःशपथोमिथ्याकदापिनभविष्यति॥ ७॥ मयातुशंकरस्यैपूजनंक्रियतेमुदा
॥ ममपूज्यतमःकोपिशंकरान्योनदृश्यते॥ ८॥ देवदेवोत्तमःशंभुःसर्वदेवशिरवामणिः॥ सयेनपूज्यतेनित्यंसतुध

पुत्र

भ्रूण

न्यतरोध्रुवं ॥ ९ ॥ शंकरप्रणवेचित्तंयस्यजातंभविष्यति ॥ नतस्मादधिकोधन्यःसत्यंसत्यंनसंशयः ॥ १० ॥
यस्यास्तिशंकरेभक्तिरविछिन्नाजगत्प्रभौ ॥ तस्यमोक्षांगनापांगभृगसंगःसदाभवेत् ॥ ११ ॥ सएवमुक्तिकां
तायाःकांतइत्युच्यतेबुधैः ॥ यःकरोतिमहादेवेभक्तिमव्यभिचारिणीं ॥ १२ ॥ महादेवसमोदेवोनभूतोनभ
विष्यति ॥ वयंयस्यमहेशस्यदासाःसर्वेपिपद्मज ॥ १३ ॥ योदेवेषुमहान्देवःसमहादेवउच्यते ॥ तत्तुल्योन्यःकथंभू
याद्देवेष्वन्येषुवाविधे ॥ १४ ॥ मनुष्येषुयथाश्रेष्ठोब्राह्मणोब्रह्मवित्तमः ॥ तथैवश्रीमहादेवोदेवेषुश्रेष्ठउच्यते ॥ १५ ॥ चतु
ष्पदेषुगोःश्रेष्ठायथास्पृष्टाघनाशिनी ॥ तथैवश्रीमहादेवोदेवेषुश्रे० ॥ १६ ॥ लोहेषुकांचनंशुद्धंयथाश्रेष्ठमितिश्रुतं ॥ त
थैवश्रीम० ॥ १७ ॥ सागरेषुयथाश्रेष्ठःक्षीराब्धिरितिसंश्रुतः ॥ तथैव० ॥ मुक्तिक्षेत्रेषुसर्वेषुकाशीश्रेष्ठायथाश्रुता ॥ त
थैव० ॥ १९ ॥ यथास्वर्गादिलोकेषुकैलासःश्रेष्ठउच्यते ॥ तथै० ॥ एतादृशोमहादेवोवेदवदांतसंश्रुतं ॥ स्मर्तव्यःपूज
नीयश्चश्रवसर्वथासर्वदाजनैः ॥ २१ ॥ महादेवमनभ्यर्च्ययोमोक्षमभिवांछति ॥ तादृशस्यतुसावांछानिष्फलेवभवि
ष्यति ॥ २२ ॥ मोक्षहेतुर्महादेवस्तस्मान्मोक्षार्थिभिर्जनैः ॥ महादेवःप्रयत्नेनपूजनीयोन्वहंमुदा ॥ २३ ॥ महादेवःसु
राध्यक्षोमोक्षदातातातस्सदा ॥ पूज्यतेसर्वभावेनमयासादरमन्वहं ॥ महादेवमुपाश्रित्यसर्वदानिवसाम्यहं ॥ ता
रयिष्यंतिसंसारान्मामत्यंतंकृपानिधिः ॥ मत्पिताभगवान्छंभुःमन्मातासुभगाशिवा ॥ कुमारगणनाथौनुविधे
मभ्रातरावुभौ ॥ २७ ॥ सखायःशांकराःसर्वेतत्तल्लोकनिवासिनः ॥ शंभुरेवकृपांभोधिराराध्यंदैवतंमम ॥ २८ ॥
एतादृशंमहद्भाग्यंममभूरितपःफलं ॥ ईदृशंभाग्यमन्यस्यकदापिनभविष्यति ॥ २९ ॥ स्वप्नेपिभगवान्शंभुर्भक्त
भीमभयापहः ॥ भूरिभावुकभारेणदृश्यतेसततंमया ॥ ३० ॥ देवतासार्वभौमोयंभर्गोभीमोभवःप्रभुः ॥ प्रभवो
विभवोभूतिःसंभूतिर्भवभंजकः ॥ ३१ ॥ भूरिभाग्यप्रभावेनशंभोर्भक्तिःप्रजायते ॥ नाल्पभाग्येनयद्भक्त्याभवबं
धविमोचनं ॥ ३२ ॥ सुभगेःसेव्यतेशंभुःभगवान्भक्तवत्सलः ॥ संप्राप्यतेमोक्षलक्ष्मीःसुभगेःशांभवैर्जनैः ॥ ३३ ॥

शांभवाएवसुभगाःसुभगाशंभुभावना॥ ययाभावनयासाक्षान्मोक्षलक्ष्मीरवाप्यते॥ ३४॥ अनन्यशरणानित्यंयेचर्य
तिमहेश्वरं॥ तैरेवसार्वसौख्यानिप्राप्तव्यानिनसंशयः॥ ३५॥ उद्धूल्यभस्मनांगानिसर्वदाविधिपूर्वकं॥ यःशिवारा
धनंकुर्यात्सधन्यःसत्यमुच्यते॥ ३६॥ यस्तुनित्यंप्रयत्नेनशिवस्मरणमादरात्॥ करोतिभूतिपूतांगःसधन्यइतिगीयते॥
३७॥ पुराकश्चनविप्रोभूद्धिमवद्देशसंश्रयः॥ ददर्शशांकरंविप्रंशिवपूजापरायणं॥ ३८॥ तंदृष्ट्वादूरतःस्थित्वाप्रणम्य
सपुनःपुनः॥ कृतांजलिपुटोभूत्वापप्रच्छेवंद्विजोत्तमं॥ ३९॥ ॥ विप्रउवाच॥ शांकरोत्तमविप्रेंद्रतवैतद्दर्शनादहं॥ कृ
तकृत्यस्तुजातोस्मिपुलकांकितविग्रहः॥ ४०॥ मयाकृतानिपापानितेषांनगणनाद्विज॥ तत्पापनाशकंपुण्यंयदि
स्याद्वदशंकर॥ ४१॥ ब्रह्महत्यादिपापानिकृतान्येवघृणांविना॥ किंतन्निवर्त्तकंविप्रवेदवेदांतसंस्तुतं॥ ४२॥ ज्ञात्वैवैता
निपापानिकृतानिद्विजसत्तम॥ अज्ञानान्नकृतान्येवतानिपापानिसर्वथा॥ ४३॥ किंचातिसुंदरीमातायुवतीशयनस्थि
ता॥ बलाद्भुक्तामयापूर्वंभूयोभूयोतिरागतः॥ ४४॥ मृतिकालोपिसंप्राप्तोदुःसहोदुःखदायकः॥ किंकर्त्तव्यंमयाविप्रवद
कारुणिकोत्तम॥ ४५॥ ॥ शांकरउवाच॥ ॥ कुरुदेवाधिदेवस्यमहादेवस्यपूजनं॥ तत्पूजयैवपापानिविनश्यंतिनसं
शयः॥ ४६॥ कुरुश्रौतंप्रयत्नेनकेवलंभस्मधारणं॥ विनातेनद्विजानांतुनाधिकारःशिवार्चने॥ ४७॥ येशंकरार्चकानित्यं
भस्मधूलितविग्रहाः॥ शिवैकनामनिरतास्तेपूज्याःशमनादिभिः॥ ४८॥ यमशंकरसंवादःश्रुतंपूर्वंमयाद्विज॥ तमेववक्ष्ये
यत्नेनश्रुणुपापभयापहं॥ ४९॥ पुराकश्चिद्द्विजःपापीकीकटेकुष्ठदूषितः॥ उवासब्रह्महत्यादिमहापापरतःसदा॥ ५०॥
तादृशस्याभवत्पुत्रोवार्धकेसोमवासरे॥ श्रुत्वासपुत्रमुत्पन्नमानंदंपरमंययौ॥ ५१॥ सोमवासरसंभूतंसपुत्रंवीक्ष्यसाद
रं॥ सोमवासरइत्येवतस्यनामचकारसः॥ ५२॥ तदाप्रभृतियत्नेनप्रत्यहंसोमवासरे॥ सोमवासरइत्याख्यांगृहीत्वा
बालकस्यसः॥ ५३॥ सोमवासरभुंक्ष्वेतिवदत्यनुदिनंपिता॥ सोमवासरतिष्ठेतिवदत्यनुदिनंप्रमुदा॥ ५४॥ एवमेवपिता
नित्यंव्यवहारेषुसर्वदा॥ तमाकारयतिप्रीत्यातन्नाम्नाततत्पितामुदा॥ ५५॥ एवमेवस्थितःपूर्वंकदाचित्सर्पदंशितः॥

बभूवमूर्छितोविप्रःसवृद्धः कुष्टदूषितः॥ ५६॥ ततःपरंसोमवारसोमवारेतितंसुतं॥ अकार्यसमृतःकुष्टीविषपूरितवि
ग्रहः॥५७॥ ततःसमाययुर्दूतायमस्यातिबलान्विताः॥ आगत्यनेतुमुद्युक्तानानाशस्त्रास्त्रपाणयः॥ ५८॥ तदानीमागतः
कश्चिच्छिवभक्तःशिवार्चकः॥ यमदूतानुवाचेदंकंपयन्पृथिवीतलं॥५९॥ ॥शिवभक्तउवाच॥ ॥रेरेयमभटाःक्रू
राःभवंतोयांतुदूरतः॥ ननेयोयंभवद्भिस्तुयत्नोत्रतुवृथाध्रुवं॥ एतस्यतुसतुःसोयंयस्याख्यासोमवासरः॥ विहायास्यो
तिमंब्रूतेवासरेत्यक्षरत्रयं॥ ६१॥ सोमइत्यमलंनामसर्वपापविनाशकं॥ यन्नामस्मरणादेवमोक्षलक्ष्मीरवाप्यते॥ ६२॥
उमयासहितस्सोमःसतुदेवशिरोमणिः॥ तन्नामयस्तुतस्यास्तिनतस्ययमयातना॥ ६३॥ यःकश्चित्सततंमर्त्यःसमुक्तो
भवतिध्रुवं॥ योभक्त्याशांकरंनामगृह्णातिप्रत्यहंभटाः गृह्णात्ययंतुतन्नामपुत्रबुध्यापियत्नतः॥ तथापितस्यपापानि
विनश्यन्त्येवसर्वथा॥ ६५॥ येनकेनापिरूपेणनामगृह्णातिशांकरं॥ यःशिष्टेनप्रचर्योवासमुक्तोभवतिध्रुवं॥ ६६॥ सोमना
मद्वयंभुक्तंअनेनेहमृतिक्षणे॥ गृहीतमतएवायमुक्तोयंभवतिध्रुवं॥ ६७॥ नस्पृष्टव्योभवद्भिस्तुकृतपापोप्ययंद्विजः॥ प्रयांतु
सत्वरंदूताःप्राणेछायदिजायते॥ एतस्मिन्नंतरेकश्चिच्छांकरःशंकरेतितः॥ रम्यंविमानमादायसत्वरंसमुपस्थितः॥ ६९॥
तदानींतंविलोक्यापिशांकरंयमकिंकराः॥ मृतंबध्वासमानेतुमुद्यमंचक्रुरुध्धताः॥७०॥ दृष्ट्वातद्बंधनोद्युक्तान्सतुशंकरकिंकरः॥
संमोहनास्त्रमादायमोहयामासतान्भटान्॥ ७१॥ ततोविमानेरत्नाढ्येतंप्रवेश्यसशांकरः॥ ययौकैलासनिलयंसर्वदेवाभिवं
दितं॥७२॥ तदानींतंविलोक्यैवविमानस्थंद्विजंयमः॥ संमोहितान्भटान्दृष्ट्वाययौशंकरसंनिधिं॥ दंडमुद्रांनिधायाग्रे
विनयाद्विनतोयमः॥ कृतांजलिपुटस्तस्थौमहादेवस्यशूलिनः॥७४॥ ततोयमविलोक्यैवंसर्वदेवशिरोमणिः॥ उवाच
वचनंसांबःशिक्षयन्यममादरात्॥७५॥ ॥शिवउवाच॥ ॥अनेनतुःकृताःसंतिभूरिशःपापकोटयः॥ तथाप्ययंतुनि
ष्पापोमन्नामस्मरणादभूत्॥ ७६॥ सोमवासरसंभूतःपुत्रोस्याभूद्विचक्षणः॥ सोमवासरइत्येवतन्नामायंचकारहि॥७७॥
व्यवहारेषुसर्वेषुतन्नाम्नापुत्रमन्वहं॥ आकारयत्ययंयत्नात्सुतवात्सल्यतोयम॥ ७८॥ सोमवासरइत्यत्रसोमइत्यक्षरद्वयं॥
अनेकपापसंघानांविनाशकरमुत्तमं॥७९॥ यदायदायंतन्नामग्रहणेकुरुतेमनः॥ तदातदास्यपापराशिःसकंपमिहसंस्थितः॥

॥८०॥ यदोच्चरतितन्नाम तद्देवाघकुलं महत्॥ निर्यातिकंपमानं निर्गतं तद्दिनस्यति॥८१॥ प्रसंगेनापि मन्नाम सोत्साहं योनुशीलयेत्॥ सपापमात्र रहितो भविष्यत्येव सर्वथा॥ ८२॥ यन्मम नाम दावाग्निः पापारण्य दवानलः॥ तस्मिन्नुच्चरिते नाम्नि नश्यत्यघकुलं क्षणात्॥ ८३॥ कृपातकानिति ते तिस्मृते मन्नाम्नि सादरं॥ तद्घतः पापसंघानां महाशनिरिति श्रुतं॥८४॥ ममया वंति नाश्यानि पातकानि मदाख्यया॥ तानि क संति तावंति पातकानि वद स्वमे॥८५॥ पुरा परार्द्धपर्यंतमपि पापानि रोमशः॥ कृत्वांतकाले मन्नाम स्मृत्वा मत्रूपतां गतः॥८६॥ यथा कालानलज्वाला संदग्धा गिरिकोटयः॥ तथा मन्नाम संदग्धा महापातककोटयः॥८७॥ चण्डालमपि मन्नामस्मरणार्चेतसं॥ संसारसागराद्धोरात्तारयामि न संशयः॥८८॥ अंतकाले स्मृतं येन मन्नामाघौघनाशकं॥ तेन तीर्णस्तूर्णमेव घोरसंसारसागरः॥८९॥ मन्नामस्मरणं नाम ममैव स्मरणं यम॥ ततो मयि स्मृते कुत्र पातकानामवस्थितिः॥९०॥ तावदेव हि पापानि वसंति पुरुषे यम॥ स्मृतं न यावन्मन्नाम महापातकनाशकं॥९१॥ तावदेव विनश्यंति महापातककोटयः॥ यावदेव हि मन्नामस्मरणप्रवणं मनः॥९२॥ सोमइत्यत्र सोवर्णोच्चारणाद्योत्यघाद्रयः॥ मवर्णोच्चारणे भूयस्तत्प्रवेशः कथं भवेत्॥९३॥ अयं स्मृत्वा सोमनाम महापातकनाशकं॥ ततस्त्वनुजहौ तस्मादयं मुक्तो न संशयः॥९४॥ हि मम मन्यद्धदिष्यामि यमाहं तव सादरं॥ शांकरानन्व हं भक्त्या पूजयस्व प्रयत्नतः॥९५॥ स्तोत्रं॥ ॥ येचंद्रशेखर महेश कृपानिधान श्रीविश्वनाथ करुणाकर शंकरेति॥ नित्यं वदंति सितकेवलभस्मफालास्ते शांकरास्तव यमान्वहमर्चनीयाः॥१॥ येभोमसर्व भर्ग भगवन्भव भव्यरूप भालेक्षणेन गणकोटिनिभेश्वरेति॥ नित्यं वदंति॰॥२॥ येविश्ववंद्यविबुधोत्तम विश्वबंधो कालानलाभ नरसिंहनिपातनेति॥ नित्यं वदंति॰॥३॥ येकालकाल पुरसूदन पुण्यमूर्ते विश्वंभराखिलगुरो भगहन् शिवेति॥ नित्यं वदंति॰॥४॥ येदीनवत्सल परापर देवदेव देवोत्तमोत्तम सदाशिव सर्वगेति॥ नित्यं वदंति॰॥५॥ येसर्गरक्षणविनाशविधानहेतो गौरीमनोरमण सर्वसुराधिपेति॥ नित्यं वदंति॰॥ ॥६॥ येनित्य निष्कल निरंजन भासमान मायाद्यतीत निगमांतविभूषणेति॥ नित्यं वदंति॰॥७॥ येनीललोहि

तनिरीश्वरनिघ्नपंचाननाव्ययनिरंतरनिर्गुणेति॥ नित्यंवदंति०॥८॥ येविष्णुमुख्यसुरवर्गनिसर्गसेव्यस्वर्गापवर्गफल
वर्गविधायकेति॥ नित्यंवदंति०॥९॥ येसोममंगलनिधानविधानहेतोकारुण्यसागरशरण्यगणेश्वरेति॥ नित्यं०॥
॥१०॥ यदेतदुक्तमधुनायमाद्यादरपूर्वकं॥ तदन्वहंस्मरप्रीत्यासावधानेनयत्नतः॥१०६॥ मृत्योहिनतराएवशांकराःसर्वदा
मम॥ अतस्तेसर्वदापूज्यास्तवयत्नेनसादरं॥७॥ अशांकरान्प्रयत्नेननरकेषुयथायथं॥ पातयप्रोथयास्वेषुतप्तभ्राष्ट्रेषु
भर्जय॥८॥ अशांकरेभ्यस्त्वनंतदेहिदुःखान्यसंशयं॥ अशांकरेषुशमनकृपांमाकुरुसर्वथा॥ अशांकरःकृपापात्रंनभव
त्येवसर्वथा॥ अशांकरार्थमेवाद्यापुरासृष्टाहियातनाः॥१०॥ इत्युक्तंतद्वचःश्रुत्वाप्रणम्यत्रिपुरांतकं॥ कृतांजलिपुटोभूत्वाव
भाषेवचनंयमः॥११॥ ॥यमउवाच॥ ॥महादेवकृपासिंधोत्वदाज्ञाशिरसाधृता॥ सर्वदेवोत्तमश्रीमन्शासितोस्मिसु
रोत्तम॥११॥ त्रिषष्टिकोटिदूतामेशांकरास्त्वविमोहिता॥ पतिताःसंतिनिःसंज्ञामृतदेहाइवाधुना॥१२॥ अद्यशंभोतदुत्थाने
यथाभवतिसत्वरं॥ तथाविधेहिकरुणांकरुणाकरशंकर॥१३॥ ॥शिवउवाच॥ ॥इतितद्वचनंश्रुत्वातथास्त्वित्याहशंक
रः॥ ततःसनिर्गतःकालःशंकरप्रेषितोद्विज॥१४॥ अतःशिवैकशरणोभवानपिभवद्विज॥ शिवैकशरणानांतुनास्त्येवय
मयातना॥१५॥ बिभेतिशांकरंदृष्ट्वायमोपिसततंद्विज॥ ततोभजमहादेवंशांभवोभवसर्वदा॥१६॥ सितकेवलभस्मांगःशि
वैकशरणःसदा॥ भजशंकरमानंदंसर्वदेवशिखामणिं॥१७॥ अर्चयस्वमहादेवंसावधानेनसर्वदा॥ त्रिकालमप्रमादेनशि
वध्यानपुरःसरं॥१८॥ भस्मनोद्धूलयांगानिमंत्रवत्सावधानतः॥ कुरुत्रिपुंड्रंतदनुभालाद्यंगेषुसादरं॥१९॥ जाबालोक्ते
नमार्गेणकुरुरुद्राक्षधारणं॥ मारुद्राक्षविभूतिभ्यांप्रमत्तोभवसर्वदा॥२०॥ विभूतिधारणंनित्यंतथारुद्राक्षधारणं॥ शिवा
र्चनंतथानित्यंब्राह्मणानांविशेषतः॥२१॥ निधनेत्यादियेमंत्रानमोंताःपापनाशकाः॥ तैरन्वहंपूजनीयोलिंगरूपीसदाशिवः
॥२२॥ द्विजवेदेष्वशेषेषुविहितंलिंगपूजनं॥ सधर्मःसर्वफलदःस्वयंनित्योपिसर्वदा॥२३॥ शिवलिंगार्चनंनित्यंनित्यंयोन
करिष्यति॥ सयातिनरकंघोरंयावदाचंद्रतारकं॥२४॥ नित्यमार्द्रैरनार्द्रैर्वाबिल्वपत्रैःसदाशिवं॥ पूजयस्वमहादेवंतस्मा
न्माप्रमदोभव॥२५॥ बिल्वपत्रैर्महादेवंयोनित्यंनार्चयिष्यति॥ सकर्मभ्रष्टएवेतिवदंतिश्रुतयोखिलाः॥२६॥ बिल्वप

त्राणिसुधानिस्वतःपर्युषितान्यपि॥शंकरार्चनयोग्यानिभवंतीत्यस्तिहिश्रुतिः॥२७॥सवर्णबिल्वपत्रंचरत्नंचरजतंतथा
॥नहिपर्युषितंयस्मात्सुधमेवस्वयंयतः॥२८॥अर्पितान्यपिबिल्वानिप्रक्षाल्यचपुनःपुनः॥शंकरायार्पणीयानिनवानियदि
नक्वचित्॥२९॥शिवलिंगंसमभ्यर्च्यबिल्वपत्रैःप्रयत्नतः॥भोक्तव्यमन्वहंविप्रैरन्यथायातियातनां॥३०॥शुष्कंशठितमार्द्रं
वाबिल्वपत्रंशिवप्रियं॥तस्मादर्चययत्नेनबिल्वपत्रैःसदाशिवं॥३१॥अनाघ्रातंबिल्वपत्रंयादृशंतादृशंशिवे॥विनिक्षिप्य
महापापैर्मुच्यतेनात्रसंशयः॥३२॥सदाशिवंबिल्वपत्रैरच्छिद्रैःकोमलैर्नवैः॥यःपूजयतियत्नेनसमोक्षमधिगच्छ
ति॥३३॥बिल्वपत्रैर्नवैर्नित्यंयःपूजयतिशंकरं॥सधन्यइतिवेदांतैःसर्वैरप्युपबृंहितं॥३४॥महादेवंप्रयत्नेन
प्रातर्बिल्वदलैर्नवैः॥संपूज्यमोदतेयस्तुसधन्यइतिगीयते॥३५॥एवमेवहिमध्यान्हेसायान्हेपिसदाशिवं॥
बिल्वपत्रैस्समभ्यर्च्यधन्योभवतिमानवः॥३६॥बिल्वपत्रार्चनात्प्रीतोयथाभवतिशंकरः॥तथानान्येनस
प्रीतोभविष्यतिमहेश्वरः॥३७॥ततःपूजययत्नेनमहादेवंसुरोत्तमं॥महापापविनिर्मुक्तोभविष्यतिनसंशयः
॥३८॥ ॥विष्णुरुवाच॥ ॥इत्युक्तस्तेनशैवेनतंप्रणम्याशिवार्चकं॥उद्धूल्यभस्मनांगानिशिवार्चनपरोभ
वत्॥३९॥उद्धूलनत्रिपुंड्राभ्यांकेवलाभ्यामलंकृतः॥रुद्राक्षधारणंकृत्वासचकारशिवार्चनं॥४०॥ततःशिवप्र
सादेननिर्मुक्तःसर्वपातकैः॥प्रपेदेगणनाथत्वंशिवलिंगार्चनद्विधे॥अतःप्रयत्नतःकार्यंशिवलिंगार्चनंविधे॥
शिवलिंगार्चनंनित्यमकुर्वन्प्रत्यवैतिहि॥४२॥देवानांमानवानांचऋषीणामपिवस्तुतः॥शिवएवप्रयत्नेनशिव
लिंगार्चनंविधे॥४४॥ददातिशंकरोमुक्तिंस्वभक्तेभ्यस्तथासति॥कुरुभक्तिंमहादेवेलभमुक्तिमनामयं॥४५॥विधे
कार्यंविहायान्यत्स्मरशंकरमन्वहं॥स्मृतेतुशंकरेनित्यंसंसारीनभविष्यसि॥४६॥संसारतरणोपायःशंकरस्मर
णंविधे॥ततस्मरान्वहंभक्त्याशंकरंलोकशंकरं॥४७॥विचार्यवेदवेदांतान्सेहासानतंद्रितैः॥संपूज्यःशिवएवेतिनि
श्चितंमुनिभिःपुरा॥४८॥ततःपूजययत्नेनमहादेवमतंद्रितः॥तस्मिन्संपूजितेनित्यंमुक्तिर्भवतिसर्वथा॥
॥४९॥प्रसन्नपार्वतीनाथेचतुर्वर्गफलप्रदे॥किमलभ्यंवदब्रह्मन्किंचिदपिसर्वथा॥५०॥यंपश्यतिमहादेवः

सादरंकरुणानिधिः॥तमुध्दरत्ययत्नेनघोरसंसारसागरात् ॥५१॥शंकरः करुणासिंधुर्यदिपश्यंतिसादरं॥ कीटं
पतंगमन्यंवातंमोचयतिसर्वथा॥ प्रसन्नेसत्युमाकांतेमशकोवागजोथवा॥ प्राप्नोतिपरमंस्थानंयोगिनामपिदुर्लभं
॥५३॥अनेकजन्मभिर्घोरंयद्दितप्तंतपस्तदा॥ प्रसीदतिमहादेवःसांबःस्वर्गापवर्गदः॥५४॥शिवनाममणिः
कंठेयस्यतिष्ठतिसर्वदा॥सनीलकंठतामेतिसत्यमेवोच्यतेमया॥ ५५॥ श्रीनीलकंठश्रीकंठशितिकंठेतिवादि
नः॥वैकुंठंतृणवत्कृत्वातिष्ठंतिखलुसर्वदा॥ ५६॥ संपूज्यशंकरंनित्यंशिवनामामृतंपिब॥शिवनामामृता
धन्यन्नभवत्यमृतंविधे॥५७॥ पुराकांचीपुरीवासीकश्चिद्राजाबलोन्नतः॥विश्वाभिधोददर्शैकंशिवाचार
तंद्विजं॥५८॥सराजाशंकरंविप्रंप्रणम्याभ्यर्च्यसादरं॥ कृतांजलिपुटोभूत्वापप्रछविनयान्वितः॥५९॥ ॥
विश्वाभिदउवाच॥ ॥विप्रशंकरतत्वज्ञशंकरार्चकशंकर॥त्वद्दर्शनेनसंतुष्टमभूदद्यमनोमम॥ ६०॥ दशव
र्षसहस्राणिदशवर्षायुतानिच॥ गतानिशास्ततोराज्यंममशत्रुविवर्जितं॥६१॥भुक्तंमयायुतंस्त्रीणांसुदतीणां
यथासुखं॥जातादशशतंपुत्रावेदशास्त्रविशारदाः॥६२॥कुबेरेणास्तिसख्यंमेसर्वदाप्रीतिपूर्वकं॥धनानिसंत्य
नंतानिरत्नानिविविधानिच॥६३॥ ऐरावतसमाःसंतिकोटिशोद्विरदाःमम॥उच्चैश्रवाःसमाःसंतितुरंगाःकोटिशोमम॥
॥६४॥ कामधेनुसमाःसंतिममगावोपिकोटिशः॥अन्यान्यनन्यलभ्यानिसंतिवस्तूनिकोटिशः॥६५॥ सुवर्णरत्न
कोशादिवर्धतेप्रत्यहंमम॥जायतेनुक्षणंविप्रभाग्यवृध्दिर्ममाधुना॥६६॥ एतादृशंमहद्भाग्यंकथंजातंममद्विज॥
किंवाकृतंमयापुण्यंतत्सर्वंवदशंकर॥६७॥ ॥शंकरउवाच॥ ॥भिल्लःपूर्वभवेराजन्भवानतिबलान्वितः॥
तदाभिल्लशरीरेणपातकंबहुधाकृतं॥६८॥ मांसार्थमतियत्नेनबहवोहिंसितामृगाः॥भक्षितंबहुधामांसमत्युत्तम
मनाकुलं॥६९॥ किंचारण्यंसमाश्रित्यसशरेणस्थितंत्वया॥नदातदातुबहवोनिहताब्राह्मणाःपुरा॥७०॥गिरिग
ह्वरमाश्रित्यब्राह्मणाबहवोहताः॥कृतोमार्गनिरोधश्चब्राह्मणानांपुरात्वया॥ ७१॥ एवमेवस्थितंपूर्वमरण्येक्रूरकर्मणा॥
त्वयैतादृशेचित्तेनहृष्टोबिल्वार्जनप्रियः॥७२॥ सवनेबिल्वपत्राणिसंपाद्यान्वहमादरात् ॥शिवलिंगंसमभ्यर्च्य

पूजयित्वास्थितः पुरा ॥ ७३ ॥ तथापि कृत पापस्य तथैवासीत्तदा मतिः ॥ सा मतिर्निर्मला नित्यं सुदृढासीत्तदा तव ॥ ७४ ॥
त्वयाप्यत्यंतयत्नेन बिल्वपत्राणि सादरं ॥ संपाद्याभ्यर्चितं लिंगं त्रिकालं सावधानतः ॥ ७५ ॥ कृत्वाकृत्वापि पापानि
त्वया प्रत्यहमादरात् ॥ बिल्वपत्रैर्महादेवः पूज्यते यत्नपूर्वकं ॥ ७६ ॥ बिल्वपत्रार्जनं नित्यं कुर्वतस्ते करद्वयं ॥ बिल्वकं
टकसंविद्धमनभ्यासाद्भून्नृप ॥ ७७ ॥ यदा यदा बिल्वपत्रं सादरं गृह्यते त्वया ॥ तदा तदा तनुर्जाता बिल्वकंटकसंश्रि
ता ॥ ७८ ॥ बिल्वकंटकविद्धांगोप्यन्वहं प्रीतिपूर्वकं ॥ बिल्वपत्रार्जनात्पूर्वं विरतो नैव संस्थितः ॥ ७९ ॥ वसंते बिल्व
पत्रेषु पतितेषु पुरा त्वया ॥ बिल्ववृक्षाग्रमारूढं बिल्वपत्रार्थमादरात् ॥ ८० ॥ तदानीं वायुरभवत्तदा तेनैव कंपितः ॥ भूमौ नि
पतितः पूर्वं भवान्त्यक्ततनुस्ततः ॥ ८१ ॥ तदा दुंदुभयो नेदुः पुष्पवृष्टिरभून्नृप ॥ त्वद्दर्शनार्थं ब्रह्माद्यास्तदा तत्र समा
गताः ॥ ८२ ॥ ततो विमानमारुह्य ब्रह्मलोके गतं त्वया ॥ ब्रह्मलोके स्थितं राजन्सार्धकोटियुगाष्टकं ॥ ८३ ॥ यावत्स्थितं
ब्रह्मलोके तावदत्यंतयत्नतः ॥ चकार पूजनं तुभ्यं ब्रह्मा सादरमन्वहं ॥ ८४ ॥ ततः परं नरेंद्रस्य पुत्रभावमुपागतः ॥ तदा प्र
भृति सौख्यानि भुक्तान्येव त्वया नृप ॥ ८५ ॥ पद्मगंधास्त्वया भुक्ता नार्यः कमललोचनाः ॥ पुत्राश्च बहवो लब्धाः संपदश्च
निरामयाः ॥ ८६ ॥ इहैव भुक्तभोगस्य शिवपूजारतस्य ते ॥ प्रयच्छति महादेवो मोक्षमप्यतिदुर्लभं ॥ ८७ ॥ शिवार्चनेन संप्रा
प्तमिदं भाग्यं त्वया नृप ॥ प्राप्तभाग्येन भूयोपि शिवः संपूज्यते त्वया ॥ ८८ ॥ शिवार्चनं विहायान्यन्न महद्भाग्यकारणं ॥ भाग्य
प्रदः शिवादन्यो न भवत्येव सर्वथा ॥ ८९ ॥ सिंहासनाधिपत्येच्छा मोक्षेच्छाप्यनिवारिता ॥ यस्यास्ति तेन कर्तव्यं शिवपूजनम
न्वहं ॥ ९० ॥ शिवे संपूजिते सांबे सर्वकामप्रदे सदा ॥ राजन्सिध्यंति सर्वार्थाः सत्यमेवोच्यते मया ॥ ९१ ॥ शिवं सांबं समारा
ध्य सर्वदेवशिखामणिं ॥ विष्णुर्विष्णुत्वमापन्नस्ततः पूज्यो महेश्वरः ॥ ९२ ॥ ब्रह्मा ब्रह्मत्वमापन्नः शंकरस्यैव पूजया ॥ ९३ ॥
येनार्चयंति विश्वेशं नित्यं सांबं सदाशिवं ॥ ते निर्भाग्या भवंत्येव प्रतिजन्मनि सर्वथा ॥ ९४ ॥ अनर्चितमहेशानां का नायासेन
जीवनं ॥ क्व वा मोक्षकथा तेषां दूरतः सा पराङ्मुता ॥ ९५ ॥ अनर्चितमहादेवैर्भुक्ता दारिद्र्यमन्वहं ॥ ततो घोरेषु नरकेष्वनि
शं प्राप्यते स्थितिः ॥ अनर्चितमहादेवैर्भुक्ता दारिद्र्यमन्वहं ॥ ततो घोरेषु नरकेष्वनिशं प्राप्यते स्थितिः ॥ अनर्चितमहे
शस्य सुखं नास्त्येव सर्वथा ॥ दुःखाब्धावेव सततं भूयो भूयस्स मज्जति ॥ ९७ ॥ इदमेतावदैश्वर्यमन्यालभ्यमखंडितं ॥

त्वयाप्राप्तमभूद्राजन्केवलंशिवपूजया॥९८॥शिवार्चनात्परोधर्मोनास्तिनश्रूयतेमया॥ सत्यमेतत्पुनःसत्यंउद्धृत्य भुज
मुच्यते॥९९॥शिवार्चनेनधर्मार्थकाममोक्षास्तुसर्वथा॥ प्राप्तव्या एवराजेंद्रसत्यंसत्यंनसंशयः॥१००॥शिवार्चनपराएव
राजन् धन्या इतिस्मृताः॥अतःशिवार्चकोविष्णुधन्यइत्यभिधीयते॥१॥ प्रयांतिब्रह्मसदनंदृष्ट्वापिशिवमर्चितं॥शिव
मभ्यर्च्ययत्नेनब्रह्मत्वंकिंनयांतिते॥२॥गच्छकाशींप्रतिप्रीत्याविश्वेशोयत्रतिष्ठति॥गत्वाविश्वेश्वरंतत्रपूजयस्वयथावि
धि॥३॥प्रातःकालेप्रयत्नेनमणिकर्णिजलेऽमले॥स्नात्वोद्धूल्यसर्वांगंत्रिपुंड्रंरचयादरात्॥४॥रुद्राक्षधारणंकृत्वासं
ध्यांकृत्वाप्रयत्नतः॥मौनीजलंबिल्वपत्राण्यादायप्रतिवासरं॥५॥पूजयस्वप्रयत्नेनविश्वेशंसांबमव्ययं॥विश्वेश्वरा
र्चनरतःकाशींमात्यजमात्यज॥६॥किंचकिंबहुनोक्तेनसत्यमेकंवचःश्रुणु॥शिवएवसदापूज्यश्चतुर्वर्गफलार्थिभिः
॥७॥अतःप्रयत्नतोराजन्कुरुशंकरपूजनं॥सर्वदाप्यप्रमादेनभस्मधारणपूर्वकं॥८॥अतःपरंप्रयत्नेनविषयेषुरतिंत्यज॥
सर्वदासावधानेनभजसांबंसदाशिवं॥९॥कुरुप्रसादममलंनानाशृंगविराजितं॥ महादेवपुरोन्नागेनानारत्नविराजितं॥प्रा
सादस्थंमहादेवंउमाकांतंविलोकय॥संपूज्यरत्नमालाभिःदिव्यवस्त्रैरपिप्रभुं॥११॥प्रासादस्थमुमाकांतंयःपश्यतिमु
दासदा॥तमन्वहंपूजयंतिविष्णुब्रह्मादयःसुराः॥१२॥सहस्रचक्रसंवीतंसौवर्णंरत्नरंजितं॥कारयस्वरथंराजन्शंकरारो
हणोचितं॥१३॥नानासुरत्नमालाभिरलंकुरुरथोत्तमं॥दिव्यवस्त्रैश्चपुष्पैश्चचामरैश्चयथोचितं॥१४॥एतादृशउमाकांतो
रत्नाभरणभूषितः॥रत्नमालापरिवृतंरथमारुह्यतिष्ठतु॥१५॥एतादृशंरथारूढंपार्वतीरमणंप्रभुं॥विलोकयातियत्ने
नविष्णुब्रह्मादिवंदितं॥१६॥रथारूढंशिवंदृष्ट्वासोममभ्यर्चितंमुदा॥संसारसागराद्घोरान्मुक्तोभवतिमानवः॥१७॥र
थोत्साहंकारयस्वप्रतिसंक्रमणेप्रभोः॥सांबस्यदर्शनंकार्यंरथस्थस्यमुदासदा॥१८॥रविसंक्रमणेदृष्ट्वारथारूढमुमा
पतिं॥मुच्यतेपापकोटिभ्यःसद्यएवनसंशयः॥१९॥कृत्वापिनित्यंयत्नेनब्रह्महत्यायुतंनृप॥रथारूढंशिवंदृष्ट्वासर्व
पापैःप्रमुच्यते॥२०॥पुराकश्चिन्महापापीनित्यंब्रह्मवधेरतः॥परदाररतोनित्यंपरद्रव्यरतःसदा॥मद्यमांसाशनोनित्यं
नित्यंगोवधकृन्मुदा॥स्वमातृसंगनिरतोभगिनीगमनप्रियः॥२२॥सदृष्ट्वायुवतींनारींबलादाकृष्ययत्नतः॥यथेष्टमुप

मुपभुक्त्वैवसरत्यंतेजहातितां॥२३॥सकदाचिदिमांप्रापकांचींपुण्योपसंश्रयां॥आगत्यतुमहादेवंरथारूढमलोकयत्॥२४॥
ततःसनिर्गतःकांच्यास्तथैवविषयातुरः॥ततोरत्यर्थममलंब्राह्मणींसजहारचतमुवाचततोराजन्ब्राह्मणीपतिदेवता॥नतान
नाभयग्रस्तांध्यायंतीशंकरंहृदि॥२६॥मामास्पृशबलाद्दुष्टयदिमांस्पृष्टुमिछसि॥शिरःसहस्रधाछिन्नंतवाद्येहभविष्यति
॥२७॥इतितद्वचनंश्रुत्वाप्यगणय्यबलान्वितः॥कामातुरस्तदग्रांगंपस्पर्शरतिलोलुपः॥२८॥ततस्तस्यशिरछिन्नंसद्यएवस
हस्रधा॥ततोदूताःसमागत्यनिन्युस्तंयममंदिरं॥२९॥ततोविलोक्यकालस्तंचित्रगुप्तंविचारकं॥बभाषेकोयमेतस्यधर्मःकइ
तिसादरं॥३०॥ ॥चित्रगुप्तउवाच॥ ॥यमानेनकृतंपापंआजन्ममरणंसदा॥पातकानांचगणनाकर्तुमस्यनशक्यते॥३१॥
तथापिकृतमेतेनपुण्यमेकंमहत्तरं॥तत्पुण्यसदृशंपुण्यंनकिंचिदपिदृश्यते॥३२॥रथारूढमुमाकांतंददर्शायंयमादरात्॥त
द्दर्शनेनपापानिविनष्टान्यस्यतत्क्षणे॥३३॥सांबोदृष्टोरथारूढोयद्दिनेतेनतद्दिने॥त्यक्तातनुरतोनास्ययमयामीययातना
यःसादरंशिवंसांबंरथारूढंविलोकयत्॥सोनंतब्रह्महत्यादिपातकेभ्योविमुच्यते॥३५॥इत्युक्तंतद्वचःश्रुत्वायमःसंतुष्टमान
सः॥ददौरत्नासनंतस्मैसोत्साहंस्मितपूर्वकं॥३६॥ततोर्घ्यादिभिरभ्यर्च्यपुष्पकेसंनिवेश्यतं॥सादरंप्रेषयामासस्वर्गलो-
कायसत्वरं॥३७॥इंद्रस्तमागतंदृष्ट्वापुष्पकस्थंमुदान्वितः॥उपविश्यासनेरम्येपूजयामाससादरं॥३८॥इंद्रोपिप्रेषयामा
सब्रह्मलोकायसत्वरं॥ब्रह्मातमागतंदृष्ट्वापूजयामाससादरं॥३९॥ब्रह्मणापूजितोनित्यंब्रह्मलोकेसतिष्ठति॥सकोटि
युगपर्यंतंतत्रस्थास्यतिसर्वदा॥४०॥ततःपरंचक्रवर्तीसभविष्यतिभूपते॥तदाजातिस्मृतिस्तस्यभविष्यत्येवसर्वथा॥
दा॥४१॥जातिस्मरःसदेवेशंमहादेवंभजिष्यति॥रथोत्सवादिकंशंभोःकारयिष्यतिसर्वदा॥४२॥महेशप्रणवो

नित्यंशिवपूजांकरिष्यति॥ततःशिवार्चनेनैवसमुक्तोपिभविष्यति॥४३॥शिवार्चनात्परंराजन्नमोक्षस्यास्तिकारणं
॥सत्यमेतत्पुनःसत्यमुधृत्यभुजमुच्यते॥४४॥संसारसागरंतर्तुंउपायःशिवपूजनं॥संसारोत्तारणोपायस्तदन्योनैव
दृश्यते॥४५॥भस्मरुद्राक्षपूतांगोयःशिवंपूजयिष्यति॥तस्यसंसारदुःखानिनभवंत्येवसर्वथा॥४६॥संसारागाधकू
पेष्वतेपतंतिनराधिप॥येनार्चयंतियत्नेनमहादेवंजगत्प्रभुं॥४७॥अदैन्येनाप्रयासेनकेवलंशिवपूजया॥मोक्षः
संप्राप्यतेमर्त्यैःशिवैकपरदेवतैः॥४८॥शिवार्चनसमंपुण्यंनदृष्टंनश्रुतंनृप॥यदर्चनेनसुलभोमुक्तिकांताकर

ग्रहः॥ ४९॥ मुक्तिकांतावशंयाति वशंयातिजगत्त्रयं॥ वशंप्रयांतिदेवाश्चश्रीमहादेवपूजनात्॥ ५०॥ सहस्रवाजि
मेधानांसांगानांयत्फलंनृप॥ ततोनंतगुणंपुण्यंलभ्यतेशिवपूजया॥ ५१॥ सहस्रराजसूयानांसांगानांयत्फलंनृप॥
ततोनंतगुणं०॥ ५२॥ सहस्रवाजपेयानांसांगानांयत्फलंनृप॥ ततोनंत०॥ ५३॥ सहस्रपौंडरीकानांसांगानांयत्फ
लंनृप॥ ततोनंत०॥ ५४॥ सहस्रद्वादशाहानांसांगानांयत्फलंनृप॥ ततोनंत०॥ ५५॥ सहस्रसत्रयागानांयत्फ
लंलभतेनृप॥ ततोनंत०॥ ५६॥ श्वेताश्वार्बुददानेनयत्फलंसमवाप्यते॥ ततोनंत०॥ ५७॥ द्विरदाऽर्बुददानेनय
त्फलंसमवाप्यते॥ ततोनं०॥ ५८॥ धेन्वर्बुदप्रदानेनयत्फलंसमवाप्यते॥ ततोनंत०॥ ५९॥ सर्वभूमिप्रदानेनयत्फ
लंसमवाप्यते॥ ततोनंत०॥ ६०॥ कोटिरत्नतुलादानेयत्फलंसमवाप्यते॥ ततोनंत०॥ ६१॥ कोटिहेमतुलादानेय
त्फलंसमवाप्यते॥ ततोनंत०॥ ६२॥ तिलपर्वतदानानांअर्बुदानांचयत्फलं॥ ततोनंत०॥ ६३॥ कोटिकन्याप्रदाने
नयत्फलंसमवाप्यते॥ ततोनंत०॥ ६४॥ राजन्यावत्फलंप्राप्यंश्रीमहादेवपूजया॥ तावत्फलंकथंप्राप्यंतदन्यै
र्धर्मकोटिभिः॥ ६५॥ शिवार्चनेनयल्लभ्यंधर्मार्थादिफलंनृप॥ तत्फलंशिवपूजान्यधर्मैरप्राप्यमेवहि॥ ६६॥
कृतायांशिवपूजायांधर्माःसर्वेपिसत्कृताः॥ ततस्तत्सदृशंपुण्यंनास्तिनश्रूयतेध्रुवं॥ ६७॥ शिवार्चनेननश्यं
तिमहापातकपर्वताः॥ ततस्तत्सदृशंपुण्यंकिंवावेदेभविष्यति॥ ६८॥ शिवार्चनान्यान्विविधान्धर्मान्कृत्वापिको
टिशः॥ नमुक्तिंलभतेमर्त्योविनाशंकरपूजया॥ ६९॥ शिवार्चनंपरंपुण्यंश्रौतंस्वर्गापवर्गदं॥ अतःतत्सदृशं
पुण्यंनश्रुतंश्रुतिषुध्रुवं॥ ७०॥ मुक्तिःशिवार्चनेनेतिश्रुतिडिंडिरवोस्माकंमुक्तिकल्याणकारणं॥ ७१॥ ततः
कुरुप्रयत्नेनमहादेवार्चनंनृप॥ भस्मरुद्राक्षपूतांगोबिल्वपत्रादिसाधनैः॥ ७२॥ उद्धूलनंत्रिपुंड्रंचमनसा
पिनलंघय॥ उद्धूलनत्रिपुंड्राभ्यांविनानार्चयशंकरं॥ ७३॥ जाबालोक्तेनमार्गेणकुरुरुद्राक्षधारणं॥ जाबालो
क्तेनमार्गेणभस्मनोपिचधारणं॥ ७४॥ नित्यंकार्यंप्रयत्नेनभूतिरुद्राक्षधारणं॥ ताभ्यांनप्रमदोभूयादितिजा

बालवादिनः॥ ७५॥ सर्वमंत्रोत्तमोमंत्रः शिवमंत्रश्रुतिश्रुतः॥ ततस्तमतियत्नेनजपरुद्राक्षमालया॥ ७६॥ रुद्रा
क्षमालयाजप्तः शिवमंत्रष्षडक्षरः॥ मोक्षप्रदोभवत्येवसत्यमेवोच्यतेमया॥ ७७॥ जपेयावत्फलंप्राप्यंविद्रुमोत्तम
मालया॥ ततःसहस्रगुणितंमौक्तिकोत्तममालया॥ ७८॥ जपेयावत्फलंप्राप्यंमौक्तिकोत्तममालया॥ ततःसह
स्रगुणितंफलंस्फटिकमालया॥ ७९॥ जपेयावत्फलंप्राप्यंमुक्तास्फटिकविद्रुमः॥ ततोनंतगुणंपुण्यंभुधरुद्रा
क्षमालया॥ ८०॥ शिवमंत्रोबिल्वमूलेजप्तोरुद्राक्षमालया॥ अभिप्सितार्थफलदोभवत्येवनसंशयः॥ ८१॥ शि
वमंत्रोवेदमंत्रोवेदांतैःसंस्तुतोमुहुः॥ अतोमंत्रोयममलोजपनीयःप्रयत्नतः॥ ८२॥ शिवमंत्रसमोमंत्रोना-
स्तिनश्रूयतेश्रुतौ॥ अतोयंवैदिकोमंत्रोजपनीयोमुमुक्षुभिः॥ ८३॥ नाभिदघ्नजलेस्थित्वाशिवमंत्रमनुत्तमं॥ यो
जपेद्भस्मपूतांगःसमुक्तोभवतिध्रुवं॥ ८४॥ उपदेशोस्तुवामास्तुशिवमंत्रस्यवस्तुतः॥ तथापिजपनीयोयं
मंत्रःशैवःषडक्षरः॥ ८५॥ हत्यांयत्नेनकृत्वापिब्राह्मणस्यनराधिपः॥ शिवइत्यक्षरद्वंद्वमुच्चार्याघाद्विमुच्यते
॥ ८६॥ अनंतब्रह्महत्यादिपातकानिमुहुर्मुहुः॥ कृत्वापिमुच्यतेराजनशिवमंत्रजपाध्रुवं॥ ८७॥ मद्यंपीत्वापिमां
सानिभुक्त्वापिनृपसत्तम॥ मुच्यतेनात्रसंदेहोशिवमंत्रजपात्ध्रुवं॥ ८८॥ शिवमंत्रानलोराजन्पापारण्यविनाश
कः॥ अतएवप्रयत्नेनजप्यःशैवःषडक्षरः॥ ८९॥ रुद्राक्षधारणंकृत्वाभस्मनोत्धूलनंतथा॥ त्रिपुंड्रधारणं
कृत्वाजप्यःशैवःषडक्षरः॥ ९०॥ रुद्राक्षधारणेयोग्यःशैवएवनृपोत्तम॥ रुद्राक्षधारणंश्रौतंयतोवैदिकसंमतं
॥ ९१॥ उपनीतैरेवकार्यंवेदस्याध्ययनंयथा॥ तथैवशांकरैरेवकार्यंरुद्राक्षधारणं॥ ९२॥ चंडालस्ययथायागे
नाधिकारस्तथानृप॥ अशांकरस्याधिकारोनास्तिरुद्राक्षधारणे॥ ९३॥ कृतयागेपिचंडालोयथाप्राप्नोतिदुर्ग
तिं॥ तथाधृत्वापिरुद्राक्षान्नशैवोयातिदुर्गतिं॥ ९४॥ चंडालोधीतवेदोपियथाप्राप्नोतिदुर्गतिं॥ तथाधृत्वापि
रुद्राक्षान्अशैवोयातिदुर्गतिं॥ ९५॥ ब्राह्मण्यमपिसंप्राप्ययोनशैवोभविष्यति॥ सपुनःपुनराप्नोतिचंडाली

योनिमुन्मलां ॥ ९४ ॥ शांकरानभविष्यंतियद्येवंक्षत्रियादयः ॥ तेपिसंप्राप्नुवंत्येवचंडालींयोनिमुन्मलां ॥ ९५ ॥ मोक्षोनशां
करान्यस्यकल्पांतेपिनृपोत्तम ॥ सत्यंसत्यंपुनःसत्यंउधृत्यभुजमुच्यते ॥ सर्वदेवोत्तमत्वेनविज्ञायशिवमद्वयं ॥ पूज
यंतिशिवंनित्यंयेतेशैवाइतिस्मृताः ॥ ९७ ॥ अनन्यदेवतानित्यंशिवैकपरदेवताः ॥ पूजयंतिशिवंनित्यंयेतेशैवाइति
स्मृताः ॥ ९८ ॥ कृत्वाभालादिदेशेषुकेवलंभस्मधारणं ॥ पूजयंतिशिवं० ॥ ९९ ॥ राजन्केवलभस्मांगाः शिवैकपरदेवताः ॥
शैवाइतिस्मृतास्तेस्तुशिवपारिषदाःस्मृताः ॥ १०० ॥ मोक्षःसंप्राप्यतेराजंनीदृशैरेवशांकरैः ॥ अशांकरैर्नसंप्राप्योमो
क्षःसर्वात्मनाध्रुवं ॥ १ ॥ पूर्वोक्तलक्षणभ्रष्टायेतेसर्वेनशांकराः ॥ अशांकराणांसर्वेषांनरकेष्वेवसंस्थितिः ॥ २ ॥ मोक्षोरा
जन्नशैवानामत्यंतंदुर्लभंध्रुवं ॥ स्वर्गभोगप्रदंपुण्यंसोमपानंभुनामिव ॥ ३ ॥ अतोगृहाणराजेंद्रशैवदीक्षामघापहं ॥ शै
वोभवतियत्नेनमोक्षेछायदितेभवेत् ॥ ४ ॥ ॥ विष्णुरुवाच ॥ इत्युक्त्वासतुशैवेंद्रस्तेनभूपेनपूजितः ॥ ययावेकांबरेशस्य
पूजार्थेहृष्टमानसः ॥ ५ ॥ ततःसभूपतिर्ब्रह्मन् चक्रेरत्नशिवालयं ॥ लिंगंचस्थापयामासतस्मिन्नेवशिवालये ॥ ६ ॥
रथंचकारयामाससहस्रारंहिरण्मयं ॥ सहस्रद्वारसंवीतंरत्नमालाविराजितं ॥ ७ ॥ अयुतंरथशृंगाणांरथोपरिविरा
जितं ॥ हेमध्वजायुताकीर्णहेमपट्टविराजितं ॥ ८ ॥ वैकुंठमप्यतीत्यैवसंस्थितंनयनप्रियं ॥ सर्वदेवसमाराध्यंसर्व
गंधर्वसेवितं ॥ ९ ॥ शंकरंतद्रथारूढंसांबंसंवीक्ष्यभूपतिः ॥ चकारात्यंतसंतुष्टःपूजांसांबस्यसादरं ॥ १० ॥ सार्द्धको
टित्रयंदीपादीपिताःशंकरालये ॥ तद्दीपकांतिपूजेनकां ऽ चिसंदीपितातदा ॥ ११ ॥ प्रासादःकारितस्तेनलक्षद्वारस
मन्वितः ॥ ससर्वसुरसंसेव्यःसर्वगंधर्वसेवितः ॥ १२ ॥ देवगंधर्वमूर्तीनांकोटिभिश्वसमावृतः ॥ प्रासादशृंगेवैकुंठः
समतीतोपिशोभनेः ॥ १३ ॥ तत्प्रसादवरारूढंमहादेवंसभूपतिः पूजयामासयत्नेनसंतुष्टहृदयोविधे ॥ १४ ॥ एवंकृत्वा
महेशस्यपूजांयत्नेनभूपतिः ॥ पुत्रेषुराज्यंविन्यस्यकाशींप्रापशिवालिकां ॥ १५ ॥ काश्यांविश्वेश्वरंनित्यंसंपूज्या
त्यंतयत्नतः ॥ नित्यंशिवकथांश्रृण्वन् शिवयात्रापरोभवेत् ॥ १६ ॥ काश्यांशिवैकशरणैःसहनित्यंवसन्नृपः ॥ शै

वधर्मेषु सर्वेषु प्रीतिमानभवत्ततः ॥१७॥ गृहीत्वा शैवदीक्षां च शिवैकशरणोभवत् ॥ शैवो भूत्वा ततो राजा स मोक्षमगमद्विधे ॥१८॥ अतः प्रयत्नतो ग्राह्या शैवदीक्षा मुमुक्षिभिः ॥ ब्रह्मक्षत्रियविट्शूद्रैरन्त्यैश्च विधिपूर्वकं ॥ शिवं मोक्षप्रदं हित्वा यस्त्वन्यं पूजयिष्यति ॥ स दुर्भग इति ज्ञेयः सत्यं सत्यं न संशयः ॥ अशैवो ब्राह्मणा जाता भविष्यंति च भूरिशः ॥ अशैवास्ते भविष्यंति सर्वे नारकिणो विधे ॥२१॥ ॥ ब्रह्मोवाच ॥ ॥ पूर्वं वेदरताः सर्वे शैवा एव स्थिताः द्विजाः ॥ अशैवास्ते कथं जाता भविष्यंति कथं हरे ॥२२॥ ॥ विष्णुरुवाच ॥ ॥ पुरा दुर्भिक्षमभवत् द्वादशाब्दमवर्षणात् ॥ तदानीं गौतमस्याश्रमं प्राप्ताः ऋषयो बहवो विधे ॥२३॥ स गौतमो ऋषीन्दृष्ट्वा तदा दुर्भिक्षपीडितान् ॥ आहारं कल्पयामास तेभ्यः स्वतपसो बलात् ॥२४॥ ततः परं कदाचित्ते गां कृत्वा कृत्रिमां मुने ॥ नीवारभक्षणासक्तां च क्रुस्तां कुटिलाशयाः ॥२५॥ नीवारभक्षणासक्तां गां दृष्ट्वा गौतमस्तदा ॥ तृणेन ताडयामास शनैस्तां गां निवारयन् ॥२६॥ तृणसंबंधमात्रेण साभूमौ पतितैव गौः ॥ गौर्हता गौतमेनेति तदा ते ऋषयो वदन् ॥२७॥ ततः स गौतमो भीतो गौर्हतेति ततः परं ॥ अपश्यत्प्रणिधानेन किमेतदिति सादरं ॥२८॥ तत्कृतां कृत्रिमां ज्ञात्वा तां गां क्रोधसमाकुलः ॥ शशाप तान् ऋषीन्सर्वान् गौतमो ऋषिपुंगवः ॥२९॥ गौतम उवाच ॥ ॥ अद्यप्रभृति वेदोक्ते विभूत्युद्धूलने द्विजाः ॥ माभूयाद्भवतां श्रद्धा धर्मादिफलदायिनी ॥३०॥ अद्यप्रभृति वेदोक्ते केवले भस्मधारणे ॥ माभूयाद्भवतां० ॥३१॥ अद्यप्रभृति वेदोक्ते शुद्धरुद्राक्षधारणे ॥ माभूया० ॥३२॥ अद्यप्रभृति वेदोक्ते केवले शंकरार्चने ॥ माभूया० ॥३३॥ अद्यप्रभृति वेदोक्ते शुद्धे शिवषडक्षरे ॥ माभूया० ॥३४॥ अद्यप्रभृति वेदोक्ते रुद्राध्यायजपे द्विजाः ॥ माभूया० ॥३५॥ अद्यप्रभृति वेदोक्ते शिवरात्रिव्रते द्विजाः ॥ माभूया० ॥३६॥ अद्यप्रभृति वेदोक्ते सोमवारव्रते द्विजाः ॥ माभूया० ॥३७॥ अद्यप्रभृति वेदोक्ते काशीवासेपि मोक्षदे ॥ माभूया० ॥३८॥ अद्यप्रभृति भालानि मृल्लिप्तानि भवंतु वः ॥ माभू० ॥३९॥ पतंतु नरके घोरभाले मृल्लेपतो द्विजाः ॥ भवंतो माभविष्यंतु शिवैकपरदेवताः ॥४० ॥ अन्यदेवसमत्वेन यो ~~जानाति स पापी शिवं~~ जानंतु शिवमद्वयं ॥ न भविष्यति यो लोके शिवैकपरदेवतः ॥४१॥ स याति नरकं

घोरंयावदाचंद्रतारकं॥अन्यदेवसमत्वेनयोजानातिसदाशिवं॥४२॥सवंशकोटिसंयुक्तोयात्येवनरकंध्रुवं॥सर्ववेदांत
संवेद्यःसर्ववेदोत्तमोत्तमः॥४३॥महादेवःसुराराध्यःकथमन्यसमोभवेत्॥त्रिकालशिवपूजायांमाभूयाद्भवतांमतिः
॥४४॥माभूयाद्भवतांप्रीतिःशिवतीर्थनिषेवणे॥माभूयाद्भवतांप्रीतिःशिवनैवेद्यभोजने॥४५॥बिल्वपत्रार्जनेप्रीतिर्माभू
याद्भवतांद्विजाः॥माभूयाद्भवतांप्रीतिःशिवलिंगनिरीक्षणे॥४६॥माभूयाद्भवतांप्रीतिःशिवलिंगाग्रनर्तने॥श्रौतेशिवक
थालापेमाभूयाद्भवतांमतिः॥४७॥श्रौतेमहेशस्मरणेमाभूयाद्भवतांमतिः॥श्रौतेमहेशस्थानेचमाभूयाद्भवतांमतिः॥
४८॥महेशमूर्त्तिषुप्रीतिर्माभूयाद्भवतांद्विजाः॥महेशयात्राकरणेमाभूयाद्भवतांमतिः॥४९॥अद्यदत्तामयाशापायावंतो
दुःखदायकाः॥तावंतःसंतुभवतांसंततावपिसर्वदा॥५०॥अशैवाःसंतुभवतांपुत्रपौत्रादयोद्विजाः॥पुत्रैःसहैवतिष्ठंतुभ
वतोनरकेसदा॥५१॥अंतेभवंतुचांडालादुःखदारिद्र्यपीडिताः॥ ॥विष्णुरुवाच॥ ॥इतिशप्त्वामुनीन्सर्वान्गौतमःस्वाश्रमं
ययौ॥ततस्तेखिन्नहृदयोऋषयोपिगताविधे॥५२॥अतोगौतमशापेनशैवधर्मबहिष्कृताः॥अशैवधर्ममाश्रित्यस्थिता
स्तेऋषयस्तदा॥५३॥तत्सुताश्चाभवन्सर्वेशैवधर्मबहिष्कृताः॥अग्रेतद्वद्भविष्यंतितत्सुताश्चचतुर्मुख॥५४॥अशैवाएवबह
वोभविष्यंतिकलौयुगे॥शिवान्यदेवभक्तिंचकरिष्यंतिभ्रमान्विताः॥५५॥मृत्तिकांलापयिष्यंतिललाटेष्वन्वहंद्विजाः॥द्विजध
मि मेर्वैबिल्वत्यग्रेकरिष्यंतिचवलानं॥५६॥भोजनानिकरिष्यंतिदिवसेसोमवासरे॥शिवरात्रिव्रतत्यागंकरिष्यंतिद्विजाधमाः॥
५७॥क्वचित्क्वचिद्भविष्यंतिशैवाःपरिमिताःकलौ॥अशैवास्तान्हनिष्यंतिमद्यपाइवसर्वदा॥५८॥अशैवायेभविष्यं-
तिमुनिशापहताःकलौः॥तेपतिष्यंतिघोरेषुनरकेष्वनिशंध्रुवं॥५९॥अशैवशासनंकर्त्तुंस्थापितोस्तियमःपुरा॥सतान
शैवान्सततंपीडयिष्यतिसर्वथा॥अशैवान्ब्राह्मणान्दृष्ट्वाक्षत्रियाद्याश्चसर्वथा॥अशांभवाभविष्यंतिनरकावाप्तयेविधे॥६१॥
भूरप्यशांकरव्याप्ताकलौदुःखंकरिष्यति॥अशांकराःशैवधर्मान्नाशयिष्यंतिसर्वदा॥६२॥अशैवधर्ममाश्रित्यस्थास्यंति
तिपुरुषाधमाः॥अप्रीतिजनयिष्यंतिशैवधर्मेषुदुर्भगाः॥६३॥शैवधर्मेषुनष्टेषुमुक्तिदेषुततःपरं॥सुराःसर्वेपिस

४ रुद्राक्षधारणे श्रद्धां न करिष्यंति केवलं ३ ॥ ३ रुद्राध्यायजपे प्रीतिं न करिष्यंति सर्वथा ॥ ६७ ॥ शैवषडक्षरे श्रद्धां न करिष्यंति सर्वथा ॥

ततं भविष्यंत्यतिदुःखिताः ॥ ६४ ॥ अशैववृद्धिर्बहुधा भविष्यति कलौ युगे ॥ शिवपूजाविधाहायैव करिष्यं
०त्यन्यपूजनं ॥ ६५ ॥ शिवान्यदेवताभक्तिं करिष्यंत्यतियत्नतः ॥ शिवनिंदां करिष्यंति शैवनिन्दामपि द्विजाः ॥ ६६ ॥
प्रीतिं शैवपुराणेषु न करिष्यंति सर्वथा ॥ विभूत्युद्धूलने श्रद्धां न करिष्यंति सर्वथा ॥ त्रिपुंड्रधारणे श्रद्धां न करिष्यं
ति केवले ॥ ६९ ॥ अशांभवव्रतष्वेव करिष्यंति मतिं द्विजाः ॥ श्रौते शैवे व्रते श्रद्धां न करिष्यंति सर्वथा ॥ ७० ॥ अश्रौ
ताम्भोजयिष्यंति श्राद्धेषु प्रीतिपूर्वकं ॥ अशैवान्भोजयिष्यंति पर्वकालेषु सादरं ॥ ७१ ॥ अन्येपि शांभवा धर्मा
न चलिष्यंति सर्वथा ॥ अशैवधर्मसंक्रांता भूर्विनष्टा विनश्यति ॥ ७२ ॥ अप्रमप्रमादरहितः कुरु शंकरपूजनं ॥ आलस्यं मा
कुरु ब्रह्मन् महादेवार्चने सदा ॥ ७३ ॥ अस्मद्भाग्यवशात्पूर्वमस्माऽभ्यं गौतमो विधे ॥ शापं न प्रददौ तस्माद्वयं धन्या नसं
शयः ॥ ७४ ॥ अस्माभिरतियत्नेन कर्तव्यं शंकरार्चनं ॥ प्राप्तव्यं शंकरस्थानं योगिनामपि दुर्लभं ॥ ७५ ॥ एकाम्बरेशम
निशं पूजयस्व प्रयत्नतः ॥ अस्माकं जननीं मातां कामाक्षीमपि पूजय ॥ ७६ ॥ ब्रह्मन्नहमुमाकांतमंतकांतकमन्वहं ॥
अर्चयाम्यतियत्नेन पुष्पाद्यैरिष्टदैवतं ॥ ७७ ॥ देवता सार्वभौमो यं शिव एवेष्टदैवतं ॥ अतः प्रयत्नतो नित्यं शिवपू
जां करोम्यहं ॥ ७८ ॥ शिवार्चनं परो धर्मः सर्वधर्मोत्तमोत्तमः ॥ अतः शिवार्चनं कार्यं त्यक्त्वान्यसुरपूजनं ॥ ७९ ॥

शिवार्चनेन संप्राप्यमानंदं परमं पदं ॥ मुक्तिः शिवार्चनेनैव सत्यं सत्यं न संशयः ॥ शिवार्चनेन नश्यंति पातकानि ब
हून्यपि ॥ शिवार्चनेन संप्राप्या धर्माश्च बहवो विधे ॥ ८१ ॥ संसारिणो भविष्यंति शिवलिंगार्चनं विना ॥ दरिद्राश्च भविष्यंति
तथा नारकिणो विधे ॥ ८२ ॥ नित्यं येन करिष्यंति श्रीमहादेवपूजनं ॥ ते भवंत्येव पापिष्ठा जन्मजन्मांतरे विधे ॥ ८३ ॥ सुराप
नादिपापानि यैः कृतानि पुरा सदा ॥ तेषां न भवति श्रद्धा केवले शिवपू[illegible]जनं ॥ ८४ ॥ ब्रह्महत्यादिपापानि यः कृतानि पुरास

दा ॥ तेषां न भवति श्रद्धा केवले भस्मधारणे ॥ ८५ ॥ यैः पातकानि [illegible] कृतानि सततं विधे ॥ तेषां न भवति श्रद्धा श्रुत्येरुद्राक्ष
धारणे ॥ ८६ ॥ किंच किंबहुनोक्तेन ये महापातकाश्रयाः ॥ तेषां न भवति श्रद्धा शैवधर्मेषु सर्वथा ॥ ८७ ॥ ॥ श्रीमहादेव-

उवाच ॥ ॥ इत्युक्तोविष्णुनाब्रह्मा भामेकांबरेश्वरं ॥ संपूज्यातिप्रयत्नेनकांचीवासंचकारच ॥ २८ ॥ ॥ विष्णु
ब्रह्मेंद्रचन्द्रप्रभृतिसुरशिरोरत्ननिर्यत्ननिर्यद्रत्नछायाविरोधिस्फुरदनघनखस्वछकांतिप्रकांतं ॥ यत्तत्पादारविं
दंममनिगमशिरोरत्नभूतंप्रभूतंलक्ष्मीकांताक्षिकांतंगिरिवरतनयेसाधुसंतोभजंति ॥ २९ ॥ ॥ इतिश्रीशिवर
हस्येउग्राख्येसप्तमांशेशिवगौरीसंवादेएकविंशोध्यायः ॥ २१ ॥ श्रीशिवप्र० ॥ श्रीशिवउवाच ॥ ॥ शिवेसुक्षेत्रमस्त्ये
कमरुणाचलनामकं ॥ अरुणाचलनाथस्यस्मरणंमंगलावहं ॥ १ ॥ तत्रसंतिमहाशैवाः शैवशास्त्रविशारदाः ॥ रुद्राक्ष
भस्माभरणाः श्रीरुद्राध्यायजापकाः ॥ २ ॥ तत्रब्रह्मसरोनामसरस्तिष्ठतिशोभने ॥ तत्रैकस्नानमात्रेणमुच्यतेसर्वकिल्बि
षैः ॥ ३ ॥ शिवेमकरसंक्रांतावरुणाचलनामकं ॥ दृष्ट्वाविमुच्यतेपापैरनंतैरपिसर्वथा ॥ ४ ॥ तत्रारुणाचलेशस्यरविसं
क्रमणेशुचिः ॥ एवंप्रदक्षिणंकृत्वापुनर्गर्भंभाग्भवेत् ॥ ५ ॥ विष्णुब्रह्मादयोदेवारविसंक्रमणेशिवे ॥ तत्रारुणाचलशस्यकु
र्वंत्येवप्रदक्षिणं ॥ ६ ॥ अरुणाचलनाथंयोरथारूढंविलोकयेत् ॥ नतस्यभूयः संसारसागरेपतनंशिवे ॥ ७ ॥ वेदास्तुवं
तिसततंअरुणाचलनायकं ॥ मुनयः सिद्धगंधर्वाः स्तुवंतिसततंशिवे ॥ ८ ॥ पुराकश्चिन्महापापीनिर्घृणोलुब्धकः
सदा ॥ ब्रह्महत्यादिपापानिकृत्वाकृतैवसंस्थितः ॥ ९ ॥ सददर्शैकदाशैवान्शिवयात्रापरान्छिवे ॥ ततोबभाषेवचनं
नत्वातान्द्विजसत्तमान् ॥ १० ॥ कुत्रवागम्यतेशैवाः सत्यमद्यवदंतुवः ॥ कः समाराराध्यतेनित्यंभवद्भिः साधुसाधनैः
॥ ११ ॥ ॥ शैवाऊचुः ॥ ॥ अरुणाचलयात्रार्थंगम्यतेस्माभिरादरात् ॥ अन्यत्रकुत्रगंतव्यमस्माभिः शिवदैवतैः
॥ १२ ॥ श्वोमध्यान्हेब्रह्मबंधुर्मकरस्थोभविष्यति ॥ तदारुणाचलेशस्यपूजांकार्याप्रयत्नतः ॥ १३ ॥ अरुणाचलनाथं
यस्तदानीमर्चयेन्मुदा ॥ समहापातकेभ्योपिमुच्यतेनात्रसंशयः ॥ १४ ॥ येनारु–णाचलेशस्यपूजनेनकृतंमुदा ॥
तेनमुक्तिः कथंप्राप्याहरिद्रेणसुखंयथा ॥ १५ ॥ अस्माभिः पूज्यतेनित्यंमहादेवपदांबुजं ॥ यस्मात्पूजयापूर्वंवि
ष्णुर्विष्णुत्वमाप्तवान् ॥ १६ ॥ शिवएवसदापूज्योब्राह्मणानांविशेषतः ॥ ततः शिवान्यदेवानांनार्चनंक्रियतेद्विजैः

॥१७॥ विभूतिधारणंनित्यंब्राह्मणानांयथातथा॥ विभूत्युद्धूलनंनित्यंतथारुद्राक्षधारणं॥१८॥ शिवलिंगा
र्चनंनित्यंरुद्राध्यायजपस्तथा॥ पंचाक्षरजपोनित्यंतद्भक्तेषाभिवादनं॥१९॥ सोमवारव्रतंनित्यंशिवरात्रिव्र
तं तथा॥ शिवयात्रादिकंनित्यंमहेशस्मरणंतथा॥२०॥ इमानिनित्यकर्माणिकुर्वन्नित्यमतंद्रितः॥ यस्तिष्ठ-
तिसदाविप्रःसमुक्तिभवतिध्रुवं॥२१॥ भूषितोभस्मनानित्यंरुद्राक्षैरपिभूषितः॥ यःपूजयेन्महादेवंससमाप्नोतिशं
करं॥२२॥ शिवलिंगार्चनंकुर्वन्महापापैःप्रमुच्यते॥ शिवलिंगार्चनंकार्यंभस्मधारणपूर्वकं॥२३॥ शिवलिंगा
र्चनंकुर्वन्भस्मधारणपूर्वकं॥ नरोनलिप्यतेपापैःपद्मपत्रमिवांभसा॥२४॥ इत्युक्तंतद्वचःश्रुत्वासपापीतैर्द्विजैः
सह॥ अरुणाचलयात्रार्थंययौसंतुष्टमानसः॥२५॥ ततोब्रह्मसरस्यादौस्नात्वासंतर्प्यचातिपिंन्॥ अरुणा
चलनाथस्यचक्रेपूजांसपातकी॥२६॥ ततोरुणाचलेशस्यसचकारप्रदक्षिणं॥ सददर्शततस्तत्ररथा
रूढंमहेश्वरं॥२७॥ सनतस्तत्रविजहौप्राणान्निर्मुक्तपातकः॥ ततोममांतकंप्रापसएववरवर्णिनी॥२८॥ अरुणाचल-
नाथस्यमहिमाहिमहान्शिवे॥ वक्तुंनशक्यतेदेविमहिमातस्यसर्वथा॥२९॥ धन्याःपूज्यतमानित्यमरुणाचल
वासिनः॥ कीटादयोपितत्रस्थाःशिवरूपानसंशयः॥३०॥ तत्रपूर्वमभूद्राजाकश्चिद्भीमेश्वराभिधः॥ तस्यप्रभावंःव
क्ष्यामिश्रृणुसादरमंबिके॥३१॥ सतुपूर्वभवेविप्रोदरिद्रोव्याधिपीडितः॥ तेनदुष्टानिपापानिकृतानिचमुहुर्मुहुः॥३२॥
दुष्टप्रतिग्रहासक्तःसर्वदापापचिंतकः॥ दुष्टवित्तापहरणेसर्वदासक्तमानसः ईदृशःसतुपापिष्टःकदाचिद्विपि
नंययौ॥ शाकादिकंसमानेतुमुपस्थायशोभने॥३४॥ तत्रापश्यद्बिल्ववृक्षंनवपल्लवसंयुतं॥ लिंगंचापश्यदम
लंतत्रनार्मदंमुत्तमं॥३५॥ ततःसचिंतयामासदृष्ट्वाबिल्वतरुंद्विजः॥ लिंगंचनार्मदंदृष्ट्वाकिंकर्त्तव्यमितिप्रिये॥३६॥
एतस्मिन्नंतरेकालेतस्यपत्नीसमागता॥ तांदृष्ट्वासुदतींभार्यामुवाचेदंद्विजस्तदा॥३७॥ ॥ द्विजउवाच॥ ॥
अयिभार्येमयापूर्वंबहुधापातकंकृतं॥ तत्पापनाशकनापिनविनाशंकरार्चनं॥ एतादृशानिदानानिगृहीतानिम्र

याप्रिये ॥ यद्दानग्रहणेनैवनभूयः पुरुषोभवेत् ॥ ३९ ॥ तुलाद्रव्यंमयापूर्वंबहुधाभक्षितंमुदा ॥ तत्फलंनर
कावासः सत्यंसत्यंनसंशयः ॥ ४० ॥ वणिगासीत्पुराकश्चित्तेनस्वर्णतुलाकृता ॥ तद्द्रव्येणाभवत्पूर्वंजीवनं
मासपंचकं ॥ ४१ ॥ शूद्रेणकेनचित्पूर्वं प्रियेस्वर्णतुलाकृता ॥ तद्द्रव्येणाभवत्पूर्वंजीवनंमासपंचकं ॥ ४२ ॥
कियत्कालंमयापूर्वंवणिक्दत्तधनैः प्रिये ॥ कृतमत्यंतयत्नेनस्वकुटुंबस्यपोषणं ॥ ४३ ॥ वणिग्दत्तेनवित्तेन
तनुयः पोषयिष्यति ॥ सभुक्त्वानरकंघोरंतिष्ठत्येवनसंशयः ॥ ४४ ॥ गोर्गृहीताराजदत्ताशिवक्षेत्रेमयापु
रा ॥ गृहीतागोः शिवक्षेत्रेवणिक्दत्तापिसादरं ॥ ४५ ॥ शिवक्षेत्रेगृहीत्वागांयावद्रोमसंख्यया ॥ पतंति
घोरनरकेदारुणेदुःखदायके ॥ एतादृशानांपापानांनिष्कृतिः शिवपूजया ॥ भविष्यतिनसंदेहः श्रुतिरेवा
त्र [illegible]कारणं ॥ ४७ ॥ अतः परंमयात्रैवस्थातव्यमतियत्नतः ॥ अत्रैवशंकरंनित्यंअर्चयिष्यामिसादरं ॥ ४८ ॥
संत्यत्रबिल्वतरवोनवपल्लवसंवृताः ॥ लिंगंचनार्मदंतिष्ठत्यर्चनादिष्टदायकं ॥ ४९ ॥ संसारदुःखंबहुधाभुक्त
मेवमयापुरा ॥ सुखलेशोपिनास्त्येवसंसारेदुःखसागरे ॥ ५० ॥ स्रवन्मूत्रपुरीषाढ्येशरीरेदुःखसाधने ॥ कः प्री
तिंकुरुतेमूढोमलकूपइवान्वहं ॥ ५१ ॥ एतावत्कालपर्यंतंभ्रमणेवास्थितंमया ॥ नाराधितोमहादेवोविष्णु
ब्रह्मादिवंदितः ॥ ५२ ॥ अद्यनार्मदलिंगस्यदर्शनादिदृशीमतिः ॥ ममजातामहद्भाग्यंममनास्त्यत्रसंश
यः ॥ ५३ ॥ इतः शाकादिकंनीत्वाग्रामेनानाजनाश्रये ॥ स्थित्वाकिमन्यत्कर्तव्यमतोत्रैववसाम्यहं ॥ ५४ ॥
ग्रामेसंसारिणः संतिवहवोमोहसंकुलाः ॥ तद्दर्शनेचित्तवृत्तिरन्यथेयंभविष्यति ॥ बिल्ववृक्षौघसंवी
तेस्थातव्यंनिर्जनेवने ॥ कर्तव्यंदेवदेवस्यमहादेवस्यपूजनं ॥ ५६ ॥ अनभ्यर्च्यमहादेवंयदित्यक्षेततनुंतदा ॥
आचंद्रार्कमघोरेषुनरकेषुवसाम्यहं ॥ ५७ ॥ अनर्चितमहादेवैर्नरकेस्थीयतेसदा ॥ अतः प्रयत्नेनतः
कार्यंमयाशंकरपूजनं ॥ ५८ ॥ शंकरेभ्यर्चितेनित्यंनश्यंत्यघ ॥ कुलानिहि ॥ धर्मार्थकाममोक्षश्चलभ्यतेरव

व

वं

त्सुसर्वदा ॥५९॥ ॥श्रीशिव उवाच॥ ॥इति निश्चित्य नियतस्तत्रैव सवने द्विजः॥ उवास भार्यासहितः संत्य
ज्यग्राम वासनां ॥६०॥ तदा प्रभृति तत्रैव सभार्यः संवसन् द्विजः॥ पूजयामास सततं नार्मदं लिंगमुत्तमं ॥६१॥
चकार कुंडममलं तस्य लिंगस्य संनिधौ ॥ तत्र स्नात्वा महादेवं पूजयामास मां सदा ॥ ६२॥ अभिषिच्य म-
हादेवं तत्कुंडस्थोदकैः समं ॥ पूजयामास यत्नेन बिल्वपत्रैः समाहितः॥६३॥ स्वहस्तलब्धैरछिद्रैर्बिल्व
पत्रैः समाहितः॥६३॥ स्वहस्तलब्धैरछिद्रैर्बिल्वपत्रैर्नवारुणैः॥ पूजयामास मां भक्त्या शिवलिंगस्वरू
पिणं ॥६४॥ एवं संपूज्य यत्नेन मामन्वहमनामयं ॥ प्रदक्षिणनमस्कारान्स चकार स्तुतिं तथा ॥६५॥ ततः
सकंदमूलादि किंचित्संपाद्य सादरं ॥ मह्यं निवेद्य यत्नेन तेनाहारमकल्पयन् ॥६६॥ एवं संपूज्य यत्नेन तेन मा
सद्वयं स्थितं ॥ ततः स तत्र विजहौ तनुं तल्लिंगसंनिधौ ॥ ६७॥ तत्सत्यपि मृता तत्र वने भर्तृचिदग्निना ॥ ततः
स संवसत्स्वर्गे बहुकालं मदाज्ञया ॥६८॥ ब्रह्मलोके स्थितं तेन ततः कल्पावधि प्रिये ॥ ब्रह्मणा पूजितेनैव भक्ति
श्रद्धापुरःसरं ॥ ६९॥ ततः स बलिचक्रस्य भूपालस्याभवत्सुतः॥ जातो जातिस्मरो भूत्वा चिंतयामास मामज
॥७०॥ पार्वती उवाच ॥ ॥ महादेव कृपासिंधो विष्णुर्ब्रह्मादिवंदितः॥ गर्भवासः कथं जातस्तद्वक्रस्य वद स्व
मे ॥७१॥ गर्भवासो ति दुःखाय दुःखं पापसमुद्भवं ॥ तस्मात्तत्कथमभूत्तस्य विप्रस्य शंकर ॥७२॥ त्वदर्चनेन
नष्टानि तस्य पापानि महेश्वर ॥ पुनः पापेन संबंधः कथमासीद्वद प्रभो ॥७३॥ त्वदर्चनेन संदग्धा महापातकपर्वताः॥
ते पुनष्टेषु पापानि पुनः क्वास्य वद स्व मे ॥७४॥ बिल्वपत्रेण संपूज्य सकृदप्यघहं हरं ॥ सर्वपापविनिर्मुक्ताः
शिवं यांतीति हि श्रुतिः॥७५॥ क्व शिवार्चनपर्यंतपातकानामवस्थितिः॥ शिवेति स्मरणादेव नश्यत्यघकुलं
यतः॥७६॥ यः शिवं पूजयेद्भक्त्या स मुक्तः पापकोटिभिः॥ शिवरूपं प्रयातीति श्रुतिरत्र बलीयसी ॥७७॥
॥श्रीईश्वर उवाच॥ ॥गिरिजे बलिचक्रस्य ललाटात्स दुरासदः॥ तममन्यत भूपालः पुत्रत्वेन तदा ध्रुवं ॥७८॥

प्रादुरासीद्यदादेवीसभालात्तस्यभूपतेः॥ तदादुंदुभयोनेदुःपुष्पवृष्टिरभूत्तदा ॥७९॥ प्रादुर्भूतःसभूपृ
ष्टेध्यानस्तिमितलोचनः॥ सस्मारत्वकृतांपूजांलिंगेबिल्वदलादिभिः॥८०॥ आनंदाश्रुलवाकीर्णस्मरन्मा
मीशमव्ययं॥ उवासासायममलःकंपयन्नवनीतलं॥ ८१॥ तंविलोक्याश्रुपूर्णाक्षंसराजाविस्मयंगतः॥ गौ
तमायसमाचख्यौवार्त्तामेनामशेषतः॥८२॥ गौतमःसत्ततोगत्वाबालकंवीक्ष्यसादरं॥ जगादत्तस्यवृत्तांतम
शेषंप्रणिधानतः॥८३॥ ॥ गौतमउवाच॥ ॥ राजन्नयंपुराविप्रोमहापापगणाश्रयः॥ अनेनैतादृशे
नैवपूजितःपार्वतीपतिः॥८४॥ ततस्तनुंजहौसोहंश्रीवल्लिंगस्यसंनिधौ॥ स्वर्गलोकेस्थितंपूर्वमनेनतदनं
तरं॥८५॥ ब्रह्मलोकेस्थितंराजन्नाकल्पंशिवपूजनात्॥ ललाटात्प्रादुरासीत्तेतवभाग्यवशान्नृप॥८६॥ इत्यु
क्तंतद्वचःश्रुत्वाबालकःशीघ्रमुत्थितः॥ ननाममुनिशार्दूलंगौतमंशैवपुंगवं॥८७॥ ॥ बालकउवाच॥ ॥
भस्मोद्धूलितसर्वांगरुद्राक्षाभरणप्रिय॥ शिवलिंगार्चकश्रीमन्शैवोत्तममुनीश्वरः॥८८॥ तत्वज्ञोसिव
रेण्योसिशिवार्चनपरायणः॥ किंकर्त्तव्यंमयानित्यंवदनिश्चित्यसादरं॥८९॥ ॥ गौतमउवाच॥ ॥ धन्यो
सिकृतकृत्योसिसफलंतवजीवितं॥ सफलंजन्मतेबालधन्योयंजनकस्तव॥९०॥ बलिचक्रोभवेद्धढःश
रीरंचातिदुर्लभं॥ अतःपरंप्रयत्नेनकुरुराज्यस्यपालनं॥९१॥ किंचभस्मोद्धूलितांगःकुरुशंकरपूज-
नं॥ शिवस्याभ्यर्चनेनैवजातिस्मृतिरभूत्तव॥९२॥ जातिस्मरत्वंभूपत्वंलावण्यंचशिवार्चनात्॥ संप्राप्यते
नलब्ध्वामुक्तिश्चांतेनसंशयः॥९३॥ कस्तिष्ठतिमहादेवात्परःकामितार्थदः॥ अतोन्वहंप्रयत्नेनपूजयस्वस
दाशिवं॥९४॥ यस्यप्रसादलेशेनविष्णुर्विष्णुत्वमाप्तवान्॥ तादृशःशंकरःपूज्योब्रह्मविष्ण्वादिवंदितः॥९५॥
यस्यप्रसादलेशेनब्रह्माब्रह्मत्वमाप्तवान्॥ तादृशःशंकरःपूज्योब्रह्मविष्ण्वादिवंदितः॥९६॥ ऋतंसत्यंपरंब्रह्म
पुरुषंकृष्णपिंगलं॥ ऊर्ध्वरेतंविरूपाक्षंविश्वरूपंभजाम्यहं॥९७॥ विष्णुब्रह्मेंद्रचंद्राद्याःसेवकोयस्यशूलिनः॥

तमेवदेवदेवेशंभजशंकरमन्वहं ॥९८॥ यतोवाचोनिवर्त्तंते अप्राप्यमनसासह ॥ तमेवदेवदेवेशंभज
शंकरमन्वहं ॥९९॥ यस्यविश्वासपवनावेदाःसर्वेपिश्वलिनः ॥ तमेवदेव० ॥१००॥ योमतीनामभूत्तातःश्रा
चीनाथस्ययःपिता ॥ तमेवदेव० ॥१॥ यश्चतुर्वक्त्रजनकोयोविष्णोर्जनकःप्रभुः ॥ तमेव० ॥२॥ योध
र्माद्यर्थफलदोयोगौरीप्राणवल्लभः ॥ तमेवदेव० ॥३॥ योवेदांतोघमृग्यात्मायोवेदांतशिरोमणिः ॥ तमे
व० ॥४॥ योविष्णुमौलिमंदारमकरंदार्द्रपादुकः ॥ तमेवदेवदे० ॥५॥ कंदर्पदर्पदमनोयोनित्योयोमनोन्म
नः ॥ तमेवदेव० ॥६॥ विदारिनृसिंहोयोव्योममहाविष्णुनाशकः ॥ तमेवदेवदे० ॥७॥ यतःसर्वमभूद्विश्वं
जगदेतच्चराचरं ॥ तमेवदेवदे० ॥८॥ मद्भयाद्वत्तेवातोयद्भीत्योदेतिभानुमान् ॥ तमेवदेवदे० ॥९॥ यद्भ
यानलेंद्रोद्भौस्वस्वकर्मणितिष्ठतः ॥ तमेव० ॥१०॥ यद्भयेनमहाविष्णुःकंपमानोधितिष्ठति ॥ तमेव०
॥११॥ यद्भयेनचतुर्वक्त्रःकंपमानोधितिष्ठति ॥ तमेव० ॥१२॥ योअग्नावोषधीष्वप्सुविश्वंव्याप्याधि
तिष्ठति ॥ तमेव० ॥१३॥ योनंतोनिष्कलोनन्योनिर्गुणोनिरुपाधिकः ॥ तमेव० ॥१४॥ यःसर्वकर्त्तासर्वा
त्मासर्वव्यापीसदाशिवः ॥ तमेवदे० ॥१५॥ त्रिकालमप्रमादेनशिवमर्चयसादरं ॥ कुरुभस्मोद्धूलनादिकुरु
रुद्राक्षधारणं ॥१६॥ गृहाणशांभवींदीक्षांमोक्षार्थमपियत्नतः ॥ मोक्षस्तुनभवत्येवविनाशांभवदीक्षया ॥
१७॥ संन्यासयोगाद्यतयःशुद्धसत्वानिरामयं ॥ प्राप्यब्रह्मामृतंतस्मान्निवृत्तानभवंतिहि ॥१८॥ संन्यास
योगोविज्ञेयोयादीक्षाशांभवीमता ॥ सादीक्षाकेवलाप्युद्धासन्यासइतिगीयते ॥१९॥ वक्ष्येशांभवदीक्षा
याःश्रृणुलक्षणमप्यहं ॥ यद्दीक्षायामोक्षलक्ष्मीरदूरस्थाभविष्यति ॥२०॥ आपादमस्तकंकार्यंभस्मनो
द्धूलनंसदा ॥ त्रिपुंड्रधारणंकार्यंललाटादिषुभस्मना ॥२१॥ रुद्राक्षधारणंकार्यंअप्रमादेनसंततं ॥ लिंगपू
जैवकर्त्तव्याकेवलासर्वसाधनैः ॥२२॥ वेदावतंसःसततंजप्यःशैवःषडक्षरः ॥ रुद्राध्यायजपःकार्यःशि

बमंत्रसमाश्रयः॥२३॥ देवतासार्वभौमोयःसर्वदेवशिखामणिः॥ सएवसर्वदाध्येयःपार्वतीरमणःप्रभुः॥२४॥ सदाभस्म
वताभाव्यंसदारुद्राक्षधारिणा॥ श्रौतरुद्राक्षभस्माभ्यांप्रच्युतःपतितोभवेत्॥२५॥ शैवव्रतानिकार्याणितत्तत्कालेषुसा
दरं॥ शैवव्रतपरिभ्रष्टोभ्रष्टएवभविष्यति॥२६॥ दृशशैवव्रतान्याहुर्जाबालश्रुतिपारगाः॥ तानिव्रतानियत्नेनकार्याण्ये
वद्विजैःसदा॥२७॥ प्रत्यष्टम्यांप्रयत्नेनकर्त्तव्यंनक्तभोजनं॥ कालाष्टम्यांतुतत्याज्यंभोजनंयत्नपूर्वकं॥२८॥ अवश्यंसितभू
तायांकर्त्तव्यंनिशिभोजनं॥ असितायांतुभूतायांतन्नकार्यंद्विजातिभिः॥२९॥ एकादश्यांसितायांतुत्याज्यंभोजनमास्तिकैः
॥ असितायांतुभोक्तव्यंनक्तमभ्यर्च्यशंकरं॥३०॥ त्रयोदश्यांतुभोक्तव्यंरात्रावेवप्रयत्नतः॥ शिवलिंगार्चनंकृत्वास्वशक्त्या
यत्नपूर्वकं॥३१॥ निशियत्नेनकर्त्तव्यंभोजनंसोमवासरे॥ उपोषणादिनान्यस्मिन्दिवसेनियमोह्ययं॥३२॥ पर्वण्यपिदिने
त्याज्यंभोजनंसोमवासरे॥ किमुतान्येषुदिवसेष्विति जाबालवादिनः॥३३॥ ससोमासितभूतायासार्द्रापा
तसमन्विता॥ तस्यामुपोषणंकार्यंनिशिजागरणेतथा॥३४॥ भोजनीयःप्रयत्नेनशैवःशक्तिपुरःसरं॥
शिवार्चनंविनाकालोनवेयोद्विजजन्मभिः॥३५॥ व्रतान्येतानिनियमात्कर्त्तव्यानिद्विजन्मभिः॥ व्रतान्येतानितु
त्यक्त्वाभवंतिपतिताद्विजाः॥३६॥ एतावंतःशैवधर्माःशिवदीक्षेतिगीयते॥ एतद्दीक्षापरिभ्रष्टाःपतंतिनरके
ध्रुवं॥३७॥ नयस्यशांभवीदीक्षातस्यामोक्षोपिदुर्लभः॥ सत्यंसत्यमितिप्राहजाबालःस्वयमास्तिकः॥३८॥ यस्तु
शांभवदीक्षायांसंसक्तहृदयोद्विजः॥ तमर्चयंतिसर्वेपिविष्णुब्रह्मादयोसुराः॥३९॥ द्विजत्वमपिसंप्राप्यशैवदीक्षा
पराङ्मुखाः॥ येभविष्यंतितेसर्वेयास्यंतिनरकेध्रुवं॥४०॥ अशांभवाभविष्यंतिप्रायेकलियुगेद्विजाः॥ तेगमिष्यंतिन
रकंयावदाचंद्रतारकं॥४१॥ अशांभवार्थंसृष्टानिनरकाणिपुरायतः॥ ततएवहितेयांतिनरकेषुस्वभावतः॥
४२॥ अशांभवगृहाज्ञेयानरकाणितथासति॥ अशांभवाःप्रयांत्येवंस्वगृहान्प्रतिसत्वरं॥४३॥ अशांभवा
न्क्रमेणापिमाविलोकयसर्वथा॥ यदिपश्यसिमोहेनतदासूर्यंविलोकय॥४४॥ अशांभवान्द्विजान्सर्वा

नशूलेष्वारोपयादरात्॥अशैवानांहनने पातकंनभविष्यति॥४५॥शैवधर्मपरिभ्रष्टादुष्टाएवद्विजास्त
तः॥दुष्टशिक्षापरोधर्मोराज्ञांभवतिसर्वथा॥४६॥शैवमध्येवसप्रीत्याशैवान्योषयसर्वदा॥शैवानेवार्चयप्री
त्याशैवानेवविलोकय॥४७॥शिवालयानियत्नेनकारयस्वयथोचितं॥बहिर्बिल्ववनान्येवकारयस्वप्रय
त्नतः॥४८॥बिल्वपत्राणिसततंत्वमेवाहरमादरं॥आहृत्यबिल्वपत्राणिपूजयस्वसदाशिवं॥४९॥अनभ्यर्च्यम
हादेवंमामाभुंक्ष्वप्रमादपि॥शिवतीर्थमपीत्वापीमामाभुंक्ष्वकदाचन॥५०॥कुरुयत्नेनसततंमहादेवनिरीक्षणं॥
कुरुयत्नेनसततंशिवमंत्रजपंसदा॥५१॥सर्वदानीलकंठेतिमहादेवेतिसंवद॥हृदिशंकरमाराध्यध्यात्वासंवस
सर्वदा॥५२॥रुद्राक्षैर्भस्मनानित्यंभूषयस्वस्वकंवपुः॥यदापुत्राभविष्यंतितदातानखिलानपि॥५२॥शिवनामां-
कितानेवकुरुयत्लेनसादरं॥तानप्यवश्यंयत्नेनशोभवान्कुरुसादरं॥५३॥प्रत्यहंशिवपूजायांनियोजयनृपाल
जान्॥यदान्नफलदध्यादिभोक्तव्यंतेभविष्यति॥५४॥तदातोकनमःसोमेत्यादिमंत्रान्पठक्रमात्॥हावुहावुहा
वुइत्यादिमंत्रान्पठततःपरं॥५५॥अंगुष्ठमात्रःपुरुषोयोंगुष्ठंचसमाश्रितः॥ईशःसर्वस्यजगतःप्रभुःप्रीणातिविश्व
भुक्॥५६॥इतिवैदिकमंत्रेणशिवायान्नंनिवेदय॥शैवेभ्योप्यमुनान्नानिमनुनैवनिवेदय॥५७॥ततःप
रंतुश्रद्धायामित्यादिमनुपंचकं॥प्रत्येकंसमनूद्यैवततःप्राणाहुतिंकुरु॥५८॥ततःपरमुमाकांतंकवलेक
वले॰॰स्मर॥मध्येजलादिपानेपिस्मरसांबंमहेश्वरं॥५९॥स्मरन्हृदिमहादेवंकुरुमौनेननभोजनं॥वक्तव्यं
यदिमध्येस्यात्तदाशिवकथांवद॥६०॥भुंक्ष्वशैवैःसाहन्नानिपिबशैवैःसहामृतं॥वसशैवैःसदाप्रीत्या
यजशैवैःसहेश्वरं॥६१॥शृणुशैवकथांनित्यंघोरपातकनाशिनीं॥वदशंकरशर्वेशमहादेवेतिसर्वदा॥६२॥अयं
द्विजातिमात्रस्यधर्मोत्रसमुदीरितः॥ब्रह्मक्षत्रियवैश्यानामेषधर्मःसनातनः॥६३॥शैवक्षेत्रमिदंज्ञेयंअरुणाच
लनामकं॥अरुणाचलनाथस्यत्रिकालंकुरुपूजनं॥६४॥अशैवानांशिवक्षेत्रेप्रवेशोनयथातथा॥कुरुदेवादागतास्ता

न् प्राणैरेव वियोजय॥६५॥ वाजपेयफलं प्राप्य मशैवानां विनाशने॥ अशैवनाशनं पुण्यं परमो धर्म उच्यते॥६६॥ शै
वधर्मेषु सततं निष्णातो भव सर्वथा॥ शैवमेवार्चय प्रीत्या शिवैकपरदैवतः॥६७॥ त्रियंबकं देवदेवं भज संततमा
दरात्॥ त्रियंबकेति मंत्रेण यः पूजयति शंकरं॥ स सर्वांल्लभते कामानिति जाबालवादिनः॥६९॥ त्रियंबकैर्वि
कशारणान् सांबकानिति मन्महे॥ निरंबकान्मन्महे हं त्रियंबकपराङ्मुखान्॥७०॥ ॥सदाशिव उवाच॥ ॥
इत्युक्त्वा पूजितो राजा गौतमः स्वाश्रमं ययौ॥ तदा प्रभृति मत्पूजानिपतो बालकोप्यभूत्॥७१॥ तसितातंसु
तं दृष्ट्वा कृतकृत्यममन्यत्॥ स्वात्मानमपि भूपाल्लो कृतकृत्यममन्यत॥७२॥ ततस्तस्मिन्सुते राजन्निवेद्य
स्वयमादरात्॥ गृहीत्वा शांभवीं दीक्षां तत्रैवोवास संततं॥७३॥ तत्पुत्रस्याभवत्प्रीतिर्महादेवे मयि प्रिये॥ म
यि प्रीतिर्यथा तस्य तथा नान्यत्र सर्वथा॥७४॥ स नानादेशराजन्यो जगृहे कन्यकाः शुभाः॥ यो यो ददाति तां तां
वै स गृह्णात्येव कन्यकां॥७५॥ एवं गृहीत्वा वसतस्तस्य लक्षं मनोरमाः॥ जाया बभूवुरमलरूपलावण्यशोभि
ताः॥७६॥ शिवाग्रे नर्त्तनायैताः पत्न्यः स विनियोजयत्॥ नियोजिताः स्त्रियस्ताश्च चक्रुर्नर्तनमादरात्॥७७॥ पत्रि
कालं नर्त्तनं कृत्वा पत्न्यस्ताः साधशिक्षिताः॥ संपूज्य शंकरं नित्यं मां यांति सदनं प्रति॥७८॥ गायंति त्वामभैवाग्रे
प्रतिवासरमंबिके॥ ताः सर्वदापि मत्पूजां यत्नात्कृत्वैव संसंस्थिताः॥७९॥ एकैकस्या पंच पंच पुत्रास्तस्याभव
न्छिवे॥ मन्नामचिन्हितांश्चक्रे स पुत्रानखिलानपि॥ स तान्छांभवदीक्षायां विनियोजयदादरात्॥ पुत्रास्तस्याभ
वन्सर्वे मदर्चनपरायणाः॥८१॥ शिवव्रतानि सततं तैः कृतानि प्रयत्नतः॥ दृष्ट्वा तान्ब्रह्मविष्ण्वाद्याभीता एव स्थिताः
सदा॥८२॥ ब्रह्मलोकादिलोकेषु स्थितं तैस्तु कदाचन॥ कदाचिद्बालकैस्तैस्तु पृथिव्यामेव संस्थितं॥८३॥ सर्वलोकेय
दा बालास्ते गताः सादरं तदा॥ तानिंद्रः पूजयामास बृहस्पतिसमन्वितः॥ कदाचित्ते गताः पूर्वं सत्यलोके नृपात्मजाः॥ तदा
ब्रह्मा समुत्थाय चक्रे तत्पूजनं मुदा॥८४॥ कदाचित्ते गताः पूर्वं विष्णुलोके नृपात्मजाः॥ तदा विष्णुः समुत्थाय चक्रे तत्पूजा

नंमुदा॥८५॥ईदृशास्तेसदाबालामहाराधनतत्पराः॥स्थिताएवातियत्नेनशैवव्रतपरायणाः॥८६॥तस्याभवज्ज्ये
ष्ठपुत्रश्चंद्रमौलिरितिश्रुतः॥सददर्शबहिर्ग्रामान्मृद्भालंब्राह्मणंवने॥८७॥ततःपरमशैवोयंमयादृष्टइतिप्रिये॥जघानत
च्छिरःसद्यःशस्त्रमुत्पाद्यवीर्यवान्॥८८॥ततोस्ययातनाकावामृद्भालस्यभविष्यति॥इतिज्ञातुंययौशीघ्रंधर्मराजनि
केतनं॥८९॥ततस्तमागतंवीक्ष्यचंद्रमौलिंनृपोत्तमं॥अभ्युत्थायप्रयत्नेनचक्रेपूजांतदायमः॥९०॥ततःपरंसमानीतः
समृद्भालोद्विजोभटैः॥तंवीक्ष्यकालस्तदनुचित्रगुप्तमुवाचच॥९१॥ ॥यमउवाच॥ ॥किमनेनकृतंपापंतत्सर्वंवदत
त्वतः॥यद्ययंघोरपापीस्यात्तदाभुंजतुयातनां॥९२॥इत्युक्तंतद्वचःश्रुत्वाचित्रगुप्तोविचक्षणः॥विचारपूर्वकंप्राहवचनं
वाग्विशारदः॥९३॥ ॥चित्रगुप्तउवाच॥ ॥अधीतवेदशास्त्रोयंकृतयागश्चसादरं॥एतादृशोप्ययंभालेमृल्लापयतिमो
हतः॥९४॥यद्येकदापिविप्रःसन्मृद्भालेलापयिष्यति॥तदाविप्रसमाप्नोतिब्रह्महत्यांनसंशयः॥९५॥मोहेनापिमृदंयस्तु
ललाटेलापयेत्सदा॥सभुंक्तेयातनांघोरांयावदाचंद्रतारकं॥९६॥बहुकालमयंभालेमृत्तिकांलापयत्यतः॥एतस्यनर
काद्घोरात्सर्वथानास्तिनिष्कृतिः॥९७॥अधीतसर्ववेदोपियोमृद्भालोभविष्यति॥सयातिघोरनरकंसत्यंसत्यंनसंशयः॥९८॥
यदिभुंक्तेभ्रमेणापिब्राह्मणोभस्मनाविना॥ससद्यएवभवतिब्राह्मण्यात्प्रच्युतोयम॥९९॥मृत्तिकास्नानकालेषु
भस्मयुक्तेनसादरं॥लापनीयातिर्यगेननोर्ध्वंसत्यंमयोच्यते॥१००॥मोहेनापिललाटादौमृत्तिकांनैवलापयेत्॥
सत्यमेतत्पुनस्सत्यमितिजाबालवादिनः॥१॥ऊर्ध्वपुंड्रंनधर्तव्यंमोहेनापिद्विजैर्यम॥त्रिपुंड्रमेवधर्तव्यंसर्ववेदांत
संश्रुतं॥२॥त्यक्त्वात्रिपुंड्रंयःकुर्याद्द्विजोदानानिकोटिशः॥सनतत्फलमाप्नोतिनरकंचाधिगच्छति॥३॥यातनास्वति
घोरासुप्रत्यहंपात्यतामयं॥एतस्मिन्नदयाकार्यासत्यमेवोच्यतेमया॥४॥ ॥श्रीईश्वरउवाच॥ ॥इत्युक्तंतद्वचःश्रुत्वा
यमःसत्वरमास्तिकः॥५॥पातयामासतंशीघ्रंवन्हिकुंडादिषुक्रमात्॥सचंद्रमौलिस्तंदृष्ट्वापतितंनरकालये॥६॥हृष्टः
स्वनगरंप्रापपूजितःसन्यमादिभिः॥चंद्रमौलिर्विहारार्थंयदायातिबहिस्तदा॥मृद्भालान्ब्राह्मणान्दृष्ट्वाताडयामा

सचाश्रुगैः॥अशैवानांवधंकृत्वाचंद्रमौलिप्रयत्नतः॥८॥अशैवपुत्रपौत्राहीनपिशासयतिस्फुटं॥यावंतो
निहंताभूमावशैवास्तत्सुतैःशिवे॥९॥तावतांगणनाकेनकर्त्तव्यासावधानतः॥अशैवशत्रून्स्तान्दृष्ट्वातसिता
हृष्टमानसः॥तदाकृतार्थमात्मानममन्यंतगिरींद्रजे॥शैवव्रतपराजाताःपुत्राःसर्वेममेदृशाः॥११॥इतोधिकेमहद्भा
ग्यंकस्यवाभुविविद्यतेति॥एकोपियदियदृशःशांभवोभवतिसुतः॥१२॥सोपिवानुत्तमोवंशोयतःशांभव
वान्स्वयं॥पंचलक्षममीपुत्राःममसर्वेपिशांकराः॥१३॥ममभाग्यस्यकिंन्यूनंधन्योहंनात्रसंशयः॥सर्वभू
चक्रनाथत्वंशांभवत्वंचसर्वथा॥अनल्पपुत्रवत्वंचमयाप्राप्तंशिवार्चनात्॥शिवःकृपालुर्देवेशोमह्यंभा
ग्यंकथंददौ॥१५॥बहुकालंपूजनंचनकृतंसाधुसाधनैः॥मासद्वयंबिल्वपत्रैःपूजितःपार्वतीप्रभुः॥१६॥
कथमेतादृशंभाग्यंददौमह्यमनामयं॥यदिवतारमात्रंचेत्पूजितःशंकरस्तदा॥१७॥ददातिकीदृशंभाग्यंत
न्नविज्ञायतेमया॥एतादृशंकृपासिंधुंशंकरंलोकशंकरं॥१८॥येनार्चयंतितेमूढासत्यंसत्यंनसंशयः॥
शंकरस्यार्चनंपुण्यमिहामुत्रफलप्रदं॥१९॥कार्यंशिवार्चनंनित्यमिहामुत्रसुखार्थिभिः॥कृतानंतम
हापापोप्यभ्यर्चयतियःशिवं॥२०॥समुक्तपातकोमर्त्योराज्यंमोक्षंचविंदति॥मृतपुत्राणांगतिर्निर्त्यंब्रह्म
लोकेप्यविघ्नता॥२१॥ईदृशंहिमहद्भाग्यंप्राप्तंशंकरपूजया॥जातिस्मरत्वंबहुपुत्रतांचभूचक्रनाथत्वमखंडि
श्री तंच॥२२॥मोक्षंचदातुंशिवएवसक्तःसत्यंपुनस्सत्यमिदंचसत्यं॥कःशंकरान्योवितरेत्तभाग्यंकःशंकरान्यो
वितरेत्तभाग्यं मोक्षं॥२३॥कःशंकरान्यस्तनुतेसुखानिकःशंकरान्योविधिविष्णुसेव्यः यत्पादपद्मंनिगमांत
८ वेद्यंयत्पादपद्मंविधिविष्णुमुनिवृंदवंद्यं॥२४॥यत्पादपद्मंविधिविष्णुवंद्यंतत्पादपद्मंशरणंव्रजामि॥यत्पादप
द्मांबुजमादिविष्णुःस्वनेत्रपद्मेनमनोहरेण॥२५॥समर्चयामासतदर्चनेनसौभाग्यमुक्तीसुलभेनलभ्ये॥य
त्पादपद्मांबुजरेणुमिष्टंमुकुंदचंद्रेंद्रचतुर्मुखाद्याः॥२६॥तमर्चयंत्यन्वहमादरेणतत्पादपद्मंशरणंव्रजामि॥

यन्नामसंकीर्तनमेकमेवविनाशयत्याशुमहाघसंघं ॥२७॥ तंदेवमीशंशरणंव्रजामिव्रह्मेंद्रविष्णवादिसुरैकवंद्यं ॥२७॥ यन्नामपी
यूषमपीयमानाभवंतिसंसारसमुद्रमग्नाः ॥ तंदेवमीशंशरणंव्रजामिव्रह्मेंद्रविष्णवादिसुरैकवंद्यं ॥२८॥ यन्नाममात्रोच्चरणेनस
द्यो धन्याभवंत्येवहिपापिनोपि ॥ तंदेवमीशं० ॥ २९ ॥ यन्नामदेहक्षयपूर्वकालेस्मृतंददात्येवहिमोक्षमेकं ॥ तंदेवमीशं०
॥३०॥ यन्नामतत्त्वंनविधिर्विवेदयन्नामतत्वंनविवेदविष्णुः ॥ तंदेवमीशं० ॥ ३१॥ यन्नामतत्वंनविवेदवेदोप्यनंत
शारदः सकलःस्वरूपः ॥ तंदेवमीशं० ॥ ३२ ॥ यन्नामसंसारसमुद्रविद्रविद्रावकंसर्वभयापहारि ॥ तंदेवमीशं० ॥
॥३३॥ यन्नामसंकीर्तनपूतजिव्हाः सदाविधींद्रावरजादिपूज्याः ॥ तंदेवमीशं० ॥३४॥ यन्नामदिव्यामृतपानसक्तानिंदंति
[illegible]ानपिविष्णुमुख्यान् ॥ तंदेवमीशं० ॥ ३५ ॥ यन्नामगोकोटिसहस्त्रकोटिप्रदानपुण्याधिकपुण्यपुण्यं ॥ तंदेवमीशं० ॥३६॥
यन्नामयागार्बुदकोटिकोटिसहस्त्रपुण्याधिकपुण्यपुण्यं ॥ तंदेवमीशं० ॥ ३७॥ यन्नाममत्तोन्नतदंतिकोटिप्रदानपुण्याधि
कपुण्यपुण्यं ॥ तंदेवमीशं० ॥३८॥ यन्नामरत्नोत्तमकोटिकोटितुलाप्रदानाधिकपुण्यपुण्यं ॥ तंदेवमीशं० ॥३९॥ यन्नाम
शुभ्रोत्तमवाजिकोप्रदानपुण्याधिकपुण्यपुण्यं ॥ तंदेवमीशं० ॥४०॥ यन्नामहेमोत्तमकोटिकोटिप्रदानपुण्या
धिकपुण्यपुण्यं ॥ तंदेवमीशं० ॥४१॥ यन्नामकन्यार्बुदकोटिकोटिप्रदानपुण्याधिकपुण्यपुण्यं ॥ तंदेवमी
शं० ॥४२॥ यन्नामसस्यावृतसर्वपृथ्वीप्रदानपुण्याधिकपुण्यपुण्यं ॥ तंदेहमीशं० ॥४३॥ इत्युक्त्वा[illegible]ततः
पुत्रान्सर्वानाहूयसादरं ॥ उवाचवचनं[illegible]चारुस्वपुत्राणांहितावहं ॥४४॥ ॥राजोवाच॥ ॥अर्चयध्वंमहादे
वंविष्णुव्रह्मादि[illegible]वंदितं ॥ त्रिकालमप्रमादेनबिल्वपत्रादिसाधनैः ॥४५॥ भजध्वमप्रमादेनशिवंव्रह्मादिवंदितं ॥
जयध्वमनिशंयत्नाच्छैवंपंचाक्षरंपरं ॥४६॥ उद्धूलनंत्रिपुंड्रंचतथारुद्राक्षधारणं ॥ मात्यजध्वंमात्यजतनिद्रा
कालेपिसर्वथा ॥४७॥ शृणुध्वमतियत्नेनमोक्षदांशांभवींकथां ॥ शांभवैःसहसल्लापाकुरुध्वंभस्मभूषिताः
॥४८॥ अशांभवान्शिक्षयध्वंदीक्षयध्वंप्रयत्नतः ॥ विमुधांशांभवींदीक्षांपालयध्वंप्रयत्नतः ॥४९॥

मयाकार्यातपश्चर्याशिवमुद्दिश्यसंततं ॥ कुर्वंतुसफलान्धर्मान्प्रजापालनपूर्वकं ॥५०॥ ॥शिवउवाच॥ ॥
इत्युक्त्वास्वसुतान्राजास्नात्वाब्रह्मसरोवरे ॥ तपःकर्तुंसमारेभेनियतोनिर्जितेंद्रियः ॥५१॥ उद्धूलनत्रिपुंड्रा
भ्यांरुद्राक्षैश्चविभूषितः ॥ शिवलिंगार्चनपरःशुशुभेनृपतिःशिवे ॥५२॥ मल्लिंगपूजनंपुण्यंतपइत्युच्यतेबुधैः ॥
अतस्तदर्चनेनिष्ठातस्यजातावरानने ॥५३॥ फलानिभक्षयित्वैवमासमात्रमुवाससः ॥ ततोमासजलाहारंचकार
नियतेंद्रियः ॥५४॥ ततश्चवत्सरंनिराहारं वत्सरत्रयमादरात् ॥ तेनैवतपसादेवाबभूवुःक्षुभिताभृशं ॥५५॥ ततस्तस्य
मनोद्रष्टुंविष्णुरूपंधृतंमया ॥ धृत्वातुवैष्णवंरूपंततस्तत्रागतंमया ॥५६॥ वैनतेयसमारूढंशंखचक्रगदाधरं
पीताम्बरधरंराजामोदृष्ट्वाऽचलवास्थितः ॥५७॥ ततोवृणुवरंराजन्नित्युक्तंसादरंमया ॥ ततोमांप्रत्युवाचेदंतद्धयेमृणुसादरं ॥
॥५८॥ ॥राजोवाच॥ ॥नभवतोवरंयाचेयतःक्षुद्रोहरेभवान् ॥ वरंतुसर्वदेवेशाद्वरंयाचेमहेश्वरात् ॥५९॥ आदिवि
ष्णुर्भवान्पूर्वंयस्माज्जातोमहेश्वरात् ॥५९॥ ~~आदिविष्णुर्भवान्पूर्वंयस्माज्जातोमहेश्वरात्~~ ॥ तस्माद्देववरंयाचेशंकरा
ल्लोकशंकरात् ॥६०॥ यतश्चतुर्मुखोजातोदेवदेवान्महेश्वरात् ॥ तस्माद्देववरंयाचेशंक० ॥६१॥ यस्मादिंद्रादयोजा
तादिक्पालाःश्रीमहेश्वरात् ॥ तस्माद्देव० ॥६२॥ वेदायस्मात्समुत्पन्नादेवदेवान्महेश्वरात् ॥ तस्मादे० ॥६३॥ यस्मात्सू
र्यःसमुत्पन्नोदेवदेवान्महेश्वरात् ॥ तस्मा० ॥६४॥ यस्मादजायताकाशोदेवदे० ॥ तस्माद० ॥६५॥ यस्माच्चंद्रःसमु
त्पन्नोदेवदे० ॥ तस्मा० ॥६६॥ यस्माद्वायुःसमुत्पन्नोदेवदे० ॥ तस्मादे० ॥६७॥ यस्मादापसमुत्पन्नादेवदेवान्म०
तस्माद्देव० ॥६८॥ यस्मादग्निसमुत्पन्नोदेवदेवा० ॥ तस्माद्देव० ॥६९॥ यस्मात्क्षोणिसमुत्पन्नादेवदेवान्महेश्वरा
त् ॥ तस्मादे० ॥७०॥ यस्मादौषधयोजातादेवदेवा० ॥ तस्माद्देव० ॥७१॥ यस्मादन्नंसमुत्पन्नंदेव० ॥ तस्माद्देव० ॥
॥७२॥ यस्माद्द्वीपाःसमुत्पन्नादेव० ॥ तस्मादे० ॥७३॥ यस्माद्द्विपदःसंभूतादेवदे० ॥ तस्माद्देव० ॥७४॥ यस्माच्च
तुष्पदोजातादेवदेव० ॥ तस्माद्देव० ॥७५॥ यस्माद्दृष्टपदोजातादेव० ॥ तस्माद्देव० ॥७६॥ यस्माद्धनानिजातानि

देवदेवान्महेश्वरात्॥ तस्मादेव०॥७७॥ यस्माद्विरिंचराजाताः देवदे०॥७८॥ यस्माद्ग्रहाः समुत्पन्नादेवदेवा०॥ तस्मादेव०॥७९॥ उ.ग्रा.स.
यस्यांतनविदुर्देवाभवदाद्याः पिनाकिनः॥ तस्मादेव०॥८०॥ यस्यस्वरूपंनज्ञातंसर्वथाभवदादिभिः॥ तस्मादेव०॥८१॥
यत्प्रसादेनविष्णुत्वंत्वयाप्राप्तंपुराहरे॥ तस्मादेव०॥८२॥ ब्रह्मत्वंब्रह्मणाप्राप्तंयत्प्रसादात्पुराहरे॥ तस्मादेव०॥८३॥ इंद्र
त्वंप्राप्तमिंद्रेणयत्प्रसादात्पुराहरे॥ तस्मादेववरंयाचेशंकराल्लोकशंकरात्॥८४॥ वायुर्यंवायुरनिशंयस्माद्भीतो
महेश्वरात्॥ तस्मादेवं०॥८५॥ सूर्योप्यहरहोदेतियस्माद्भीतोमहेश्वरात्॥ तस्मादेवं०॥८६॥ उदेतिवन्हिश्चं
द्रश्चयस्माद्भीतोमहेश्वरात्॥ तस्मादेवं०॥८७॥ यद्भक्तैर्भेदिताः शैलामंदरप्रमुखाः पुराः॥ तस्मादेव०॥८८॥ यद्भ
क्तैः क्षणमात्रेणसमुद्राश्चुलिकीकृताः॥ तस्मा०॥८९॥ यद्भक्तैः क्षणमात्रेणलोकाव्यत्यासिताः पुरा॥ तस्मादे०॥
९०॥ तृणीकृतोसियद्भक्तैः त्वमेवगरुडध्वज॥ तस्मादेवं०॥९१॥ तृणीकृतश्चतुर्वक्त्रोयद्भक्तैर्हंसवाहनः॥ तस्मादे०
॥९२॥ तृणीकृतः शचीनाथोयद्भक्तैः स्वर्गभूपतिः॥ तस्मा०॥९३॥ यतोवाचोनिवर्तंते अप्राप्यमनसासह॥ तस्मादेव०
॥९४॥ यदृतंसत्यंपरंब्रह्मपुरुषंकृष्णपिंगलं॥ तस्मादेववरं०॥९५॥ यदक्षरंविरूपाक्षमक्षय्यफलदायकं॥ तस्मा
देव०॥९६॥ यदूर्ध्वरेतमनघंविश्वरूपमनामयं॥ तस्मादेववरं०॥९७॥ योनिर्गुणोनिराकारोनिरुपाधिर्निरंजनः॥
तस्मा०॥९८॥ यः सर्ववेदवेदांतप्रतिपाद्योमहेश्वरः॥ तस्मादेवं०॥९९॥ यः सृजत्यवतिस्वैरंहंतिसर्वमिदंजगत्॥
तस्मादेव०॥१००॥ त्वयालंनेत्रपद्मेनपूजितंयत्पदांबुजं॥ तस्मादेव०॥१०१॥ कंदर्पदर्पदलनोयः स्वतंत्रोमहेश्वरः॥
तस्मादेव०॥२॥ यः सर्वशिक्षकोनरसिंहनिपातनः॥ तस्मादेववरं०॥३॥ यद्भृत्यभृत्यागीर्वाणाभवत्प्रमुखायोहे
हरे॥ तस्मादेव०॥६॥ यद्भृत्यवेत्रसंत्रस्ताः श्रीहरेभवदादयः॥ तस्मादेवं०॥७॥ नयस्मात्परमोदेवोनयेनसदृ
शोप्यहो॥ तस्मादेववरं०॥८॥ यः सर्वदेवदेवेशोमहादेवोखिलेश्वरः॥ तस्मादेववरंयाचेशंकराल्लोकशंकरा
त्॥९॥ त्वयामह्यंहरेदेयः कथमिष्टतमोवरः॥ महेशादपरः कोवाभवेदिष्टवरप्रदः॥१०॥ वरोदेयइतिस्वैरं

श्रीशिव १७०

देवो

४॥ देवतासार्वभौमोयः सर्वदेवशिखामणिः॥ तस्मादे०॥४॥ मधुसूदनयोदेवोमधुसूदनसूदनः॥ तस्मा०॥ ५॥

स्य

कथं धार्ष्ट्यं कृतं त्वया ॥ मयि धार्ष्ट्यमिदं कर्तुं तव नैवोचितं हरे ॥ ११ ॥ अस्वतंत्रेण हरिणा त्वया चेद्दीयते वरः ॥ तुभ्यमेव वरो देयो मया किं न भविष्यति ॥ १२ ॥ यथाहमस्वतंत्रोस्मि सर्वकालेषु सर्वथा ॥ तथा त्वमप्यस्वतंत्रः सत्यमेवोच्यते मया ॥ स्वतंत्रः श्रीमहादेवस्तदन्यभवदादयः ॥ अस्वतंत्रास्ततो मह्यं वरदाता कथं भवान् ॥ १४ ॥ हरे को वा वरो देयो दातुं शक्तिः क्व वर्तते ॥ त्वदधीनं किं यत्स्वीयत्सर्वं वद तत्त्वतः ॥ १५ ॥ पीतांबरं जीर्णमेकं त्वदीयमिह तिष्ठति ॥ तन्न नेच्छाय तो जीर्णमंगस्वेदविदूषितं ॥ १६ ॥ त्वदधीनोस्ति गरुडः त्वदीयश्चेह तिष्ठति ॥ तस्मिन्नापि न मे प्रीतिर्विहगत्वेन निश्चिते ॥ १७ ॥ वैकुण्ठलोकवासस्तु त्वया दातुं न शक्यते ॥ किं चेच्छापि न मे तत्र किं तन्नास्ति वदस्व मे ॥ १८ ॥ सुदर्शनाभिधं चक्रं त्वया दातुं न शक्यते ॥ तत्किंयत्कालपर्यंतं स्थित्वा शंकर मेष्यति ॥ १९ ॥ लक्ष्मीतोप्यधिकाः शुद्धाः संति लक्षं स्त्रियो मम ॥ ततो लक्ष्म्यामपि प्रीतिर्मम नास्त्येव सर्वथा ॥ २० ॥ अस्वतंत्रेण हरिणा मोक्षो दातुं न शक्यते ॥ अतः परं त्वया देयं किमस्ति वद तन्मम ॥ २१ ॥ गच्छ गच्छ हरे श्रांतः श्रमो भूयान्न भूत्तव ॥ अद्य प्रभृति शैवेषु धार्ष्ट्यं मा कुरु सर्वथा ॥ २२ ॥ भ्रष्टवैदिकमार्गेषु दुष्टेष्वेव त्वया हरे ॥ वरं दास्ये वरं दास्य इति कार्या प्रतारणा ॥ २३ ॥ भवव्रतनिष्ठेषु मादृशेषु त्वया हरे ॥ वरं दास्य इति स्वैरं कथं कार्या प्रतारणा ॥ २४ ॥ वरदाताहमस्मीति भ्रांतिं मा कुरु माधव ॥ तव चेद्वरदातृत्वं तरेद्धि ध्योपि सागरं ॥ २५ ॥ वैकुंठः प्राप्त इत्यत्र गर्वं मा मा प्रदर्शय ॥ तत्राधिकारमात्रेण गर्वस्ते कथमीदृशः ॥ २६ ॥ हरे वैकुंठलोकस्य त्वधिकारो ति चंचलः ॥ अधिकारे तत स्मिन्का वा प्रीतिर्भविष्यति ॥ २७ ॥ शिवो विष्णुत्वमन्यस्मै दास्यत्यग्रे स्वतः प्रभुः ॥ दत्वा वैकुंठमीशानो तस्मै दास्यति शंकरः ॥ २८ ॥ तस्मै ददाति विष्णुत्वं संतुष्टः पार्वतीपतिः ॥ तस्मै ददाति वैकुंठं सुदर्शनमपि प्रभुः ॥ २९ ॥ बहवो विष्णवो जाताः संख्या तेषां न विद्यते ॥ अतः परं भविष्यंति बहवो विष्णवो हरे ॥ ३० ॥ असंख्याता हताः पूर्वं महादेवेन विष्णवः ॥ बहवोग्रेपि हंतव्या विष्णवः शूलपाणिना ॥ ३१ ॥ शिवमुद्दिश्य यो मर्त्यो विष्णुत्वप्रासये तपः ॥ करिष्यत्यतियत्नेन विष्णुत्वं तेन लभ्यते ॥ ३२ ॥ ब्रह्मत्वमप्येवमेव लभ्यते बहुभिर्हरे ॥ इंद्रत्वमप्येवमेव लभ्यते बहु-

भिर्हरे॥ इंद्रत्वमप्येवमेवलभ्यतेबहुभिर्हरेः॥३३॥ अधिकारेविशेषोयंविष्णुत्वमपिचंचलं॥ अतोपिचंचलेतास्मिन्प्रीतिमाकुरु
माधव॥३४॥ विष्णुत्वप्राप्तिमात्रेणगर्वश्चेदीदृशःस्तव॥ गाणपत्यस्यतुप्राप्त्याभूयानगर्वोभविष्यति॥३५॥ गर्वंविहायसततंपू
जयस्वमहेश्वरं॥ गर्वंनसहतेशर्वःसर्वगर्वापहारकः॥३६॥ गाणपत्येच्छयाशर्वंपूजयस्वेहमाधव॥ किमस्तितववैकुंठंविष्णुत्वे
वावदस्वमे॥३७॥ शिवार्चनेनसंतुष्टोगाणपत्यंमहेश्वरः॥ तुभ्यंदास्यतिगोविंदसिद्धिक्षेत्रमिदंयतः॥३८॥ गाणापत्यंशिवाल्ल
ब्ध्वाशिवसेवापरोभव॥ ततोदास्यतिमुक्तिंचशंकरःकरुणाकरः॥३९॥ तिष्ठेहयद्वागच्छेत्त्वतःकार्यंनमेहरे॥ स्वेच्छास्य
स्यत्रयथेच्छंचेत्तदामोनेनसंवस॥४०॥ ॥श्रीमहादेवउवाच॥ ॥इत्युक्त्वासनृपोदेविभस्मधृत्वाशिवार्चकः॥म
देकशरणोभूत्वामामभ्यर्च्यस्थितोमुदा॥४१॥ तदामदेकशरणंतंदृष्ट्वानृपतिंशिवे॥ संतुष्टोस्मिमयातस्मैस्वस्वरूपंप्रद
र्शितं॥४२॥ अनंतोद्यद्भानुकांतंनानाभरणभूषितं॥ मांविलोक्यातिसंतुष्टस्तुष्टावनृपतिःशिवे॥४३॥ ॥राजाउवाच॥
कृतार्थोस्मिमहादेवकृतार्थोस्मिहरानंतकृतार्थोस्मिशिवापते॥४४॥ नमस्तेदेवदेवायनमस्तेशंकरप्रभो॥ नमस्ते
पार्वतीनाथनमस्तेकरुणाकर॥४५॥ नमस्तेमुक्तिमंदारनमस्तेभक्तवत्सल॥ नमस्तेशर्वसर्वेशनमस्तेपुरसूदन॥४६॥
नमस्तेनीलकंठायनमस्तेनीललोहित॥ नमस्तेभगवन्शंभोनमस्तेवृषभध्वज॥४७॥ नमस्तेनिर्गुणामेयनमस्तेसुगुण
प्रभो॥ नमस्तेनिष्कलश्रीमन्नमस्तेशशिशेखर॥४८॥ नमस्तेचंद्रचूडायनमस्तेभूतिभूषण॥ नमस्तेसर्पभूषाय
नमस्तेशूलपाणये॥४९॥ नमस्तेविश्वरूपायनमस्तेविश्वचक्षुषे॥ नमस्तेविश्वरूपायमूर्धायनमस्तेविश्ववाहवे॥५०॥
नमोनंतगुणाधारनमोविश्वंभरायते॥ नमःखट्वांगहस्तायनमस्तेपरमात्मने॥५१॥ नमस्तेभूरिरूपायनमस्तेभूरितेज
से॥ नमोविष्ण्वाद्यदिवंद्यायनमस्तेसुरपूजित॥५२॥ नमस्तेदेवदेवेशनमस्तेसुरसत्तम॥ नमस्तेअस्तुभगवन्नमोवि
श्वेश्वरायते॥५३॥ महादेवनमस्तेस्तुत्रियंबकनमोस्तुते॥ नमस्त्रिकाग्निकालायनमस्तेत्रिपुरांतक॥५४॥ नमः
कालाग्निरुद्रायमहारुद्रायतेनमः॥ नमस्तेकालरुद्रायनमःसर्वेश्वरायते॥५५॥ नमःपरमरूपायसदाशिवनमो
स्तुते॥ नमःश्रीविश्वनाथायविष्णुनेत्रार्चितांघ्रये॥५६॥ नमोविश्वैकवंद्यायविश्वाशास्यायतेनमः॥ नमोवेदांत

वेद्यायनिर्मलायामितात्मने ।। ५७ ।। नमः स्त्रिशूलहस्तायकंदर्पदलनायते ।। नमोडमरुहस्तायविराडूपा
यतेनमः ।। ५८ ।। विदारितनृसिंहायसंदग्धमदनायते ।। हतब्रह्मोत्तमांगायशांभवेप्रभवेनमः ।। ५९ ।। गरुडध्वजवंद्याय
मकरध्वजहारिणे ।। पुरुषध्वजमित्रायभवायप्रभवेनमः ।। ६० ।। विश्वाकारायविश्वायनमस्तेविश्वतास्त्विषे ।। विश्वभर्त्ते
नमस्तुभ्यंनमस्तेविश्वमूर्त्तये ।। ६१ ।। अनंतविभवश्रीमनप्रमेयगुणार्णवे ।। अपराधान्क्षमस्वेशकरुणासागरप्र-
भो ।। ६२ ।। धृत्वारूपांतरंपूर्वास्थितंशांभोत्वयातदा ।। नार्चितोर्घ्यादिभिस्तत्रनापराधोममप्रभो ।। ६३ ।। सोमार्द्ध
शेखरश्रीमन् विश्वरूपस्त्वमस्यतः ।। विश्वरूपस्यतेपूजाकर्त्तुमेवनशक्यते ।। ६४ ।। विष्णुब्रह्मादिरूपाणिगृह्यंतेशं
करत्वया ।। यदायदातुतद्रूपपूजायांनहिमेरुचिः ।। ६५ ।। यदातुशांभवंतैजंस्वरूपंध्रियतेतदा ।। पूजाप्रय
त्नतःकार्यापत्रपुष्पफलादिभिः ।। ६६ ।। शांभवंरूपमेवैकंपूजनीयंप्रयत्नतः ।। नाशांभवंपूजनीयंश्रेयंरूप
मित्यस्तिहिश्रुतिः ।। ६७ ।। शिवलिंगंपूजनीयंरूपमित्यस्तिहिश्रुतिः ।। ६७ ।। शिवलिंगंपूजनीयंवैदिकंश्रुतिचोदितं
।। उमार्धविग्रहामूर्तिःपूजनीयाथवाद्विजैः ।। ६८ ।। निर्गुणंनिष्कलंसाक्षाच्छिवलिंगंशिवात्मकं ।। पूजनीयंप्रयत्नेनद्विजैर्वेद
विदांवरैः ।। ६९ ।। शिवात्मकंपूजनीयंलिंगमेवद्विजैःसदा ।। निधनेत्यादिभिर्मंत्रैर्लिंगस्यप्रतिपादनात् ।। ७० ।। मूर्त्तिपूजापिचे
त्कार्यामूर्त्तिःसोमार्धशेखरा ।। सांबात्रिनयनापूज्यानान्यासर्वात्मनाद्विजैः ।। ७१ ।। पूजनीयःप्रयत्नेनशंभुस्तत्प्रतिमाथवा
।। नान्यःपूज्योभ्रमेणापीत्यस्तिहिश्रुतिरीश्वर ।। ७२ ।। ।। श्रीशिवउवाच ।। ।। इतिस्तुत्वार्घ्यपाद्याद्यैर्मामभ्यर्च्यप्रय
त्नतः ।। कृतांजलिपुटोतिष्ठद्विनयानतकंधरः ।। ७३ ।। वरंवृणुष्वराजेंद्रवरमिष्टंददाम्यहं ।। भक्त्यात्वव्यभिचारिण्यातुष्टो
स्मीत्युक्तवानहं ।। ७४ ।। इत्युक्तंमद्वचःश्रुत्वासंपूज्यार्घ्यादिभिर्नृपः ।। कृतांजलिपुटोभूत्वायययाचेवरमीदृशं ।। ७५ ।।
राजोवाच ।। ।। महादेवकृपासिंधोविष्णुब्रह्मादिवंदित ।। ममास्त्वचंचलाभक्तिस्त्वय्येवाव्यभिचारिणी ।। महाप्रल
यकालेपिशंभोतत्पदपंकजात् ।। मच्चित्तचंचरीकोयंमायात्वन्यत्रसर्वथा ।। ७७ ।। महापद्यपिघोरायांत्वदन्यंनार्चय।

मयहं॥ ईदृशीममभक्तिर्यस्माद्दृढाभवतुप्रभो॥७८॥ यथात्वदन्यपूजायांमतिर्मेनभविष्यति॥ तथाकुरुमहादेवप्रसादंम
यिसर्वदा॥७९॥ सदाशिवमहेशेतिनामोच्चारणतत्परा॥रसनेयंममास्त्वीशत्वत्प्रसादादहर्निशं॥८०॥ नित्यंत्रिपुंड्ररु
द्राक्षधारणेप्रीतिरस्तुमे॥नतस्मादनिवृत्तास्तुप्रीतिरापद्यपिप्रभो॥८१॥त्वत्पादपद्मपूजायामस्तुप्रीतिरखंडिता॥य
त्पादपूजनाल्लभ्यामुक्तिकांतातिदुर्लभा॥८२॥स्वप्नेप्यन्यामरेप्रीतिर्मिममास्तुमहेश्वर॥ प्रीतिरस्तुमहादेवशिवलिंगैकपू
जने॥८३॥निवृत्तमस्तुमच्चित्तंपुत्रपौत्रादिषुप्रभो॥त्वत्पूजासाधनेसक्तंचित्तमस्तुममान्वहं॥शिवास्तुत्वत्कथामात्रश्रवण
प्रवणंमनः॥ममास्तुप्रीतिरनिशंत्वत्सेवायामुमापते॥८५॥ ॥श्रीशिवउवाच॥ ॥इत्यनेकवरास्तेनवृत्ताराज्ञावरान
ने॥दत्ताश्चतेवरास्तस्मैवराःसर्वेपिमोक्षदाः॥८६॥ ततःपरंसभूपालोमामभ्यर्च्यप्रयत्नतः॥प्रणम्यबहुधाभक्त्याकृ
तांजलिपुटःस्थितः॥८७॥ ततःसर्वेषुपश्यत्सुतत्रैवांतर्हितंमया॥ तदाप्रभृतिराजापिमदेकशरणोभवत्॥८८॥ मत्पा
पद्म दैमकरंदरसाश्रयाणांमामेवपूज्यतममित्यनुचिंतकानां॥सर्वार्थदंसकलदेवगणाभिवंद्यंविद्धीश्वरत्वमनुसेव्यमुमा
सहायं॥८९॥ ॥इतिश्रीशिवरहस्येसप्तमांशेशिवगौरीसंवादोनामद्वाविंशोध्यायः॥२२॥ ॥श्रीउग्रायनमः॥

॥श्रीपार्वतीउवाच॥ ॥किंचकारसभूपालःकरुणाकरशंकर॥तत्सर्वंवदसर्वज्ञविस्तरेणविशेषतः॥१॥ ॥
सदाशिवउवाच॥ ॥शिवपूजारतंदृष्ट्वासभूपालोमदर्चकः॥अभ्युत्थायातियत्नेनकुर्वन्नेवस्थितोर्चनं॥२॥
मदर्चनेयथाप्रीतिस्तथामद्भक्तपूजने॥प्रीतिस्तथानृपस्यास्यममैवानुग्रहात्सदा॥३॥शैवानांपूजनेश्रद्धाय
थातस्यस्थितात्प्रिये॥तथानान्यस्यसुभगेसर्वकालेष्वखंडिता॥४॥एकदासनृपोदेविगौतमंशैवपुंगवं॥भ
स्मोद्धूलितसर्वांगंददर्शगृहमागतं॥५॥ततःपरंसमुत्थायकृतांजलिपुटोनृपः॥प्रददावासनंरम्यंनानार
त्नविराजितं॥६॥तत्रोपविष्टंशैवेंद्रंगौतमंमुनिसेवितं॥अर्घ्यपाद्यादिभिःसम्यक्पूजयामाससादरं॥७॥
भस्मनासमलंकृत्यबिल्वपत्रैश्चतंमुनिं॥उवाचवचनंराजाकृतांजलिपुटःशिवे॥८॥ ॥राजोवाच॥ ॥

गौतमाद्यास्मि धन्योहंभावुकंभाविभूरिशः।। त्वादृशानांतुशैवानांदर्शनंदुर्लभंमुने।।९।। माननीयोपिजातोहंत्वदागमन
तोमुने।। शिवार्चनव्रतस्यास्यतवात्रगमनंशुभं।।१०।। पूतंचसदनंसर्वंत्वदागमनतोमुने।। त्वदंघ्रिजलसंसेकाद्भूरेषापा
वनीकृता।।११।। त्वत्पादसेचनात्तृप्ताःपितरःसाग्नयःसुराः।। अतःपरंभविष्यंतिकल्याणानिचभूरिशः।।१२।। मयिस्ने
हवशादेवत्वयाद्यात्रागतंमुने।। अन्यथाशिवभक्तस्यतवात्रागमनंकुतः।।१३।। वदमोक्षप्रदान्धर्मान्वर्णानामविशे
षतः।। यद्धर्मश्रवणेनापिपापनाशोभविष्यति।।१४।। ।।शिवउवाच।। ।। इत्युक्तोसंस्थितोराजातदानीमेवतत्सु
ताः।। पंचलक्षामितादेविगौतमंद्रष्टुमागताः।।१५।। रुद्राक्षमालाभरणान्भस्मोद्धूलितविग्रहान्।। त्रिपुंड्रचंद्ररेखां
कांस्तान्ददर्शसगौतमः।।१६।। गौतमःशांभवान्दृष्ट्वातत्सुतानतिविस्मितः।। अद्यधन्योहमस्मीतिववंदेसकृतां
जलिः।।१७।। दृष्टाहिभूरिभाग्येनशांभवाबहवोमया।। शांभवप्रेक्षणाज्जातंधन्यमद्यतनंदिनं।।१८।। प्रणतंतंमुनिं
दृष्ट्वास्वपुत्रेषुततोनृपः।। कंपमानस्तमुत्थाप्यबभाषेवचनंशिवे।।१९।। ।।राजाउवाच।। स्वामिन्नेतेतुमत्पुत्राःशि
ष्यप्रायास्तवध्रुवं।। एतादृशेषुप्रणतिस्त्वयाकार्यानसर्वथा।।२०।। ।। गौतमउवाच।। ।। ब्राह्मणाःक्षत्रिया
वैश्याःशूद्राश्चान्येपिवानृप।। शांभवायदितेसर्वेपूजनीयाःप्रयत्नतः।।२१।। दुर्लभंशंकरस्येवशांकर
स्यापिदर्शनं।। शांकराःशंकरस्यैवप्रियाःपारिषदाःखलु।।२२।। अर्चनीयःप्रयत्नेन चंडालोपिशिवार्चकः।।
किमुतान्येब्राह्मणाद्याःशिवाराधनतत्पराः।।२३।। चंडालोप्युत्तमोविप्रादशैवाच्छिवपूजकः।। शिवार्चनप
रादन्यःकोवाश्रेष्ठोभविष्यति।।२४।। अशैवोधीतवेदोपिप्राप्नोतियमयातनां।। अंत्यजोपिशिवाचारोन
प्राप्नोत्येवयातनां।।२४।। शिवाचाररतःशूद्रोप्यत्युत्तमइतिश्रुतिः।। शिवाचारविहीनस्तुब्राह्मणो
प्यधमाधमः।।२५।। शैवाःप्रयत्नतःपूज्याःसर्वदासर्वदेहिभिः।। प्रीतोभवतिगौरीशःशैवाना
मेवपूजया।।२६।। अयंतुपरमोधर्मःशैवानांपूजनंनृप।। शिवपूजेवशैवानांपूजनंनृप।। शिवं

नात्रसंशयः॥२७॥ वर्णानां परमोधर्मः शंकरस्यार्चनंपरं॥ नतस्मादपरोधर्मोवर्णानांपरमोनृप॥२८॥ द्विजानां
तुविशेषेणशिवस्यैवार्चनंनृप॥ धर्मस्तत्रनसंदेहः सत्यं सत्यंवदाम्यहं॥२९॥ सर्वधर्मोत्तमोधर्मःशंकरस्यै
वपूजनं॥ सत्यमेतत्सत्यमेतदितिजाबालवादिनः॥३०॥ धर्मार्थकाममोक्षास्तुनविनाशंकरार्चनं॥ धर्मा
द्यर्थाःशिवेनैवदीयतेनात्रसंशयः॥३१॥ यत्फलंप्राप्यतेराजन्महादेवस्यपूजया॥ तत्फलंनैवसंप्राप्यम-
श्वमेधार्बुदैरपि॥३२॥ यत्फलंप्रा०॥ तत्फलंनैवसंप्राप्यंवाजपेयार्बुदैरपि॥३३॥ यत्फलंप्रा०॥ तत्फलंप्रा॰ने
वसंप्राप्यंअतिरात्रार्बुदैरपि॥३४॥ यत्फलंप्रा०॥ तत्फलंनैवसंप्राप्यमग्निष्टोमार्बुदैरपि॥३५॥ यत्फलं०॥
तत्फलंनैवसंप्राप्यराजसूयार्बुदैरपि॥३६॥ स्वर्गएवहिसंप्राप्यःसांगैर्यागार्बुदैरपि॥ शिवार्चनेनतुप्राप्या
धर्माद्यर्थाइतिश्रुतिः॥३७॥ शिवार्चनेनसदृशःकोवाधर्मोभविष्यति॥ यतःशिवार्चनंश्रौतंसर्वाभिष्टप्रदा
यकं॥३८॥ शिवार्चनेनयत्प्राप्यंतत्प्राप्यंनान्यधर्मतः॥ सत्यमेतत्सत्यमेतदितिजाबालवादिनः॥
॥३९॥ शिवपूजाप्रभावस्तुशिवेनज्ञायतेनृप॥ तदन्यैरस्मदाद्यैस्तुज्ञायतेनाल्पबुद्धिभिः॥४०॥ शिवार्च
नप्रभावस्तुवेदेषुबहुधाश्रुतः॥ वेदैरपिनविज्ञातस्तत्प्रभावोनराधिप॥४१॥ देवैरपिनविज्ञातंशंक
रार्चनजंफलं॥ तदन्यैरस्मदाद्यैस्तुकथंज्ञेयंनराधिप॥४२॥ पुरादेवाःसगंधर्वाःऋषयश्चमुमुक्षवः॥ हिम
वद्गिरिमाश्रित्यसंस्थितास्तत्वबुभुत्सवः॥४३॥ तदाविष्णुंसुरवासीनंऋषयोब्रह्मवादिनः॥ राजन्प्रणम्यप्रपच्छु-
र्विनयानतकंधराः॥ ऋषयऊचुः॥ ॥ धर्मार्थकाममोक्षाणांकःकर्ताकश्चतत्प्रदः॥ एतत्सर्वंविशेषेणवद
माधवसादरं॥४५॥ ॥ विष्णुरुवाच॥ ॥ धर्मार्थकाममोक्षाणामधिपोयेहंमुनीश्वराः॥ मत्तःपरतमोना
स्तीत्यब्रवीन्मोहतोहरिः॥४५॥ इतितद्वचनंश्रुत्वाबभाषेवचनंविधिः॥ धर्मार्थकाममोक्षाणामहंकर्ते
तिभूपते॥४६॥ इतितद्वचनंश्रुत्वाबभ्रांतमूचुर्मुनिपुंगवाः॥ विष्णुंचमोहितंदृष्ट्वाश्रीमहादेवमा

यया।।४७।।विधेविष्णुर्वदत्यन्यत्वयान्यत्समुदीर्यते।। एवंसतिकथंज्ञेयंतत्वमस्माभिरीदृशैः।।४८।।सर्वैकवाक्यतायत्रतत्र
तत्वविनिश्चयः।।नान्यत्रसर्वथाब्रह्मन्नूनंतत्वस्यनिर्णयः।।४९।।वाक्यमेतद्विरूत्थार्थप्रतिपादकमीदृशं।।तत्वनिर्णायकंभूया
त्कथंवातद्वदाधुना।।५०।। इतितद्वचनंश्रुत्वाब्रह्माभ्रुकुटिताननः।।बभाषेवचनंभूयःशिवमायाविमोहितः।।५१।। ।।
ब्रह्मोवाच।। ।।मन्मायामोहितोविष्णुस्तथावदतिसत्वरं।।अतएवहितद्वाक्यमप्रमाणंनसंशयः।।५२।।स्रष्टाहंसर्वलो
कानांपालकश्चनसंशयः।। संसारकश्चलोकानांसत्यमेवोच्यतेमया।।५३।।नास्तिमत्सदृशोदेवस्ततःपूज्योहमन्वहं।।
धर्मार्थकाममोक्षाणांप्रदाताचाहमेवहि।।५४।।इतितद्वचनंश्रुत्वामुनयोविस्मयंगताः प्रमाणत्वेनतेवव्रुर्वेदानेवततःपरं।।५५।।
ततोवेदाःसमागत्यसर्वैर्मूर्तिधराःस्थिताः।।संतोषंपरमंप्रापुर्वेदान्दृष्ट्वामुनीश्वराः।।५६।।नत्वावेदांस्ततःसर्वेमुनयोब्रह्म
वादिनः।।पूजांचक्रुर्यथायोगंवेदान्विश्वस्यभूपते।।५७।।वेदानूचुस्ततोराजन्मुनयोब्रह्मवादिनः।।कोवापूज्यतमोदेवस्तंव
दंत्वितिसादरं।।५८।।प्रज्वाल्यपावकंसम्यक्ऋग्वेदंप्रथमंततः।।सर्व्यभुजंसङ्गृत्यतत्वमाहनृपोत्तम।।५९।। ।।ऋग्वेदउ
वाच।। ।।सोमस्त्रिनेत्रोजनितामतीनांदिवःपृथिव्याश्चतथानिलाग्न्योः।।सूर्येंद्रयोरश्विमरुद्गणानांसोमस्त्रिनेत्रोजनि
तामतीनांदिवःपृथिव्याश्चतथानिलाग्न्योः।।सूर्येंद्रयोरश्विमरुद्गणानांसोमस्त्रिनेत्रोजनितोतविष्णोः।।६०।।तस्मा
त्सविष्णोर्जनितामहेशःसर्वप्रयत्नैःसततंभवद्भिः।।सेव्यःससोमःसचमुक्तिदातासएवमोक्षाधिपतिश्चसत्यं।।६१।।
तस्मान्महेशादपरंनजानेमुक्त्यर्थिसेव्यंसुरवृंदवंद्यं।।तस्मान्महेशंशरणंव्रजध्वंसत्यंपुनःसत्यमिदंत्रिसत्यं।।६२।।
स्वर्गापवर्गादिफलप्रदातामहेश्वरान्यस्तुनसर्वथैव।।तस्मान्महेशंशरणंव्रजध्वंसत्यंपुनःसत्यमिदंत्रिसत्यं।।६३।।
असारसंसारसमुद्रमग्नानसर्वथातेशिवभक्तिभाजः।।तस्मान्महेशंशरणंव्रजध्वंसत्यंपुनःसत्यमिदंत्रि
सत्यं।।६४।।मोक्षप्रदःकोपिनशंकरान्यःसर्वोत्तमःशंकरएवसत्यं।।तस्मा०।।६५।।यःकेवलंशंकरमेवनित्यंसम
र्चयिष्यत्यनिशंसधन्यः।।तस्मान्महेशं०।।६६।।देवेषुसर्वेष्वपिदेवपूज्योदेवोमहादेवइतिप्रसिद्धः।।तस्मान्म

हेशंशरणंव्रजध्वंसत्यंपुनःसत्यमिदंत्रिसत्यं ।।६७।। भजंतिदेवेशमनन्यभाजोमुक्त्यर्थमेकंशिवयासमेतं ।। त
स्मा० ।।६८।। नशंकरान्योमुनिमोक्षहेतुर्नशंकरान्यःसुरमोक्षहेतुः ।। तस्मान्म० ।।६९।। नशंकरान्यःकरु
णानिधानोनशंकरान्योखिलवेदवेद्यः ।। तस्मान्म० ।।७०।। येपूजयंत्यन्वहमंबिकेशंते-तेगर्भभाजोन
भवंतिभूयः ।। तस्मान्म० ।।७१।। येषामनन्यंचरमंशरीरंतेषांशिवेभक्तिरुदेतिनित्यं ।। तस्मान्म० ।। यन्माययायंविधि
रद्यमोहितोयन्माययाविष्णुरयंचमोहितः ।। तमेवभस्मांकितसर्वगात्रंभजध्वमद्यप्रभृतित्रिनेत्रं ।।७३।। संसा
रपाशौघविनाशहेतुंगुणौघसेतुंमुनिमुक्तिहेतुं ।। श्रीपार्वतीनाथमनन्यभाजोभजध्वमद्यप्रभृतित्रिनेत्रं ।।७४।।
अमेयमाद्यंतविहीनमेकंनिरंजनंनिष्कलमादिदेवं ।। श्रीपार्वतीनाथ० ।।७५।। महेशमाराध्यमनाथनाथंवेदांतवेद्यं
त्रिदशैकवंद्यं ।। श्रीपार्वती० ।।७६।। विश्वाधिकंविश्वविभूतिहेतुंश्रीरुद्रमन्याप्रतिमंसुरेशं ।। श्रीपार्वती० ।।७७।।
यत्पादपद्मार्चनमात्रलभ्योमोक्षःसमस्तैरपिदुर्लभोपि ।। श्रीपार्वती० ।।७८।। यन्नामसंकीर्त्तनमात्रमत्ताःवसंतिशे
वाविधिविष्णुवंद्याः ।। तस्मान्महेशादधिकोनदेवःसत्यंपुनःसत्यमिदंत्रिसत्यं ।।७९।। भजंतिमोहेनशिवान्यमन्ये

सदामहापातकसंगदुष्टाः ।। भजंतिधन्याःशिवमेशंशिवंभवंतोपिभजंतुविप्राः ।।८०।। विश्वाधिकःशंकरएवसत्यं
सत्यंपुनःसत्यमिदंत्रिसत्यं ।। अत्रायमेवज्वलनोहिसाक्षीमयाद्विजानानृतमुच्यतेच ।।८१।। विश्वाधिकंरुद्रमुपेंद्र
वंद्यंवयंभजामःसततंवरेण्यं ।। रुद्रस्यविश्वाधिकतांवदंतिसर्वेपिवेदाःसततंद्विजेंद्राः ।।८२।। उक्तार्थसत्यार्थममुंमहा
नलंहस्तेधरिष्यामिनसंशयोत्र ।। अत्राग्निदिव्येनमदुक्तमर्थंरुद्राधिकत्वंखलुसाधयामि ।।८३।। नचाग्निदिव्याद्धि
कंहिदिव्यंयदस्तितत्तत्करवाणिदिव्यं ।। रुद्राधिकत्वप्रतिपादयामिदेवोनरुद्रादधिकोथमद्यविप्राः ।।८४।। सत्यंब्रवीमि
ध्रुवमद्यसत्यंसत्यंब्रवीमिध्रुवमद्यसत्यं ।। रुद्राधिकत्वंप्रतिपादयामिदेवोनरुद्रादधिकोसिकोपि ।।८५।। रुद्रस्यपुत्रः
सहरिःसरुद्रास्पितुःकथंस्यादधिकःसपुत्रः ।। पितुःकथंस्यादधिकःस्वपुत्रःपुत्रःपितुःसेवकएवसत्यं ।।८६।।

सोमस्त्रिनेत्रोजनितोतविष्णोरित्युक्तमादावबधानपूर्वं॥ तदेवसत्यंहितदेवसत्यं तदेवसत्यंहितदेवसत्यं॥ २७॥ ब्रह्मेंद्रविर्क
यमानिलाद्याः श्रीपार्वतीनायकभृत्यभृत्याः॥ सत्यंपुनःसत्यमिदंत्रिसत्यंपुनःसत्यमिदंत्रिसत्यं॥ २८॥ ॥ सत्यं
यजुर्वेदउवाच॥ ॥अणोरणीयान्महतोमहीयानात्मागुहायांनिहितोस्यजंतोः॥ तमक्रतुंपश्यतिवीतशोकोधातुः
प्रसादान्महिमानमीशं॥ २९॥ ऋतंसत्यंपरंब्रह्मपुरुषंकृष्णपिंगलं॥ ऊर्ध्वरेतंविरूपाक्षंविश्वरूपंवदाम्यहं॥ ९०॥
विश्वाधिकोरुद्रएवसमहाऋषिरूपधृक्॥ सएवसर्ववेदात्मासएवसुरसत्तमः॥ ९१॥ हिरण्यबाहुमीशानंहिरण्यप
तिमव्ययं॥ भस्मधृत्वाललातेभजध्वंवृषभध्वजं॥ ९२॥ अंबिकापतिमव्यक्तमुमापतिमनामयं॥ भस्मधृत्वाल०॥
॥ ९३॥ रुद्रंपशुपतिंस्थाणुमाद्यंतरहितंशिवं॥ भस्मधृत्वा०॥ ९४॥ अनंतमप्रतीकारमपरावृत्ततेजसं॥ भस्मधृ०॥ ९५॥
आनंदमयमीशानमद्वैतंनिष्कलंप्रभुं॥ भस्मधृ०॥ ९६॥ निर्गुणंनिर्मलंशुद्धंनिरवद्यंनिरंजनं॥ भस्मधृ०॥ ९७॥ शांतंप्रस
न्नवदनमुमासंश्लिष्टविग्रहं॥ भस्मधृ०॥ ९८॥ अभयप्रदमीशानंसर्वाशास्यंसुराधिपं॥ भस्मधृ०॥ ९९॥ सोमंरुद्रंतं
म्रमघ्रमरुणंशंगमीश्वरं॥ भस्मधृ०॥ १००॥ उग्रंभीमंभवंशर्वंभक्तसर्वप्रदंहरं॥ भस्मधृ०॥ महेशंशंकरंशंभुंश
रणागतवत्सलं॥ भस्मधृत्वा०॥ २॥ भगवंतमुमाकांतमनंतमपराजितं॥ भस्मधृ०॥ ३॥ विश्वेश्वरंमहादेवंत्रियंबकम
जंशिवं॥ भस्मधृत्वा०॥ ४॥ त्रिपुरांतकमाराध्यमाराधकवरप्रदं॥ भस्मधृत्वा०॥ ५॥ त्रिकाग्निकालंसाकारंसुमंगलं॥ भ
स्मधृत्वा०॥ ६॥ कालाग्निरुद्रंकामारिंकालकूटविषादनं॥ भस्मधृत्वा०॥ ७॥ नीलकंठंभस्मगुंठंसर्वेश्वरमकल्मषं॥ भस्मधृ०॥
८॥ सदाशिवंशिवाकारंश्रीमहादेवमाधिकं॥ भस्मना०॥ ९॥ ईशानंसर्वविद्यानांसर्वविद्याप्रदंसदा॥ भस्मधृ०॥ १०॥ ईश्वरंसर्व
भूतानांब्रह्माधिपतिमक्षयं॥ भस्म०॥ ११॥ ब्रह्मणोधिपतिंदेवंपरब्रह्मसदाशिवं॥ भस्म०॥ १२॥ विश्वतश्चक्षुषंदेवंविश्वतोमुख
मव्ययं॥ भस्मना०॥ १३॥ विश्वतोबाहुमव्यक्तंविश्वतःपादमक्षरं॥ भस्मधृत्वा०॥ १४॥ समस्तहेतुमाशास्यंसोमंसोमार्धशे
खरं॥ भस्मधृत्वाललाटादौभजध्वंवृषभध्वजं॥ १५॥ भजध्वंश्रीमहादेवंचतुर्वर्गफलप्रदं॥ महादेवान्यममरंमाभज

ध्वंमुनीश्वराः॥१६॥ महादेवंविहायान्यममरंयोर्चयिष्यसीति॥ सविहायामृतंमूर्खोरेतःपिबतिसर्वथा॥१७॥नास्तिपू
ज्यतमोदेवःशिवान्यःसर्वथाद्विजाः॥सत्यमेतत्सत्यमेतत्सत्यमेतन्नसंशयः॥१८॥शिवात्पूज्यतमादन्योनास्तिपूज्यत
मोध्रुवं॥सत्यमेत०॥१९॥शिवएवाखिलाराध्यःशिवएवाखिलेश्वरः॥ सत्यमेत०॥२०॥शिवएवामराधीशःशिवोदेवशि
खामणिः॥सत्यमेतत्सत्यमेतत्सत्यमेतन्नसंशयः॥२१॥शिवःसर्वोत्तमोनूनंविष्णुब्रह्मादिवंदितः॥सत्यमेत०॥२२॥देवेषु
नाधिकःकोपिशिवाद्देवोत्तमोत्तमात्॥सत्यमेत०॥२३॥शिवस्यभृत्यास्सर्वेपिविष्णुब्रह्मादयःसुराः॥सत्यमेत०॥
॥२४॥सुरोन्यःश्रीमहादेवादधिकोदेवस्तिष्ठतीतिवदिष्यति॥२६॥विश्वाधिकोरुद्रएवेत्युक्तमादौमयाद्विजाः॥मदु
क्तंत्तथैवेतिदिव्यंचकरवाण्यहं॥२७॥अग्निर्दिव्यात्परंदिव्यंनास्त्येवेतिविनिश्चितं॥ ततोग्निर्दिव्यमद्यैवकरिष्या
म्युक्तसिध्दये॥२८॥विश्वाधिकोरुद्रएवेत्युक्तोल्केरेवसिध्दये॥तप्ततैलकटाहंवाप्रवेक्ष्यामिनसंशयः॥२९॥विश्वाधि
कोरुद्रएवसत्यमेतन्मुनीश्वराः॥सत्यमेतत्पुनःसत्यमुद्धृत्यभुजमुच्यते॥३०॥हरिंहरंतंश्रीरुद्रंविश्वस्येशानमव्ययं॥भज
ध्वंमुनयोनित्यंत्यक्त्वान्यामरपूजनं॥३१॥योन्याराधनसंसक्तःशंकरंनार्चयिष्यति॥नतस्मादधिकःपापीसचं
डालोनसंशयः॥३२॥जाग्रतिश्रीमहादेवेधर्मार्थफलदातरि॥तंविहायान्यममरंकस्समर्चितुमिच्छति॥३३॥कृता
नियेनपापानिविविधानिपुराःसदा॥ तेनत्रिलोचनादन्यःपूज्यतेकश्चनामरः॥३४॥ नित्यंत्रिलोचनादन्यःपूज्यते
कश्चनामरः॥३४॥ नित्यंत्रिलोचनादन्यंसुरंयःपूजयिष्यति॥ सलोचनोपिविप्रेंद्राःसविलोचनएवहि॥३६॥दुर्बु
ध्दयःपूजयिष्यंतिशिवान्यममरंद्विजाः॥सुधियःपूजयिष्यंतिशिवंकेवलमव्ययं॥३७॥शिवान्यंपूजयिष्यंतिशिवमा
याविमोहिताः॥शिवमायाविनिर्मुक्ताःशिवमेवार्चयंतिहि॥३९॥ शिवान्यंपूजयिष्यंत्तियेतेत्वशिवचिंतकाः॥सत्यमेत
त्पुनःसत्यमुत्धृत्यभुजमुच्यते॥३९॥कृतेपातकिनंदुष्टंनशिवान्यस्यपूजकं॥सत्यमेत०॥४०॥शिवान्यमशिवंज्ञात्वात
शिवंयोर्चयिष्यति॥तस्याशिवमसंदिग्धमिहमुत्रापिसर्वथा॥४१॥शिवार्चकाःप्राप्नुवंतिशिवमेवद्विजोत्तमाः॥
अशिवंप्राप्नुवंत्यन्येत्वशिवाराधकाःसदा॥४२॥भ्रमंत्यक्त्वाभवंतस्तुभवानीरमणंप्रभुं॥भगवंतंभवारातिंभज

ध्वंमभयप्रदं ॥४३॥ ॥सामवेद उवाच॥ ॥नमोहनायरुद्रायमोहनायनमोनमः॥मार्देहैमायश्रुत्यायधन्वनेचनमोनमः
॥४४॥नमोनमस्तापसायतापसेशायवैनमः॥नमोनमोविशालायश्रीपुनर्वसवेनमः॥४५॥मौंज्यायोर्म्या
वसैम्यायशंम्यायपरमात्मने॥नमःशिवायपारायसुपारायनमोनमः॥४६॥महापारायपार्यायपारदायन
मोनमः॥धुन्वतेपारविंदायपुरुषायनमोनमः॥४७॥नमःसुपुरुषायाथश्रीमहापुरुषायच॥नमोन्नायान्नपतये
एकाक्षायामिताक्षिणे॥४८॥नमोवपन्नदायापिरुद्रायामितवर्चसे॥ममस्तीरसदेभ्रूयःस्थिरायस्थिरधन्वि
ने॥४९॥नमःश्रीतिपदायापिनमःपटरिणेसदा॥नमस्त्रियंबकायापिनमस्तस्मैकपर्दिने॥५०॥नमोब्रह्माधिपतये
श्रीविष्णुपतयेनमः॥नमोखिलाधिपतयेविरूपाक्षायसुन्वते॥५१॥एकएवमहारुद्रःसर्वदेवोत्तमोत्तमः॥न
तस्मादधिकःकोपिसत्यमेवोच्यतेमया॥५२॥नयस्मादधिकोदेवोदेवदेवान्महेश्वरात्॥सएवसर्वदासेव्यःश्री
रुद्रोविश्वशासकः॥५३॥श्रीरुद्रादधिकःकोवाभविष्यत्यधिकःसुरः॥विष्ण्वाद्याःस्तुसुराःसर्वेशंकरस्यैवकिंक
राः॥५४॥इंद्रोपेद्रप्रभृतयःसर्वेशंकरकिंकराः॥तदन्यःशंकरःसोयंशंकरोदेवतोत्तमः॥५५॥शिवमेवाधिकंम
न्येदेवदेवोत्तमंप्रभुं॥देवोत्तमान्महादेवात्कोपिनास्त्यधिकःसुरः॥५६॥देवोत्तमोमहादेवःसर्वदेवनमस्कृतः॥सत्य
मेतत्पुनःसत्यंसत्यमेतन्नसंशयः॥५७॥शिवःकल्याणनिलयःसर्वदेवशिखामणिः॥सत्यमेतत्पु०॥५८॥शि
वएवप्रभुःश्रीमान्विष्णुब्रह्मादिपूजितः॥सत्यमे०॥५९॥विष्णुब्रह्मादिजनकःशिवएवसुरोत्तमः॥सत्यमेत०
॥६०॥विष्णुनेत्रार्चितारक्तदिव्यश्रीचरणःशिवः॥सत्यमेत०॥६१॥नशिवादधिकोदेवोश्रुतःश्रोतव्यए
ववा॥सत्यमे०॥६२॥शिवान्यस्त्वशिवस्तस्मादशिवोनाधिकःशिवात्॥सत्यमे०॥६३॥शिवान्योप्यधिको
स्तीतिजारजस्तुवदिष्यति॥सत्यमेत०॥६४॥देवोत्तमोमहादेवःसर्वदेवोत्तमोत्तमः॥सत्यमे०॥६५॥सर्व
वेदांतसंवेद्यःशिवएवद्विजोत्तमः॥सत्यमेत०॥६६॥स्वर्गापवर्गदोविप्राःशिवएवसदापूज्योभुक्तिमु

म

तिमन्महे।।सत्यमेत०।।६७।।शिवएवसदापूज्योभुक्तिमुक्तिफलेप्सुभिः।।सत्यमेत०।।६८।।सृष्टिस्थितिविनाशानांशिव
एवहिकारणं।।सत्यमे०।।६९।। बहवोविष्णवःपूर्वंलीलयायेननाशिताः।।तेनसोमेनकस्तुल्यःकस्तस्मादधिकोथवा।।७०।।
बहवोविधयःपूर्वंयेनदेवेननाशिताः।।तेनसोमेन०।।७१।। बहवोहरयःपूर्वंयेनदेवेननाशिताः ।।तेनसोमेन०।।७२।। बहवो
भानवःपूर्वंये०।।तेनसोमेन०।।७३।। बहवोवायवःपूर्वंयेन०।। तेनसोमेन०।।७४।। बहवोप्यग्नयःपूर्वंयेन०।।तेनसोमेन०
।।७५।। बहवोपियमाःपूर्वंयेनदेवेननाशिताः।।तेनसोमेनकस्तुल्यःकस्तस्मादधिकोथवा।। ७६।। बहवोभुजगाःपूर्वं
येनदेवेन०।। तेनसो०।।७७।।बहवोगिरयःपूर्वंयेन०।।तेनसोमे०।।७८।। बहवःसागराःपूर्वंयेन०।। तेनसोमे०।।७९।।ब
ह्मादिलोकपालस्कोविष्णुर्विधिरिंद्रश्चसर्वदा।। तस्मात्सदाशिवादन्यःकःपूजार्होभविष्यति।।यस्मैमयानमस्काराःकृताःपू
र्वमघापहाः।।सएवसर्वदेवेशःसत्यंसत्यंनसंशयः।।८१।।सविष्णुप्रमुखाधीशःसविष्ण्वादिपिताप्रभुः।।सएवपूज्य
ज्यःसर्वेषांसविष्ण्वादिपितायतः।।८२।।शिवएवाखिलाराध्यःसत्यंसत्यंमुनीश्वराः।। सत्यंसत्यंपुनःसत्यमुत्थत्य
भुजमुच्यते।।८३।।अग्निर्दिव्यंकरिष्यामिमदुक्तार्थस्यसिद्धये।। सत्यंसत्यंपुनः।।८४।। ।।अथर्वणउवाच।। ।।ओंका
रःप्रणवोज्ञेयःसर्वव्यापीसएवहि।। सर्वव्यापीतियोज्ञेयःसोनंत इतिमन्महे।।८५।। योनंतइतिविज्ञेयस्तत्तार इति
मन्यते।।यत्तारमितिविज्ञेयंतत्सूक्ष्ममितिगीयते।।८६।। यत्सूक्ष्ममितिविज्ञेयंतच्छुक्लमितिमन्यतां।।यच्छुक्लमिति
विज्ञेयंतद्धिःवैद्युतमेवहि।।८७।। यद्वैद्युतंतदेवैकंपरब्रह्मेतिमन्यतां।।सएकःसर्वभूतात्मासएकोरुद्रउच्यते।।
८८।।सईशानःसभगवान्समहेश्वरउच्यते।।समहादेवएवेशःसमहान्विष्णुवंदितः।।८९।।द्वितीयोनयतोरुद्रात्तत
एकःसउच्यते।।ब्रह्मविष्ण्वादिकान्लोकान्सृष्ट्वापातिसहंतिच।।९०।।स्वयंनित्योविभुःश्रेष्ठःसएकोरुद्रउच्यते।।रुद्र
स्त्रियंबकोनान्योरुद्रइत्यभिधीयते।।९१।।सर्वाल्लोकानीशानीभिरीशानेप्रौढशक्तिभिः।।सर्वव्यापी त्रिनयनस्तस्मा
दीशानउच्यते।।९२।।यःसर्वान्स्वभवानीक्षत्यात्मज्ञानमशेषतः।।सुनिरीक्षयतेयोगंतस्मात्सभगवान्शिवः।।यःसर्वलो

कान्संभक्ष्यः संभक्षयतिसंततं ॥ सृजत्यत्यधिसंवातितस्मात्सहिमहेश्वरः ॥९४॥ सर्वान्भवान्परित्यज्यज्ञानयोगेसुगोचरे ॥ स्वै
श्वर्येमहतिस्वच्छेमहादेवोमहीयते ॥९५॥ शिवोयंविश्वतश्चक्षुःशिवोयंविश्वतोमुखः ॥ शिवोयंविश्वतोबाहुर्विश्वतस्यान्महेश्व
रः ॥९६॥ रुद्रोयमग्नावुदकेओषधीष्वखिलेष्वपि ॥ रुद्रोयंसर्वभूतेषुभुवनेष्वपिवर्त्तते ॥९७॥ उपास्योयमुपास्योयंरुद्रएवा
निशंबुधैः ॥ सत्यंसत्यंपुनःसत्यमुद्धृत्यभुजमुच्यते ॥९८॥ मुनयःशिवएवैकोध्येयोनित्यंशिवंकरः ॥ सर्वमन्यत्परित्यज्य
तपसानाशकेनच ॥९९॥ यःसर्वैश्वर्यसंपन्नःशर्वःसर्वत्वरोहिसः ॥ अतःसर्वंपरित्यज्यपूजयंतुमहेश्वरं ॥१००॥ सर्वि
वःसर्वदुःखेभ्यःसंतारयतितारकः ॥ ततःसर्वंपरित्यज्यपूजयंतुमहेश्वरं ॥१॥ सर्वोपास्यःसर्वगोप्तासर्वेषामीश्वरःशिवः
॥ ततःसर्वं० ॥ २॥ ससर्वात्मामहादेवःसृजत्यवतिहंतिच ॥ ततःसर्वं० ॥३॥ विष्णुःस्वनेत्रपद्मेनपूजयामासशंकरं ॥ ततः
सर्वं० ॥ ४॥ ब्रह्मेंद्रप्रमुखाःसर्वेपूजयंतिमहेश्वरं ॥ ततःसर्वं० ॥५॥ यःस्वतंत्रःस्वतंत्रात्माशिवोमोक्षप्रदायकः ॥ ततःस
र्वं० ॥ ६॥ ससर्वेषामपिसंपूज्यःशिवोदेवशिवामणिः ॥ ततः० ॥९॥ श्रीरुद्रएवसंपूज्यःपरित्यज्यान्यदन्वहं ॥ सत्यंसत्यंपु
नःसत्यमुधृत्यभुजमुच्यते ॥१०॥ श्रीरुद्रएवसंपूज्यइत्युक्तस्वार्थसिद्धये ॥ प्रज्वलंतममुंवन्हिंहस्ताभ्यांसंवहाम्यहं ॥११॥
श्रीरुद्रएवसंपूज्योमुमुक्षुभिरहर्निशं ॥ मुनयोमनसावाचाकर्मणाचातियत्नतः ॥१२॥ श्रीरुद्रएवसंपूज्यइत्येवंनवदंतिये ॥
तेसर्वेजारजाज्ञेयाःसत्यमेवोच्यतेमया ॥१३॥ पूजयध्वंमहादेवंमाधवेंद्रादिपूजितं ॥ तदन्योमोक्षदोनास्तिसत्यंसत्यंन
संशयः ॥१४॥ ॥ गोतमउवाच ॥ ॥ इतिमूर्त्तिधरैर्वेदैरुक्तानिवचनानिते ॥ श्रुत्वासंतोषमापन्नामुनयःशौनकाद
यः ॥१५॥ तदानीमभवद्राजन्शीघ्रमेवाशरीरवाक् ॥ तामेववाचंवक्ष्यामिश्रुणुपापविनाशिनीं ॥१६॥ ॥ अश
रीरवाक्मुनयःसत्यमेवोक्तंवेदैःसर्वैरपिध्रुवं ॥ शिवान्योनाधिकःकोपिसत्यंसत्यंनसंशयः ॥१७॥ शिवादन्योधिकोना
स्तिशिवेनसदृशोथवा ॥ सत्यंसत्यंपुनःसत्यमुद्धृत्यभुजमुच्यते ॥१८॥ सर्वोत्तमोमहादेवःसर्वदेवशिखामणिः ॥ सत्यमे
तत्पुनःसत्यंसत्यमेतन्मुनीश्वराः ॥१९॥ सर्वैःपूज्योमहादेवःतस्यपूज्योनविद्यते ॥ तस्मात्पूज्योमहादेवःसर्वेषामपि
सर्वदा ॥२०॥ तत्पादपूजनाद्विष्णुर्विष्णुत्वंप्रापशर्मदं ॥ तमेवदेवदेवेशंपूजयध्वंसदाशिवं ॥ २१॥ भजध्वंगिरिजानाथं

मनोवाक्कायकर्मणिः॥ तभध्वंदुर्लभंमोक्षंत्र्यक्षाख्यंवेदितंद्विजाः॥२२॥ निधनेत्यादिभिर्मंत्रैः पूजयध्वंमहेश्वरं॥ परित्य
ज्यान्यदेवानामर्चनंबुद्धिपूर्वकं॥२३॥ अग्निरित्यादिभिर्मंत्रैर्विमृज्यांगानिभस्मना॥ भजध्वमप्रमादेनवृषभध्वज
मव्ययं॥२४॥ शिवमेवातियत्नेनपूजयध्वंमुनीश्वराः॥ अन्यथानरकावासोभविष्यतिनसंशयः॥२५॥ नयम
स्यकृपाविप्रास्ततोन्वहमुमापतिं॥ पूजयंत्वतियत्नेनविल्वपत्रादिभिःसदा॥२६॥ शिवमायापरिक्रांतानयावत्ता
वदन्वहं॥ पूजयध्वंप्रयत्नेनशिवमेवसुराधिपं॥२७॥ शिवमायापरिक्रांताभविष्यंतियदाजनाः॥ तदाशिवान्य
देवानांकरिष्यंतिहिपूजनं॥२८॥ शिवान्यदेवानाराध्यनराःसंसारभाजनाः॥ भूयोभूयोनसंसारात्प्रच्यवंत्यति
दुर्भगाः॥२९॥ संसारतारणोपायःशंकरस्यैवपूजनं॥ नतस्मादपरंविप्राःसत्यंसत्यंनसंशयः॥३०॥ यःशंकरं
देवदेवंनाभ्यर्च्ययतिसर्वदा॥ सदुर्भगइतिज्ञेयःसत्यंसत्यंमुनीश्वराः॥३१॥ भगवंतमुमाकांतंभाग्यवंतोभजं
त्यतः॥ भवंतोपिभजंत्वीशमनिशंशशिशेखरं॥३२॥ यन्मायया मोहितोयंविष्णुर्ब्रह्माप्ययंद्विजाः॥ तमेव
देवदेवेशंभजध्वंवृषभध्वजं॥ प्राप्नुवंतियदादुःखंब्रह्मविष्ण्वादयःसुराः॥ तदाभवंतितेसर्वेशिवमायाविमो
हिताः॥ तेसर्वदासुखंप्राप्यसंतिष्ठत्यविनश्वरं॥३५॥ अर्थंगाढंधतमसिनपश्यंतियथातथा॥ नपश्यंतिशिवंमूढाः
शिवमायाविमोहिताः॥३६॥ जरायुसंवृतंगर्भंनपश्यंतियथातथा॥ नपश्यंति०॥३७॥ समुद्रस्थंनपश्यंतिभ्रेष्ठंर
त्नंयथातथा॥ नपश्यंति०॥३९॥ ऊधोमध्यगतंक्षीरंनपश्यंतियथातथा॥ नपश्यंति०॥४०॥ मुकुटस्थोत्तमांगस्थं
नपश्यंतियथातथा॥ नपश्यंति०॥४१॥ सर्वव्यापीसर्वरूपःशिवःसर्वत्रतिष्ठति॥ तथापितंनपश्यंतिशिवमायावि
मोहिताः॥४२॥ शिवान्यान्पूजयंत्यज्ञाःशिवमायाविमोहिताः॥ संसारेपातयत्येतान्शिवमायादुरत्यया॥४३॥
पूज्योहमित्ययंविष्णुःशिवमायाविमोहितः॥ वदत्यज्ञोनजानातिशिवंस्वोत्पत्तिकारणं॥४४॥ ब्रह्माप्येवंनजा
नातिशिवंस्वोत्पत्तिकारणं॥ यथाविष्णुस्तथाब्रह्माशिवमायाविमोहितः॥ शिवमायामोहितानांविष्ण्वादी
पं॰११ नयेभवंतिविप्रेंद्राःशिवमायाविमोहिताः॥

नोंदुरात्मनां ।। स्वेष्वेव पूज्यताबुद्धिर्जायते निरयप्रदा ।। ४६ ।। जाग्रति श्रीमहादेवे नित्यं पूज्यतमे द्विजाः ।। यः पूज्य
मन्यं मनुते स तु चंडाल एव हि ।। ४७ ।। नित्यं पूज्यतमो देवः श्रीमहादेव एव हि ।। ४७ ।। ~~नित्यंपूज्यतमोदे~~ तस्मात्पूज्यत
मो नान्यो देवेष्वन्येषु वा द्विजाः ।। ४८ ।। महेश एव सततं पूजनीयो मनीषिभिः ।। सत्यमेतत्सत्यमेतदुद्धृत्य भुजमु
च्यते ।। ४९ ।। महेशान्नापरो देवः सेव्यो मुक्त्यर्थिभिर्द्विजाः ।। महेशादपरः को वा मुक्तिदाता भविष्यति ।। ५० ।। ।।
गौतम उवाच ।। ।। एवमानंददा राजन्श्रुता तैरशरीरवाक् ।। संतोषं परमं प्रापुः मुनयस्ते ततः परं ।। शिवमायाविनि
मुक्तो विष्णुश्च तदनंतरं ।। ऋषीन्देवान्पुरस्कृत्य बभाषे वचनं नृप ।। ५२ ।। ।। विष्णुरुवाच ।। ।। शिवमायामोहि
तेन विष्णुनैव मया पुरा ।। पूज्योऽहं मुक्तिदाता चेत्युक्तमज्ञानतो द्विजाः ।। ५३ ।। उन्मत्तवत्प्रलपितं मया पूर्वं मुनीश्वराः
।। तद्विस्मरंतु मुनयः क्षमध्वं मत्तभाषितं ।। ५४ ।। ग्रस्ताश्च सन्निपातेन प्रलपंति यथेच्छया ।। तथा प्रलापो ह्यकृतो मो
हितेनेशमायया ।। ५५ ।। यदा माहेश्वरी माया मोहयिष्यति मां तदा ।। मया प्रलापः क्रियते नान्यथा मुनिपुंगवाः
।। ५६ ।। यंयं माहेश्वरी माया मोहयिष्यति मोहिनी ।। तंतं मत्तं विजानाथ प्रलपंतं यथेच्छया ।। ५७ ।। देवदेवोत्त
मः सांबो मुक्त्यर्थिभिरहर्निशं ।। पूजनीयः प्रयत्नेन सत्यं सत्यं न संशयः ।। ५८ ।। जनको मम गौरीशो भवा
नी जननी मम ।। ततस्तौ पितरौ नित्यौ मम पूज्यतमौ शिवौ ।। ५९ ।। जनकः सर्वदेवानां जनयामास मां शिवः
।। ततः शिवो ददौ मह्यं विष्णुत्वं मुनिपुंगवाः ।। ६० ।। सुदर्शनाभिधं चक्रं वैकुंठं च ददौ शिवः ।। लक्ष्मीमपि ददौ मह्यं
नित्यमानंदवर्धिनीं ।। ६१ ।। मया मन्नेत्रपद्मेन पूजिते शिवपादुके ।। शिवपादुकयोरेव पूजनं क्रियते मया ।।
महता मम भाग्येन महादेवः कृपानिधिः ।। मुक्तिदो मत्कृतां पूजां स्वीकरोति प्रदक्षिणं ।। ६३ ।। ममाराध्यतमो दे
वः शिव एव मुनीश्वराः ।। तत एव मया नित्यं शिव एव हि पूज्यते ।। ६४ ।। शिव एव ममाराध्यः शिव एव धनं मम ।।
शिव एव मम स्वामी शिव एव प्रभुर्मम ।। ६५ ।। शिव एव हि निक्षेपः शिव एव हि जीवनं ।। शिव एव हि कल्याणं शिव

एवहिभूषणं ॥ ६६ ॥ शिवएवममाशास्या:शिवएवपितामम ॥ शिवएवममाभ्यर्च्य:शिवएवममेष्टद: ॥ ६७ ॥ शृणोम्यहंशिवक
था:शिवमेवार्चयाम्यहं ॥ पश्यामिशिवमेवाहंशिवमेववदाम्यहं ॥ ६८ ॥ यमाहु:श्रीमहादेवंवेदास्तमहमीश्वरं ॥ पूजयाम्यतिय
त्नेनप्रणमामिचसर्वदा ॥ ६९ ॥ यमाहु:पार्वतीनाथंवेदास्तमहमीश्वरं ॥ पूजयाम्यतियत्नेनप्रणमामिचसर्वदा ॥ ७० ॥ यमाहु:
श्रीविरूपाक्षंवेदास्तमहमीश्वरं ॥ पूजयाम्य० ॥ ७१ ॥ यमाहुर्जगतामीशंवेदास्तमहमीश्वरं ॥ पूजयाम्य० ॥ ७२ ॥ यमाहुपरमेशानंवे
दास्तमहमीश्वरं ॥ पूजया० ॥ ७३ ॥ यमाहु:शंभुमनघंवेदास्तमहमीश्वरं ॥ पूजया० ॥ ७४ ॥ यमाहुश्चंद्रशिरसंवेदास्तमहमीश्वरं ॥
पूजया० ॥ ७५ ॥ यमाहुस्तारकंब्रह्मवेदास्तमहमीश्वरं ॥ पूजया० ॥ ७६ ॥ यमाहु:सर्वकर्त्तारंवेदास्तमहमीश्वरं ॥ पूज० ॥ ७७ ॥
यमाहुर्निष्प्रतिद्वंद्वंवेदास्तमहमीश्वरं ॥ पूजयाम्यतियत्नेनप्रणमामिचसर्वदा ॥ ७८ ॥ यमाहुर्मोक्षफलदंवेदास्तमहमीश्वरं ॥
पूजया० ॥ ७९ ॥ यमाहुर्ज्ञानदातारंवेदास्तमहमीश्वरं ॥ पूजयाम्य० ॥ ८० ॥ यमाहु:शांतिदातारंवेदास्तमहमीश्वरं ॥ पूजया० ॥ ८१ ॥
यमाहु:श्रीमहेशानंवेदास्तमहमीश्वरं ॥ पूजया० ॥ ८२ ॥ यमाहु:शंकरंनित्यंवेदास्तमहमीश्वरं ॥ पूजया० ॥ ८३ ॥ यमाहु:शिवम
द्वैतंवेदास्तमहमीश्वरं ॥ पूजया० ॥ ८४ ॥ यमाहुर्निर्गुणंशांतंवेदास्तमहमीश्वरं ॥ पूजया० ॥ ८५ ॥ यमाहुर्निष्क्रियंशुद्धंवेदास्त
महमीश्वरं ॥ पूजया० ॥ ८६ ॥ यमाहुर्निष्कलंनित्यंवेदास्तमहमीश्वरं ॥ पूज० ॥ ८७ ॥ यमाहुस्त्र्यक्षमनघंवेदास्तमहमीश्वरं
॥ पूजयाम्य० ॥ ८८ ॥ यमाहुर्मृत्युहंतारंवेदास्तमहमीश्वरं ॥ पूजयाम्यतियत्नेनप्रणमामिचसर्वदा ॥ ८९ ॥ चतुर्थंशिवमद्वै
तंनभजंत्यनिशंतुये ॥ तेसर्वेपिदुरात्मान:सत्यंसत्यंनसंशय: ॥ ९० ॥ पुन:पुनर्विचार्येदमुच्यतेसादरंमया ॥ शिवएवान्व
हंपूज्योब्राह्मणायैर्विधानत: ॥ ९१ ॥ ॥ गौतमउवाच ॥ ॥ इतिविष्णुवच:श्रुत्वातेसर्वेमुनयोनृप ॥ संतोषंपरमंप्रा
पुस्तदालब्धधनाइव ॥ ९२ ॥ ॥ ब्रह्मोवाच ॥ ॥ शिवमायामोहितेनब्रह्मणेवपुरामया ॥ पूज्योहंमुक्तिदाताचे
त्युक्तमज्ञानतोद्विजा: ॥ ९३ ॥ प्रबलाशांभवीमायामोहयत्यखिलंजगत् ॥ जगन्मध्यगतंकिंमांनमोहयतिसाद्वि
जा: ॥ ९४ ॥ सर्वेपिमोहिता:पूर्वममरा:शिवमायया ॥ तन्माययामोहितास्तेविनष्टाश्चामरातदा ॥ ९५ ॥ मोहयत्य
मरान्सर्वान्महादेव:स्वमायया ॥ स्वमाययामोहितांस्तान्विनाशयतिसत्वरं ॥ ९६ ॥ सुरान्विनाशयित्वेश:सुरा

न्विनाशयित्वेशः सुरानन्यान्सृजत्यतः ॥ शिवमायामोहितास्तुविनश्यंत्येवसर्वथा ॥ ९७ ॥ शिवमायाविनिर्मुक्तोजातस्तीव्रम
हंद्विजाः ॥ नोचेद्विनाशोभविताममाप्यात्रनसंशयः ॥ ९८ ॥ यदाहंमोहितोह्यत्रश्रीमहादेवमायया ॥ तदैवमोहितोविष्णुः
श्रीमहादेवमायया ॥ ९९ ॥ कोवाविष्णुरहंकोवानंदिकेशोपिशंकरः ॥ कदाचिद्भवत्सर्वेशिवमायाविमोहितः ॥ १०० ॥ ब्रह्माण्डम
ध्येयावंतोविष्णुब्रह्मादयःसुराः ॥ तावंतोपिसुराविप्राः शिवमायाविमोहिताः ॥ १ ॥ शिवमायामोहितेनयद्यत्प्रलपितं
मया ॥ तत्क्षमध्वंमुनिःश्रेष्ठामनोवाक्कायकर्मभिः ॥ २ ॥ शिवएवसदापूज्योमुमुक्षुभिरनेकधा ॥ सत्यंसत्यंपुनःसत्य
मुद्धृत्यभुजमुच्यते ॥ ३ ॥ शिवमायाविमुक्तेनसत्यमेवोच्यतेमया ॥ ॥ पूज्यःसर्वप्रयत्नेनशिवएवमुमुक्षुभिः ॥ शिवा
न्यःकोस्तिदेवेषुसंपूज्योमुक्तिकांक्षिभिः ॥ ४ ॥ यतःशिवान्याःसर्वेपिजीवाएवेतिनिश्चयः ॥ शिवःपुण्यतमैरेव
पूज्यतेमुक्तिकांक्षिभिः ॥ ५ ॥ गतपुण्यैःपापरूपैःशिवान्यःपूज्यतेजनैः ॥ द्विजाधन्यास्तएवेतिविज्ञेयाःपुण्यसंश्रयाः
॥ ६ ॥ पूजयंतिमहादेवंयेनन्यशरणाःसदा ॥ मन्यंतेशिवमद्वैतंचतुर्थंब्रह्मवादिनः ॥ ७ ॥ सएवपरमात्मानोविजि
ज्ञास्योमुमुक्षुभिः ॥ सर्वव्यापीसर्वरूपःपरमात्मासदाशिवः ॥ ८ ॥ श्रुतिभिःपरमात्मानंःशिवएवेतिगीयते ॥ च
तुर्जालंब्रह्मकोशंयंमृत्युर्नविपश्यति ॥ ९ ॥ तमतीत्यस्थितःशुद्धपरमात्माशिवःस्मृतः ॥ यमाहुःशंकरंवेदाःसर्व
देवशिखामणिं ॥ सएवसर्वदापूज्योमुमुक्षुभिरनेकधा ॥ यमाहुःमोक्षदंवेदाःसर्वदेवशिखामणिं ॥ ११ ॥ सएवस
र्वदापूज्योमुमुक्षुभिरनेकधा ॥ यमाहुःनिष्क्रियंवेदाःसर्वदेवशिखामणिं ॥ १२ ॥ सएवसर्वदापूज्योमुमुक्षुभिरने
कधा ॥ यमाहुर्निर्गुणंवेदाःसर्वदेवशिखामणिं ॥ १३ ॥ सएवसर्वदा० ॥ यमाहुःशाश्वतंवेदाःसर्वदेवशिखा
मणिं ॥ सएव० ॥ १४ ॥ यमाहुःरक्षरंवेदाःसर्वदेवशिखामणिं ॥ सएव० ॥ १६ ॥ यमाहुरव्ययंवेदाःसर्वदेवशि
खामणिं ॥ सएव० ॥ १६ ॥ यमाहुरव्ययंवेदाःस० ॥ सएवस० ॥ १७ ॥ यमाहुस्त्र्यंवकंवेदाःसर्व० ॥ सएवस०
॥ १८ ॥ यमाहुःव्यापकंवेदाःसर्वदेवशि० ॥ सएव० ॥ १९ ॥ यमाहुःपरमंवेदास० ॥ सएवस० ॥ २० ॥ यमाहुःसर्वगंवे

दाः सर्वदेवशि०॥सएव०॥२१॥यमाहुःमंगलंवेदाः सर्वदे०॥सएव०॥२२॥यमाहुर्मन्मथारातिंवेदादेवशिखामणिं॥स
एव०॥२३॥यमाहुर्विष्णुजनकंवेदादेवशिखामणिं॥सएव०॥२४॥यमाहुर्वेदजनकंवेदादेवशिखामणिं॥सएव०॥
॥२५॥यमाहुर्वेदजनकंवेदादेव०॥सएव०॥२६॥यमाहुर्विष्णुहंतारंवेदादेव०॥सएव०॥२७॥यमाहुर्लोकहंता
रंवेदादेवशि०॥सएव०॥२८॥यमाहुरंबिकानाथंवेदादेवशिखामणिं॥सएव०॥२९॥यमाहुःस्कंदजनकं
वेदादेवशि०॥सएव०॥३०॥यमाहुर्ब्रह्मपरमंवेदादेवशि०॥सएव०॥३१॥यमाहुःपरमोदारंवेदादेवशि०॥सए
व०॥यमाहुर्ज्ञानमानंदंवेदादेवशि०॥सएव०॥३३॥यमाहुरादिपुरुषंवेदादेवशि०॥सएव०॥३४॥यमाहु
र्यज्ञपुरुषंवेदादेव०॥सएव०॥३५॥यमाहुर्गगनाकारंवेदादेव०॥सएव०॥३६॥यमाहुःश्रीमहाभर्गंवेदादेव०
॥सएवसर्वदापूज्योमुमुक्षुभिरनेकधा॥३७॥यमाहुःप्रणवाकारंवेदादेवशिखामणिं॥सएव०॥३८॥यमा
हुःशिवमव्यक्तंवेदादेवशि०॥सएव०॥३९॥शिवाभिधंपरंब्रह्मसेवनीयंप्रयत्नतः॥तत्सेवयैवविप्रेंद्रामु-
क्तिर्भवतिनान्यथा॥४०॥पार्वतीसहितोनित्यंध्यातव्यःश्रीमहेश्वरः॥४१॥मोक्षोनास्त्येवविप्रेंद्राःशिवलिंगार्च
नंविना॥तस्मात्प्रयत्नतःकार्यंशिवलिंगार्चनंबुधैः॥४२॥मुक्तिःप्राप्याद्विजश्रेष्ठाःशिवस्यैवार्चनात्ततः॥शि
वपूजाप्रयत्नेनकर्त्तव्यामुक्तिकांक्षिभिः॥४३॥योनित्यंश्रीमहादेवंनाभ्यर्च्चयतिमूढधीः॥सभुक्त्वानरकं
घोरंचंडालोपिभविष्यति॥४४॥सर्वदेवोत्तमोध्येयःशिवएवेतियोवदेत्॥सविप्रइतिविज्ञेयोजन्मजन्मांत
रेद्विजैः॥४५॥महेशएवसंपूज्योब्राह्मणैरितियोवदेत्॥सविप्रइ०॥६॥महादेवार्चनेनैवमुक्तिःप्राप्येति
योवदेत्॥सविप्र०॥७॥महादेवःसर्वरूपीसर्वव्यापीतियोवदेत्॥सविप्र०॥८॥महादेवोज्ञानरूपीज्ञान
दश्चेतियोवदेत्॥सविप्र०॥९॥महादेवःपरंब्रह्मपरमात्मेतियोवदेत्॥सविप्र०॥~~४९~~॥५०॥मुक्त्यर्थिभिः
शिवान्योपिसंपूज्यइतियोवदेत्॥सजारजइतिज्ञेयोजन्मजन्मांतरेद्विजैः॥५१॥शिवादप्यधिकोन्यो-

[margin: ^ सएव०॥यमाहुःप्रलयाकारंसर्वदेवशि०॥]

न्योस्तिसंपूज्यश्चेतियोवदेत् ॥ सजारज० ॥ ५२ ॥ यथाशिवस्तथाविष्णुस्तौतुल्याविति योवदेत् ॥ सजारजइ० ॥ ५३ ॥ दे
वोत्तमोमहादेवः कथंस्यादितियोवदेत् ॥ सजारज० ॥ ५४ ॥ देवतासार्वभौमत्वंशिवेनास्तीतियोवदेत् ॥ सजारजइ० ॥ ५५ ॥
विश्वाधिकोमहारुद्रः कथंस्यादितियोवदेत् ॥ सजारज० ॥ ५६ ॥ महादेवमहारुद्रशंकरेतिनयोवदेत् ॥ सजारज० ॥ ५७ ॥
शिवविश्वेशसर्वात्मन्महेशेतिनयोवदेत् ॥ सजारज० ॥ ५८ ॥ उमाकांतविरूपाक्षसर्वज्ञेतिनयोवदेत् ॥ सजा० ॥ ५९ ॥
देवतासार्वभौमेतिगौरीशेतिनयोवदेत् ॥ सजारज० ॥ ६० ॥ उमारमणविश्वात्मं॑न्नमरेशेतियोवदेत् ॥ सधन्यइतिविज्ञे
यः सत्यंसत्यंद्विजोत्तमाः ॥ ६१ ॥ विदारितनृसिंहेतिमहादेवेतियोवदेत् ॥ सधन्यइतिविज्ञेयः सत्यंसत्यंद्विजोत्तमाः ॥ ६२ ॥
विरूपाक्षामराधीशाकपर्दिन्नितियोवदेत् ॥ सधन्यइति० ॥ ६३ ॥ विष्णुतातमहारुद्रगौरीनाथेतियोवदेत् ॥ सधन्य०
॥ ६४ ॥ विष्णुपूजितपादाब्जचंद्रचूडेतियोवदेत् ॥ सधन्य० ॥ ६५ ॥ श्रीनीलकंठकामारेपरमेशेतियोवदेत् ॥
सधन्य० ॥ ६६ ॥ परात्परतरश्रीमन्विश्वनाथेतियोवदेत् ॥ सधन्य० ॥ ६७ ॥ यस्मिंकालेमहादेवंपूजइष्यतिसादरं ॥
सपूज्यः सर्वदादेवैः स्तुत्योवेदैश्वसर्वदा ॥ ६८ ॥ योनन्यशरणोनित्यंशिवमेवार्चयिष्यति ॥ सपूज्यः स० ॥ ६९ ॥
नित्यमव्यभिचारेणयः शिवाराधकोभवेत् ॥ सपूज्यस्स० ॥ ७० ॥ शिवान्यान्परिहायैवयः शिवंस्तोतिसर्वदा ॥
सपूज्य० ॥ ७१ ॥ भस्मत्रिपुंड्ररुद्राक्षैर्भूषितोयः शिवार्चकः ॥ सपूज्यः सर्वदादेवैस्तुत्योवेदैश्वसादरं ॥ ७२ ॥ शंकरं
मुक्तिदंत्यक्त्वायोन्यमभ्यर्चयिष्यति ॥ समुखस्थंपयस्त्यक्त्वारेतः पिबतिसादरं ॥ ७३ ॥ शिवान्यममरंभक्त्यायः पू
जयतिसंततं ॥ ससंसारीजन्मजन्मन्यतिकुत्सितयोनिजः ॥ ७४ ॥ नयस्यपार्वतीकांतेभक्तिरव्यभिचारिणी ॥ सतु
जारजएवेतिकर्त्तव्योनिर्णयोबुधैः ॥ ७५ ॥ दारिद्र्यंपापसंबंधोनिरयेगमनंतथा ॥ चंडालयोनिप्राप्तिश्चशिवान्यसुर
पूजनात् ॥ ७६ ॥ शिवान्यंसुरमभ्यर्च्यकः श्रीमान्भवतिद्विजाः ॥ शिवान्यपूजनात्पुंसांभवत्यशिवमेवहि ॥ ७७ ॥
शिवान्याराधनात्पुंसांदारिद्र्यमभिजायते ॥ दारिद्र्यात्पातकंकृत्वाप्रयांतिनरकंध्रुवं ॥ ७८ ॥ अनभ्यर्च्यशिवंपूर्वब

हृत्वोनरकंगताः॥ अग्रेप्यन्नेगमिष्यंतिशिवान्याराधकाजनाः॥ अनन्यायेमहादेवंनार्चयिष्यंतिसर्वदा॥ तेसर्वेपि
प्रयास्यंतिनरकंसत्यमुच्यते॥८०॥ शिवैकशरणाएवनभविष्यंतियेजनाः॥ तेसर्वेपि॰॥८१॥ शिवचिन्हांकिता
एवनभविष्यंतियेजनाः॥ तेसर्वे॰॥८२॥ शिवमेवप्रयत्नेनचिंतयंतिनयेजनाः॥ तेसर्वे॰॥८३॥ शिवमेवास्तिय
त्नेनप्रस्तुवंतिनयेजनाः॥ तेसर्वे॰॥८४॥ श्रुत्वाशंकरनामानिप्रहृष्टानभवंतिये॥ तेसर्वे॰॥८५॥ दृष्ट्वासंपूजितं
लिंगंप्रहृष्टानभवंतिये॥ तेसर्वे॰॥ ८६॥ आस्वाद्यशिवनैवेद्यंप्रहृष्टानभवंतिये॥ तेसर्वे॰॥ ८७॥ आघ्रायशिवनै
वेद्यंप्रहृष्टानभवंतिते॥ तेसर्वे॰॥ ८८॥ शिवलिंगमुपस्पृश्यप्रहृष्टानभवंतिये॥ तेसर्वे॰॥ ८९॥ ध्यात्वामहेश्वरंनि
त्यंप्रहृष्टान॰॥ तेसर्वे॰॥९०॥ ध्यात्वासर्वोत्तमंसांबंप्र॰॥ धन्याःसत्कुलसंभूताद्विजाश्चप्रतिजन्मनि॥९१॥ आ
घ्रायशिवनिर्माल्यंप्रहृष्टायेभवंतिते॥ धन्याःस॰॥९२॥ आस्वाद्यशिवनैवेद्यंप्रहृष्टायेभवंतिते॥ धन्याःस॰॥९३॥
शिवलिंगमुपस्पृश्यप्रहृष्टा॰॥ धन्याःस॰॥९४॥ दृष्ट्वासंपूजितंलिंगंप्र॰॥ धन्याःस॰॥९५॥ श्रुत्वाशंकरनामानिप्र॰
॥ धन्याः॰॥९६॥ श्रुत्वाशिवकथानित्यंप्रहृ॰॥ धन्या॰॥९७॥ धृत्वात्रिपुंड्ररुद्राक्षान्प्र॰॥ धन्या॰॥ ९८॥ कृत्वारुद्रजपं
नित्यंप्र॰॥ धन्या॰॥९९॥ कृत्वापंचाक्षरजपंप्रहृ॰॥ धन्याः॰॥१००॥ स्थित्वानित्यंशिवक्षेत्रेप्र॰॥ धन्याः॰॥१॥ शिवार्च
नपरादन्योनधन्यइतिमन्महे॥ सत्यमेतत्पुनःसत्यमुधृत्यभुजमुच्यते॥२॥ नमस्कुर्मःशांकरेभ्यःशांकरेभ्यःपुनर्न
मः॥ तेयतःशंकरस्यैवनित्यंकुर्वंतिपूजनं॥ भगवान्पार्वतीनाथोयथासर्वसुरोत्तमः॥ तथाशिवैकशरणःशांकरःपुरुषोत्तमः
॥४॥ संप्राप्यमानुषंजन्मयोनन्यशरणस्तदा॥ नार्चयिष्यत्युमाकांतंसचंडालोभविष्यति॥५॥ शिवानाराधकामर्त्याभजंत्य
त्यजतोद्विजाः॥ सत्यमेतत्पुनःसत्यमुधृत्यभुजमुच्यते॥६॥ द्विजाःसाहजिकीबुद्धिर्येषामस्तिशिवार्चने॥ तएवधन्याःपू
ताश्चएवपुरुषोत्तमाः॥७॥ शिवस्याभ्यर्चनाज्जातोगोविन्दपुरुषोत्तमः॥ पुरुषोत्तमइत्याख्यामतःप्रापजनार्दनः॥८॥ पु
रुषोत्तमताप्राप्ताविष्णयस्यास्तिसर्वदा॥ तेनशंकरपूजैवकर्त्तव्याविधिवद्विजाः॥ ९॥ महदैश्वर्यलब्धीछायस्यास्त्य

दिकं ॥ तेसर्वेनरकंघोरंप्राप्नुवंतिनसंशयः ॥ तस्मात्सर्वप्रयत्नेनसर्वथाभस्मधारणं ॥ ५६ ॥ कर्त्तव्यंवैदिकीमाज्ञांपालयद्भि
र्जैर्नृप ॥ शिवाज्ञावचनान्येनवेदाःसर्वेपिभूपते ॥ ५७ ॥ तस्माद्वेदोदितंनित्यंकर्त्तव्यंभस्मधारणं ॥ वेदोदितंयथानित्यंशि
वलिंगार्चनंनृप ॥ ५८ ॥ तथावेदोदितंनित्यंकर्त्तव्यंभस्मधारणं ॥ शिवलिंगार्चनंकार्यंभस्मधारणपूर्वकं ॥ ५९ ॥ शिवलिं
गार्चनंश्रौतंनकार्यंभस्मनाविना ॥ यावंतिश्रौतकर्माणिक्रियंतेप्रत्यहंद्विजेः ॥ ६० ॥ तावंतितानिकार्याणिभस्मधारण
पूर्वकं ॥ भस्मधारणहीनांगोयदिविप्रोभविष्यति ॥ ६१ ॥ सविप्रःसर्वधाराज्ञाहंतव्योनात्रसंशयः ॥ भस्मधार्यमितिप्रा
हमहेशोदेवतोत्तमः ॥ ६२ ॥ तद्वाक्यमाद्यौज्ञासाविप्रैःपालनीयैवयत्नतः ॥ महेशाज्ञासमुल्लंघ्ययोविप्रोभस्म
संत्यजेत् ॥ ६३ ॥ सदंडनीयोयत्नेनराज्ञाधर्मविदाध्रुवं ॥ विभूतिधारणंत्यक्तंयेनैकस्मिंदिनेनृप ॥ ६४ ॥ स
महापातकीज्ञेयस्तस्मात्यंतव्यएवसः ॥ द्विजैःप्रयत्नतःकार्यंनित्यंरुद्राक्षधारणं ॥ ६५ ॥ रुद्राक्षधारणंकार्यंशि
वपूजावदास्तिकैः ॥ शिवलिंगार्चनंधर्मस्तथारुद्राक्षधारणं ॥ ६६ ॥ तथैवभस्मनानित्यंत्रिपुंड्रस्यापिधारणं ॥ चतुर्दशी
व्रतंधर्मःसोमवारव्रतंतथा ॥ ६७ ॥ अष्टमीव्रतमप्येवंधर्म्माःसंतिसहस्रशः ॥ शिवव्रतानिभूपालबहूनिविविधानि
च ॥ ६८ ॥ संतितानियथाशक्तिकर्त्तव्यानियथाक्रमं ॥ शिवव्रतानिचीर्णानियेनसंततमादरात् ॥ ६९ ॥ तेनप्रा
प्तामुक्तिकांतासत्यंसत्यंनसंशयः ॥ शिवव्रतेषुयस्यास्तिप्रीतिसाहजिकीनृप ॥ ७० ॥ सतरत्येवसहसाघोरसं
सारसागरं ॥ ॥ राजोवाच ॥ ॥ भगवन्मुनिशार्दूलव्रतमेकंवदस्वमे ॥ सांगेयस्मिन्व्रतेचीर्णेसर्वान्कामानवा
प्नुयां ॥ ७१ ॥ ॥ गौतमउवाच ॥ ॥ उमामहेश्वरंनामव्रतमास्तिव्रतोत्तमं ॥ सांगेतस्मिन्व्रतेचीर्णेकामःसर्वोप्य
वाप्यते ॥ ७२ ॥ मासिभाद्रपदेशुक्लेपौर्णमास्यांप्रयत्नतः ॥ तद्व्रतकार्यमनघैःब्राह्मणाद्यैर्विधानतः ॥ ७३ ॥
भाद्रशुक्लचतुर्दश्यांप्रातस्नात्वाविधानतः ॥ शिवंसंपूज्ययत्नेनशैवानप्ययतियत्नतः ॥ ७४ ॥ शिवंध्यात्वाज
गद्वंद्यंसोमंसोमार्द्धशेखरं ॥ कृतांजलिपुटोभूत्वामंत्रमेनंपठेततः ॥ ७५ ॥ स्वःकरिष्येव्रतंयत्नादुमा

लि

माहेश्वराभिधं ॥ आज्ञां देहि महादेव सोमेश सोमार्द्धशेखर ॥ ७६ ॥ इति विज्ञाप्य देवाय पुनः संपूज्य यत्नतः ॥ मध्यान्हे
पि महादेवमर्चयेन्नियतो व्रती ॥ ७७ ॥ ततो देवान्‌ऋषीन्सर्वानभ्यर्च्य विधिवन्नृप ॥ हविष्याशी शिवं सायं पूजयेद्वि
धिपूर्वकं ॥ ७८ ॥ निद्रा कार्या यथायोगं महादेवस्य संन्निधौ ॥ उत्थाय पश्चिमे यामे महादेवं ततः स्मरेत् ॥ ७९ ॥ ततः शौ
चादिकं सर्वं निर्वर्त्य प्रीतमानसः ॥ स्नानं कुर्याद्यथायोगं यथाशास्त्रं यथाक्रमं ॥ ८० ॥ परिधाय ततो वस्त्रे क्षालिते शुभ्र
मक्षतं ॥ उद्धूलनं ततः कार्यं त्रिपुंड्रं च यथाक्रमं ॥ ८१ ॥ रुद्राक्षधारणं कार्यं संध्या कार्या ततः परं ॥ ततः शिवार्चनं का
र्यं बिल्वपत्रादिभिर्नवैः ॥ ८२ ॥ ततो होमोपि कर्त्तव्यः शिवप्रीत्यर्थमादरात् ॥ ततः परं नियमतः प्रणमेत्सोमम व्ययं ॥
॥ ८३ ॥ सग्रंथिकुशपुंजीलं ततः संपाद्यमादरात् ॥ सव्यपंचदशग्रंथितपुंजीलं शिवात्मकं ॥ ८४ ॥ एवं पंचदशग्रंथि
दोरकं कुंमान्वितं ॥ संपादनीयं यत्नेन व्रतनिष्ठैरनाकुलैः ॥ उमामहेश्वराकारं सौवर्णप्रतिमाद्वयं ॥ संपादनीयं
यत्नेन राजतं वा मनोहरं ॥ ८६ ॥ पलादूनं न कर्त्तव्यं प्रतिमाद्वयमुत्तमं ॥ अधिकं चेद्यथाशक्ति कर्त्तव्यमतियत्नतः
॥ ८७ ॥ सौवर्णो राजतो वापि ताम्रो वा कलशो नवः ॥ संपादनीयो यत्नेन प्रयतैर्व्रततत्परैः ॥ ८८ ॥ ततः सदर्भपुंजी
ले वस्त्रयुग्मान्विते शुभे ॥ पृथक्पृथक्स्थापनीयं कलशे प्रतिमाद्वयं ॥ ८९ ॥ आपो हि ष्ठादिभिर्मंत्रैस्तथा त्र्यंबकै
रपि ॥ अभिषिच्य प्रयत्नेन पूजयेत्प्रतिमाद्वयं ॥ ९० ॥ ततः प्रयत्नतो गच्छेदलंकृतशिवालयं ॥ शिवस्थानं ततो ग
च्छेत्तोरणाद्यैरलंकृतं ॥ ९१ ॥ ततः षोडशपद्मांके बहिरंतश्चतुर्गुणे ॥ अलंकृते स्वस्तिकाद्यैः स्थापयेत्कलशं नवं ॥
॥ ९२ ॥ ध्यायेत्ततो महादेवमुमादेहार्धधारिणं मुक्तामालापरीतांगं दुकूलपरिवेष्टितं ॥ ९३ ॥ पंचाननमुमाकांतंअ
नंतेंदुरविप्रभं ॥ चंद्रार्धशेखरं नित्यं जटामुकुटमंडितं ॥ ९४ ॥ त्रिपुंड्ररेखाविलसद्भालभागमनामयं ॥ भस्मोद्धूलि
तसर्वांगं रुद्राक्षाभरणान्वितं ॥ ९५ ॥ मंदस्मितमनाधारं आधारं जगतां प्रभुं ॥ वेदैरनंतैरनिशं स्तूयमानमनेकधा ॥
९६ ॥ वेदात्मकं वेदवेद्यं विष्णुब्रह्मादिवंदितं ॥ विष्णुनेत्रार्चितारक्तपादपंकजमुत्तमं ॥ ९७ ॥ अप्रतिद्वंद्वमद्वंद्वं सर्ववंद्य

विकल्पासदा॥ तेनशंकरपूजैवकर्त्तव्याविधिवद्द्विजाः॥१०॥ नित्यमारोग्यवांछास्ति यस्यामरणमन्वहं॥
तेनशं०॥११॥ यस्यास्तिमुक्तिकांतेछासर्वदासावधानतः॥ तेनशं०॥१२॥ यस्यानेकमहापापविनाशेछाभवि
ष्यति॥ तेनशं०॥१३॥ यस्यास्तिस्वर्गभोगेछाविनयागान्प्रयत्नतः॥ तेनशं०॥१४॥ द्विजाविष्णुत्वलब्धीछायस्या
स्यतिसुखप्रदा॥ तेनशं०॥१५॥ भूचक्रपालकत्वेछायस्यास्यतिसुखप्रदा॥ तेनशंकर०॥१६॥ यस्यास्त्विंद्रत्व
लब्धीछासर्वदासुखदायिनी॥ तेनशंक०॥१७॥ यस्यभूसर्जकत्वेछासर्वदासुखदायिनी॥ तेनशं०॥१८॥ यस्य
सूर्यत्वलब्धीछासर्वदासुखदायिनी॥ तेनशंकर०॥१९॥ यस्यचंद्रत्वलब्धीछासर्वदासुखदायिनी॥ तेन०॥२०॥ यस्या
स्यग्नित्वलब्धछासर्वदासुखदायिनी॥ तेनशं०॥२१॥ यस्यवायुत्वलब्धीछासर्वदासुखदायिनी॥ तेन०॥२२॥ यस्यकाल
त्वलब्धीछासर्वदासुखदायिनी॥ तेनशंकर०॥२३॥ योनन्यशरणोनित्यंसर्वकामप्रदंशिवं॥ पूजयिष्यति पुण्यात्मासस्मा
प्नोत्यभीप्सितं॥२४॥ शिवपूजात्मकोधर्मः सर्वधर्मोत्तमोत्तमः॥ नतस्मादधिकोधर्मोसत्यमेवोच्यतेमया॥२५॥ वाजपेया
दिकायागाःकोटिशोपिकृताद्विजाः॥ नशिवार्चनधर्मेणसदृशाः सत्यमुच्यते॥२६॥ शिवार्चनंपरोधर्मः सत्यंसत्यंमुनी
श्वराः॥ सत्यंसत्यंपुनःसत्यंउद्धृत्यभुजमुच्यते॥२७॥ महेशपूज्यकोत्स्यंशकोट्यंशेनापिवस्तुतः॥ यागादिधर्माःस
र्वेपिनसमाइतिनिश्चयाः॥२८॥ ॥गौतमउवाच॥ ॥इत्युदीरितमाकर्ण्यब्रह्मणोवचनंद्विजाः॥ स्वात्मानंमेनिरे
सर्वेकृतार्थंनृपसत्तम॥२९॥ ततःपरंमुनिश्रेष्ठाःशिवमेवसुरोत्तमं॥ मत्वापूज्यतमंनित्यंपूजयामासुरन्वहं॥३०॥
ब्रह्मोपेंद्रादयोदेवाः गंधर्वाश्चततःपरं॥ शिवमेवातियत्नेनपूजयामासुरन्वहं॥ देवोत्तममहादेवशंकरोमापते
शिव॥ नीलकंठेतिसततंवदंतःसंस्थिताःसुराः॥३२॥ तस्मात्सर्वपरित्यज्यशिवमेवशिवंकरं॥ पूजयस्वातियत्ने
नचतुर्वर्गफलप्रदं॥ नशिवाराधनादन्यच्चतुर्वर्गफलप्रदं॥ सत्यमेव[illegible]पुनःसत्यमुद्धृत्यभुजमुच्यते॥ राजन्किंबहुनोक्तेनस
त्यमेकंवचःश्रुणु॥ शिवएवसदापूज्यःचतुर्वर्गफलार्थिभिः॥३४॥ ब्रह्मक्षत्रियवैश्यानांवेदमार्गानुवर्त्तिनां॥ शिवार्चनं

परोधर्मास्त्रिपुंड्रस्यचधारणं॥३५॥अग्निरित्यादिभिर्मंत्रैर्भस्मसंशोध्यसादरं॥धारणीयंललाटादौत्रिपुंड्रंकेवलंद्विजैः॥३५॥ब्रह्मक्षत्रियवैश्यायेतेसर्वेपिद्विजानृप॥तस्माद्विजैःप्रयत्नेनत्रिपुंड्रंधार्यमन्वहं॥३६॥यस्योपनयनंराजन्सएव द्विजउच्यते॥तस्माच्छ्रौतंद्विजैःकार्यंत्रिपुंड्रस्यचधारणं॥३७॥विभूतिधारणंत्यक्त्वायःसत्कर्मसमाचरेत॥तत्कृतं चाकृतप्रायंभवत्येवनसंशयः॥३८॥कृतमप्यकृतंकर्मभवत्यनधिकारिणा॥तस्माद्भस्मविहीनेनकृतंकर्मवृथा-ध्रुवं॥३९॥विभूतिधारणंत्यक्त्वाकुर्याद्यःकर्मवैदिकं॥सनतत्कर्मफलभाक्नारकीयंभविष्यति॥४०॥नगायत्र्युपदेशोपिभस्मनोधारणंविना॥ततोधृत्वैवभस्मांगेगायत्रीजपमाचरेत्॥४१॥गायत्रीमूलमेवाहुर्ब्राह्मण्यंमुनिसत्तमाः॥सभस्मधारणाभावेनकेनाप्युपदिश्यते॥४२॥नतावधिकारोस्तिगायत्रीग्रहणेनृप॥यावन्नभस्मभालादौधृतमग्निसमुद्भवं॥४३॥भस्ममूलंनृपश्रेष्ठब्राह्मण्यमितिगीयते॥तस्माद्भस्मविहीनस्यब्राह्मण्यंनास्तिसर्वथा॥४४॥भस्महीनललाटत्वमब्राह्मण्यानुमापकं॥अब्राह्मण्यव्याप्तएवहेतुरुक्तोमयानृप॥४५॥मंत्रमूलंसितंभस्मललाटेयस्यवर्तते॥सएवब्राह्मणोराजन्सत्यंसत्यंनसंशयः॥४६॥यस्यास्तिसहजाप्रीतिर्विभूत्युद्धूलनादिषु॥सएव०॥यस्यास्तिसहजाप्रीतिर्मणिवद्भस्मसंग्रहे॥सएवब्राह्मणोराजन्०॥४८॥यस्यास्तिसहजाप्रीतिर्मणिवद्भस्मसंग्रहे॥सएवब्राह्मणोराजन्०॥४९॥नयस्यसहजाप्रीतिस्त्रिपुंड्राचरणेनृप॥सचांडालइतिज्ञेयोजन्मजन्मांतरेध्रुवं॥५०॥नयस्यसहजाप्रीतिर्विभूत्युद्धूलनादिषु॥सचांडालइतिज्ञेयोजन्मजन्मांतरेध्रुवं॥५१॥नयस्यसहजाप्रीतिर्मणिवद्भस्मसंग्रहे॥सचंडालइतिज्ञेयोजन्मजन्मांतरेध्रुवं॥५२॥कालाग्निरुद्रोपनिषज्जाबालोपनिषच्चसा॥त्रिपुंड्रंधारणंकार्यमितिबोधयतिद्विजान्॥५३॥सत्यंवदेत्युपारभ्यधर्मानाहयदाश्रुतिः॥भूत्यैप्रमदितव्यंनसर्वथत्योहहिस्फुटं॥५४॥अग्निरित्यादिभिर्मंत्रैर्भस्मनांगानिसंस्पृशेत्॥इत्याहाथर्वणोसाक्षात्सर्वपापाविमुक्तये॥५५॥येभस्मधारणंत्यक्त्वाभुंजतेन्नफला-

स्त्रिपुंड्राचरणे सदा॥ पं॰१२

रकार्चितं ।। सर्वोत्तममनाद्यंतं सर्वदेवनिषेवितं ।। ९८ ।। ऋतं सत्यं परं ब्रह्म पुरुषोत्तमं पुरुषं कृष्णपिंगलं ।। ऊर्ध्वरेतं विरूपाक्षं विश्वरूपं
चिदात्मकं निष्कलं निर्गुणं शांतं निरवद्यं निरंजनं ।। अप्रमेयं जगज्जन्मस्थितिसंहारकारणं ।। ९९ ।। विश्वबाहुं विश्वपादं विश्वाक्षं वि
श्वशंभुवं ।। विश्वं नारायणाराध्यमक्षरं परमं पदं ।। १०० ।। विश्वतः परमं नित्यं विश्वस्येशमनामयं ।। एवं ध्यात्वा महादेवं सर्वदेवोत्तमो
त्तमं ।। १ ।। ध्यायेत्ततः परं गौरीमादिविद्यामनामयां ।। लक्ष्मीसेवितपादाब्जां शचीसेवितपादुकां ।। २ ।। सरस्वत्यादिभिर्नित्यं स्तू
यमानपदांबुजां ।। अधरोष्ठाधरीभूतपक्वबिंबफलामुमां ।। ३ ।। मुखकांतिकलोपेतं पूर्णचंद्रामनामयां ।। तिरस्कृतालिमा
लां तामलकावलिभिः सदा ।। ४ ।। पीनवक्षोजानिर्धूतचक्रवाकवरांगनां ।। नित्यं तिरस्कृतांभोजनयनास्यामनिंदितां
।। ५ ।। सीमंतधिक्कृताशेषकामभल्लामहर्निशं ।। भ्रूकुटोड्डीकृताशेषकामभल्लामलंकुरां ।। बाहुनालकरोद्भूतहेममा
लाविलासिनीं ।। रोमावलीतिरोभूतभ्रमद्भ्रमरनालिकां ।। ७ ।। नाभिरंध्रतिरोभूतघनावर्त्तामनाकुलं ।। उत्तमोरुतिरो
भूतरंभास्तंभाशुभावहां ।। ८ ।। पादयुग्मप्रभापूरनिर्जितारुणपंकजां ।। ब्रह्मेंद्रोपेंद्रजननीं महेशार्धांगभागिनीं ।। ९ ।।
महेशाश्लिष्टवामांगां वरदाभयदां सदा ।। प्रसन्नवदनां नित्यं स्मितपूर्वाभिभाषिणीं ।। १० ।। वृत्तचंद्रदुकूलाढ्यां
नानाभरणभूषितां ।। स्तूयमानां सदा देवैर्दांतैरपि कोटिशः ।। ११ ।। एवं ध्यात्वा ततस्सम्यगुपचारान्प्रकल्पयेत् ।। त
तः पुष्पाणि संगृह्य शिवमावाहयेच्छिवां ।। १२ ।। ।। आवाहनं ।। ।। महादेव कृपासिंधो विष्णुब्रह्मादिवंदितः ।।
आवाहयामि देवेश प्रसीद परमेश्वर ।। १३ ।। लक्ष्म्यादिदेववनितापरिसेवितपादुके ।। आवाहयामि देवि त्वां प्रसी
द परमेश्वरि ।। १४ ।। ।। इत्यावाहनं ।। ।। गृहाण सोम विश्वात्मन्नासनं रत्ननिर्मितं ।। अनंतासन विश्वेश कुरु
णासागर प्रभो ।। उमे सोमसमाश्लिष्टे सोमार्धकृतशेखरे ।। नानारत्नसमाकीर्णमासनं प्रतिगृह्यतां ।। १६ ।। ।।
इत्यासनं ।। ।। अर्घ्यं गृहाण देवेश सपुष्पं गंधसंयुतं ।। शिवानंतगुणग्राम सर्वाभीष्टप्रदायक ।। १७ ।। गृहाणा
र्घ्यं शिवे नित्ये सर्वावयवशोभिनी ।। शिवप्रिये शिवाकारे नित्यं भक्तवरप्रदे ।। १८ ।। ।। इत्यर्घ्यं ।। ।। पाद्यं

ग्रहाणगौरीशस्वर्णपात्रस्थितंशुभं॥ ग्रहाणदेविपाद्यंत्वंवेदवेदांतसंस्तुते॥१९॥ ॥इतिपाद्यं॥ ॥ग्रहाणाचमनं उ॰ श्रा॰ स॰
शंभोश्शुचिर्भूतश्शुचिप्रिय॥ ग्रहाणाचमनंशंभोश्शुचिर्भूतेश्शुचिप्रिये॥ ॥इत्याचमनं॥ ॥ मधुपर्कंग्रहाणेशासर्वदामधु
पर्कद॥ मधुपर्कप्रदानेनप्रीतोभवमहेश्वर॥२१॥ मधुपर्कमिदंदेविस्वीकुरुप्रियशंकरे॥ मधुपर्कप्रदानेनसुप्रीताभवशोभने
॥२२॥ ॥इतिमधुपर्कं॥ ॥शंभोपंचामृतस्नानंस्वीकुरुष्वकृपानिधे॥ सर्वतीर्थमयंस्वामिन् नित्यपावनपावन॥
॥२३॥ शिवेपंचामृतंस्नानंस्वीकुरुष्वशिवप्रिये॥ सृष्टतीर्थोत्तमेश्शुत्स्येतीर्थराजनिषेविते॥२४॥ ॥इतिपंचामृतस्नानं॥
शंभोश्शुध्धोदकस्नानंस्वीकुरुष्वसुरोत्तम॥ प्रसीदपरमेभक्तंपाहिमांकरुणानिधे॥२५॥ शिवेश्शुध्धोदकस्नानंस्वीकुरुस्व
स्लोचने॥ प्रसीददेविदीनत्वंपाहिमांशरणागतं॥२६॥ ॥इतिश्शुध्धोदकस्नानं॥ ॥सोत्तरीयंग्रहाणेशदुकूलमि
दमुत्तमं॥ पाहिपाहिकृपासिंधोकरुणाकरशंकर॥२७॥ सोत्तरीयंग्रहाणेदंदुकूलंशंकरप्रिये॥ प्रसीदपाहिमांदी
नमनन्यशरणंशिवे॥२८॥ ॥इतिवस्त्रं॥ ॥उपवीतंग्रहाणेशशंभोसर्वामरोत्तम॥ उपवीतंग्रहाणत्वशिवसंश्लि
ष्टविग्रहे॥२९॥ ॥इत्युपवीतं॥ ॥ ग्रहाणचंदनंरम्यंनानागंधविराजितं॥ प्रसीदपार्वतीनाथशरणागतवत्सल॥३०॥
ग्रहाणचंदनंदेविचंद्रभागविराजितं॥ विश्वंविश्वात्मिकेपाहिविश्वनाथप्रियेसदा॥३१॥ ॥इतिचंदनं॥ ॥गृहाणाभरणानीश
निरीशनिगमाश्रयविश्वाभरणविश्वेशरत्नाभरणभूषित॥३२॥ गृहाणाभरणान्यंबेसर्वाभरणभूषिते॥ शर्वप्रियेजगद्वंद्येज
गदानंददेशिवे॥३३॥ ॥इत्याभरणं॥ ॥ ग्रहाणबिल्वपत्राणिसपुष्पाणिमहेश्वर॥ सुगंधीनिनवानीशसबिल्वकु
सुमप्रिय॥३४॥ ग्रहाणबिल्वपत्राणिसामोदानिशिवप्रिये॥ सुगंधबिल्वमंदारमालिकासमलंकृते॥३५॥ दशांगगु
ग्गुलंधूपंसगोघृतमनुत्तमं॥ ग्रहाणभक्तवरदेलक्ष्मीवाण्यादिसेविते॥३७॥ ॥इतिधूपं॥ ॥साज्यंत्रिवर्त्तिविस्फूर्ज
दीपंशर्वशिवापते॥ ग्रहाणानंतसूर्याग्निचंद्रप्रभनमोस्तुते॥३८॥ साज्यंत्रिवर्त्तिविस्फूर्जदीपमीशानवल्लभे॥ ग्रहा
णचंद्रसूर्याग्निमंडलाधिकसुप्रभे॥३९॥ ॥इतिदीपं॥ ॥शंभोगोघृतसंयुक्तंपरमान्नंमनोहरं॥ सर्वशर्करंग्र
हाणेशनित्यतृप्तमहेश्वर॥ शिवेगोघृतसंयुक्तंपरमान्नंमनोहरं॥ सशर्करंग्रहाणात्वपरमान्नप्रदायिनि॥४१॥ ॥

पं॰५ इतिसबिल्वंपुष्पपूजा॥ दशांगंगुग्गुलंधूपंसगोघृतमनुत्तमं॥ ग्रहाणपार्वतीनाथघ्राणतर्पणमादरात्॥३६॥ ॥

श्रीशिव
१८३

दृशांगगुग्गुलं॥ इतिनैवेद्यं॥ ॥शंभोगृहाणगंधाद्यमिदमाचमनीयकं॥ कृताचमन देवेशस्त्वतःशुध्यशिवापते॥ ४२॥ शि
वेगृहाणगंधाढ्यमिदमाचमनीयकं॥ शुध्देशुध्धिप्रदे देविशिव भूषितविग्रहे॥ ४३॥ ॥ इत्याचमनं॥ ॥ नीराजनंगृ
हाणेशबहुदीपविराजितं॥ स्वप्रकाशप्रकाशात्मन्प्रकाशितदिगंतर॥ ४४॥ नीराजनंगृहाणांबसर्वनीराजितप्रभे॥ प्रभा
पूरितसर्वांगेमंगलेमंगलास्पदे॥ ४५॥ नीराजनं॥ ॥ शंभोगृहाणतांबूलं एलाकर्पूर संयुतं॥ प्रसीदभगवन्छंभोसर्वज्ञामित
विक्रम॥ ४६॥ शिवेगृहाणतांबूलमेलाकर्पूरसंयुतं॥ प्रसीद सस्मितेदेविसोमालिंगितविग्रहे॥ ४७॥ ॥ इतितांबूलं॥ ॥
गृहाणपरमेशानसरत्नेछत्रचामरे॥ दर्पणंव्यजनंचेशासर्वदुःखविनाशक॥ ४८॥ गृहाणोमेसुराराध्येसरत्नेछत्रचामरे॥ द
र्पणंव्यजनंचाद्येविद्याधारेनमोस्तुते॥ ४९॥ ॥ छत्रचामरसमर्पणं॥ ॥ मदक्षिणनमस्कारान्गृहाणपरमेश्वरि॥ नर्तनंचमहादेवि
शिवनास्यप्रियेशिवे॥ ५१॥ ॥ इतिप्रदक्षिणनमस्काराः॥ ॥ एवंप्रयत्नतःकृत्वाशिवयोःपूजनंशिवं॥ शिवानींचप्रयत्ने
न पुनःसंपूजयेत्कले॥ ५२॥ एवंसंपूज्ययत्नेनशिवमंबांचसादरं॥ ततोंगपूजाकर्त्तव्याशिवयोर्यत्नपूर्वकं॥ ५३॥
मूलमंत्रेणकर्त्तव्यंपूर्वोक्तमपिपूजनं॥ उक्तमंत्रंसमुच्चार्ययथापूर्वंयथाक्रमं॥ ५४॥ शिवस्यमूलमंत्रस्तुश्रीमत्पंचा
क्षरःस्मृतः॥ आवहंतीतिमंत्रस्तुभवान्याःपरिकीर्त्तितः॥ ५५॥ ॥ शिवायनमः॥ शिरःपूजयामि॥ कपर्दिनेनमः॥ क
पर्दं पूज०॥ भाललोचनाय०॥ फालं०॥ सोमसूर्याग्निलोचनाय०॥ नेत्राणिपू०॥ वेदवक्त्रा०॥ वक्त्रं०॥ श्रुतिश्रोत्राय०॥
श्रोत्राणि०॥ घ्रातगंधाय०॥ घ्राणानिपू०॥ स्मृतिदंताय०॥ दंतान्पू०॥ श्रुतिजिह्वाय०॥ जिह्वां०॥ वेदकपोलाय०॥ कपो
लानिपू०॥ ज्ञानोष्टाय०॥ ओष्टान्०॥ नीलकंठायन०॥ कंठान्०॥ भूरिवक्षसे०॥ वक्षांसि०॥ हिरण्यबाहवे०॥ बाहून्०॥ विश्वोद
राय०॥ उदराणि०॥ विश्वपार्श्वायनमः॥ पार्श्वान्०॥ विश्वकटयेन०॥ कटीन्पूज०॥ विश्वोरवेन०॥ ऊरून्पू०॥ विश्वजंघा
यन०॥ जंघान्पू०॥ विश्वपदे०॥ पादान्पू०॥ विश्वनखाय०॥ नखान्पू०॥ सर्वात्मकाय०॥ सर्वांगंपूजयामि॥ ॥ शिवायै०
शिरःपू०॥ पृथुवेण्येन० वेणीं०॥ सीमंतराजितायै० सीमंतं०॥ कुंकुमफालायै० फालं०॥ सोमसूर्याग्निनेत्रायै० नेत्रा

णि०॥ श्रुतिश्रोत्रायै० श्रोत्रे०॥ गंधप्रियायै० घ्राणं०॥ सुभगकपोलायै० कपोले०॥ कुन्दलदंतायै०॥ दंतान्पू०॥ विद्या
जिह्वायै० जिह्वां०॥ बिंबोष्ठायैनमः॥ ओष्ठौ०॥ वृत्तकंठायैनमः॥ कंठं०॥ पृथुकुचायै०॥ कुचौ०॥ विश्वगर्भायैन०॥ उदरं०॥
सुक्ष्मकट्यै० कटिं०॥ दिव्योरुदेशायै०॥ ऊरू०॥ वृत्तजंघायै० जंघे०॥ लक्ष्मीसेवितपादुकायै०॥ पादौ०॥ महेश्वरप्रिया
यै०॥ नखान्०॥ शोभनविग्रहायै० सर्वांगंपूजयामि॥ ॥ अंगपूजांसमाप्यैवं दोरकंचसमर्पयेत्॥ प्रत्येकंग्रं
थिषुस्वच्छेष्वच्छैर्बिल्वदलादिभिः॥ ५६॥ प्रथमग्रंथिमारभ्यनमः सोमेतिमंत्रतः॥ यथाक्रमेणसंपूज्यततोधा
र्य्यहिदोरकं॥ ५७॥ तत्रोपचाराः सर्वेपितेनमंत्रेणसादरंव्रतिभिर्यत्नतः॥ कार्य्यंकुंकुमांकितदोरके॥ ५८॥ ततःपं
चदशप्रस्थगोधूमास्तंदुलापिवा॥ उपायनार्थमानेयाः शुध्धाः कीटाद्यदूषिताः॥ ५९॥ यद्वापंचदशाज्यात्क
गोधूमापूपमंटकाः॥ उपायनार्थमानेयाः कृष्णगोघृतपाचिताः॥ ६०॥ ततःशिवैकशरणः शैवः शैवव्रतप्रि
यः॥ पूजनीयः प्रयत्नेनगंधपुष्पादिभिःक्रमात्॥ ततःसवस्त्रंकलशंशिवयोः प्रतिमाह्वयं॥ ततःसवस्त्रंक
शंशिवयोः प्रतिमाह्वयं॥ शैवायदेयंयत्नेनसुवर्णफलसंयुतं॥ ६२॥ आदावुपायनंदत्वादेयमेतत्ततःपरं॥ उपायन
स्यमंत्रोपिवक्ष्यतेत्रविशेषतः॥ ६३॥ उमेशःप्रतिगृह्णातुउमेशोवैददातिच॥ उमेशस्तारकोभाभ्यामुमेशायनमो
नमः॥ ६४॥ अमुंमंत्रंसमुच्चार्यदत्वोपायनमादरात्॥ उपायनादिदानंयत्तच्छिवायनिवेदयेत्॥ ६५॥ ततःशैवाःप्र
यत्नेनभोजनीयाविशेषतः॥ सुवासिन्योपियत्नेनभोजनीयाःशिवाप्रियाः॥ ६६॥ शैवानेवंभोजयित्वास्वयंभुंजीत
वाग्यतः॥ अतिथीनपिसंतर्प्यद्वारदेशस्थितान्नृप॥ ६७॥ एवंप्रयत्नतःकार्यंप्रतिवत्सरमादरात्॥ नियमेनैवविधिवदु
त्करीत्याययथाक्रमं॥ ६८॥ ब्राह्मणाद्यैरिदंकार्यंव्रतमाहितमानसैः सर्वाभीष्टप्रदंपुण्यंव्रतमेतच्छिवात्मकं॥ ६९॥ प्राप्तेतु
षोडशेवर्षेकार्यमुद्यापनंनृप॥ उद्यापनविधानंचवक्ष्येशृणुयथाक्रमं॥ ७०॥ पौर्णमास्यांभाद्रपद्यांव्रतोद्यापनमाद०

रात्॥ कर्त्तव्यमतियत्नेनद्रव्यंसंपाद्यसादरं॥७१॥ हैमाः पंचदशोत्कृष्टाः शिवयोः प्रतिमाः शुभाः॥ कारणीयाः प्रय
त्नेनतत्तल्लक्षणसंयुताः॥७२॥ एकैका प्रतिमाकार्यासार्धषष्टिपलान्विता॥ तदर्धेनाथवाकार्यंतदर्धेनाथवानृप॥
॥७३॥ राजतेनाथवाकार्यायथोक्तपलमानतः॥ तदर्धेनाथवाकार्यंतदर्धेनाथवानृप॥७४॥ संपादनीयाः कलशा
हैमाः पंचदशोत्तमाः॥ अथवाराजताः कार्यायद्वाताम्रमयानृप॥७५॥ भाद्रशुक्लचतुर्दश्यांशैवब्राह्मणपुंगवाः॥ नि
मंत्रणीयायत्नेन प्राप्ताः सप्तदशोत्तमाः॥७६॥ ततोगृहंवितानाद्यैरलंकृत्य प्रयत्नतः॥ स्वस्तिकाद्यैरलंकुर्यात् शिवस्था
नमघापहं॥७७॥ ततः सायं प्रयत्नेनतस्मिन्शंकरमंदिरे॥ पूजनीयाः प्रयत्नेनप्रतिमास्ताः शिवात्मकाः॥७८॥
रात्रौजागरणंकार्यंसोपवासंप्रयत्नतः॥ ऋत्विग्भिः सहसोत्साहंपयोमात्राशनेनवा॥७९ रात्रौशिवकथाश्राव्याः श्रो
तव्यायत्नतोनृप॥ कर्त्तव्यायत्नतोरात्रौपूजायामचतुष्टये॥८०॥ ततः प्रातः प्रयत्नेनस्नात्वाशंकरसंनिधौ॥ संपूजनी
योयत्नेनशिवोदेवशिखामणिः॥ चतुरस्रंततः कार्यंकुंडमष्टदलान्वितं॥ कटिदघ्नं प्रांतदेशेहस्तद्वयसमन्वितं॥८२॥ तत्र
वह्निंप्रतिष्ठाप्यविधिवद्गृह्यमार्गतः॥ साज्येनपरमान्नेन होमः कार्यः ततः परं॥ पंचविंशतिसाहस्रं होमः सोमेतिमंत्रतः॥
कार्यः प्रयत्नतोराजन्नमः पूर्वात्सतारतः॥ ततः पूर्णाहुतिंहुत्वाशैवान्संपूजयेत्ततः॥ बिल्वपत्रैः पुष्पमाल्यैर्भस्मनाचयथाक्र
मं॥८५॥ एकैकस्मैप्रदातव्यंशिवयोः प्रतिमाद्वयं॥ कलशोपिप्रदातव्यंततोवस्त्रद्वयान्वितः॥८६॥ आचार्यायप्रदातव्यंसुवर्ण
शतमादरात्॥ ततोवस्त्राणिदेयानिगौश्चदेयापयस्विनी॥८७॥ तथैवब्राह्मणेदेयंसुवर्णंवस्त्रसंयुतं॥ तदर्धमथवादेयंगौश्च
देयापयस्विनी॥८८॥ ततोयत्नेनशैवेंद्राभोजनीयाकृतव्रतैः॥ सुवासिन्योपिशैवानांभोजनीयः प्रयत्नतः॥८९॥ ततोदे
याः स्वशक्त्यैवभोजितेभ्यश्चदक्षिणा॥ ततश्चस्वकृतंकर्मशिवायविनिवेदयेत्॥९०॥ उद्यापनंकृतंशंभोमयैतदधुना
प्रभो॥ इदंपूर्णतामेतुत्वत्प्रसादान्महेश्वर॥ मंत्रहीनंक्रियाहीनंभक्तिहीनमुमापते॥ कृतंकर्मभवत्वद्यत्वत्प्रसादात्फ
लप्रदं॥९२॥ प्रायश्चित्तंवैदिकानांव्यंगानामपिकर्मणां॥ शिवस्मरणमेवेतिश्रुतिरप्यस्तिशंकर॥९३॥ अतः कृत

श्रीशिव० ७ मिदंश्रौतंकर्मव्यंगमपिप्रभो॥सांगंभवतुविश्वेशात्तदेवस्मरणात्प्रभो॥९४॥इतिसंप्रार्थ्यदेवेशंसांबंसर्वसुरोत्तमं॥ उ० ग्रा० स०
१८५ भुंजीयाद्बंधुभिःसाकंसमौनंतैलवर्जितं॥९५॥एवंयःकुरुतेसम्यगुमामाहेश्वरंव्रतं॥ससर्वभोगान्भुक्त्वां
तेमोक्षंप्राप्नोतिसर्वथा॥९६॥ ॥राजोवाच॥ ॥गौतमेदंव्रतंचीर्णंपुराकेनवदस्वमे॥कस्यकाममभूत्सि
द्धिर्व्रतस्यास्यप्रभावतः॥९७॥ ॥गौतमउवाच॥ ॥पुराशैववरोराजन्दूर्वासाख्योमुनीश्वरः॥कदाचित्संचरन्
लोकान्ददर्शकमलापतिं॥९८॥ततःस्वामगतंदृष्ट्वादूर्वासाख्यंमुनिंहरिः॥पूजयामासयत्नेनगंधपुष्पादिभिः
क्रमात्॥९९॥ततस्तदाज्ञयाशीघ्रंमारुह्यगरुडंहरिः॥कैलासंगंतुमुद्युक्तःश्रीमहादेवसंश्रितं॥१००॥प्र
स्थितंतंहरिंदृष्ट्वादुर्वासाख्योमुनिस्ततः॥बिल्वमालांददौतस्मैशंकरायसमर्पितं॥१॥गृहीत्वाबिल्वमालां
तांहरिर्गमनसंभ्रमात्॥शिरसापूजनीयांतांगरुडेसविनिक्षिपत्॥२॥ततस्तंतादृशंदृष्ट्वादूर्वासःक्रोधमू
र्छितः॥हरिंशशापबहुधाधिग्धिग्जन्मेतिसंवदन्॥३॥मयाशिवार्पितादत्तामालातुभ्यमघापहा॥साकथंग
रुडस्कंधेविनिक्षिप्तात्वयाहरे॥४॥गर्वस्यमूलभूतेयंलक्ष्मीस्तवविनश्यतु॥लक्ष्मीपततुदुग्धाब्धौगरुडोपिवि श्रीशिव०
नश्यतु॥वैकुंठस्याधिकारोपितवयांतुमदाज्ञया॥निस्तेजस्कोवनीपृष्ठेसंचराद्यावधिध्रुवं॥६॥इत्युक्त्वास १८५
तुदूर्वासोययौलोकांतरंनृप॥ततःपपातदुग्धाब्धौलक्ष्मीर्विष्णुमनोहरा॥७॥ततोतिदुःखितोविष्णुःप्रतप
न्वनमाश्रितः॥उवासविपिनेघोरेस्वकृतंकर्मसंस्मरन्॥८॥ततःकदाचिद्भूपालमयातत्रगतंपुरा॥तदा
मामागतंदृष्ट्वापूजयामाससमांहरिः॥९॥ततोश्रुपूर्णनयनःकृतांजलिपुटोहरिः॥जगादपूर्ववृत्तांतं
स्वलक्ष्मीनाशकारणं॥१०॥ततोतिक्रांतचित्तायविष्णवेव्रतमुत्तमं॥तस्मैवेनमयाभूपकथितंसादरंमया
श्र ॥११॥ततोतिश्रद्धयायुक्तश्चकारेदंव्रतंहरिः॥उद्यापनंचविधिवच्चकारश्रद्धयान्वितः॥१२॥ततःप्रस
न्नोभगवान्पार्वतीपतिः॥ददौलक्ष्मींसगरुडांकरुणानिधिरव्ययः॥१३॥इदमेवव्रतंचीर्णमिंद्रेणापि
डां

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

हतौजसा॥ तेन प्राप्तस्ततः स्वर्गः स्वर्गभोगश्च शाश्वतः॥१४॥ ब्रह्मणापि व्रतं चीर्णमिदमेव पुरा नृप॥ नष्टा वागीश्वरी तेन संप्रा
प्ता दुर्लभापि सा॥१५॥ मुनिभिश्च पुरा चीर्णं व्रतमेतन्मुमुक्षुभिः॥ अस्य व्रतस्याचरणात् मुक्तिः प्राप्ता मुनिश्वरैः॥१६॥ इदं
व्रतं प्रयत्नेन यः करिष्यति भक्तितः॥ तस्य सौभाग्यसंपत्तिर्भविष्यत्येव सर्वथा॥१७॥ यस्यास्त्यैश्वर्यभोगेच्छा मोक्षेच्छाप्य
नपायिनी॥ यस्य सर्वाधिपत्येच्छा तेन कार्यमिदं व्रतं॥१८॥ शारदो नाम विप्रोभूत् पुरा वेदांतपारगः॥ मोक्षार्थमति यत्नेन ते
न चीर्णमिदं व्रतं॥१९॥ वैद्युतेनापि विप्रेण मोक्षार्थमतियत्नतः॥ कृतमेतद्व्रतं पूर्वं सर्वाभीष्टप्रदायकं॥२०॥ इदमेव
व्रतं पूर्वं मया कृतमनुत्तमं॥ एतदाचरणादेव नित्यमुक्तो भवाम्यहं॥२१॥ भूतं भव्यं भविष्यं च ज्ञायतेस्माद्व्रतान्मया॥
मम भ्रमोपि नास्त्येव व्रतस्यास्य प्रभावतः॥२२॥ यं यं काममसमुद्दिश्य व्रतमेतदनुत्तमं॥ यः करिष्यति तं तं कामं स समाप्नो
ति सर्वथा॥२२॥ इदं व्रतं महेशेन समाख्यातमुमां प्रति॥ कुमाराय समाख्यातमुमयैतद्व्रतं नृप॥२३॥ नंदिकेशाय क
थितं कुमारेण व्रतं ततः॥ नंदिकेशेन कथितं दूर्वासमुनये व्रतं॥२४॥ दुर्वाससापि कथितमगस्त्याय व्रतोत्तमं॥ व्रतं त
त्कथितं मह्यमगस्त्येन महात्मना॥२५॥ मयातिक्लिष्टचित्ताय विष्णवे कथितं पुरा॥ तेन चीर्णं व्रतमिदं सर्वसौभाग्य
दायकं॥२६॥ ब्रह्मणे कथितं पूर्वमिदमेव व्रतं पुरा॥ तेन चीर्णं व्रतं सांगं वाणी प्राप्ता पुनरादरात्॥ सूर्यायेंद्राय चंद्रा
यमायैतत्कथितं व्रतं॥ तैश्च चीर्णं व्रतं सम्यक् इदं सौभाग्यदायकं॥२८॥ वसुभ्यः कथितं पूर्वं व्रतमेतच्छिवात्मकं॥ तै
श्च श्री चीर्णं व्रतमिदं मुक्तिमुद्दिश्य भक्तितः॥२९॥ कश्यपादिमुनिभ्यश्च कथितं व्रतमुत्तमं॥ तैश्च चीर्णं व्रतं सम्यक्
भुक्तिमुक्तिफलप्रदं॥३०॥ भूप व्रतानि संत्येव बहूनि विविधानि च॥ तथाप्येतद्व्रतसमं व्रतं नास्त्येव सर्वथा॥३१॥ भवान्
पि कुरु प्रीत्या भूपाल व्रतमीदृशं॥ इदं व्रतं यतः श्रौतं चतुर्वर्गफलप्रदं॥३२॥ इदं व्रतं शिवक्षेत्रे यः करिष्यति भक्तितः॥ तस्य स
र्वार्थसंपत्तिर्भवत्येव न संशयः॥३३॥ ॥ श्रीमहादेव उवाच॥ ॥ इति तद्वचनं श्रुत्वा स राजा प्रीतमानसः॥ स पुत्रः
पूजयामास गौतमं शैवपुंगवं॥३४॥ ततो धीमान् व्रतं चेदमुपदिश्य स गौतमः॥ पुनः संपूजितो राज्ञा स्वाश्रमं

प्रतिसंययौ ॥३५॥ राजासपुत्रस्तद्वाक्यादुमामाहेश्वराभिधं ॥ व्रतं चकारविधिवद्यथाक्रममतंद्रित: ॥३६॥ राजाशै
वव्रतान्येवंकुर्वन्विध्युक्तमार्गत: ॥ उवासप्रीतहृदयोमत्पूजानिरतोनिशं ॥३७॥ तत: सराजाविधिवन्मामभ्यर्च्य
प्रयत्नत: ॥ मय्यसन्न्यस्यकर्माणिवनेवासंचकारच ॥३८॥ तत: सभार्यस्तंत्यक्त्वावनंरेवामुपाययौ ॥ तत्रदृष्ट्वामु
निवरा: कश्यपाद्या: शिवार्चका: ॥३९॥ ततोलिंगमयींरेवांनत्वास्नात्वाचतज्जले ॥ विधिवत्पूजयामासतत्तल्लिं
गानिकोटिश: ॥४०॥ तत: सराजासुभगेरेवातोमत्प्रसादत: ॥ अविमुक्तमिदंप्रापसर्वसिद्धिप्रदायकं ॥४१॥
अत्रमासर्वदेवेशंविश्वेश्वरमनामयं ॥ मल्लिंगेस्मिन्समभ्यर्च्यमयिलीनोबभूवस: ॥४२॥ चंद्रमौलिप्रभृतय:
तत्पुत्राश्चततः परं ॥ स्वराज्यपालनंचक्रुर्मत्पूजनपुर:सरं ॥४३॥ तेपिसर्वेमत्प्रसादाद्भुक्त्वाभोगाननेकश: ॥
पुत्रेषुराज्यंविन्यस्यकाशीप्रापुरिमांशिवे ॥४४॥ येमामनन्यहृदया: सकला: स्मरेशंसंपूजयंतिसततंधृतभ
स्मपूता: ॥ तेमामुपेत्यविगताखिलदु:खबंधामद्रूपमेत्यसुखिनोनिवसंतिनित्यं ॥४५॥ ॥ इतिश्रीशिवरहस्येउ
ग्राख्येसप्तमांशेशिवगौरीसंवादोनामद्वाविंशोध्याय: ॥२२॥ ॥ श्रीउग्रायनम: ॥ ॥ श्रीशिवउवाच ॥ ॥ शिवेवृ
ध्याचलंनामक्षेत्रमस्तिमदात्मकं ॥ तस्यस्मरणमात्रेणमुच्यंतेपापकोटिभि: ॥१॥ तद्ब्रह्मोपेंद्रचंद्रेंद्रप्रमुखै: सेव्यते
सदा ॥ मणिमुक्तानदीतत्रप्रवहत्यनिशंशिवे ॥२॥ तत्तीरेकोटिश: संतिऋषयोब्रह्मवादिन: ॥ तत्तीरेकोटिश: सं
तिबिल्ववृक्षाश्चशोभने ॥३॥ स्नात्वादौमणिमुक्तायांश्रीमद्वृध्याचलेश्वरं ॥ य: पूजयतिबिल्वाद्यै: समद्रूपंप्रयास्य
ति ॥४॥ वृध्याचलेशमभ्यर्च्यपातार्द्रसंयुतेदिने ब्रह्महत्यादिभि: पापै: सद्यएवप्रमुच्यते ॥५॥ वृध्याचलेश्वरं
भक्त्यामणिमुक्तानदीजलै: ॥ अभिषिच्यार्चयेद्यस्तुसमद्रूपोभविष्यति ॥६॥ वृध्याचलेश्वरंभक्त्यापूजयित्वा
नमंतिये ॥ तेसर्वेपिभविष्यंतिममपारिषदा: शिवे ॥७॥ पुराकश्यपकण्वाद्या: शिवतीर्थाटनोत्सुका: ॥ श्री

महद्वृत्याचलंप्रापुर्दर्शनादेवमोक्षदं ॥ मणिमुक्तानदीं दृष्टा कश्यपाद्यैर्मुनीश्वरैः ॥ तत्तीरबिल्वतरवस्ततोदृ
ष्टाः सपल्लवाः ॥ ९ ॥ ततः शैववराः दृष्टाः शिवलिंगैकपूजकाः ॥ भस्मोद्धूलितसर्वांगास्त्रिपुंड्रांकितमस्त
काः ॥ १० ॥ रुद्राक्षमालाभरणा जटामंडलमंडिताः ॥ शंकरेशमहेशेतिशिवनामजपोत्सुकाः ॥ ११ ॥ नित्य
मव्यभिचारेणमल्लिंगैकार्चनप्रियाः ॥ नित्यमव्यभिचारेणमदाराधनतत्पराः ॥ १२ ॥ अद्वैतंपरमंब्रह्मशिवए
वेतिवादिनः ॥ श्रीमद्रुद्रजपासक्ताः पंचाक्षरपरायणाः ॥ १३ ॥ ततोदृष्टामुनिवरैः बहुधाभस्मराशयः ॥ यद्भस्मदर्शना
देवनश्यत्यघकुलंशिवे ॥ १४ ॥ ततोदृष्टानितैरेवशिवलिंगानिकोटिशः ॥ यदर्चनेनसंप्राप्यंचतुर्वर्गफलंशिवे ॥
श्रुतानिशिवनामानिततः शैवोदितानितैः ॥ यन्नामश्रवणाज्जंतुर्मुच्यतेपापपंजरात् ॥ १६ ॥ मणिमुक्तानदींप्रापुस्ततस्तेमु
निपुंगवाः ॥ तत्रचक्रुस्ततः स्नानंमणिमुक्तानदीजले ॥ १७ ॥ उद्धूल्यभस्मनागानिततस्तेमुनिपुंगवाः ॥ त्रिपुंड्रधा
रणंचक्रुस्ततस्तेमुनिपुंगवाः ॥ १८ ॥ ततः समर्चिताः शैवाः तैरेवमुनिपुंगवैः ॥ तत्रचक्रुस्ततः स्नानंमणिमुक्तान
दीजले ततः समर्चिताः शैवाः ततस्तीरलिंगानिपूजितानिमुनीश्वरैः ॥ १९ ॥ ततः सर्वैर्मुनिवरैः जप्तः पंचाक्षरः शिवे ॥ ततस्ते
बिल्वपत्राणिमणिमुक्ताजलानिच ॥ २० ॥ गृहीत्वामौनमासाद्यजग्मुर्वृत्याचलेश्वरं ॥ ततोदृष्ट्वामुनींद्रास्तेश्रीमद्वृत्याचलेश्वरं
॥ संतोषंपरमंजग्मुरानंदपरिपूरिताः ॥ ततः संपूजयामासुः श्रीमद्वृत्याचलेश्वरं ॥ २२ ॥ रुद्रसूक्तैर्लिंगरूपमभिषिच्ययथाक्रमं
॥ प्रदक्षिणनमस्काराः ततश्चक्रुर्मुनीश्वराः ॥ २३ ॥ ततस्तुत्वाप्रयत्नेनशिवनामजपोत्सुकाः ॥ पंचाक्षरजपंकृत्वाश्रौतन्यास
पुरःसरं ॥ २४ ॥ श्रीमद्रुद्रजपंकृत्वातत्रतस्थुरचंचलाः ॥ तदानीमागतोदेवि गौतमोप्यरुणाचलात् ॥ २५ ॥ आगत्यपूजयामास
श्रीमद्वृत्याचलेश्वरं ॥ ततस्तुष्टावश्रुत्यात्मा गौतमोमामुमापतिं ॥ २६ ॥ शैववर्येषुशृण्वत्सुश्रोत्रानंदकरंशिवे ॥ ॥ गौतमउवाच ॥
योवैरुद्रः सभगवान्विष्णुब्रह्मादिवंदितः ॥ यश्चब्रह्मामहारुद्रः तस्मैवैतेनमोनमः ॥ योवैरुद्रः सभगवान्ब्रह्मसाक्षात्परात्परं ॥

।।२८।। योवैविष्णुविरूपाक्षस्तस्मैवैतेनमोनमः।। योवैरुद्रःसभगवान्पार्वतीरमणःप्रभुः।।२९।। यश्चज्ञानमनाकारंतस्मैवैते
नमोनमः।। योवैरुद्रःसभगवान्ब्रह्मसाक्षान्महेश्वरः।।३०।। सर्वतंत्रस्वतंत्रश्चतस्मैवैतेनमोनमः।। योवैरुद्रःसभगवान्या
चोमापरमेश्वरी।।३१।। उमाकांतोनिर्गुणोपितस्मैवैतेनमोनमः।। योवैरुद्रःसभगवान्यश्चसाक्षाद्विनायकः।।३२।। यश्चनि
त्योव्यापकश्चतस्मैवैतेनमोनमः।। योवैरुद्रःसभगवान्यश्चस्कंदःसुरार्चितः।। ३३।। यश्चसाक्षाज्जगत्कर्त्तातस्मैवैतेनमो
नमः।। योवैरुद्रःसभगवान्यश्चेंद्रस्वर्गपालकः।।३४।। यश्चस्वर्गप्रदोनित्यंतस्मै।। योवैरुद्रःसभगवान्यश्चाग्निस्तेजसांनि
धिः।।३५।।यश्चतेजोमयःसाक्षात्तस्मै०।। योवैरुद्रःसभगवान्यश्चसूर्योमरीचिमान्।।३६।। यश्चसूर्योग्रहगणस्तस्मै०।।यो
वैरुद्रःसभगवान्यश्चचंद्रस्तदात्मकः।।३७।। चंद्रकोटिप्रभःशंभुः तस्मै०।। योवैरुद्रःसभगवान्यश्चभूर्भूमयःप्रभुः।। यश्च
भूमेःसमुत्पर्त्तातस्मैवैतेनमोनमः।। योवैरुद्रःसभगवान्यश्चनित्योभुवःप्रभुः।। ३९।। भुवोयश्चसमुत्पर्त्तातस्मैवैतेनमोन०
मः योवैरुद्रःसभगवान्नित्योयश्चसुवःपरः।।४०।। सुवोयश्चपतिःसत्यस्तस्मै०।। योवैरुद्रःसभगवान्नित्योयश्चमहःपरः
।।४१।। महतोपिमहान्यश्चतस्मै०।। योवैरुद्रःसभगवान्नित्योयश्चजनःपरः।।४२।।जनस्यापिपतिर्यश्चतस्मै०।। योवैरु
द्रःसभगवान्नित्योयश्चतपःपरः।।४३।। तपोरूपोपतिर्यश्चतस्मै०।। योवैरुद्रःसभगवान्यश्चसत्यंसदात्मकं।।४४।।सत्य
स्वरूपःसत्यंयस्तस्मै०।। योवैरुद्रःसभगवान्याचपृथ्वीवसुप्रदा।।यःपृथ्वीजनकःसर्वस्तस्मै०।। योवैरुद्रःभगवान्याश्चा
पस्तन्मयःपरः।।४६।। यश्चापांजनकोभर्गस्तस्मै०।। योवैरुद्रःसभगवान्यश्चतेजःप्रकाशकं।।४७।। यस्यभासाभासतेय
स्तस्मै०।। योवैरुद्रःसभगवान्यश्चवायुःसुखप्रदः।।४८।। यश्चवायोस्तिजनकस्तस्मै०।। योवैरुद्रःसभगवान्यश्चाका
शंसदात्मकः।। यश्चाकाशादिजनकस्तस्मैयोवैरुद्रःसभगवा यश्चतारास्तदात्मकः।।५०।। यश्चतारकसंहर्त्तास्तस्मै०।।यो
वैरुद्रःसभगवान्यश्चप्राणस्तदात्मकः।।५१।। यश्चप्राणमयोनित्यस्तस्मै०।। योवैरुद्रःसभगवान्यश्चप्राणस्तदा
कालःकलात्मकः।।५२।। यश्चकालकलाधारस्तस्मै०।। योवैरुद्रःसभगवान्यश्चसाक्षाद्यमःस्वयं।।५३।। यमस्यापिनि०

यंतायस्तस्मै०॥ योवैरुद्रःसभगवान्यश्चमृत्युविषादरः॥५४॥ यश्चमृत्युंजयःसाक्षात्तस्मैवै०॥ योवैरुद्रःसभगवा
न्यश्चामृतमुमामृतं॥५५॥ अमृतात्मामृतंयश्चतस्मै०॥ योवैरुद्रःसभगवान्यश्चभूतगणेश्वरः॥५६॥ भूतंभव्यंभविष्यं
यस्त०॥ योवैरुद्रःसभगवान्यश्चविश्वंविशांपतिः॥५७॥ यश्चविश्वेश्वरःसांबःतस्मै०॥ योवैरुद्रःसभगवान्यश्चकृत्स्नं
सदात्मकं॥५८॥ यश्चकृत्स्नपतिःसत्यंतस्मैवैतेनमोनमः॥ योवैरुद्रःसभगवान्यच्चसर्वंचिदात्मकं॥५९॥ यःसर्वप्र
भुरीशानस्तस्मै०॥ योवैरुद्रःसभगवान्यश्चसत्यंऋतंपरं॥ यच्चसत्याभिधंब्रह्मतस्मै०॥ योवैरुद्रःसभगवान्यःपरंब्रह्म
निष्कलं॥६१॥ यश्चनित्यचिदाकारतस्मैवैतेनमोनमः॥त्वमेवविश्वरूपोसिब्रह्मैकंत्वंमहेश्वर॥६२॥एकत्वादिपरार्धांतं
त्वमेवासिसदाशिव॥अतश्चोर्ध्वंचमध्यंचत्वमेवासिमहेश्वर॥६३॥शांतिःपुष्टिश्चतुष्टिश्चत्वंहुतंचाहुतंशिव॥त्वंहिविश्व
मविश्वंचदत्तंचादत्तमेवच॥६४॥ त्वंकृतंचाकृतंशंभोत्वंपरंचापरंप्रभो॥ परायणंचपरमंपवित्रमसिशंकर॥६५॥परा
त्परतरंयच्चतत्परात्परतोसिच॥ सर्वस्रष्टाचभगवंस्त्वंहिसर्वस्यरक्षकः॥६६॥ त्वमेवभगवन्शंभोसर्वलोकविना
शकः॥ हंतासिनरसिंहस्यत्वमेवेशकृतागसः॥ ६७॥ त्वंविष्णोरपिहंतासिब्रह्मणोपिमहेश्वर॥ परब्रह्मत्वमेवा
सिनिर्विकारनिरंजनः॥६८॥ निष्कलोनिष्क्रियःशांतस्त्वमेवासिशिवप्रभो॥ त्वत्तएवसमुत्पन्नाविष्णुब्रह्मादयः
सुराः॥६९॥ त्वयैवपालितास्तेतु त्वयैवांतेविनाशिताः॥ त्वयाव्याप्तमिदंसर्वंब्रह्मांडंसचराचरं॥७०॥त्वमेवव्या
पकःशंभोसर्वस्यजगतःप्रभोत्वमेवस्वर्गफलदस्त्वमेवास्यपवर्गदः॥७१॥ त्वमेवसर्वलोकानांपूज्योमुख्य
र्षिणांप्रभो॥गतिस्त्वमेवलोकानांअगतीनांगतिःशिव॥७२॥ त्वदन्योनगतिःशंभोसच्चिदानंदविग्रह॥वेदैर
पिनतेरूपंज्ञातमस्तिमहेश्वर॥७३॥किमन्यैर्मादृशैरीशप्रमाणाविषयप्रभो॥ ॥महादेवउवाच॥ ॥एवंतु
ष्टावभक्त्यामांगोतमोविनयात्मकः॥ ततःप्रणम्यभक्त्यामामुपविष्टःसुहृष्टधीःततोजजापयत्नेनवैदिकंसु

मनुपुंगवं॥ श्रीमदष्टाक्षरंदेविप्रणवाद्यंमदात्मकं॥ तदानीमागतोविष्णुर्ब्रह्मेंद्रादिसमन्वितः॥७६॥ आगत्यपूजयामास
मामीश्वरमनामयं॥ ततःस्तुत्वायथाशक्तिप्रणम्यचपुनःपुनः॥७७॥ उपविष्टः ततोविष्णुः पंचाक्षरमनुस्मरन्॥ तदानी
मागतंश्रुत्वागौतमंमुनिपुंगवं॥७८॥ संतोषंपरमंजग्मुर्वृद्धाचलनिवासिनः॥ समागतास्ततःशीघ्रंबिल्वपाणयः॥ मुन
यःपूर्वदिग्भागादमिताःसमुपागताः॥७९॥ च्छतलक्षमुपागताः॥ ततोदक्षिणदिग्भागात्पंचाशल्लक्षमागताः॥८०॥
ततश्चोत्तरदिग्भागादमिताः समुपागताः॥ ८१॥ आदौतेमुनयः सर्वेश्रीमद्वृद्धाचलेश्वरं॥ संपूज्यबिल्वपत्राद्यैस्तुष्टु
वुश्चसहस्रधा॥ ८२॥ ततःप्रणम्यबहुधामामनंतमजंशिवं॥ जप्त्वापंचाक्षरंशैवंप्रापुरानंदमंबिके॥ ८३॥ ततोभस्मानुलि
प्तांगंत्रिपुंड्रांकितमस्तकं॥ रुद्राक्षमालाभरणंददृशुर्गौतमंमुनिं॥ ८४॥ पंचाक्षरजपासक्तंनिमीलितविलोचनं॥ आनं
दाश्रुसमाकीर्णंध्यायंतंहृदिमांशिवं॥ ८५॥ मदर्पितमनोबुद्धिंविन्यस्तविषयादरं॥ हृदिसंपूज्यमांभक्त्याप्रहृष्टंगतकल्म
षं॥ ८६॥ इदृशंगौतमंदृष्ट्वामुनयस्तेनताननाः॥ कृतांजलिपुटाःसंतः समयंवीक्ष्यसंस्थिताः॥ ८७॥ ततःसगौतमोदेवि
पूजांमानसिकींमम॥ समाप्योन्मील्यनयनेददर्शमुनिपुंगवान्॥ ८८॥ ततःसगौतमोदृष्ट्वाभस्मोद्धूलितविग्रहान्॥ त्रिपुं
ड्रनिटिलान्शुद्धान्रुद्राक्षाभरणांकितान्॥ ८९॥ शिवनामामृतास्वादलोलजिह्वानकल्मषान्॥ शिवध्यानपरानन्यानुद
तिष्ठत्कृतांजलिः॥९०॥ ततस्तेऋषयःसर्वेगौतमंमुनिपुंगवं॥ प्रणम्यपूजयामासुर्बिल्वपत्रादिभिर्मुदा॥९१॥ ततःकश्य
पकण्वाद्यास्तंदृष्ट्वागौतमंपुनः॥ चक्रुःपूजांबिल्वपत्रैर्भस्मनाकुसुमैरपि॥९२॥ ततस्तंददृशुर्देविविष्णुब्रह्मादयःसुराः दृ
ष्ट्वातेगौतमंनत्वाचक्रुःपूजांयथाविधि॥९३॥ कश्यपादीनृषीन्देवान्विष्ण्वादीनपिगौतमः॥ दृष्ट्वासंपूजितान्भक्त्याप्रा
पसंतोषमंबिके॥९४॥ उपविष्टास्ततःसर्वेगौतमेनसहांबिके॥ यथाक्रमंयथायोग्यंयथास्थानंयथाविधि॥९५॥ उपविष्टं
महाविष्णुंशिवमंत्रजपोत्सुकं॥ विलोक्यगौतमःप्राहवचनंमधुराक्षरं॥९६॥ ॥गौतमउवाच॥ ॥विष्णोशिवरतश्रीम

न्कुशलंखलुसर्वतः॥सुस्थिरंखलुचित्तंतेमहादेवेसुरोत्तमे॥९७॥अप्रमादेनसततंशिवस्संपूज्यतेखलु॥शिवमंत्रज
पोनित्यंक्रियतेखलुसादरं॥९८॥ ॥ ॥शिवउवाच॥ ॥इत्युक्तंतद्वचःश्रुत्वाविष्णुर्विनयसंयुतः॥प्रणम्यगौतमं
प्राहकृतांजलिपुटःशिवे॥९९॥ ॥विष्णुरुवाच॥ ॥कुशलंसर्वतोविद्वन्स्वशक्त्यापूज्यतेशिवेः॥मयाशक्त्यनुरोधेन
शिवमंत्रोपिजप्यते॥१००॥यावन्नक्रमतेविद्वन्शिवमायादुरत्यया॥तावत्स्वशक्त्याक्रियतेमयाशंकरपूजनं॥यथानाक्र
मतेमायामांमुनेश्रीमहेशितुः॥तथामयाशिषोदेयास्त्वयाविद्वन्कृपानिधे॥२॥ ॥सदाशिवउवाच॥ ॥इतितद्वचनं
श्रुत्वाकश्यपाद्यामुनीश्वराः॥प्रणम्यगौतमंप्राहुर्विनयाननकंधराः॥३॥ ॥ऋषयऊचुः॥ ॥विद्वन्माहेश्वरीमायास
र्वेषांचदुरत्यया॥देवानाक्रमतेतद्वद्दृषीनपिकदाचन॥४॥मोहितोयंमहाविष्णुःकदाचिच्छिवमायया॥तन्मायामोहितो
विष्णुःप्रापदुःखंदुरासदं॥५॥वयंचमोहिताःपूर्वंकदाचिच्छिवमायया॥अस्माभिरपिदुःखानिप्राप्तानिमुनिसत्तम॥६॥यथा
नाक्रमतेमायाशिवस्यपरमात्मनः॥तथानाक्रमतेमायाशिवस्यपरमात्मनः॥७॥तथाकश्चिदुपायश्चेद्वदवेदविदांवर॥द
त्ताश्चेदाशिषोस्मासुत्वयैवादरपूर्वकं॥८॥शिवमायाविनिर्मुक्ताभवामोनात्रसंशयः॥तथाप्यन्येपियेसंतिऋषयोमुनिपुं
गवाः॥९॥तेतन्मायाविनिर्मुक्ताभविष्यंतिकथंवद॥शिवमायाविनिर्मुक्तःसर्वदायोभविष्यति॥१०॥तस्यैवमोक्षोनान्यस्ये
त्यपिसंश्रूयतेश्रुतिः॥शिवमायामोहितानांसर्वदापापकर्मणि॥११॥चित्तंप्रवर्त्ततेतेनदुःखंसंप्राप्यतेसदा॥किंचप्राह
हिकंकर्मकिंकर्त्तव्यंद्विजातिभिः॥१२॥कःश्रुतःपरमोधर्मःसाक्षान्मोक्षप्रदायकः॥एतत्सर्वंविशेषेणकृपयामुनिसत्त
म॥१३॥वक्तुमर्हसिसर्वज्ञशंकराराधनप्रिय॥ ॥गौतमउवाच॥ ॥भवद्भिःपृष्टमधुनासम्यगेवमुनीश्वराः॥त
त्सर्वमविशेषेणवक्ष्येशृण्वंतुसादरं॥शिवमायापरिक्रांतायेयदातेतदाद्विजाः॥१५॥पापकर्मणिनिष्णाताभविष्यंतिन
संशयः॥शिवमायामोहितानांदुराचारेषुसर्वदा॥१६॥प्रीतिर्भवतितैरेवनरकेषुपतंतिच॥शिवमायामोहितानांवक्ष्ये

वस्येकर्माण्यपिद्विजाः ॥१७॥ तैरेवकर्मभिर्ज्ञेयाः शिवमायाविमोहिताः ॥ त्यक्तंयैः श्रौतमनघंविभूत्युत्धूलनंद्विजाः॥
॥१८॥ शिवमायामोहितास्तेतेयांतिनरकंध्रुवं॥ त्यक्तंयैः श्रौतमनघंत्रिपुंड्रस्यचधारणं॥१९॥ शिवमाया०॥ त्यक्तं
यैः श्रौतमनघंत्रिपुंड्रस्यचधारणं॥१९॥ शिवमाया०॥ त्यक्तंयैः श्रौतमनघंनित्यंरुद्राक्षधारणं॥ २०॥ शिवमाया०॥
त्यक्तंयैः श्रौतमनघंशिवलिंगस्यपूजनं ॥२१॥ शिवमाया०॥ त्यक्तंयैश्रौतमनघंशिवनामानुकीर्त्तनं॥ २२॥ शिव
मायामोहिता०॥ त्यक्तंयैः श्रौतमनघंमहादेवाभिमर्षनं॥ २३॥ शिव०॥ त्यक्तंयैः श्रौतमनघंशिवतीर्थनिषेवणं॥
२४॥ शिवमा०॥ त्यक्तंयैः श्रौतमनघंशिवस्थानेषुवर्त्तनं॥२५॥ शिवमा०॥ त्यक्तंयैः श्रौतमनघंबिल्वपत्रैःशिवा
र्चनं॥२६॥ शिवमाया०॥ त्यक्तंयैश्रौतमनघंप्रदोषेशिवपूजनं॥२७॥ शिवमाया०॥ त्यक्तंयैः श्रौतमनघंश्रीमहादे
ववंदनं॥२८॥ शिवमा०॥ त्यक्तंयैः श्रौतमनघंशिवमंत्रानुशीलनं॥ २९॥ शिवमाया०॥ त्यक्तंयैः श्रौतमनघंरु
द्राध्यायानुशीलनं॥ ३०॥ शिवमाया०॥ त्यक्तंयैः श्रौतमनघंश्रीमहादेवचिंतनं॥ ३१॥ शिवमाया०॥ त्यक्तंयैः
श्रौतमनघंसोमवारव्रतंपरं॥ शिवमाया०॥ त्यक्तंयैः श्रौतमनघंशिवरात्रिव्रतंपरं॥ ३३॥ शिवमाया०॥ त्य
क्तंयैश्रौतमनघंनित्यंकालाष्टमीव्रतं॥३४॥ शिवमायामोहितास्तेतेयांतिनरकंध्रुवं॥ त्यक्तंयैः श्रौतमन
घंविभूतिशयनंपरं॥ ३५॥ शिवमाया०॥ त्यक्तंयैः श्रौतमनघंशिवभक्ताभिवादनं॥ ३६॥ शिवमाया०॥ त्यक्तं
यैः श्रौतमनघंनित्यंभूताष्टमीव्रतं॥३७॥ शिवमाया०॥ त्यक्तंयैः श्रौतमनघंनवबिल्वदलार्चनं॥ ३७॥ शिवमा०
॥ त्यक्तंयैः श्रौतमनघंबिल्ववृक्षाभिवंदनं॥३९॥ शिवमायामोहितास्तेतेयांतिनरकंध्रुवं॥ अश्रौतकर्मनि
रताः॥४०॥ घोरेकलियुगेप्राप्तेभविष्यंतिद्विजाधमाः॥ श्रौतंशिवार्चनंत्यक्त्वाकरिष्यंत्यन्यपूजनं॥ ४१॥
घोरेकलियुगेप्राप्तेद्विजाः संकरवृत्तयः॥ श्रौतमुत्धूलनंत्यक्त्वाधर्माद्यर्थैकसाधनं॥४२॥ कलौस्थास्यंति

सततंद्विजाः संकरवृत्तयः ॥ त्रिपुंड्रधारणंश्रौतंत्यक्त्वा कलुषबुद्धयः ॥ ४३ ॥ कलौस्यक्ष्यंतिसततंद्विजाः संकरवृत्तयः ॥ ऊर्ध्वपुं
ड्रंकरिष्यंतिद्विजाम्लेच्छंदनादिभिः ॥ ४४ ॥ त्यक्ष्यंतिशिवलिंगेपिश्रीमहादेवपूजनं ॥ अवैदिकंपापहेतुमूर्ध्वपुंड्रंद्विजाअपि ॥ ४५ ॥
करिष्यंत्यतियत्नेनघोरेकलियुगेद्विजाः ॥ ब्राह्मणोपिस्वयंमोहादूर्ध्वपुंड्रंकरोतियः ॥ सपतत्येवनरकेयावदाचंद्रतारकं ॥
ब्राह्मणोपिस्वयंमोहात्तप्तमुद्रांबिभर्त्तियः ॥ ४७ ॥ सपतत्येवनरकेयावदाचंद्रतारकं ॥ तप्तमुद्रोर्ध्वपुंड्रेद्वेनरकावाससाधने ॥
४८ ॥ तस्मात्तत्याज्यमनघैर्द्विजैर्नरकभीरुभिः ॥ यदिमोहेनोर्ध्वपुंड्रंबिभृयाद्ब्राह्मणोपिसन् ॥ ४९ ॥ सतादृशेनशस्त्रेणनर
केषुनिहन्यते ॥ येनोर्ध्वपुंड्रंविप्रेणललाटादौधृतंभवेत् ॥ ५० ॥ तेनप्राप्तानिघोराणिनरकाणिनसंशयः ॥ ऊर्ध्वपुंड्रंधृतंयेनते
नतद्वंशजैःसह ॥ ५१ ॥ आब्रह्मकल्पंनरकेस्थीयतेनात्रसंशयः ॥ ऊर्ध्वपुंड्रंधृतंयेननास्तितस्यविनिष्कृतिः ॥ ५२ ॥ नमुच्यतेस
पापिष्टःसुरापोपिविमुच्यते ॥ ऊर्ध्वपुंड्रंधृतंयेननास्तितस्यविनिष्कृतिः ॥ ५३ ॥ नमुच्यतेसर्वपापिष्टोब्रह्महापिविमुच्यते ॥ ऊ
र्ध्वपुंड्रंधृतंयेननास्तितं भ्रमेणापिललाटादौबिभर्त्तियः ॥ ५४ ॥ सचंडालजइत्येवज्ञातव्योनात्रसंशयः ॥ ऊर्ध्वपुंड्रंप्रमादेनधृ
त्वासंतप्तमानसः ॥ ५५ ॥ तप्तकृच्छ्रंचरेद्यस्तुसतत्पापाद्विमुच्यते ॥ धृत्वैकदोर्ध्वपुंड्रंयस्तप्तकृच्छ्रंचरिष्यति ॥ ५६ ॥ सतस्मान्मुच्य

स्मृ ६

तेपापादितिजाबालवादिनः ॥ ऊर्ध्वपुंड्रांकितंदृष्ट्वासचैलंस्नानमाचरेत ॥ अन्यथापातकी० ॥ ऊर्ध्वपुंड्रांकितंविप्रंदूरतःपरि
वर्जयेत् ॥ अन्यथा० ॥ ऊर्ध्वपुंड्रांकितैर्विप्रैःसहनैवोपसंविशेत् ॥ ६० ॥ अन्यथापातकीभूयादितिजाबालवादिनः ॥ ऊर्ध्व
पुंड्रांकितंविप्रंभ्रमेणापिभोजयेत् ॥ ६१ ॥ अन्यथा० ॥ ऊर्ध्वपुंड्रांकितायत्रतत्रस्थातव्यमेवन ॥ ६२ ॥ अन्यथा० ॥ ऊर्ध्वपुंड्रांकिताः
संतियस्मिन्देशेदुराशयः ॥ ६३ ॥ सदेशःसर्वथात्याज्योविप्रैश्चंडालदेशवत् ॥ येननक्रियतेनित्यंविभूत्युद्धूलनंद्विजाः ॥ ६३ ॥
तस्यानुमेयमुसत्तौसांकर्यंब्रह्मवादिभिः ॥ येननक्रियतेनित्यंत्रिपुंड्रस्यचधारणं ॥ ६४ ॥ तस्यानुमेयमुसत्तौसांकर्यंब्रह्मवादिभिः
॥ येननक्रियतेनित्यंत्रिपुंड्रस्यचधारणं ॥ ६५ ॥ तस्या० ॥ येननक्रियतेनित्यंनित्यंरुद्राक्षधारणं ॥ ६६ ॥ तस्या० ॥ येननक्रियतेनि
त्यंशिवलिंगस्यपूजनं ॥ ६७ ॥ येनन० ॥ नित्यंशिवलिंगप्रदक्षिणं ॥ तस्या० ॥ येन० शिवलिंगाभिवादनं ॥ तस्या० ॥ येन० ॥ शिव-

पं० ७ ४ सद्योभानुंविलोकयेत ॥ ५७ ॥ अन्यथापातकीभूयादितिजाबालवादिनः ॥ ऊर्ध्वपुंड्रांकितंस्पृष्ट्वा

लिंगस्यचिंतनं॥तस्या०॥ येननक्रियतेनित्यंशिवलिंगनिरीक्षणं॥ ६८॥ तस्या०॥ नित्यंनपीयतेयेनशिवनिर्णेजनोदकं॥
॥६९॥ तस्या०॥ येननक्रियतेनित्यंमहादेवानुकीर्तनं॥७०॥ तस्या०॥ येननक्रियतेनित्यंरुद्राध्यायानुवर्त्तनं॥७१॥ तस्या०॥
नजप्यतेश्रुतिमणिर्येनपंचाक्षरःपरः॥७२॥ तस्या०॥ नयेनपूज्यतेनित्यंशैवः शिवपरायणः॥७३॥ तस्या०॥ नयेनश्रूयतेनि
त्यंमहादेवकथापरा॥७४॥ तस्या०॥ नयेनभुज्यतेनित्यंशिवनैवेद्यमादरात्॥७५॥ तस्या०॥ नयेनक्रियतेनित्यंशिवध्यानमह
र्निशं॥७६॥ तस्या०॥ नयेनपीयतेनित्यंशिवनामामृतंमुहुः॥७७॥ तस्या०॥ नयेनक्रियतेनित्यंशिवस्तुतिरघापहा॥७८॥ तस्या०
॥ नयस्यकाश्यांविश्वेशेभक्तिरव्यभिचारिणी॥७९॥ तस्या०॥ नयस्यज्ञानवाप्यांचभक्तिरव्यभिचारिणी॥८०॥ तस्या०॥ नय
स्यमणिकर्ण्यांचभक्तिरव्यभिचारिणी॥८१॥ तस्या०॥ नयस्यवीरभद्रेशेभक्तिरव्यभिचारिणी॥८२॥ तस्या०॥ नयस्यपांचमु
द्रेशेभक्तिरव्यभिचारिणी॥८३॥ तस्या०॥ नयस्यभैरवेभीमेभक्तिरव्यभिचारिणी॥८४॥ तस्या०॥ नतस्यकृत्तिवासेशेभक्ति
रव्यभिचारिणी॥८५॥ तस्या०॥ यस्योंकारेश्वरेनास्तिभक्तिरव्यभिचारिणी॥८६॥ तस्या०॥ यस्यत्रिलोचनेनास्तिभक्तिरव्यभि
चारिणी॥८७॥ तस्या०॥ ज्योतीरूपेश्वरेभक्तिर्यस्यनास्त्यनपायिनी॥८८॥ तस्या०॥ अविमुक्तेश्वरेभक्तिर्यस्यनास्त्यनपायिनी॥
८९॥ तस्या०॥ केदारनाथेसद्भक्तिर्यस्यनास्त्यनपायिनी॥९०॥ तस्या०॥ अंतर्गृहेपियस्यैवभक्तिर्नाव्यभिचारिणी॥९१॥ तस्या०॥
येननक्रियतेनित्यंसोमवारव्रतंपरं॥९२॥ तस्या०॥ येननक्रियतेनित्यंशिवरात्रिव्रतंपरं॥९३॥ तस्यानुमेयमुत्पत्तौसांक
र्यंब्रह्मवादिभिः॥ ब्राह्मणानांपरोधर्मःश्रीमहादेवपूजनं॥९४॥ तत्यक्त्वायेनविप्रेणसमहापातकीभवेत्॥ ब्राह्मणानांपरो
धर्मोविभूत्युद्धूलनंद्विजाः॥९५॥ तत्यक्त्वा० ब्राह्मणानांपरोधर्मःत्रिपुंड्रस्यधारणं॥९६॥ तत्यक्त्वा०॥ ब्राह्मणानांपरोधर्मः
श्रुधरुद्राक्षधारणं॥९७॥ तत्यक्त्वा०॥ ब्राह्मणानांपरोधर्मःशिवलिंगेशिवार्चनं॥९८॥ तत्यक्त्वा०॥ ब्राह्मणानांपरोधर्मोरु
द्राध्यायानुवर्तनं॥९९॥ तत्यक्त्वा०॥ ब्राह्मणानांपरोधर्मःपंचाक्षरजपःपरः॥१००॥ तत्यक्त्वा०॥ ब्राह्मणानांपरोधर्मःश्री
महादेवचिंतनं॥१॥ तत्यक्त्वा०॥ ब्राह्मणानांपरोधर्मःशिवनामकथाश्रुतिः॥२॥ तत्यक्त्वा०॥ मनुष्येषुवयंश्रेष्ठाय

धातद्वत्सुरेष्वपि ॥ ३ ॥ शिवश्श्रेष्ठस्ततोस्माभिर्देवैश्चाभ्यर्च्यतेशिवः ॥ विष्णोरेतस्यजनको विधेरपिसदाशिवः ॥ ४ ॥
स्वयं त्वजन्योनित्यश्चमहेश्वरः ॥ एनमुत्पादयामास प्रथमं पार्वतीपतिः ॥ ५ ॥ ततोददौचविष्णुर्बलमेतस्मैपरमेश्वरः ॥ सुद
र्शनाभिधंचक्रं ददौचास्मैमहेश्वरः ॥ ६ ॥ ततोददौचवैकुंठमेतस्मैगिरिजापतिः ॥ अविविष्णुरयं पूर्वं स्वनेत्रांबुजमुत्तमं
॥ ७ ॥ आदायपूजयामासभक्त्याशिवपदांबुजं ॥ महादेवस्यपुत्रोयमादिविष्णुः शिवप्रियः ॥ ८ ॥ करोतिपरयाभक्त्या
श्रीमहादेवपूजनं ॥ भक्तिर्गिरीशपुत्रस्यकेशवस्यशिवेयथा ॥ ९ ॥ तथाभक्तिः सदाकार्याभवद्भिरपिशंकरे ॥ विष्णुप्र
भृतयोदेवावयंचान्येपिमानवाः ॥ १० ॥ द्विजामहेश्वरस्यैवंपूजकानात्रसंशयः ॥ देवैरस्माभिरन्यैश्चचतुर्वर्गफलार्थि
भिः ॥ ११ ॥ सर्वमन्यत्परित्यज्यपूजनीयः सदाशिव ॥ पनिधनेत्यादिभिर्मंत्रैर्योमहादेवमर्चयेत् ॥ १२ ॥ ससर्वपापनिर्मु
क्तः शिवलोकंगमिष्यति ॥ शिवलिंगेमहादेवः पूजनीयोमनीषिभिः ॥ १३ ॥ शिवलिंगेकृतापूजामोक्षायपरिकल्पते ॥
हृदिध्यानंमहेशस्यशिवलिंगेशिवार्चनं ॥ १४ ॥ यः करिष्यतियत्नेनसजीवन्मुक्त उच्यते ॥ उद्धूलनंत्रिपुंड्रंचतथारुद्रा
क्षधारणं ॥ १५ ॥ यः करिष्यति० ॥ पंचाक्षरेणमंत्रेणशिवलिंगेशिवार्चनं ॥ यः करि० ॥ रुद्रमंत्रैरविच्छिन्नमभिषेकंमहेश्वरे ॥
१७ ॥ यः करि० ॥ कर्पूरागरुकस्तूरीचंदनानिमहेश्वरे ॥ १८ ॥ यः प्रयच्छतियत्नेनसजीवन्मुक्त उच्यते ॥ कालागरुसमुद्भू
तंधूपंशंकरसंन्निधौ ॥ १९ ॥ यः प्रयच्छति० ॥ दीपावलीमाज्यपूर्णांशिवलिंगस्यसंन्निधौ ॥ यः प्रय० ॥ क्षीरान्नंगोघृतं
पुष्टंसशंकरमुमापतेः ॥ यः प्रय० ॥ प्रदक्षिणनमस्कारान्शिवलिंगस्यसादरं ॥ २२ ॥ यः करोतिप्रयत्नेनसजीवन्मुक्त
उच्यते ॥ कवलेकवलेभक्त्यामहादेवानुकीर्तनं ॥ २३ ॥ यः करोतिप्रयत्नेनसजीवन्मुक्त उच्यते ॥ गच्छन्तिष्ठन्शयानो
वामहादेवानुकीर्तनं ॥ २४ ॥ यः करोतिप्रयत्नेनसजीवन्मुक्त उच्यते ॥ रुद्राक्षसंग्रहेभक्त्यारत्नवद्रसमसंग्रहं ॥ २५ ॥
यः करोतिप्रयत्नेनसजीवन्मुक्त उच्यते ॥ गोक्षीरेणमहादेवंयोभिषिंचतिसादरं ॥ २६ ॥ सभुक्त्वासकलान्भोगान्शि
वलोकंगमिष्यति ॥ मधुनैवमहादेवंयोभिषिंचतिसादरं ॥ २७ ॥ २८ ॥ सभुक्त्वास० ॥ शिवमिक्षुरसेनैवयोभिषिंचतिसादरं ॥ २९
१ गोघृतेनमहादेवंयोभिषिंचतिसादरं ॥ २७ ॥ सभुक्त्वासकलानभोगान्शिवलोकंगमिष्यति ॥

सभुक्त्का०॥ नारिकेलोदकेनेशंयोभिषिंचतिसादरं॥३०॥ सभुक्त्का०॥ खंडदध्नामहादेवंयोभिषिंचतिसादरं॥३१॥ सभुक्त्का०॥
श्वेतशर्करयाशंभुंयोभिषिंचतिसादरं॥ सभुक्त्का०॥ चंद्रभागोदकेनेशंयोभिषिंचतिसादरं॥ ३३॥ सभुक्त्का०॥ सुगंधसलिले
नेशंयोभिषिंचतिसादरं॥ ३४॥ सभुक्त्का०॥ बिल्वपत्रैर्महादेवंयः पूजयतिसादरं॥ सभुक्त्का०॥ शतपत्रैर्महादेवंयः पूजयतिसा
दरं॥ ३५॥ उत्फुल्लकमलैरीशंयः पूजयतिसादरं॥ ३६॥ सभुक्त्का०॥ उत्फुल्लमल्लिकापुष्पैर्यः पूजयतिशंकरं॥ ३७॥ सभु०॥
मधूककुसुमैः फुल्लैः यः पूजयतिशंकरं॥ ३८॥ सभुक्त्का०॥ चांपेयकुसुमैः फुल्लैः यः पूजयतिशंकरं॥ ३९॥ सभुक्त्का०॥ मंदार
कुसुमैः फुल्लैः यः पूजयतिशंकरं॥ ४०॥ सभुक्त्कासक०॥ पारिजातैरपिस्वच्छैर्यः पूजयतिशंकरं॥ ४१॥ सभुक्त्का०॥ करवीरैर्म
हादेवंयः पूजयतिसादरं॥ ४२॥ सभुक्त्का०॥ धत्तूरकुसुमैः शुभ्रैर्यः पूजयतिशंकरं॥ ४३॥ सभुक्त्का०॥ शमीपुष्पैरतिस्वच्छैर्यः पूज
यतिशंकरं॥ ४४॥ सभुक्त्का०॥ कुशपुष्पैरतिस्वच्छैर्यः पूजयतिशंकरं॥ ४५॥ सभुक्त्का०॥ दूर्वायुग्मैरतिस्वच्छैर्यः पूजयतिशंकरं॥ ४६॥

सभुक्त्का०॥ श्वेताक्षतैरपिस्वच्छैर्यः पूजयतिसादरं॥ ४७॥ सभुक्त्का०॥ तिलाक्षतैरपिस्वच्छैर्यः पूजयतिशंकरं॥ ४८॥ सभुक्त्का०॥ सिता
सितैस्तिलैरीशंयः पूजयतिसादरं॥ ४९॥ सभुक्त्का०॥ सिद्धार्थैरसितैः शुभ्रैर्यः पूजयतिशंकरं॥ ५०॥ सभुक्त्का०॥ माषैर वैर्वागोधू
मैः र्यः पूजयतिशंकरं॥ सभुक्त्का०॥ दधिकंबलमीशानं वैशारवेयः करिष्यति॥ ५२॥ सभुक्त्का०॥ घृतकंबलमीशाने हेमंतेयः करि
ष्यति॥ ५३॥ सभुक्त्का०॥ मधुकंबलमीशाने शैशिरेयः करिष्यति॥ ५४॥ सभुक्त्का०॥ दध्यन्नेनाज्ययुक्तेन यः पूजयतिशंकरं॥ स
भुक्त्कासकलान्भोगानशिवलोकंगमिष्यति॥ क्षीरान्नेनाज्ययुक्तेनयः पूजयतिशंकरं॥ ५६॥ सभुक्त्का०॥ घृतान्नेनगुडान्नेन
यः पूजयतिशंकरं॥ ५७॥ सभुक्त्का०॥ मध्वन्नेनाज्ययुक्तेनयः पूजयतिशंकरं॥ ५८॥ सभुक्त्का०॥ यः क्षीरान्नेनसाज्येनशांभ
वंभोजयिष्यति॥ ५९॥ सभुक्त्का०॥ यः पट्टकूलवस्त्राद्यैः शांभवंपूजयिष्यति॥ ६०॥ सभुक्त्का०॥ यः सुवर्णेनरत्नैर्वाशांभवंतोष
यिष्यति॥ ६१॥ सभुक्त्का०॥ योमहादेवभक्तानांपरिचर्यापरोभवेत्॥ सभुक्त्का०॥ शरणंयातियः सांबमनोवाक्कायकर्मभिः॥
॥६३॥ सभुक्त्का०॥ शिवमव्यभिचारेणयोर्चयिष्यतिसंततं॥ ६४॥ सभुक्त्कासकलान्भोगान्शिवलोकंगमिष्यति॥ अनन्य

शरणानित्यंशिवमेवभजंतिये॥६५॥ तएवधन्याविप्रेंद्राः सत्यंसत्यंनसंशयः॥ भजंत्यनन्यभावेनभवानीरमणंप्रभुः॥
भाग्यवंतस्ततस्तेभ्योनमोभूयोनमोनमः॥ येषामंत्यंतनुर्विप्रास्तएवगीरिजापतिं॥६७॥ अनन्यभावाःसततंभजंत्य
व्यभिचारतः॥ येनसर्वाणिकर्माणिवैदिकानिमहेश्वरे॥६८॥ समर्प्यतेनिशंतेनमुक्तिर्लब्धानसंशयः॥ अत्यंतदुर्ल
भामुक्तिःप्राप्यतेशिवपूजया॥६९॥ तादृशीशिवपूजैवकर्त्तव्याविधिवद्विजैः॥ प्राणानायम्यसंकल्प्यस्नात्वोद्धूल्यचभस्म
ना॥७०॥ धृत्वात्रिपुंड्रंरुद्राक्षान्कर्त्तव्यंशिवपूजनं॥ महेशएवसंपूज्योमुक्त्यर्थिभिरहर्निशं॥७१॥ यतोमहेश्वरःसांबो
मुक्तिदःपूजितोनिशं॥ नभजंतिमहादेवंयेनन्यशरणाःसदा॥ तेसर्वेनिरयंसर्वेनिरयंयांतियावच्चंद्रतारकं॥ अभा
ग्यपरिपाकेननभजंतिमहेश्वरं॥७३॥ भाग्यौघपरिपाकेनभजंतिश्रीमहेश्वरं॥ येनन्यशरणानित्यंनभजंतिमहे
श्वरं॥७४॥ तेसर्वेप्यंत्यजाएवसत्यंसत्यंनसंशयः॥ विभूत्युद्धूलनंनित्यंनकरिष्यंतियेजनाः॥७५॥ तेसर्वे०॥ येनकु
र्वंतिभालादौत्रिपुंड्रस्यैवधारणं॥७६॥ तेसर्वे०॥ येनकुर्वंतिसततंकंठेरुद्राक्षधारणं॥ तेसर्वे०॥७८॥ येनकुर्वंतिसततं
शिवस्यैवार्चनंद्विजाः॥ तेसर्वे०॥७९॥ येनकुर्वंतिसततंमहादेवानुचिंतनं॥ तेसर्वे०॥८०॥ येनकुर्वंतिसततंमहादेवा
नुकीर्त्तनं॥ तेसर्वे०॥८१॥ येनकुर्वंतिसततंमहादेवकथारतिं॥ तेसर्वे०॥८२॥ येविष्णुतुल्यतांप्राहुर्महादेवेसुरोत्तमे॥
तेसर्वे०॥८३॥ येशिवस्मरणंत्यक्त्वास्मरंत्यन्यान्सुरान्द्विजाः॥ तेसर्वेप्यंत्यजाएवसत्यंसत्यंनसंशयः॥८४॥ देवानांच
द्विजानांचविशेषेणसदाशिवः॥ पूजनीयोन्वहंभक्त्याबिल्वपत्रादिसाधनैः॥८५॥ सौभाग्यमतुलंप्राप्यंभगवत्पूज
याद्विजाः॥८६॥ योवैरुद्रःसभगवानित्यथर्वशिरःस्वयं॥ भगवान्रुद्रएवेतिवदत्येवपुनःपुनः॥८७॥ नरुद्रादपरो
देवोभगवानितिगीयते॥ तस्मात्सभगवान्रुद्रोभजनीयोमुमुक्षुभिः॥८८॥ भगवंतमुमाकांतोभजंतिभवभीरवः
॥ नरुद्रादपरोदेवोभवभीमभयापहः॥८९॥ भगवान्रुद्रएवेतिनवदिष्यंतियेद्विजाः॥ तेवेदबाह्याःसर्वेपिस

त्यंनसंशयः॥९०॥श्रीमहारुद्रएवेतिभगवान्नितियोवदेत्॥ सतरत्येवसंसारमसारमतिदुःखदं॥९१॥भगवां
न्रुद्रएवेतिवेदतत्वविदोविदुः॥ ततस्तेवेदतत्वज्ञाभगवंतंभजंतिते॥९२॥ योयोवैरुद्रइत्यत्रवैकारोवर्त्ततेद्वि
जाः॥ सएवकारस्तेनान्ययोगएवनिषिध्यते॥९३॥ भगवान्रुद्रएवेतिवैकारेणविनिश्चिते॥ रुद्रान्योभगवा
न्नेतिनिश्चयोवेदतोभवेत्॥९४॥ भगवंतमुमाकांतमनन्यायेभजंतितान्॥ नमस्कुर्मेनमस्कुर्मेपुनःपुनः
॥९५॥ शिवरुद्रमहादेवभगवन्शंकरेश्वर॥ महेश्वरेतिसततंवदत्वनुदिनंद्विजाः॥९६॥ सांबशंभोविरूपा
क्षविष्णुब्रह्मादिवंदित॥ सदाशिवेतिसततंवदत्वनुदिनंद्विजाः॥९७॥ चंद्रशेखरविश्वेशचंद्रसूर्याग्निलोच
न॥ परात्परेतिसततंवदत्वनुदिनंद्विजाः॥९८॥ कर्पूरगौरकामारेनरसिंहनिषूदन॥ देवोत्तमेतिसततंव०
॥९९॥ वामदेवामराधीशभसितोद्धूलनप्रिय॥ विश्वरूपेतिसततंव०॥१००॥ अनंतसोमसूर्याग्निप्रभाधिक
महाप्रभ॥ विश्वनाथेतिसततंव०॥१॥ उमाकांतामराराध्यभगवन्नीललोहित॥ ललाटाक्षेतिसततंव०॥
२॥ हरामरेशपापारेमधुसूदनसूदन॥ कालकालेतिसततंवदं०॥३॥ भवशर्वत्रिलोकेशशूलपाणे-
महेश्वर॥ शिवाप्रियेतिसततंवदं०॥४॥ उग्रभीमभवारातेगर्भत्रिपुरसूदन॥ नीलकंठेतिसततंव०॥५॥
विष्णुनेत्रार्चितानर्घ्यशरण्यपदपंकज॥ मृत्युंजयेतिसततंवदत्वनुदिनंद्विजाः॥६॥ त्रिकाग्निकालकाल
ज्ञज्ञानरूपदिगंबर॥ त्रियंबकेतिसततंव०॥७॥ खट्वांगपाणेसर्वात्मनंधकासुरसूदन॥ सर्वेश्वरेतिसत
तंवदत्वनुदि०॥८॥ कैलासवासीगौरीशवृषांकवृषभध्वज॥ सर्वोत्तमेतिसततंवदत्वनुदिनंद्विजाः॥९॥
काशीनाथविमुक्तेशभवानीप्राणवल्लभ॥ विश्वेश्वरेतिसततंव०॥१०॥ उमासहायचिद्रूपनिरंजननिराम
य॥ परमात्मेतिसततंव०॥११॥ एतानिदिव्यनामानिमहेशस्यमहात्मनः॥ जपनीयानियत्नेनमुमुक्षुभि

रहर्निशं ॥१२॥ स्मर्तव्योस्माभिरनिशंस्मरापस्मारनाशकः ॥ नहिस्मरहरादन्यः स्मर्तव्योस्माभिरन्वहं ॥ नहिस्मरहरा
दन्यः स्मर्त्तव्योस्माभिरन्वहं ॥ नहिस्मरहरादन्यः संसारोन्मूलकारणं ॥ ततः संसारनाशाय सेव्यः स्मरहरः सदा ॥
१४॥ शिवनामकुठारेणसंसारतरुरेकदा ॥ सत्वरंयदिविछिन्नोनप्ररोहतिसर्वथा ॥१५॥ संसारतरुमूलानिबहूनिविवि
धान्यपि ॥ शिवनामकुठारेणनिर्मूलानिभवंतिहि ॥१६॥ संसारतरुमूलानांपातकंमूलमुच्यते ॥ तन्नाशस्तुभवत्येवशि
वनामसकृज्जपात् ॥१७॥ सादरंभस्मदिग्धांगोवदेच्छिवशिवेतियः ॥ ससंसारविनिर्मुक्तोभवत्येवनसंशयः ॥१८॥
येकुर्वंतिशिवध्यानंभस्मरुद्राक्षभूषणाः ॥ तेभविष्यंतिविप्रेंद्राः शेषभूषणभूषिताः ॥१९॥ शिवध्यानसमंध्यानंनश्रुतंश्रु
तिषुध्रुवं ॥ सत्यमेतत्पुनः सत्यमुद्धृत्यभुजमुच्यते ॥२०॥ अनेकजन्मभिर्नित्यंपुण्यंबहुकृतंयदि ॥ तदाशिवेतिशब्दोयंसाद
रं निःसरिष्यति ॥२१॥ शिवेतिनामविमलंयेनोच्चरितमादरात् ॥ तेनभूयोनसंसारसागरः समवाप्यते ॥२२॥ वाजपेया
दिकायागाः कृतायेनैवकोटिशः ॥ तेनैवोच्चार्यतेभक्त्याशिवनामशिवप्रदं ॥२३॥ कृतानिरत्नदानानिपात्रेयेनैवकोटिशः ॥
तेनैवो० ॥२४॥ कृतानिहेमदानानिपात्रेयेनैवकोटिशः ॥ तेनैवो० ॥२५॥ कृतानिकंन्यादानानिपात्रेयेनैवकोटिशः ॥ तेनैवो०
॥२६॥ कृतानिगजदानानिपात्रेयेनैवकोटिशः ॥ तेनैवो० ॥ २७॥ कृतान्यश्वप्रदानानिपात्रेयेनैवकोटिशः ॥ तेनैवो० ॥२८॥
कृतानिगोप्रदानानिपात्रेयेनैवकोटिशः ॥ तेनैवोच्चार्यतेभक्त्याशिवनामशिवप्रदं ॥२९॥ शिवपंचाक्षरीविद्यामुक्तिविद्येतिगीय
ते ॥ साविद्याशिवरूपैवसर्ववेदांतसंश्रुता ॥३०॥ विद्यानामुत्तमाविद्यावेदविद्येतिगीयते ॥ तत्रापिवेदविद्यायांश्रीरुद्राध्यायमुत्त
मः ॥३१॥ तत्राप्यत्युत्तमाविद्याशिवपंचाक्षरात्मिका ॥ सैवविद्यामहाविद्यामोक्षविद्येतिगीयते ॥३२॥ लोकानांप्रलयेप्राप्ते
लोकावेदेलयंगताः ॥ ततः सर्वेपिवेदास्तेरुद्राध्यायेलयंगताः ॥३३॥ रुद्राध्यायोलयंप्राप्तः शिवपंचाक्षरेततः ॥ शि
वपंचाक्षरः श्रुत्योनकुत्रापिविलीयते ॥३४॥ शिवपंचाक्षरोनामपरब्रह्मेतिगीयते ॥ नपरब्रह्मणोनाशः कदाचिदपि

वस्तुतः॥३५॥ परब्रह्मेतिविज्ञेयंशिवइत्यक्षरद्वयं॥ तद्ब्रह्मेतिविदित्वैवतदुपास्यंमुमुक्षुभिः॥३६॥ तच्छिवब्रह्मेत्युपासीत
भवतिब्रह्मवांस्ततः॥ब्रह्मवान्ब्रह्मविद्भूत्वाब्रह्मभूतोहिजायते॥३७॥ पंचाक्षरात्मकंब्रह्मज्ञेयंब्रह्मेतिवैदिके॥ नतद्ब्रह्मेतिवि
ज्ञायप्राप्नोतिनरकंध्रुवं॥३८॥अव्यक्तंपरमंब्रह्मशिवइत्यक्षरद्वयं॥ तदेवसर्ववेदांतप्रतिपाद्यंनसंशयः॥३९॥ पुराके-
लासशिखरेसुखासीनंमहेश्वरं॥ पप्रच्छपरयाभक्त्यापार्वतीविनयान्विता॥४०॥ ॥पार्वतीउवाच॥ ॥भगवन्श्रीमहारु
द्रश्रीमहादेवशंकर॥अद्यैकंप्रष्टुमिच्छामितद्वदस्वकृपानिधे॥४१॥ अष्टोत्तरसहस्रंतुनाम्नामुक्तंत्वयापुरा॥ तानिनामानि
मुख्यानिमुक्तिदान्यपिवस्तुतः॥४२॥ तत्राप्यत्युत्तमंनामकिमस्त्येकंवदस्वमे॥ यन्नामजपमात्रेणमुक्तिर्हस्तगताभवेत्॥
४३॥ ॥महादेवउवाच॥ ॥शिवइत्यस्तियन्नामतच्छिनामोत्तमोत्तमं॥ तदेवपरमंब्रह्मतदेवाहंवरानने॥४४॥शिवनाम
स्वरूपेणव्यक्तंब्रह्माहमेवहि॥ शिवनामाहमेवेतिविजानीहियथार्थतः॥४५॥यदव्यक्तंपरब्रह्मवेदांतप्रतिपादितं॥तदेवदं
विजानीहिशिवइत्यक्षरद्वयं॥४६॥ इदंव्युत्पत्तिरहितंशिवनामनिरंजनं॥ निराकारंपरब्रह्मनैतस्माद्ब्रह्मभिद्यते॥४७॥उपा
सितव्यमेतच्छिवब्रह्मेत्यन्वहमादरात्॥शिवइत्यक्षराकारमक्षरंब्रह्मशाश्वतं॥४८॥नमःपूर्वयकारांतंब्रह्मेदंचेत्प्रयुज्यते॥ब्र
ह्मस्वरूपमाप्नोतिब्रह्मब्रह्मविदोजनः॥४९॥ एवमेतत्परंब्रह्मयोविजानातितत्वतः॥सब्रह्मविदितिज्ञेयस्तदन्योब्रह्मविन्नहि॥
५०॥ ब्रह्मकोशंचतुर्जालंयंमृत्युर्नावपश्यति॥ तदाप्यतीत्यप्राप्नोतिब्रह्मब्रह्मविदीदृशं॥ इयमुक्तामहाविद्याब्रह्मविद्यामयाधु
ना॥ गोपनीयाः प्रयत्नेननाख्येयायस्यकस्यचित्॥५२॥ इयंहिपरमाविद्यामोक्षविद्येतिगीयते॥ नातःपरंमोक्षविद्यासर्वस्व
मियमेवहि॥५३॥तारकंब्रह्मपरमंशिवइत्यक्षरद्वयं॥नैतस्मादपरंकिंचित्तारकंब्रह्मसर्वथा॥५४॥ इदमेवपरंब्रह्मकाश्यांमल्लिं
गधारिणां॥ अंतकालोपरक्तानांमयादेव्युपदिश्यते॥५५॥ मल्लिंगमितितद्ब्रेयंकेवलंभस्मधारणं॥ रुद्राक्षधारणंतद्वत्केव
लंलिंगपूजनं॥५६॥ पंचाक्षरजपेनिष्ठारुद्राध्यायजपेतथा॥ सोमवारव्रतेनिष्ठारुद्राध्यायजपेतथा॥ सोमवारव्रतेनिष्ठाम

मत्कथाश्रवणेरतिः॥५७॥ इमानिममलिंगानियेषामव्यभिचारतः॥ तेभ्यएवपरंब्रह्ममयादेव्युपदिश्यते॥ ५८॥ इदंयत्तारकंब्रह्म
शिवनामाभिधंशिवे॥ एतस्मिन्ब्रह्मणिश्रद्धानविनामदनुग्रहं॥ ५९॥ अनंतपुण्यभूतात्मामदनुग्रहसंयुतः॥ तारकंब्रह्मपरममि
दंमत्वाधितिष्ठति॥ ६०॥ सर्वार्थदायकोदेविनयस्मिन्मदनुग्रहः॥ नतस्यात्रब्रह्मबुद्धिर्जन्मकोट्यर्बुदैरपि॥ ६१॥ ब्रह्मबुद्धिर्नयस्या
त्रससंसारीभविष्यति॥ पुनःपुनः ससंसारीनरकंचाधिगच्छति॥ ६२॥ मदर्थकोटिशोधर्माःकृतायेनमुहुर्मुहुः॥ तस्यात्रभवतिश्र
द्धाब्रह्मबुद्धिश्चजायते॥ ६३॥ परंब्रह्मेदमेवेतियोजानातिविशेषतः॥ सनसंसारभाग्भूयोभविष्यतिवरानने॥ ६४॥ अनेककल्प
पर्यंतंतपस्तप्तंभवेद्यदि॥ तदाब्रह्मेदमेवेतिविजानातिविशेषतः॥ ६५॥ अनेककल्पपर्यंतंयदिमल्लिंगधृग्भवेत्॥ तब्रह्मेदमेवेतिवि
जानातिविशेषतः॥ ६६॥ ब्रह्मविद्यामिमांदेवियोन्यथाभावयिष्यति॥ सचंडालकुलेसन्नोभूयोभूयोभविष्यति॥ ६७॥ ब्रह्मविद्ये
यमधुनातुभ्यमुक्तामयाशिवे॥ नमयोक्तापुरान्यस्मैसत्यंसत्यंनसंशयः॥ ६८॥ त्वयाप्यत्यंतभक्तायब्रह्मविद्येयमुत्तमा॥ वक्तव्याति
विनीतायनान्यस्मैतुकदाचन॥ ६९॥ विद्येयंगोपनीयैवप्रयत्नेनवरानने॥ यतोमोक्षप्रदाविद्यासेयमेवेतिमन्महे॥ ७०॥ त्वमत्यंत
प्रियासीतिमोक्षविद्येयमंबिके॥ तुभ्यमुक्तामयाप्रीत्यागोपनीयापिवस्तुतः॥ ७१॥ ॥ गौतमउवाच॥ ॥ इत्युक्तांपरमांविद्यांइ
मांज्ञात्वातदाशिवा॥ आचख्यौस्वकुमारायषण्मुखायशिवाज्ञया॥ ७२॥ आचख्यौनंदिकेशायकुमारोगिरिजाज्ञया॥ अगस्त्याय
समाचख्यौसकुमाराज्ञयाततः॥ ७३॥ अगस्त्योमह्यमाचख्यौनंदिकेशाज्ञयाततः॥ युष्मभ्यमुक्ताविद्येयंप्रसंगादधुनामया॥
७४॥ इयंतुपरमाविद्यादुर्लभामोक्षदाद्विजाः॥ गोपनीयाप्रयत्नेनध्यातव्याचप्रयत्नतः॥ ७५॥ सदाशिवशिवेत्येवशिवनामानु
कीर्तनं॥ कर्त्तव्यमतियत्नेनमुक्तिकामैरहर्निशं॥ ७६॥ यस्यास्त्यविकलाबुद्धिःशिवनामानुकीर्त्तने॥ तस्मिन्ननुग्रहोस्त्येवमहादेव
स्यसंततं॥ ७७॥ शंकरानुगृहीतानांशिवनामानुकीर्त्तने॥ भक्तिर्भवतिनान्येषांसत्यंसत्यंनसंशयः॥ ७८॥ शिवेतिनामविमलंयेन
सादमुच्यते॥ तेनघोरतरस्तूर्णंतीर्णःसंसारसागरः॥ ७९॥ शिवनामाग्निनैवायंघोरसंसारसागरः॥ शुष्यतेतस्यसहसानान्य

दस्यैवशोषकं॥८०॥येननोच्चारितंप्रीत्याशिवनामशिवात्मकं॥तेनसंप्राप्यतेभूयोजन्मचंडालकोटिषु॥८१॥मोक्षदंशिवनामैव
त्याभुयोनवदिष्यति॥तेनसंप्राप्यतेभूयोजन्मचंडालकोटिषु॥८२॥शिवएवान्वहंपूज्यइतियोनवदिष्यति॥तेनसं०॥८३॥शिवः
सर्वामराधीशइतियोनवदिष्यति॥तेनसं०॥८४॥शिवनाम्निनयस्यास्तिविश्वासोमोक्षदायके॥तेनसंप्राप्यतेभूयोजन्मचंडाल
कोटिषु॥८५॥पुराविंध्याचलप्रांतेरेवातीरेमनोरमे॥बहुकालंस्थितंविप्रामयाऋषिवरैःसह॥८६॥ततःपरंमयोद्युक्तंकाशींगं
तुंमुनीश्वराः॥ततोऋषिवरैःसाकंततःप्रचलितंमया॥८७॥मध्येमार्गेक्वचिद्दृष्टःकुष्ठीपूयपरिप्लुतः॥क्रिमिसंवृत्तसर्वांगोमु
मूर्षुःशुष्कतालुकः॥८८॥संदश्यमानःक्रिमिभिर्दुःखंप्राप्यातिदारुणं॥तदाशिवशिवेत्युक्त्वाजहौप्राणान्सदुःखितः॥
अयंशिवशिवेत्युक्त्वामुमोचासूनगतःपरं॥गतिःकाभाविनीत्युक्त्वामयातत्रास्थितंद्विजाः॥९०॥ततःसमागता
स्तत्रकोटिशोयमकिंकराः॥आगत्यबध्वातंनिन्युःशीघ्रंमोहाद्यमालयं॥९१॥यतंमयापिविप्रेंद्रयमलोकायसत्वरं॥
तदानीमागतावीराःशंकरस्यापिकिंकराः॥९३॥नारायणाद्यादेवाश्चततस्तत्रसमागताः॥शैवोयंयमलोकायनी
तःकथमितिद्विजाः॥तानागतान्सुरान्दृष्ट्वायमस्तान्छंकरानपि॥भक्त्यासंपूजयामासमामप्यर्घ्यादिभिर्द्विजाः
॥९४॥यमःकिंधर्मनिरतोनवायमितिशंकराः॥विज्ञातुंतस्यवृत्तांतंस्थिताःतूष्णींविलोकयन्॥९५॥संपूज्यसादरं

कालःसदेवान्शिवकिंकरान्॥तमानीतंचसंवीक्ष्यचित्रगुप्तमुवाचसः॥९६॥ ॥यमउवाच॥ ॥किमनेनकृतं
पापंचित्रगुप्तवदस्वमे॥कार्यकर्मानुरूपेणसत्वरंशासनंमया॥९७॥ ॥चित्रगुप्तउवाच॥ ॥कृतान्यनेनपापानि

पा

तेषामंतोनदृश्यते॥कोटयोब्रह्महत्यानामनेनैवपुराकृताः॥९८॥अनेनैवहिमत्तेनब्रह्मस्वहरणंकृतं॥कोटिशः
पूर्वमेतेनदग्धाब्राह्मणपुंगवाः॥९९॥मद्यंपीतान्वहंमत्तःस्वसारमधिगच्छति॥तथादुहितरंगच्छत्येवंमातरमप्य
यं॥९७॥आब्रह्मकल्पमेतस्ययदिस्यान्नरकेस्थितिः॥तथापिनैतत्पापस्यविनाशस्तुभविष्यति॥९२॥अयमे

वंघृताद्योपिस्वप्राणोत्क्रमणेक्षणे ॥ स्वयंशिवशिवेत्याहसत्यमत्रनसंशयः ॥ ९९ ॥ शिवनामोच्चारणेस्यवक्ष्येहंकारणंमम ॥ शृणुष्वसावधा
नेनयच्छ्रुत्वाप्रीतिमाप्स्यति ॥ १०० ॥ अनेनैववनेपूर्वंस्थितंदुष्कृतकर्मणा ॥ तस्मिन्नेववनेदृष्टःकश्चिच्छैवोतिदुर्बलः ॥ १ ॥ तंदृष्ट्वा
शैवमत्यंतंसंतुष्टोयंतदाथम ॥ चकारपोषणंतस्यस्वशक्त्यासाधुसादरं ॥ २ ॥ तेनैवपोषितःशैवःस्तस्मैरुद्राक्षमुत्तमं ॥ विभूतिंचद
दौप्रीत्याद्धारायंचतद्द्वयं ॥ ३ ॥ तेनपुण्यप्रभावेनसोयंदेहव्ययक्षणे ॥ शिवशब्दद्वयंप्राहमोक्षपाथेयमद्वयं ॥ ४ ॥ ॥ गौतमउवा
च ॥ ॥ इत्युक्तंतद्वचःश्रुत्वायमःशीघ्रंसमुत्थितः ॥ तत्पादमूलेपतितःसम्यक्कृत्वाप्रदक्षिणं ॥ ५ ॥ ततःसिंहासनेस्वीयेनानार-
त्नविराजिते ॥ उपवेश्यार्घ्यपाद्याद्यैःपूजयामाससादरं ॥ ६ ॥ ततोबभाषेवचनंयमस्तान्स्वभटान्प्रति ॥ कंपयन्स्वभटान्सर्वान्
भृकुटीकृतलोचनः ॥ ७ ॥ ॥ यमउवाच ॥ ॥ शिवनामब्रह्मरूपंयेनोक्तंमरणक्षणे ॥ सनात्रानेयइत्युक्तंभवद्भिर्विस्मृतंकथं ॥ शि
वनामब्रह्मरूपंयेनोक्तंमरणक्षणे ॥ सनस्प्रष्टव्यइत्युक्तंभव० ॥ ९ ॥ शिवनामब्रह्मरूपंयेनोक्तंमरणक्षणे ॥ संपूज्यःसर्वथेत्युक्तंभव
द्भिर्वि० ॥ १० ॥ महापातकयुक्तोवायुक्तोवासर्वपातकैः ॥ अंतकालेशिवेत्युक्त्वानायातिमममंदिरं ॥ ११ ॥ ब्रह्महत्यार्बुदंकृत्वाप्य
न्वहंयत्नपूर्वकं ॥ अंतकाले० ॥ १२ ॥ अश्वहत्यार्बुदंकृत्वाप्यन्वहंयत्नपूर्वकं ॥ अंतकाले० ॥ १३ ॥ गजहत्यार्बुदंकृत्वाप्यन्वहंय
त्नपूर्वकं ॥ अतकालेशिवे० ॥ १४ ॥ दोग्ध्रीहत्यार्बुदंकृत्वाप्य० ॥ अंतका० ॥ १५ ॥ राजहत्यार्बुदंकृत्वाप्यन्व० अंतकालेशि० ॥ १६ ॥ नारीह
त्यार्बुदंकृत्वाप्य० ॥ अंतकालेशि० ॥ १७ ॥ गोमांसभक्षणंकृत्वाप्य० ॥ अंतकाले० ॥ १८ ॥ मद्यपानादिकंकृत्वाप्य० ॥ अंतका० ॥ १९ ॥
ब्रह्मस्वहरणंकृत्वाप्य० ॥ अंतकाले० ॥ २० ॥ स्वमातृगमनंकृत्वाप्यन्वहंयत्न० ॥ अंत० ॥ २१ ॥ स्वकन्यागमनंकृत्वाप्यन्वहं० ॥ अंतका०
॥ २२ ॥ भगिनीगमनंकृत्वा० ॥ अंतकाले० ॥ २३ ॥ चंडालीगमनंकृत्वा० ॥ अंतका० ॥ २४ ॥ यस्मिन्ननुग्रहःशंभोस्तेनैवमरणक्षणे ॥ शि
वेत्युदीर्यतेशब्दःसाक्षान्मोक्षप्रदायकः ॥ २५ ॥ येनैवोदीर्यतेशुद्धःशिवशब्दोमृतिक्षणे ॥ तेनैवप्राप्यतेमोक्षः ॥ २६ ॥ शिवशब्दम
नुच्चार्यब्राह्मणोपिनमुच्यते ॥ शिवशब्दमनुच्चार्यचंडालोपिविमुच्यते ॥ २७ ॥ सर्वाणिशिवनामानिमोक्षदान्येवसर्वथा ॥ तेष्व
प्यत्युत्तमंनामशिवेतिब्रह्मसंज्ञितं ॥ २८ ॥ अघोरतरसंसारसगारप्लुतमप्लुतं ॥ उद्धरत्यंतकालोक्तंशिवनामशिवात्मकं ॥ २९ ॥

सर्वाणिशिवनामानिमोक्षदान्येवसर्वथा॥तेष्वप्यत्युत्तमंनामशिवेतिब्रह्मसंज्ञितं॥शिवनामसमंवस्तुनदृष्टंक्वापिनश्रुतं॥रत्नरत्न
मिदंनूनंनामरत्नमनुत्तमं॥३०॥नित्यंकंठेधृतोयेनशिवनाममहामणिः॥सनीलकंठोभूत्वातेनीलकंठेविलीयते॥३१॥ब्रह्मप्रका
शकंसाक्षाच्छिवइत्यक्षरद्वयं॥नतस्मादधिकंक्वापिनामब्रह्मप्रकाशकं॥३२॥प्रतिक्षणंशिवेत्येवनामयोवक्तुमिच्छति॥तस्मैनमो
नमोभूयोनमस्तस्मैनमोनमः॥३३॥यःश्रुणोतिशिवेत्येतन्नामभक्तिपुरःसरं॥तस्मैनमोनमो०॥३४॥शिवेतिनामश्रुत्वैवयोहृ
ष्टहृदयोभवेत्॥तस्मै०॥३५॥शिवेतिनामपीयूषंयःपिबेदन्वहंमुदा॥तस्मै०॥३६॥शिवनाम्नैवसततंव्यवहारंकरोतियः॥
तस्मैनमोनमोभूयोनमस्तस्मैनमोनमः॥३७॥महाप्रलयकालाग्निर्यथादहतिपर्वतान्॥तथादहतिपापाद्रीन्शिवनामानलो
ध्रुवं॥३८॥शिवनामविनाश्यानिपातकान्यामतान्यतः॥महाघनाशकंतत्किंनमिताघोघनाशकं॥३९॥अनंतान्यपिपापा
निशिवनामस्मृतंपरं॥सद्योविनाशयत्येवविचित्राण्यपिसत्वरं॥४०॥अंतकालेशिवेत्युक्त्वायस्तुप्राणान्विमुंचति॥ससर्व
धात्रनानेयःसयतःशांकरोजनः॥४१॥शांकरोनैवपश्यंतिदुष्टंममनिकेतनं॥अतएवात्रनानेवाःशांकराःशंकरप्रियाः॥
४२॥यस्यांगेशांकरंचिन्हंसनानेयोत्रसर्वथा॥यतःसशांकरोकोकःशांकरःशंकरप्रियः॥४३॥शंकरांकानिवक्ष्येहंतानिश्रु
ण्वंतुसादरं॥यदंकश्रवणेनापिपापनाशोभविष्यति॥४४॥रुद्राक्षधारणंशुद्धंकेवलंभस्मधारणं॥केवलाशिवपूजाच
शंकरांकमितिश्रुतिः॥४५॥शिवनामानुसंधानंरुद्राध्यायानुवर्त्तनं॥उद्धूलनंचसर्वांगेशंकरांकमितिश्रुतिः॥४६॥सोमवारव्र
तश्रद्धातथाशिवकथारतिः॥शिवभक्तजनप्रीतिःशंकरांकमितिश्रुतिः॥४७॥इमानिकेवलान्येवशिवांकानितथासति॥इमान्यंका
नियस्यांगेकेवलानिसशांकरः॥४८॥एतादृशाःशांकरास्तुनायांतिममममंदिरं॥यैंर्घ्नोतिदुःखदंदुष्टंयमस्यममंमंदिरं॥४९॥
शांकराःशंकरांकांकानिरातंकानिरंकुशाः॥भुविविन्यस्तपर्यंकःप्रयांत्येवशंकरं॥५०॥अद्यप्रभृतिनानेयःशांकरोत्रकदा
चन॥यद्यत्रानीयतेमोहाद्यष्मान्हंम्याम्यहंतदा॥५१॥शिक्षैवमेवक्रियतेप्रत्यहंसादरंमया॥तथापिभवतांबुद्धिरन्यथैवहि
जायते॥५२॥ ॥गौतमउवाच॥ ॥इत्युक्त्वाक्रोधसंविष्टोगृहीत्वावेत्रमायतं॥ताडयामासबहुधातदायमभटान्यमः॥

पं०९ नयस्यकुलधर्मेयिंरुद्राध्यायानुवर्त्तनं ॥ सचंडा०॥ ६७॥

पं०८ नयस्यकुलधर्मेयिंश्रुत्थंरुद्राक्षधारणं ॥ सचंडाल०॥ ६५॥

॥ ५३॥ ततःपरंपुनःसर्वान्पूजयामासशांकरान् ॥ देवांस्त्वातीवविनयात्सुश्रेष्ठमामपथपूजयत् ॥ ५४॥ ततस्तेशांकराःसर्वे तंगृहीत्वाविमानगं ॥ अतीत्यसत्यलोकादीनययुःशंकरमंदिरं ॥ ५५॥ ततस्तान्प्रस्थितान्दृष्ट्वावैकुंठेपरिसत्वरं ॥ आदि विष्णुरयंसम्यक्पूजयामाससादरं ॥ ५६॥ ततःससमभूद्विप्रःशिवेलीनःशिवाज्ञया ॥ शिवनामस्मृतिफलंतस्यजातं तथातदा ॥ ततःशिवेतिनामैवजपनीयंमुमुक्षुभिः ॥ सर्वंविहायसततंयत्नपूर्वकमादरात् ॥ ५८॥ शिवनामजपःकार्यःकार्यंच शिवपूजनं ॥ विभूतिधारणंकार्यंकार्यंरुद्राक्षधारणं ॥ ५९॥ कुलधर्मेयिमोस्माकंकेवलंशंकरार्चनं ॥ कुलधर्मेयिमस्माकंके वलंशिवचिंतनं ॥ ६०॥ कुलधर्मेयिमस्माकंकेवलंशिवसेवनं ॥ कुलधर्मेयिमस्माकंकेवलंभस्मधारणं ॥ ६१॥ कुलधर्मेयि मस्माकंश्रुत्थंरुद्राक्षधारणं ॥ कुलधर्मेयिमस्माकंकेवलंशांकरार्चनं ॥ ६२॥ नयस्यकुलधर्मेयिंकेवलंशंकरार्चनं ॥ सचं डालइतिविज्ञेयोजन्मजन्मांतरेद्विजाः ॥ ६३॥ नयस्यकुलधर्मेयिंकेवलंभस्मधारणं ॥ सचंडा०॥ ६४॥ नयस्यकुलधर्मेयिंपंचा क्षरजपःपरः ॥ सचंडाल०॥ ६६॥ नयस्यकुलधर्मेयिंकेवलंशिवचिंतनं ॥ सचंडा०॥ ६८॥ नयस्यकुलधर्मेयिंकेवलंशिवसेवनं ॥ सचंडा०॥ ६९॥ नयस्यकुलधर्मेयिंकेवलंशांकरार्चनं ॥ सचंडा०॥ ७०॥ नयस्यकुलधर्मेयिंश्रुत्थाशिवकथाश्रुतिः ॥ स चंडाल०॥ ७१॥ येननक्रियतेनित्यंकेवलंशंकरार्चनं ॥ सचंडालाकुलोत्पन्नोभूयोभूयोभविष्यति ॥ ७२॥ येननक्रियते नित्यंकेवलंभस्मधारणं ॥ सचंडाल०॥ ७३॥ येननक्रियतेनित्यंश्रुत्थंरुद्राक्षधारणं ॥ सचंडाल०॥ ७४॥ येननक्रियते नित्यंकेवलंशिवचिंतनं ॥ सचंडा०॥ ७५॥ येननक्रियतेनित्यंकेवलंशांकरार्चनं ॥ सचंडाल०॥ ७६॥ पुराकश्चिद्द्विजो विप्रःशिवपूजापरायणः ॥ उवासहिमवत्प्रांतेनित्यंवन्यफलाशनः ॥ ७७॥ तत्रकश्चनभिल्लोभूत्सतुब्रह्मवधप्रि यः ॥ ब्रह्मस्वहरणोद्युक्तोब्रह्मस्वहरणप्रियः ॥ ७८॥ ससमागत्यतंविप्रंतदाहंतुंसमुद्यतः ॥ तमुवाचतदाभीत्याभिल्लं भल्लकरंद्विजः ॥ ॥ द्विजउवाच ॥ ॥ भिल्लमांभल्लहस्तःसन्किमर्थंहंतुमिच्छसि ॥ ब्राह्मणोहमहंशैवोममहत्या इतिभि तिदुःखदा ॥ ८०॥ इत्युक्तंतद्वचःश्रुत्वाभिल्लःप्रोवाचतंद्विजं ॥ ब्रह्महत्यांविनाविप्रनमयाभुज्यतेद्विजाः ॥ ८१॥

तमुवाचततो भिक्षुः शैवः किंलक्षणो द्विज ॥ य
द्वचः श्रुत्वातमुवाचततो द्विजः ॥ शैवहत्यानकर्त्तव्यादुःखदासाभविष्यति ॥ ८२ ॥
स्यहत्यादुःखदास्यादितिनम्रमुखो द्विजः ॥ ८३ ॥ ॥ द्विजउवाच ॥ ॥ क्रियतेयेनसततंकेवलंभस्मधारणं ॥ सशैवइतिविज्ञेयस्त
स्यहत्यातिदुःखदा ॥ ८४ ॥ क्रियतेयेनसततंशुध्यंरुद्राक्षधारणं ॥ सशैवइ॰ ॥ ८५ ॥ क्रियतेयेनसततंकेवलंशंकरार्चनं ॥ सशैव॰ ॥
८६ ॥ क्रियतेयेनसततंकेवलंशिवचिंतनं ॥ सशैव॰ ॥ ८७ ॥ क्रियतेयेनसततंकेवलंशिवसेवनं ॥ सशैव॰ ॥ ८८ ॥ श्रुत्वाशिवकथामेवयः
शृणोत्यनिशंमुदा ॥ सशैव॰ ॥ ८९ ॥ शैवंपंचाक्षरंनित्यंयोजपङ्क्तिपूर्वकं ॥ सशैव॰ ॥ ९० ॥ श्रीरुद्राध्ययनंनित्यंयः करोतिप्रयत्नतः ॥
सशैवइतिविज्ञेयस्तस्यहत्यातिदुःखदा ॥ ९१ ॥ कृतधर्मोपिबहुधाशैवहानविमुच्यते ॥ शैवोयतः शंकरस्यसाक्षादनुचरः स्मृतः ॥
॥ ९२ ॥ अशैवास्तूक्तधर्मेभ्यः प्रच्युता इतिकीर्तिताः ॥ तेषांवधेनपापस्यलेशोपीतिविनिर्णयः ॥ ९४ ॥ किंचान्यदपिवक्ष्येहंपरलोकहि
तंतवतच्छृणुश्वातियत्नेनचित्तमन्यत्रमाकुरु ॥ ९५ ॥ शैवलिंगमिहास्त्येकंएतस्यकुरुपूजनं ॥ नित्यंबिल्वदलैः पुष्पैः सनिर्भर्जले
र्मुदा ॥ ९६ ॥ नित्यमेतस्यलिंगस्यपूजनंचेकरिष्यसि ॥ तदापापानिसर्वाणिविनश्यंत्येवसर्वथा ॥ ९७ ॥ ॥ गौतमउवाच ॥ ॥
इत्युक्तेतद्वचः श्रुत्वागुरुंमत्वाचतंद्विजं ॥ ततः परमभूद्भिल्लोनिवृत्तस्तद्वधाद्द्विजाः ॥ ९८ ॥ तदाप्रभृत्यशैवानांब्राह्मणानांवधेरतः ॥
कृत्वानान्यपिपापानिभिल्लस्तत्रस्थितोद्विजाः ॥ ९९ ॥ सतुकृत्वापिपापानिबिल्वपत्रैर्महेश्वरं ॥ पूजयामाससततंपुष्पैरपिजलैः

न्विते ॥ १०० ॥ ब्रह्महत्यांविधायैवप्रत्यहंयत्नपूर्वकं ॥ सभुंक्तेब्राह्मणस्यैवमांसंकृत्वाशिवार्चनं ॥ १ ॥ एतादृशः संवर्षात्तैर्जगामप्र
बलंवनं ॥ तत्रबिल्वतरूंस्तुच्चान्ददर्शबहुपल्लवान् ॥ २ ॥ प्रहृष्टहृदयोजातः सबिल्वतरुदर्शनात् ॥ आरुरोहततोभिल्लोबिल्ववृक्षम
नुत्तमं ॥ ३ ॥ बहूनिबिल्वपत्राणिगृहीत्वैवततः परं ॥ अरण्यकदलीपत्रेष्वस्युच्चैषुबबंधसः ॥ ४ ॥ तदामृत्युः सर्परूपीतंभिल्लंहंतुमु
द्यतः ॥ नशशाकतदाहंतुंभिल्लंबिल्वार्जनप्रियं ॥ कदलीपत्रसंबद्धः बिल्वपत्रांतरेतदा ॥ प्रविष्टः सर्परूपेणमृत्युस्तद्धरणे
च्छया ॥ ६ ॥ अयंयदाबिल्वपत्राण्यधः संस्थापयिष्यति ॥ तदैवैनंहनिष्यामिविषदंष्ट्रैर्नसंशयः ॥ ७ ॥ मृत्युरेवंविचार्यैव
बिल्वपत्रांतरस्थितः ॥ भिल्लः सबिल्वपत्राणिगृहीत्वैवययौततः ॥ ८ ॥ ततः शिवालयेगत्वाभिल्लोबिल्वदलैः शिवं ॥

पूजयामासयत्नेनभस्मधारणपूर्वकं॥ ततःसमृत्युस्तंदृष्ट्वाभिल्लंशंकरपूजकं॥स्वस्वरूपंसमास्थायतमुवाचकृ
तांजलिः॥१०॥ ॥मृत्युरुवाच॥ ॥कालमृत्युरहंभिल्लभवंतंहंतुमुद्यतः॥अहंहंतुंनशक्नोमिभवंतंशंकरार्चकं
॥११॥सर्परूपंसमासाद्यपूर्वमेवसमागतं॥बिल्वपत्रार्जनासक्तंतवचित्तमभूत्तदा॥१२॥तदास्प्रष्टुमशक्तेन
प्रविष्टंबिल्वसंपुटे॥इदानींसुतरांस्प्रष्टुंनशक्नोमिशिवार्चकं॥१३॥यःपूजयतियत्नेनमृत्युंजयमुमापतिं॥त
स्यमृत्युभयंनास्तियथातवतथाध्रुवं॥१४॥अकुंठितंहिगमनंममसर्वत्रयद्यपि॥तथापिशिवभक्तेषुकुंठितंग
मनंमम॥१५॥वरंवृणुवरंदास्येभिल्लनायकसत्वरे॥विलंबंमाकुरुष्वाद्यममगंतव्यमस्तिहि॥१६॥॥गौतमउवाच॥
इत्युक्तोमृत्युनाभिल्लोययाचेवरमुत्तमं॥वरेणयेनस्वस्याग्रेप्रसीदतिमहेश्वरः॥१७॥ ॥भिल्लउवाच॥ ॥ममा
स्त्वविकलाबुद्धिर्मृत्योशंकरपूजने॥एतावताभविष्यामिकृतकृत्योनसंशयः॥१८॥मंत्रमात्रंनजानामिमृत्योशं
करपूजने॥ ~~एतावताभविष्यामिकृतकृत्योनसंशयः॥१८॥~~ तथापिगिरिजानाथःकरोत्येवकृपांमयि॥१९॥
मृत्युरुवाच॥ ॥दत्तएववरोभिल्लत्वयाभिलषितोमया॥चेतःशंकरपूजायांस्थिरंभवतुतेसदा॥२०॥नित्यंशिवेतिमं
त्रेणपूजयस्वसदाशिवं॥नैतस्मादुत्तमोमंत्रःश्रेष्ठोवेदेष्वपिध्रुवं॥२१॥अयमेवमहामंत्रोमोक्षदःशंकरात्मकः॥
अयमेवसदाध्येयोमंत्रोमुक्त्यर्थिभिर्नरैः॥२२॥एतन्मंत्रस्यमाहात्म्यंशिवोवेदनचेतरः॥वेदैरपिनविज्ञातंत
त्वमस्यमनोर्ध्रुवं॥२३॥एतस्यतत्वंविज्ञातुंयतंतेयोगिनःसदा॥तथापितत्वमेतस्यज्ञातुमेवनशक्यते॥२४॥
तत्वंतुशिवमंत्रस्ययेनज्ञातंभविष्यति॥तेनतीर्णइतिज्ञेयोघोरसंसारसागरः॥२५॥शिवेतियःपरोमंत्रःसप
ब्रह्मउच्यते॥परब्रह्मस्वरूपंततोज्ञातुंनशक्यते॥तथाचपरमोमंत्रःशिवमंत्रःश्रुतिश्रुतः॥ततस्तेनैवमंत्रेणपूज
नीयःसदाशिवः॥२७॥नित्यंमहेशपूजाचेत्क्रियतेभक्तिपूर्वकं॥तदानश्यंतिपापानिबुद्धिपूर्वकृतान्यपि॥२८॥
ब्रह्महत्यादिपापानिविविधान्यमितान्यपि॥विनश्यंतिक्षणेनैवश्रीमहादेवपूजया॥२९॥शतलक्षंपुराविप्राः

संपाद्यधनमुत्तमं ॥ स्वदेशंगंतुमुद्युक्तो विंध्याचलमुपाययुः ॥ ३०॥ तदा विंध्याचले कश्चिद्ब्राह्मणो ब्रह्महास्थितः ॥ बिल्वा
र्चनस्य माहात्म्यं श्रुतं तेन पुरा मुदा ॥ ३१॥ बिल्वपत्रैर्महादेवंयः पूजयति शंकरं ॥ स विधाय्यापि पापानि न प्राप्नोत्येनसां फलं ॥
३२॥ बिल्वपत्रार्चनफलं श्रुत्वैवं हृष्टमानसः ॥ बिल्वपत्रैर्महादेवं स संपूज्य स्थितः सदा ॥ ३३॥ ब्रह्महत्यां सकृत्वैकामेकं
बिल्वदलं मुदा ॥ समादायाति यत्नेन समर्चयति शंकरं ॥ ३४॥ एवं स्थितेन तेनैव कोटिशो ब्राह्मणा हताः ॥ तदन्यान्यपि पापा
नि कृतान्यगणितानि हि ॥ ३५॥ शतलक्षं द्विजास्तेन निहता धनलोभतः ॥ स धनं बहु संप्राप हत्वा तान् द्विजपुंगवान् ॥ ३६॥
शतलक्षं बिल्वपत्राण्यादाय सततं परं ॥ धृत्वा च भस्म रुद्राक्षान् पूजयामास शंकरं ॥ ३७॥ एवमेव स्थितः पूर्वं सम
तस्त्वदनंतरं ॥ ततः शिवप्रसादेन गाणापत्यमवापस ॥ ३८॥ कोटयो ब्रह्महत्यानां गोहत्यानां च कोटयः ॥ सद्यः फ
लमदत्त्वैव नश्यंति शिवपूजया ॥ ३९॥ कोटयो भ्रूणहत्यानामगम्यागम्यकोटयः ॥ सद्यः फ० ॥ ४०॥ कोटयो वाजिहत्या
नां स्त्रीहत्यानां च कोटयः ॥ सद्यः फ० ॥ ४१॥ कोटयो वीरहत्यानां पुंहत्यानां च कोटयः ॥ सद्यः फ० ॥ कोटयो गुरुहत्यानाम
कोटयः ॥ सद्यः फ० ॥ ४३॥ कोटयो राजहत्यानां अन्याघानां च कोटयः ॥ सद्यः फ० ॥ ४४॥ कोटयो यतिहत्यानां अन्याघानां
च कोटयः ॥ सद्यः फ० ॥ ४५॥ ब्रह्महत्याद्यनंतानि पापानि विविधान्यपि ॥ सद्यः फ० ॥ ४६॥ विनश्यंति न संदेहः सकृन्मृ
त्युंजयार्चनात् ॥ ४६॥ द्वित्रैर्बिल्वदलैरीशं संपूजयति यः पुमान् ॥ सवंशकोटिसंयुक्तः शिवलोकं प्रयास्यति ॥ ४७॥ बिल्व
पत्रैर्महादेवं भस्मधारणपूर्वकं ॥ यः पूजयति यत्नेन स संप्राप्नोति शंकरं ॥ ४८॥ जाबालमंत्रैर्यः कृत्वा केवलं भस्मधा
रणं ॥ पूजयिष्यति गौरीशं स शिवांतर्गतो भवेत् ॥ ४९॥ अनन्यशरणो यस्तु महेशं पूजयिष्यति ॥ तेन न प्राप्यते दुःखं
मत्कृतं च किमन्यतः ॥ ५०॥ कालमृत्युर्महामृत्युरहमेवास्मि दुःखदः ॥ ममाद्यैतादृशस्यापि न शक्तिस्त्वयि शंकरे ॥
५१॥ नाश्चर्यमिदमत्यंतं शंकरे शक्तिकुंठनं ॥ बहुधा मम जातं हि शंकरे शक्तिकुंठनं ॥ दुःखं च मम नास्त्येव शंकरे शक्तिकुं
ठनं ॥ ममापि शासकायस्माच्छंकराः शंकरप्रियाः ॥ ५३॥ न मृत्युभयमाप्नोति श्रीमृत्युंजयपूर्वकः ॥ सर्वथा सत्यमित्या

भ्रू

हजाबालोपनिषत्स्वयं॥ ५४॥ अशंकरेषु शक्तिश्चेन्मृत्योर्मे कुंठिता तदा॥ मम दुःखं भवत्येव सा मे तेषु न कुंठिता॥ ५५॥ अ
शंकरार्थं सृष्टोस्मि शंकरेण पुरा ततः॥ अशंकरेषु मे शक्तिः कुंठिता न भविष्यति॥ ५६॥ प्राप्यं मृत्युकृतं दुःखम मृत्युं
जयपूजकैः॥ मृत्युंजयाराधकैस्तु तन्नैव प्राप्यते ध्रुवं॥ ५७॥ येनाहं न जितस्तेन मृत्युः प्राप्यो न संशयः॥ ततस्तत्पूजके
नापि मृत्युः प्राप्यः स्वपूज्यवत्॥ ५८॥ अत एव हि तत्त्वज्ञा भीमं मृत्युभयापहं॥ श्रीमृत्युंजयमेवैकं पूजयंति निरंतरं॥ ५९॥
मृत्युंजयान्याः सर्वेपि जन्ममृत्युजरादिभिः॥ पुनः पुनः परिक्रांता दुःखिताः संति सर्वथा॥ ६०॥ नित्यमव्यभिचारेण प्रमा
देन विना शिवं॥ यः पूजयति यत्नेन स न जन्मादिभाग्ध्रुवं॥ ६१॥ विष्णुः पुरा महादेवं पूजयामास सादरं॥ शिवार्चनेन
संप्राप्तो वैकुंठस्तेन विष्णुना॥ ६२॥ वैकुंठलोकं संप्राप्य गर्वितोभूज्जनार्दनः॥ तेन गर्वेण गौरीशमनभ्यर्च्य स्थितः पुरा॥
६३॥ विष्णुः शिवमनभ्यर्च्य यतो गर्वेण संस्थितः॥ ततस्तेनैव पापेन मत्स्ययोनिमुपागतः॥ ६४॥ महापापफलं ज्ञेयं मत्स्य
जन्म मनीषिभिः॥ मत्स्यगर्भनिवासस्तु नरकान्नातिरिच्यते॥ ६५॥ शिवोपि पुनरन्यस्मै दत्वा विष्णुत्वमादरात्॥ सुदर्श
नं ददौ तस्मै वैकुंठमपि सौख्यदं॥ ६६॥ ददाति पूजितः शंभुरदेयमपि सादरं॥ अपूजितस्तु संसारे पातयत्येव सर्व
था॥ ६७॥ अस्य दत्वापि वैकुंठं विष्णवे पुनरीश्वरः॥ पातयामास संसारे विष्णुमेव सगर्वितं॥ ६८॥ एवं ब्रह्मादिका
न्देवान् गर्वितान्पार्वतीपतिः॥ पातयत्येव संसारे पुनः पुनरनीश्वरः॥ ६९॥ विष्णुब्रह्मादिकान्हत्वा सर्वानमिमहेश्व
रः॥ गणैराराधितः काश्यामुमया सह तिष्ठति॥ ७०॥ पुनः सृष्ट्वा जनान्सांबः कस्मैचित्तदनंतरं॥ दत्वा विष्णुत्वमन्यस्मै
ब्रह्मत्वं च ददाति सः॥ ७१॥ इंद्रत्वादिपदान्येवमन्येभ्योपि महेश्वरः॥ ददाति स्वेच्छया लोकान् दत्वा पाति च हंति च॥ ७२॥
संहारेच्छा यदा शंभोः सर्वज्ञस्यामितौजसः॥ तदा संहृत्य सकलं स्वयमेकोधितिष्ठति॥ ७३॥ सिसृक्षायां पुनः सां
बः सृष्ट्वा सर्वमिदं जगत्॥ स एव पालनेच्छायां पालयत्यपि शंकरः॥ ७४॥ सृष्टिर्भवात्पालनं तु महादेवाद्धि जाय
ते॥ संहारस्तु हराद्देव निस्त्रैगुण्यः शिवः स्वयं उत्पत्तिस्थितिसंहारा जायंते शंकरेच्छया॥ तत्र यत्नं महादेवो न
॥

करोत्येवशंकरः सर्वथा॥ ७६॥ शिवेच्छयैवकार्याणिसिध्यंत्याभूतसंप्लवं॥ तथाचयत्नंकुत्वापिनकरोत्येवशंकरः॥ ७७॥ तत्रैवयत्नः क्रियतेस्वेच्छयायत्नसिध्यति॥ स्वेछामात्रेणसिध्येर्थेनयत्नस्यप्रयोजनं॥ ७८॥ देवतासार्वभौमस्यस्वतंत्रस्यापिनाकिनः॥ इच्छामात्रेणसिध्यंतिसर्वकार्याणिसर्वदा॥ ७९॥ एतादृशंमहादेवमप्रमादेनसर्वदा॥ यः पूजयतियत्नेनससंसारंतरिष्यति॥ ८०॥ संसारतरणोपायः शंकरस्यैवपूजनं॥ यतः सशंकरः सांबोभक्तसंसारतारकः॥ ८१॥ परंत्वव्यभिचारेणशंकरस्यैवपूजनं॥ यःकरोतिससंसारंतरत्यन्योनसर्वथा॥ ८२॥ संसारतरणापेक्षायस्यजंतोर्भविष्यति॥ तेनसर्वात्मनात्याज्यंशिवान्यसुरपूजनं॥ ८३॥ शंकरान्याः सुराः सर्वेयतः संसारिणस्ततः॥ तदर्चनंतुसंसारतारकंनभविष्यति॥ ८४॥ येनतीर्णस्वसंसारःसोन्यंतारयितुंक्षमः॥ संसारिणंनसंसारीतारयिष्यतिसर्वथा॥ ८५॥ अंधोयथांधसंलग्नः पतत्येवपदेपदे॥ तथापततिसंसारेशंकरान्यसुरार्चकः शिवः पशुपतिर्नित्यः पशुपाशविमोचकः॥ नतस्मादपरः कोपिपशुपाशविमोचकः॥ ८७॥ पशवोनस्वभावेनपशुपाशविमोचकाः॥ ८८॥ विष्णुब्रह्मादयोदेवामर्त्याश्चपशवः स्मृताः॥ तत्पाशमोचकोदेवः शिवः पशुपतिः स्मृतः॥ ८९॥ तेषांपशूनांपाशोयः ससंसारस्तथास्मृतिः॥ तन्मोचकोमहादेवादपरोनास्तिसर्वथा॥ ९०॥ पशुपाशविमोक्षायसेव्यः पशुपतिः सदा॥ विष्णुब्रह्मादिपशुभिरितिजाबालवादिनः॥ ९१॥ तस्मात्पशुपतिंसांबंपशुपाशविमोचकं॥ पूजयस्वाप्रमादेननित्यमव्यभिचारतः॥ ९२॥ रहस्यमिदमाख्यातंभिल्लसर्वमयाधुना॥ दृष्ट्वाद्यशंकरेभक्तिंबिल्वार्जनरतस्यते॥ ९३॥ ॥ गौतमउवाच॥ ॥ एवमुक्त्वाययौमृत्युर्भिल्लेनाभ्यर्चितोद्विजाः॥ भिल्लः स्वगुरवेसर्वंमृत्यूक्तंविनिवेदयेत्॥ तद्गुरुस्तद्वचः श्रुत्वासंतुष्टहृदयस्तदा॥ तमुवाचाथसंतुष्टंभिल्लंबिल्वार्जनप्रियं॥ ९५॥ ॥ द्विजउवाच॥ ॥ यद्यदुक्तंमृत्युनाद्यतत्तत्सत्यंनसंशयः॥ एवमेववदंत्यन्येऋषयोब्रह्मवादिनः॥ ९६॥ तत्वमेतद्धिवेदानांमृत्युनोक्तंनसंशयः॥ इदंतुतत्वमन्येनज्ञातुमेवनशक्यते॥ ९७॥ तत्वमेतद्धिविज्ञातमद्यभाग्यवशात्वया॥ तवभाग्यस्यनांतोस्तितत्वज्ञस्यमहात्मनः॥ ९८॥ अतोभाग्यवतोभिल्लशिवार्चन

त्रतस्यते॥ दुर्लभनास्तिलोकेस्मिन् इत्यनेनानुमीयते॥९९॥अद्यप्रभृतियत्नेन भस्मधृत्वैवकेवलं॥पूजयस्वमहादेव
मप्रमादेनसंततं॥१००॥ ॥गौतमउवाच॥ ॥ इत्युक्तस्तेनगुरुणासभिल्लोवीतकल्मषः॥ पूजयित्वास्थितोनित्यंबि
ल्वपत्रैर्महेश्वरं॥१॥ भिल्लोवन्यमृगान्हत्वातन्मांसंघृतपाचितं॥निवेद्यपरमेशायतदश्नातिप्रयत्नतः॥२॥नवानि
बिल्वपत्राणिपुष्पाणिविविधानिच॥मांसंचोत्तममादायसंपूजयतिशंकरं॥३॥विहंगाबिल्वशाखासुमातिष्ठंति
त्तिसायकैः॥सहंतिभूरिशोनित्यंनानारूपविहंगमान्॥४॥तेनावरुध्याविप्रेंद्राःकोटिशोबिल्वभूरुहाः॥वनद्वि
पाश्चनिहतास्तेनबिल्वाशनप्रियाः॥५॥नवानिबिल्वपत्राणिसोदकानिप्रयत्नतः॥समादायातियत्नेनपूजया
मासशंकरं॥६॥बिल्वपत्रैर्महादेवंसंपूज्यसपिबत्यपः॥तदभावेजलंभिल्लोनपिबत्येवसर्वथा॥७॥एवंनियम
मासाद्यसभिल्लस्तत्रसंस्थितः॥तेनैवनियमेनेशःसंतुष्टोभूत्कृपानिधिः॥८॥ ततःकदाचित्तद्धैर्यंद्रष्टुकामो
महेश्वरः॥बिल्वपत्राण्यदृश्यानिकारासायमाप्रगं॥९॥बिल्वपत्राण्यदृष्ट्वैवसभिल्लोविस्मयंगतः॥चचारार
ण्यमखिलंबिल्वपत्रगवेषकः॥१०॥तृष्णीतोवनेतस्मिन्विचरन्शुष्कतालुकः॥शीतलोदकसंवीतंतटाकं
प्रापशीतलं॥तृषार्तःक्षुत्परिश्रांतोशुष्ककंठोपितज्जलं॥नययौबिल्वपत्राणिनलब्धानीतिदुःखितः॥१२॥
तदानींमानुषंवेषंधृत्वागौरीपतिःस्वयं॥आजगामतदभ्याशंलीलास्वीकृतविग्रहः॥१३॥ततस्तंप्रत्युवाचेदं
महादेवःकृपानिधिः॥शीतंजलंतटागस्थंगृहीत्वास्वर्णभाजने॥१४॥ ॥ईश्वरउवाच॥ ॥जलंपिबेदममलं
शीतंक्षुत्तृड्विनाशकं॥भक्षयेदंनवंपक्वमरण्यकदलीफलं॥१५॥इत्युक्तंतद्वचःश्रुत्वाभिल्लस्तंप्रत्युवाचसः॥
शनैरतिप्रयासेनशुष्कजिह्वोष्ठतालुकः॥१६॥ ॥भिल्लउवाच॥ ॥नियमेनमयानित्यंबिल्वपत्रैर्महेश्वरः॥पूज्य
तेबिल्वपत्राणिनप्राप्तानिमयाद्यतु॥१७॥अनर्चितेमहेशेनपीयतेनजलंमया॥ततःकथंभिदंपक्वंभक्षणी
यंफलंवद॥१८॥ ॥ईश्वरउवाच॥ ॥जीवनंचेत्तदानित्यंपूजयस्वमहेश्वरं॥त्वषयामरणंचेत्स्यापूज

नीयः कथंशिवः ॥१९॥ धर्मः कार्यः प्रयत्नेनदेहरक्षणपूर्वकं ॥ उपेक्षानैवकर्तव्याशरीरेधर्मसाधने ॥ २०॥ पूजनीयः कथंशंभुः
शरीरविगमेसति ॥ यतःशरीरमेवाद्यंशंकरार्चनसाधनं ॥२१॥ पूजातुषड्विधाप्रोक्ताशंकरस्यकृपानिधेः ॥ साषडिंद्रियसाध्यैवता
निदेहाश्रितानिहि ॥ २२॥ द्रष्टव्यःश्रीमहादेवः पूजितश्चक्षुषाततः तदभावेकथंवास्याच्चक्षुषंशिवदर्शनं ॥२३॥ श्रोतव्यानिप्रयत्ने
नशिवनामानिसंततं ॥ ततःश्रोत्रेंद्रियाभावेतन्नामश्रवणंकथं ॥२४॥ कर्त्तव्यमतियत्नेनशिवनामानुकीर्त्तनं ॥ २५॥ शिवार्पितंबिल्व
पत्रमाघ्रेयमतियत्नतः ॥ ततस्त्वघ्राणविरहेतदाघ्रेयंकथंभवेत् ॥ २६॥ शिवाभिमर्शनंकार्यंप्रयत्नेनान्वहंततः ॥ त्वगिंद्रियस्य
विरहेकशिवस्याभिमर्शनं ॥२७॥ चिंतनीयःप्रयत्नेनमनसापार्वतीपतिः ॥ तच्चिंतनंमनःसाध्यंतदभावेकथंभवेत् ॥२८॥ ज्ञानानीं
द्रियसाध्यानितानिदेहाश्रितान्यतः ॥ देहसंरक्षणंकार्यंयत्नैर्नानाविधैरपि ॥ २९॥ प्रदक्षिणनमस्काराःशंकरायप्रयत्नतः ॥ कर्तव्या
स्तेकथंकार्याःशरीरेणविनावद ॥३०॥ बिल्वपत्रैर्महादेवंयस्त्वनभ्यर्च्यभुंजते ॥ भुंजतेपापमित्येवश्रुतिरत्नपरैवहि ॥ ३१॥ शिवं
बिल्वैरनभ्यर्च्यनपेयमुदकंद्विजैः ॥ पिबेद्यदिसपापीस्यादितिद्विजपराश्रुतिः ॥ ३२॥ पेयंजलादिकंसर्वैःशिवाराधनपूर्वकं ॥
अन्यथाचेत्पातकीस्यादितिवेदस्तुनापदि ॥३३॥ आपद्यपिनभोक्तव्यंनपेयंजलादिकंसर्वैःशिवाराधनपूर्वकं ॥ अन्यथाचे
त्पातकीस्यादितिवेदस्तुनापदि ॥ चोदकंद्विजैः ॥ महादेवमनभ्यर्च्येत्यपिद्विजपराश्रुतिः ॥३४॥ इदानींतुजलंपेयमापत्का
लेत्वयाधुना ॥ अनापदिनभोक्तव्यंमनभ्यर्च्यमहेश्वरं ॥ ३५॥ ॥ भिलुःउवाच ॥ ॥ एतादृशशरीरस्यनोपयोगोममा
धुना ॥ शरीरंत्याज्यमेवेदमेकवारमशंसयं ॥ ३६॥ वारद्वयंनमर्त्तव्यंदेहेनैकेनसर्वथा ॥ एकवारंतुमर्त्तव्यंतदद्यैवभविष्य
तु ॥३७॥ नवबिल्वैरनभ्यर्च्यशिवलिंगंकथंमया ॥ पेयंजलंप्रयत्नेनभक्षणीयंकथंफलं ॥३८॥ शिवलिंगमनभ्यर्च्य
जलंकःपातुमिच्छति ॥ नैतादृशोमयादृष्टोऋतेचंडालयोनिजं ॥ ३९॥ अद्यवाब्दशतांतेवाशरीरंममगच्छतु ॥ बिल्वैः
शिवमनभ्यर्च्यनपास्येहंजलंध्रुवं ॥४०॥ बिल्वपत्रार्जनासक्तंकालमृत्युरपिस्वयं ॥ स्प्रष्टुमप्यतिशक्तोपिनशक्तोभू
त्तदासमां ॥४१॥ एतादृशैर्बिल्वपत्रैरनभ्यर्च्यमहेश्वरं ॥ कथंवापातुमिच्छामिजलमद्याहमीदृशः ॥ ४२॥ अनभ्य
र्च्यमहादेवंविष्णुरप्यतिकुत्सितं ॥ मत्स्यजन्मसमासाद्यप्रापदुःखमितिश्रुतं ॥४३॥ तथाचांभोनपास्येहमनभ्य

र्यमहेश्वरं॥ जलमेवनपास्येहंभक्षयामिकथंफलं॥ ४४॥ इत्युक्तंतद्वचःश्रुत्वाधैर्यंदृष्ट्वाचशंकरः॥ प्रत्यक्षोभूत्तदासांबोभिल्लाय
करुणानिधिः॥४५॥सभिल्लःकरुणासिंधुंददर्शवृषभध्वजं॥ कोटिसूर्यैघसंकाशमुमालिंगितविग्रहं॥४६॥ सोमसूर्याग्निनय
नंसोमार्धकृतशेखरं॥ नीलकंठंविरूपाक्षंभस्मोद्धूलितविग्रहं॥४७॥ जटामंडलसंवीतंशूलमूलकरंपरं॥ व्याघ्रचर्मपरीधानं
प्रमथौघनिषेवितं॥ बिल्वमालासमाक्रांतंमुक्तामालासमावृतं॥ करुणारसपूर्णाक्षंमहोक्षोपरिसंस्थितं॥ ४९॥ मंदस्मितानन्नंदे
वंवरदाभयपाणिनं॥ शंखकर्पूरकुन्देदुसुवर्णधवलंशिवं ॥५०॥ ततःपरंसत्तत्रैवबिल्ववृक्षानपिप्रियान्॥ सपल्लवानतिस्वच्छांह
स्तलभ्यान्ददर्शच॥ ५१॥ ततःसबिल्वपत्राणिसमादायप्रहर्षितः॥ पूजयामासयत्नेनशिवेतिमनुनाशिवं॥५२॥ ततःशिवेति
नाम्नैवतत्प्रणामंश्चकारसः॥ ततः शिवेतिनाम्नैवतुष्टावगिरिजापतिं॥ ततः प्रहृष्टोगौरीशस्तमुवाचतदाद्विजाः॥ वरंवरंवृणी
ष्वेतिसादरंविनयान्वितं॥५४॥ ॥भिल्लउवाच॥ ॥कृतार्थोस्मिमहादेवधन्यंजातंचजीवनं॥ ममभाग्यस्यनांतोस्तिप्रसं
न्नोसियतोभवान्॥५५॥ कुलंममाभवद्धन्यंदेवदेवकृपानिधे॥ धन्यंनेत्रयुगंजातंममाद्यकरुणाकर॥५६॥ वेदैरपिनतेदृ
ष्टंस्वरूपंपरमेश्वर॥ तदद्यसर्वदेवेशदृष्टंत्वत्कृपयामया॥ ५७॥अतःपरंयाचनीयंकिमस्तिवरमीश्वर॥ पूर्णोमनोरथोजातः
किमेतस्माद्वरंपरं॥५८॥ यतंतयोगिनोनित्यंदर्शनार्थंतवेश्वर॥ तादृशैरपिनप्राप्तंदर्शनंतवशंकर॥ ५९॥ इदमेववरंयाचेपुनः
पुनरुमापते॥ त्वद्दर्शनेनविधुरंमास्तुजीवनमेवमे॥६०॥ यस्मिंदिनेममेशाननभवेत्तवदर्शनं॥ तस्मिन्नेवदिनेशंभोप्राणांस्त्यक्ष्या
मिसर्वथा॥६१॥ नयेनतवपादाब्जंदृष्टंयस्मिंदिनेप्रभो॥ तज्जीवनंवृथासत्यंसत्यंसत्यंनसंशयः॥६२॥ तवामितप्रभावस्यद
र्शनंकस्यजायते॥ तवप्रभावःकेनापिनज्ञातःपरमेश्वर॥६३॥ भूरिभाग्यवतांपुंसांअनन्यमनसांप्रभो॥शंभोभवत्यभयदंतव
दर्शनमुत्तमं॥६४॥ धन्यमेतदभूज्जातंजीवनंममशंकर॥ त्वद्दर्शनमभूद्यस्माद्देवानामपिदुर्लभं॥६५॥ देवतासार्वभौमाद्यया
चेहंपरमेश्वरं॥ तावतापिमहादेवकृतकृत्योभवाम्यहं॥६६॥ शिवेतिनामपरमयन्मोक्षदमनुत्तमं॥ तत्रास्तुरुचिरीशानममा
न्वहमनुक्षणं॥ ६७॥ याचेहंकरुणासिंधोवरांतरमनुत्तमं॥ वरदोसियतःशंभोततोयाचेवरान्बहून्॥६८॥ बिल्वपत्राणिर

म्याणिशिवपूजार्थमन्वहं ॥ अदुर्लभानिसंत्वीश ममसर्वत्रसर्वदा ॥ ६९ ॥ अयमन्योवरोदेयः पार्वतीरमणप्रभो ॥
कृपानिधानसर्वज्ञस्वभक्तवरदेश्वरं ॥ ममप्राणवियोगोस्तुशिवपूजापुरःसरं ॥ नातोवरांतरंयाचेवरदानवि
चक्षण ॥ ७१ ॥ इत्युक्तंतद्वचः श्रुत्वासंतुष्टः करुणाकर ॥ तद्याचितान्वरान्दत्वातत्रैवांतर्दधेशिवः ॥ ७२ ॥ भि
ल्लोप्यत्यंतसंतुष्टोगत्वास्वगुरुसंनिधिं ॥ सर्वंनिवेदयामासवृत्तांतमविशेषतः ॥ ७३ ॥ तस्मिन्नेववनेभिल्लोवहु
कालमनातुरः ॥ विल्वपत्रैर्महादेवंसंपूज्योवाससंततं ॥ ७४ ॥ ततःकदाचिद्यत्नेनभिल्लोविल्वदलैःशिवं ॥
संपूज्यसंस्मरन्शंभुंशिवेत्युक्त्वाजहौतनुं ॥ ७५ ॥ तदाबभूवविप्रेंद्राः पुष्पवृष्टिर्मनोहरा ॥ नेदुर्दुंदुभयोदिव्याननृ
तुश्चाप्सरोगणाः ॥ ७६ ॥ विमानंप्रेषयामासततः सांवः सदाशिवः ॥ तदाविमानमारुह्यसययौशिवसंनिधिं ॥
॥ ७७ ॥ ततःशिवप्रसादेनशिवेलीनोबभूवसः ॥ भिल्लोगणेषुपश्यत्सुसर्वेष्वमितौजसि ॥ ७८ ॥ भिल्लोपिनीचकुलजः
कृत्वाशंकरपूजनं ॥ अप्रयासेनलीनोभूद्विप्राः सांवसदाशिव ॥ ७९ ॥ नित्यमव्यभिचारेणयः पूजयतिशंकरं ॥ स
र्वथासशिवेलीनोभवत्येवनसंशयः ॥ ८० ॥ द्विजश्रेष्ठशंकरंनित्यंअनन्यपूजयिष्यति ॥ सकिंनस्याच्छिवेलीनश्चित्र
मनकिंचन ॥ ८१ ॥ नित्यमव्यभिचारेणपूजयध्वंततःशिवं ॥ पूजितः श्रीमहादेवोमोक्षंदास्यत्यसंशयं ॥ ८२ ॥ श्रीरु
द्रभक्तमेवान्नंभोक्तव्यंप्रत्यहंद्विजाः ॥ श्रीरुद्रभक्तंभुंजीयादितिजाबादिनः ॥ ८३ ॥ श्रीरुद्रपीतमेवाभः पातव्यं
प्रत्यहंद्विजैः ॥ श्रीरुद्रपीतमेवांबुपेयमित्यस्तिहिश्रुतिः ॥ ८४ ॥ श्रीरुद्राघ्रातमाघ्रेयपत्रपुष्पादिकंद्विजैः ॥ श्रीरु
द्राघ्रातमाघ्रेयमितिजाबालबादिनः ॥ ८५ ॥ परिधेयंनवंवस्त्रंश्रीरुद्रायसमर्पितं ॥ शिवानर्पितवस्त्रंतुनग्राह्यम
तिहिश्रुतिः ॥ ८६ ॥ सर्वदाशिवनामैवजपनीयंद्विजैर्द्विजाः ॥ सर्वदाशिवपूजैवकर्त्तव्यामुक्तिकांक्षिभिः ॥ शिवपू
जैवसर्वेषांमुक्तिदामंगलावहा ॥ शिवार्चनंविहायान्यन्नास्तिमोक्षस्यसाधनं ॥ शिवार्चनंविहायापिमुक्तिस्यादि
तियोवदेत् ॥ सदूरतः परित्याज्यः चंडालइवसर्वथा ॥ शिवार्चनंविहीनानामपिमुक्तिर्भवेद्यदि ॥ ८८ ॥ तदा

विंध्योपिजलधिंतरेदेवनसंशयः॥शिवार्चनंविनामोक्षोनभविष्यतिसर्वथा॥ ८९॥ सत्यमेतत्सुनः सत्यमुध्दृत्यभुजमुच्यते॥शिवस्यैवप्रसादेनमुक्ताः पूर्वमुनीश्वराः॥९०॥ सशिवस्यप्रसादस्तुनशिवाराधनंविना॥ शिवाराधनहीनानांशिवोनैवप्रसीदति॥ ९१॥ शिवप्रसादविरहेमोक्षोपिनभविष्यति॥मुक्तिः शिवप्रसादेनप्रसादोमुक्तिदः स्वयं॥९२॥ शिवस्याराधनेनैवभविष्यतिनचान्यथा॥ येनैवाव्यभिचारेणकृतंशंकरपूजनं॥९३॥ तेनैवशंकरः प्राप्यः प्रसादोमुक्तिदायकः॥ अत्यंतसुलभाजातशंकरैकरतात्मनां॥ शंकरैकरताधन्याः शंकरैकार्चनप्रियाः॥९४॥ ततस्तैः प्राप्यतेमोक्षोदुर्लभोप्यतिलीलया॥ यथाप्रविशतिस्वीयंगृहंगृहपतिस्तथा॥९६॥ शिवैकशरणोमर्त्यः शिवंप्राप्नोतिलीलया॥स्वांन्नमन्नंक्षुधितोयथाभुंक्तेमुदातथा॥९७॥ शिवैकशरणोमर्त्यः शिवंप्राप्नोतिलीलया॥ युवायथास्वकांकांतांप्राप्नोतिमुदितस्तथा॥ शिवैकशरणोमर्त्यः शिवंप्राप्नोतिलीलया॥९८॥ यथासिंहासनंस्वीयंप्राप्नोतिवलवांस्तथा॥ शिवैक०॥९९॥ यथाक्षितितलेक्षिप्तनिक्षेपंप्राप्नुयात्तथा॥शिवैक०॥१००॥मुक्तिः शिवार्चनेनैवप्राप्यतेमुनिसत्तमाः नान्येनप्राप्यतेमुक्तिः सत्यंसत्यंनसंशयः॥ १॥ नलभ्यतेयथारंभुनासिंहासनंतथा॥ कदापिमुनयोमुक्तिरशैवैस्तुनलभ्यते॥२॥ नलभ्यतेराज्यंबलहीनेनसर्वथा॥ तथानलभ्यतेमुक्तिरशिवैरपिसर्वथा॥३॥ यथानलभ्यतेराज्यंबलहीनेनसर्वथा॥ तथानलभ्यते मुक्तिरशैवैरपिसर्वथा॥४॥ यथानलभ्यतेसौख्यंदरिद्रैर्व्याधिपीडितैः॥तथा०॥५॥ यथानलभ्यतेयोगोविषयासक्तमानसैः॥ तथा०॥६॥ यथानलभ्यतेवृध्दैराशास्यंनवयौवनं॥तथा०॥८॥ यथानलभ्यतेपुत्रोवंध्यावासुखदायकः॥तथा०॥९॥ यथानलभ्यतेकांतागलत्कुष्टेनसर्वथा॥तथा०॥१०॥ यथानलभ्यतेधर्मोमद्यपानरतैर्नरैः॥तथा०॥११॥ यथानलभ्यतेकांताजराजर्जरपुङ्गलैः॥ तथा०॥१२॥ यथानलभ्यतेरंभात्यक्तयागादिकर्मभिः॥ तथा०॥१३॥ यथानलभ्यतेरत्नंसंत्यक्तसुकृतैर्जनैः॥ तथान०॥१४॥ नदृश्यतेयथांधेनरत्नदीपप्रभादिकं॥ तथानलभ्यतेमुक्तिरशैवैरपिसर्वथा॥१५॥ यथानश्रूयतेशब्दोवधिरेणसुखप्रदः॥तथा०॥१६॥ यथानज्ञायतेगंधोहतघ्राणेनसर्वथा॥ तथा०॥१७॥ स्तब्धजिव्होनजानातियथैवाछरसंनरः॥ तथा स्तब्धस्पर्शोनजानातियथास्पर्शमपिद्विजाः॥ तथानलभ्यतेमुक्तिरशैवैरपिसर्वथा॥१८॥ मुक्तिरः शिवएवातः सशिवः शैववत्सलः॥शैवेभ्यएवसंतुष्टोमुक्तिमिष्टांप्रयच्छति॥१९॥ शिवोमुक्तिमशैवेभ्योनददात्येवसर्वथा॥ अशैवानरकेष्वेवपततिपि

॥९४॥

धी

यथाश्रोतंनिपुं ड्रमशिवार्चकैः॥

३ संज्ञादग्धरे हेन

पं.४७ अत्यंतदुर्लभामुक्तिः सापिशंकरपूजया॥ ९४॥

विंध्योपिजलधिंतरेदेवनसंशयः॥शिवार्चनंविनामोक्षोनभविष्यतिसर्वथा॥ ८९॥ सत्यमेतत्पुनःसत्यमुत्धृत्यभुजमुच्यते॥शिवस्यैवप्रसादेनमुक्ताः पूर्वंमुनीश्वराः॥९०॥ सशिवस्यप्रसादस्तुनशिवाराधनंविना॥ शिवाराधनहीनानांशिवोनैवप्रसीदति॥ ९१॥ शिवप्रसादविरहेमोक्षोपिनभविष्यति॥मुक्तिःशिवप्रसादेनप्रसादोमुक्तिदः स्वयं॥९२॥ शिवस्याराधनेनैवभविष्यतिनचान्यथा॥ येनैवाव्यभिचारेणकृतंशंकरपूजनं॥९३॥ तेनैवशंकरः प्राप्यः प्रसादोमुक्तिदायकः॥ अत्यंतसुलभाजाताशंकरैकरतात्मनां॥ शंकरैकरताधन्याःशंकरैकार्चनप्रियाः॥९५॥ ततस्तैःप्राप्यतेमोक्षोदुर्लभोप्यतिलीलया॥ यथाप्रविशतिस्वीयंगृहंगृहपतिस्तथा॥९६॥ शिवैकशरणोमर्त्यःशिवंप्राप्नोतिलीलया॥स्वाधीनमन्नंक्षुधितोयथाभुंक्तेमुदातथा॥९७॥ शिवैकशरणोमर्त्यःशिवंप्राप्नोतिलीलया॥ युवायथास्वकांकांतांप्राप्नोतिमुदितस्तथा॥ शिवैकशरणोमर्त्यःशिवंप्राप्नोतिलीलया॥९८॥ यथासिंहासनंस्वीयंप्राप्नोतिबलवांस्तथा॥ शिवैक०॥९९॥ यथाक्षितितलेक्षिप्तनिक्षेपंप्राप्नुयात्तथा॥शिवैक०॥१००॥मुक्तिःशिवार्चनेनैवप्राप्यतेमुनिसत्तमाः नान्येनप्राप्यतेमुक्तिःसत्यंसत्यंनसंशयः॥ १॥ नलभ्यतेयथारम्यंभुनासिंहासनंतथा॥ कदापिमुनयोमुक्तिरशैवैस्तुनलभ्यते॥२॥ नलभ्यतेराज्यंबलहीनेनसर्वथा॥ तथानलभ्यतेमुक्तिरशिवैरपिसर्वथा॥३॥ यथानलभ्यतेराज्यंबलहीनेनसर्वथा॥तथानलभ्यतेमुक्तिरशैवैरपिसर्वथा॥४॥ यथानलभ्यतेसौख्यंदरिद्रैर्व्याधिपीडितैः॥तथा०॥५॥ यथानलभ्यतेयोगोविषयासक्तमानसैः॥ तथा०॥६॥ यथानलभ्यतेवृद्धैराशास्यंनवयौवनं॥तथा०॥८॥ यथानलभ्यतेपुत्रोवंध्याबासुखदायकः॥ तथा०॥९॥ यथानलभ्यतेकांतागलत्कुष्टेनसर्वथा॥ तथा०॥१०॥ यथानलभ्यतेधर्मोमद्यपानरतैर्नरैः॥तथा०॥११॥ यथानलभ्यतेकांताजराजर्जरपुङ्गलैः॥ तथा०॥१२॥ यथानलभ्यतेरंभात्यक्तयागादिकर्मभिः॥ तथा०॥ १३॥ यथानलभ्यतेरत्नंसंत्यक्तसुकृतैर्जनैः॥ तथान०॥१४॥ नदृश्यतेयथांधेनरत्नदीपप्रभादिकं॥ तथानलभ्यतेमुक्तिरशैवैरपिसर्वथा॥१५॥ यथानश्रूयतेशब्दोबधिरेणसुखप्रदः॥ तथा०॥१६॥ यथानज्ञायतेगंधोहतघ्राणेनसर्वथा॥ तथा०॥१७॥ स्तब्धजिह्वोनजानातियथैवाछंरसंनरः॥ तथा स्तब्धस्पर्शोनजानातियथास्पर्शमपिद्विजाः॥ तथानलभ्यतेमुक्तिरशैवैरपिसर्वथा॥१८॥ मुक्तिदःशिवएवातःसशिवःशैववत्सलः॥शैवेभ्यएवसंतुष्टोमुक्तिमिष्टांप्रयच्छति॥१९॥ शिवोमुक्तिमशैवेभ्योनददात्येवसर्वथा॥ अशैवानरकेष्वेवपतंतिवि

॥९४॥

शी

१० यथाश्रोतंग्रिपुंड्रमशिवार्चकैः॥

१३ संज्ञाराधरेहेन

तृभिःसह॥२०॥विप्रामुक्तिरशैवैस्तुकल्पांतेपिनलभ्यते॥ तैरिदानींकथंप्राप्यामुक्तिरत्यंतदुर्लभा॥२१॥कल्पांतेमुच्यतेमर्त्यैर्ब्र
ह्महापिमुनीश्वराः॥ अशैवस्त्वशिवाचारः कल्पांतेपिनमुच्यते॥२२॥अतोयत्नेनसततंयूयंमुक्त्यर्थिनोद्विजाः॥ पूजयध्वमहादे
वंसर्वदेवशिखामणिं॥२३॥ आदिविष्णुरयंपूर्वंनित्यंपंचाग्निमध्यगः॥ षट्कोटियुगपर्यंतंपूजयामासशंकरं॥२४॥अतःप्राप
तियत्नेनविष्णुत्वमयमीश्वरात्॥ सुदर्शनंचसंप्राप्तमनेनाशिवपूजया॥२५॥ स्वनेत्रेण महाविष्णुरयमेवशिवार्चकः॥ पूजयामा
सविप्रेंद्राःशिवपादांबुजमुदा॥२६॥अयमव्यभिचारेणपूजयामासशंकरं॥ वैकुंठोविष्णुनाप्राप्तःशंकरस्यैवपूजया॥२७॥
अयमव्यभिचारेणपूजयित्वामहेश्वरं॥ शिवस्यैवप्रसादेनलक्ष्मींप्रापमनोरमां॥२८॥विष्णुरग्रेपियत्नेनपूजयिष्यतिशंक
रं॥ विष्णोस्तुशंकरादन्यःपूज्योनास्त्येवसर्वथा॥२९॥ एतस्मैविष्णवेशंभुर्विष्णुनापूजितःसदा॥ अग्रेदास्यतिमु
क्तिंचशैवमुक्तिप्रदायकः॥३०॥अयंविष्णुर्महाशैवःशिवपूजापरायणः॥ शिवस्यैवप्रसादेनशिवेलीनोभ
विष्यति॥३१॥ पुनर्वैकुंठकामायस्वभक्तायसदाशिवः॥ दत्वाविष्णुत्वमनघंवैकुंठमपिदास्यति॥३२॥वह
वोविष्णवस्सृष्टामहेशेनपुराद्विजाः॥ हताश्चविष्णवःपूर्वं वहवोः शूलपाणिना॥ अग्नेपिविष्णुसृष्टेश्चपा
लयित्वाहनिष्यति॥सृष्टिपालननाथास्तुभवंतिशिवलीलया॥३४॥ देवतासार्वभौमस्यलीलयागिरिजा
पतेः॥ विष्णुब्रह्मादयोदेवाःभवंतिहिपुनःपुनः॥३५॥तुष्टोददातिविष्णुत्वंयस्मैकस्मैचिदीश्वरः॥किम
स्यन्नददातीशोगाणपत्यमपिप्रभोः॥३६॥अतोभजध्वमनिशंभगवंतमुमापतिं॥भवंतस्त्वविलंवेन
पशुपाशविमोचकं॥ भगवान्श्रीमहारुद्रादपरोनास्तिसर्वथा॥सत्यमेतत्पुनःसत्यमुध्धृत्यभुजमुच्यते॥३८॥
योवैरुद्रःसभगवान्इत्यथर्वशिरस्त्वयं॥भगवान्रुद्रएवेतिवदत्येवमुहुर्मुहुः॥ ३९॥ तस्मात्स एवभगवानिति
वैकारतोद्विजाः॥ निर्णयोपिकृतस्तेनदुष्टसंशयवारकः॥४०॥नमस्तेअस्तुभगवन्नित्यत्रापिश्रुतिश्रुतः॥ नित्यो
यंभगवच्छब्दःश्रीरुद्रस्यैववाचकः॥अतएवमहारुद्रान्नापरोभगवांस्ततः॥ पूजयध्वंमहारुद्रंभगवंतमुमा
पतिं॥४२॥ नित्यंश्रीरुद्रमाराध्यंरुद्राध्यायेनयोर्चयेत्॥सनिर्मुक्तोमहापापैःशिवसायुज्यतामियात्॥

॥४३॥ सर्वांगोद्धूलनं कृत्वा कृत्वा रुद्राक्षधारणं॥ यः श्रीरुद्रं जपेन्नित्यं स रुद्रो भवति ध्रुवं॥४४॥ रुद्रावर्त्तनशी
लानां श्रीरुद्राविष्टचेतसां॥ नित्यं विभेति कालोपि सत्यमेवोच्यते मया॥ मद्यं पीत्वापि यो नित्यं श्रीरुद्रमनुवर्त्तये
त्॥ स मद्यपानपापेन न लिप्तो भवति ध्रुवं॥४६॥ कृत्वापि ब्रह्महत्यां यः श्रीरुद्रमनुवर्त्तयेत्॥ स ब्रह्महत्यापापेन न
लिप्तो भवति ध्रुवं॥४७॥ गुरुदारांश्च योगत्वा श्रीरुद्रमनुवर्त्तयेत्॥ स तेन पातकेनापि न लिप्तो भवति ध्रुवं॥४८॥
कृत्वा सुवर्णस्तेयं च यो रुद्रमनुवर्तयेत्॥ स तेन पातकेनापि न लिप्तो भवति ध्रुवं॥४९॥ कृत्वापि मातृगमनं यो रु
द्रमनुवर्तयेत्॥ स तेन पातके०॥५०॥ कृत्वापि पुत्रीगमनं यो रुद्रमनुवर्तयेत्॥ स तेन०॥५१॥ कृत्वापि शूद्रीगम
नं यो रुद्रमनुवर्तयेत्॥ स तेन०॥५२॥ कृत्वापि राज्ञीगमनं यो रुद्रमनुवर्तयेत्॥ स तेन०॥५३॥ हत्वापि पितरं यस्तु श्री
रुद्रमनुवर्तयेत्॥ स तेन०॥५४॥ गुरुं हत्वापि योगस्थ यो रुद्रमनुवर्तयेत्॥ स तेन०॥५५॥ कृत्वापि विप्रगोहत्यां यो रुद्रम
नुवर्त्तयेत्॥ स तेन०॥५६॥ स्त्रीहत्यामपि कृत्वा यः श्रीरुद्रमनुवर्तयेत्॥ स तेन०॥५७॥ कृत्वाप्यन्यानि पापानि यो रुद्रम
नुवर्त्तयेत्॥ स तेन०॥५८॥ रुद्राध्यायजपे योग्यो भस्मरुद्राक्षभूषणः॥ तज्जपे नेतरो योग्यो यागे पुल्कसवद्ध्रुवं॥५९॥
रुद्राध्यायजपे योग्यः शैव एव यतो योग्यः शैवमन्त्रानुवर्त्तने॥ ६०॥ यथा न योग्यश्चंडालो वेदस्याध्ययने तथा॥ अ
शैवः सर्वथायोग्यो न रुद्राध्ययने द्विजाः॥६१॥ यथा न योग्यश्चंडालो वाजपेयादिकर्मसु॥ अशैवोपि तथा योग्यो न रुद्राध्यय
ने द्विजाः॥६२॥ शिवमंत्रपरिक्रांतो रुद्राध्यायो यत एव सः॥ जपनीयो तियत्नेन शैवैरेव शिवार्चकैः॥६३॥ वेदेषु संति यावंतः शि
वमंत्राः शिवात्मकाः॥ अशैवैस्तेन जप्तव्यास्ते यतो नाधिकारिणः॥६४॥ अशैवः शिवमंत्रं चेदुच्चरेन्मोहसंयुतः॥ स याति नर
कं घोरं यावदाचंद्रतारकं॥६५॥ अधीत्य वेदं चंडालो यथा नरकमेष्यति॥ तथा शिवमनुं जप्त्वा शैवान्यो नारकी भवेत्॥६६॥
शिवैकशरणो यस्तु मनोवाक्कायकर्मभिः॥ स शैव इति विज्ञेयो वेदविद्भिर्मुनीश्वराः॥६७॥ भवंतोपि महादेवं मनोवाक्काय
कर्मभिः॥ अनन्यमनसो नित्यं पूजयध्वं प्रयत्नतः॥६८॥ भस्मनोद्धूलनं कृत्वा सम्यगापादमस्तकं॥ रुद्राध्यायेन गौ
रीशं तोषयध्वं प्रयत्नतः॥६९॥ ततो बिल्वदलैरीशमर्चयध्वं मुनीश्वराः॥ बिल्वार्चनाद्रुद्रजपात्तोषयध्वं महेश्वरं॥

क्रियतेयेनसततंकेवलंभस्मधारणं॥येनेशःपूज्यतेबिल्वैःसयातिशिवसंनिधिं॥७१॥योभस्मोद्धूलितवपुर्येरुद्राक्षैर्विभूषि
तः॥सएवयोग्योविप्रेंद्राश्रीमहादेवपूजने॥७२॥त्यक्त्वाश्रुतिश्रुतंशुध्धंकेवलंभस्मधारणं॥कुर्वन्वैदिककर्माणियात्येवन
रकंध्रुवं॥७३॥इदंतुवैदिकंकर्मश्रीमहादेवपूजनं॥अत्रकेवलभस्मांगोयोग्योनान्यस्तसर्वथा॥७४॥रुद्राक्षधारणंनित्यं
केवलंभस्मधारणं॥शिवार्चनंचविप्रेंद्रावैदिकंमोक्षसाधनं॥७५॥महादेवार्चनंकार्यंनविनाभस्मधारणं॥तद्भस्मधारणं
श्रौतंविप्राःकेवलमेवहि॥७६॥शिवार्चनपरैःकार्यंकेवलंभस्मधारणं॥अन्यथानरकंयांतीत्याहुर्जाबालवादिनः॥७७॥
द्विजैःकार्यंप्रयत्नेनकेवलंभस्मधारणं॥अन्यथान०॥७८॥द्विजैःकार्यंप्रयत्नेनकेवलंशिवकीर्तनं॥अन्य०॥द्विजैःका
र्यंप्रयत्नेनकेवलंशिवचिंतनं॥अन्यथा०॥८०॥जपनीयःप्रयत्नेनशैवएवमन्नुर्द्विजैः॥अन्यथा०॥८१॥द्विजैःशिवक
थाएवश्रोतव्याःसावधानतः॥अन्यथा०॥८२॥द्विजैःकार्याःशिवस्यैवप्रणामाःसर्वदामुदा॥अन्यथा०॥८३॥द्विजाः
शिवार्चनादीनिश्रौतकर्माण्ययतोद्विजैः॥शैवधर्मरतैरेवकर्तव्याण्यन्यथातुन॥८४॥शैवैरेवहिकर्तव्यःशिवमंत्रजप
स्ततः॥शैवान्येननकर्तव्यःशिवमंत्रजपोद्विजाः॥८५॥शैवधर्ममुपाश्रित्यरुद्राध्यायपरोद्विजः॥रुद्रलोकमवा
प्यांतेश्रीरुद्रमधिगच्छति॥८६॥रुद्रमावर्त्तयेन्नित्यंजलाविच्छिन्नधारया॥शिवलिंगंयोभिषिंचेत्सनिष्पापोभवि
ष्यति॥॥८७॥पुराकश्चिद्द्विजवरःसर्वदाशिवचिंतकः॥मणिमुक्तानदीतीरेस्थितोत्रैवतपोनिधिः॥८८॥एतादृशं
द्विजश्रेष्ठंदृष्ट्वाकश्चिद्द्विजोद्विजाः॥प्रणम्यदंडवद्भूमौउवाचेदंवचोमुदा॥८९॥ ॥द्विजउवाच॥ ॥द्विजवर्यव
दस्वाद्यप्रायश्चित्तंममाधुना॥